Digitization by eGangotri-South Center

धातुरूपनन्दिनी

(सर्वेषां लकाराणां सर्वैः रूपैः सहिता)
(ण्यन्तसन्नन्तयङन्तरूपोपेता)
(टिप्पण्यादिसंवलिता)

• जनार्दन हेगडे

संस्कृतभारती
बेङ्गलूरु

CC-0. In Public Domain. Cuddalore Collection, TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिवर्धिता आवृत्तिः

धातुरूपनन्दिनी

(सर्वेषां लकाराणां सर्वैः रूपैः सहिता)

(ण्यन्तसन्नन्तयगन्तरूपोपेता)

(टिप्पण्यादिसंवलिता)

जनार्दन हेगडे

संस्कृतभारती
बेङ्गलूरु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६००८५

© प्रकाशकस्य एव ।

प्रथमं मुद्रणम् - २०११ - १०००
द्वितीयं मुद्रणम् - २०१३ - १५००
तृतीयं मुद्रणम् - २०१६ - २०००
चतुर्थं मुद्रणम् - २०२० - ३०००
पञ्चमं मुद्रणम् - २०२२ - १०००
(परिवर्धितावृत्तिः)
षष्ठं मुद्रणम् - २०२४ - २०००

मूल्यं - **रू.** ८००.००

मुद्रणम् -
वागर्थ
हनुमन्तनगरम्, बेङ्गलूरु - १९

ISBN 978-93-85969-51-5

DHAATUROOPANANDINEE (धातुरूपनन्दिनी) - A collection of all 'lakaras' of all 'dhaatus' with grammatical notes; prepared by **Dr. Janardana Hegde**. *Publishers* : SAMSKRITA BHARATI, 'Aksharam', 8th Cross, 2nd Phase, Girinagar, Bengaluru - 560085

Ph- 080-26722576/26720152, Email - samskritam@gmail.com

Pages - xxii + 1132 Price - Rs. 800-00 Sixth print - March -2024

Printed at - **VAGARTHA**, Hanumanthanagar, Bengaluru - 19

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राक्कथनम्

(प्रथममुद्रणस्य)

तिङन्तसुबन्तघटितः समूहः वाक्यम् इति उच्यते । वाक्यानि अवलम्ब्य मानवः भावान् आविष्करोति । एतेषां वाक्यानां रचनं न हि सरलं सर्वदा । पदशुद्धिः वाक्येषु यदि न स्यात् तर्हि प्रयुक्तमपि वाक्यं प्रयोजनाय न भवेत् । किन्तु पदशुद्धिः न हि अल्पश्रमलभ्या । तत्रापि तिङन्तशुद्धिः भवति महते क्लेशाय । यतः धातूनां रूपाणि बहुत्र भवन्ति दुर्बोध्यानि । सर्वेषामपि धातूनां शुद्धानि सर्वाणि रूपाणि ज्ञातुम् अधीतव्याकरणशास्त्राः अपि क्लेशम् अनुभवन्ति । एवं स्थिते अन्येषां का वा कथा स्यात् !

परिनिष्ठितानि रूपाणि यदि क्वापि उपलभ्येरन् तर्हि सर्वे महत् प्रयोजनं प्राप्नुयुः इति उद्देशेन ग्रन्थस्यास्य प्रणयने मतिः कृता । पाणिन्युक्ताः द्विसहस्त्रं धातवः अपि अत्र सङ्गृहीताः । प्रतिधातु सर्वलकाररूपाणि, प्रतिलकारं नव रूपाणि च यदि दीयेरन् तर्हि ग्रन्थस्य आकारः महान् एव स्यात् । अतः यत्र ऊहाबलात् रूपाणि विशेषक्लेशं विना ज्ञातुं शक्यानि तत्र तानि न दत्तानि । पूर्वधातुं दृष्ट्वा तानि स्वयम् ऊह्यानि । यत्र विशेषः स्यात्, यत्र सन्देहः स्यात्, तादृशानि रूपाणि तु अवश्यं दत्तानि । यक्-सन्-णिजन्तरूपाणि दैनन्दिने व्यवहारे आधिक्येन अपेक्ष्यन्ते एव इत्यतः तानि अपि अत्र प्रदत्तानि ।

यत्र रूपे विशेषः स्यात् तत्र टिप्पण्यां सूत्राणि दत्तानि । अत्र या टिप्पणी दत्ता तदाधारेण प्रक्रिया समग्रा ज्ञातुं न शक्या । प्रक्रिया यदि ज्ञापनीया स्यात् तर्हि कौमुदीस्थः समग्रः दशगणीभागः एव निवेशनीयः भवेत् । तदा ग्रन्थस्य आकारः वर्धेत एव । अतः एव विशेषज्ञापनमात्रं मनसि निधाय अल्पा टिप्पणी दत्ता अत्र ।

प्रस्तावनायां धातुसम्बद्धाः बहवः अंशाः निरूपिताः । परिशिष्टे विशेषांशाः केचन ज्ञापिताः । अन्ते च धातवः अकारादिक्रमेण प्रदत्ताः । एते सर्वे अंशाः वाचकानां विशेषप्रयोजनाय भवेयुः इति अहं भावयामि ।

मान्याः गुरुवर्याः पि. लक्ष्मीनारायणशर्माणः एतं ग्रन्थम् आन्तं प्रत्यक्षरं परिशील्य परिष्कारार्हान् अंशान् ज्ञापितवन्तः । एतदर्थं तैः महान् एव श्रमः ऊढः । तेषाम् एतत् साहाय्यं कृतज्ञतापूर्वकं स्मरामि । एतस्य सज्जीकरणे बहवः साहाय्यं कृतवन्तः । ते सर्वे अपि सन्ति कृतज्ञताभाजः । मुद्रकादयः अपि कृतज्ञतापूर्वकं स्मर्यन्ते हि ।

विकृति सं ।। मार्गशीर्षकृष्णद्वादशी — **जनार्दन हेगडे**

१.०१.२०११

(षष्ठमुद्रणस्य)

पूर्वतनावृत्तिषु एकैकस्य अपि लकारस्य एकैकं रूपं दत्तम् आसीत् । तदाधारेण उपयोक्तृभिः अन्यानि रूपाणि स्वयम् ऊहनीयानि आसन् । किन्तु बहवः अत्र क्लेशम् अनुभवन्तः असूचयन् – 'प्रतिधातु प्रतिलकारं सर्वाणि रूपाणि दत्तानि स्युः चेदेव अधिकप्रयोजनं स्यात्' इति । तदानुगुण्येन पञ्चम्याम् आवृत्तौ सर्वेषाम् अपि धातूनां सर्वाणि अपि रूपाणि प्रदत्तानि । क्वचित् वैकल्पिकरूपाणि अधिकानि । तादृशे स्थले एकस्य एव धातोः निमित्तं सार्धैकपुटात्मकं पुटद्वयात्मकं वा स्थलं विनियोक्तव्यम् अभवत् । तस्मात् पुस्तकस्य पुटसङ्ख्या प्रवृद्धा । पुटसङ्ख्यायाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महतीं वृद्धिं परिहर्तुं पुस्तकस्य आकारः विशालीकृतः । इदानीं तत्तद्धातुस्थले एव ज्ञातुम् इष्टानि रूपाणि उपलभ्यन्ते इत्यतः उपयोक्तारः महत् आनुकूल्यं प्राप्नुयुः इति भावयामि ।

वैकल्पिकरूपविषये किञ्चिदत्र वक्तव्यम् । 'दशमे गणे विद्यमानाः आस्वदीयाः विकल्पेन णिचम् अर्हन्ति' इति भावयन्ति केचन । किन्तु अन्ये केचन वदन्ति – 'आस्वदीयत्वं णिजभावप्रयोजकं न' इति । वस्तुतत्त्वे विचार्यमाणे द्वितीयः पक्षः एव युक्तिसङ्गतः इति भाति । तद्विषयिणी युक्तिः 'ग्रस ग्रहणे' इत्यत्र (धा.सं. १७५०) दर्शिता, आस्वदीयत्वनिमित्तकानि णिजभावरूपाणि पुस्तकेऽस्मिन् न दर्शितानि च । विषयस्यास्य युक्तायुक्तताविषये विद्वांसः एव प्रमाणम् ।

दृष्टिपथम् आगतान् कांश्चन दोषान् अपाकृत्य एषा षष्ठावृत्तिः सज्जीकृता । एतस्याः आवृत्तेः सज्जीकरणे साहाय्यं कृतवन्तः सर्वे, मुद्रकादयः चापि सन्ति कृतज्ञताभाजः ।

शोभन सं ।। फाल्गुनपूर्णीमा **– डा. जनार्दन हेगडे**

२५.०३.२०२४

धातुरूपनन्दिनी, कृदन्तरूपनन्दिनी इत्यनयोः समावेशं विधाय '**तिङ्कृत्कोष**'नामकः लघुतन्त्रांशः (App) अपि सज्जीकृतः । सः https://play.google.com/store/apps/details?id=org.tl.tinkrit&hl=en इत्यतः अवारोपयितुं (Download) शक्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुक्रमणिका

उपोद्घातः .... **vii - xxii**

धातुसङ्ख्यायाः प्रायिकत्वम् / vii
आतिदेशिकाः धातवः / viii
सानुबन्धनिर्देशः / viii
धात्वर्थनिर्देशविषये किञ्चित् / ix
धात्वर्थनिर्देशः भीमसेनकृतः / x
धातुपाठौ लघुवृद्धभेदयुतौ / xi
परस्मैपद्यादिव्यवस्था / xii
सेडनिडादिव्यवस्था / xiii
सकर्मकाकर्मकव्यवस्था / xiv
द्विकर्मकाः धातवः / xv
अर्थनिरूपणपरः दैवपाठः / xv
दश गणाः / xv
लकारः /xvi
लेट्लकारः / xvii
परिनिष्ठितप्रत्ययरूपविधाः / xviii
भावकर्मणी / xxi
हेतुमण्णिजन्ताः / xxi
सन्नन्ताः / xxii

१. **भ्वादिगणः** ०१

२. **अदादिगणः** ४५२

३. **जुहोत्यादिगणः** ४८९

४. **दिवादिगणः** ५०२

५. **स्वादिगणः** ५६५

६. **तुदादिगणः** ५८४

७. **रुधादिगणः** ६५३

८ **तनादिगणः** ६६७

९. **क्र्यादिगणः** ६७५

१०. **चुरादिगणः** ७१०

परिशिष्टम् - १ **कण्ड्वादयः** १०८६

परिशिष्टम् - २ **अन्तर्गणाः** १०८८

परिशिष्टम् - ३ **अनुबन्धलोपप्रयोजनम्** १०९१

परिशिष्टम् - ४ **कर्मणि भावे वा यक्** १०९३

परिशिष्टम् - ५ **ग्रन्थाः ग्रन्थकाराः च** १०९७

परिशिष्टम् - ६ **धातूनाम् अकाराद्यनुक्रमणिका** ११०५

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आकरग्रन्थाः

- **बृहद्धातुरूपावली** – रचयिता – टि.आर्.कृष्णमाचार्यः
  परिष्कर्ता – विद्वान् एम्.ए.नागराजभट्टः
- **बृहद्धातुकुसुमाकरः** – (सं) – पं हरेकान्तमिश्रः
- **सिद्धान्तकौमुदी** – तत्त्वबोधिनी-बालमनोरमाटीकोपेता
- **माधवीया धातुवृत्तिः** – (सं) द्वारिकादासशास्त्री
- **संस्कृत वाङ्मय का बृहत् इतिहास** – (पञ्चदश खण्ड – व्याकरण)
  – प्रधानसम्पादकः – आचार्यः बलदेव उपाध्यायः
  – सं – प्रा॰ गोपालदत्तपाण्डेयः
- **कृदन्तरूपमाला** – श. रामसुब्रह्मण्यशास्त्रिभिः उपक्रान्ता,
  श्रीश्रीवत्साङ्काचार्य-श्रीप्रणतार्तिहरशर्मभ्यां परिपूरिता च
- **धातुरूपकल्पद्रुमः** – रचयिता – नारायणभट्टः (सं) एन्.पि. उण्णिः
- **धातुरूपप्रकाशिका** – श्री चामराजनगरश्रीकण्ठशास्त्रिविरचिता
  – परिष्करणम् – अवधूताश्रमः
- **प्रक्रियानुसारी पाणिनीयधातुपाठः** – पुष्पादीक्षित
- **पाणिनीयशब्दानुशासनम्** – (सं) सत्यानन्दवेदवागीशः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपोद्धातः

'भूवादयो धातवः' इति पाणिनीयसूत्रम् । क्रियावाचकाः 'भूप्रभृतयः धातुसंज्ञां लभन्ते' इति तदर्थः । तिङन्तरूपस्य पदस्य प्रकृतिः धातुः* । पाणिनिः पञ्चविधान् पाठान् पपाठ । तथा हि अभियुक्तवचनम् -

अष्टकं गणपाठश्च धातुपाठस्तथैव च ।

लिङ्गानुशासनं शिक्षा पाणिनेर्ग्रन्थपञ्चकम् ।। इति ।।

एवमपि श्रूयते - 'पूर्वं व्याकरणं पाठैः पञ्चभिर्मुनिना कृतम्' इति । सूत्रपाठः अष्टाध्यायी, धातुपाठः, गणपाठः, उणादिसूत्रपाठः, लिङ्गानुशासनम् इति हि ते पञ्च पाठाः । भ्वादिगणान्तर्गतानां श्रेणिः भूसत्तायामित्येवम् उपक्रम्यमाणः धातुपाठः इति उच्यते । धातुपाठे 'प्रायः' २००० धातवः उपदिष्टाः । एते धातवः 'औपदेशिकाः' इति उच्यन्ते । धातुपाठे पाणिनिना साक्षात् पठिताः धातवः औपदेशिकपदवाच्याः इति तु कथनस्य तात्पर्यम् ।

धातुसङ्ख्यायाः प्रायिकत्वम्

धातुसंख्यानिर्देशावसरे 'प्रायः' इति किमर्थम् उच्येत ? समाधानम् इत्थम् - वस्तुतः धातुपाठे बहूनां धातूनां पुनः पाठः विभिन्नप्रयोजनं मनसि निधाय कृतः दृश्यते । विषयेऽस्मिन् कौमुद्यां काश्चन पङ्क्तयः यथा - 'णुद प्रेरणे (१४२७) कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः ।', 'षद्लृ विशरणगत्यवसादनेषु । (१४२८) इह पाठो नुम्विकल्पार्थः ।', 'शद्लृ शातने । (१४२९) इह स्वरार्थ एव पुनः पाठः ।', 'व्युष विभागे । (१२१६) अयं दाहे पठितः । अर्थभेदेन तङर्थः पुनः पठ्यते ।' एतादृशं पुनःपाठादिकं न परिगणितं चेत् धातवः प्रायः १७०० भवेयुः ।

पाठभेदकारणतः अपि धातुसंख्यायाम् अनियतता दृश्यते । कौमुद्यां १९४४ धातवः दर्शिताः । एतेषु सौत्राः कण्ड्वादयः च न अन्तर्भूताः । येषां पाठभेदाः सम्मताः तेषाम् उल्लेखं कृत्वापि धातुसंख्यापरिगणनावसरे संयोजनं न कृतं कौमुद्याम् । अतः एव 'द्विसहस्रं धातवः' इति सामान्येन उच्यते । पाणिनीये धातुपाठे अनन्तर्भाविताः धातवः अपि शिष्टसम्मताः एव । तेषां प्रयोगाः अपि शिष्टसम्मतत्वेन परिगण्यन्ते एव । अतः एव धातुसंख्यायाः इयत्तानिर्देशः क्लेशाय एव । तस्मात् प्रायोवादः एव अत्र शरणम् । अतः एव क्षीरस्वामिना उच्यते -

पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः ।

न विद्मः किं जहीमोऽत्र किमुपादद्महे वयम् ।। इति ।

- तत्त्वबोधिनी (पूल सङ्घाते (१६३७) इत्यत्र)

---

* (i) दधाति शब्दान् इति धातुः । सर्वेषां नाम्नां प्रकृतिभूतः भूप्रभृतिः । धातुर्नाम क्रियावाचको गणादिपठितः शब्दविशेषः । क्रिया च पूर्वोक्तफलानुकूलव्यापारः एव । सर्वेषां च कारकाणाम् अन्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात् । - शब्दरत्नम् (हरिदीक्षितरचितम्)

(ii) 'क्रियार्थो धातुः' - शाकटायनः हेमचन्द्राचार्यः च ।

(iii) 'यः शब्दः क्रियां भावयति प्रतिपादयति सः धातुसंज्ञः भवति ।' - दुर्गसिंहः (जैनव्याकरणस्य व्याख्याता)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

‘आतिदेशिकाः’ धातवः

औपदेशिकानां विषये एषा कथा । तेभ्यः अतिरिक्ताः ‘आतिदेशिकाः’ अपि धातवः सन्ति । ‘सनाद्यन्ताः धातवः’ इति सूत्रेण अपि पाणिनिना धातुसंज्ञा विहिता । ते ‘आतिदेशिकाः’ इति उच्यन्ते । सनादयः प्रत्ययाः द्वादश –

सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाचारक्विप् णिज्यङौ तथा ।
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥

- एकैकस्य उदाहरणं यथा –

१. **सन्** – पिपठिषति । पठितुम् इच्छति । *(सू - धातोः कर्मणः समानकर्तृकात् इच्छायां वा)*

२. **क्यच्** – पुत्रीयति । (i) पुत्रम् आत्मनः इच्छति । *(सू - सुप आत्मनः क्यच्)* (ii) पुत्रमिव आचरति इति वा । *(सू - उपमानादाचारे)*

३. **काम्यच्** – पुत्रकाम्यति । पुत्रम् आत्मनः इच्छति । *(सू - काम्यच्च)*

४. **क्यङ्** – कृष्णायते । कृष्ण इव आचरति । विद्वायते/विद्वस्यते । विद्वानिव आचरति । *(सू - कर्तुः क्यङ् सलोपश्च)*

५. **क्यष्** – लोहितायते-ति । अलोहितः लोहितो भवति । *(सू - लोहितादिडाज्भ्यः क्यष्)*

६. **क्विप्** – कृष्णति । कृष्ण इव आचरति । पितरति । पिता इव आचरति । *(सू - सर्वप्रातिपदिकेभ्यो क्विब्वा वक्तव्यः)*

७. **णिच्** – पाठयति । पठन्तं प्रेरयति । *(सू - हेतुमति च)*

८. **यङ्** – बोभूयते । पुनः पुनः अतिशयेन वा भवति । *(सू - धातोरेकाचो हलादेः क्रियासमभिहारे यङ्)*

९. **यक्** – कण्डूयते-कण्डूयति । *(कण्डूञ् - गात्रविघर्षणे)* *(सू - कण्ड्वादिभ्यो यक्)*

१०. **आय** – गोपायति । *(सू - गुपूधूपविच्छिपणिपनिभ्य आयः)*

११. **ईयङ्** – ऋतीयते *(ऋतिः - जुगुप्सायां कृपायां वा)* *(सू - ऋतेरीयङ्)*

१२. **णिङ्** – उत्पुच्छयते । विविधं विरुद्धं वा पुच्छम् उत्क्षिपति । सम्भाण्डयते । भाण्डानि राशीकरोति । सञ्चीवरयते । चीवराणि अर्जयति परिधत्ते वा) *(सू - पुच्छभाण्डचीवराण्णिङ्)*

एतेषु सन्नन्तानि णिजन्तानि च रूपाणि (लटि) पुस्तकेऽस्मिन् निर्दिष्टानि बाहुल्येन । कर्मणि भावे वा विहितेन यका सहितं रूपम् अपि दर्शितम् । सण्णिचौ भावकर्मयक् च धातुभ्यः विहितौ । तदन्तानि रूपाणि लोके आधिक्येन प्रयुज्यन्ते च इत्यतः तानि रूपाणि अत्र दर्शितानि । आधिक्येन अप्रयुज्यमानत्वात् अन्यानि नात्र दर्शितानि ।

‘सानुबन्ध’निर्देशः

‘गच्छति’ इत्यादीनि यानि रूपाणि दृश्यन्ते तेषां प्रकृतिः ‘गम्ऌ’ इत्यादयः धातवः । ‘गम्ऌ’ इत्यत्र ‘ऌ’कारः इत्संज्ञकः । एतादृशैः इत्संज्ञकैः वर्णैः सहिततया धातूनां निर्देशः एव ‘सानुबन्धः’ निर्देशः इति उच्यते । प्रयोजनविशेषं मनसि निधाय पाणिनिना एषा अनुबन्धव्यवस्था परिकल्पिता दृश्यते ।

‘एध वृद्धौ’ इत्यत्र धकारोत्तरः अकारः अनुदात्तः । ‘शीङ् स्वप्ने’ इत्यत्र ङकारः इत्संज्ञकः । अनयोः कारणतः धातूनाम् आत्मनेपदसिद्धिः – *‘अनुदात्तङितः आत्मनेपदम्’* इति सूत्रेण । एवमेव ‘अल गत्यादिषु’ इत्यत्र अकारः स्वरितः इत् । ‘कृञ् करणे’ इत्यत्र ञकारः इत्संज्ञकः । अनयोः कारणतः धातूनाम् उभयपदिता – *‘स्वरितञितः कर्त्रभिप्राये क्रियाफले’* इति सूत्रेण । ‘वदि’ ‘गडि’ ‘लुटि’ इत्यादिषु इदित्करणं तु नुम्साधनाय । ञि टु डु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यादीनाम् अनुबन्धानां कारणतः अपि तत्र तत्र कार्यविशेषाः सम्भवन्ति ।

धातवः अजन्ताः हलन्ताः चेति द्विविधाः । तेषु अजन्ताः धातवः अधिकसंख्यया न सन्ति । हलन्ताः एव बहवः । किन्तु पाणिनिः हलन्तान् अपि अजन्तत्वेन एव पठति धातुपाठे ।

१. **अकारेत्तता** – अयम् अंशः पूर्वं दर्शितः एव । एध वृद्धौ इत्यत्र अकारः अनुदात्तेत् । 'अल गत्यादिषु' इत्यत्र अकारः स्वरितेत् । तत्कारणतः तयोः धात्वोः आत्मनेपदित्वम् उभयपदित्वं च क्रमेण सिद्धम् ।

२. **अदन्तता** – क्वचित् धातुः एव अदन्तत्वेन निर्दिश्यते । यथा – चुरादौ कथादयः । तेषु अन्त्यः अकारः धात्ववयवः एव । अतः एव कथादयः 'अदन्ताः' इति उच्यन्ते । लुङि दीर्घसन्वद्भावयोः निषेधः एव तस्य प्रयोजनम् । ततः 'अचकथत्' 'अररहत्' इत्यादीनि रूपाणि सिद्ध्यन्ति ।

३. **सुखोच्चारणार्थता** – सुखोच्चारणार्थम् अपि धातूनाम् अन्ते अकारः योज्यन्ते । यथा – 'अट गतौ' 'ज्वर रोगे' 'क्षर सञ्चलने' 'क्षुर विलेखने' इत्यादिषु । एतादृशेषु धातुषु दृश्यमानः अन्त्यः अकारः न इत्संज्ञकः, न वा धात्ववयवः । सुखोच्चारणार्थकः सः । यदि सः न योज्येत तर्हि 'अट्' 'ज्वर्' 'क्षर्' 'क्षुर्' इत्येवं कष्टेन उच्चारणीयं स्यात् । नान्तरेण अचं व्यञ्जनस्य उच्चारणं भवति । अथवा संहिततया उच्चारणे तु 'अड्गतौ' इत्यादौ अन्त्यः वर्णः डकारः टकारो वा इति सन्देहः स्यात् । 'ज्वर' 'क्षर' इत्यादौ 'ज्वा' 'क्षा' इत्यादीनां श्रवणात् आकारान्तभ्रमः स्यात् । 'क्षुर' इत्यादौ 'क्ष्वा' इत्यस्य श्रवणात् धातोः ऊहनम् एव कष्टाय भवेत् । अतः एव अकारसहिततया उच्चारणं कृतं पाणिनिना ।

एतदतिरिच्य ऋकारोकारादयः इरादयः अपि अनुबन्धत्वेन प्रयुज्यन्ते । ते च इत्संज्ञां प्राप्य प्रयोजनविशेषं साधयन्ति । तद्विषयकं विवरणम् अन्ते परिशिष्टे (तृतीये- पृ ४३७) पार्थक्येन प्रदत्तम् अस्ति ।

धात्वर्थनिर्देशविषये किञ्चित्...

धात्वर्थविषये किञ्चिदत्र वक्तव्यम् अस्ति । सप्तम्यन्तपदेन धात्वर्थः निर्दिश्यते धातुनिर्देशावसरे पारम्परिकैः । यथा – भू सत्तायाम्, एध वृद्धौ, अद भक्षणे इत्येवम् ।

वस्तुतः धातवः अनेकार्थाः । अत्र यः अर्थनिर्देशः कृतः तावन्मात्रार्थः एव न सः । अत्र च अर्थनिर्देशः प्रसिद्धिप्राचुर्यम् अवलम्ब्य कृतः । शिष्टसम्मताः प्रामाणिकाः अन्ये अर्थाः स्वयम् उन्नेयाः । अतः एव भाष्ये उच्यते – 'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३.१.१३१) इत्यत्र ऊहिरपि वह्यर्थे वर्तते । कथं पुनरन्यो नामान्यस्यार्थे वर्तते ? कथमूहिर्वह्यार्थे वर्तते ? बह्वर्था अपि धातवः भवन्ति' इति । 'सेधतेर्गतौ' (७.३.११३) इत्यत्र गतिग्रहणं '...गुद क्रीडायामेव' इत्यत्र एवकारग्रहणम् इत्यादिकं धातूनामनेकार्थत्वे लिङ्गम् ।

एतत्सर्वम् अभिप्रेत्यैव अभियुक्तैः उच्यते –

धातवश्चोपसर्गाश्च निपातश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः प्राज्ञैः पाठस्तेषां निदर्शनम् ।। इति ।

एवमपि श्रूयते अभियुक्तवचनम् –

'क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः' इति ।

उपसर्गबलात् धातूनां यत् नानार्थत्वं सिद्ध्यति तदपि पूर्वोक्तम् एव उपोद्बलयति । 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत्' इति श्लोकः अत्र प्रामाण्यम् आवहति ।

क्वचित् सामान्येन अर्थनिर्देशे कृते अपि अर्थविशेषे एव पर्यवसानं भवति । 'अट' 'सृ' 'गम्लृ' 'सर्प'

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यादीनाम् अर्थनिर्देशः गतिसामान्यत्वेन चेदपि अटति- सरति-गच्छति-सर्पतीनां गतिविशेषार्थकता सुधीभिः ज्ञायते एव । न्यासे 'न कवतेर्यङि' (७.४.६३) इत्यत्र उच्यते - ''सत्यपि हि शब्दार्थत्वे भिद्यते चैवैषामभिधानम् । तथा हि कवतिस्तावदव्यक्ते शब्दे वर्तते - उष्ट्रः कोकूयते इति । कुवतिरप्यार्तस्वरे वर्तते - चोकूयते वृषलः इति । पीडितः इत्यर्थः । कोतिस्तु शब्दमात्रे'' इति ।

विषयेऽस्मिन् क्षीरस्वामी (क्षीरतरङ्गिण्यां) वदति -

''मणितं सुरतकूजिते रूढम्, एवं कणितम् आर्ते, क्वणितं वीणादौ, रणितं नूपुरादौ, कूजितं विहगादौ, बृंहितं गजे, ह्रेषितं हये, वाशितं पशुषु, गर्जितं मेघादौ, गुञ्जितं भ्रमरादौ, गृञ्जितं सिंहादौ...

इत्यादि प्रतिधातुस्थं कियत् व्याचक्ष्महे वयम् ।
लोकात् सूरिभिरप्यूह्यं लक्ष्यमूलं हि लक्षणम् ।। इति ।

अतः धातुपाठे कस्मिंश्चित् अर्थविशेषे पठितानामपि धातूनां लोकप्रयोगतः अर्थान्तरे वृत्तिः इति ऊह्यम् ।''

'हेषृ - अव्यक्ते शब्दे' इत्यत्र 'अव्यक्त'शब्दस्य तात्पर्यविवरणावसरे उच्यते - ''स्वभावादयम् अश्वशब्दे वर्तते । 'अव्यक्ते शब्दे' इति धातुपाठे बहुत्र पठितम् । लोकप्रयोगानुसारेण तेषां प्रतिनियतविषयत्वं बोध्यम् । तथाहि -

''कौक्षे कर्दति, पर्दते गुदरवे, रेषेति वार्के रवे (हसे) ।
बुक्केति श्वरवे, भषेति हयजे, हेषेति हेषेति च ।।'' इति केशवस्वामी ।

धात्वर्थनिर्देशः भीमसेनकृतः ?

धात्वर्थनिर्देशः सर्वत्र न हि पाणिनिना कृतः । 'यमोऽपरिवेषणे' 'वेश्च स्वनो भोजने' 'सेधतेर्गतौ' 'तनूकरणे तक्षः' 'श्लिषः आलिङ्गने' इत्यादिषु क्वचित् एव पाणिनिना अर्थनिर्देशः कृतः दृश्यते * । प्रतिधातु अर्थनिर्देशः तु भीमसेनाचार्याख्येन कृतः इति प्राज्ञाः वदन्ति ।

- बालमनोरमायाम् (भू - सत्तायाम् इत्यत्र) उच्यते - 'अर्थनिर्देशस्त्वाधुनिक इति वक्ष्यते' इति ।
- यद्यपि अर्थनिर्देशस्त्वाधुनिकः ..... - 'टु वम उद्गिरणे' इत्यत्र तत्त्वबोधिनी ।
- चुरादेः अन्ते 'पुच्छादिषु धात्वर्थे....' इति प्रतीकमादाय बालमनोरमायाम् उच्यते - 'धातुपाठं रचयितुः भीमसेनस्य वाक्यमिदम् इत्याहुः' इति । तत्त्वबोधिनी अपि वदति - 'भीमसेनस्य वाक्यम्' इति ।
- 'न च अर्थपाठः परिच्छेदकः । तस्य अपाणिनीयत्वात् अभियुक्तैः उपलक्षणतया उक्तत्वात्' इत्यस्य कैयटवाक्यस्य विवरणावसरे अभियुक्तपदव्याख्याने नागेशेन उच्यते - 'भीमसेनेनेत्यैतिह्यम्' इति ।
- 'कः खल्वपि पचादीनां क्रियावचनत्वे यत्नं करोति' (महा० ३.१.१९) इत्यत्र नागेशः वदति - 'पचादीनाम् अर्थरहितानामेव पाठात्' इति ।
- भट्टोजिदीक्षितोऽपि भूवादिसूत्रकौस्तुभे (१.३.१) अर्थरहितानाम् एव धातूनां पाठं स्वीचकार । तथा हि - ''न च या - प्रापणे इत्याद्यर्थनिर्देशो नियामकः । तस्य अपाणिनीयत्वात् । भीमसेनादयो हि अर्थं निर्दिदिशुः इति स्मर्यते । पाणिनिस्तु 'भ्वेध...' इत्याद्यपाठीदिति भाष्यकैयटयोः स्पष्टम्'' इति ।
- 'भूवादयो धातवः' (१.३.१९) इत्यस्य सूत्रस्य भाष्ये अस्ति - 'परिमाणग्रहणं कर्तव्यम् । कुतो ह्येतत् । भूशब्दो धातुसंज्ञो भविष्यति, न पुनर्भ्वेधशब्दः' इति । 'भ्वेध...' इत्यस्य समुदायस्य धातुसंज्ञा कुतो न स्यात्

* ''कुच सम्पर्चनादौ । कुच शब्दे तारे इति चवर्गीयान्तेषु पठितस्य पुनरिह पाठः सम्पर्चनादावेव ज्वालादित्वप्रयुक्तो णप्रत्ययो यथा स्यात् इति मनोरमादौ स्थितम् । अत्र नव्याः - 'अनेनैव ग्रन्थेन पाणिनिनापि क्वचित्क्वचिदर्थनिर्देशः कृतः इत्यनुमीयते । अन्यथा अत्रत्यग्रन्थस्वारस्यभङ्गापत्तेः' इत्याहुः'' - तत्त्वबोधिनीव्याख्या ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति आक्षेपः अत्र। तस्मात् स्पष्टं यत् मध्ये 'सत्तायाम्' इति अर्थनिर्देशपरः शब्दः नास्ति इति ।

◆ 'चुट्टू' (१.३.७) इत्यस्य भाष्ये अस्ति - 'यदयमिरितः कांश्चित् नुमनुषक्तान् पठति उबुन्दिर् निशामने स्कन्दिर् गतिरोषणयोरिति तेन नेरितामिदिद्विधिः ।' एतादृशानां धातूनाम् इरनुबन्धः योजितः अर्थनिर्देशः च अत्र कृतः इति ज्ञायते ।

◆ 'नमोवरिवश्चित्रङः क्यच्' (३.१.१९) इति सूत्रस्य भाष्ये लिख्यते - 'कः खल्वपि पचादीनां क्रियावचनत्वे यत्नं करोति ? येनैव खल्वपि हेतुना पचादयः क्रियावचनास्तेनैव क्यजादयोऽपि । एवमर्थं खल्वाप्यार्थः चित्रयति क्वचिदर्थान् आदिशति क्वचिन्नेति ।'

◆ नागेशः एव पुनर्वदति शब्दकौस्तुभे (१.२.२०) - 'तितिक्षाग्रहणं ज्ञापकं भीमसेनादिकृतोऽर्थनिर्देश उदाहरणमात्रम्' इति ।

◆ धातुकाव्ये नारायणभट्टः लिखति - 'उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात्' इति । अत्र वृकोदरो नाम भीमसेनः एव । तस्य श्लोकस्य व्याख्याने लिख्यते - 'वृकोदरोदितानिति । भीमसेनप्रणीतानित्यर्थः' इति ।

◆ धातुरूपकल्पद्रुमे लिख्यते - 'धातुपाठः पाणिनिप्रणीत इति केचिद्वदन्ति । भीमाचार्यप्रणीत इत्यपरे । पाणिनिना धातुपाठे धातूनां क्रमः एव निर्दिष्टः, तेषाम् अर्थनिर्देशस्तु भीमाचार्येण योजितः इत्यपि मतान्तरम्' इति ।

एतादृशैः प्रमाणैः स्पष्टं भवति यत् धात्वर्थनिदेशः 'भीमसेनकृतः' इति । किन्तु व्याकरणशास्त्रेतिहासलेखकः युधिष्ठिरमीमांसकः, अन्ये केचन च एतं पक्षं नानुमन्यन्ते । स्वीयाभिः एव युक्तिभिः ते प्रतिपादयन्ति यत् - 'धातूनामर्थनिर्देशः पाणिनीयः स्मृतो बुधैः' इति । माधवीयधातुवृत्तौ द्वारिकादासशास्त्रिवर्येण रचितः श्लोकार्धः एषः । सः एव द्वारिकादासशास्त्रिवर्यः (माधवीयधातुवृत्तेः* सम्पादकः) युधिष्ठिरमीमांसकस्य आशयम् एवं सङ्गृह्णाति -

'यच्च मैत्रेय-भट्टोजिदीक्षित-नागेशादयो धात्वर्थनिर्देशं भीमसेनकृतं मन्यन्ते, तत्तु भाष्याद्यपर्यालोचनविजृम्भितमेव । भीमसेनो नाम कश्चित् वैयाकरणः सायणाचार्यादिवत् धातुपाठं व्याख्यातवान् इत्येव वक्तुं शक्यते, न तु तेन धात्वर्थनिर्देशः कृतः इत्यपि, भाष्यादिविरुद्धत्वात्' इति ।

तथापि धात्वर्थनिर्देशः भीमसेनकृतः इत्यत्र एव विद्वांसः नैर्भर्यं प्रकटयन्ति ।

धातुपाठौ लघुवृद्धभेदयुतौ

'धातुपाठो द्विधा प्रोक्तो लघुवृद्धविभेदतः' इत्यस्याः शीर्षिकायाः अधः द्वारिकादासशास्त्रिवर्यः लिखति - ''वस्तुतस्तु भगवता पाणिनिना उभयथा धातुपाठप्रवचनं कृतम् । तत्र तेन केचन अर्थभेदरहिताः - 'भ्वेदस्पर्ध...' इत्येवं धातवः एव संहितापाठेन प्रतिपादिताः । अपरे - 'भू सत्तायाम्' उदात्तः । एधः वृद्धौ...' इत्येवम् अर्थनिर्देश-सहिताः । अस्याम् उपपत्तौ महाभाष्यमेव प्रमाणम् । तथा च अर्थनिर्देशरहितो धातूनां संहितापाठः 'लघुपाठः' इति वैयाकरणनिकाये प्रसिद्धः, सार्थनिर्देशः धातुपाठश्च 'वृद्धपाठः' इति । अष्टाध्याय्याः व्याख्यानग्रन्थानाम् आलोडनेन शैली चेयमाचार्यस्य इत्यनुमीयते । तथा च यथा अष्टाध्याय्यां भाष्यवार्तिककृतोर्व्याख्यानं लघुपाठमाश्रित्य, काशिकाकारादीनां च व्याख्यानं वृद्धपाठमाश्रित्य इति द्विधा व्याख्यानमुपलभ्यते, एवमेव धातुपाठस्यापि द्विधा प्रवचनस्वीकारे सर्वं समञ्जसं स्यात् । परम्परा चेयं प्राचीनानाम् आचार्याणां लघुवृद्धपाठप्रवचनरूपा इति, पुष्कलं

* प्र० - तारा बुक् एजन्सी, दिल्ली - तृतीयं संस्करणं - २०००

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाङ्मयमपि अत्र प्रमाणम् इति दिक् ।''

'वृद्धपाठ'त्वेन ख्यातः सार्थः पाठः भवतु नाम पाणिनिविरचितः, भीमसेन-सन्दब्धः वा, अस्माकं तु सः प्रमाणभूतः एव । कौमुद्यां यः पाठः आदृतः सः एव पुस्तकेऽस्मिन् अनुसृतः ।

कौमुद्यां दर्शिते अस्मिन् अपि पाठे पाठभेदः दर्शितः बहुधा । विषयेऽस्मिन् युधिष्ठिरमीमांसकः वदति -

''यः खलु अर्थनिर्देशसहितः धातुपाठः सम्प्रति उपलभ्यते, तत्र पाठानां महती अव्यवस्था दृश्यते । तत्र केषाञ्चित् धातूनां क्रमविपर्यासः, केषाञ्चित् अर्थविपर्ययः, केषाञ्चिदभावः, केषाञ्चिच्च पुनराधिक्यमपि दृश्यते । न हि धातुपाठस्य कयोरपि द्वयोर्व्याख्यानयोः समानः पाठः उपलभ्यते । एषा च अव्यवस्था चिरकालादेव प्रसृता, उत्तरोत्तरं च वृद्धिं गता'' इति । कौमुद्यादिषु कृतस्य पाठभेदानाम् उल्लेखस्य दर्शनात् विषयस्यास्य यथार्थता दृढतां याति ।

अर्थनिर्देशविरहितः लघुपाठः तु पठने पाठने च उपयोगाभावात् शनैः शनैः विरलताम् अगात् । अद्य तु विलुप्ता एव अस्ति सा । अर्थनिर्देशसहितः पाठः तु सर्वत्र उपलभ्यते । सोऽपि त्रिविधः इति वैयाकरणेषु प्रसिद्धम् । विषयेऽस्मिन् द्वारिकादासशास्त्रिवर्यः वदति -

''यथा निखिलसंस्कृतवाङ्मये बहूनां ग्रन्थानां देशभेदेन विविधपाठाः उपलभ्यन्ते, तथैव पाणिनीयशब्दानुशासनस्यापि स्थितिः । पाणिनेः अष्टाध्याय्याः काशिकावृत्तिसम्मतः पाठः पौरस्त्यैः प्रमाणत्वेन आश्रीयते । दाक्षिणात्यः तत्रभवान् कात्यायनः यं पाठमाश्रित्य वार्तिकानि प्रणिनाय सः दक्षिणेषु एव प्रमाणम् । क्षीरस्वामी च यं सूत्रपाठं क्षीरतरङ्गिण्यादिषु निर्दिशति सः पश्चिमोत्तरशाखीयः । एवम् अर्थनिर्देश-सहितस्य वृद्धधातुपाठस्यापि देशभेदेन त्रयः पाठाः उपलभ्यन्ते । तत्र प्राच्याः मैत्रेयप्रभृतयः यं पाठम् आश्रयन्ति सः पश्चिमोत्तरदेशेषु प्रमाणत्वेन स्वीकृतः । आचार्यपाल्यकीर्तेः उपजीव्यभूतः पाणिनीयधातुपाठश्च दाक्षिणात्यसम्मतः धातुपाठः इत्यनुमीयते, न तु सः इदानीं साक्षात् उपलभ्यते । सम्प्रति यः पाणिनीयः धातुपाठः वैयाकरणैराद्रियते सः सायणाचार्यैः परिष्कृतः वर्तते इति ऐतिह्यपृष्ठानि प्रमाणम् ।''

परस्मैपद्यादिव्यवस्था

धातवः परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः चेति त्रिविधाः इति वयं जानीमः । किन्तु कः धातुः परस्मैपदी, कः आत्मनेपदी कश्च उभयपदी इति कथम् अभिज्ञायेत इति प्रश्नः अस्मान् बाधते सर्वदा । अनुभवबलात् ग्रन्थादीन् परिशील्य च वयम् आत्मनेपद्यादिकं निर्णयन्तः स्मः । अनुभवस्य अपर्याप्ततायां, ग्रन्थस्य च अप्राप्तौ, प्रमादान् एव कुर्वन्तः स्याम अपि । एषा तु अद्यतनी स्थितिः ।

वस्तुतः व्यवस्थेयं धातुस्थान् स्वरान् अवलम्ब्य तिष्ठति । *'अनुदात्तङित आत्मनेपदम्'* *'स्वरितञितः कर्त्रभिप्राये क्रियाफले'* इत्यादीनि सूत्राणि एव अत्र प्रमाणम् । धातुषु स्वराः तर्हि एव इत्संज्ञां लभेरन्, यदि ते अनुनासिकाः स्युः । तथा हि पाणिनीसूत्रम् - *'उपदेशेऽजनुनासिक इत्'* इति । किन्तु कः स्वरः अनुनासिकत्वेन उच्चारितः इति तु नास्माभिः ज्ञायते । यतः इदानीं निरनुनासिकोच्चारणम् एव प्रचलति लोके । त्रैस्वर्यस्य अभावात्, अनुनासिकोच्चारणस्य अदर्शनात् च अद्य नास्माभिः झटिति अवगन्तुं शक्यं यत् कः धातुः परस्मैपदी, कश्च आत्मनेपदी उभयपदी वा इति । अतः एव वैयाकरणकुले वचनं श्रूयते - 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' इति । पुस्तकादिषु यत् उक्तं मुद्रितं वा तद् दृष्ट्वा अनुनासिकता स्वरितानुदात्ततादयः च अनुमीयन्ते ।

पूर्वं तु सानुनासिकपाठः सस्वरपाठः च अनुस्त्रियमाणः आसीत् । हरदत्तमिश्रः पदमञ्जर्यां लिखति ('उपदेशेऽच्...' इति सूत्रव्याख्याने) - 'सूत्रकारेण तावद्विवक्षिताः सर्वेऽनुनासिकाः पठिताः डु लभँष् प्राप्तौ इतिवत् । लेखकैस्तु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्कीर्णा लिखिता । तच्च श्रुतिपरम्परया निर्णेयम्' इति ।

भट्टोजिदीक्षितः प्रौढमनोरमायां लिखति ('उपदेशेऽच्..' इत्यत्र) – 'यद्यपि सूत्रकारकृतोऽनुनासिकपाठः इदानीं परिभ्रष्टः, तथापि वृत्तिकारादिव्यवहारबलेन यथाकार्यं प्राक् स्थित इत्यनुमीयते इति भावः' इति । स एव शब्द-कौस्तुभे वदति – 'तत्र शास्त्रकृता पठितस्यापि अनुनासिकस्य पाठः इदानीम् अपभ्रष्टः । अत एव आहुर्वृत्तिकाराः – प्रतिज्ञानुनासिक्याः पाणिनीयाः' इति ।

एषा एव कथा सस्वरधातुपाठविषये अपि । विषयेऽस्मिन् सत्यानन्दवेदवागीशः पाणिनीयशब्दानुशासनाख्ये ग्रन्थे लिखति – ''सूत्रकृता पाणिनिना स्वधातुपाठे सर्वे धातवः उदात्तादिस्वरैर्वर्णधर्मैः युक्ता एव उपादिश्यन्त । सर्वांश्च धातून् उदात्ताद्युच्चारयुक्तान् एव स्वशिष्यान् अध्यापयामास । लेखने च तान् स्वरबोधक-चिह्नयुक्तान् एव लिलेख लेखयाम्बभूव वा । सः तथाविधः स्वरचिह्नयुक्तः पाठः सानुनासिकपाठवत् सर्वथैव भ्रष्टताम् इयाय'' इति ।

यः सर्वथा लुप्तः सः सानुनासिकः सस्वरः धातुपाठः कीदृशः भवितुम् अर्हेत् इति दिङ्मात्रम् अत्र प्रदर्श्यते –

- **आत्मनेपदिनः अनुदात्तेतः यथा –**

  'एधँ॒ वृद्धौ । स्पर्धँ॒ सङ्घर्षे । गाधृँ॒ प्रतिष्ठालिप्सयोर्ग्रन्थे च । बाधृँ॒ विलोडने । .. चेष्टँ॒ चेष्टायाम् । वडिँ॒ विभाजने । अयँ॒ गतौ ।

- **परस्मैपदिनः (उदात्तेतः) यथा –**

  अतँ सातत्यगमने । चितीँ संज्ञाने । च्युतिँर् आसेचने । श्च्युतिँर् क्षरणे । ...गर्जँ शब्दे । तेजँ पालने । व्रजँ गतौ ।

- **उभयपदिनः (स्वरितेतः)** यथा –

  हिक्कँ॑ अव्यक्ते शब्दे । अञ्चुँ॑ गतौ याचने च । अञ्चुँ॑ इत्येके । टु याचृँ॑ याच्ञायाम् । रेटृँ॑ परिभाषणे ।

प्राचीने स्वरपाठे लुप्ते अपि प्रयासेन सञ्जीकृतः तादृशः धातुपाठः अद्यापि उपलभ्यते । सत्यानन्दवेदवागीशवर्येण प्रकाशितः 'पाणीनीयशब्दानुशासनम्' इत्याख्यः ग्रन्थः सानुनासिकसस्वरधातुपाठयुक्तः वर्तते । तथापि स्वरादिरहितस्य एव पाठस्य प्राचुर्यात् परस्मैपद्यादीनाम् अभिज्ञानसमस्या तु समस्ति एव, सम्भविष्यति अपि ।

एतदपि किञ्चित् स्मर्तव्यम् – उपसर्गवशात् अर्थविशेषनिमित्ताच्च परस्मैपदिनः अपि क्वचित् आत्मनेपदिनः भवन्ति । तद्यथा – *'विपराभ्यां जेः'* इति सूत्रेण 'पराजयते' 'विजयते' इत्यादीनि रूपाणि सम्भवन्ति । एवम् आत्मनेपदिनः अपि परस्मैपदिनः भवितुम् अर्हन्ति । आत्मनेपदी 'रमु'धातुः *'व्याङ्परिभ्यो रमः'* इति शास्त्रात् परस्मैपदी भवति वि, आङ्, परि इत्येतेषाम् उपसर्गाणां योगे । ततः 'विरमति' 'आरमति' 'परिरमति' इत्येतानि सिद्ध्यन्ति । अर्थविशेषस्य उदाहरणं यथा – तिष्ठतिः उपसर्गयोगे अकर्मकत्वे सति आत्मनेपदी भवति । 'भोजनकाले उपतिष्ठते' । सन्निहितो भवति इत्यर्थः ।

एतादृशाः अंशाः सिद्धान्तकौमुद्याम् आत्मनेपदपरस्मैपदप्रकरणयोः द्रष्टव्याः ।

सेडनिडादिव्यवस्था

धातूनां स्वरव्यवस्था पूर्वम् उपस्थिता खलु । तत्सम्बद्धा इड्व्यवस्था अपि किञ्चिदत्र निरूप्यते । धातवः सेटः, अनिटः, विभाषितेटः इति त्रिधा । ये उपदेशे अनुदात्ताः ते सर्वे अनिटः । ये च उपदेशे उदात्ताः ते सेटः । उदाहरणमुखेन एव विषयम् अवगच्छाम । 'युजँ॒' इति धातुः । अत्र अन्त्यः अकारः (जकारोत्तरः) अनुनासिकत्वात् इत्संज्ञकः । तस्य इत्संज्ञायां शिष्टः भागः 'यु॒ज्' इति । स च एकाच् । तत्र यकारोत्तरः अकारः अनुदात्तस्वरयुक्तः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनुदात्तस्वरः अधोरेखया (_), स्वरितस्वरः ऊर्ध्वमुखरेखया (ˈ), उदात्तः रेखाराहित्येन च निर्दिश्यते । अनुदात्तस्वरयुक्तः एकाच् धातुः अनिट् । अतः एव तृचि 'यष्टा' इति रूपम् । एवमेव 'पठँ' इति धातुः उदात्तस्वरयुक्तः । पकारोत्तरः अकारः रेखाविरहितः सन् निर्दिष्टः । स च उदात्तः । तस्मात् सः धातुः सेट् । अतः एव तृचि 'पठिता' इति रूपम् ।

एवम् उदात्तानुदात्तस्वरम् आश्रित्य धातुषु सेडनिड्व्यवस्था निर्दिष्टा । किन्तु स्वरसहितधातुपाठस्य विलुप्तत्वात् धातोः सेट्त्वम् अनिट्त्वं च उपदेशबलात् एव ज्ञातव्यम् । अतः एव 'ऊदॄदन्तैर्यौतिरुक्ष्णु... ' इति कारिकाश्लोकैः अनिट्धातवः सङ्गृह्यन्ते । ते च श्लोकाः विस्तरभयात् अत्र न निरूप्यन्ते ।

एतदत्र स्मर्तव्यं यत् सेट्कस्य धातोः परे सेट्प्रत्यये स्थिते एव इडागमः भवति, सेट्कस्य धातोः परे अनिटि प्रत्यये इडागमः न भवति इत्यादिकम् । विस्तरस्तु कौमुद्यादिषु ग्रन्थेषु द्रष्टुं शक्यः, पुष्पादीक्षितवर्यया रचिते 'इडागम'नामके ग्रन्थे वा ।

सकर्मकाकर्मकत्वव्यवस्था

कर्मसम्बन्धम् अनुलक्ष्य धातवः सकर्मकाकर्मकत्वेन द्विधा । फलव्यापारयोः सामानाधिकरण्यं यत्र, तत्र अकर्मकत्वम् । तयोः वैयधिकरण्ये च सकर्मकत्वम् । तथा हि अभियुक्तवचनम् -

फलव्यापरयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ।। इति ।।

विषयोऽयं सर्वैः ज्ञातप्रायः एव इत्यतः नात्र विस्तार्यते । अर्थभेदेन उपसर्गसमभि-व्याहारेण च सकर्मकम् अकर्मकं वा भवितुम् अर्हति । 'जि'धातुः सर्वोत्कर्षस्थित्यर्थे (जयार्थे) अकर्मकः - 'देवदत्तो जयति' इति । स एव पराभवार्थे सकर्मकः - 'रामः रावणं जयति' इति । 'भू'धातुः अकर्मकोऽपि 'सुखम् अनुभवति' इत्यादिषु उपसर्गसमभिव्याहारात् सकर्मकः । अतः एव धातुपाठेषु प्रदर्शिते अर्थे तस्य धातोः कर्मान्वययोग्यतायां सकर्मकत्वनिर्देशः । अन्यथा अकर्मकत्वम् ।

अर्थान्तरवृत्त्यादिना अपि सकर्मकस्यापि अकर्मकत्वं भवति । तथा हि -

धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।। इति ।

एतस्य आशयः अपि सर्वैः विदितप्रायः एव भवतीत्यतः नात्र उदाहरणादिकं प्रदर्श्यते, विव्रियते वा ।

अकर्मकत्वद्योतकाः सत्ताद्यर्थाः प्राचीनैः एवं सङ्गृह्यन्ते -

वृद्धिक्षयभयजीवितमरणं लज्जासत्तास्थितिजागरणम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ।। इति ।।

अयमेव आशयः विस्तरेण इत्थं सङ्गृह्यते अभियुक्तैः -

सत्ताजीवनदर्पभीतिशयनक्रीडानिवासक्षया-
व्यक्तध्वाननभोगतिस्थितिजरालज्जाप्रमादोदये ।
मोहे खेटनवेगयुद्धदहनख्यातिक्षरोन्मादके
शुद्धिस्वेदपलायनभ्रमणकेऽशान्तौ श्रुतौ मज्जने ।।
दृप्तौ जागररोषवक्रगमनोत्साहे मृतौ संशये
ग्लानौ मन्दगतौ च नृत्यपतने चेष्टाक्रुधौ रोदने ।
वृद्धौ हावकृतौ च सिद्धिविरतौ हर्षोपवेशे बले
कम्पोद्वेगनिमेषभङ्गयतनार्थे धातवोऽकर्मकाः ।।
दौर्बल्यादिषु चार्थेषु वर्तमानास्तु धातवः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाचका भावमात्रस्य यतस्तस्मादकर्मकाः ।।
कौटिल्यादिषु चार्थेषु प्रोक्ता ये ते तु धातवः ।
तद्वद्भावेऽकर्मकाः स्युः तद्वत्कृत्यां सकर्मकाः ।।

द्विकर्मकाः धातवः

परिगणिताः धातवः तदर्थकाः च द्विकर्मकाः अपि भवन्ति । विषयेऽस्मिन् कौमुद्युक्तः सङ्ग्रहश्लोकः इत्थम् -
दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ।।

'गतिबुद्धिप्रत्यवसानार्थ....' इत्यादिभिः सूत्रैः अपि द्विकर्मकता (णिजन्त-धातुप्रयोगे) सिद्ध्यति । विषयेऽस्मिन् विस्तरः तु कौमुद्यादिषु द्रष्टव्यः ।

एतदत्र स्मरणमर्हति - 'अकथितं च' इति सूत्रेण 'गतिबुद्धि....' इत्यादिभिः सूत्रैः च येषु द्विकर्मकत्वं सिद्धं, तेषां वाक्यानां कर्मणिप्रयोगे प्रथमान्तता कस्य कर्मणः स्यात् इति जिज्ञासा स्यात् बहूनाम् । तत्रायं श्लोकः स्मर्तव्यः -
गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् ।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ।। इति ।

एतस्य विस्तरेण विवरणं कौमुद्यादिषु, 'कारक'नामके पुस्तके (जि. महाबलेश्वरभट्टविरचिते) वा द्रष्टव्यम् ।

अर्थनिरूपणपरः 'दैव'पाठः

अस्मिन् पुस्तके धातुपाठोक्तः सिद्धान्तकौमुद्यां निरूपितः धात्वर्थः प्रतिधातु उक्तः एव सप्तम्यन्तपदेन । कौमुद्याद्युक्तः पाठभेदः अपि यथाशक्ति तत्र तत्र दर्शितः । ततः अर्थनिरूपणपरः सदृशधातुस्मारकः श्लोकः श्लोकार्धो वा यथाप्राप्तं दर्शितः । 'देव'नामकेन प्राचीनवैयाकरणेन एकस्मिन् गणे भिन्नेषु गणेषु वा पठितानां सरूपाणाम् अंशतः भिन्नानां च धातूनां पुनः पाठस्य प्रयोजनदर्शनार्थं श्लोकरूपः कश्चन ग्रन्थः निर्मितः, यश्च वैयाकरणनिकाये 'दैवम्' इति नाम्ना प्रसिद्धः । यथा -
पठितस्य पुनः पाठे फलं वृत्तेन वक्ष्यते ।
न विना वृत्तबन्धेन वस्तु प्रायेण सुग्रहम् ।।
दाञो दत्ते ददातीति, दाणो यच्छति, दो द्यति ।
दाति दायति दाप्दैपोः दयते रक्षणे ङितः ।। इति ।।

श्रीमता रामसुब्रह्मण्यशास्त्रिवर्येण सन्दब्धायां कृदन्तरूपमालायाम् एते 'देव'निर्मिताः श्लोकाः प्रतिधातु प्रदत्ताः प्रायः । ततः एव चिताः ते श्लोकाः एतस्मिन् पुस्तके समावेशिताः । अर्थनिरूपणावसरे येषां ग्रन्थानां ग्रन्थकाराणां च नामानि उद्धृतानि तेषां विवरणं परिशिष्टे (पञ्चमे) प्रदत्तम् अस्ति पार्थक्येन ।

दश गणाः

धातवः दशसु गणेषु विभक्ताः सन्ति पाणिनिना । ते च गणाः यथा -
भ्वाद्यदादी जुहोत्यादिः दिवादिः स्वादिरेव च ।
*तुदादिश्च रुधादिश्च तनु-क्र्यादि-चुरादयः** ।। इति ।

* अयमेव अंशः हरियोगिना शाब्दिकाभरणे प्रकारान्तरेण उच्यते । सः यथा -
शब्लुकौ श्लुश्यनौ श्नुश्शः श्यमुश्नास्वार्थणिच् तथा । इति वैकरणा भेदा दश तिङ्प्रत्यये शपः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमादिनाम्ना अपि एते गणाः निर्दिश्यन्ते । कस्मिन् गणे कति धातवः सन्ति, विकरणप्रत्ययः कः, विकरणप्रत्ययविधायकं सूत्रं किम् इत्यादिकम् अधः कोष्ठक-रूपेण प्रदत्तम् अस्ति ।

धातवः (१९४४)					
गणनामानि	*प्रथमः धातुः*		*विकरणविधायकं सूत्रम्*		*धातुसंख्या*
१. भ्वादिः	भू सत्तायाम्	भवति	कर्तरि शप्	(अ)	१०१०
२. अदादिः	अद भक्षणे	अत्ति	अदिप्रभृतिभ्यः शपः	(लुक्)(-)	७२
३. जुहोत्यादिः	हु दानादनयोः	जुहोति	जुहोत्यादिभ्यः श्लुः	(-)	२४
४. दिवादिः	दिवु क्रीडादिषु	दीव्यति	दिवादिभ्यः श्यन्	(य)	१४०
५. स्वादिः	षुञ् अभिषवे	सुनोति	स्वादिभ्यः श्नु	(नु)	३४
६. तुदादिः	तुद व्यथने	तुदति	तुदादिभ्यः शः	(अ)	१५७
७. रुधादिः	रुधिर् आवरणे	रुणद्धि	रुधादिभ्यः श्नम्	(न)	२५
८. तनादिः	तनु विस्तारे	तनोति	तनादिकृञ्भ्यः उः	(उ)	१०
९. क्र्यादिः	(डु)क्रीञ् द्रव्यविनिमये	क्रीणाति	क्र्यादिभ्यः श्ना	(ना)	६१
१०. चुरादिः	चुर स्तेये	चोरयति	....चुरादिभ्यो णिच्	(अय)	४१०

'कः धातुः कस्मिन् गणे अन्तर्भवति' इति अभिज्ञानम् एतेषां विकरणप्रत्ययानाम् आधारेण एव करणीयम् । अष्टानां गणानां विकरणप्रत्ययाः तु प्रत्यक्षं दृश्यन्ते । द्वितीयतृतीयगणयोः विकरणप्रत्ययः लुप्यते । तृतीये गणे धातोः प्रथमः वर्णः द्वित्वं प्राप्नोति । तद्बलात् तृतीये गणे अन्तर्भूताः धातवः अभिज्ञातव्याः । विकरण-प्रत्ययः यत्र न दृश्यते, प्रथमस्य वर्णस्य द्वित्वमपि यत्र नास्ति सः धातुः द्वितीये गणे अन्तर्भूतः इति मन्तव्यम् ।

प्रथमषष्ठगणयोः साम्यम् अधिकम् । प्रथमगणस्य विकरणप्रत्ययः 'शप्' । षष्ठस्य च 'शः'। ये धातवः गुणार्हाः (इकार-उकार-ऋकारवन्तः स्युः) लघूपधाः च स्युः तेषां विषये निर्णयः सुकरः । लडादिषु सार्वधातुकलकारेषु यस्य गुणः दृश्यते सः प्रथमे गणे स्थितः इति निर्णेतुं शक्यम् । यथा - बुध - बोधति, कृष - कर्षति । षष्ठे गणे स्थितानां गुणो न । यथा - तुद - तुदति, लिख - लिखति । किन्तु एतस्यापि अपवादाः स्युः एव । अकारयुक्तेषु धातुषु निर्णयाय विनिगमकं किमपि नास्ति । अतः अनुभवबलात् एव निर्णेतव्यं - कः धातुः प्रथमे षष्ठे वा गणे अन्तर्भवति इति ।

प्रथमे चतुर्थे षष्ठे दशमे च ये धातवः स्युः तेषां सादृश्यं भवति । यथा - पठति (१) नृत्यति (४) तुदति (५), चोरयति (१०) । विकरणप्रत्यययोजनस्य अनन्तरं यत् रूपं दृश्येत तस्य 'अङ्गम्' इति संज्ञा । एतेषु चर्तुषु अपि गणेषु धातूनाम् अदन्ताङ्गता । (ह्रस्वः अकारः (अत्) येषाम् अन्ते स्यात् ते अदन्ताः) अतः एव एतेषां सादृश्यम् ।

लकारः

लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् इति दश लकाराः । लकारः इति प्राचां संज्ञा । एतेषु पञ्चमः लकारः (लेट्) वेदमात्रगोचरः । अतः तस्य रूपाणि नात्र प्रदर्श्यन्ते । विध्याशीर्भेदेन लिङ् द्विविधः । तथा च लोके अपि दश लकाराः । अस्मिन् पुस्तके प्रथमादिसङ्ख्यया ते सूचिताः । कस्मिन् अर्थे एते लकाराः भवन्ति इति पश्याम -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- **लट्** - वर्तमानार्थे स्थितात् धातोः लट् भवति - *'वर्तमाने लट्'* (३.२.१२३) इति सूत्रेण । प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वम् । तच्च कालगतं भवति । उदा - रामः गच्छति ।
- **लिट्** - भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात् - *'परोक्षे लिट्'* (३.२.११५) इति सूत्रेण । 'अतीतरात्रेः अन्त्ययामेन आगामिरात्रेः आद्ययामेन च सहितः दिवसः अद्यतनः' इति कैयटः* (लुङ्सूत्रभाष्ये) । तस्मात् भिन्नः अनद्यतनः । 'परोक्षत्वं तु वर्षशतवृत्तत्वम् इत्येके । वर्षसहस्रवृत्तत्वम् इत्यपरे । द्व्यहवृत्तत्वं त्र्यहवृत्तत्वं चेत्यन्ये । कुड्यकटाद्यन्तरितत्वम् इति इतरे । प्रयोक्तुः इन्द्रियागोचरत्वं परोक्षत्वम् इत्येव सर्वसम्मतम्' इति बालमनोरमाव्याख्या । परोक्षताविषये आचार्यः विश्वेश्वरः वदति -

  परभावः परस्यार्थे परोक्षे लिटि दृश्यते । उत्वं पादेः परादक्ष्णः सिद्धं वा स्यात् निपातनात् ।।

  परोक्षे लिटीत्येतत्सूत्रस्थत्वेन परोक्षशब्दोपलक्षणम् । परमक्ष्णोः परोक्षम् । अक्षि च बाह्येन्द्रियपरम् ।'' इति । उदा - रामः बभूव ।
- **लुट्** - भविष्यति अनद्यतने अर्थे धातोः लुट् स्यात् - *'अनद्यतने लुट्'* (३.३.१५) इति सूत्रेण । अनद्यतनस्य अर्थः लिटि विवृतः एव । उदा - अहं श्वः गन्तास्मि ।
- **लृट्** - भविष्यत्सामान्येऽर्थे वर्तमानात् धातोः लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च - *'लृट् शेषे च'* (३.३.१३) इति सूत्रेण । उदा - अहम् अद्य सायं श्वः परश्वः वा गमिष्यामि ।

एतदत्र स्मर्तव्यं यत् भविष्यति लुट्लृटौ विहितौ । तयोः लुट् तु अनद्यतने एव । लृट् सर्वस्मिन् अपि भविष्यति (अद्यतनानद्यतनयोः) विहितः । अतः 'अद्य सायङ्काले अहं गन्तास्मि' इति वाक्यं दोषाय, अद्यतने लुटः प्रयोगात् । 'गमिष्यामि' इत्येव प्रयोक्तव्यम् । अनद्यतने तु उभयथा अपि ।

- **लोट्** - विध्याद्यर्थेषु आशिषि च धातोः लोट् स्यात् *'लोट् च'* (३.३.१६२) *'आशिषि लिङ्लोटौ'* (३.३.१७३) इति सूत्राभ्याम् । विध्यादयः अर्थाः विधिलिङि वक्ष्यन्ते । लोटः उदा - भवान् गच्छतु । संस्कृतं जयतात् ।
- **लङ्** - अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात् । अनद्यतनस्य अर्थः लिटि विवृतः एव । उदा - ह्यः सः नगरम् अगच्छत् ।
- **विध्यादौ लिङ्** - विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु धातोः लिङ् स्यात् । **विधिः** प्रेरणम् । भृत्यादेः निकृष्टस्य प्रवर्तनम् । उदा - (स्वामी भृत्यं प्रति) भवान् वस्त्रं क्षालयेत् । **निमन्त्रणं** नियोगकरणम् - आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । उदा - (दौहित्रादीन् प्रति) इह श्राद्धे भवान् भुञ्जीत । **आमन्त्रणं** कामचारानुज्ञा । यथेच्छं क्रियताम् इति अभ्यनुज्ञानम् । उदा - इह भवान् भुञ्जीत । **अधीष्टः** सत्कारपूर्वकः व्यापारः । उदा - माणवकं भवान् अध्यापयेत् । इदं कार्यं न वेति विचार्य निर्धारणं **सम्प्रश्नः** । यथा - किं भोः व्याकरणं भवान् अधीयीत ? **प्रार्थना** याच्ञा । यथा - भवान् अन्नं मे दद्यात् ।
- **आशीर्लिङ्** - आशीरर्थे अपि लिङ् भवति - *'आशिषि लिङ्लोटौ'* इति सूत्रेण । आशंसनम् आशीः । अप्राप्तस्य इष्टस्य अर्थस्य प्राप्तुम् इच्छा एव सा । आशीरर्थे लिङः यासुटः विधानात् आशीर्लिङः रूपाणि विधिलिङः भिद्यन्ते । उदा - शुभं ते भूयात् ।

---

* कातन्त्रवृत्तिप्रणेता दुर्गसिंहः लिखति -

शेषे गतायाः प्रहरो निशायाः आगामिनी या प्रहरश्च तस्याः ।

दिनस्य चत्वारः इमे च यामाः कालं बुधा ह्यद्यतनं वदन्ति ।। (३.१.१२)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- **लुङ्** – भूतार्थवृत्तेः धातोः लुङ् स्यात् । उदा – कार्यम् अभूत् ।

  एतदत्र स्मर्तव्यं यत् भूतार्थे त्रयः लकाराः – लिट् लङ् लुङ् चेति । तत्र परोक्षे लिट् । अनद्यतने लङ् । भूतसामान्ये (तन्नाम परोक्षे, अनद्यतने, अद्यतने वा) लुङ् ।

- **लृङ्** – हेतुहेतुमद्भावादिलिङ्निमित्ते भविष्यति काले क्रियातिपत्तौ सत्यां लृङ् भवति । उदा – सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् ।

इत्थं दशानां लकाराणां सामान्यनिरूपणम् । विषयेऽस्मिन् विशेषविधयः अपि बहवः सन्ति । यथा – 'स्म'योगे लङः स्थाने लट् भवति, (*लट् स्मे*) वर्तमानसामीप्ये वर्तमानवत्त्वं विकल्पेन भवति, (*वर्तमानसामीप्ये वर्तमानवद्वा*) कार्यकारणभावे लिङ् अपि प्रयोक्तुं शक्यः (*हेतुहेतुमतोर्लिङ्*), तिङ्वाच्यक्रियायाः प्राधान्यात् तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः भवन्ति (*धातुसम्बन्धे प्रत्ययाः*) इत्यादयः । एतादृशाः अंशाः लकारार्थप्रकरणे अन्यत्र च द्रष्टव्याः ।

लेट्लकारः

प्रसङ्गवशात् 'लेट्'लकारविषये अपि किञ्चित् उच्यते । अयं लकारः वेदमात्र-गोचरः । (लौकिकसंस्कृते अस्य प्रयोगो नास्ति ।) अन्येषु लकारेषु इव लेटि सर्वेषां धातूनां नव अपि रूपाणि सम्भवन्ति एव इति न । वेदवाङ्मये यावतां रूपाणां दर्शनं स्यात् तावन्ति एव रूपाणि सम्भवन्ति । अन्यानि रूपाणि न सम्भवन्ति, अप्रयुक्तत्वात् । तस्मात् परिनिष्ठितप्रत्ययं दृष्ट्वा प्रक्रियाम् अपि ज्ञात्वा सर्वेषां धातूनां लेट्लकारीयाणि नव रूपाणि न ऊहनीयानि इति परम्पराविदः । उदाहरणप्रदर्शनमात्राय भूधातोः नव रूपाणि दीयन्ते अत्र –

भवाति भवात् भवातः भवान्
भवासि भवाः भवाथः भवाथ
भवानि भवा भवाव भवाम

तिङ्प्रत्ययाः

तिप् तस् झि, सिप् थस् थ, मिप् वस् मस् । त आताम् झ, थास् आथाम् ध्वम्, इड् वहिङ् महिङ् – इत्येते अष्टादश लादेशाः । एतेषां 'तिङ्' इति प्रत्याहारलब्धा संज्ञा । एतेषु प्रथमे त्रयः त्रिकाः परस्मैपदसंज्ञाः भवन्ति । अनन्तरं स्थिताः त्रयः त्रिकाः आत्मनेपदसंज्ञाः ।

परिनिष्ठितप्रत्ययरूपविधाः

तिङन्तरूपसामान्यज्ञानाय लकारशः परिनिष्ठितानि प्रत्ययरूपाणि अस्मिन् पुस्तके दत्तानि सन्ति । प्रक्रियाविस्तरः ज्ञातः चेदेव सर्वाणि तिङन्तरूपाणि शुद्धतया ज्ञातुं शक्यानि । तथापि परिनिष्ठितानां प्रत्ययरूपाणां ज्ञानात् बहुत्र रूपाणि ऊहितुं शक्यानि इत्यतः तानि अत्र दीयन्ते । केषुचित् लकारेषु अधिकविधाः परिनिष्ठितप्रत्ययाः सम्भवन्ति । तत्र ताः विधाः तु प्रदर्शिताः, प्रक्रियास्वरूपं तु न विवृतं, विस्तरभयात् ।

परस्मैपदे

१. लटः परिनिष्ठिताः प्रत्ययाः –

ति (तिप्)	तः (तस्)	अन्ति (झि)
सि (सिप्)	थः (थस्)	थ
मि (मिप्)	वः (वस्)	मः (मस्)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. लिटः परिनिष्ठिताः प्रत्ययाः -

अ (णल्) अतुः (अतुस्) उः (उस्)
थः (थल्) अथुः (अथुस्) अ
अ (णल्) व म

लिटि त्रयः प्रकाराः भवन्ति -

- **प्रथमा विधा** - धातोः द्वित्वेन । उदा - चुकूज चुकूजतुः चुकूजुः
- **द्वितीया विधा** - एत्वाभ्यासलोपाभ्याम् । उदा - ननाद नेदतुः नेदुः
- **तृतीया विधा** - आम्प्रत्ययकृभ्वस्त्यनुप्रयोगाभ्याम् । उदा - उक्षाञ्चकार, उक्षामास, उक्षाम्बभूव ।

३. लुटः परिनिष्ठिताः प्रत्ययाः -

ता तारौ तारः । तासि तास्थः तास्थ । तास्मि तास्वः तास्मः ।

४. लृटः परिनिष्ठिताः प्रत्ययाः -

स्यति स्यतः स्यन्ति । स्यसि स्यथः स्यथ । स्यामि स्यावः स्यामः ।

५. लोटः परिनिष्ठिताः प्रत्ययाः -

तु-तात् ताम् अन्तु । हि-तात् तम् त । आनि आव आम ।

६. लङः परिनिष्ठिताः प्रत्ययाः -

त् ताम् अन् । स् तम् त । म् व म ।

७. विधिलिङः परिनिष्ठिताः प्रत्ययाः -

यात् याताम् युस् । यास् यातम् यात । याम् याव याम ।

८. आशिर्लिङः परिनिष्ठिताः प्रत्ययाः -

यात् यास्ताम् यासुः । यास् यास्तम् यास्त । यासम् यास्व यास्म ।

९. लुङः परिनिष्ठिताः प्रत्ययाः सप्तविधाः । तासु -

- **प्रथमा विधा** - (सिचो लोपेन)
  त् ताम् उस् । स् तम् त । अम् व म ।
- **द्वितीया विधा** - (च्लेः अङादेशेन)
  अत् अताम् अन् । अस् अतम् अत । अम् अव अम ।
- **तृतीया विधा** - (च्लेः चङादेशेन)
  अत् अताम् अन् । अस् अतम् अत । अम् अव अम ।
- **चतुर्थी विधा** - (सगादेश-इडातामाभ्याम्)
  सीत् सिष्टाम् सिषुः । सीः सिष्टम् सिष्ट । सिषम् सिष्व सिष्म ।
- **पञ्चमी विधा** - (क्सादेश-इडागमाभ्याम्)
  सत् सताम् सन् । सस् सतम् सत । सम् साव साम ।
- **षष्ठी विधा** - (अनिड्भ्यो धातुभ्यः सिज्लोपाभावेन)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सीत् स्ताम् सुस् । सीस् स्तम् स्त । सम् स्व स्म ।

- **सप्तमी विधा** – (सेड्भ्यो धातुभ्यः सिज्लोपाभावेन)
  ईत् इष्टाम् इषुः । ईस् इष्टम् इष्ट । इषम् इष्व इष्म ।

१०. लृङः परिनिष्ठिताः प्रत्ययाः –

स्यत् स्यताम् स्यन् । स्यः स्यतम् स्यत । स्यम् स्याव स्याम ।

आत्मनेपदे –

१. लटः परिनिष्ठिताः प्रत्ययाः –

ते इते अन्ते । से इथे ध्वे । इ वहे महे ।

२. लिटः परिनिष्ठिताः प्रत्ययाः –

एते आते अते । से आथे ध्वे । ए वहे महे ।

३. लुटः परिनिष्ठिताः प्रत्ययाः –

ता तारौ तारः । तासे तासाथे ताध्वे । ताहे तास्वहे तास्महे ।

४. लृटः परिनिष्ठिताः प्रत्ययाः –

स्यते स्येते स्यन्ते । स्यसे स्येथे स्यध्वे । स्ये स्यावहे स्यामहे ।

५. लोटः परिनिष्ठिताः प्रत्ययाः –

ताम् इताम् अन्ताम् । स्व इथाम् ध्वम् । ऐ आवहै आमहै ।

६. लङः परिनिष्ठिताः प्रत्ययाः –

त इताम् अन्त । थास् इथाम् ध्वम् । इ वहि महि ।

७. विधिलिङः परिनिष्ठिताः प्रत्ययाः –

ईत ईयाताम् ईरन् । ईथाः ईयाथाम् ईध्वम् । ईय ईवहि ईमहि ।

८. आशीर्लिङः परिनिष्ठिताः प्रत्ययाः –

सीष्ट सीयास्ताम् सीरन् । सीष्ठाः सीयास्थाम् सीध्वम् । सीय सीवहि सीमहि ।

९. लुङः प्रत्ययाः पञ्चविधाः –

- लुङि परस्मैपदादारभ्य **अष्टमी विधा** (च्लेरङादेशेन)
  अत एताम् अन्त । अथास् एथाम् अध्वम् । ए अवहि अमहि
- **नवमी विधा** – (च्लेः चङादेशेन)
  प्रत्ययाः अष्टमीवत् ।
- **दशमी विधा** – (अनिड्भ्यः धातुभ्यः सिज्लोपाभावेन)
  स्त साताम् सत । स्थाः साथाम् ध्वम् । सि स्वहि स्महि ।
- **एकादशी विधा** – (सेड्भ्यः धातुभ्यः सिज्लोपाभावेन)
  इष्ट इषाताम् इषत । इष्ठाः इषाथाम् इध्वम् । इषि इष्वहि इष्महि ।
- **द्वादशी विधा** – (क्सादेश-इडभावाभ्याम्)
  सत सताम् सन्त । सथाः साथाम् सध्वम् । सि सावहि सामहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०. लृङि परिनिष्ठिताः प्रत्ययाः -

स्यत स्येताम् स्यन्त । स्यथाः स्येथाम् स्यध्वम् । स्ये स्यावहि स्यामहि ।

एतदत्र स्मर्तव्यं यत् लट्, लोट्, लङ् विधिलिङ् इत्येते चत्वारः सार्वधातुकाः लकाराः इति उच्यन्ते । एतेषु चतुर्षु अपि विकरणप्रत्ययः दृश्यते । अन्ये षट् लकाराः (लिट्, लुट्, लृट्, आशीर्लिङ्, लुङ्, लृङ्) आर्धधातुकलकाराः । अर्धधातुकेषु लकारेषु इटः प्राप्त्यप्राप्तिविषये अवधातव्यम् ।

एतस्मिन् पुस्तके केवलस्य धातोः रूपैः सह सन्नन्त-णिजन्त-यगन्तरूपाणि अपि दत्तानि । यतः तेषाम् उपयोगः व्यवहारे अधिकः । अतः तद्विषये किञ्चिदत्र उच्यते -

भावकर्मणी (यगन्तः)

कर्मणि भावे च यक् विधीयते । यगन्तः आत्मनेपदी भवति । सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यः भावे च यक् विधीयते । कर्मयगन्तः कर्मानुगुणं प्रथमं मध्यमम् उत्तमं वा पुरुषं लभते । एवं तस्य पुरुषत्रयं वचनत्रयं च । भावार्थकलकाराणां तु युष्मदस्मद्भ्यां सामानाधिकरण्यविरहात् प्रथमपुरुषः एव, न मध्यमोत्तमौ । औत्सर्गिकम् एकवचनम् अपि । यथा - मया भूयते, त्वया भूयते, तेन/तया/तैः वा भूयते इत्यादि । कीदृशस्य धातोः रूपं यकि कीदृशं भवेत् इति परिशिष्टे (चतुर्थे) सङ्ग्रहेण दत्तम् अस्ति ।

हेतुमण्णिजन्ताः

प्रेरकव्यापारे प्रेषणादौ वाच्ये धातोः णिच् भवति । एषः णिच् 'हेतुमण्णिच्' इति उच्यते । (प्रेरणार्थकणिच् इति वा) णिच् स्वार्थे अपि भवति । यथा - चुरादौ । चुरादौ विद्यमानाः सर्वे धातवः स्वार्थे णिचं लभन्ते । हेतुमण्णिच् तु सर्वेभ्यः धातुभ्यः विहितः प्रेषणादौ वाच्ये ।

'बालः विद्यालयं गच्छति' इत्येतत् णिज्रहितं वाक्यम् । एषा अण्यन्तावस्था । एतस्याम् अवस्थायां बालः कर्ता । पिता 'बालं विद्यालयं गमयति' इति तु ण्यन्तावस्था । तन्नाम प्रेरणार्थकणिजन्तधातोः प्रयोगः कृतः अस्ति अत्र । ण्यन्तावस्थायां पिता बालं प्रेरयति । एषः प्रेरकः 'प्रयोजककर्ता' इति उच्यते । अण्यन्तावस्थायां यः 'बालः' सः 'प्रयोज्यकर्ता' इति उच्यते ण्यन्तावस्थायाम् । तस्यापि कर्मत्वं प्राप्यते ण्यन्तावस्थायाम् । 'गतिबुद्धि...' इत्यादिभिः सूत्रैः निर्दिष्टाः धातवः एव कर्मसञ्ज्ञां प्राप्नुवन्ति, न इतरे । विषयेऽस्मिन् विस्तरः तु कौमुद्यां 'णत्वणिजन्त'पुस्तके वा द्रष्टव्यम् ।

णिजन्तसम्बन्धे अधोनिर्दिष्टाः केचन अंशाः स्मर्तव्याः -

- णिच्सहितस्य भागस्य एव धातुसंज्ञा । यथा - गम् + णिच् 'गमि' इति धातुः । शपः योगे 'गमय' इति यत् रूपं प्राप्येत तत् अङ्गम् ।
- स्वार्थणिजन्ताः आत्मनेपदिनः परस्मैपदिनः उभयपदिनः वा इति चुरादौ प्रतिधातु निर्दिष्टम् एव । हेतुमण्णिजन्ताः प्रायः उभयपदिनः । तेषु -
  'बुधयुधणशजनेङ्प्रुद्रुसुभ्यो णेः' (२.३.८६) *'निगरणचलनार्थेभ्यश्च'* (२.३.८७) इत्येताभ्यां सूत्राभ्यां सङ्गृहीताः धातवः नित्यपरस्मैपदिनः । *'अणावकर्मकात्...'* इति सूत्रेण चित्तवत्कर्तृकत्वे परस्मैपदिता विधीयते ।
- *'भीस्म्योर्हेतुभये'* इति सूत्रेण सङ्गृहीतौ भीस्मिधातू नित्यम् आत्मनेपदिनौ ।
  'गृधिवञ्च्योः प्रलम्भने' *'लियः सम्मानशालीनकरणयोश्च'* इत्येताभ्याम् अपि आत्मनेपदिता विधीयते । 'न पादम्याङ्...' इति सूत्रेण परस्मैपद-निषेधः क्रियते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- 'गमि' इत्यस्य अनेकाच्त्वात् लिटि अम्, कृ भू अस् इत्येतेषाम् अनुप्रयोगश्च । गमयाञ्चकार, गमयाम्बभूव, गमयामास इत्यादीनि रूपाणि ।
- लुङि तृतीयानवम्यौ विधे । यथा – अजीगमत् ।

एतदतिरिच्य केचन विशेषविधयः अपि सम्भवेयुः । ते कौमुद्यादिभ्यः ज्ञातव्याः ।

सन्नन्ताः

इच्छार्थे सर्वेभ्यः धातुभ्यः सन् विधीयते । ततः सनः इट्, धातोः द्वित्वम् इत्यादिकं भवति । तस्मात् 'पिपठिषति' इत्यादीनि रूपाणि सम्भवन्ति । सनः प्रकृतिभूतस्य धातोः परस्मैपदादिकं यत् स्यात् तदेव भवेत् सन्नन्तस्यापि । *'पूर्ववत्सनः'* इति सूत्रम् । अतः प्रकृतिभूतः धातुः परस्मैपदी चेत् सन्नन्तम् अपि परस्मैपदि । एवमेव आत्मनेपदित्वोभयपदित्वम् अपि । धातोः उभयपदित्वेऽपि इह पुस्तके क्वचित् सन्नन्तस्य एकमेव रूपं दर्शितम् । तत्र अपरं रूपं स्वयम् ऊह्यम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ भ्वादयः (१)

१. भू – सत्तायाम् । अकर्म, सेट्, परस्मै । 'सत्तायां भवति, प्राप्तौ णिचि भावयते तङि । भवते शपि तत्रैव, भावयत्यवकल्कने ।।'' (श्लो.३) इति देवः ।

१. वर्तमाने लट् – भवति भवतः भवन्ति । भवसि भवथः भवथ । भवामि भवावः भवामः ।

२. परोक्षे लिट् – बभूव बभूवतुः बभूवुः । बभूविथ बभूवथुः बभूव । बभूव बभूविव बभूविम ।

३. अनद्यतने लुट् – भविता भवितारौ भवितारः । भवितासि भवितास्थः भवितास्थ । भवितास्मि भवितास्वः भवितास्मः ।

४. भविष्यति लृट् – भविष्यति भविष्यतः भविष्यन्ति । भविष्यसि भविष्यथः भविष्यथ । भविष्यामि भविष्यावः भविष्यामः ।

५. विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लोट् – भवतु, भवतात् भवताम् भवन्तु । भव, भवतात् भवतम् भवत । भवानि भवाव भवाम ।

६. अनद्यतने भूते लङ् – अभवत् अभवताम् अभवन् । अभवः अभवतम् अभवत । अभवम् अभवाव अभवाम ।

७. विध्यादौ लिङ् – भवेत् भवेताम् भवेयुः । भवेः भवेतम् भवेत । भवेयम् भवेव भवेम ।

८. आशिषि लिङ् – भूयात् भूयास्ताम् भूयासुः । भूयाः भूयास्तम् भूयास्त । भूयासम् भूयास्व भूयास्म ।

९. भूते लुङ् – अभूत् अभूताम् अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम ।

१०. हेतुहेतुमद्भावे क्रियानिष्पत्तौ लृङ् – अभविष्यत् अभविष्यताम् अभविष्यन् । अभविष्यः अभविष्यतम् अभविष्यत । अभविष्यम् अभविष्याव अभविष्याम ।

णिचि – भावयति – ते, **सनि** – बुभूषति[1], **यकि** – भूयते ।

१. 'इको झल्' – इगन्तात् झलादिः सन् कित् स्यात् । कित्त्वात् न गुणः ।

२. एध – वृद्धौ । अकर्म, सेट्, आत्मने ।

१. लट् – एधते एधेते एधन्ते । एधसे एधेथे एधध्वे । एधे एधावहे एधामहे । **२. लिट्** – (i) एधाञ्चक्रे[1] एधाञ्चक्राते एधाञ्चक्रिरे । एधाञ्चकृषे एधाञ्चक्राथे एधाञ्चकृढ्वे । एधाञ्चक्रे एधाञ्चकृवहे एधाञ्चकृमहे । (ii) एधामास एधामासतुः एधामासुः । एधामासिथ एधामासथुः एधामास । एधामास एधामासिव एधामासिम । (iii) एधाम्बभूव एधाम्बभूवतुः एधाम्बभूवुः । एधाम्बभूविथ एधाम्बभूवथुः एधाम्बभूव । एधाम्बभूव एधाम्बभूविव एधाम्बभूविम । **३. लुट्** – एधिता एधितारौ एधितारः । एधितासे एधितासाथे एधिताध्वे । एधिताहे एधितास्वहे एधितास्महे । **४. लृट्** – एधिष्यते एधिष्येते एधिष्यन्ते । एधिष्यसे एधिष्येथे एधिष्यध्वे । एधिष्ये एधिष्यावहे एधिष्यामहे । **५. लोट्** – एधताम् एधेताम् एधन्ताम् । एधस्व एधेथाम् एधध्वम् । एधै एधावहै एधामहै । **६. लङ्** – ऐधत[2] ऐधेताम् ऐधन्त । ऐधथाः ऐधेथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऐधध्वम् । ऐधे ऐधावहि ऐधामहि । **७. विधिलिङ्** – एधेत एधेयाताम् एधेरन् । एधेथाः एधेयाथाम् एधेध्वम् । एधेय एधेवहि एधेमहि । **८. आशीर्लिङ्** – एधिषीष्ट एधिषीयास्ताम् एधिषीरन् । एधिषीष्ठाः एधिषीयास्थाम् एधिषीध्वम्/एधिषीढ्वम्[३] । एधिषीय एधिषीवहि एधिषीमहि । **९. लुङ्** – ऐधिष्ट ऐधिषाताम् ऐधिषत । ऐधिष्ठाः ऐधि-षाथाम् ऐधिध्वम्/ऐधिढ्वम् । ऐधिषि ऐधिष्वहि ऐधिष्महि । **१०. लृङ्** – ऐधिष्यत ऐधिष्येताम् ऐधिष्यन्त । ऐधिष्यथाः ऐधिष्येथाम् ऐधिष्यध्वम् । ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि ।

णिचि – एधयति[४] – ते, **सनि** – एदिधिषते[५], **यकि** – एध्यते ।

१. 'इजादेश्च गुरुमतोऽनृच्छः' – इजादिर्यो धातुः गुरुमान् ऋच्छत्यन्यः ततः आम् स्यात् लिटि । 'आमः' इति आमः परस्य लेः लुक् । 'कृञ्चानुप्रयुज्यते लिटि' इति आमन्तात् लिट्पराः कृभ्वस्तयः अनुप्रयुज्यन्ते । 'आम्प्रकृत्ययवात्कृञोऽनुप्रयोगस्य' इति कृञः आम्प्रकृत्याः तुल्यता । एवमेव इतरत्रापि ज्ञेयम् ।

२. 'आडजादीनाम्' इति आटि, 'आटश्च' इति वृद्धौ 'ऐधत' इति रूपम् ।

३. 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति सूत्रे इडभिन्न एव इण् गृह्यते इति पक्षे एधिषीध्वम्, ऐधिध्वम् । इड्रूपस्यापि इणः ग्रहणे तु एधिषीढ्वम्, ऐधिढ्वम् । एवमुत्तरत्रापि अनुसन्धेयम् ।

४. (स्वं पुत्रम्) एधयन् इत्यादिषु चित्तवत्कर्तृकत्वे ण्यन्ते 'विभाषोपपदेन प्रतीयमाने' (१.३.७८) इति विकल्पेन आत्मनेपदे प्राप्ते तं बाधित्वा परत्वात् 'अणावकर्मकात् चित्तवत्कर्तृकात्' (१.३.८८) इति परस्मैपदमेव ।

५. 'अजादेर्द्वितीयस्य' (३.१.२) इति द्वितीयस्य एकाचः द्विर्वचनम् ।

३. स्पर्ध – सङ्घर्षे । अकर्म, सेट्, आत्मने । सङ्घर्षः पराभिभवेच्छा । पराभिभवस्य धात्वर्थेन उपसङ्ग्रहात् अत्र अकर्मकत्वम् । उक्तं च – 'धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।' – वाक्यपदीयम् ३.८८

१. लट् – स्पर्धते स्पर्धेते स्पर्धन्ते । स्पर्धसे स्पर्धेथे स्पर्धध्वे । स्पर्धे स्पर्धावहे स्पर्धामहे । **२. लिट्** – पस्पर्धे[१] पस्पर्धाते पस्पर्धिरे । पस्पर्धिषे पस्पर्धाथे पस्पर्धिध्वे । पस्पर्धे पस्पर्धिवहे पस्पर्धिमहे । **३. लुट्** – स्पर्धिता स्पर्धितारौ स्पर्धितारः । स्पर्धितासे स्पर्धितासाथे स्पर्धिताध्वे । स्पर्धिताहे स्पर्धितास्वहे स्पर्धितास्महे । **४. लृट्** – स्पर्धिष्यते स्पर्धिष्येते स्पर्धिष्यन्ते । स्पर्धिष्यसे स्पर्धिष्येथे स्पर्धिष्यध्वे । स्पर्धिष्ये स्पर्धिष्यावहे स्पर्धिष्यामहे । **५. लोट्** –स्पर्धताम् स्पर्धेताम् स्पर्धन्ताम् । स्पर्धस्व स्पर्धेथाम् स्पर्धध्वम् । स्पर्धै स्पर्धावहै स्पर्धामहै । **६. लङ्** – अस्पर्धत अस्पर्धेताम् अस्पर्धन्त । अस्पर्धथाः अस्पर्धेथाम् अस्पर्धध्वम् । अस्पर्धे अस्पर्धावहि अस्पर्धामहि । **७. विधिलिङ्** – स्पर्धेत स्पर्धेयाताम् स्पर्धेरन् । स्पर्धेथाः स्पर्धेयाथाम् स्पर्धेध्वम् । स्पर्धेय स्पर्धेवहि स्पर्धेमहि । **८. आशीर्लिङ्** – स्पर्धिषीष्ट स्पर्धिषीयास्ताम् स्पर्धिषीरन् । स्पर्धिषीष्ठाः स्पर्धिषीयास्थाम् स्पर्धिषीध्वम्/ढ्वम् । स्पर्धिषीय स्पर्धिषीवहि स्पर्धिषीमहि । **९. लुङ्** – अस्पर्धिष्ट अस्पर्धिषाताम् अस्पर्धिषत । अस्पर्धिष्ठाः अस्पर्धिषाथाम् अस्पर्धिध्वम्/ढ्वम् । अस्पर्धिषि अस्पर्धिष्वहि अस्पर्धिष्महि । **१०. लृङ्** – अस्पर्धिष्यत अस्पर्धिष्येताम् अस्पर्धिष्यन्त । अस्पर्धिष्यथाः अस्पर्धिष्येथाम् अस्पर्धि-ष्यध्वम् । अस्पर्धिष्ये अस्पर्धिष्यावहि अस्पर्धिष्यामहि ।

णिचि – स्पर्धयति – ते, **सनि** – पिस्पर्धिषते, **यकि** – स्पर्ध्यते ।

१. 'शर्पूर्वाः खयः' (७.४.६१) (अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते) इति सूत्रेण अभ्यासे पकारः शिष्यते ।

४. गाधृ – प्रतिष्ठालिप्सयोर्ग्रन्थे च । सकर्म, सेट्, आत्मने । आत्मख्यापनं तत्साधनं च प्रतिष्ठा । लब्धुमिच्छा लिप्सा । एकत्र स्थापनं, सन्दर्भो वा ग्रन्थः । तत्र – 'आद्ये अकर्मकः, इतरयोः सकर्मकः' इति माधवीय-धातुवृत्तौ । 'ग्रन्थे च इति पृथक् पाठः विरलप्रयोगार्थः' इति क्षीरस्वामी ।

१. लट् – गाधते गाधेते गाधन्ते । गाधसे गाधेथे गाधध्वे । गाधे गाधावहे गाधामहे । **२. लिट्** – जगाधे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जगाधाते जगाधिरे । जगाधिषे जगाधाथे जगाधिध्वे । जगाधे जगाधिवहे जगाधिमहे । **३. लुट्** – गाधिता गाधितारौ गाधितारः । गाधितासे गाधितासाथे गाधिताध्वे । गाधिताहे गाधितास्वहे गाधितास्महे । **४. लृट्** – गाधिष्यते गाधिष्येते गाधिष्यन्ते । गाधिष्यसे गाधिष्येथे गाधिष्यध्वे । गाधिष्ये गाधिष्यावहे गाधिष्यामहे । **५. लोट्** – गाधताम् गाधेताम् गाधन्ताम् । गाधस्व गाधेथाम् गाधध्वम् । गाधै गाधावहै गाधामहै । **६. लङ्** – अगाधत अगाधेताम् अगाधन्त । अगाधथाः अगाधेथाम् अगाधध्वम् । अगाधे अगाधावहि अगाधामहि । **७. विधिलिङ्** – गाधेत गाधेयाताम् गाधेरन् । गाधेथाः गाधेयाथाम् गाधेध्वम् । गाधेय गाधेवहि गाधेमहि । **८. आशीर्लिङ्** – गाधिषीष्ट गाधिषीयास्ताम् गाधिषीरन् । गाधिषीष्ठाः गाधिषीयास्थाम् गाधिषीध्वम्/ढ्वम् । गाधिषीय गाधिषीवहि गाधिषीमहि । **९. लुङ्** – अगाधिष्ट अगाधिषाताम् अगाधिषत । अगाधिष्ठाः अगाधिषाथाम् अगाधिध्वम्/ढ्वम् । अगाधिषि अगाधिष्वहि अगाधिष्महि । **१०. लृङ्** – अगाधिष्यत अगाधिष्येताम् अगाधिष्यन्त । अगाधिष्यथाः अगाधिष्येथाम् अगाधिष्यध्वम् । अगाधिष्ये अगाधिष्यावहि अगाधिष्यामहि ।

णिचि – गाधयति – ते, **सनि** – जिगाधिषते, **यकि** – गाध्यते ।

५. बाधृ – लोडने । सकर्म, सेट्, आत्मने । लोडनं हिंसनम् । 'रोटने । रोटनं प्रतिघातः' इति क्षीरस्वामी ।

१. लट् – बाधते बाधेते बाधन्ते । बाधसे बाधेथे बाधध्वे । बाधे बाधावहे बाधामहे । **२. लिट्** – बबाधे बबाधाते बबाधिरे । बबाधिषे बबाधाथे बबाधिध्वे । बबाधे बबाधिवहे बबाधिमहे । **३. लुट्** – बाधिता बाधितारौ बाधितारः । बाधितासे बाधितासाथे बाधिताध्वे । बाधिताहे बाधितास्वहे बाधितास्महे । **४. लृट्** – बाधिष्यते बाधिष्येते बाधिष्यन्ते । बाधिष्यसे बाधिष्येथे बाधिष्यध्वे । बाधिष्ये बाधिष्यावहे बाधिष्यामहे । **५. लोट्** – बाधताम् बाधेताम् बाधन्ताम् । बाधस्व बाधेथाम् बाधध्वम् । बाधै बाधावहै बाधामहै । **६. लङ्** – अबाधत अबाधेताम् अबाधन्त । अबाधथाः अबाधेथाम् अबाधध्वम् । अबाधे अबाधावहि अबाधामहि । **७. विधिलिङ्** – बाधेत बाधेयाताम् बाधेरन् । बाधेथाः बाधेयाथाम् बाधेध्वम् । बाधेय बाधेवहि बाधेमहि । **८. आशीर्लिङ्** – बाधिषीष्ट बाधिषीयास्ताम् बाधिषीरन् । बाधिषीष्ठाः बाधिषीयास्थाम् बाधिषीध्वम्/ढ्वम् । बाधिषीय बाधिषीवहि बाधिषीमहि । **९. लुङ्** – अबाधिष्ट अबाधिषाताम् अबाधिषत । अबाधिष्ठाः अबाधिषाथाम् अबाधिध्वम्/ढ्वम् । अबाधिषि अबाधिष्वहि अबाधिष्महि । **१०. लृङ्** – अबाधिष्यत अबाधिष्येताम् अबाधिष्यन्त । अबाधिष्यथाः अबाधि-ष्येथाम् अबाधिष्यध्वम् । अबाधिष्ये अबाधिष्यावहि अबाधिष्यामहि ।

णिचि – बाधयति – ते, **सनि** – बिबाधिषते, **यकि** – बाध्यते ।

६. नाथृ – [1]**याच्ञोपतापैश्वर्याशीःषु ।** सकर्म, सेट्, आत्मने[2] । आशीरर्थे एव आत्मनेपदम् । अन्येषु अर्थेषु परस्मैपदम् एव । द्विकर्मकोऽयं याच्ञार्थे । उपतापः – ज्वरप्रयुक्ता पीडा । ऐश्वर्यम् – सम्पत्तिः । आशीः –आशासनम् । आशीरर्थे एव आत्मनेपदम् । अन्येषु अर्थेषु परस्मैपदम् एव । द्विकर्मकोऽयं याच्ञार्थे ।

१. लट् – नाथते नाथेते नाथन्ते । नाथसे नाथेथे नाथध्वे । नाथे नाथावहे नाथामहे । **२. लिट्** – ननाथे ननाथाते ननाथिरे । ननाथिषे ननाथाथे ननाथिध्वे । ननाथे ननाथिवहे ननाथिमहे । **३. लुट्** – नाथिता नाथितारौ नाथितारः । नाथितासे नाथितासाथे नाथिताध्वे । नाथिताहे नाथितास्वहे नाथितास्महे । **४. लृट्** – नाथिष्यते नाथिष्येते नाथिष्यन्ते । नाथिष्यसे नाथिष्येथे नाथिष्यध्वे । नाथिष्ये नाथिष्यावहे नाथिष्यामहे । **५. लोट्** – नाथताम् नाथेताम् नाथन्ताम् । नाथस्व नाथेथाम् नाथध्वम् । नाथै नाथावहै नाथामहै । **६. लङ्** – अनाथत अनाथेताम् अनाथन्त । अनाथथाः अनाथेथाम् अनाथध्वम् । अनाथे अनाथावहि अनाथामहि । **७. विधिलिङ्** – नाथेत नाथेयाताम् नाथेरन् । नाथेथाः नाथेयाथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नाथेध्वम् । नाथेय नाथेवहि नाथेमहि । **८. आशीर्लिङ्** – नाथिषीष्ट नाथिषीयास्ताम् नाथिषीरन् । नाथिषीष्ठाः नाथिषीयास्थाम् नाथिषीध्वम्/ढ्वम् । नाथिषीय नाथिषीवहि नाथिषीमहि । **९. लुङ्** – अनाथिष्ट अनाथिषाताम् अनाथिषत । अनाथिष्ठाः अनाथिषाथाम् अनाथिध्वम्/ढ्वम् । अनाथिषि अनाथिष्वहि अनाथिष्महि । **१०. लृङ्** – अनाथिष्यत अनाथिष्येताम् अनाथिष्यन्त । अनाथिष्यथाः अनाथिष्येथाम् अनाथिष्यध्वम् । अनाथिष्ये अनाथिष्यावहि अनाथिष्यामहि ।

णिचि – नाथयति – ते, **सनि** – निनाथिषते, **यकि** – नाथ्यते ।

१. याच्ञा इत्यत्र ञकारः आदौ चकारः अनन्तरं च ।

२. 'आशिषि नाथः' इति वार्तिकेन आशीरर्थे आत्मनेपदम् । याच्ञोपतापैश्वर्यार्थेषु परस्मैपदम् । तदा – नाथति, ननाथ, नाथिता, नाथिष्यति, नाथतु, अनाथत्, नाथेत्, नाथ्यात्, अनाथीत्, अनाथिष्यत् इति रूपाणि ।

७. नाधृ – याच्ञोपतापैश्वर्याशीःषु । सकर्म. सेट्. आत्मने ।

१. लट् – नाधते नाधेते नाधन्ते । नाधसे नाधेथे नाधध्वे । नाधे नाधावहे नाधामहे । **२. लिट्** – ननाधे ननाधाते ननाधिरे । ननाधिषे ननाधाथे ननाधिध्वे । ननाधे ननाधिवहे ननाधिमहे । **३. लुट्** – नाधिता नाधितारौ नाधितारः । नाधितासे नाधितासाथे नाधिताध्वे । नाधिताहे नाधितास्वहे नाधितास्महे । **४. लृट्** – नाधिष्यते नाधिष्येते नाधिष्यन्ते । नाधिष्यसे नाधिष्येथे नाधिष्यध्वे । नाधिष्ये नाधिष्यावहे नाधिष्यामहे । **५. लोट्** – नाधताम् नाधेताम् नाधन्ताम् । नाधस्व नाधेथाम् नाधध्वम् । नाधै नाधावहै नाधामहै । **६. लङ्** – अनाधत अनाधेताम् अनाधन्त । अनाधथाः अनाधेथाम् अनाधध्वम् । अनाधे अनाधावहि अनाधामहि । **७. विधिलिङ्** – नाधेत नाधेयाताम् नाधेरन् । नाधेथाः नाधेयाथाम् नाधेध्वम् । नाधेय नाधेवहि नाधेमहि । **८. आशीर्लिङ्** – नाधिषीष्ट नाधिषीयास्ताम् नाधिषीरन् । नाधिषीष्ठाः नाधिषीयास्थाम् नाधिषीध्वम्/ढ्वम् । नाधिषीय नाधिषीवहि नाधिषीमहि । **९. लुङ्** – अनाधिष्ट अनाधिषाताम् अनाधिषत । अनाधिष्ठाः अनाधिषाथाम् अनाधिध्वम्/ढ्वम् । अनाधिषि अनाधिष्वहि अनाधिष्महि । **१०. लृङ्** – अनाधिष्यत अनाधिष्येताम् अनाधिष्यन्त । अनाधिष्यथाः अनाधिष्येथाम् अनाधिष्यध्वम् । अनाधिष्ये अनाधिष्यावहि अनाधिष्यामहि ।

णिचि – नाधयति – ते, **सनि** – निनाधिषते, **यकि** – नाध्यते ।

८. दध – धारणे । सकर्म, सेट्, आत्मने । क्षीरतरङ्गिणी प्रयोगं प्रदर्श्य वदति – ''दद धारणे, दध दाने इति पाठः एव युक्तः इति केचित् । 'कौशिकस्तु 'दद धारणे, 'दध दाने' इति पाठं व्यत्यास्थत् – ददते मणिम्, दधते धनमर्थिभ्यः इति । युक्तायुक्तत्वे त्वत्र सूरयः एव प्रमाणम् । वयं हि मतभेदप्रदर्शनमात्रेण एव कृतार्थाः । मुनिमुख्यानां वाक्यं कथङ्कारं विकल्पयामः ? वयमपि हि स्खलन्तोऽन्यैः कियन्न उपलप्स्यामहे ?'' इति । (दानार्थकः 'दद'धातुः १७ इत्यत्र ।)

१. लट् – दधते दधेते दधन्ते । दधसे दधेथे दधध्वे । दधे दधावहे दधामहे । **२. लिट्** – देधे देधाते देधिरे । देधिषे देधाथे देधिध्वे । देधे देधिवहे देधिमहे । **३. लुट्** – दधिता दधितारौ दधितारः । दधितासे दधितासाथे दधिताध्वे । दधिताहे दधितास्वहे दधितास्महे । **४. लृट्** – दधिष्यते दधिष्येते दधिष्यन्ते । दधिष्यसे दधिष्येथे दधिष्यध्वे । दधिष्ये दधिष्यावहे दधिष्यामहे । **५. लोट्** – दधताम् दधेताम् दधन्ताम् । दधस्व दधेथाम् दधध्वम् । दधै दधावहै दधामहै । **६. लङ्** – अदधत अदधेताम् अदधन्त । अदधथाः अदधेथाम् अदधध्वम् । अदधे अदधावहि अदधामहि । **७. विधिलिङ्** – दधेत दधेयाताम् दधेरन् । दधेथाः दधेयाथाम् दधेध्वम् । दधेय दधेवहि दधेमहि । **८. आशीर्लिङ्** – दधिषीष्ट दधिषीयास्ताम् दधिषीरन् । दधिषीष्ठाः दधिषीयास्थाम् दधिषीध्वम्/ढ्वम् । दधिषीय दधिषीवहि दधिषीमहि । **९. लुङ्**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

– अदधिष्ट अदधिषाताम् अदधिषत । अदधिष्ठाः अदधिषाथाम् अदधिध्वम्/ढ्वम् । अदधिषि अदधिष्वहि अदधिष्महि । **१०. लृङ्** – अदधिष्यत अदधिष्येताम् अदधिष्यन्त । अदधिष्यथाः अदधिष्येथाम् अदधिष्यध्वम् । अदधिष्ये अदधिष्यावहि अदधिष्यामहि ।

णिचि – दाधयति – ते, **सनि** – दिदधिषते, **यकि** – दध्यते ।

९. स्कुदि – आप्रवणे । सकर्म, सेट्, आत्मने । 'आप्रवणम् उत्प्लवनम् उत्प्लुत्य गमनं वा' इति क्षीरतरङ्गिणी । 'उद्धरणम् इति भोजः' इति धातुवृत्तौ ।

१. लट् – स्कुन्दते[1] स्कुन्देते स्कुन्दन्ते । स्कुन्दसे स्कुन्देथे स्कुन्दध्वे । स्कुन्दै स्कुन्दावहे स्कुन्दामहे ।

२. लिट् – चुस्कुन्दे चुस्कुन्दाते चुस्कुन्दिरे । चुस्कुन्दिषे चुस्कुन्दाथे चुस्कुन्दिध्वे । चुस्कुन्दे चुस्कुन्दिवहे चुस्कुन्दिमहे । **३. लुट्** – स्कुन्दिता स्कुन्दितारौ स्कुन्दितारः । स्कुन्दितासे स्कुन्दितासाथे स्कुन्दिताध्वे । स्कुन्दिताहे स्कुन्दितास्वहे स्कुन्दितास्महे । **४. लृट्** – स्कुन्दिष्यते स्कुन्दिष्येते स्कुन्दिष्यन्ते । स्कुन्दिष्यसे स्कुन्दिष्येथे स्कुन्दिष्यध्वे । स्कुन्दिष्ये स्कुन्दिष्यावहे स्कुन्दिष्यामहे । **५. लोट्** – स्कुन्दताम् स्कुन्देताम् स्कुन्दन्ताम् । स्कुन्दस्व स्कुन्देथाम् स्कुन्दध्वम् । स्कुन्दे स्कुन्दावहै स्कुन्दामहै । **६. लङ्** – अस्कुन्दत अस्कुन्देताम् अस्कुन्दन्त । अस्कुन्दथाः अस्कुन्देथाम् अस्कुन्दध्वम् । अस्कुन्दे अस्कुन्दावहि अस्कुन्दामहि । **७. विधिलिङ्** – स्कुन्देत स्कुन्देयाताम् स्कुन्देरन् । स्कुन्देथाः स्कुन्देयाथाम् स्कुन्देध्वम् । स्कुन्देय स्कुन्देवहि स्कुन्देमहि । **८. आशीर्लिङ्** – स्कुन्दिषीष्ट स्कुन्दिषीयास्ताम् स्कुन्दिषीरन् । स्कुन्दिषीष्ठाः स्कुन्दिषीयास्थाम् स्कुन्दिषीध्वम्/ढ्वम् । स्कुन्दिषीय स्कुन्दिषीवहि स्कुन्दिषीमहि । **९. लुङ्** – अस्कुन्दिष्ट अस्कुन्दिषाताम् अस्कुन्दिषत । अस्कुन्दिष्ठाः अस्कुन्दिषाथाम् अस्कुन्दिध्वम्/ढ्वम् । अस्कुन्दिषि अस्कुन्दिष्वहि अस्कुन्दिष्महि । **१०. लृङ्** – अस्कुन्दिष्यत अस्कुन्दिष्येताम् अस्कुन्दिष्यन्त । अस्कुन्दिष्यथाः अस्कुन्दिष्येथाम् अस्कुन्दिष्यध्वम् । अस्कुन्दिष्ये अस्कुन्दिष्यावहि अस्कुन्दिष्यामहि ।

णिचि – स्कुन्दयति – ते, **सनि** – चुस्कुन्दिषते, **यकि** – स्कुन्द्यते ।

१. इदित्त्वात् 'इदितो नुम् धातोः' (७.३.५८) इति नुम् ।

१०. श्विदि – श्वैत्ये । अकर्म, सेट्, आत्मने । 'श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया च अभिधानात् क्रियात्वम् । यदाह – 'श्वेतते: श्वेत इत्येकं श्वेतत्वेन प्रकाश्यते । आश्रितक्रमरूपत्वादभिधानं प्रवर्तते' – (वाक्यपदीयम् ३.३) इति' इति माधवः ।

१. लट् – श्विन्दते[1] श्विन्देते श्विन्दन्ते । श्विन्दसे श्विन्देथे श्विन्दध्वे । श्विन्दै श्विन्दावहे श्विन्दामहे ।

२. लिट् – शिश्विन्दे शिश्विन्दाते शिश्विन्दिरे । शिश्विन्दिषे शिश्विन्दाथे शिश्विन्दिध्वे । शिश्विन्दे शिश्विन्दिवहे शिश्विन्दिमहे । **३. लुट्** – श्विन्दिता श्विन्दितारौ श्विन्दितारः । श्विन्दितासे श्विन्दितासाथे श्विन्दिताध्वे । श्विन्दिताहे श्विन्दितास्वहे श्विन्दितास्महे । **४. लृट्** – श्विन्दिष्यते श्विन्दिष्येते श्विन्दिष्यन्ते । श्विन्दिष्यसे श्विन्दिष्येथे श्विन्दिष्यध्वे । श्विन्दिष्ये श्विन्दिष्यावहे श्विन्दिष्यामहे । **५. लोट्** – श्विन्दताम् श्विन्देताम् श्विन्दन्ताम् । श्विन्दस्व श्विन्देथाम् श्विन्दध्वम् । श्विन्दे श्विन्दावहै श्विन्दामहै । **६. लङ्** – अश्विन्दत अश्विन्देताम् अश्विन्दन्त । अश्विन्दथाः अश्विन्देथाम् अश्विन्दध्वम् । अश्विन्दे अश्विन्दावहि अश्विन्दामहि । **७. विधिलिङ्** – श्विन्देत श्विन्देयाताम् श्विन्देरन् । श्विन्देथाः श्विन्देयाथाम् श्विन्देध्वम् । श्विन्देय श्विन्देवहि श्विन्देमहि । **८. आशीर्लिङ्** – श्विन्दिषीष्ट श्विन्दिषीयास्ताम् श्विन्दिषीरन् । श्विन्दिषीष्ठाः श्विन्दिषीयास्थाम् श्विन्दिषीध्वम्/ढ्वम् । श्विन्दिषीय श्विन्दिषीवहि श्विन्दिषीमहि । **९. लुङ्** – अश्विन्दिष्ट अश्विन्दिषाताम् अश्विन्दिषत । अश्विन्दिष्ठाः अश्विन्दिषाथाम् अश्विन्दिध्वम्/ढ्वम् । अश्विन्दिषि अश्विन्दिष्वहि अश्विन्दिष्महि । **१०. लृङ्** – अश्विन्दिष्यत अश्विन्दिष्येताम् अश्विन्दिष्यन्त । अश्विन्दिष्यथाः अश्विन्दिष्येथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अश्विन्दिष्यध्वम् । अश्विन्दिष्ये अश्विन्दिष्यावहि अश्विन्दिष्यामहि ।

णिचि – श्विन्दयति – ते, **सनि** – शिश्विन्दिषते, **यकि** – श्विन्द्यते ।

१. इदित्त्वात् 'इदितो नुम् धातोः' (७.३.५८) इति नुम् । एवमग्रे अपि ।

११. वदि – अभिवादनस्तुत्योः । सकर्म, सेट्, आत्मने । 'प्रणतिपूर्वम् आशिषो वाचनम् – अभिवादनम्' इति माधवीयधातुवृत्तिः । 'नतिमात्रं वाऽभिवादनम्' इति धातुकाव्यव्याख्यायाम् (१.३) । 'नुत्यभिवादयोः' इति वोपदेवः ।

१. लट् – वन्दते वन्देते वन्दन्ते । वन्दसे वन्देथे वन्दध्वे । वन्दे वन्दावहे वन्दामहे । **२. लिट्** – ववन्दे ववन्दाते ववन्दिरे । ववन्दिषे ववन्दाथे ववन्दिध्वे । ववन्दे ववन्दिवहे ववन्दिमहे । **३. लुट्** – वन्दिता वन्दितारौ वन्दितारः । वन्दितासे वन्दितासाथे वन्दिताध्वे । वन्दिताहे वन्दितास्वहे वन्दितास्महे । **४. लृट्** – वन्दिष्यते वन्दिष्येते वन्दिष्यन्ते । वन्दिष्यसे वन्दिष्येथे वन्दिष्यध्वे । वन्दिष्ये वन्दिष्यावहे वन्दिष्यामहे । **५. लोट्** – वन्दताम् वन्देताम् वन्दन्ताम् । वन्दस्व वन्देथाम् वन्दध्वम् । वन्दै वन्दावहै वन्दामहै । **६. लङ्** – अवन्दत अवन्देताम् अवन्दन्त । अवन्दथाः अवन्देथाम् अवन्दध्वम् । अवन्दे अवन्दावहि अवन्दामहि । **७. विधिलिङ्** – वन्देत वन्देयाताम् वन्देरन् । वन्देथाः वन्देयाथाम् वन्देध्वम् । वन्देय वन्देवहि वन्देमहि । **८. आशीर्लिङ्** – वन्दिषीष्ट वन्दिषीयास्ताम् वन्दिषीरन् । वन्दिषीष्ठाः वन्दिषीयास्थाम् वन्दिषीध्वम्/ढ्वम् । वन्दिषीय वन्दिषीवहि वन्दिषीमहि । **९. लुङ्** – अवन्दिष्ट अवन्दिषाताम् अवन्दिषत । अवन्दिष्ठाः अवन्दिषाथाम् अवन्दिध्वम्/ढ्वम् । अवन्दिषि अवन्दिष्वहि अवन्दिष्महि । **१०. लृङ्** – अवन्दिष्यत अवन्दिष्येताम् अवन्दिष्यन्त । अवन्दिष्यथाः अवन्दिष्येथाम् अवन्दिष्यध्वम् । अवन्दिष्ये अवन्दिष्यावहि अवन्दिष्यामहि ।

णिचि – वन्दयति – ते, **सनि** – विवन्दिषते, **यकि** – वन्द्यते ।

१२. भदि – कल्याणे सुखे च । अकर्म, सेट्, आत्मने । कल्याणम् – मङ्गलम् । भद्राकरोति = मुण्डयति, माङ्गल्यगुणेन संस्करोति इत्यर्थः । सुखम् = आत्मगुणः, आत्मगुणोदयो वा ।

१. लट् – भन्दते भन्देते भन्दन्ते । भन्दसे भन्देथे भन्दध्वे । भन्दे भन्दावहे भन्दामहे । **२. लिट्** – बभन्दे बभन्दाते बभन्दिरे । बभन्दिषे बभन्दाथे बभन्दिध्वे । बभन्दे बभन्दिवहे बभन्दिमहे । **३. लुट्** – भन्दिता भन्दितारौ भन्दितारः । भन्दितासे भन्दितासाथे भन्दिताध्वे । भन्दिताहे भन्दितास्वहे भन्दितास्महे । **४. लृट्** – भन्दिष्यते भन्दिष्येते भन्दिष्यन्ते । भन्दिष्यसे भन्दिष्येथे भन्दिष्यध्वे । भन्दिष्ये भन्दिष्यावहे भन्दिष्यामहे । **५. लोट्** – भन्दताम् भन्देताम् भन्दन्ताम् । भन्दस्व भन्देथाम् भन्दध्वम् । भन्दै भन्दावहै भन्दामहै । **६. लङ्** – अभन्दत अभन्देताम् अभन्दन्त । अभन्दथाः अभन्देथाम् अभन्दध्वम् । अभन्दे अभन्दावहि अभन्दामहि । **७. विधिलिङ्** – भन्देत भन्देयाताम् भन्देरन् । भन्देथाः भन्देयाथाम् भन्देध्वम् । भन्देय भन्देवहि भन्देमहि । **८. आशीर्लिङ्** – भन्दिषीष्ट भन्दिषीयास्ताम् भन्दिषीरन् । भन्दिषीष्ठाः भन्दिषीयास्थाम् भन्दिषीध्वम्/ढ्वम् । भन्दिषीय भन्दिषीवहि भन्दिषीमहि । **९. लुङ्** – अभन्दिष्ट अभन्दिषाताम् अभन्दिषत । अभन्दिष्ठाः अभन्दिषाथाम् अभन्दिध्वम्/ढ्वम् । अभन्दिषि अभन्दिष्वहि अभन्दिष्महि । **१०. लृङ्** – अभन्दिष्यत अभन्दिष्येताम् अभन्दिष्यन्त । अभन्दिष्यथाः अभन्दिष्येथाम् अभन्दिष्यध्वम् । अभन्दिष्ये अभन्दिष्यावहि अभन्दिष्यामहि ।

णिचि – भन्दयति – ते, **सनि** – बिभन्दिषते, **यकि** – भन्द्यते ।

१३. मदि – स्तुतिमोदस्वप्नकान्तिगतिषु । सकर्म, सेट्, आत्मने । 'स्तुत्यादौ मन्दते, हर्षे माद्येत्, मादयते णिचि' (श्लो. ११२) इति देवः । 'मोदो = हर्षः, मदो = गर्वः, स्वप्नः = आलस्यम् । चन्द्रस्तु 'मदि जाड्ये'

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्येव पपाठ । 'स्तुतिगतिभ्याम् अन्यत्र अकर्मकः' इति माधवीयधातुवृत्तिः । 'स्वप्नेनालस्यमपि लक्ष्यते' इति क्षीरस्वामी । धातोरस्य कान्त्यर्थकत्वं केषाञ्चिदसम्मतम् ।

१. लट् - मन्दते मन्देते मन्दन्ते । मन्दसे मन्देथे मन्दध्वे । मन्दे मन्दावहे मन्दामहे । **२. लिट्** - ममन्दे ममन्दाते ममन्दिरे । ममन्दिषे ममन्दाथे ममन्दिध्वे । ममन्दे ममन्दिवहे ममन्दिमहे । **३. लुट्** - मन्दिता मन्दितारौ मन्दितारः । मन्दितासे मन्दितासाथे मन्दिताध्वे । मन्दिताहे मन्दितास्वहे मन्दितास्महे । **४. लृट्** - मन्दिष्यते मन्दिष्येते मन्दिष्यन्ते । मन्दिष्यसे मन्दिष्येथे मन्दिष्यध्वे । मन्दिष्ये मन्दिष्यावहे मन्दिष्यामहे । **५. लोट्** - मन्दताम् मन्देताम् मन्दन्ताम् । मन्दस्व मन्देथाम् मन्दध्वम् । मन्दै मन्दावहै मन्दामहै । **६. लङ्** - अमन्दत अमन्देताम् अमन्दन्त । अमन्दथाः अमन्देथाम् अमन्दध्वम् । अमन्दे अमन्दावहि अमन्दामहि ।

७. विधिलिङ् - मन्देत मन्देयाताम् मन्देरन् । मन्देथाः मन्देयाथाम् मन्देध्वम् । मन्देय मन्देवहि मन्देमहि ।

८. आशीर्लिङ् - मन्दिषीष्ट मन्दिषीयास्ताम् मन्दिषीरन् । मन्दिषीष्ठाः मन्दिषीयास्थाम् मन्दिषीध्वम्/ढ्वम् । मन्दिषीय मन्दिषीवहि मन्दिषीमहि । **९. लुङ्** - अमन्दिष्ट अमन्दिषाताम् अमन्दिषत । अमन्दिष्ठाः अमन्दिषाथाम् अमन्दिध्वम्/ढ्वम् । अमन्दिषि अमन्दिष्वहि अमन्दिष्महि । **१०. लृङ्** - अमन्दिष्यत अमन्दिष्येताम् अमन्दिष्यन्त । अमन्दिष्यथाः अमन्दिष्येथाम् अमन्दिष्यध्वम् । अमन्दिष्ये अमन्दिष्यावहि अमन्दिष्यामहि ।

णिचि - मन्दयति - ते, **सनि** - मिमन्दिषते, **यकि** - मन्द्यते ।

१४. स्पदि - किञ्चिच्चलने । अकर्म, सेट्, आत्मने ।

१. लट् - स्पन्दते स्पन्देते स्पन्दन्ते । स्पन्दसे स्पन्देथे स्पन्दध्वे । स्पन्दे स्पन्दावहे स्पन्दामहे । **२. लिट्** - पस्पन्दे पस्पन्दाते पस्पन्दिरे । पस्पन्दिषे पस्पन्दाथे पस्पन्दिध्वे । पस्पन्दे पस्पन्दिवहे पस्पन्दिमहे । **३. लुट्** - स्पन्दिता स्पन्दितारौ स्पन्दितारः । स्पन्दितासे स्पन्दितासाथे स्पन्दिताध्वे । स्पन्दिताहे स्पन्दितास्वहे स्पन्दितास्महे । **४. लृट्** - स्पन्दिष्यते स्पन्दिष्येते स्पन्दिष्यन्ते । स्पन्दिष्यसे स्पन्दिष्येथे स्पन्दिष्यध्वे । स्पन्दिष्ये स्पन्दिष्यावहे स्पन्दिष्यामहे । **५. लोट्** - स्पन्दताम् स्पन्देताम् स्पन्दन्ताम् । स्पन्दस्व स्पन्देथाम् स्पन्दध्वम् । स्पन्दै स्पन्दावहै स्पन्दामहै । **६. लङ्** - अस्पन्दत अस्पन्देताम् अस्पन्दन्त । अस्पन्दथाः अस्पन्देथाम् अस्पन्दध्वम् । अस्पन्दे अस्पन्दावहि अस्पन्दामहि । **७. विधिलिङ्** - स्पन्देत स्पन्देयाताम् स्पन्देरन् । स्पन्देथाः स्पन्देयाथाम् स्पन्देध्वम् । स्पन्देय स्पन्देवहि स्पन्देमहि । **८. आशीर्लिङ्** - स्पन्दिषीष्ट स्पन्दिषीयास्ताम् स्पन्दिषीरन् । स्पन्दिषीष्ठाः स्पन्दिषीयास्थाम् स्पन्दिषीध्वम्/ढ्वम् । स्पन्दिषीय स्पन्दिषीवहि स्पन्दिषीमहि । **९. लुङ्** - अस्पन्दिष्ट अस्पन्दिषाताम् अस्पन्दिषत । अस्पन्दिष्ठाः अस्पन्दिषाथाम् अस्पन्दिध्वम्/ढ्वम् । अस्पन्दिषि अस्पन्दिष्वहि अस्पन्दिष्महि । **१०. लृङ्** - अस्पन्दिष्यत अस्पन्दिष्येताम् अस्पन्दिष्यन्त । अस्पन्दिष्यथाः अस्पन्दिष्येथाम् अस्पन्दिष्यध्वम् । अस्पन्दिष्ये अस्पन्दिष्यावहि अस्पन्दिष्यामहि

णिचि - स्पन्दयति[१] **सनि** - पिस्पन्दिषते, **यकि** - स्पन्द्यते ।

१. 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदित्वम् ।

१५. क्लिदि - परिदेवने । सकर्म, सेट्, आत्मने । (परस्मैपदपाठः ७३ तमे धातौ) 'क्लिन्दते क्लिन्दतीत्येवम् इदितः परिदेवने । 'क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत्' (श्लो. १०२) इति देवः । परिदेवनम् = शोचनम् । स्मृत्वा क्लेशः शोकः । क्लिन्दते चैत्रम् ।

१. लट् - क्लिन्दते क्लिन्देते क्लिन्दन्ते । क्लिन्दसे क्लिन्देथे क्लिन्दध्वे । क्लिन्दे क्लिन्दावहे क्लिन्दामहे ।
२. लिट् - चिक्लिन्दे चिक्लिन्दाते चिक्लिन्दिरे । चिक्लिन्दिषे चिक्लिन्दाथे चिक्लिन्दिध्वे । चिक्लिन्दे चिक्लिन्दिवहे चिक्लिन्दिमहे । **३. लुट्** - क्लिन्दिता क्लिन्दितारौ क्लिन्दितारः । क्लिन्दितासे क्लिन्दितासाथे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्लिन्दिताध्वे । क्लिन्दिताहे क्लिन्दितास्वहे क्लिन्दितास्महे । **४. लृट्** – क्लिन्दिष्यते क्लिन्दिष्येते क्लिन्दिष्यन्ते । क्लिन्दिष्यसे क्लिन्दिष्येथे क्लिन्दिष्यध्वे । क्लिन्दिष्ये क्लिन्दिष्यावहे क्लिन्दिष्यामहे । **५. लोट्** – क्लिन्दताम् क्लिन्देताम् क्लिन्दन्ताम् । क्लिन्दस्व क्लिन्देथाम् क्लिन्दध्वम् । क्लिन्दै क्लिन्दावहै क्लिन्दामहै । **६. लङ्** – अक्लिन्दत अक्लिन्देताम् अक्लिन्दन्त । अक्लिन्दथाः अक्लिन्देथाम् अक्लिन्दध्वम् । अक्लिन्दे अक्लिन्दावहि अक्लिन्दामहि । **७. विधिलिङ्** – क्लिन्देत क्लिन्देयाताम् क्लिन्देरन् । क्लिन्देथाः क्लिन्देयाथाम् क्लिन्देध्वम् । क्लिन्देय क्लिन्देवहि क्लिन्देमहि । **८. आशीर्लिङ्** – क्लिन्दिषीष्ट क्लिन्दिषीयास्ताम् क्लिन्दिषीरन् । क्लिन्दिषीष्ठाः क्लिन्दिषीयास्थाम् क्लिन्दिषीध्वम्/ढ्वम् । क्लिन्दिषीय क्लिन्दिषीवहि क्लिन्दिषीमहि । **९. लुङ्** – अक्लिन्दिष्ट अक्लिन्दिषाताम् अक्लिन्दिषत । अक्लिन्दिष्ठाः अक्लिन्दिषाथाम् अक्लिन्दिध्वम्/ढ्वम् । अक्लिन्दिषि अक्लिन्दिष्वहि अक्लिन्दिष्महि । **१०. लृङ्** – अक्लिन्दिष्यत अक्लिन्दिष्येताम् अक्लिन्दिष्यन्त । अक्लिन्दिष्यथाः अक्लिन्दिष्येथाम् अक्लिन्दिष्यध्वम् । अक्लिन्दिष्ये अक्लिन्दिष्यावहि अक्लिन्दिष्यामहि ।

णिचि – क्लिन्दयति - ते, **सनि** – चिक्लिन्दिषते, **यकि** – क्लिन्द्यते ।

१६. मुद – हर्षे । अकर्म, सेट्, आत्मने । 'संसर्गे णिचि मोदयेदिति भवेद्धर्षे पुनर्मोदते' (श्लो. ११३) – देवः ।

१. लट् – मोदते मोदेते मोदन्ते । मोदसे मोदेथे मोदध्वे । मोदे मोदावहे मोदामहे । **२. लिट्** – मुमुदे मुमुदाते मुमुदिरे । मुमुदिषे मुमुदाथे मुमुदिध्वे । मुमुदे मुमुदिवहे मुमुदिमहे । **३. लुट्** – मोदिता मोदितारौ मोदितारः । मोदितासे मोदितासाथे मोदिताध्वे । मोदिताहे मोदितास्वहे मोदितास्महे । **४. लृट्** – मोदिष्यते मोदिष्येते मोदिष्यन्ते । मोदिष्यसे मोदिष्येथे मोदिष्यध्वे । मोदिष्ये मोदिष्यावहे मोदिष्यामहे । **५. लोट्** – मोदताम् मोदेताम् मोदन्ताम् । मोदस्व मोदेथाम् मोदध्वम् । मोदै मोदावहै मोदामहै । **६. लङ्** – अमोदत अमोदेताम् अमोदन्त । अमोदथाः अमोदेथाम् अमोदध्वम् । अमोदे अमोदावहि अमोदामहि । **७. विधिलिङ्** – मोदेत मोदेयाताम् मोदेरन् । मोदेथाः मोदेयाथाम् मोदेध्वम् । मोदेय मोदेवहि मोदेमहि । **८. आशीर्लिङ्** – मोदिषीष्ट मोदिषीयास्ताम् मोदिषीरन् । मोदिषीष्ठाः मोदिषीयास्थाम् मोदिषीध्वम्/ढ्वम् । मोदिषीय मोदिषीवहि मोदिषीमहि । **९. लुङ्** – अमोदिष्ट अमोदिषाताम् अमोदिषत । अमोदिष्ठाः अमोदिषाथाम् अमोदिध्वम्/ढ्वम् । अमोदिषि अमोदिष्वहि अमोदिष्महि । **१०. लृङ्** – अमोदिष्यत अमोदिष्येताम् अमोदिष्यन्त । अमोदिष्यथाः अमोदिष्येथाम् अमोदिष्यध्वम् । अमोदिष्ये अमोदिष्यावहि अमोदिष्यामहि ।

णिचि – मोदयति-ते, **सनि** – मुमुदिषते-मुमोदिषते[१], **यकि** – मुद्यते ।

१. 'रलो व्युपधाद्धलादेः संश्च' इति सनि विकल्पेन कित्त्वम् । कित्त्वे लघूपधगुणो न ।

१७. दद – दाने । सकर्म, सेट्, आत्मने । 'धारणे च कल्पद्रुमे' इति धातुकाव्यव्याख्याने (१.४) । किञ्चिदुद्दिश्य अपुनर्ग्रहणाय स्वीयत्यागो दानम् । 'न मम इति त्यागः दानम्, न तु द्रव्यत्यागः' इति बालमनोरमा । (विशेषविचारः दध – धारणे (८) इत्यत्र द्रष्टव्यः ।)

१. लट् – ददते ददेते ददन्ते । ददसे ददेथे ददध्वे । ददे ददावहे ददामहे । **२. लिट्** – ददे ददाते ददिरे । ददिषे ददाथे ददिध्वे । ददे ददिवहे ददिमहे । **३. लुट्** – ददिता ददितारौ ददितारः । ददितासे ददितासाथे ददिताध्वे । ददिताहे ददितास्वहे ददितास्महे । **४. लृट्** – ददिष्यते ददिष्येते ददिष्यन्ते । ददिष्यसे ददिष्येथे ददिष्यध्वे । ददिष्ये ददिष्यावहे ददिष्यामहे । **५. लोट्** – ददताम् ददेताम् ददन्ताम् । ददस्व ददेथाम् ददध्वम् । ददै ददावहै ददामहै । **६. लङ्** – अददत अददेताम् अददन्त । अददथाः अददेथाम् अददध्वम् । अददे अददावहि अददामहि । **७. विधिलिङ्** – ददेत ददेयाताम् ददेरन् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ददेथाः ददेयाथाम् ददेध्वम् । ददेय ददेवहि ददेमहि । **८. आशीर्लिङ्** – ददिषीष्ट ददिषीयास्ताम् ददिषीरन् । ददिषीष्ठाः ददिषीयास्थाम् ददिषीध्वम्/ढ्वम् । ददिषीय ददिषीवहि ददिषीमहि । **९. लुङ्** – अददिष्ट अददिषाताम् अददिषत । अददिष्ठाः अददिषाथाम् अददिध्वम्/ढ्वम् । अददिषि अददिष्वहि अददिष्महि । **१०. लृङ्** – अददिष्यत अददिष्येताम् अददिष्यन्त । अददिष्यथाः अददिष्येथाम् अददिष्यध्वम् । अददिष्ये अददिष्यावहि अददिष्यामहि

णिचि – दादयति – ते, **सनि** – दिददिषते, **यकि** – दद्यते ।

१८. ष्वद – आस्वादने । सकर्म, सेट्, आत्मने[1] । 'आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्गिचोः' (श्लो.१९३) इति देवः । आस्वादनम् अनुभवः, प्रीतिविषयीभावात्मिका रुचिः वा । अनुभवार्थे सकर्मकः । स्वदस्व हव्यानि । रुचौ अकर्मकः । वारिधारा न स्वदते । विशेषविषयाः माधवीयधातुवृत्तौ द्रष्टव्याः ।

१. लट् – स्वदते स्वदेते स्वदन्ते । स्वदसे स्वदेथे स्वदध्वे । स्वदे स्वदावहे स्वदामहे । **२. लिट्** – सस्वदे सस्वदाते सस्वदिरे । सस्वदिषे सस्वदाथे सस्वदिध्वे । सस्वदे सस्वदिवहे सस्वदिमहे । **३. लुट्** – स्वदिता स्वदितारौ स्वदितारः । स्वदितासे स्वदितासाथे स्वदिताध्वे । स्वदिताहे स्वदितास्वहे स्वदितास्महे । **४. लृट्** – स्वदिष्यते स्वदिष्येते स्वदिष्यन्ते । स्वदिष्यसे स्वदिष्येथे स्वदिष्यध्वे । स्वदिष्ये स्वदिष्यावहे स्वदिष्यामहे । **५. लोट्** – स्वदताम् स्वदेताम् स्वदन्ताम् । स्वदस्व स्वदेथाम् स्वदध्वम् । स्वदै स्वदावहै स्वदामहै । **६. लङ्** – अस्वदत अस्वदेताम् अस्वदन्त । अस्वदथाः अस्वदेथाम् अस्वदध्वम् । अस्वदे अस्वदावहि अस्वदामहि । **७. विधिलिङ्** – स्वदेत स्वदेयाताम् स्वदेरन् । स्वदेथाः स्वदेयाथाम् स्वदेध्वम् । स्वदेय स्वदेवहि स्वदेमहि । **८. आशीर्लिङ्** – स्वदिषीष्ट स्वदिषीयास्ताम् स्वदिषीरन् । स्वदिषीष्ठाः स्वदिषीयास्थाम् स्वदिषीध्वम्/ढ्वम् । स्वदिषीय स्वदिषीवहि स्वदिषीमहि । **९. लुङ्** – अस्वदिष्ट अस्वदिषाताम् अस्वदिषत । अस्वदिष्ठाः अस्वदिषाथाम् अस्वदिध्वम्/ ढ्वम् । अस्वदिषि अस्वदिष्वहि अस्वदिष्महि । **१०. लृङ्** – अस्वदिष्यत अस्वदिष्येताम् अस्वदिष्यन्त । अस्वदिष्यथाः अस्वदिष्येथाम् अस्वदिष्यध्वम् । अस्वदिष्ये अस्वदिष्यावहि अस्वदिष्यामहि ।

णिचि – स्वादयति – ते, **सनि** – सिष्वदिषते, **यकि** – स्वद्यते

१. अस्य छान्दसं परस्मैपदित्वम् अस्ति । 'स्वदन्ति देवा उभयानि हव्या (ऋ ७.२.२) इति दर्शनात्' इति मा.धा.वृत्तिः ।

१९. स्वर्द – आस्वादने । सकर्म, सेट्, आत्मने, अनुभवे सक., रुचौ अक. । अनुभवे सक., रुचौ अक. । 'आस्वादनं जिह्वया लेहः' इति स्वामी । 'ष्वर्द' इति पुरुषकारः ।

१. लट् – स्वर्दते स्वर्देते स्वर्दन्ते । स्वर्दसे स्वर्देथे स्वर्दध्वे । स्वर्दे स्वर्दावहे स्वर्दामहे । **२. लिट्** – सस्वर्दे सस्वर्दाते सस्वर्दिरे । सस्वर्दिषे सस्वर्दाथे सस्वर्दिध्वे । सस्वर्दे सस्वर्दिवहे सस्वर्दिमहे । **३. लुट्** – स्वर्दिता स्वर्दितारौ स्वर्दितारः । स्वर्दितासे स्वर्दितासाथे स्वर्दिताध्वे । स्वर्दिताहे स्वर्दितास्वहे स्वर्दितास्महे । **४. लृट्** – स्वर्दिष्यते स्वर्दिष्येते स्वर्दिष्यन्ते । स्वर्दिष्यसे स्वर्दिष्येथे स्वर्दिष्यध्वे । स्वर्दिष्ये स्वर्दिष्यावहे स्वर्दिष्यामहे । **५. लोट्** – स्वर्दताम् स्वर्देताम् स्वर्दन्ताम् । स्वर्दस्व स्वर्देथाम् स्वर्दध्वम् । स्वर्दै स्वर्दावहै स्वर्दामहै । **६. लङ्** – अस्वर्दत अस्वर्देताम् अस्वर्दन्त । अस्वर्दथाः अस्वर्देथाम् अस्वर्दध्वम् । अस्वर्दे अस्वर्दावहि अस्वर्दामहि । **७. विधिलिङ्** – स्वर्देत स्वर्देयाताम् स्वर्देरन् । स्वर्देथाः स्वर्देयाथाम् स्वर्देध्वम् । स्वर्देय स्वर्देवहि स्वर्देमहि । **८. आशीर्लिङ्** – स्वर्दिषीष्ट स्वर्दिषीयास्ताम् स्वर्दिषीरन् । स्वर्दिषीष्ठाः स्वर्दिषीयास्थाम् स्वर्दिषीध्वम्/ढ्वम् । स्वर्दिषीय स्वर्दिषीवहि स्वर्दिषीमहि । **९. लुङ्** – अस्वर्दिष्ट अस्वर्दिषाताम् अस्वर्दिषत । अस्वर्दिष्ठाः अस्वर्दिषाथाम् अस्वर्दिध्वम्/ढ्वम् । अस्वर्दिषि अस्वर्दिष्वहि अस्वर्दिष्महि । **१०. लृङ्** – अस्वर्दिष्यत अस्वर्दिष्येताम् अस्वर्दिष्यन्त । अस्वर्दिष्यथाः अस्वर्दिष्येथाम् अस्वर्दिष्यध्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्वर्दिष्ये अस्वर्दिष्यावहि अस्वर्दिष्यामहि

णिचि – स्वर्दयति – ते, **सनि** – सिष्वर्दिषते, **यकि** – स्वर्द्यते ।

२०. उर्द – माने क्रीडायां च । अकर्म, सेट्, आत्मने । क्रीडायाम् अकर्मकः । 'चकारात् आस्वादने च' इति माधवीयधातुवृत्तिः । इह मानं सुखमिति सम्मतायाम् ।

१. लट् – ऊर्दते[1] ऊर्देते ऊर्दन्ते । ऊर्दसे ऊर्देथे ऊर्दध्वे । ऊर्दे ऊर्दावहे ऊर्दामहे । **२. लिट्** – (i) ऊर्दाञ्चक्रे[2] ऊर्दाञ्चक्राते ऊर्दाञ्चक्रिरे । ऊर्दाञ्चकृषे ऊर्दाञ्चक्राथे ऊर्दाञ्चकृढ्वे । ऊर्दाञ्चक्रे ऊर्दाञ्चकृवहे ऊर्दाञ्चकृमहे । (ii) ऊर्दामास ऊर्दामासतुः ऊर्दामासुः । ऊर्दामासिथ ऊर्दामासथुः ऊर्दामास । ऊर्दामास ऊर्दामासिव ऊर्दामासिम । (iii) ऊर्दाम्बभूव ऊर्दा-म्बभूवतुः ऊर्दाम्बभूवुः । ऊर्दाम्बभूविथ ऊर्दाम्बभूवथुः ऊर्दाम्बभूव । ऊर्दाम्बभूव ऊर्दाम्बभूविव ऊर्दाम्बभूविम । **३. लुट्** – ऊर्दिता ऊर्दितारौ ऊर्दितारः । ऊर्दितासे ऊदितासाथे ऊर्दिताध्वे । ऊर्दिताहे ऊर्दितास्वहे ऊर्दितास्महे । **४. लृट्** – ऊर्दिष्यते ऊर्दिष्येते ऊर्दिष्यन्ते । ऊर्दिष्यसे ऊर्दिष्येथे ऊर्दिष्यध्वे । ऊर्दिष्ये ऊर्दिष्यावहे ऊर्दिष्यामहे । **५. लोट्** – ऊर्दताम् ऊर्देताम् ऊर्दन्ताम् । ऊर्दस्व ऊर्देथाम् ऊर्दध्वम् । ऊर्दै ऊर्दावहै ऊर्दामहै । **६. लङ्** – और्दत और्देताम् और्दन्त । और्दथाः और्देथाम् और्दध्वम् । और्दे और्दावहि और्दामहि । **७. विधिलिङ्** – ऊर्देत ऊर्देयाताम् ऊर्देरन् । ऊर्देथाः ऊर्देयाथाम् ऊर्देध्वम् । ऊर्देय ऊर्देवहि ऊर्देमहि । **८. आशीर्लिङ्** – ऊर्दिषीष्ट ऊर्दिषीयास्ताम् ऊर्दिषीरन् । ऊर्दिषीष्ठाः ऊर्दिषीयास्थाम् ऊर्दिषीध्वम्/ढ्वम् । ऊर्दिषीय ऊर्दिषीवहि ऊर्दिषीमहि । **९. लुङ्** – और्दिष्ट और्दिषाताम् और्दिषत । और्दिष्ठाः और्दिषाथाम् और्दिध्वम्/ढ्वम् । और्दिषि और्दिष्वहि और्दिष्महि । **१०. लृङ्** – और्दिष्यत और्दिष्येताम् और्दिष्यन्त । और्दिष्यथाः और्दिष्येथाम् और्दिष्यध्वम् । और्दिष्ये और्दिष्यावहि और्दिष्यामहि ।

णिचि – ऊर्दयति – ते, **सनि** – ऊर्दिदिषते, **यकि** – ऊर्द्यते ।

१. 'उपधायां च' इति सूत्रेण धातोरुपधाभूतयोः रेफवकारयोः हल्परयोः परतः इकः दीर्घः स्यात् ।

२. 'इजादेश्च गुरुमतोऽनृच्छः' – इजादिर्यो धातुः गुरुमान् ऋच्छत्यन्यः ततः आम् स्यात् लिटि । 'आमः' इति आमः परस्य लेः लुक् । 'कृञ्चानुप्रयुज्यते लिटि' इति आमन्तात् लिट्पराः कृभ्वस्तयः अनुप्रयुज्यन्ते । 'आम्प्रकृत्ययवात्कृञोऽनुप्रयोगस्य' इति कृञः आम्प्रकृत्याः तुल्यता । एवमेव इतरत्रापि ज्ञेयम् ।

२१. कुर्द क्रीडायामेव[1] । अकर्म, सेट्, आत्मने ।

१. लट् – कूर्दते[2] कूर्देते कूर्दन्ते । कूर्दसे कूर्देथे कूर्दध्वे । कूर्दे कूर्दावहे कूर्दामहे । **२. लिट्** – चुकूर्दे चुकूर्दाते चुकूर्दिरे । चुकूर्दिषे चुकूर्दाथे चुकूर्दिध्वे । चुकूर्दे चुकूर्दिवहे चुकूर्दिमहे । **३. लुट्** – कूर्दिता कूर्दितारौ कूर्दितारः । कूर्दितासे कूर्दितासाथे कूर्दिताध्वे । कूर्दिताहे कूर्दितास्वहे कूर्दितास्महे । **४. लृट्** – कूर्दिष्यते कूर्दिष्येते कूर्दिष्यन्ते । कूर्दिष्यसे कूर्दिष्येथे कूर्दिष्यध्वे । कूर्दिष्ये कूर्दिष्यावहे कूर्दिष्यामहे । **५. लोट्** – कूर्दताम् कूर्देताम् कूर्दन्ताम् । कूर्दस्व कूर्देथाम् कूर्दध्वम् । कूर्दै कूर्दावहै कूर्दामहै । **६. लङ्** – अकूर्दत अकूर्देताम् अकूर्दन्त । अकूर्दथाः अकूर्देथाम् अकूर्दध्वम् । अकूर्दे अकूर्दावहि अकूर्दामहि । **७. विधिलिङ्** – कूर्देत कूर्देयाताम् कूर्देरन् । कूर्देथाः कूर्देयाथाम् कूर्देध्वम् । कूर्देय कूर्देवहि कूर्देमहि । **८. आशीर्लिङ्** – कूर्दिषीष्ट कूर्दिषीयास्ताम् कूर्दिषीरन् । कूर्दिषीष्ठाः कूर्दिषीयास्थाम् कूर्दिषीध्वम्/ढ्वम् । कूर्दिषीय कूर्दिषीवहि कूर्दिषीमहि । **९. लुङ्** – अकूर्दिष्ट अकूर्दिषाताम् अकूर्दिषत । अकूर्दिष्ठाः अकूर्दिषाथाम् अकूर्दिध्वम्/ढ्वम् । अकूर्दिषि अकूर्दिष्वहि अकूर्दिष्महि । **१०. लृङ्** – अकूर्दिष्यत अकूर्दिष्येताम् अकूर्दिष्यन्त । अकूर्दिष्यथाः अकूर्दिष्येथाम् अकूर्दिष्यध्वम् । अकूर्दिष्ये अकूर्दिष्यावहि अकूर्दिष्यामहि ।

णिचि – कूर्दयति – ते, **सनि** – चुकूर्दिषते, **यकि** – कूर्द्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. एवकारेण धातूनामनेकार्थत्वं प्रतीयते भाष्ये । 'कुर्दखुर्दगुर्दगुद क्रीडायामेव' इति पठित्वा मा.धा.वृत्तौ - ''गुदक्रीडा - गुदविहारः इति चरके । मैत्रेयकाश्यपौ 'गुद' इत्यपि पृथग् धातुरिति । अत्र एवकारः धातूनामनेकार्थत्वे लिङ्गम्'' इति प्रोक्तम् । 'उपाध्यायास्तु गुदक्रीडायाम् - पायुविहारे इति व्याख्यान् । तन्न इति सभ्याः' इति क्षीरतरङ्गिण्याम् । स्फूर्जतेः दीर्घोपदेशात् 'उपधायां च' इति दीर्घः एषां न इति चन्द्रः । मैत्रेय-सम्मत-मोघविस्तरकारादयस्तु दीर्घमिच्छन्ति ।

२. 'उपधायां च' (८.२.७९) धातोरुपधाभूतयोः रेफवकारयोः हल्परयोः परतः इकः दीर्घः स्यात् ।

२२. खुर्द - क्रीडायामेव । अकर्म, सेट्, आत्मने ।

१. लट् - खूर्दते खूर्देते खूर्दन्ते । खूर्दसे खूर्देथे खूर्दध्वे । खूर्दे खूर्दावहे खूर्दामहे । **२. लिट्** - चुखूर्दे चुखूर्दाते चुखूर्दिरे । चुखूर्दिषे चुखूर्दाथे चुखूर्दिध्वे । चुखूर्दे चुखूर्दिवहे चुखूर्दिमहे । **३. लुट्** - खूर्दिता खूर्दितारौ खूर्दितारः । खूर्दितासे खूर्दितासाथे खूर्दिताध्वे । खूर्दिताहे खूर्दितास्वहे खूर्दितास्महे । **४. लृट्** - खूर्दिष्यते खूर्दिष्येते खूर्दिष्यन्ते । खूर्दिष्यसे खूर्दिष्येथे खूर्दिष्यध्वे । खूर्दिष्ये खूर्दिष्यावहे खूर्दिष्यामहे । **५. लोट्** - खूर्दताम् खूर्देताम् खूर्दन्ताम् । खूर्दस्व खूर्देथाम् खूर्दध्वम् । खूर्दै खूर्दावहै खूर्दामहै । **६. लङ्** - अखूर्दत अखूर्देताम् अखूर्दन्त । अखूर्दथाः अखूर्देथाम् अखूर्दध्वम् । अखूर्दे अखूर्दावहि अखूर्दामहि । **७. विधिलिङ्** - खूर्देत खूर्देयाताम् खूर्देरन् । खूर्देथाः खूर्देयाथाम् खूर्देध्वम् । खूर्देय खूर्देवहि खूर्देमहि । **८. आशीर्लिङ्** - खूर्दिषीष्ट खूर्दिषीयास्ताम् खूर्दिषीरन् । खूर्दिषीष्ठाः खूर्दिषीयास्थाम् खूर्दिषीध्वम्/ढ्वम् । खूर्दिषीय खूर्दिषीवहि खूर्दिषीमहि । **९. लुङ्** - अखूर्दिष्ट अखूर्दिषाताम् अखूर्दिषत । अखूर्दिष्ठाः अखूर्दिषाथाम् अखूर्दिध्वम्/ढ्वम् । अखूर्दिषि अखूर्दिष्वहि अखूर्दिष्महि । **१०. लृङ्** - अखूर्दिष्यत अखूर्दिष्येताम् अखूर्दिष्यन्त । अखूर्दिष्यथाः अखूर्दिष्येथाम् अखूर्दिष्यध्वम् । अखूर्दिष्ये अखूर्दिष्यावहि अखूर्दिष्यामहि ।

णिचि - खूर्दयति - ते, **सनि** - चुखूर्दिषते, **यकि** - खूर्द्यते ।

२३. गुर्द - क्रीडायामेव । अकर्म, सेट्, आत्मने ।

१. लट् - गूर्दते गूर्देते गूर्दन्ते । गूर्दसे गूर्देथे गूर्दध्वे । गूर्दे गूर्दावहे गूर्दामहे । **२. लिट्** - जुगूर्दे जुगूर्दाते जुगूर्दिरे । जुगूर्दिषे जुगूर्दाथे जुगूर्दिध्वे । जुगूर्दे जुगूर्दिवहे जुगूर्दिमहे । **३. लुट्** - गूर्दिता गूर्दितारौ गूर्दितारः । गूर्दितासे गूर्दितासाथे गूर्दिताध्वे । गूर्दिताहे गूर्दितास्वहे गूर्दितास्महे । **४. लृट्** - गूर्दिष्यते गूर्दिष्येते गूर्दिष्यन्ते । गूर्दिष्यसे गूर्दिष्येथे गूर्दिष्यध्वे । गूर्दिष्ये गूर्दिष्यावहे गूर्दिष्यामहे । **५. लोट्** - गूर्दताम् गूर्देताम् गूर्दन्ताम् । गूर्दस्व गूर्देथाम् गूर्दध्वम् । गूर्दै गूर्दावहै गूर्दामहै । **६. लङ्** - अगूर्दत अगूर्देताम् अगूर्दन्त । अगूर्दथाः अगूर्देथाम् अगूर्दध्वम् । अगूर्दे अगूर्दावहि अगूर्दामहि । **७. विधिलिङ्** - गूर्देत गूर्देयाताम् गूर्देरन् । गूर्देथाः गूर्देयाथाम् गूर्देध्वम् । गूर्देय गूर्देवहि गूर्देमहि । **८. आशीर्लिङ्** - गूर्दिषीष्ट गूर्दिषीयास्ताम् गूर्दिषीरन् । गूर्दिषीष्ठाः गूर्दिषीयास्थाम् गूर्दिषीध्वम्/ढ्वम् । गूर्दिषीय गूर्दिषीवहि गूर्दिषीमहि । **९. लुङ्** - अगूर्दिष्ट अगूर्दिषाताम् अगूर्दिषत । अगूर्दिष्ठाः अगूर्दिषाथाम् अगूर्दिध्वम्/ढ्वम् । अगूर्दिषि अगूर्दिष्वहि अगूर्दिष्महि । **१०. लृङ्** - अगूर्दिष्यत अगूर्दिष्येताम् अगूर्दिष्यन्त । अगूर्दिष्यथाः अगूर्दिष्येथाम् अगूर्दिष्यध्वम् । अगूर्दिष्ये अगूर्दिष्यावहि अगूर्दिष्यामहि ।

णिचि - गूर्दयति - ते, **सनि** - जुगूर्दिषते, **यकि** - गूर्द्यते ।

२४. गुद - क्रीडायाम् । अकर्म, सेट्, आत्मने ।

१. लट् - गोदते गोदेते गोदन्ते । गोदसे गोदेथे गोदध्वे । गोदे गोदावहे गोदामहे । **२. लिट्** - जुगुदे जुगुदाते जुगुदिरे । जुगुदिषे जुगुदाथे जुगुदिध्वे । जुगुदे जुगुदिवहे जुगुदिमहे । **३. लुट्** - गोदिता गोदितारौ गोदितारः । गोदितासे गोदितासाथे गोदिताध्वे । गोदिताहे गोदितास्वहे गोदितास्महे । **४. लृट्** - गोदिष्यते गोदिष्येते गोदिष्यन्ते । गोदिष्यसे गोदिष्येथे गोदिष्यध्वे । गोदिष्ये गोदिष्यावहे गोदिष्यामहे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. लोट् – गोदताम् गोदेताम् गोदन्ताम् । गोदस्व गोदेथाम् गोदध्वम् । गोदै गोदावहै गोदामहै । **६. लङ्** – अगोदत अगोदेताम् अगोदन्त । अगोदथाः अगोदेथाम् अगोदध्वम् । अगोदे अगोदावहि अगोदामहि । **७. विधिलिङ्** – गोदेत गोदेयाताम् गोदेरन् । गोदेथाः गोदेयाथाम् गोदेध्वम् । गोदेय गोदेवहि गोदेमहि । **८. आशीर्लिङ्** – गोदिषीष्ट गोदिषीयास्ताम् गोदिषीरन् । गोदिषीष्ठाः गोदिषीयास्थाम् गोदिषीध्वम्/ढ्वम् । गोदिषीय गोदिषीवहि गोदिषीमहि । **९. लुङ्** – अगोदिष्ट अगोदिषाताम् अगोदिषत । अगोदिष्ठाः अगोदिषाथाम् अगोदिध्वम्/ढ्वम् । अगोदिषि अगोदिष्वहि अगोदिष्महि । **१०. लृङ्** – अगोदिष्यत अगोदिष्येताम् अगोदिष्यन्त । अगोदिष्यथाः अगोदिष्येथाम् अगोदिष्यध्वम् । अगोदिष्ये अगोदिष्यावहि अगोदिष्यामहि ।

णिचि – गोदयति – ते, **सनि** – जुगुदिषते/जुगोदिषते, **यकि** – गुद्यते ।

२५. षूद – क्षरणे । सकर्म, सेट्, आत्मने । क्षरणम् = निरसनम् । अत्र अयम् अकर्मकः । क्षरणम् = निरसनम् ।'निस्सारणम्' इति केचित् । मधुसूदनः इत्यादिषु हिंसार्थकत्वमपि दृश्यते । तत्र सकर्मकः । बहवः अर्थाः मा.धा.वृत्तौ उपवर्णिताः ।

१. लट् – सूदते सूदेते सूदन्ते । सूदसे सूदेथे सूदध्वे । सूदे सूदावहे सूदामहे । **२. लिट्** – सुषूदे सुषूदाते सुषूदिरे । सुषूदिषे सुषूदाथे सुषूदिध्वे । सुषूदे सुषूदिवहे सुषूदिमहे । **३. लुट्** – सूदिता सूदितारौ सूदितारः । सूदितासे सूदितासाथे सूदिताध्वे । सूदिताहे सूदितास्वहे सूदितास्महे । **४. लृट्** – सूदिष्यते सूदिष्येते सूदिष्यन्ते । सूदिष्यसे सूदिष्येथे सूदिष्यध्वे । सूदिष्ये सूदिष्यावहे सूदिष्यामहे । **५. लोट्** – सूदताम् सूदेताम् सूदन्ताम् । सूदस्व सूदेथाम् सूदध्वम् । सूदै सूदावहै सूदामहै । **६. लङ्** – असूदत असूदेताम् असूदन्त । असूदथाः असूदेथाम् असूदध्वम् । असूदे असूदावहि असूदामहि । **७. विधिलिङ्** – सूदेत सूदेयाताम् सूदेरन् । सूदेथाः सूदेयाथाम् सूदेध्वम् । सूदेय सूदेवहि सूदेमहि । **८. आशीर्लिङ्** – सूदिषीष्ट सूदिषीयास्ताम् सूदिषीरन् । सूदिषीष्ठाः सूदिषीयास्थाम् सूदिषीध्वम्/ढ्वम् । सूदिषीय सूदिषीवहि सूदिषीमहि । **९. लुङ्** – असूदिष्ट असूदिषाताम् असूदिषत । असूदिष्ठाः असूदिषाथाम् असूदिध्वम्/ढ्वम् । असूदिषि असूदिष्वहि असूदिष्महि । **१०. लृङ्** – असूदिष्यत असूदिष्येताम् असूदिष्यन्त । असूदि-ष्यथाः असूदिष्येथाम् असूदिष्यध्वम् । असूदिष्ये असूदिष्यावहि असूदिष्यामहि

णिचि – सूदयति – ते, **सनि** – सुसूदिषते[१], **यकि** – सूद्यते ।

१. 'स्तौतिण्योरेव षण्यभ्यासात्' – अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्, न अन्यस्य ।

२६. ह्राद – अव्यक्ते शब्दे । अकर्म, सेट्, आत्मने । अव्यक्तशब्दः अमनुष्यवाक्, वाद्यनिर्घोषादिः ।

१. लट् – ह्रादते ह्रादेते ह्रादन्ते । ह्रादसे ह्रादेथे ह्रादध्वे । ह्रादे ह्रादावहे ह्रादामहे । **२. लिट्** – जह्रादे जह्रादाते जह्रादिरे । जह्रादिषे जह्रादाथे जह्रादिध्वे । जह्रादे जह्रादिवहे जह्रादिमहे । **३. लुट्** – ह्रादिता ह्रादितारौ ह्रादितारः । ह्रादितासे ह्रादितासाथे ह्रादिताध्वे । ह्रादिताहे ह्रादितास्वहे ह्रादितास्महे । **४. लृट्** – ह्रादिष्यते ह्रादिष्येते ह्रादिष्यन्ते । ह्रादिष्यसे ह्रादिष्येथे ह्रादिष्यध्वे । ह्रादिष्ये ह्रादिष्यावहे ह्रादिष्यामहे । **५. लोट्** – ह्रादताम् ह्रादेताम् ह्रादन्ताम् । ह्रादस्व ह्रादेथाम् ह्रादध्वम् । ह्रादै ह्रादावहै ह्रादामहै । **६. लङ्** – अह्रादत अह्रादेताम् अह्रादन्त । अह्रादथाः अह्रादेथाम् अह्रादध्वम् । अह्रादे अह्रादावहि अह्रादामहि । **७. विधिलिङ्** – ह्रादेत ह्रादेयाताम् ह्रादेरन् । ह्रादेथाः ह्रादेयाथाम् ह्रादेध्वम् । ह्रादेय ह्रादेवहि ह्रादेमहि । **८. आशीर्लिङ्** – ह्रादिषीष्ट ह्रादिषीयास्ताम् ह्रादिषीरन् । ह्रादिषीष्ठाः ह्रादिषीयास्थाम् ह्रादिषीध्वम्/ढ्वम् । ह्रादिषीय ह्रादिषीवहि ह्रादिषीमहि । **९. लुङ्** – अह्रादिष्ट अह्रादिषाताम् अह्रादिषत । अह्रादिष्ठाः अह्रादिषाथाम् अह्रादिध्वम्/ढ्वम् । अह्रादिषि अह्रादिष्वहि अह्रादिष्महि । **१०. लृङ्** – अह्रादिष्यत अह्रादिष्येताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अह्रादिष्यन्त । अह्रादिष्यथाः अह्रादिष्येथाम् अह्रादिष्यध्वम् । अह्रादिष्ये अह्रादिष्यावहि अह्रादिष्यामहि
णिचि – ह्रादयति – ते, **सनि** – जिह्रादिषते, **यकि** – ह्राद्यते ।

२७. ह्लादी – सुखे च । अकर्म, सेट्, आत्मने । चकारात् पूर्वधात्वर्थः 'अव्यक्तशब्दे' इति अनुषज्यते ।

१. लट् – ह्लादते ह्लादेते ह्लादन्ते । ह्लादसे ह्लादेथे ह्लादध्वे । ह्लादे ह्लादावहे ह्लादामहे । **२. लिट्** – जह्लादे जह्लादाते जह्लादिरे । जह्लादिषे जह्लादाथे जह्लादिध्वे । जह्लादे जह्लादिवहे जह्लादिमहे । **३. लुट्** – ह्लादिता ह्लादितारौ ह्लादितारः । ह्लादितासे ह्लादितासाथे ह्लादिताध्वे । ह्लादिताहे ह्लादितास्वहे ह्लादितास्महे । **४. लृट्** – ह्लादिष्यते ह्लादिष्येते ह्लादिष्यन्ते । ह्लादिष्यसे ह्लादिष्येथे ह्लादिष्यध्वे । ह्लादिष्ये ह्लादिष्यावहे ह्लादिष्यामहे ।
५. लोट् – ह्लादताम् ह्लादेताम् ह्लादन्ताम् । ह्लादस्व ह्लादेथाम् ह्लादध्वम् । ह्लादै ह्लादावहै ह्लादामहै ।
६. लङ् – अह्लादत अह्लादेताम् अह्लादन्त । अह्लादथाः अह्लादेथाम् अह्लादध्वम् । अह्लादे अह्लादावहि अह्लादामहि । **७. विधिलिङ्** – ह्लादेत ह्लादेयाताम् ह्लादेरन् । ह्लादेथाः ह्लादेयाथाम् ह्लादेध्वम् । ह्लादेय ह्लादेवहि ह्लादेमहि । **८. आशीर्लिङ्** – ह्लादिषीष्ट ह्लादिषीयास्ताम् ह्लादि-षीरन् । ह्लादिषीष्ठाः ह्लादिषीयास्थाम् ह्लादिषीध्वम्/ढ्वम् । ह्लादिषीय ह्लादिषीवहि ह्लादिषीमहि । **९. लुङ्** – अह्लादिष्ट अह्लादिषाताम् अह्लादिषत । अह्लादिष्ठाः अह्लादिषाथाम् अह्लादिध्वम्/ढ्वम् । अह्लादिषि अह्लादिष्वहि अह्लादिष्महि । **१०. लृङ्** – अह्लादिष्यत अह्लादिष्येताम् अह्लादिष्यन्त । अह्लादिष्यथाः अह्लादिष्येथाम् अह्लादिष्यध्वम् । अह्लादिष्ये अह्लादिष्यावहि अह्लादिष्यामहि ।
णिचि – ह्लादयति – ते, **सनि** – जिह्लादिषते, **यकि** – ह्लाद्यते ।

२८. स्वाद – आस्वादने । सकर्म, सेट्, आत्मने । 'आस्वादनेऽर्थे स्वदते स्वादयेदिति शब्णिचोः' (श्लो. १०३) इति देवः ।

१. लट् – स्वादते स्वादेते स्वादन्ते । स्वादसे स्वादेथे स्वादध्वे । स्वादे स्वादावहे स्वादामहे । **२. लिट्** – सस्वादे सस्वादाते सस्वादिरे । सस्वादिषे सस्वादाथे सस्वादिध्वे । सस्वादे सस्वादिवहे सस्वादिमहे ।
३. लुट् – स्वादिता स्वादितारौ स्वादितारः । स्वादितासे स्वादितासाथे स्वादिताध्वे । स्वादिताहे स्वादितास्वहे स्वादितास्महे । **४. लृट्** – स्वादिष्यते स्वादिष्येते स्वादिष्यन्ते । स्वादिष्यसे स्वादिष्येथे स्वादिष्यध्वे । स्वादिष्ये स्वादिष्यावहे स्वादिष्यामहे । **५. लोट्** – स्वादताम् स्वादेताम् स्वादन्ताम् । स्वादस्व स्वादेथाम् स्वादध्वम् । स्वादै स्वादावहै स्वादामहै । **६. लङ्** – अस्वादत अस्वादेताम् अस्वादन्त । अस्वादथाः अस्वादेथाम् अस्वादध्वम् । अस्वादे अस्वादावहि अस्वादामहि । **७. विधिलिङ्** – स्वादेत स्वादेयाताम् स्वादेरन् । स्वादेथाः स्वादेयाथाम् स्वादेध्वम् । स्वादेय स्वादेवहि स्वादेमहि । **८. आशीर्लिङ्** – स्वादिषीष्ट स्वादिषीयास्ताम् स्वादिषीरन् । स्वादिषीष्ठाः स्वादिषीयास्थाम् स्वादिषीध्वम्/ढ्वम् । स्वादिषीय स्वादिषीवहि स्वादिषीमहि । **९. लुङ्** – अस्वादिष्ट अस्वादिषाताम् अस्वादिषत । अस्वादिष्ठाः अस्वादिषाथाम् अस्वादिध्वम्/ढ्वम् । अस्वादिषि अस्वादिष्वहि अस्वादि-ष्महि । **१०. लृङ्** – अस्वादिष्यत अस्वादिष्येताम् अस्वादिष्यन्त । अस्वादिष्यथाः अस्वादिष्येथाम् अस्वादिष्यध्वम् । अस्वादिष्ये अस्वादिष्यावहि अस्वादिष्यामहि ।
णिचि – स्वादयति-ते, **सनि** – सिस्वादिषते[1], **यकि** – स्वाद्यते

१. 'स्तौतिण्योरेव षण्यभ्यासात्' – अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्, नान्यस्य ।

२९. पर्द – कुत्सिते शब्दे । अकर्म, सेट्, आत्मने । कुत्सितशब्दः गुदरवः । तदाह केशवस्वामी – 'कौक्षे कर्दति पर्दते गुदरवे इति' इति माधवीयधातुवृत्तिः । क्षीरस्वामी तु – 'पायुध्वनौ वर्ततेऽयम् । अन्ये निश्शब्दमधोवातं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मन्वानाः अशब्दे इत्याहुः' इत्याह ।

१. लट् – पर्दते पर्देते पर्दन्ते । पर्दसे पर्देथे पर्दध्वे । पर्दे पर्दावहे पर्दामहे । **२. लिट्** – पपर्दे पपर्दाते पपर्दिरे । पपर्दिषे पपर्दाथे पपर्दिध्वे । पपर्दे पपर्दिवहे पपर्दिमहे । **३. लुट्** – पर्दिता पर्दितारौ पर्दितारः । पर्दितासे पर्दितासाथे पर्दिताध्वे । पर्दिताहे पर्दितास्वहे पर्दितास्महे । **४. लृट्** – पर्दिष्यते पर्दिष्येते पर्दिष्यन्ते । पर्दिष्यसे पर्दिष्येथे पर्दिष्यध्वे । पर्दिष्ये पर्दिष्यावहे पर्दिष्यामहे । **५. लोट्** – पर्दताम् पर्देताम् पर्दन्ताम् । पर्दस्व पर्देथाम् पर्दध्वम् । पर्दै पर्दावहै पर्दामहै । **६. लङ्** – अपर्दत अपर्देताम् अपर्दन्त । अपर्दथाः अपर्देथाम् अपर्दध्वम् । अपर्दे अपर्दावहि अपर्दामहि । **७. विधिलिङ्** – पर्देत पर्देयाताम् पर्देरन् । पर्देथाः पर्देयाथाम् पर्देध्वम् । पर्देय पर्देवहि पर्देमहि । **८. आशीर्लिङ्** – पर्दिषीष्ट पर्दिषीयास्ताम् पर्दिषीरन् । पर्दिषीष्ठाः पर्दिषीयास्थाम् पर्दिषीध्वम्/ढ्वम् । पर्दिषीय पर्दिषीवहि पर्दिषीमहि । **९. लुङ्** – अपर्दिष्ट अपर्दिषाताम् अपर्दिषत । अपर्दिष्ठाः अपर्दिषाथाम् अपर्दिध्वम्/ढ्वम् । अपर्दिषि अपर्दिष्वहि अपर्दिष्महि । **१०. लृङ्** – अपर्दिष्यत अपर्दिष्येताम् अपर्दिष्यन्त । अपर्दिष्यथाः अपर्दिष्येथाम् अपर्दिष्यध्वम् । अपर्दिष्ये अपर्दिष्यावहि अपर्दिष्यामहि ।

णिचि – पर्दयति - ते, **सनि** – पिपर्दिषते, **यकि** – पर्द्यते ।

३०. यती – प्रयत्ने । अकर्म, सेट्, आत्मने ।'यतते तु प्रयत्नार्थे, निराकारे तु यातयेत्' (श्लो. ९६) इति देवः ।

१. लट् – यतते यतेते यतन्ते । यतसे यतेथे यतध्वे । यते यतावहे यतामहे । **२. लिट्** – येते येताते येतिरे । येतिषे येताथे येतिध्वे । येते येतिवहे येतिमहे । **३. लुट्** – यतिता यतितारौ यतितारः । यतितासे यतितासाथे यतिताध्वे । यतिताहे यतितास्वहे यतितास्महे । **४. लृट्** – यतिष्यते यतिष्येते यतिष्यन्ते । यतिष्यसे यतिष्येथे यतिष्यध्वे यतिष्ये यतिष्यावहे यतिष्यामहे । **५. लोट्** – यतताम् यतेताम् यतन्ताम् । यतस्व यतेथाम् यतध्वम् । यतै यतावहै यतामहै । **६. लङ्** – अयतत अयतेताम् अयतन्त । अयतथाः अयतेथाम् अयतध्वम् । अयते अयतावहि अयतामहि । **७. विधिलिङ्** – यतेत यतेयाताम् यतेरन् । यतेथाः यतेयाथाम् यतेध्वम् । यतेय यतेवहि यतेमहि । **८. आशीर्लिङ्** – यतिषीष्ट यतिषीयास्ताम् यतिषीरन् । यतिषीष्ठाः यतिषीयास्थाम् यतिषीध्वम्/ढ्वम् । यतिषीय यतिषीवहि यतिषीमहि । **९. लुङ्** – अयतिष्ट अयतिषाताम् अयतिषत । अयतिष्ठाः अयतिषाथाम् अयतिध्वम्/ढ्वम् । अयतिषि अयतिष्वहि अयतिष्महि । **१०. लृङ्** – अयतिष्यत अयतिष्येताम् अयतिष्यन्त । अयतिष्यथाः अयतिष्येथाम् अयतिष्यध्वम् । अयतिष्ये अयतिष्यावहि अयतिष्यामहि ।

णिचि – यातयति - ते, **सनि** – यियतिषते, **यकि** – यत्यते ।

३१. युतृ – भासने । अकर्म, सेट्, आत्मने ।

१. लट् – योतते योतेते योतन्ते । योतसे योतेथे योतध्वे । योते योतावहे योतामहे । **२. लिट्** – युयुते युयुताते युयुतिरे । युयुतिषे युयुताथे युयुतिध्वे । युयुते युयुतिवहे युयुतिमहे । **३. लुट्** – योतिता योतितारौ योतितारः । योतितासे योतितासाथे योतिताध्वे । योतिताहे योतितास्वहे योतितास्महे । **४. लृट्** – योतिष्यते योतिष्येते योतिष्यन्ते । योतिष्यसे योतिष्येथे योतिष्यध्वे । योतिष्ये योतिष्यावहे योतिष्यामहे । **५. लोट्** – योतताम् योतेताम् योतन्ताम् । योतस्व योतेथाम् योतध्वम् । योतै योतावहै योतामहै । **६. लङ्** – अयोतत अयोतेताम् अयोतन्त । अयोतथाः अयोतेथाम् अयोतध्वम् । अयोते अयोतावहि अयोतामहि । **७. विधिलिङ्** – योतेत योतेयाताम् योतेरन् । योतेथाः योतेयाथाम् योतेध्वम् । योतेय योतेवहि योतेमहि । **८. आशीर्लिङ्** – योतिषीष्ट योतिषीयास्ताम् योतिषीरन् । योतिषीष्ठाः योतिषीयास्थाम् योतिषीध्वम्/ढ्वम् । योतिषीय योतिषीवहि योतिषीमहि । **९. लुङ्** – अयोतिष्ट अयोतिषाताम् अयोतिषत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयोतिष्ठाः अयोतिषाथाम् अयोतिध्वम्/ढ्वम् । अयोतिषि अयोतिष्वहि अयोतिष्महि । **१०. लृङ्** – अयोतिष्यत अयोतिष्येताम् अयोतिष्यन्त । अयोतिष्यथाः अयोतिष्येथाम् अयोतिष्यध्वम् । अयोतिष्ये अयोतिष्यावहि अयोतिष्यामहि ।

णिचि – योतयति-ते, **सनि** – युयुतिषते/युयोतिषते[1] **यकि** – युत्यते

१. 'रलो व्युपधात्...' इति वा कित्त्वम् ।

३२. जुतृ – भासने । अकर्म, सेट्, आत्मने । ज्योतिरिति रूपसिध्यर्थं 'ज्युतृ' इति केचित् पठन्ति ।

१. लट् – जोतते जोतेते जोतन्ते । जोतसे जोतेथे जोतध्वे । जोते जोतावहे जोतामहे । **२. लिट्** – जुजुते जुजुताते जुजुतिरे । जुजुतिषे जुजुताथे जुजुतिध्वे । जुजुते जुजुतिवहे जुजुतिमहे । **३. लुट्** – जोतिता जोतितारौ जोतितारः । जोतितासे जोतितासाथे जोतिताध्वे । जोतिताहे जोतितास्वहे जोतितास्महे । **४. लृट्** – जोतिष्यते जोतिष्येते जोतिष्यन्ते । जोतिष्यसे जोतिष्येथे जोतिष्यध्वे । जोतिष्ये जोतिष्यावहे जोतिष्यामहे । **५. लोट्** – जोतताम् जोतेताम् जोतन्ताम् । जोतस्व जोतेथाम् जोतध्वम् । जोते जोतावहै जोतामहै । **६. लङ्** – अजोतत अजोतेताम् अजोतन्त । अजोतथाः अजोतेथाम् अजोतध्वम् । अजोते अजोतावहि अजोतामहि । **७. विधिलिङ्** – जोतेत जोतेयाताम् जोतेरन् । जोतेथाः जोतेयाथाम् जोतेध्वम् । जोतेय जोतेवहि जोतेमहि । **८. आशीर्लिङ्** – जोतिषीष्ट जोतिषीयास्ताम् जोतिषीरन् । जोतिषीष्ठाः जोतिषीयास्थाम् जोतिषीध्वम्/ढ्वम् । जोतिषीय जोतिषीवहि जोतिषीमहि । **९. लुङ्** – अजोतिष्ट अजोतिषाताम् अजोतिषत । अजोतिष्ठाः अजोतिषाथाम् अजोतिध्वम्/ढ्वम् । अजोतिषि अजोतिष्वहि अजोतिष्महि । **१०. लृङ्** – अजोतिष्यत अजोतिष्येताम् अजोतिष्यन्त । अजोतिष्यथाः अजोतिष्येथाम् अजोतिष्यध्वम् । अजोतिष्ये अजोतिष्यावहि अजोतिष्यामहि ।

णिचि – जोतयति-ते, **सनि** – जुजुतिषते/जिजोतिषते[1] **यकि** – जुत्यते

१. 'रलो व्युपधात्.....' इति वा कित्त्वम् ।

३३. विथृ – याचने । द्विकर्म, सेट्, आत्मने । 'विधृ इति कौशिकः । क्षीरस्वामिना त्वयं पक्षो दूषितः' इति धातुवृत्तौ उक्तम् । सायणोक्तः पाठस्तु अधुना तरङ्गिण्यां न उपलभ्यते ।

१. लट् – वेथते वेथेते वेथन्ते । वेथसे वेथेथे वेथध्वे । वेथे वेथावहे वेथामहे । **२. लिट्** – विविथे विविथाते विविथिरे । विविथिषे विविथाथे विविथिध्वे । विविथे विविथिवहे विविथिमहे । **३. लुट्** – वेथिता वेथितारौ वेथितारः । वेथितासे वेथितासाथे वेथिताध्वे । वेथिताहे वेथितास्वहे वेथितास्महे । **४. लृट्** – वेथिष्यते वेथिष्येते वेथिष्यन्ते । वेथिष्यसे वेथिष्येथे वेथिष्यध्वे । वेथिष्ये वेथिष्यावहे वेथिष्यामहे । **५. लोट्** – वेथताम् वेथेताम् वेथन्ताम् । वेथस्व वेथेथाम् वेथध्वम् । वेथै वेथावहै वेथामहै । **६. लङ्** – अवेथत अवेथेताम् अवेथन्त । अवेथथाः अवेथेथाम् अवेथध्वम् । अवेथे अवेथावहि अवेथामहि । **७. विधिलिङ्** – वेथेत वेथेयाताम् वेथेरन् । वेथेथाः वेथेयाथाम् वेथेध्वम् । वेथेय वेथेवहि वेथेमहि । **८. आशीर्लिङ्** – वेथिषीष्ट वेथिषीयास्ताम् वेथिषीरन् । वेथिषीष्ठाः वेथिषीयास्थाम् वेथिषीध्वम्/ढ्वम् । वेथिषीय वेथिषीवहि वेथिषीमहि । **९. लुङ्** – अवेथिष्ट अवेथिषाताम् अवेथिषत । अवेथिष्ठाः अवेथिषाथाम् अवेथिध्वम्/ढ्वम् । अवेथिषि अवेथिष्वहि अवेथिष्महि । **१०. लृङ्** – अवेथिष्यत अवेथिष्येताम् अवेथिष्यन्त । अवेथिष्यथाः अवेथिष्येथाम् अवेथिष्यध्वम् । अवेथिष्ये अवेथिष्यावहि अवेथिष्यामहि ।

णिचि – वेथयति-ते, **सनि** – विविथिषते/विवेथिषते[1], **यकि** – विथ्यते

१. 'रलो व्युपधात्...' इति वा कित्त्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३४. वेथृ - याचने । द्विकर्म, सेट्, आत्मने । 'वेद्द इति कौशिकः' इति माधवीया धातुवृत्तिः । धातुरयं द्विकर्मकः इति च तत्रोक्तम् ।

१. लट् - वेथते वेथेते वेथन्ते । वेथसे वेथेथे वेथध्वे । वेथे वेथावहे वेथामहे । **२. लिट्** - विवेथे विवेथाते विवेथिरे । विवेथिषे विवेथाथे विवेथिध्वे । विवेथे विवेथिवहे विवेथिमहे । **३. लुट्** - वेथिता वेथितारौ वेथितारः । वेथितासे वेथितासाथे वेथिताध्वे । वेथिताहे वेथितास्वहे वेथितास्महे । **४. लृट्** - वेथिष्यते वेथिष्येते वेथिष्यन्ते । वेथिष्यसे वेथिष्येथे वेथिष्यध्वे । वेथिष्ये वेथिष्यावहे वेथिष्यामहे । **५. लोट्** - वेथताम् वेथेताम् वेथन्ताम् । वेथस्व वेथेथाम् वेथध्वम् । वेथै वेथावहै वेथामहै । **६. लङ्** - अवेथत अवेथेताम् अवेथन्त । अवेथथाः अवेथेथाम् अवेथध्वम् । अवेथे अवेथावहि अवेथामहि । **७. विधिलिङ्** - वेथेत वेथेयाताम् वेथेरन् । वेथेथाः वेथेयाथाम् वेथेध्वम् । वेथेय वेथेवहि वेथेमहि । **८. आशीर्लिङ्** - वेथिषीष्ट वेथिषीयास्ताम् वेथिषीरन् । वेथिषीष्ठाः वेथिषीयास्थाम् वेथिषीध्वम्/ढ्वम् । वेथिषीय वेथिषीवहि वेथिषीमहि । **९. लुङ्** - अवेथिष्ट अवेथिषाताम् अवेथिषत । अवेथिष्ठाः अवेथिषाथाम् अवेथिध्वम्/ढ्वम् । अवेथिषि अवेथिष्वहि अवेथिष्महि । **१०. लृङ्** - अवेथिष्यत अवेथिष्येताम् अवेथिष्यन्त । अवेथिष्यथाः अवेथिष्येथाम् अवेथिष्यध्वम् । अवेथिष्ये अवेथिष्यावहि अवेथिष्यामहि ।

णिचि - वेथयति - ते, **सनि** - विवेथिषते, **यकि** - वेथ्यते ।

३५. श्रथि - शैथिल्ये । अकर्म, सेट्, आत्मने । शैथिल्यं विश्लिष्टता अगाढता वा इति माधवः । 'दौर्बल्ये श्रथयेत् प्रयत्नविषये स्याच्छ्राथयेत् मोक्षणे । यौ तु श्राथयति श्रथत्यपि च वा णौ श्रन्थयेत् श्रन्थति । सन्दर्भे श्रि विमोचनार्थविषये श्रथ्नात्यथ श्रन्थते, शैथिल्ये ..' (श्लो. १०१) इति देवः ।

णिचि - कन्दयति - ते, **सनि** - चिकन्दिषति, **यकि** - कन्द्यते

७१. क्रदि - आह्वाने रोदने च । सकर्म, सेट्, परस्मै । अर्थविशेषे घटादिः । षित् । (धातुसङ्ख्या ७७३ अवलोक्यताम् ।) 'आह्वाने सकर्मकः, रोदनेऽकर्मकः । 'रक्षणे च' इत्येके । 'आह्वाने रोदने क्रन्देः कन्देः क्रन्दति कन्दति । वैक्लव्ये तु तयोर्धात्वोः क्रन्दते कन्दते मितोः । मित्त्वार्थपाठसामर्थ्यात् तयोर्दीर्घविकल्पनम् । भवेत् चिण्णमुलोस्तस्मात् अक्रान्द्यक्रन्दि सिद्ध्यतः' (श्लो.१०५-१०६) इति देवः ।

१. लट् - क्रन्दति क्रन्दतः क्रन्दन्ति । क्रन्दसि क्रन्दथः क्रन्दथ । क्रन्दामि क्रन्दावः क्रन्दामः । **२. लिट्** - चक्रन्द चक्रन्दतुः चक्रन्दुः । चक्रन्दिथ चक्रन्दथुः चक्रन्द । चक्रन्द चक्रन्दिव चक्रन्दिम । **३. लुट्** - क्रन्दिता क्रन्दितारौ क्रन्दितारः । क्रन्दितासि क्रन्दितास्थः क्रन्दितास्थ । क्रन्दितास्मि क्रन्दितास्वः क्रन्दितास्मः । **४. लृट्** - क्रन्दिष्यति क्रन्दिष्यतः क्रन्दिष्यन्ति । क्रन्दिष्यसि क्रन्दिष्यथः क्रन्दिष्यथ । क्रन्दिष्यामि क्रन्दिष्यावः क्रन्दिष्यामः । **५. लोट्** - क्रन्दतु, क्रन्दतात् क्रन्दताम् क्रन्दन्तु । क्रन्द, क्रन्दतात् क्रन्दतम् क्रन्दत । क्रन्दानि क्रन्दाव क्रन्दाम । **६. लङ्** - अक्रन्दत् अक्रन्दताम् अक्रन्दन् । अक्रन्दः अक्रन्दतम् अक्रन्दत । अक्रन्दम् अक्रन्दाव अक्रन्दाम । **७. विधिलिङ्** - क्रन्देत् क्रन्देताम् क्रन्देयुः । क्रन्देः क्रन्देतम् क्रन्देत । क्रन्देयम् क्रन्देव क्रन्देम । **८. आशीर्लिङ्** - क्रन्द्यात् क्रन्द्यास्ताम् क्रन्द्यासुः । क्रन्द्याः क्रन्द्यास्तम् क्रन्द्यास्त । क्रन्द्यासम् क्रन्द्यास्व क्रन्द्यास्म । **९. लुङ्** - अक्रन्दीत् अक्रन्दिष्टाम् अक्रन्दिषुः । अक्रन्दीः अक्रन्दिष्टम् अक्रन्दिष्ट । अक्रन्दिषम् अक्रन्दिष्व अक्रन्दिष्म । **१०. लृङ्** - अक्रन्दिष्यत् अक्रन्दिष्यताम् अक्रन्दिष्यन् । अक्रन्दिष्यः अक्रन्दिष्यतम् अक्रन्दिष्यत । अक्रन्दिष्यम् अक्रन्दिष्याव अक्रन्दिष्याम ।

णिचि - क्रन्दयति[१] - ते, **सनि** - चिक्रन्दिषति, **यकि** - क्रन्द्यते ।

१. अर्थविशेषे घटादिः । घटादित्वे अपि रूपम् एतदेव । (मित्त्वप्रयोजनं तु णिजन्तात् णमुलि ।)

७२. क्लदि - आह्वाने रोदने च । सकर्म, सेट्, परस्मै । आह्वाने सकर्मकः । अन्यत्र अकर्मकः । अस्यैव वैक्लव्येऽर्थे घटादिपाठः षित्त्वं च । आत्मनेपदं च घटादिपठितस्य । (धा.सं. ७७४ दृश्यताम्)

१. लट् - क्लन्दति क्लन्दतः क्लन्दन्ति । क्लन्दसि क्लन्दथः क्लन्दथ । क्लन्दामि क्लन्दावः क्लन्दामः । **२. लिट्** - चक्लन्द चक्लन्दतुः चक्लन्दुः । चक्लन्दिथ चक्लन्दथुः चक्लन्द । चक्लन्द

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चक्लन्दिव चक्लन्दिम । **३. लुट्** – क्लन्दिता क्लन्दितारौ क्लन्दितारः । क्लन्दितासि क्लन्दितास्थः क्लन्दितास्थ । क्लन्दितास्मि क्लन्दितास्वः क्लन्दितास्मः । **४. लृट्** – क्लन्दिष्यति क्लन्दिष्यतः क्लन्दिष्यन्ति । क्लन्दिष्यसि क्लन्दिष्यथः क्लन्दिष्यथ । क्लन्दिष्यामि क्लन्दिष्यावः क्लन्दिष्यामः । **५. लोट्** – क्लन्दतु, क्लन्दतात् क्लन्दताम् क्लन्दन्तु । क्लन्द, क्लन्दतात् क्लन्दतम् क्लन्दत । क्लन्दानि क्लन्दाव क्लन्दाम । **६. लङ्** – अक्लन्दत् अक्लन्दताम् अक्लन्दन् । अक्लन्दः अक्लन्दतम् अक्लन्दत । अक्लन्दम् अक्लन्दाव अक्लन्दाम । **७. विधिलिङ्** – क्लन्देत् क्लन्देताम् क्लन्देयुः । क्लन्देः क्लन्देतम् क्लन्देत । क्लन्देयम् क्लन्देव क्लन्देम । **८. आशीर्लिङ्** – क्लन्द्यात् क्लन्द्यास्ताम् क्लन्द्यासुः । क्लन्द्याः क्लन्द्यास्तम् क्लन्द्यास्त । क्लन्द्यासम् क्लन्द्यास्व क्लन्द्यास्म । **९. लुङ्** – अक्लन्दीत् अक्लन्दिष्टाम् अक्लन्दिषुः । अक्लन्दीः अक्लन्दिष्टम् अक्लन्दिष्ट । अक्लन्दिषम् अक्लन्दिष्व अक्लन्दिष्म । **१०. लृङ्** – अक्लन्दिष्यत् अक्लन्दिष्यताम् अक्लन्दिष्यन् । अक्लन्दिष्यः अक्लन्दिष्यतम् अक्लन्दिष्यत । अक्लन्दिष्यम् अक्लन्दिष्याव अक्लन्दिष्याम ।

णिचि – क्लन्दयति[१] – ते, **सनि** – चिक्लन्दिषति, **यकि** – क्लन्द्यते ।

१. वैक्लव्येऽर्थे घटादिपाठः षित्त्वं च । आत्मनेपदं च घटादिपठितस्य । (धा.सं. ७७४ दृश्यताम्)

७३. क्लिदि – परिदेवने[१] । सकर्म, सेट्, परस्मै । (आ.प.पाठः धा.सं. १५ इत्यत्र ।) (आ.प.पाठः धा.सं. १५ इत्यत्र ।) 'क्लिन्दते क्लिन्दतीत्येवम् इदितः परिदेवने । क्लिद्यतीत्यार्द्रभावेऽर्थे क्लिदेः श्यन्यूदितो भवेत्' (श्लो. १०२) इति देवः ।

१. लट् – क्लिन्दति क्लिन्दतः क्लिन्दन्ति । क्लिन्दसि क्लिन्दथः क्लिन्दथ । क्लिन्दामि क्लिन्दावः क्लिन्दामः । **२. लिट्** – चिक्लिन्द चिक्लिन्दतुः चिक्लिन्दुः । चिक्लिन्दिथ चिक्लिन्दथुः चिक्लिन्द । चिक्लिन्द चिक्लिन्दिव चिक्लिन्दिम । **३. लुट्** – क्लिन्दिता क्लिन्दितारौ क्लिन्दितारः । क्लिन्दितासि क्लिन्दितास्थः क्लिन्दितास्थ । क्लिन्दितास्मि क्लिन्दितास्वः क्लिन्दितास्मः । **४. लृट्** – क्लिन्दिष्यति क्लिन्दिष्यतः क्लिन्दिष्यन्ति । क्लिन्दिष्यसि क्लिन्दिष्यथः क्लिन्दिष्यथ । क्लिन्दिष्यामि क्लिन्दिष्यावः क्लिन्दिष्यामः । **५. लोट्** – क्लिन्दतु, क्लिन्दतात् क्लिन्दताम् क्लिन्दन्तु । क्लिन्द, क्लिन्दतात् क्लिन्दतम् क्लिन्दत । क्लिन्दानि क्लिन्दाव क्लिन्दाम । **६. लङ्** – अक्लिन्दत् अक्लिन्दताम् अक्लिन्दन् । अक्लिन्दः अक्लिन्दतम् अक्लिन्दत । अक्लिन्दम् अक्लिन्दाव अक्लिन्दाम । **७. विधिलिङ्** – क्लिन्देत् क्लिन्देताम् क्लिन्देयुः । क्लिन्देः क्लिन्देतम् क्लिन्देत । क्लिन्देयम् क्लिन्देव क्लिन्तेम । **८. आशीर्लिङ्** – क्लिन्द्यात् क्लिन्द्यास्ताम् क्लिन्द्यासुः । क्लिन्द्याः क्लिन्द्यास्तम् क्लिन्द्यास्त । क्लिन्द्यासम् क्लिन्द्यास्व क्लिन्त्यास्म । **९. लुङ्** – अक्लिन्दीत् अक्लिन्दिष्टाम् अक्लिन्दिषुः । अक्लिन्दीः अक्लिन्दिष्टम् अक्लिन्दिष्ट । अक्लिन्दिषम् अक्लिन्दिष्व अक्लिन्दिष्म । **१०. लृङ्** – अक्लिन्दिष्यत् अक्लिन्दिष्यताम् अक्लिन्दिष्यन् । अक्लिन्दिष्यः अक्लिन्दिष्यतम् अक्लिन्दिष्यत । अक्लिन्दिष्यम् अक्लिन्दिष्याव अक्लिन्दिष्याम ।

णिचि – क्लिन्दयति – ते, **सनि** – चिक्लिन्दिषति, **यकि** – क्लिन्द्यते ।

१. अस्मिन् एव गणे परिदेवनार्थे पुनः पाठः आत्मगामिन्यपि क्रियाफले परस्मैपदार्थः इति ज्ञायते । अन्यथा स्वरितेत्त्वेन एकत्रैव पाठं कुर्यात् आचार्यः ।

७४. शुन्ध – शुद्धौ । अकर्म, सेट्, परस्मै । शुन्धति = शुचीभवति इत्यर्थः । 'शुन्धयेत् शुन्धते शुन्धेद्यौ वा णौ शौचकर्मणि । शुद्धौ शुन्धति भूवादेः... ।' (श्लो.११७) इति देवः । 'शुन्धन्ते...' (काण्वब्रा.१.२.३.७) इति आत्मनेपदे अपि दृश्यते ।

१. लट् – शुन्धति शुन्धतः शुन्धन्ति । शुन्धसि शुन्धथः शुन्धथ । शुन्धामि शुन्धावः शुन्धामः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. लिट् – शुशुन्ध शुशुन्धतुः शुशुन्धुः । शुशुन्दिथ शुशुन्धथुः शुशुन्ध । शुशुन्ध शुशुन्धिव शुशुन्धिम । **३. लुट्** – शुन्धिता शुन्धितारौ शुन्धितारः । शुन्धितासि शुन्धितास्थः शुन्धितास्थ । शुन्धितास्मि शुन्धितास्वः शुन्धितास्मः । **४. लृट्** – शुन्धिष्यति शुन्धिष्यतः शुन्धिष्यन्ति । शुन्धिष्यसि शुन्धिष्यथः शुन्धिष्यथ । शुन्धिष्यामि शुन्धिष्यावः शुन्धिष्यामः । **५. लोट्** – शुन्धतु, शुन्धतात् शुन्धताम् शुन्धन्तु । शुन्ध, शुन्धतात् शुन्धतम् शुन्धत । शुन्धानि शुन्धाव शुन्धाम । **६. लङ्** – अशुन्धत् अशुन्धताम् अशुन्धन् । अशुन्धः अशुन्धतम् अशुन्धत । अशुन्धम् अशुन्धाव अशुन्धाम । **७. विधिलिङ्** – शुन्धेत् शुन्धेताम् शुन्धेयुः । शुन्धेः शुन्धेतम् शुन्धेत । शुन्धेयम् शुन्धेव शुन्धेम । **८. आशीर्लिङ्** – शुध्यात्[1] शुध्यास्ताम् शुध्यासुः । शुध्याः शुध्यास्तम् शुध्यास्त । शुध्यासम् शुध्यास्व शुध्यास्म । **९. लुङ्** – अशुन्धीत् अशुन्धिष्टाम् अशुन्धिषुः । अशुन्धीः अशुन्धिष्टम् अशुन्धिष्ट । अशुन्धिषम् अशुन्धिष्व अशुन्धिष्म । **१०. लृङ्** – अशुन्धिष्यत् अशुन्धिष्यताम् अशुन्धिष्यन् । अशुन्धिष्यः अशुन्धिष्यतम् अशुन्धिष्यत । अशुन्धिष्यम् अशुन्धिष्याव अशुन्धिष्याम ।

णिचि – शुन्धयति – ते, **सनि** – शुशुन्धिषति, **यकि** – शुध्यते[1] ।

१. 'अनिदितां हल उपधायाः क्ङिति' इति नलोपः ।

७५. शीकृ[1] – सेचने । सकर्म, सेट्, आत्मने । तालव्यादिः । गत्यर्थकोऽपि कश्चित् शीकृधातुः क्षीरस्वामिना भ्वादिषु पठितः । 'सीकृ' इति धनपाल-काश्यपौ । पुरुषकारस्तु तन्न मृष्यति । अयम् अनृदित् इति केचित् ।

१. लट् – शीकते (सीकते[2]) शीकेते शीकन्ते । शीकसे शीकेथे शीकध्वे । शीके शीकावहे शीकामहे । **२. लिट्** – शिशीके शिशीकाते शिशीकिरे । शिशीकिषे शिशीकाथे शिशीकिध्वे । शिशीके शिशीकिवहे शिशीकिमहे । **३. लुट्** – शीकिता शीकितारौ शीकितारः । शीकितासे शीकितासाथे शीकिताध्वे । शीकिताहे शीकितास्वहे शीकितास्महे । **४. लृट्** – शीकिष्यते शीकिष्येते शीकिष्यन्ते । शीकिष्यसे शीकिष्येथे शीकिष्यध्वे । शीकिष्ये शीकिष्यावहे शीकिष्यामहे । **५. लोट्** – शीकताम् शीकेताम् शीकन्ताम् । शीकस्व शीकेथाम् शीकध्वम् । शीकै शीकावहै शीकामहै । **६. लङ्** – अशीकत अशीकेताम् अशीकन्त । अशीकथाः अशीकेथाम् अशीकध्वम् । अशीके अशीकावहि अशीकामहि । **७. विधिलिङ्** – शीकेत शीकेयाताम् शीकेरन् । शीकेथाः शीकेयाथाम् शीकेध्वम् । शीकेय शीकेवहि शीकेमहि । **८. आशीर्लिङ्** – शीकिषीष्ट शीकिषीयास्ताम् शीकिषीरन् । शीकिषीष्ठाः शीकिषीयास्थाम् शीकिषीध्वम्/ढ्वम् । शीकिषीय शीकिषीवहि शीकिषीमहि । **९. लुङ्** – अशीकिष्ट अशीकिषाताम् अशीकिषत । अशीकिष्ठाः अशीकिषाथाम् अशीकिध्वम्/ढ्वम् । अशीकिषि अशीकिष्वहि अशीकिष्महि । **१०. लृङ्** – अशीकिष्यत अशीकिष्येताम् अशीकिष्यन्त । अशीकिष्यथाः अशीकिष्येथाम् अशीकिष्यध्वम् । अशीकिष्ये अशीकिष्यावहि अशीकिष्यामहि ।

णिचि – शीकयति – ते, **सनि** – शिशीकिषते, **यकि** – शीक्यते ।

१. 'प्रथमं माङ्गलिकमेधतिं पठित्वा तदनुरोधेन तवर्गीयान्तान् आत्मनेपदिनः परस्मैपदिनश्च पठित्वा मातृकाक्रमेण कवर्गीयान्ताः इतः आरभ्यन्ते' इति बालमनोरमा ।

२. सीकते इति पाठान्तरम् । एवम् अग्रे अपि ।

७६. लोकृ – दर्शने । सकर्म, सेट्, आत्मने । 'दर्शने लोकते लोकेर्भाषार्थे णौ तु लोकयेत्' (श्लो. ४०) इति देवः ।

१. लट् – लोकते लोकेते लोकन्ते । लोकसे लोकेथे लोकध्वे । लोके लोकावहे लोकामहे । **२. लिट्** – लुलोके लुलोकाते लुलोकिरे । लुलोकिषे लुलोकाथे लुलोकिध्वे । लुलोके लुलोकिवहे लुलोकिमहे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. लुट् – लोकिता लोकितारौ लोकितारः । लोकितासे लोकितासाथे लोकिताध्वे । लोकिताहे लोकितास्वहे लोकितास्महे । **४. लृट्** – लोकिष्यते लोकिष्येते लोकिष्यन्ते । लोकिष्यसे लोकिष्येथे लोकिष्यध्वे । लोकिष्ये लोकिष्यावहे लोकिष्यामहे । **५. लोट्** – लोकताम् लोकेताम् लोकन्ताम् । लोकस्व लोकेथाम् लोकध्वम् । लोकै लोकावहै लोकामहै । **६. लङ्** – अलोकत अलोकेताम् अलोकन्त । अलोकथाः अलोकेथाम् अलोकध्वम् । अलोके अलोकावहि अलोकामहि । **७. विधिलिङ्** – लोकेत लोकेयाताम् लोकेरन् । लोकेथाः लोकेयाथाम् लोकेध्वम् । लोकेय लोकेवहि लोकेमहि । **८. आशीर्लिङ्** – लोकिषीष्ट लोकिषीयास्ताम् लोकिषीरन् । लोकिषीष्ठाः लोकिषीयास्थाम् लोकिषीध्वम्/ढ्वम् । लोकिषीय लोकिषीवहि लोकिषीमहि । **९. लुङ्** – अलोकिष्ट अलोकिषाताम् अलोकिषत । अलोकिष्ठाः अलोकिषाथाम् अलोकिध्वम्/ढ्वम् । अलोकिषि अलोकिष्वहि अलोकिष्महि । **१०. लृङ्** – अलोकिष्यत अलोकिष्येताम् अलोकिष्यन्त । अलोकिष्यथाः अलोकिष्येथाम् अलोकिष्यध्वम् । अलोकिष्ये अलोकिष्यावहि अलोकिष्यामहि ।

णिचि – लोकयति – ते, **सनि** – लुलोकिषते, **यकि** – लोक्यते ।

७७. श्लोकृ – सङ्घाते । सकर्म[1], सेट्, आत्मने । 'सङ्घातः = ग्रन्थः' इति सायणः । 'सङ्घाते वर्जने सर्जने' इति वोपदेवः । 'सङ्घाते – संहनने, संहन्यमाने च' इति क्षीरस्वामी । 'सङ्घातो ग्रन्थः । स चेह ग्रथ्यमान-व्यापारः' इति स्वाम्यादयः । काश्यपादयस्तु ग्रन्थितृव्यापारः इति ग्रथ्नातिवत् सकर्मकः इति' धातुवृत्तौ उक्तम् । 'स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा । आद्येऽकर्मको द्वितीये सकर्मकः' इति सिद्धान्तकौमुदी ।

१. लट् – श्लोकते श्लोकेते श्लोकन्ते । श्लोकसे श्लोकेथे श्लोकध्वे । श्लोके श्लोकावहे श्लोकामहे । **२. लिट्** – शुश्लोके शुश्लोकाते शुश्लोकिरे । शुश्लोकिषे शुश्लोकाथे शुश्लोकिध्वे । शुश्लोके शुश्लोकिवहे शुश्लोकिमहे । **३. लुट्** – श्लोकिता श्लोकितारौ श्लोकितारः । श्लोकितासे श्लोकितासाथे श्लोकिताध्वे । श्लोकिताहे श्लोकितास्वहे श्लोकितास्महे । **४. लृट्** – श्लोकिष्यते श्लोकिष्येते श्लोकिष्यन्ते । श्लोकिष्यसे श्लोकिष्येथे श्लोकिष्यध्वे । श्लोकिष्ये श्लोकिष्यावहे श्लोकिष्यामहे । **५. लोट्** – श्लोकताम् श्लोकेताम् श्लोकन्ताम् । श्लोकस्व श्लोकेथाम् श्लोकध्वम् । श्लोकै श्लोकावहै श्लोकामहै । **६. लङ्** – अश्लोकत अश्लोकेताम् अश्लोकन्त । अश्लोकथाः अश्लोकेथाम् अश्लोकध्वम् । अश्लोके अश्लोकावहि अश्लोकामहि । **७. विधिलिङ्** – श्लोकेत श्लोकेयाताम् श्लोकेरन् । श्लोकेथाः श्लोकेयाथाम् श्लोकेध्वम् । श्लोकेय श्लोकेवहि श्लोकेमहि । **८. आशीर्लिङ्** – श्लोकिषीष्ट श्लोकिषीयास्ताम् श्लोकिषीरन् । श्लोकिषीष्ठाः श्लोकिषीयास्थाम् श्लोकिषीध्वम्/ढ्वम् । श्लोकिषीय श्लोकिषीवहि श्लोकिषीमहि । **९. लुङ्** – अश्लोकिष्ट अश्लोकिषाताम् अश्लोकिषत । अश्लोकिष्ठाः अश्लोकिषाथाम् अश्लोकिध्वम्/ढ्वम् । अश्लोकिषि अश्लोकिष्वहि अश्लोकिष्महि । **१०. लृङ्** – अश्लोकिष्यत अश्लोकिष्येताम् अश्लोकिष्यन्त । अश्लोकिष्यथाः अश्लोकिष्येथाम् अश्लोकिष्यध्वम् । अश्लोकिष्ये अश्लोकिष्यावहि अश्लोकिष्यामहि ।

णिचि – श्लोकयति – ते, **सनि** – शुश्लोकिषते, **यकि** – श्लोक्यते ।

१. 'सङ्घातो ग्रन्थः । स च इह ग्रथ्यमानस्य व्यापारः, ग्रन्थितुः वा । आद्ये अकर्मकः, द्वितीये सकर्मकः' कौमुदी ।

७८. द्रेकृ – शब्दनोत्साहयोः । अकर्म, सेट्, आत्मने । शब्दनं = शब्दः । उत्साहः = वृद्धिः औद्धत्यं च । 'शब्दोत्साहे' इति केचित् । यदाह काश्यपः – 'द्रेकते = शब्देनोत्साहं करोति' इति माधवीयधातुवृत्तिः ।

१. लट् – द्रेकते द्रेकेते द्रेकन्ते । द्रेकसे द्रेकेथे द्रेकध्वे । द्रेके द्रेकावहे द्रेकामहे । **२. लिट्** – दिद्रेके दिद्रेकाते दिद्रेकिरे । दिद्रेकिषे दिद्रेकाथे दिद्रेकिध्वे । दिद्रेके दिद्रेकिवहे दिद्रेकिमहे । **३. लुट्** – द्रेकिता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्रेकितारौ द्रेकितारः । द्रेकितासे द्रेकितासाथे द्रेकिताध्वे । द्रेकिताहे द्रेकितास्वहे द्रेकितास्महे । **४. लृट्** – द्रेकिष्यते द्रेकिष्येते द्रेकिष्यन्ते । द्रेकिष्यसे द्रेकिष्येथे द्रेकिष्यध्वे । द्रेकिष्ये द्रेकिष्यावहे द्रेकिष्यामहे । **५. लोट्** – द्रेकताम् द्रेकेताम् द्रेकन्ताम् । द्रेकस्व द्रेकेथाम् द्रेकध्वम् । द्रेकै द्रेकावहै द्रेकामहै । **६. लङ्** – अद्रेकत अद्रेकेताम् अद्रेकन्त । अद्रेकथाः अद्रेकेथाम् अद्रेकध्वम् । अद्रेके अद्रेकावहि अद्रेकामहि । **७. विधिलिङ्** – द्रेकेत द्रेकेयाताम् द्रेकेरन् । द्रेकेथाः द्रेकेयाथाम् द्रेकेध्वम् । द्रेकेय द्रेकेवहि द्रेकेमहि । **८. आशीर्लिङ्** – द्रेकिषीष्ट द्रेकिषीयास्ताम् द्रेकिषीरन् । द्रेकिषीष्ठाः द्रेकिषीयास्थाम् द्रेकिषीध्वम्/ढ्वम् । द्रेकिषीय द्रेकिषीवहि द्रेकिषीमहि । **९. लुङ्** – अद्रेकिष्ट अद्रेकिषाताम् अद्रेकिषत । अद्रेकिष्ठाः अद्रेकिषाथाम् अद्रेकिध्वम्/ढ्वम् । अद्रेकिषि अद्रेकिष्वहि अद्रेकिष्महि । **१०. लृङ्** – अद्रेकिष्यत अद्रेकिष्येताम् अद्रेकिष्यन्त । अद्रेकिष्यथाः अद्रेकिष्येथाम् अद्रेकिष्यध्वम् । अद्रेकिष्ये अद्रेकिष्यावहि अद्रेकिष्यामहि ।

णिचि – द्रेकयति – ते, **सनि** – दिद्रेकिषते, **यकि** – द्रेक्यते ।

७९. ध्रेकृ – शब्दनोत्साहयोः । अकर्म, सेट्, आत्मने । उत्साहः = वृद्धिरौद्धत्यं वा । 'शब्दोत्साहे' इति केचित् । शब्दोत्साहः = शब्देन स्वोत्साहस्य आविष्करणम् ।

१. लट् – ध्रेकते ध्रेकेते ध्रेकन्ते । ध्रेकसे ध्रेकेथे ध्रेकध्वे । ध्रेके ध्रेकावहे ध्रेकामहे । **२. लिट्** – दिध्रेके दिध्रेकाते दिध्रेकिरे । दिध्रेकिषे दिध्रेकाथे दिध्रेकिध्वे । दिध्रेके दिध्रेकिवहे दिध्रेकिमहे । **३. लुट्** – ध्रेकिता ध्रेकितारौ ध्रेकितारः । ध्रेकितासे ध्रेकितासाथे ध्रेकिताध्वे । ध्रेकिताहे ध्रेकितास्वहे ध्रेकितास्महे । **४. लृट्** – ध्रेकिष्यते ध्रेकिष्येते ध्रेकिष्यन्ते । ध्रेकिष्यसे ध्रेकिष्येथे ध्रेकिष्यध्वे । ध्रेकिष्ये ध्रेकिष्यावहे ध्रेकिष्यामहे । **५. लोट्** – ध्रेकताम् ध्रेकेताम् ध्रेकन्ताम् । ध्रेकस्व ध्रेकेथाम् ध्रेकध्वम् । ध्रेकै ध्रेकावहै ध्रेकामहै । **६. लङ्** – अध्रेकत अध्रेकेताम् अध्रेकन्त । अध्रेकथाः अध्रेकेथाम् अध्रेकध्वम् । अध्रेके अध्रेकावहि अध्रेकामहि । **७. विधिलिङ्** – ध्रेकेत ध्रेकेयाताम् ध्रेकेरन् । ध्रेकेथाः ध्रेकेयाथाम् ध्रेकेध्वम् । ध्रेकेय ध्रेकेवहि ध्रेकेमहि । **८. आशीर्लिङ्** – ध्रेकिषीष्ट ध्रेकिषीयास्ताम् ध्रेकिषीरन् । ध्रेकिषीष्ठाः ध्रेकिषीयास्थाम् ध्रेकिषीध्वम्/ढ्वम् । ध्रेकिषीय ध्रेकिषीवहि ध्रेकिषीमहि । **९. लुङ्** – अध्रेकिष्ट अध्रेकिषाताम् अध्रेकिषत । अध्रेकिष्ठाः अध्रेकिषाथाम् अध्रेकिध्वम्/ढ्वम् । अध्रेकिषि अध्रेकिष्वहि अध्रेकिष्महि । **१०. लृङ्** – अध्रेकिष्यत अध्रेकिष्येताम् अध्रेकिष्यन्त । अध्रेकिष्यथाः अध्रेकिष्येथाम् अध्रेकिष्यध्वम् । अध्रेकिष्ये अध्रेकिष्यावहि अध्रेकिष्यामहि ।

णिचि – ध्रेकयति – ते, **सनि** – दिध्रेकिषते, **यकि** – ध्रेक्यते ।

८०. रेकृ – शङ्कायाम् । सकर्म, सेट्, आत्मने । शङ्का = संशयः आक्षेपः वा । 'आङ्पूर्वः संशये, 'आरेकं संशयं प्राहुः' इति वचनात्' इति माधवीयधातुवृत्तिः ।

१. लट् – रेकते रेकेते रेकन्ते । रेकसे रेकेथे रेकध्वे । रेके रेकावहे रेकामहे । **२. लिट्** – रिरेके रिरेकाते रिरेकिरे । रिरेकिषे रिरेकाथे रिरेकिध्वे । रिरेके रिरेकिवहे रिरेकिमहे । **३. लुट्** – रेकिता रेकितारौ रेकितारः । रेकितासे रेकितासाथे रेकिताध्वे । रेकिताहे रेकितास्वहे रेकितास्महे । **४. लृट्** – रेकिष्यते रेकिष्येते रेकिष्यन्ते । रेकिष्यसे रेकिष्येथे रेकिष्यध्वे । रेकिष्ये रेकिष्यावहे रेकिष्यामहे । **५. लोट्** – रेकताम् रेकेताम् रेकन्ताम् । रेकस्व रेकेथाम् रेकध्वम् । रेकै रेकावहै रेकामहै । **६. लङ्** – अरेकत अरेकेताम् अरेकन्त । अरेकथाः अरेकेथाम् अरेकध्वम् । अरेके अरेकावहि अरेकामहि । **७. विधिलिङ्** – रेकेत रेकेयाताम् रेकेरन् । रेकेथाः रेकेयाथाम् रेकेध्वम् । रेकेय रेकेवहि रेकेमहि । **८. आशीर्लिङ्** – रेकिषीष्ट रेकिषीयास्ताम् रेकिषीरन् । रेकिषीष्ठाः रेकिषीयास्थाम् रेकिषीध्वम्/ढ्वम् । रेकिषीय रेकिषीवहि रेकिषीमहि । **९. लुङ्** – अरेकिष्ट अरेकिषाताम् अरेकिषत । अरेकिष्ठाः अरेकिषाथाम् अरेकिध्वम्/

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ढ्वम् । अरेकिषि अरेकिष्वहि अरेकिष्महि । **१०. लृङ्** – अरेकिष्यत अरेकिष्येताम् अरेकिष्यन्त । अरेकिष्यथाः अरेकिष्येथाम् अरेकिष्यध्वम् । अरेकिष्ये अरेकिष्यावहि अरेकिष्यामहि ।

णिचि – रेकयति – ते, **सनि** – रिरेकिषते, **यकि** – रेक्यते ।

८१. सेकृ – गतौ । सकर्म, सेट्, आत्मने । दन्त्यादिः । दन्त्यादिरयम् इति प्रायेण सर्वे पठन्ति । 'अन्ये 'षेकृ' इति विकल्पेन षोपदेशकार्यार्थं पेठुः' इति तरङ्गिण्याम् ।

१. लट् – सेकते सेकेते सेकन्ते । सेकसे सेकेथे सेकध्वे । सेके सेकावहे सेकामहे । **२. लिट्** – सिसेके सिसेकाते सिसेकिरे । सिसेकिषे सिसेकाथे सिसेकिध्वे । सिसेके सिसेकिवहे सिसेकिमहे । **३. लुट्** – सेकिता सेकितारौ सेकितारः । सेकितासे सेकितासाथे सेकिताध्वे । सेकिताहे सेकितास्वहे सेकितास्महे । **४. लृट्** – सेकिष्यते सेकिष्येते सेकिष्यन्ते । सेकिष्यसे सेकिष्येथे सेकिष्यध्वे । सेकिष्ये सेकिष्यावहे सेकिष्यामहे । **५. लोट्** –सेकताम् सेकेताम् सेकन्ताम् । सेकस्व सेकेथाम् सेकध्वम् । सेकै सेकावहै सेकामहै । **६. लङ्** – असेकत असेकेताम् असेकन्त । असेकथाः असेकेथाम् असेकध्वम् । असेके असेकावहि असेकामहि । **७. विधिलिङ्** – सेकेत सेकेयाताम् सेकेरन् । सेकेथाः सेकेयाथाम् सेकेध्वम् । सेकेय सेकेवहि सेकेमहि । **८. आशीर्लिङ्** – सेकिषीष्ट सेकिषीयास्ताम् सेकिषीरन् । सेकिषीष्ठाः सेकिषीयास्थाम् सेकिषीध्वम्/ढ्वम् । सेकिषीय सेकिषीवहि सेकिषीमहि । **९. लुङ्** – असेकिष्ट असेकिषाताम् असेकिषत । असेकिष्ठाः असेकिषाथाम् असेकिध्वम्/ढ्वम् । असेकिषि असेकिष्वहि असेकिष्महि । **१०. लृङ्** – असेकिष्यत असेकिष्येताम् असेकिष्यन्त । असेकिष्यथाः असेकिष्येथाम् असेकिष्यध्वम् । असेकिष्ये असेकिष्यावहि असेकिष्यामहि ।

णिचि – सेकयति – ते, **सनि** – सिसेकिषते, **यकि** – सेक्यते ।

८२. स्रेकृ – गतौ । सकर्म, सेट्, आत्मने । दन्त्यादिः । 'अन्ये 'ष्रेकृ' इति विकल्पेन षोपदेशकार्यार्थं पेठुः' इति क्षीरतरङ्गिण्याम् । मैत्रेयः 'श्रेकृ' इति तालव्यादिमेकारोपधं पठति ।

१. लट् – स्रेकते स्रेकेते स्रेकन्ते । स्रेकसे स्रेकेथे स्रेकध्वे । स्रेके स्रेकावहे स्रेकामहे । **२. लिट्** – सिस्रेके सिस्रेकाते सिस्रेकिरे । सिस्रेकिषे सिस्रेकाथे सिस्रेकिध्वे । सिस्रेके सिस्रेकिवहे सिस्रेकिमहे । **३. लुट्** – स्रेकिता स्रेकितारौ स्रेकितारः । स्रेकितासे स्रेकितासाथे स्रेकिताध्वे । स्रेकिताहे स्रेकितास्वहे स्रेकितास्महे । **४. लृट्** – स्रेकिष्यते स्रेकिष्येते स्रेकिष्यन्ते । स्रेकिष्यसे स्रेकिष्येथे स्रेकिष्यध्वे । स्रेकिष्ये स्रेकिष्यावहे स्रेकिष्यामहे । **५. लोट्** –स्रेकताम् स्रेकेताम् स्रेकन्ताम् । स्रेकस्व स्रेकेथाम् स्रेकध्वम् । स्रेकै स्रेकावहै स्रेकामहै । **६. लङ्** – अस्रेकत अस्रेकेताम् अस्रेकन्त । अस्रेकथाः अस्रेकेथाम् अस्रेकध्वम् । अस्रेके अस्रेकावहि अस्रेकामहि । **७. विधिलिङ्** – स्रेकेत स्रेकेयाताम् स्रेकेरन् । स्रेकेथाः स्रेकेयाथाम् स्रेकेध्वम् । स्रेकेय स्रेकेवहि स्रेकेमहि । **८. आशीर्लिङ्** – स्रेकिषीष्ट स्रेकिषीयास्ताम् स्रेकिषीरन् । स्रेकिषीष्ठाः स्रेकिषीयास्थाम् स्रेकिषीध्वम्/ढ्वम् । स्रेकिषीय स्रेकिषीवहि स्रेकिषीमहि । **९. लुङ्** – अस्रेकिष्ट अस्रेकिषाताम् अस्रेकिषत । अस्रेकिष्ठाः अस्रेकिषाथाम् अस्रेकिध्वम्/ढ्वम् । अस्रेकिषि अस्रेकिष्वहि अस्रेकिष्महि । **१०. लृङ्** – अस्रेकिष्यत अस्रेकिष्येताम् अस्रेकिष्यन्त । अस्रेकिष्यथाः अस्रेकिष्येथाम् अस्रेकिष्यध्वम् । अस्रेकिष्ये अस्रेकिष्यावहि अस्रेकिष्यामहि ।

णिचि – स्रेकयति – ते, **सनि** – सिस्रेकिषते, **यकि** – स्रेक्यते ।

८३. स्रकि – गतौ । सकर्म, सेट्, आत्मने । दन्त्यादिः ।

१. लट् – स्रङ्कते स्रङ्केते स्रङ्कन्ते । स्रङ्कसे स्रङ्केथे स्रङ्कध्वे । स्रङ्के स्रङ्कावहे स्रङ्कामहे । **२. लिट्** – सस्रङ्के

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सस्त्रङ्काते सस्त्रङ्किरे । सस्त्रङ्किषे सस्त्रङ्काथे सस्त्रङ्किध्वे । सस्त्रङ्के सस्त्रङ्किवहे सस्त्रङ्किमहे । **३. लुट्** – स्त्रङ्किता स्त्रङ्कितारौ स्त्रङ्कितारः । स्त्रङ्कितासे स्त्रङ्कितासाथे स्त्रङ्किताध्वे । स्त्रङ्किताहे स्त्रङ्कितास्वहे स्त्रङ्कितास्महे । **४. लृट्** – स्त्रङ्किष्यते स्त्रङ्किष्येते स्त्रङ्किष्यन्ते । स्त्रङ्किष्यसे स्त्रङ्किष्येथे स्त्रङ्किष्यध्वे । स्त्रङ्किष्ये स्त्रङ्किष्यावहे स्त्रङ्किष्यामहे । **५. लोट्** – स्त्रङ्कताम् स्त्रङ्केताम् स्त्रङ्कन्ताम् । स्त्रङ्कस्व स्त्रङ्केथाम् स्त्रङ्कध्वम् । स्त्रङ्कै स्त्रङ्कावहै स्त्रङ्कामहै । **६. लङ्** – अस्त्रङ्कत अस्त्रङ्केताम् अस्त्रङ्कन्त । अस्त्रङ्कथाः अस्त्रङ्केथाम् अस्त्रङ्कध्वम् । अस्त्रङ्के अस्त्रङ्कावहि अस्त्रङ्कामहि । **७. विधिलिङ्** – स्त्रङ्केत स्त्रङ्केयाताम् स्त्रङ्केरन् । स्त्रङ्केथाः स्त्रङ्केयाथाम् स्त्रङ्केध्वम् । स्त्रङ्केय स्त्रङ्केवहि स्त्रङ्केमहि । **८. आशीर्लिङ्** – स्त्रङ्किषीष्ट स्त्रङ्किषीयास्ताम् स्त्रङ्किषीरन् । स्त्रङ्किषीष्ठाः स्त्रङ्किषीयास्थाम् स्त्रङ्किषीध्वम्/ढ्वम् । स्त्रङ्किषीय स्त्रङ्किषीवहि स्त्रङ्किषीमहि । **९. लुङ्** – अस्त्रङ्किष्ट अस्त्रङ्किषाताम् अस्त्रङ्किषत । अस्त्रङ्किष्ठाः अस्त्रङ्किषाथाम् अस्त्रङ्किध्वम्/ढ्वम् । अस्त्रङ्किषि अस्त्रङ्किष्वहि अस्त्रङ्किष्महि । **१०. लृङ्** – अस्त्रङ्किष्यत अस्त्रङ्किष्येताम् अस्त्रङ्किष्यन्त । अस्त्रङ्किष्यथाः अस्त्रङ्किष्येथाम् अस्त्रङ्किष्यध्वम् । अस्त्रङ्किष्ये अस्त्रङ्किष्यावहि अस्त्रङ्किष्यामहि ।

णिचि – स्त्रङ्कयति – ते, **सनि** – सिस्त्रङ्किषते, **यकि** – स्त्रङ्क्यते ।

८४. श्रकि – गतौ । सकर्म, सेट्, आत्मने । तालव्यादिः । 'सर्पे' इति वोपदेवः । यदुक्तं – 'क्षीरस्वामी...शकि...' इति पुरुषकारे (श्लो.४२), तत् तु क्षीरतरङ्गिण्यां न दृश्यते ।

१. लट् – श्रङ्कते श्रङ्केते श्रङ्कन्ते । श्रङ्कसे श्रङ्केथे श्रङ्कध्वे । श्रङ्के श्रङ्कावहे श्रङ्कामहे । **२. लिट्** – शश्रङ्के शश्रङ्काते शश्रङ्किरे । शश्रङ्किषे शश्रङ्काथे शश्रङ्किध्वे । शश्रङ्के शश्रङ्किवहे शश्रङ्किमहे । **३. लुट्** – श्रङ्किता श्रङ्कितारौ श्रङ्कितारः । श्रङ्कितासे श्रङ्कितासाथे श्रङ्किताध्वे । श्रङ्किताहे श्रङ्कितास्वहे श्रङ्कितास्महे । **४. लृट्** – श्रङ्किष्यते श्रङ्किष्येते श्रङ्किष्यन्ते । श्रङ्किष्यसे श्रङ्किष्येथे श्रङ्किष्यध्वे । श्रङ्किष्ये श्रङ्किष्यावहे श्रङ्किष्यामहे । **५. लोट्** – श्रङ्कताम् श्रङ्केताम् श्रङ्कन्ताम् । श्रङ्कस्व श्रङ्केथाम् श्रङ्कध्वम् । श्रङ्कै श्रङ्कावहै श्रङ्कामहै । **६. लङ्** – अश्रङ्कत अश्रङ्केताम् अश्रङ्कन्त । अश्रङ्कथाः अश्रङ्केथाम् अश्रङ्कध्वम् । अश्रङ्के अश्रङ्कावहि अश्रङ्कामहि । **७. विधिलिङ्** – श्रङ्केत श्रङ्केयाताम् श्रङ्केरन् । श्रङ्केथाः श्रङ्केयाथाम् श्रङ्केध्वम् । श्रङ्केय श्रङ्केवहि श्रङ्केमहि । **८. आशीर्लिङ्** – श्रङ्किषीष्ट श्रङ्किषीयास्ताम् श्रङ्किषीरन् । श्रङ्किषीष्ठाः श्रङ्किषीयास्थाम् श्रङ्किषीध्वम्/ढ्वम् । श्रङ्किषीय श्रङ्किषीवहि श्रङ्किषीमहि । **९. लुङ्** – अश्रङ्किष्ट अश्रङ्किषाताम् अश्रङ्किषत । अश्रङ्किष्ठाः अश्रङ्किषाथाम् अश्रङ्किध्वम्/ढ्वम् । अश्रङ्किषि अश्रङ्किष्वहि अश्रङ्किष्महि । **१०. लृङ्** – अश्रङ्किष्यत अश्रङ्किष्येताम् अश्रङ्किष्यन्त । अश्रङ्किष्यथाः अश्रङ्किष्येथाम् अश्रङ्किष्यध्वम् । अश्रङ्किष्ये अश्रङ्किष्यावहि अश्रङ्किष्यामहि ।

णिचि – श्रङ्कयति – ते, **सनि** – शिश्रङ्किषते, **यकि** – श्रङ्क्यते ।

८५. श्लकि – गतौ । सकर्म, सेट्, आत्मने । तालव्यादिः ।

१. लट् – श्लङ्कते श्लङ्केते श्लङ्कन्ते । श्लङ्कसे श्लङ्केथे श्लङ्कध्वे । श्लङ्के श्लङ्कावहे श्लङ्कामहे । **२. लिट्** – शश्लङ्के शश्लङ्काते शश्लङ्किरे । शश्लङ्किषे शश्लङ्काथे शश्लङ्किध्वे । शश्लङ्के शश्लङ्किवहे शश्लङ्किमहे । **३. लुट्** – श्लङ्किता श्लङ्कितारौ श्लङ्कितारः । श्लङ्कितासे श्लङ्कितासाथे श्लङ्किताध्वे । श्लङ्किताहे श्लङ्कितास्वहे श्लङ्कितास्महे । **४. लृट्** – श्लङ्किष्यते श्लङ्किष्येते श्लङ्किष्यन्ते । श्लङ्किष्यसे श्लङ्किष्येथे श्लङ्किष्यध्वे । श्लङ्किष्ये श्लङ्किष्यावहे श्लङ्किष्यामहे । **५. लोट्** – श्लङ्कताम् श्लङ्केताम् श्लङ्कन्ताम् । श्लङ्कस्व श्लङ्केथाम् श्लङ्कध्वम् । श्लङ्कै श्लङ्कावहै श्लङ्कामहै । **६. लङ्** – अश्लङ्कत अश्लङ्केताम् अश्लङ्कन्त । अश्लङ्कथाः अश्लङ्केथाम् अश्लङ्कध्वम् । अश्लङ्के अश्लङ्कावहि अश्लङ्कामहि । **७. विधिलिङ्** – श्लङ्केत श्लङ्केयाताम् श्लङ्केरन् । श्लङ्केथाः श्लङ्केयाथाम् श्लङ्केध्वम् । श्लङ्केय श्लङ्केवहि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्लङ्केमहि । **८. आशीर्लिङ्** – श्लङ्किषीष्ट श्लङ्किषीयास्ताम् श्लङ्किषीरन् । श्लङ्किषीष्ठाः श्लङ्किषीयास्थाम् श्लङ्किषीध्वम्/ढ्वम् । श्लङ्किषीय श्लङ्किषीवहि श्लङ्किषीमहि । **९. लुङ्** – अश्लङ्किष्ट अश्लङ्किषाताम् अश्लङ्किषत । अश्लङ्किष्ठाः अश्लङ्किषाथाम् अश्लङ्किध्वम्/ढ्वम् । अश्लङ्किषि अश्लङ्किष्वहि अश्लङ्किष्महि । **१०. लृङ्** – अश्लङ्किष्यत अश्लङ्किष्येताम् अश्लङ्किष्यन्त । अश्लङ्किष्यथाः अश्लङ्किष्येथाम् अश्लङ्किष्यध्वम् । अश्लङ्किष्ये अश्लङ्किष्यावहि अश्लङ्किष्यामहि ।

णिचि – श्लङ्कयति – ते, **सनि** – शिश्लङ्किषते, **यकि** – श्लङ्क्यते ।

८६. शकि – शङ्कायाम् । सकर्म, सेट्, आत्मने । 'शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे' (श्लो.४३) इति देवः ।

१. लट् – शङ्कते शङ्केते शङ्कन्ते । शङ्कसे शङ्केथे शङ्कध्वे । शङ्के शङ्कावहे शङ्कामहे । **२. लिट्** – शशङ्के शशङ्काते शशङ्किरे । शशङ्किषे शशङ्काथे शशङ्किध्वे । शशङ्के शशङ्किवहे शशङ्किमहे । **३. लुट्** – शङ्किता शङ्कितारौ शङ्कितारः । शङ्कितासे शङ्कितासाथे शङ्किताध्वे । शङ्किताहे शङ्कितास्वहे शङ्कितास्महे । **४. लृट्** – शङ्किष्यते शङ्किष्येते शङ्किष्यन्ते । शङ्किष्यसे शङ्किष्येथे शङ्किष्यध्वे । शङ्किष्ये शङ्किष्यावहे शङ्किष्यामहे । **५. लोट्** – शङ्कताम् शङ्केताम् शङ्कन्ताम् । शङ्कस्व शङ्केथाम् शङ्कध्वम् । शङ्कै शङ्कावहै शङ्कामहै । **६. लङ्** – अशङ्कत अशङ्केताम् अशङ्कन्त । अशङ्कथाः अशङ्केथाम् अशङ्कध्वम् । अशङ्के अशङ्कावहि अशङ्कामहि । **७. विधिलिङ्** – शङ्केत शङ्केयाताम् शङ्केरन् । शङ्केथाः शङ्केयाथाम् शङ्केध्वम् । शङ्केय शङ्केवहि शङ्केमहि । **८. आशीर्लिङ्** – शङ्किषीष्ट शङ्किषीयास्ताम् शङ्किषीरन् । शङ्किषीष्ठाः शङ्किषीयास्थाम् शङ्किषीध्वम्/ढ्वम् । शङ्किषीय शङ्किषीवहि शङ्किषीमहि । **९. लुङ्** – अशङ्किष्ट अशङ्किषाताम् अशङ्किषत । अशङ्किष्ठाः अशङ्किषाथाम् अशङ्किध्वम्/ढ्वम् । अशङ्किषि अशङ्किष्वहि अशङ्किष्महि । **१०. लृङ्** – अशङ्किष्यत अशङ्किष्येताम् अशङ्किष्यन्त । अशङ्किष्यथाः अशङ्किष्येथाम् अशङ्किष्यध्वम् । अशङ्किष्ये अशङ्किष्यावहि अशङ्किष्यामहि ।

णिचि – शङ्कयति – ते, **सनि** – शिशङ्किषते, **यकि** – शङ्क्यते ।

८७. अकि – लक्षणे । सकर्म, सेट्, आत्मने । लक्षणम् = चिह्नम् । 'इदितस्त्वङ्कते तत्र कुटिलायां गतावकेत्' (श्लो.४१) इति देवः ।

१. लट् – अङ्कते अङ्केते अङ्कन्ते । अङ्कसे अङ्केथे अङ्कध्वे । अङ्के अङ्कावहे अङ्कामहे । **२. लिट्** – आनङ्के आनङ्काते आनङ्किरे । आनङ्किषे आनङ्काथे आनङ्किध्वे । आनङ्के आनङ्किवहे आनङ्किमहे । **३. लुट्** – अङ्किता अङ्कितारौ अङ्कितारः । अङ्कितासे अङ्कितासाथे अङ्किताध्वे । अङ्किताहे अङ्कितास्वहे अङ्कितास्महे । **४. लृट्** – अङ्किष्यते अङ्किष्येते अङ्किष्यन्ते । अङ्किष्यसे अङ्किष्येथे अङ्किष्यध्वे । अङ्किष्ये अङ्किष्यावहे अङ्किष्यामहे । **५. लोट्** – अङ्कताम् अङ्केताम् अङ्कन्ताम् । अङ्कस्व अङ्केथाम् अङ्कध्वम् । अङ्कै अङ्कावहै अङ्कामहै । **६. लङ्** – आङ्कत आङ्केताम् आङ्कन्त । आङ्कथाः आङ्केथाम् आङ्कध्वम् । आङ्के आङ्कावहि आङ्कामहि । **७. विधिलिङ्** – अङ्केत अङ्केयाताम् अङ्केरन् । अङ्केथाः अङ्केयाथाम् अङ्केध्वम् । अङ्केय अङ्केवहि अङ्केमहि । **८. आशीर्लिङ्** – अङ्किषीष्ट अङ्किषीयास्ताम् अङ्किषीरन् । अङ्किषीष्ठाः अङ्किषीयास्थाम् अङ्किषीध्वम्/ढ्वम् । अङ्किषीय अङ्किषीवहि अङ्किषीमहि । **९. लुङ्** – आङ्किष्ट आङ्किषाताम् आङ्किषत । आङ्किष्ठाः आङ्किषाथाम् आङ्किध्वम्/ढ्वम् । आङ्किषि आङ्किष्वहि आङ्किष्महि । **१०. लृङ्** – आङ्किष्यत आङ्किष्येताम् आङ्किष्यन्त । आङ्किष्यथाः आङ्किष्येथाम् आङ्किष्यध्वम् । आङ्किष्ये आङ्किष्यावहि आङ्किष्यामहि ।

णिचि – अङ्कयति – ते, **सनि** – अञ्चिकिषते[1], **यकि** – अङ्क्यते ।

१. 'नन्द्राः संयोगादयः' इति निषेधात् 'कि' इत्येकाचो द्वित्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८८. **वकि - कौटिल्ये** । अकर्म, सेट्, आत्मने ।

१. लट् - वङ्कते वङ्केते वङ्कन्ते । वङ्कसे वङ्केथे वङ्कध्वे । वङ्के वङ्कावहे वङ्कामहे । **२. लिट्** - ववङ्के ववङ्काते ववङ्किरे । ववङ्किषे ववङ्काथे ववङ्किध्वे । ववङ्के ववङ्किवहे ववङ्किमहे । **३. लुट्** - वङ्किता वङ्कितारौ वङ्कितारः । वङ्कितासे वङ्कितासाथे वङ्किताध्वे । वङ्किताहे वङ्कितास्वहे वङ्कितास्महे । **४. लृट्** - वङ्किष्यते वङ्किष्येते वङ्किष्यन्ते । वङ्किष्यसे वङ्किष्येथे वङ्किष्यध्वे । वङ्किष्ये वङ्किष्यावहे वङ्किष्यामहे । **५. लोट्** - वङ्कताम् वङ्केताम् वङ्कन्ताम् । वङ्कस्व वङ्केथाम् वङ्कध्वम् । वङ्कै वङ्कावहै वङ्कामहै । **६. लङ्** - अवङ्कत अवङ्केताम् अवङ्कन्त । अवङ्कथाः अवङ्केथाम् अवङ्कध्वम् । अवङ्के अवङ्कावहि अवङ्कामहि । **७. विधिलिङ्** - वङ्केत वङ्केयाताम् वङ्केरन् । वङ्केथाः वङ्केयाथाम् वङ्केध्वम् । वङ्केय वङ्केवहि वङ्केमहि । **८. आशीर्लिङ्** - वङ्किषीष्ट वङ्किषीयास्ताम् वङ्किषीरन् । वङ्किषीष्ठाः वङ्किषीयास्थाम् वङ्किषीध्वम्/ढ्वम् । वङ्किषीय वङ्किषीवहि वङ्किषीमहि । **९. लुङ्** - अवङ्किष्ट अवङ्किषाताम् अवङ्किषत । अवङ्किष्ठाः अवङ्किषाथाम् अवङ्किध्वम्/ढ्वम् । अवङ्किषि अवङ्किष्वहि अवङ्किष्महि । **१०. लृङ्** - अवङ्किष्यत अवङ्किष्येताम् अवङ्किष्यन्त । अवङ्किष्यथाः अवङ्किष्येथाम् अवङ्किष्यध्वम् । अवङ्किष्ये अवङ्किष्यावहि अवङ्किष्यामहि ।

णिचि - वङ्कयति - ते, **सनि** - विवङ्किषते, **यकि** - वङ्क्यते ।

८९. **मकि - मण्डने** । सकर्म, सेट्, आत्मने ।

१. लट् - मङ्कते मङ्केते मङ्कन्ते । मङ्कसे मङ्केथे मङ्कध्वे । मङ्के मङ्कावहे मङ्कामहे । **२. लिट्** - ममङ्के ममङ्काते ममङ्किरे । ममङ्किषे ममङ्काथे ममङ्किध्वे । ममङ्के ममङ्किवहे ममङ्किमहे । **३. लुट्** - मङ्किता मङ्कितारौ मङ्कितारः । मङ्कितासे मङ्कितासाथे मङ्किताध्वे । मङ्किताहे मङ्कितास्वहे मङ्कितास्महे । **४. लृट्** - मङ्किष्यते मङ्किष्येते मङ्किष्यन्ते । मङ्किष्यसे मङ्किष्येथे मङ्किष्यध्वे । मङ्किष्ये मङ्किष्यावहे मङ्किष्यामहे । **५. लोट्** - मङ्कताम् मङ्केताम् मङ्कन्ताम् । मङ्कस्व मङ्केथाम् मङ्कध्वम् । मङ्कै मङ्कावहै मङ्कामहै । **६. लङ्** - अमङ्कत अमङ्केताम् अमङ्कन्त । अमङ्कथाः अमङ्केथाम् अमङ्कध्वम् । अमङ्के अमङ्कावहि अमङ्कामहि । **७. विधिलिङ्** - मङ्केत मङ्केयाताम् मङ्केरन् । मङ्केथाः मङ्केयाथाम् मङ्केध्वम् । मङ्केय मङ्केवहि मङ्केमहि । **८. आशीर्लिङ्** - मङ्किषीष्ट मङ्किषीयास्ताम् मङ्किषीरन् । मङ्किषीष्ठाः मङ्किषीयास्थाम् मङ्किषीध्वम्/ढ्वम् । मङ्किषीय मङ्किषीवहि मङ्किषीमहि । **९. लुङ्** - अमङ्किष्ट अमङ्किषाताम् अमङ्किषत । अमङ्किष्ठाः अमङ्किषाथाम् अमङ्किध्वम्/ढ्वम् । अमङ्किषि अमङ्किष्वहि अमङ्किष्महि । **१०. लृङ्** - अमङ्किष्यत अमङ्किष्येताम् अमङ्किष्यन्त । अमङ्किष्यथाः अमङ्किष्येथाम् अमङ्किष्यध्वम् । अमङ्किष्ये अमङ्किष्यावहि अमङ्किष्यामहि ।

णिचि - मङ्कयति - ते, **सनि** - मिमङ्किषते, **यकि** - मङ्क्यते ।

९०. **कक - लौल्ये** । अकर्म, सेट्, आत्मने । लौल्यं गर्वः चापल्यं वा ।

१. लट् - ककते ककेते ककन्ते । ककसे ककेथे ककध्वे । ककै ककावहे ककामहे । **२. लिट्** - चकके चककाते चककिरे । चककिषे चककाथे चककिध्वे । चकके चककिवहे चककिमहे । **३. लुट्** - ककिता ककितारौ ककितारः । ककितासे ककितासाथे ककिताध्वे । ककिताहे ककितास्वहे ककितास्महे । **४. लृट्** - ककिष्यते ककिष्येते ककिष्यन्ते । ककिष्यसे ककिष्येथे ककिष्यध्वे । ककिष्ये ककिष्यावहे ककिष्यामहे । **५. लोट्** - ककताम् ककेताम् ककन्ताम् । ककस्व ककेथाम् ककध्वम् । ककै ककावहै ककामहै । **६. लङ्** - अककत अककेताम् अककन्त । अककथाः अककेथाम् अककध्वम् । अकके अककावहि अककामहि । **७. विधिलिङ्** - ककेत ककेयाताम् ककेरन् । ककेथाः ककेयाथाम् ककेध्वम् । ककेय ककेवहि ककेमहि । **८. आशीर्लिङ्** - ककिषीष्ट ककिषीयास्ताम् ककिषीरन् । ककिषीष्ठाः ककिषीयास्थाम् ककिषीध्वम्/ढ्वम् । ककिषीय ककिषीवहि ककिषीमहि । **९. लुङ्** - अककिष्ट

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अककिषाताम् अककिषत । अककिष्ठाः अककिषाथाम् अककिध्वम्/ढ्वम् । अककिषि अककिष्वहि अककिष्महि । **१०. लृङ्** – अककिष्यत अककिष्येताम् अककिष्यन्त । अककिष्यथाः अककिष्येथाम् अककिष्यध्वम् । अककिष्ये अककिष्यावहि अककिष्यामहि ।

णिचि – काकयति – ते, **सनि** – चिककिषते, **यकि** – कक्यते ।

९१. कुक – आदाने । सकर्म, सेट्, आत्मने ।

१. लट् – कोकते कोकेते कोकन्ते । कोकसे कोकेथे कोकध्वे । कोके कोकावहे कोकामहे । **२. लिट्** – चुकुके चुकुकाते चुकुकिरे । चुकुकिषे चुकुकाथे चुकुकिध्वे । चुकुके चुकुकिवहे चुकुकिमहे । **३. लुट्** – कोकिता कोकितारौ कोकितारः । कोकितासे कोकितासाथे कोकिताध्वे । कोकिताहे कोकितास्वहे कोकितास्महे । **४. लृट्** – कोकिष्यते कोकिष्येते कोकिष्यन्ते । कोकिष्यसे कोकिष्येथे कोकिष्यध्वे । कोकिष्ये कोकिष्यावहे कोकिष्यामहे । **५. लोट्** – कोकताम् कोकेताम् कोकन्ताम् । कोकस्व कोकेथाम् कोकध्वम् । कोकै कोकावहै कोकामहै । **६. लङ्** – अकोकत अकोकेताम् अकोकन्त । अकोकथाः अकोकेथाम् अकोकध्वम् । अकोके अकोकावहि अकोकामहि । **७. विधिलिङ्** – कोकेत कोकेयाताम् कोकेरन् । कोकेथाः कोकेयाथाम् कोकेध्वम् । कोकेय कोकेवहि कोकेमहि । **८. आशीर्लिङ्** – कोकिषीष्ट कोकिषीयास्ताम् कोकिषीरन् । कोकिषीष्ठाः कोकिषीयास्थाम् कोकिषीध्वम्/ढ्वम् । कोकिषीय कोकिषीवहि कोकिषीमहि । **९. लुङ्** – अकोकिष्ट अकोकिषाताम् अकोकिषत । अकोकिष्ठाः अकोकिषाथाम् अकोकिध्वम्/ढ्वम् । अकोकिषि अकोकिष्वहि अकोकिष्महि । **१०. लृङ्** – अकोकिष्यत अकोकिष्येताम् अकोकिष्यन्त । अकोकिष्यथाः अकोकिष्येथाम् अकोकिष्यध्वम् । अकोकिष्ये अकोकिष्यावहि अकोकिष्यामहि ।

णिचि – कोकयति – ते, **सनि** – चिकुकिषते / चुकोकिषते[1], **यकि** – कुक्यते ।

१. 'रलो व्युपधात्...' इति कित्त्वविकल्पः ।

९२. वृक – आदाने । सकर्म, सेट्, आत्मने । 'अदने' इति पाठान्तरमिति क्षीरतरङ्गिणीटीका ।

१. लट् – वर्कते वर्केते वर्कन्ते । वर्कसे वर्केथे वर्कध्वे । वर्के वर्कावहे वर्कामहे । **२. लिट्** – ववृके ववृकाते ववृकिरे । ववृकिषे ववृकाथे ववृकिध्वे । ववृके ववृकिवहे ववृकिमहे । **३. लुट्** – वर्किता वर्कितारौ वर्कितारः । वर्कितासे वर्कितासाथे वर्किताध्वे । वर्किताहे वर्कितास्वहे वर्कितास्महे । **४. लृट्** – वर्किष्यते वर्किष्येते वर्किष्यन्ते । वर्किष्यसे वर्किष्येथे वर्किष्यध्वे । वर्किष्ये वर्किष्यावहे वर्किष्यामहे । **५. लोट्** – वर्कताम् वर्केताम् वर्कन्ताम् । वर्कस्व वर्केथाम् वर्कध्वम् । वर्कै वर्कावहै वर्कामहै । **६. लङ्** – अवर्कत अवर्केताम् अवर्कन्त । अवर्कथाः अवर्केथाम् अवर्कध्वम् । अवर्के अवर्कावहि अवर्कामहि । **७. विधिलिङ्** – वर्केत वर्केयाताम् वर्केरन् । वर्केथाः वर्केयाथाम् वर्केध्वम् । वर्केय वर्केवहि वर्केमहि । **८. आशीर्लिङ्** – वर्किषीष्ट वर्किषीयास्ताम् वर्किषीरन् । वर्किषीष्ठाः वर्किषीयास्थाम् वर्किषीध्वम्/ढ्वम् । वर्किषीय वर्किषीवहि वर्किषीमहि । **९. लुङ्** – अवर्किष्ट अवर्किषाताम् अवर्किषत । अवर्किष्ठाः अवर्किषाथाम् अवर्किध्वम्/ढ्वम् । अवर्किषि अवर्किष्वहि अवर्किष्महि । **१०. लृङ्** – अवर्किष्यत अवर्किष्येताम् अवर्किष्यन्त । अवर्किष्यथाः अवर्किष्येथाम् अवर्किष्यध्वम् । अवर्किष्ये अवर्किष्यावहि अवर्किष्यामहि ।

णिचि – वर्कयति – ते, **सनि** – विवर्किषते, **यकि** – वृक्यते ।

९३. चक – तृप्तौ प्रतीघाते च । सकर्म[1], सेट्, आत्मने । तृप्तावित्येव स्वामि-काश्यपौ । ''प्रतीघाते च तृप्तौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च चकते, चकतीति तु । तृप्तिमात्रे चकेरस्य मित्त्वात् चकयतीति णौ'' (श्लो.४०) इति देवः । 'तृप्तौ अकर्मकः, प्रतिघाते सकर्मकः' इति बालमनोरमा ।

१. लट् – चकते चकेते चकन्ते । चकसे चकेथे चचध्वे । चके चकावहे चकामहे । **२. लिट्** – चेके चेकाते चेकिरे । चेकिषे चेकाथे चेकिध्वे । चेके चेकिवहे चेकिमहे । **३. लुट्** – चकिता चकितारौ चकितारः । चकितासे चकितासाथे चकिताध्वे । चकिताहे चकितास्वहे चकितास्महे । **४. लृट्** – चकिष्यते चकिष्येते चकिष्यन्ते । चकिष्यसे चकिष्येथे चकिष्यध्वे । चकिष्ये चकिष्यावहे चकिष्यामहे । **५. लोट्** – चकताम् चकेताम् चकन्ताम् । चचस्व चकेथाम् चकध्वम् । चकै चकावहै चकामहै । **६. लङ्** – अचकत अचकेताम् अचकन्त । अचकथाः अचकेथाम् अचकध्वम् । अचके अचकावहि अचकामहि । **७. विधिलिङ्** – चकेत चकेयाताम् चकेरन् । चकेथाः चकेयाथाम् चकेध्वम् । चकेय चकेवहि चकेमहि । **८. आशीर्लिङ्** – चकिषीष्ट चकिषीयास्ताम् चकिषीरन् । चकिषीष्ठाः चकिषीयास्थाम् चकिषीध्वम्/ढ्वम् । चकिषीय चकिषीवहि चकिषीमहि । **९. लुङ्** – अचकिष्ट अचकिषाताम् अचकिषत । अचकिष्ठाः अचकिषाथाम् अचकिध्वम्/ढ्वम् । अचकिषि अचकिष्वहि अचकिष्महि । **१०. लृङ्** – अचकिष्यत अचकिष्येताम् अचकिष्यन्त । अचकिष्यथाः अचकिष्येथाम् अचकिष्यध्वम् । अचकिष्ये अचकिष्यावहि अचकिष्यामहि ।

णिचि – चकयति[2] – ते, **सनि** – चिचकिषते, **यकि** – चक्यते ।

१. तृप्तौ अकर्मकः । प्रतिघाते सकर्मकः ।

२. घटादित्वात् मित्त्वम् । अतः णिचि उपधाह्रस्वः ।

९४. ककि – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – कङ्कते कङ्केते कङ्कन्ते । कङ्कसे कङ्केथे कङ्कध्वे । कङ्के कङ्कावहे कङ्कामहे । **२. लिट्** – चकङ्के चकङ्काते चकङ्किरे । चकङ्किषे चकङ्काथे चकङ्किध्वे । चकङ्के चकङ्किवहे चकङ्किमहे । **३. लुट्** – कङ्किता कङ्कितारौ कङ्कितारः । कङ्कितासे कङ्कितासाथे कङ्किताध्वे । कङ्किताहे कङ्कितास्वहे कङ्कितास्महे । **४. लृट्** – कङ्किष्यते कङ्किष्येते कङ्किष्यन्ते । कङ्किष्यसे कङ्किष्येथे कङ्किष्यध्वे । कङ्किष्ये कङ्किष्यावहे कङ्किष्यामहे । **५. लोट्** – कङ्कताम् कङ्केताम् कङ्कन्ताम् । कङ्कस्व कङ्केथाम् कङ्कध्वम् । कङ्कै कङ्कावहै कङ्कामहै । **६. लङ्** – अकङ्कत अकङ्केताम् अकङ्कन्त । अकङ्कथाः अकङ्केथाम् अकङ्कध्वम् । अकङ्के अकङ्कावहि अकङ्कामहि । **७. विधिलिङ्** – कङ्केत कङ्केयाताम् कङ्केरन् । कङ्केथाः कङ्केयाथाम् कङ्केध्वम् । कङ्केय कङ्केवहि कङ्केमहि । **८. आशीर्लिङ्** – कङ्किषीष्ट कङ्किषीयास्ताम् कङ्किषीरन् । कङ्किषीष्ठाः कङ्किषीयास्थाम् कङ्किषीध्वम्/ढ्वम् । कङ्किषीय कङ्किषीवहि कङ्किषीमहि । **९. लुङ्** – अकङ्किष्ट अकङ्किषाताम् अकङ्किषत । अकङ्किष्ठाः अकङ्किषाथाम् अकङ्किध्वम्/ढ्वम् । अकङ्किषि अकङ्किष्वहि अकङ्किष्महि । **१०. लृङ्** – अकङ्किष्यत अकङ्किष्येताम् अकङ्किष्यन्त । अकङ्किष्यथाः अकङ्किष्येथाम् अकङ्किष्यध्वम् । अकङ्किष्ये अकङ्किष्यावहि अकङ्किष्यामहि ।

णिचि – कङ्कयति – ते, **सनि** – चिकङ्किषते, **यकि** – कङ्क्यते ।

९५. वकि – गतौ । सकर्म, सेट्, आत्मने । 'क्षीरस्वामी अमुं धातुं न पठति । अर्थभेदः पुनःपाठे प्रयोजनम् इति ज्ञायते । 'वकिः' (८८) इत्यत्रापि अस्ति ।

१. लट् – वङ्कते वङ्केते वङ्कन्ते । वङ्कसे वङ्केथे वङ्कध्वे । वङ्के वङ्कावहे वङ्कामहे । **२. लिट्** – ववङ्के ववङ्काते ववङ्किरे । ववङ्किषे ववङ्काथे ववङ्किध्वे । ववङ्के ववङ्किवहे ववङ्किमहे । **३. लुट्** – वङ्किता वङ्कितारौ वङ्कितारः । वङ्कितासे वङ्कितासाथे वङ्किताध्वे । वङ्किताहे वङ्कितास्वहे वङ्कितास्महे । **४. लृट्** – वङ्किष्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वङ्किष्येते वङ्किष्यन्ते । वङ्किष्यसे वङ्किष्येथे वङ्किष्यध्वे । वङ्किष्ये वङ्किष्यावहे वङ्किष्यामहे । **५. लोट्** - वङ्कताम् वङ्केताम् वङ्कन्ताम् । वङ्कस्व वङ्केथाम् वङ्कध्वम् । वङ्कै वङ्कावहै वङ्कामहै । **६. लङ्** - अवङ्कत अवङ्केताम् अवङ्कन्त । अवङ्कथाः अवङ्केथाम् अवङ्कध्वम् । अवङ्के अवङ्कावहि अवङ्कामहि । **७. विधिलिङ्** - वङ्केत वङ्केयाताम् वङ्केरन् । वङ्केथाः वङ्केयाथाम् वङ्केध्वम् । वङ्केय वङ्केवहि वङ्केमहि । **८. आशीर्लिङ्** - वङ्किषीष्ट वङ्किषीयास्ताम् वङ्किषीरन् । वङ्किषीष्ठाः वङ्किषीयास्थाम् वङ्किषीध्वम्/ढ्वम् । वङ्किषीय वङ्किषीवहि वङ्किषीमहि । **९. लुङ्** - अवङ्किष्ट अवङ्किषाताम् अवङ्किषत । अवङ्किष्ठाः अवङ्किषाथाम् अवङ्किढ्वम्/ढ्वम् । अवङ्किषि अवङ्किष्वहि अवङ्किष्महि । **१०. लृङ्** - अवङ्किष्यत अवङ्किष्येताम् अवङ्किष्यन्त । अवङ्किष्यथाः अवङ्किष्येथाम् अवङ्किष्यध्वम् । अवङ्किष्ये अवङ्किष्यावहि अवङ्किष्यामहि ।

णिचि - वङ्कयति - ते, **सनि** - विवङ्किषते, **यकि** - वङ्क्यते ।

९६. श्वकि - गतौ । सकर्म, सेट्, आत्मने । 'श्वगि' इति मैत्रेयः । 'श्वङ्कतिः सम्मतायां दन्त्यादिः पठ्यते' इति मा.धा.वृत्तिः ।

१. लट् - श्वङ्कते श्वङ्केते श्वङ्कन्ते । श्वङ्कसे श्वङ्केथे श्वङ्कध्वे । श्वङ्के श्वङ्कावहे श्वङ्कामहे । **२. लिट्** - शश्वङ्के शश्वङ्काते शश्वङ्किरे । शश्वङ्किषे शश्वङ्काथे शश्वङ्किध्वे । शश्वङ्के शश्वङ्किवहे शश्वङ्किमहे । **३. लुट्** - श्वङ्किता श्वङ्कितारौ श्वङ्कितारः । श्वङ्कितासे श्वङ्कितासाथे श्वङ्किताध्वे । श्वङ्किताहे श्वङ्कितास्वहे श्वङ्कितास्महे । **४. लृट्** - श्वङ्किष्यते श्वङ्किष्येते श्वङ्किष्यन्ते । श्वङ्किष्यसे श्वङ्किष्येथे श्वङ्किष्यध्वे । श्वङ्किष्ये श्वङ्किष्यावहे श्वङ्किष्यामहे । **५. लोट्** - श्वङ्कताम् श्वङ्केताम् श्वङ्कन्ताम् । श्वङ्कस्व श्वङ्केथाम् श्वङ्कध्वम् । श्वङ्कै श्वङ्कावहै श्वङ्कामहै । **६. लङ्** - अश्वङ्कत अश्वङ्केताम् अश्वङ्कन्त । अश्वङ्कथाः अश्वङ्केथाम् अश्वङ्कध्वम् । अश्वङ्के अश्वङ्कावहि अश्वङ्कामहि । **७. विधिलिङ्** - श्वङ्केत श्वङ्केयाताम् श्वङ्केरन् । श्वङ्केथाः श्वङ्केयाथाम् श्वङ्केध्वम् । श्वङ्केय श्वङ्केवहि श्वङ्केमहि । **८. आशीर्लिङ्** - श्वङ्किषीष्ट श्वङ्किषीयास्ताम् श्वङ्किषीरन् । श्वङ्किषीष्ठाः श्वङ्किषीयास्थाम् श्वङ्किषीध्वम्/ढ्वम् । श्वङ्किषीय श्वङ्किषीवहि श्वङ्किषीमहि । **९. लुङ्** - अश्वङ्किष्ट अश्वङ्किषाताम् अश्वङ्किषत । अश्वङ्किष्ठाः अश्वङ्किषाथाम् अश्वङ्किढ्वम्/ढ्वम् । अश्वङ्किषि अश्वङ्किष्वहि अश्वङ्किष्महि । **१०. लृङ्** - अश्वङ्किष्यत अश्वङ्किष्येताम् अश्वङ्किष्यन्त । अश्वङ्किष्यथाः अश्वङ्किष्येथाम् अश्वङ्किष्यध्वम् । अश्वङ्किष्ये अश्वङ्किष्यावहि अश्वङ्किष्यामहि ।

णिचि - श्वङ्कयति - ते, **सनि** - शिश्वङ्किषते, **यकि** - श्वङ्क्यते ।

९७. त्रकि - गतौ । सकर्म, सेट्, आत्मने । त्रखि इति चन्द्र-सम्मताकारादीनां मतेन पाठः ।

१. लट् - त्रङ्कते त्रङ्केते त्रङ्कन्ते । त्रङ्कसे त्रङ्केथे त्रङ्कध्वे । त्रङ्के त्रङ्कावहे त्रङ्कामहे । **२. लिट्** - तत्रङ्के तत्रङ्काते तत्रङ्किरे । तत्रङ्किषे तत्रङ्काथे तत्रङ्किध्वे । तत्रङ्के तत्रङ्किवहे तत्रङ्किमहे । **३. लुट्** - त्रङ्किता त्रङ्कितारौ त्रङ्कितारः । त्रङ्कितासे त्रङ्कितासाथे त्रङ्किताध्वे । त्रङ्किताहे त्रङ्कितास्वहे त्रङ्कितास्महे । **४. लृट्** - त्रङ्किष्यते त्रङ्किष्येते त्रङ्किष्यन्ते । त्रङ्किष्यसे त्रङ्किष्येथे त्रङ्किष्यध्वे । त्रङ्किष्ये त्रङ्किष्यावहे त्रङ्किष्यामहे । **५. लोट्** - त्रङ्कताम् त्रङ्केताम् त्रङ्कन्ताम् । त्रङ्कस्व त्रङ्केथाम् त्रङ्कध्वम् । त्रङ्कै त्रङ्कावहै त्रङ्कामहै । **६. लङ्** - अत्रङ्कत अत्रङ्केताम् अत्रङ्कन्त । अत्रङ्कथाः अत्रङ्केथाम् अत्रङ्कध्वम् । अत्रङ्के अत्रङ्कावहि अत्रङ्कामहि । **७. विधिलिङ्** - त्रङ्केत त्रङ्केयाताम् त्रङ्केरन् । त्रङ्केथाः त्रङ्केयाथाम् त्रङ्केध्वम् । त्रङ्केय त्रङ्केवहि त्रङ्केमहि । **८. आशीर्लिङ्** - त्रङ्किषीष्ट त्रङ्किषीयास्ताम् त्रङ्किषीरन् । त्रङ्किषीष्ठाः त्रङ्किषीयास्थाम् त्रङ्किषीध्वम्/ढ्वम् । त्रङ्किषीय त्रङ्किषीवहि त्रङ्किषीमहि । **९. लुङ्** - अत्रङ्किष्ट अत्रङ्किषाताम् अत्रङ्किषत । अत्रङ्किष्ठाः अत्रङ्किषाथाम् अत्रङ्किढ्वम्/ढ्वम् । अत्रङ्किषि अत्रङ्किष्वहि अत्रङ्किष्महि । **१०. लृङ्** - अत्रङ्किष्यत अत्रङ्किष्येताम् अत्रङ्किष्यन्त । अत्रङ्किष्यथाः अत्रङ्किष्येथाम् अत्रङ्किष्यध्वम् । अत्रङ्किष्ये अत्रङ्किष्यावहि अत्रङ्किष्यामहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – त्रङ्कयति – ते, **सनि** – तित्रङ्किषते, **यकि** – त्रङ्क्यते ।

९८. ढौकृ – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – ढौकते ढौकेते ढौकन्ते । ढौकसे ढौकेथे ढौकध्वे । ढौके ढौकावहे ढौकामहे । **२. लिट्** – डुढौके डुढौकाते डुढौकिरे । डुढौकिषे डुढौकाथे डुढौकिध्वे । डुढौके डुढौकिवहे डुढौकिमहे । **३. लुट्** – ढौकिता ढौकितारौ ढौकितारः । ढौकितासे ढौकितासाथे ढौकिताध्वे । ढौकिताहे ढौकितास्वहे ढौकितास्महे । **४. लृट्** – ढौकिष्यते ढौकिष्येते ढौकिष्यन्ते । ढौकिष्यसे ढौकिष्येथे ढौकिष्यध्वे । ढौकिष्ये ढौकिष्यावहे ढौकिष्यामहे । **५. लोट्** – ढौकताम् ढौकेताम् ढौकन्ताम् । ढौकस्व ढौकेथाम् ढौकध्वम् । ढौकै ढौकावहै ढौकामहै । **६. लङ्** – अढौकत अढौकेताम् अढौकन्त । अढौकथाः अढौकेथाम् अढौकध्वम् । अढौके अढौकावहि अढौकामहि । **७. विधिलिङ्** – ढौकेत ढौकेयाताम् ढौकेरन् । ढौकेथाः ढौकेयाथाम् ढौकेध्वम् । ढौकेय ढौकेवहि ढौकेमहि । **८. आशीर्लिङ्** – ढौकिषीष्ट ढौकिषीयास्ताम् ढौकिषीरन् । ढौकिषीष्ठाः ढौकिषीयास्थाम् ढौकिषीध्वम्/ढ्वम् । ढौकिषीय ढौकिषीवहि ढौकिषीमहि । **९. लुङ्** – अढौकिष्ट अढौकिषाताम् अढौकिषत । अढौकिष्ठाः अढौकिषाथाम् अढौकिध्वम्/ढ्वम् । अढौकिषि अढौकिष्वहि अढौकिष्महि । **१०. लृङ्** – अढौकिष्यत अढौकिष्येताम् अढौकिष्यन्त । अढौकिष्यथाः अढौकिष्येथाम् अढौकिष्यध्वम् । अढौकिष्ये अढौकिष्यावहि अढौकिष्यामहि ।

णिचि – ढौकयति – ते, **सनि** – डुढौकिषते, **यकि** – ढौक्यते ।

९९. त्रौकृ – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – त्रौकते त्रौकेते त्रौकन्ते । त्रौकसे त्रौकेथे त्रौकध्वे । त्रौके त्रौकावहे त्रौकामहे । **२. लिट्** – तुत्रौके तुत्रौकाते तुत्रौकिरे । तुत्रौकिषे तुत्रौकाथे तुत्रौकिध्वे । तुत्रौके तुत्रौकिवहे तुत्रौकिमहे । **३. लुट्** – त्रौकिता त्रौकितारौ त्रौकितारः । त्रौकितासे त्रौकितासाथे त्रौकिताध्वे । त्रौकिताहे त्रौकितास्वहे त्रौकितास्महे । **४. लृट्** – त्रौकिष्यते त्रौकिष्येते त्रौकिष्यन्ते । त्रौकिष्यसे त्रौकिष्येथे त्रौकिष्यध्वे । त्रौकिष्ये त्रौकिष्यावहे त्रौकिष्यामहे । **५. लोट्** – त्रौकताम् त्रौकेताम् त्रौकन्ताम् । त्रौकस्व त्रौकेथाम् त्रौकध्वम् । त्रौकै त्रौकावहै त्रौकामहै । **६. लङ्** – अत्रौकत अत्रौकेताम् अत्रौकन्त । अत्रौकथाः अत्रौकेथाम् अत्रौकध्वम् । अत्रौके अत्रौकावहि अत्रौकामहि । **७. विधिलिङ्** – त्रौकेत त्रौकेयाताम् त्रौकेरन् । त्रौकेथाः त्रौकेयाथाम् त्रौकेध्वम् । त्रौकेय त्रौकेवहि त्रौकेमहि । **८. आशीर्लिङ्** – त्रौकिषीष्ट त्रौकिषीयास्ताम् त्रौकिषीरन् । त्रौकिषीष्ठाः त्रौकिषीयास्थाम् त्रौकिषीध्वम्/ढ्वम् । त्रौकिषीय त्रौकिषीवहि त्रौकिषीमहि । **९. लुङ्** – अत्रौकिष्ट अत्रौकिषाताम् अत्रौकिषत । अत्रौकिष्ठाः अत्रौकिषाथाम् अत्रौकिध्वम्/ढ्वम् । अत्रौकिषि अत्रौकिष्वहि अत्रौकिष्महि । **१०. लृङ्** – अत्रौकिष्यत अत्रौकिष्येताम् अत्रौकिष्यन्त । अत्रौकिष्यथाः अत्रौकिष्येथाम् अत्रौकिष्यध्वम् । अत्रौकिष्ये अत्रौकिष्यावहि अत्रौकिष्यामहि ।

णिचि – त्रौकयति – ते, **सनि** – तुत्रौकिषते, **यकि** – त्रौक्यते ।

१००. ष्वष्क – गतौ । सकर्म, सेट्, आत्मने । 'विष्वक् परित्रौकितलोचनैः स्थितं विष्वष्कमाणाम्बुदनादशङ्कया' (धा.का. १.१४) इति प्रयोगः ।

१. लट् – ष्वष्कते[1] ष्वष्केते ष्वष्कन्ते । ष्वष्कसे ष्वष्केथे ष्वष्कध्वे । ष्वष्के ष्वष्कावहे ष्वष्कामहे । **२. लिट्** – षष्वष्के षष्वष्काते षष्वष्किरे । षष्वष्किषे षष्वष्काथे षष्वष्किध्वे । षष्वष्के षष्वष्किवहे षष्वष्किमहे । **३. लुट्** – ष्वष्किता ष्वष्कितारौ ष्वष्कितारः । ष्वष्कितासे ष्वष्कितासाथे ष्वष्किताध्वे । ष्वष्किताहे ष्वष्कितास्वहे ष्वष्कितास्महे । **४. लृट्** – ष्वष्किष्यते ष्वष्किष्येते ष्वष्किष्यन्ते । ष्वष्किष्यसे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष्वष्किष्येथे ष्वष्किष्यध्वे । ष्वष्किष्ये ष्वष्किष्यावहे ष्वष्किष्यामहे । **५. लोट्** – ष्वष्कताम् ष्वष्केताम् ष्वष्कन्ताम् । ष्वष्कस्व ष्वष्केथाम् ष्वष्कध्वम् । ष्वष्कै ष्वष्कावहै ष्वष्कामहै । **६. लङ्** – अष्वष्कत अष्वष्केताम् अष्वष्कन्त । अष्वष्कथाः अष्वष्केथाम् अष्वष्कध्वम् । अष्वष्के अष्वष्कावहि अष्वष्कामहि । **७. विधिलिङ्** – ष्वष्केत ष्वष्केयाताम् ष्वष्केरन् । ष्वष्केथाः ष्वष्केयाथाम् ष्वष्केध्वम् । ष्वष्केय ष्वष्केवहि ष्वष्केमहि । **८. आशीर्लिङ्** – ष्वष्किषीष्ट ष्वष्किषीयास्ताम् ष्वष्किषीरन् । ष्वष्किषीष्ठाः ष्वष्किषीयास्थाम् ष्वष्किषीध्वम्/ढ्वम् । ष्वष्किषीय ष्वष्किषीवहि ष्वष्किषीमहि ।**९. लुङ्** – अष्वष्किष्ट अष्वष्किषाताम् अष्वष्किषत । अष्वष्किष्ठाः अष्वष्किषाथाम् अष्वष्किध्वम्/ढ्वम् । अष्वष्किषि अष्वष्किष्वहि अष्वष्किष्महि । **१०. लृङ्** – अष्वष्किष्यत अष्वष्किष्येताम् अष्वष्किष्यन्त । अष्वष्किष्यथाः अष्वष्किष्येथाम् अष्वष्किष्यध्वम् । अष्वष्किष्ये अष्वष्किष्यावहि अष्वष्किष्यामहि ।

णिचि – ष्वष्कयति – ते, **सनि** – षिष्वकिषते, **यकि** – ष्वष्क्यते ।

१. 'सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः' इति निषेधात् धात्वादिषकारस्य सकारः न ।

१०१. वष्क – गतौ । सकर्म, सेट्, आत्मने. । अयं धातुः बालमनोरमायुक्तायां कौमुद्यां, मा.धा.वृत्तौ च 'वस्क' इति सकारेपेतत्वेन दृश्यते ।

१. लट् – वस्कते वस्केते वस्कन्ते । वस्कसे वस्केथे वस्कध्वे । वस्के वस्कावहे वस्कामहे । **२. लिट्** – ववस्के ववस्काते ववस्किरे । ववस्किषे ववस्काथे ववस्किध्वे । ववस्के ववस्किवहे ववस्किमहे । **३. लुट्** – वस्किता वस्कितारौ वस्कितारः । वस्कितासे वस्कितासाथे वस्किताध्वे । वस्किताहे वस्कितास्वहे वस्कितास्महे । **४. लृट्** – वस्किष्यते वस्किष्येते वस्किष्यन्ते । वस्किष्यसे वस्किष्येथे वस्किष्यध्वे । वस्किष्ये वस्किष्यावहे वस्किष्यामहे । **५. लोट्** – वस्कताम् वस्केताम् वस्कन्ताम् । वस्कस्व वस्केथाम् वस्कध्वम् । वस्के वस्कावहै वस्कामहै । **६. लङ्** – अवस्कत अवस्केताम् अवस्कन्त । अवस्कथाः अवस्केथाम् अवस्कध्वम् । अवस्के अवस्कावहि अवस्कामहि । **७. विधिलिङ्** – वस्केत वस्केयाताम् वस्केरन् । वस्केथाः वस्केयाथाम् वस्केध्वम् । वस्केय वस्केवहि वस्केमहि । **८. आशीर्लिङ्** – वस्किषीष्ट वस्किषीयास्ताम् वस्किषीरन् । वस्किषीष्ठाः वस्किषीयास्थाम् वस्किषीध्वम्/ढ्वम् । वस्किषीय वस्किषीवहि वस्किषीमहि । **९. लुङ्** – अवस्किष्ट अवस्किषाताम् अवस्किषत । अवस्किष्ठाः अवस्किषाथाम् अवस्किध्वम्/ढ्वम् । अवस्किषि अवस्किष्वहि अवस्किष्महि । **१०. लृङ्** – अवस्किष्यत अवस्किष्येताम् अवस्किष्यन्त । अवस्किष्यथाः अवस्किष्येथाम् अवस्किष्यध्वम् । अवस्किष्ये अवस्किष्यावहि अवस्किष्यामहि ।

णिचि – वस्कयति – ते, **सनि** – विवस्किषते, **यकि** – वस्क्यते ।

१०२. मष्क – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – मस्कते मस्केते मस्कन्ते । मस्कसे मस्केथे मस्कध्वे । मस्के मस्कावहे मस्कामहे । **२. लिट्** – ममस्के ममस्काते ममस्किरे । ममस्किषे ममस्काथे ममस्किध्वे । ममस्के ममस्किवहे ममस्किमहे । **३. लुट्** – मस्किता मस्कितारौ मस्कितारः । मस्कितासे मस्कितासाथे मस्किताध्वे । मस्किताहे मस्कितास्वहे मस्कितास्महे । **४. लृट्** – मस्किष्यते मस्किष्येते मस्किष्यन्ते । मस्किष्यसे मस्किष्येथे मस्किष्यध्वे । मस्किष्ये मस्किष्यावहे मस्किष्यामहे । **५. लोट्** – मस्कताम् मस्केताम् मस्कन्ताम् । मस्कस्व मस्केथाम् मस्कध्वम् । मस्के मस्कावहै मस्कामहै । **६. लङ्** – अमस्कत अमस्केताम् अमस्कन्त । अमस्कथाः अमस्केथाम् अमस्कध्वम् । अमस्के अमष्कावहि अमष्कामहि । **७. विधिलिङ्** – मस्केत मस्केयाताम् मस्केरन् । मस्केथाः मस्केयाथाम् मस्केध्वम् । मस्केय मस्केवहि मस्केमहि । **८. आशीर्लिङ्** – मस्किषीष्ट

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मस्किषीयास्ताम् मस्किषीरन् । मस्किषीष्ठाः मस्किषीयास्थाम् मस्किषीध्वम्/ढ्वम् । मस्किषीय मस्किषीवहि मस्किषीमहि । **९. लुङ्** – अमस्किष्ट अमस्किषाताम् अमस्किषत । अमस्किष्ठाः अमस्किषाथाम् अमस्किध्वम्/ढ्वम् । अमस्किषि अमस्किष्वहि अमस्किष्महि । **१०. लृङ्** – अमस्किष्यत अमस्किष्येताम् अमस्किष्यन्त । अमस्किष्यथाः अमस्किष्येथाम् अमस्किष्यध्वम् । अमस्किष्ये अमस्किष्यावहि अमस्किष्यामहि ।

णिचि – मस्कयति – ते, **सनि** – मिमस्किषते, **यकि** – मस्क्यते ।

१०३. टिकृ – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – टेकते टेकेते टेकन्ते । टेकसे टेकेथे टेकध्वे । टेके टेकावहे टेकामहे । **२. लिट्** – टिटेके टिटेकाते टिटेकिरे । टिटेकिषे टिटेकाथे टिटेकिध्वे । टिटेके टिटेकिवहे टिटेकिमहे । **३. लुट्** – टेकिता टेकितारौ टेकितारः । टेकितासे टेकितासाथे टेकिताध्वे । टेकिताहे टेकितास्वहे टेकितास्महे । **४. लृट्** – टेकिष्यते टेकिष्येते टेकिष्यन्ते । टेकिष्यसे टेकिष्येथे टेकिष्यध्वे । टेकिष्ये टेकिष्यावहे टेकिष्यामहे । **५. लोट्** – टेकताम् टेकेताम् टेकन्ताम् । टेकस्व टेकेथाम् टेकध्वम् । टेकै टेकावहै टेकामहै । **६. लङ्** – अटेकत अटेकेताम् अटेकन्त । अटेकथाः अटेकेथाम् अटेकध्वम् । अटेके अटेकावहि अटेकामहि । **७. विधिलिङ्** – टेकेत टेकेयाताम् टेकेरन् । टेकेथाः टेकेयाथाम् टेकेध्वम् । टेकेय टेकेवहि टेकेमहि । **८. आशीर्लिङ्** – टेकिषीष्ट टेकिषीयास्ताम् टेकिषीरन् । टेकिषीष्ठाः टेकिषीयास्थाम् टेकिषीध्वम्/ढ्वम् । टेकिषीय टेकिषीवहि टेकिषीमहि । **९. लुङ्** – अटेकिष्ट अटेकिषाताम् अटेकिषत । अटेकिष्ठाः अटेकिषाथाम् अटेकिध्वम्/ढ्वम् । अटेकिषि अटेकिष्वहि अटेकिष्महि । **१०. लृङ्** – अटेकिष्यत अटेकिष्येताम् अटेकिष्यन्त । अटेकिष्यथाः अटेकिष्येथाम् अटेकिष्यध्वम् । अटेकिष्ये अटेकिष्यावहि अटेकिष्यामहि ।

णिचि – टेकयति – ते, **सनि** – टिटिकिषते/टिटेकिषते[1], **यकि** – टिक्यते ।

१. 'रलो व्युपधात्...' इति कित्त्वविकल्पः ।

१०४. टीकृ – गतौ । सकर्म, सेट्, आत्मने ।

१. लट् – टीकते टीकेते टीकन्ते । टीकसे टीकेथे टीकध्वे । टीके टीकावहे टीकामहे । **२. लिट्** – टिटीके टिटीकाते टिटीकिरे । टिटीकिषे टिटीकाथे टिटीकिध्वे । टिटीके टिटीकिवहे टिटीकिमहे । **३. लुट्** – टीकिता टीकितारौ टीकितारः । टीकितासे टीकितासाथे टीकिताध्वे । टीकिताहे टीकितास्वहे टीकितास्महे । **४. लृट्** – टीकिष्यते टीकिष्येते टीकिष्यन्ते । टीकिष्यसे टीकिष्येथे टीकिष्यध्वे । टीकिष्ये टीकिष्यावहे टीकिष्यामहे । **५. लोट्** – टीकताम् टीकेताम् टीकन्ताम् । टीकस्व टीकेथाम् टीकध्वम् । टीकै टीकावहै टीकामहै । **६. लङ्** – अटीकत अटीकेताम् अटीकन्त । अटीकथाः अटीकेथाम् अटीकध्वम् । अटीके अटीकावहि अटीकामहि । **७. विधिलिङ्** – टीकेत टीकेयाताम् टीकेरन् । टीकेथाः टीकेयाथाम् टीकेध्वम् । टीकेय टीकेवहि टीकेमहि । **८. आशीर्लिङ्** – टीकिषीष्ट टीकिषीयास्ताम् टीकिषीरन् । टीकिषीष्ठाः टीकिषीयास्थाम् टीकिषीध्वम्/ढ्वम् । टीकिषीय टीकिषीवहि टीकिषीमहि । **९. लुङ्** – अटीकिष्ट अटीकिषाताम् अटीकिषत । अटीकिष्ठाः अटीकिषाथाम् अटीकिध्वम्/ढ्वम् । अटीकिषि अटीकिष्वहि अटीकिष्महि । **१०. लृङ्** – अटीकिष्यत अटीकिष्येताम् अटीकिष्यन्त । अटीकिष्यथाः अटीकिष्येथाम् अटीकिष्यध्वम् । अटीकिष्ये अटीकिष्यावहि अटीकिष्यामहि ।

णिचि – टीकयति – ते, **सनि** – टिटीकिषते, **यकि** – टीक्यते ।

१०५. तिकृ – गतौ । सकर्म, सेट्, आत्मने ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – कटति कटतः कटन्ति । कटसि कटथः कटथ । कटामि कटावः कटामः । **२. लिट्** – चकाट चकटतुः चकटुः । चकटिथ चकटथुः चकट । चकट, चकाट चकटिव चकटिम । **३. लुट्** – कटिता कटितारौ कटितारः । कटितासि कटितास्थः कटितास्थ । कटितास्मि कटितास्वः कटितास्मः । **४. लृट्** – कटिष्यति कटिष्यतः कटिष्यन्ति । कटिष्यसि कटिष्यथः कटिष्यथ । कटिष्यामि कटिष्यावः कटिष्यामः ।

५. लोट् – कटतु, कटतात् कटताम् कटन्तु । कट, कटतात् कटतम् कटत । कटानि कटाव कटाम ।

६. लङ् – अकटत् अकटताम् अकटन् । अकटः अकटतम् अकटत । अकटम् अकटाव अकटाम ।

७. विधिलिङ् – कटेत् कटेताम् कटेयुः । कटेः कटेतम् कटेत । कटेयम् कटेव कटेम । **८. आशीर्लिङ्** – कट्यात् कट्यास्ताम् कट्यासुः । कट्याः कट्यास्तम् कट्यास्त । कट्यासम् कट्यास्व कट्यास्म ।

९. लुङ् – (i) अकटीत्[2] अकटिष्टाम् अकटिषुः । अकटीः अकटिष्टम् अकटिष्ट । अकटिषम् अकटिष्व अकटिष्म । (ii) अकाटीत् अकाटिष्टाम् अकाटिषुः । अकाटीः अकाटिष्टम् अकाटिष्ट । अकाटिषम् अकाटिष्व अकाटिष्म । **१०. लृङ्** – अकटिष्यत् अकटिष्यताम् अकटिष्यन् । अकटिष्यः अकटिष्यतम् अकटिष्यत । अकटिष्यम् अकटिष्याव अकटिष्याम ।

णिचि – कटयति – ते, **सनि** – चिकटिषति, **यकि** – कट्यते ।

१. केचित्तु इदितं मत्त्वा नुमि कृते 'कण्टति' इत्यपि वदन्ति ।

२. 'रलो व्युपधाद्धलादेः संश्च' इति विकल्पेन कित्त्वम् इकारोपधत्वात् ।

३२०. (i) 'इ गतौ' अन्ये केचित् 'कटी' इत्यत्र इकारप्रश्लेषात् इति वदन्ति । तथा सति –

१. लट् – अयति अयतः अयन्ति । अयसि अयथः अयथ । अयामि अयावः अयामः । **२. लिट्** – इयाय इयतुः इयुः । इययिथ-इयेथ इयथुः इय । इय-इयाय-इयय इयिव इयिम । **३. लुट्** – एता एतारौ एतारः । एतासि एतास्थः एतास्थ । एतास्मि एतास्वः एतास्मः । **४. लृट्** – एष्यति एष्यतः एष्यन्ति । एष्यसि एष्यथः एष्यथ । एष्यामि एष्यावः एष्यामः । **५. लोट्** – अयतु अयतात् अयताम् अयन्तु । अय,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयतात् अयतम् अयत । अयानि अयाव अयाम । **६. लङ्** – ऐत् ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम । **७. विधिलिङ्** – अयेत् अयेताम् अयेयुः । अयेः अयेतम् अयेत । अयेयम् अयेव अयेम । **८. आशीर्लिङ्** – ईयात्[1] ईयास्ताम् ईयासुः । ईयाः ईयास्तम् ईयास्त । ईयासम् ईयास्व ईयास्म । **९. लुङ्** – ऐषीत्[2] ऐषिष्टाम् ऐषिषुः । ऐषीः ऐषिष्टम् ऐषिष्ट । ऐषिषम् ऐषिष्व ऐषिष्म । **१०. लृङ्** – ऐष्यत् ऐष्यताम् ऐष्यन् । ऐष्यः ऐष्यतम् ऐष्यत । ऐष्यम् ऐष्याव ऐष्याम ।

णिचि – अययति – ते, **सनि** – ईषिषति, **यकि** – ईयते[1] ।

१. 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः ।

२. 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः ।

३२०. (ii) केचन 'कटी' इत्यत्र ईकारप्रश्लेषं ('ई गतौ' इति) मन्यन्ते । तथा सति –

१. लट् – अयति अयतः अयन्ति । अयसि अयथः अयथ । अयामि अयावः अयामः । **२. लिट्** – (i) अयाञ्चकार अयाञ्चक्रतुः अयाञ्चक्रुः । अयाञ्चकर्थ अयाञ्चक्रथुः अयाञ्चक्र । अयाञ्चकार/अयाञ्चकर अयाञ्चकृव अयाञ्चकृम । (ii) अयाम्बभूव अयाम्बभूवतुः अयाम्बभूवुः । अयाम्बभूविथ अयाम्बभूवथुः अयाम्बभूव । अयाम्बभूव अयाम्बभूविव अयाम्बभूविम । (iii) अयामास अयामासतुः अयामासुः । अयामासिथ अयामासथुः अयामास । अयामास अयामासिव अयामासिम । **३. लुट्** – एता एतारौ एतारः । एतासि एतास्थः एतास्थ । एतास्मि एतास्वः एतास्मः । **४. लृट्** – एष्यति एष्यतः एष्यन्ति । एष्यसि एष्यथः एष्यथ । एष्यामि एष्यावः एष्यामः । **५. लोट्** – अयतु अयतात् अयताम् अयन्तु । अय, अयतात् अयतम् अयत । अयानि अयाव अयाम । **६. लङ्** – ऐत् ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम । **७. विधिलिङ्** – अयेत् अयेताम् अयेयुः । अयेः अयेतम् अयेत । अयेयम् अयेव अयेम । **८. आशीर्लिङ्** – ईयात्[1] ईयास्ताम् ईयासुः । ईयाः ईयास्तम् ईयास्त । ईयासम् ईयास्व ईयास्म । **९. लुङ्** – ऐषीत्[2] ऐषिष्टाम् ऐषिषुः । ऐषीः ऐषिष्टम् ऐषिष्ट । ऐषिषम् ऐषिष्व ऐषिष्म । **१०. लृङ्** – ऐष्यत् ऐष्यताम् ऐष्यन् । ऐष्यः ऐष्यतम् ऐष्यत । ऐष्यम् ऐष्याव ऐष्याम ।

णिचि – अययति – ते, **सनि** – ईषिषति, **यकि** – ईयते[1] ।

१. 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः ।

२. 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः ।

३२१. मडि – भूषायाम् । सकर्म, सेट्, परस्मै । 'भूषार्थे मण्डतीति स्यात्तत्र मण्डयतीति णौ' (श्लो.८४) इति देवः ।

१. लट् – मण्डति मण्डतः मण्डन्ति । मण्डसि मण्डथः मण्डथ । मण्डामि मण्डावः मण्डामः । **२. लिट्** – ममण्ड ममण्डतुः ममण्डुः । ममण्डिथ ममण्डथुः ममण्ड । ममण्ड ममण्डिव ममण्डिम । **३. लुट्** – मण्डिता मण्डितारौ मण्डितारः । मण्डितासि मण्डितास्थः मण्डितास्थ । मण्डितास्मि मण्डितास्वः मण्डितास्मः । **४. लृट्** – मण्डिष्यति मण्डिष्यतः मण्डिष्यन्ति । मण्डिष्यसि मण्डिष्यथः मण्डिष्यथ । मण्डिष्यामि मण्डिष्यावः मण्डिष्यामः । **५. लोट्** – मण्डतु, मण्डतात् मण्डताम् मण्डन्तु । मण्ड, मण्डतात् मण्डतम् मण्डत । मण्डानि मण्डाव मण्डाम । **६. लङ्** – अमण्डत् अमण्डताम् अमण्डन् । अमण्डः अमण्डतम् अमण्डत । अमण्डम् अमण्डाव अमण्डाम । **७. विधिलिङ्** – मण्डेत् मण्डेताम् मण्डेयुः । मण्डेः मण्डेतम् मण्डेत । मण्डेयम् मण्डेव मण्डेम । **८. आशीर्लिङ्** – मण्ड्यात् मण्ड्यास्ताम् मण्ड्यासुः । मण्ड्याः मण्ड्यास्तम् मण्ड्यास्त । मण्ड्यासम् मण्ड्यास्व मण्ड्यास्म । **९. लुङ्** – अमण्डीत् अमण्डिष्टाम् अमण्डिषुः । अमण्डीः अमण्डिष्टम् अमण्डिष्ट । अमण्डिषम् अमण्डिष्व अमण्डिष्म । **१०. लृङ्** – अमण्डिष्यत् अमण्डिष्यताम् अमण्डिष्यन् । अमण्डिष्यः अमण्डिष्यतम् अमण्डिष्यत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अमण्डिष्यम् अमण्डिष्याव अमण्डिष्याम ।

णिचि – मण्डयति – ते, **सनि** – मिमण्डिषति, **यकि** – मण्ड्यते ।

३२२. कुडि – वैकल्ये । अकर्म, सेट्, परस्मै । वैकल्यम् अविवेकः अपूर्णभावः वा । 'वैकल्ये दाहरक्षासु कुण्डेत् कुण्डेत कुण्डयेत्' (श्लो.८८) इति देवः ।

१. लट् – कुण्डति कुण्डतः कुण्डन्ति । कुण्डसि कुण्डथः कुण्डथ । कुण्डामि कुण्डावः कुण्डामः ।

२. लिट् – चुकुण्ड चुकुण्डतुः चुकुण्डुः । चुकुण्डिथ चुकुण्डथुः चुकुण्ड । चुकुण्ड चुकुण्डिव चुकुण्डिम ।

३. लुट् – कुण्डिता कुण्डितारौ कुण्डितारः । कुण्डितासि कुण्डितास्थः कुण्डितास्थ । कुण्डितास्मि कुण्डितास्वः कुण्डितास्मः । **४. लृट्** – कुण्डिष्यति कुण्डिष्यतः कुण्डिष्यन्ति । कुण्डिष्यसि कुण्डिष्यथः कुण्डिष्यथ । कुण्डिष्यामि कुण्डिष्यावः कुण्डिष्यामः । **५. लोट्** – कुण्डतु, कुण्डतात् कुण्डताम् कुण्डन्तु । कुण्ड, कुण्डतात् कुण्डतम् कुण्डत । कुण्डानि कुण्डाव कुण्डाम । **६. लङ्** – अकुण्डत् अकुण्डताम् अकुण्डन् । अकुण्डः अकुण्डतम् अकुण्डत । अकुण्डम् अकुण्डाव अकुण्डाम । **७. विधिलिङ्** – कुण्डेत् कुण्डेताम् कुण्डेयुः । कुण्डेः कुण्डेतम् कुण्डेत । कुण्डेयम् कुण्डेव कुण्डेम । **८. आशीर्लिङ्** – कुण्ड्यात् कुण्ड्यास्ताम् कुण्ड्यासुः । कुण्ड्याः कुण्ड्यास्तम् कुण्ड्यास्त । कुण्ड्यासम् कुण्ड्यास्व कुण्ड्यास्म । **९. लुङ्** – अकुण्डीत् अकुण्डिष्टाम् अकुण्डिषुः । अकुण्डीः अकुण्डिष्टम् अकुण्डिष्ट । अकुण्डिषम् अकुण्डिष्व अकुण्डिष्म । **१०. लृङ्** – अकुण्डिष्यत् अकुण्डिष्यताम् अकुण्डिष्यन् । अकुण्डिष्यः अकुण्डिष्यतम् अकुण्डिष्यत । अकुण्डिष्यम् अकुण्डिष्याव अकुण्डिष्याम ।

णिचि – कुण्डयति – ते, **सनि** – चुकुण्डिषति, **यकि** – कुण्ड्यते ।

३२३. मुड – मर्दने । सकर्म, सेट्, परस्मै । 'मुट प्रमर्दने' इति मा.धा.वृत्तिः ।

१. लट् – मोडति मोडतः मोडन्ति । मोडसि मोडथः मोडथ । मोडामि मोडावः मोडामः । **२. लिट्** – मुमोड मुमुडतुः मुमुडुः । मुमोडिथ मुमुडथुः मुमुड । मुमोड मुमुडिव मुमुडिम । **३. लुट्** – मोडिता मोडितारौ मोडितारः । मोडितासि मोडितास्थः मोडितास्थ । मोडितास्मि मोडितास्वः मोडितास्मः । **४. लृट्** – मोडिष्यति मोडिष्यतः मोडिष्यन्ति । मोडिष्यसि मोडिष्यथः मोडिष्यथ । मोडिष्यामि मोडिष्यावः मोडिष्यामः । **५. लोट्** – मोडतु, मोडतात् मोडताम् मोडन्तु । मोड, मोडतात् मोडतम् मोडत । मोडानि मोडाव मोडाम । **६. लङ्** – अमोडत् अमोडताम् अमोडन् । अमोडः अमोडतम् अमोडत । अमोडम् अमोडाव अमोडाम । **७. विधिलिङ्** – मोडेत् मोडेताम् मोडेयुः । मोडेः मोडेतम् मोडेत । मोडेयम् मोडेव मोडेम । **८. आशीर्लिङ्** – मुड्यात् मुड्यास्ताम् मुड्यासुः । मुड्याः मुड्यास्तम् मुड्यास्त । मुड्यासम् मुड्यास्व मुड्यास्म । **९. लुङ्** – अमोडीत् अमोडिष्टाम् अमोडिषुः । अमोडीः अमोडिष्टम् अमोडिष्ट । अमोडिषम् अमोडिष्व अमोडिष्म । **१०. लृङ्** – अमोडिष्यत् अमोडिष्यताम् अमोडिष्यन् । अमोडिष्यः अमोडिष्यतम् अमोडिष्यत । अमोडिष्यम् अमोडिष्याव अमोडिष्याम ।

णिचि – मोडयति – ते, **सनि** – मुमोडिषति, **यकि** – मुड्यते ।

३२४. प्रुड – मर्दने । सकर्म, सेट्, परस्मै ।

१. लट् – प्रोडति प्रोडतः प्रोडन्ति । प्रोडसि प्रोडथः प्रोडथ । प्रोडामि प्रोडावः प्रोडामः । **२. लिट्** – पुप्रोड पुप्रुडतुः पुप्रुडुः । पुप्रोडिथ पुप्रुडथुः पुप्रुड । पुप्रोड पुप्रुडिव पुप्रुडिम । **३. लुट्** – प्रोडिता प्रोडितारौ प्रोडितारः । प्रोडितासि प्रोडितास्थः प्रोडितास्थ । प्रोडितास्मि प्रोडितास्वः प्रोडितास्मः । **४. लृट्** – प्रोडिष्यति प्रोडिष्यतः प्रोडिष्यन्ति । प्रोडिष्यसि प्रोडिष्यथः प्रोडिष्यथ । प्रोडिष्यामि प्रोडिष्यावः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रोडिष्यामः । **५. लोट्** – प्रोडतु, प्रोडतात् प्रोडताम् प्रोडन्तु । प्रोड, प्रोडतात् प्रोडतम् प्रोडत । प्रोडानि प्रोडाव प्रोडाम । **६. लङ्** – अप्रोडत् अप्रोडताम् अप्रोडन् । अप्रोडः अप्रोडतम् अप्रोडत । अप्रोडम् अप्रोडाव अप्रोडाम । **७. विधिलिङ्** – प्रोडेत् प्रोडेताम् प्रोडेयुः । प्रोडेः प्रोडेतम् प्रोडेत । प्रोडेयम् प्रोडेव प्रोडेम । **८. आशीर्लिङ्** – प्रुड्यात् प्रुड्यास्ताम् प्रुड्यासुः । प्रुड्याः प्रुड्यास्तम् प्रुड्यास्त । प्रुड्यासम् प्रुड्यास्व प्रुड्यास्म । **९. लुङ्** – अप्रोडीत् अप्रोडिष्टाम् अप्रोडिषुः । अप्रोडीः अप्रोडिष्टम् अप्रोडिष्ट । अप्रोडिषम् अप्रोडिष्व अप्रोडिष्म । **१०. लृङ्** – अप्रोडिष्यत् अप्रोडिष्यताम् अप्रोडिष्यन् । अप्रोडिष्यः अप्रोडिष्यतम् अप्रोडिष्यत । अप्रोडिष्यम् अप्रोडिष्याव अप्रोडिष्याम ।

णिचि – प्रोडयति – ते, **सनि** – पुप्रोडिषति, **यङि** – प्रुड्यते ।

३२५. चुडि – अल्पीभावे । अकर्म, सेट्, परस्मै ।

१. लट् – चुण्डति चुण्डतः चुण्डन्ति । चुण्डसि चुण्डथः चुण्डथ । चुण्डामि चुण्डावः चुण्डामः । **२. लिट्** – चुचुण्ड चुचुण्डतुः चुचुण्डुः । चुचुण्डिथ चुचुण्डथुः चुचुण्ड । चुचुण्ड चुचुण्डिव चुचुण्डिम । **३. लुट्** – चुण्डिता चुण्डितारौ चुण्डितारः । चुण्डितासि चुण्डितास्थः चुण्डितास्थ । चुण्डितास्मि चुण्डितास्वः चुण्डितास्मः । **४. लृट्** – चुण्डिष्यति चुण्डिष्यतः चुण्डिष्यन्ति । चुण्डिष्यसि चुण्डिष्यथः चुण्डिष्यथ । चुण्डिष्यामि चुण्डिष्यावः चुण्डिष्यामः । **५. लोट्** – चुण्डतु, चुण्डतात् चुण्डताम् चुण्डन्तु । चुण्ड, चुण्डतात् चुण्डतम् चुण्डत । चुण्डानि चुण्डाव चुण्डाम । **६. लङ्** – अचुण्डत् अचुण्डताम् अचुण्डन् । अचुण्डः अचुण्डतम् अचुण्डत । अचुण्डम् अचुण्डाव अचुण्डाम । **७. विधिलिङ्** – चुण्डेत् चुण्डेताम् चुण्डेयुः । चुण्डेः चुण्डेतम् चुण्डेत । चुण्डेयम् चुण्डेव चुण्डेम । **८. आशीर्लिङ्** – चुण्ड्यात् चुण्ड्यास्ताम् चुण्ड्यासुः । चुण्ड्याः चुण्ड्यास्तम् चुण्ड्यास्त । चुण्ड्यासम् चुण्ड्यास्व चुण्ड्यास्म । **९. लुङ्** – अचुण्डीत् अचुण्डिष्टाम् अचुण्डिषुः । अचुण्डीः अचुण्डिष्टम् अचुण्डिष्ट । अचुण्डिषम् अचुण्डिष्व अचुण्डिष्म । **१०. लृङ्** – अचुण्डिष्यत् अचुण्डिष्यताम् अचुण्डिष्यन् । अचुण्डिष्यः अचुण्डिष्यतम् अचुण्डिष्यत । अचुण्डिष्यम् अचुण्डिष्याव अचुण्डिष्याम ।

णिचि – चुण्डयति – ते, **सनि** – चुचुण्डिषति, **यङि** – चुण्ड्यते ।

३२६. मुडि – खण्डने । सकर्म, सेट्, परस्मै । 'पुडि' चेत्येके इति कौमुदी । 'मुण्डते मार्जने मुण्डेः खण्डने शपि मुण्डति' (श्लो.८३) इति देवः । अर्थभेदात् पुनः पाठः । मार्जनार्थे २७५ सङ्ख्याकः धातुः द्रष्टव्यः ।

१. लट् – मुण्डति मुण्डतः मुण्डन्ति । मुण्डसि मुण्डथः मुण्डथ । मुण्डामि मुण्डावः मुण्डामः । **२. लिट्** – मुमुण्ड मुमुण्डतुः मुमुण्डुः । मुमुण्डिथ मुमुण्डथुः मुमुण्ड । मुमुण्ड मुमुण्डिव मुमुण्डिम । **३. लुट्** – मुण्डिता मुण्डितारौ मुण्डितारः । मुण्डितासि मुण्डितास्थः मुण्डितास्थ । मुण्डितास्मि मुण्डितास्वः मुण्डितास्मः । **४. लृट्** – मुण्डिष्यति मुण्डिष्यतः मुण्डिष्यन्ति । मुण्डिष्यसि मुण्डिष्यथः मुण्डिष्यथ । मुण्डिष्यामि मुण्डिष्यावः मुण्डिष्यामः । **५. लोट्** – मुण्डतु, मुण्डतात् मुण्डताम् मुण्डन्तु । मुण्ड, मुण्डतात् मुण्डतम् मुण्डत । मुण्डानि मुण्डाव मुण्डाम । **६. लङ्** – अमुण्डत् अमुण्डताम् अमुण्डन् । अमुण्डः अमुण्डतम् अमुण्डत । अमुण्डम् अमुण्डाव अमुण्डाम । **७. विधिलिङ्** – मुण्डेत् मुण्डेताम् मुण्डेयुः । मुण्डेः मुण्डेतम् मुण्डेत । मुण्डेयम् मुण्डेव मुण्डेम । **८. आशीर्लिङ्** – मुण्ड्यात् मुण्ड्यास्ताम् मुण्ड्यासुः । मुण्ड्याः मुण्ड्यास्तम् मुण्ड्यास्त । मुण्ड्यासम् मुण्ड्यास्व मुण्ड्यास्म । **९. लुङ्** – अमुण्डीत् अमुण्डिष्टाम् अमुण्डिषुः । अमुण्डीः अमुण्डिष्टम् अमुण्डिष्ट । अमुण्डिषम् अमुण्डिष्व अमुण्डिष्म ।**१०. लृङ्** – अमुण्डिष्यत् अमुण्डिष्यताम् अमुण्डिष्यन् । अमुण्डिष्यः अमुण्डिष्यतम् अमुण्डिष्यत । अमुण्डिष्यम् अमुण्डिष्याव अमुण्डिष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – मुण्डयति – ते, **सनि** – मुमुण्डिषति, **यकि** – मुण्ड्यते ।

३२७. **रुटि – स्तेये** । सकर्म, सेट्, परस्मै । 'रुठि' इति 'रुडि' इति च केचिदमुं पठन्ति ।

१. लट् – रुण्टति रुण्टतः रुण्टन्ति । रुण्टसि रुण्टथः रुण्टथ । रुण्टामि रुण्टावः रुण्टामः । **२. लिट्** – रुरुण्ट रुरुण्टतुः रुरुण्टुः । रुरुण्टिथ रुरुण्टथुः रुरुण्ट । रुरुण्ट रुरुण्टिव रुरुण्टिम । **३. लुट्** – रुण्टिता रुण्टितारौ रुण्टितारः । रुण्टितासि रुण्टितास्थः रुण्टितास्थ । रुण्टितास्मि रुण्टितास्वः रुण्टितास्मः । **४. लृट्** – रुण्टिष्यति रुण्टिष्यतः रुण्टिष्यन्ति । रुण्टिष्यसि रुण्टिष्यथः रुण्टिष्यथ । रुण्टिष्यामि रुण्टिष्यावः रुण्टिष्यामः । **५. लोट्** – रुण्टतु, रुण्टतात् रुण्टताम् रुण्टन्तु । रुण्ट, रुण्टतात् रुण्टतम् रुण्टत । रुण्टानि रुण्टाव रुण्टाम । **६. लङ्** – अरुण्टत् अरुण्टताम् अरुण्टन् । अरुण्टः अरुण्टतम् अरुण्टत । अरुण्टम् अरुण्टाव अरुण्टाम । **७. विधिलिङ्** – रुण्टेत् रुण्टेताम् रुण्टेयुः । रुण्टेः रुण्टेतम् रुण्टेत । रुण्टेयम् रुण्टेव रुण्टेम । **८. आशीर्लिङ्** – रुण्ट्यात् रुण्ट्यास्ताम् रुण्ट्यासुः । रुण्ट्याः रुण्ट्यास्तम् रुण्ट्यास्त । रुण्ट्यासम् रुण्ट्यास्व रुण्ट्यास्म । **९. लुङ्** – अरुण्टीत् अरुण्टिष्टाम् अरुण्टिषुः । अरुण्टीः अरुण्टिष्टम् अरुण्टिष्ट । अरुण्टिषम् अरुण्टिष्व अरुण्टिष्म । **१०. लृङ्** – अरुण्टिष्यत् अरुण्टिष्यताम् अरुण्टिष्यन् । अरुण्टिष्यः अरुण्टिष्यतम् अरुण्टिष्यत । अरुण्टिष्यम् अरुण्टिष्याव अरुण्टिष्याम ।

णिचि – रुण्टयति – ते, **सनि** – रुरुण्टिषति, **यकि** – रुण्ट्यते ।

३२८. **लुटि – स्तेये** । सकर्म, सेट्, परस्मै । 'लोटते प्रतिघातेऽर्थे स्तेये लुण्टति लुण्टयेत्' (श्लो.७४) इति देवः । 'लुठि' इत्येके इति तरङ्गिण्याम् । किन्तु पुरुषकारे, 'लुण्ठेति क्षीरस्वामी' इति उद्धृतम् । 'शाकटायनस्तु तृतीयान्तं (लुडि) पपाठ' इति माधवीय-धातुवृत्तिः । धातुकाव्येऽपि (२.६६) एवमेव ।

१. लट् – लुण्टति लुण्टतः लुण्टन्ति । लुण्टसि लुण्टथः लुण्टथ । लुण्टामि लुण्टावः लुण्टामः । **२. लिट्** – लुलुण्ट लुलुण्टतुः लुलुण्टुः । लुलुण्टिथ लुलुण्टथुः लुलुण्ट । लुलुण्ट लुलुण्टिव लुलुण्टिम । **३. लुट्** – लुण्टिता लुण्टितारौ लुण्टितारः । लुण्टितासि लुण्टितास्थः लुण्टितास्थ । लुण्टितास्मि लुण्टितास्वः लुण्टितास्मः । **४. लृट्** – लुण्टिष्यति लुण्टिष्यतः लुण्टिष्यन्ति । लुण्टिष्यसि लुण्टिष्यथः लुण्टिष्यथ । लुण्टिष्यामि लुण्टिष्यावः लुण्टिष्यामः । **५. लोट्** – लुण्टतु, लुण्टतात् लुण्टताम् लुण्टन्तु । लुण्ट, लुण्टतात् लुण्टतम् लुण्टत । लुण्टानि लुण्टाव लुण्टाम । **६. लङ्** – अलुण्टत् अलुण्टताम् अलुण्टन् । अलुण्टः अलुण्टतम् अलुण्टत । अलुण्टम् अलुण्टाव अलुण्टाम । **७. विधिलिङ्** – लुण्टेत् लुण्टेताम् लुण्टेयुः । लुण्टेः लुण्टेतम् लुण्टेत । लुण्टेयम् लुण्टेव लुण्टेम । **८. आशीर्लिङ्** – लुण्ट्यात् लुण्ट्यास्ताम् लुण्ट्यासुः । लुण्ट्याः लुण्ट्यास्तम् लुण्ट्यास्त । लुण्ट्यासम् लुण्ट्यास्व लुण्ट्यास्म । **९. लुङ्** – अलुण्टीत् अलुण्टिष्टाम् अलुण्टिषुः । अलुण्टीः अलुण्टिष्टम् अलुण्टिष्ट । अलुण्टिषम् अलुण्टिष्व अलुण्टिष्म । **१०. लृङ्** – अलुण्टिष्यत् अलुण्टिष्यताम् अलुण्टिष्यन् । अलुण्टिष्यः अलुण्टिष्यतम् अलुण्टिष्यत । अलुण्टिष्यम् अलुण्टिष्याव अलुण्टिष्याम ।

णिचि – लुण्टयति – ते, **सनि** – लुलुण्टिषति, **यकि** – लुण्ट्यते ।

३२९. **स्फुटिर् – विशरणे** । अकर्म, सेट्, परस्मै । 'स्फोटयेत् स्फोटतीति द्वे भेदे विशरणे क्रमात्' (श्लो.७१) इति देवः । 'अयं पाठो मैत्रेयादीनाम्' इति माधवः । 'स्फुट' इति चन्द्रः । 'विशरणे विकासे च' इति काशकृत्स्नः । 'स्फुटि इत्यपि केचित् – स्फुण्टति' इति कौमुदी ।

१. लट् – स्फोटति स्फोटतः स्फोटन्ति । स्फोटसि स्फोटथः स्फोटथ । स्फोटामि स्फोटावः स्फोटामः ।

२. लिट् – पुस्फोट पुस्फुटतुः पुस्फुटुः । पुस्फोटिथ पुस्फुटथुः पुस्फुट । पुस्फोट पुस्फुटिव पुस्फुटिम ।

३. लुट् – स्फोटिता स्फोटितारौ स्फोटितारः । स्फोटितासि स्फोटितास्थः स्फोटितास्थ । स्फोटितास्मि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्फोटितास्वः स्फोटितास्मः । **४. लृट्** – स्फोटिष्यति स्फोटिष्यतः स्फोटिष्यन्ति । स्फोटिष्यसि स्फोटिष्यथः स्फोटिष्यथ । स्फोटिष्यामि स्फोटिष्यावः स्फोटिष्यामः । **५. लोट्** – स्फोटतु, स्फोटतात् स्फोटताम् स्फोटन्तु । स्फोट, स्फोटतात् स्फोटतम् स्फोटत । स्फोटानि स्फोटाव स्फोटाम । **६. लङ्** – अस्फोटत् अस्फोटताम् अस्फोटन् । अस्फोटः अस्फोटतम् अस्फोटत । अस्फोटम् अस्फोटाव अस्फोटाम । **७. विधिलिङ्** – स्फोटेत् स्फोटेताम् स्फोटेयुः । स्फोटेः स्फोटेतम् स्फोटेत । स्फोटेयम् स्फोटेव स्फोटेम । **८. आशीर्लिङ्** – स्फुट्यात् स्फुट्यास्ताम् स्फुट्यासुः । स्फुट्याः स्फुट्यास्तम् स्फुट्यास्त । स्फुट्यासम् स्फुट्यास्व स्फुट्यास्म । **९. लुङ्** – (i) अस्फोटीत् अस्फोटिष्टाम् अस्फोटिषुः । अस्फोटीः अस्फोटिष्टम् अस्फोटिष्ट । अस्फोटिषम् अस्फोटिष्व अस्फोटिष्म । (ii) अस्फुटत्[1] अस्फुटताम् अस्फुटन् । अस्फुटः अस्फुटतम् अस्फुटत । अस्फुटम् अस्फुटाव अस्फुटाम । **१०. लृङ्** – अस्फोटिष्यत् अस्फोटिष्यताम् अस्फोटिष्यन् । अस्फोटिष्यः अस्फोटिष्यतम् अस्फोटिष्यत । अस्फोटिष्यम् अस्फोटिष्याव अस्फोटिष्याम ।

णिचि – स्फोटयति – ते, **सनि** – पुस्फुटिषति/पुस्फोटिषति, **यकि** – स्फुट्यते ।

१. 'इरितो वा' इति परस्मैपदेषु च्लेः अडादेशः विकल्पेन ।

३३०. पठ – व्यक्तायां वाचि । सकर्म, सेट्, परस्मै ।

१. लट् – पठति पठतः पठन्ति । पठसि पठथः पठथ । पठामि पठावः पठामः । **२. लिट्** – पपाठ पेठतुः पेठुः । पेठिथ पेठथुः पेठ । पपाठ, पपठ पेठिव पेठिम । **३. लुट्** – पठिता पठितारौ पठितारः । पठितासि पठितास्थः पठितास्थ । पठितास्मि पठितास्वः पठितास्मः । **४. लृट्** – पठिष्यति पठिष्यतः पठिष्यन्ति । पठिष्यसि पठिष्यथः पठिष्यथ । पठिष्यामि पठिष्यावः पठिष्यामः । **५. लोट्** – पठतु, पठतात् पठताम् पठन्तु । पठ, पठतात् पठतम् पठत । पठानि पठाव पठाम । **६. लङ्** – अपठत् अपठताम् अपठन् । अपठः अपठतम् अपठत । अपठम् अपठाव अपठाम । **७. विधिलिङ्** – पठेत् पठेताम् पठेयुः । पठेः पठेतम् पठेत । पठेयम् पठेव पठेम । **८. आशीर्लिङ्** – पठ्यात् पठ्यास्ताम् पठ्यासुः । पठ्याः पठ्यास्तम् पठ्यास्त । पठ्यासम् पठ्यास्व पठ्यास्म । **९. लुङ्** – (i) अपठीत्[1] अपठिष्टाम् अपठिषुः । अपठीः अपठिष्टम् अपठिष्ट । अपठिषम् अपठिष्व अपठिष्म । (ii) अपाठीत् अपाठिष्टाम् अपाठिषुः । अपाठीः अपाठिष्टम् अपाठिष्ट । अपाठिषम् अपाठिष्व अपाठिष्म । **१०. लृङ्** – अपठिष्यत् अपठिष्यताम् अपठिष्यन् । अपठिष्यः अपठिष्यतम् अपठिष्यत । अपठिष्यम् अपठिष्याव अपठिष्याम ।

णिचि – पाठयति – ते, **सनि** – पिपठिषति, **यकि** – पठ्यते ।

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३३१. वठ – स्थौल्ये । अकर्म, सेट्, परस्मै । स्थौल्यं स्थूलीभवनम् । 'वण्ठते त्वेकचर्यायां स्थौल्ये शपि वठेदिति' (श्लो.८३) इति देवः ।

१. लट् – वठति वठतः वठन्ति । वठसि वठथः वठथ । वठामि वठावः वठामः । **२. लिट्** – ववाठ ववठतुः ववठुः । ववठिथ ववठथुः ववठ । ववाठ, ववठ ववठिव ववठिम । **३. लुट्** – वठिता वठितारौ वठितारः । वठितासि वठितास्थः वठितास्थ । वठितास्मि वठितास्वः वठितास्मः । **४. लृट्** – वठिष्यति वठिष्यतः वठिष्यन्ति । वठिष्यसि वठिष्यथः वठिष्यथ । वठिष्यामि वठिष्यावः वठिष्यामः । **५. लोट्** – वठतु, वठतात् वठताम् वठन्तु । वठ, वठतात् वठतम् वठत । वठानि वठाव वठाम । **६. लङ्** – अवठत् अवठताम् अवठन् । अवठः अवठतम् अवठत । अवठम् अवठाव अवठाम । **७. विधिलिङ्** – वठेत् वठेताम् वठेयुः । वठेः वठेतम् वठेत । वठेयम् वठेव वठेम । **८. आशीर्लिङ्** – वठ्यात् वठ्यास्ताम् वठ्यासुः । वठ्याः वठ्यास्तम् वठ्यास्त । वठ्यासम् वठ्यास्व वठ्यास्म । **९. लुङ्** – (i) अवठीत्[1]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवठिष्टाम् अवठिषुः । अवठीः अवठिष्टम् अवठिष्ट । अवठिषम् अवठिष्व अवठिष्म । (ii) अवाठीत् अवाठिष्टाम् अवाठिषुः । अवाठीः अवाठिष्टम् अवाठिष्ट । अवाठिषम् अवाठिष्व अवाठिष्म । **१०. लृङ्** – अवठिष्यत् अवठिष्यताम् अवठिष्यन् । अवठिष्यः अवठिष्यतम् अवठिष्यत । अवठिष्यम् अवठिष्याव अवठिष्याम ।

णिचि – वाठयति – ते, **सनि** – विवठिषति, **यकि** – वठ्यते ।

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३३२. मठ – मदनिवासयोः । अकर्म, सेट्, परस्मै । 'मठ निवासे' इति काशकृत्स्नधातुपाठः इति क्षी. टीका । 'मण्ठते शपि शोकार्थे मठेन्मदनिवासयोः' (श्लो.८२) इति देवः ।

१. लट् – मठति मठतः मठन्ति । मठसि मठथः मठथ । मठामि मठावः मठामः । **२. लिट्** – ममाठ मेठतुः मेठुः । मेठिथ मेठथुः मेठ । ममाठ, ममठ मेठिव मेठिम । **३. लुट्** – मठिता मठितारौ मठितारः । मठितासि मठितास्थः मठितास्थ । मठितास्मि मठितास्वः मठितास्मः । **४. लृट्** – मठिष्यति मठिष्यतः मठिष्यन्ति । मठिष्यसि मठिष्यथः मठिष्यथ । मठिष्यामि मठिष्यावः मठिष्यामः । **५. लोट्** – मठतु, मठतात् मठताम् मठन्तु । मठ, मठतात् मठतम् मठत । मठानि मठाव मठाम । **६. लङ्** – अमठत् अमठताम् अमठन् । अमठः अमठतम् अमठत । अमठम् अमठाव अमठाम । **७. विधिलिङ्** – मठेत् मठेताम् मठेयुः । मठेः मठेतम् मठेत । मठेयम् मठेव मठेम । **८. आशीर्लिङ्** – मठ्यात् मठ्यास्ताम् मठ्यासुः । मठ्याः मठ्यास्तम् मठ्यास्त । मठ्यासम् मठ्यास्व मठ्यास्म । **९. लुङ्** – (i) अमठीत्[1] अमठिष्टाम् अमठिषुः । अमठीः अमठिष्टम् अमठिष्ट । अमठिषम् अमठिष्व अमठिष्म । (ii) अमाठीत् – अमाठिष्टाम् अमाठिषुः । अमाठीः अमाठिष्टम् अमाठिष्ट । अमाठिषम् अमाठिष्व अमाठिष्म । **१०. लृङ्** – अमठिष्यत् अमठिष्यताम् अमठिष्यन् । अमठिष्यः अमठिष्यतम् अमठिष्यत । अमठिष्यम् अमठिष्याव अमठिष्याम ।

णिचि – माठयति – ते, **सनि** – मिमठिषति, **यकि** – मठ्यते ।

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३३३. कठ – कृच्छ्रजीवने । अकर्म, सेट्, परस्मै । 'अथ कण्ठते । शोके यो कण्ठयेत् कण्ठेत् कठेत् स्यात् कृच्छ्रजीवने' (श्लो.७९) इति देवः ।

१. लट् – कठति कठतः कठन्ति । कठसि कठथः कठथ । कठामि कठावः कठामः । **२. लिट्** – चकाठ चकठतुः चकठुः । चकठिथ चकठथुः चकठ । चकाठ, चकठ चकठिव चकठिम । **३. लुट्** – कठिता कठितारौ कठितारः । कठितासि कठितास्थः कठितास्थ । कठितास्मि कठितास्वः कठितास्मः । **४. लृट्** – कठिष्यति कठिष्यतः कठिष्यन्ति । कठिष्यसि कठिष्यथः कठिष्यथ । कठिष्यामि कठिष्यावः कठिष्यामः । **५. लोट्** – कठतु, कठतात् कठताम् कठन्तु । कठ, कठतात् कठतम् कठत । कठानि कठाव कठाम । **६. लङ्** – अकठत् अकठताम् अकठन् । अकठः अकठतम् अकठत । अकठम् अकठाव अकठाम । **७. विधिलिङ्** – कठेत् कठेताम् कठेयुः । कठेः कठेतम् कठेत । कठेयम् कठेव कठेम । **८. आशीर्लिङ्** – कठ्यात् कठ्यास्ताम् कठ्यासुः । कठ्याः कठ्यास्तम् कठ्यास्त । कठ्यासम् कठ्यास्व कठ्यास्म । **९. लुङ्** – (i) अकठीत्[1] अकठिष्टाम् अकठिषुः । अकठीः अकठिष्टम् अकठिष्ट । अकठिषम् अकठिष्व अकठिष्म । (ii) अकाठीत् अकाठिष्टाम् अकाठिषुः । अकाठीः अकाठिष्टम् अकाठिष्ट । अकाठिषम् अकाठिष्व अकाठिष्म । **१०. लृङ्** – अकठिष्यत् अकठिष्यताम् अकठिष्यन् । अकठिष्यः अकठिष्यतम् अकठिष्यत । अकठिष्यम् अकठिष्याव अकठिष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि - काठयति - ते, **सनि** - चिकठिषति, **यकि** - कठ्यते ।

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३३४. रट - परिभाषणे । सकर्म, सेट्, परस्मै । कौमुद्यां तु 'रठ इत्येके' इति दृश्यते । 'रठ' इति मा.धा.वृत्तिः ।

१. लट् - रटति रटतः रटन्ति । रटसि रटथः रटथ । रटामि रटावः रटामः । **२. लिट्** - रराट रेटतुः रेटुः । ररटिथ रेटथुः रेट । रराट, ररट रेटिव रेटिम । **३. लुट्** - रटिता रटितारौ रटितारः । रटितासि रटितास्थः रटितास्थ । रटितास्मि रटितास्वः रटितास्मः । **४. लृट्** - रटिष्यति रटिष्यतः रटिष्यन्ति । रटिष्यसि रटिष्यथः रटिष्यथ । रटिष्यामि रटिष्यावः रटिष्यामः । **५. लोट्** - रटतु, रटतात् रटताम् रटन्तु । रट, रटतात् रटतम् रटत । रटानि रटाव रटाम । **६. लङ्** - अरटत् अरटताम् अरटन् । अरटः अरटतम् अरटत । अरटम् अरटाव अरटाम । **७. विधिलिङ्** - रटेत् रटेताम् रटेयुः । रटेः रटेतम् रटेत । रटेयम् रटेव रटेम । **८. आशीर्लिङ्** - रट्यात् रट्यास्ताम् रट्यासुः । रट्याः रट्यास्तम् रट्यास्त । रट्यासम् रट्यास्व रट्यास्म । **९. लुङ्** - (i) अरटीत्[1] अरटिष्टाम् अरटिषुः । अरटीः अरटिष्टम् अरटिष्ट । अरटिषम् अरटिष्व अरटिष्म । (ii) अराटीत् अराटिष्टाम् अराटिषुः । अराटीः अराटिष्टम् अराटिष्ट । अराटिषम् अराटिष्व अराटिष्म । **१०. लृङ्** - अरटिष्यत् अरटिष्यताम् अरटिष्यन् । अरटिष्यः अरटिष्यतम् अरटिष्यत । अरटिष्यम् अरटिष्याव अरटिष्याम ।

णिचि - राटयति - ते, **सनि** - रिरटिषति, **यकि** - रट्यते ।

१. 'अतो हलादेः...' इति वा वृद्धिः ।

३३५. हठ - प्लुतिशठत्वयोः । अकर्म, सेट्, परस्मै । 'बलात्कारे इत्येके' इति धातुकाव्यव्याख्या (१.४४) ।

१. लट् - हठति हठतः हठन्ति । हठसि हठथः हठथ । हठामि हठावः हठामः । **२. लिट्** - जहाठ जहठतुः जहठुः । जहठिथ जहठथुः जहठ । जहाठ, जहठ जहठिव जहठिम । **३. लुट्** - हठिता हठितारौ हठितारः । हठितासि हठितास्थः हठितास्थ । हठितास्मि हठितास्वः हठितास्मः । **४. लृट्** - हठिष्यति हठिष्यतः हठिष्यन्ति । हठिष्यसि हठिष्यथः हठिष्यथ । हठिष्यामि हठिष्यावः हठिष्यामः । **५. लोट्** - हठतु, हठतात् हठताम् हठन्तु । हठ, हठतात् हठतम् हठत । हठानि हठाव हठाम । **६. लङ्** - अहठत् अहठताम् अहठन् । अहठः अहठतम् अहठत । अहठम् अहठाव अहठाम । **७. विधिलिङ्** - हठेत् हठेताम् हठेयुः । हठेः हठेतम् हठेत । हठेयम् हठेव हठेम । **८. आशीर्लिङ्** - हठ्यात् हठ्यास्ताम् हठ्यासुः । हठ्याः हठ्यास्तम् हठ्यास्त । हठ्यासम् हठ्यास्व हठ्यास्म । **९. लुङ्** - (i) अहठीत्[1] अहठिष्टाम् अहठिषुः । अहठीः अहठिष्टम् अहठिष्ट । अहठिषम् अहठिष्व अहठिष्म । (ii) अहाठीत् अहाठिष्टाम् अहाठिषुः । अहाठीः अहाठिष्टम् अहाठिष्ट । अहाठिषम् अहाठिष्व अहाठिष्म । **१०. लृङ्** - अहठिष्यत् अहठिष्यताम् अहठिष्यन् । अहठिष्यः अहठिष्यतम् अहठिष्यत । अहठिष्यम् अहठिष्याव अहठिष्याम ।

णिचि - हाठयति - ते, **सनि** - जिहठिषति, **यकि** - हठ्यते ।

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३३६. रुठ - उपघाते । सकर्म, सेट्, परस्मै । 'रुण्ठतीति गतौ, 'रोठेदुपघाते' (श्लो.७९) इति देवः । 'अश्मा लुलुठिषते' इति भाष्यं व्याचक्षाणः कैयटस्तु (३.१.७) 'रुठ लुठ प्रतीघाते' इति पाठम् आदृतवान् ।

१. लट् - रोठति रोठतः रोठन्ति । रोठसि रोठथः रोठथ । रोठामि रोठावः रोठामः । **२. लिट्** - रुरोठ रुरुठतुः रुरुठुः । रुरुठिथ रुरुठथुः रुरुठ । रुरोठ, रुरुठिव रुरुठिम । **३. लुट्** - रोठिता रोठितारौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रोठितारः । रोठितासि रोठितास्थः रोठितास्थ । रोठितास्मि रोठितास्वः रोठितास्मः । **४. लृट्** - रोठिष्यति रोठिष्यतः रोठिष्यन्ति । रोठिष्यसि रोठिष्यथः रोठिष्यथ । रोठिष्यामि रोठिष्यावः रोठिष्यामः । **५. लोट्** - रोठतु, रोठतात् रोठताम् रोठन्तु । रोठ, रोठतात् रोठतम् रोठत । रोठानि रोठाव रोठाम । **६. लङ्** - अरोठत् अरोठताम् अरोठन् । अरोठः अरोठतम् अरोठत । अरोठम् अरोठाव अरोठाम । **७. विधिलिङ्** - रोठेत् रोठेताम् रोठेयुः । रोठेः रोठेतम् रोठेत । रोठेयम् रोठेव रोठेम । **८. आशीर्लिङ्** - रोठ्यात् रोठ्यास्ताम् रोठ्यासुः । रोठ्याः रोठ्यास्तम् रोठ्यास्त । रोठ्यासम् रोठ्यास्व रोठ्यास्म । **९. लुङ्** - अरोठीत् अरोठिष्टाम् अरोठिषुः । अरोठीः अरोठिष्टम् अरोठिष्ट । अरोठिषम् अरोठिष्व अरोठिष्म । **१०. लृङ्** - अरोठिष्यत् अरोठिष्यताम् अरोठिष्यन् । अरोठिष्यः अरोठिष्यतम् अरोठिष्यत । अरोठिष्यम् अरोठिष्याव अरोठिष्याम ।

णिचि - रोठयति - ते, **सनि** - रुरुठिषति/रुरोठिषति, **यकि** - रोठ्यते ।

३३७. लुठ - उपघाते । सकर्म, सेट्, परस्मै । 'श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् । लुण्ठेत्, लोठति लोठेत किन्तु गत्यां च लुण्ठति' (श्लो.७८) इति देवः । 'अत्र मैत्रेयः 'उठेत्यप्येके' इति (लुण्ड इत्येके इति च) धनपालशाकटायनौ रुठ-लुठेत्येव पेठतुः । क्षीरस्वामी तु उठिं पठित्वा 'रुठ लुठ इत्यपि दौर्गाः इत्याह' इति माधवीयधातुवृत्तिः ।

१. लट् - लोठति लोठतः लोठन्ति । लोठसि लोठथः लोठथ । लोठामि लोठावः लोठामः । **२. लिट्** - लुलोठ लुलुठतुः लुलुठुः । लुलुठिथ लुलुठथुः लुलुठ । लुलोठ लुलुठिव लुलुठिम । **३. लुट्** - लोठिता लोठितारौ लोठितारः । लोठितासि लोठितास्थः लोठितास्थ । लोठितास्मि लोठितास्वः लोठितास्मः । **४. लृट्** - लोठिष्यति लोठिष्यतः लोठिष्यन्ति । लोठिष्यसि लोठिष्यथः लोठिष्यथ । लोठिष्यामि लोठिष्यावः लोठिष्यामः । **५. लोट्** - लोठतु, लोठतात् लोठताम् लोठन्तु । लोठ, लोठतात् लोठतम् लोठत । लोठानि लोठाव लोठाम । **६. लङ्** - अलोठत् अलोठताम् अलोठन् । अलोठः अलोठतम् अलोठत । अलोठम् अलोठाव अलोठाम । **७. विधिलिङ्** - लोठेत् लोठेताम् लोठेयुः । लोठेः लोठेतम् लोठेत । लोठेयम् लोठेव लोठेम । **८. आशीर्लिङ्** - लुठ्यात् लुठ्यास्ताम् लुठ्यासुः । लुठ्याः लुठ्यास्तम् लुठ्यास्त । लुठ्यासम् लुठ्यास्व लुठ्यास्म । **९. लुङ्** - अलोठीत् अलोठिष्टाम् अलोठिषुः । अलोठीः अलोठिष्टम् अलोठिष्ट । अलोठिषम् अलोठिष्व अलोठिष्म । **१०. लृङ्** - अलोठिष्यत् अलोठिष्यताम् अलोठिष्यन् । अलोठिष्यः अलोठिष्यतम् अलोठिष्यत । अलोठिष्यम् अलोठिष्याव अलोठिष्याम ।

णिचि - लोठयति - ते, **सनि** - लुलुठिषति/लुलोठिषति, यकि - लोठ्यते ।

३३८. उठ - उपघाते । सक., सेट्, परस्मै । 'ऊठ इत्येके, ऊठति' इति कौमुदी ।

१. लट् - ओठति ओठतः ओठन्ति । ओठसि ओठथः ओठथ । ओठामि ओठावः ओठामः । **२. लिट्** - उवोठ ऊठतुः ऊठुः । उवोठिथ ऊठथुः ऊठ । उवोठ ऊठिव ऊठिम । **३. लुट्** - ओठिता ओठितारौ ओठितारः । ओठितासि ओठितास्थः ओठितास्थ । ओठितास्मि ओठितास्वः ओठितास्मः । **४. लृट्** - ओठिष्यति ओठिष्यतः ओठिष्यन्ति । ओठिष्यसि ओठिष्यथः ओठिष्यथ । ओठिष्यामि ओठिष्यावः ओठिष्यामः । **५. लोट्** - ओठतु, ओठतात् ओठताम् ओठन्तु । ओठ, ओठतात् ओठतम् ओठत । ओठानि ओठाव ओठाम । **६. लङ्** - औठत् औठताम् औठन् । औठः औठतम् औठत । औठम् औठाव औठाम । **७. विधिलिङ्** - ओठेत् ओठेताम् ओठेयुः । ओठेः ओठेतम् ओठेत । ओठेयम् ओठेव ओठेम । **८. आशीर्लिङ्** - उठ्यात् उठ्यास्ताम् उठ्यासुः । उठ्याः उठ्यास्तम् उठ्यास्त ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उठ्यासम् उठ्यास्व उठ्यास्म । **९. लुङ्** – औठीत् औठिष्टाम् औठिषुः । औठीः औठिष्टम् औठिष्ट । औठिषम् औठिष्व औठिष्म । **१०. लृङ्** – औठिष्यत् औठिष्यताम् औठिष्यन् । औठिष्यः औठिष्यतम् औठिष्यत । औठिष्यम् औठिष्याव औठिष्याम ।

णिचि – ओठयति – ते, **सनि** – ओटिठिषति, **यकि** – उठ्यते ।

३३९. पिठ – हिंसासङ्क्लेशनयोः । सकर्म, सेट्, परस्मै ।

१. लट् – पेठति पेठतः पेठन्ति । पेठसि पेठथः पेठथ । पेठामि पेठावः पेठामः । **२. लिट्** – पिपेठ पिपिठतुः पिपिठुः । पिपेठिथ पिपिठथुः पिपिठ । पिपेठ पिपिठिव पिपिठिम । **३. लुट्** – पेठिता पेठितारौ पेठितारः । पेठितासि पेठितास्थः पेठितास्थ । पेठितास्मि पेठितास्वः पेठितास्मः । **४. लृट्** – पेठिष्यति पेठिष्यतः पेठिष्यन्ति । पेठिष्यसि पेठिष्यथः पेठिष्यथ । पेठिष्यामि पेठिष्यावः पेठिष्यामः । **५. लोट्** – पेठतु, पेठतात् पेठताम् पेठन्तु । पेठ, पेठतात् पेठतम् पेठत । पेठानि पेठाव पेठाम । **६. लङ्** – अपेठत् अपेठताम् अपेठन् । अपेठः अपेठतम् अपेठत । अपेठम् अपेठाव अपेठाम । **७. विधिलिङ्** – पेठेत् पेठेताम् पेठेयुः । पेठेः पेठेतम् पेठेत । पेठेयम् पेठेव पेठेम । **८. आशीर्लिङ्** – पिठ्यात् पिठ्यास्ताम् पिठ्यासुः । पिठ्याः पिठ्यास्तम् पिठ्यास्त । पिठ्यासम् पिठ्यास्व पिठ्यास्म । **९. लुङ्** – अपेठीत् अपेठिष्टाम् अपेठिषुः । अपेठीः अपेठिष्टम् अपेठिष्ट । अपेठिषम् अपेठिष्व अपेठिष्म । **१०. लृङ्** – अपेठिष्यत् अपेठिष्यताम् अपेठिष्यन् । अपेठिष्यः अपेठिष्यतम् अपेठिष्यत । अपेठिष्यम् अपेठिष्याव अपेठिष्याम ।

णिचि – पेठयति – ते, **सनि** – पिपिठिषति/पिपेठिषति, **यकि** – पिठ्यते ।

३४०. शठ – कैतवे । सकर्म, सेट्, परस्मै । चकारात् 'हिंसासङ्क्लेशनयोः' इत्युक्तावर्थौ गृह्येते । पुरुषकारे धातुवृत्तौ चापि एवमेव । क्षीरस्वामि-शाकटायनादयः पुनश्चकारं नैव पठन्ति । काशकृत्स्नधातुपाठे तु 'कैतवे च द्यूते स्पर्धायां च' इति दृश्यते । 'हिंसायां कैतवे च' इति चन्द्रः । 'वधक्लेशकैतवे' इति वोपदेवः । 'कैतवे शठतीति स्यात् श्लाघायां शाठयेत णौ' (श्लो.८२) इति देवः ।

१. लट् – शठति शठतः शठन्ति । शठसि शठथः शठथ । शठामि शठावः शठामः । **२. लिट्** – शशाठ शेठतुः शेठुः । शेठिथ शेठथुः शेठ । शशाठ, शशठ शेठिव शेठिम । **३. लुट्** – शठिता शठितारौ शठितारः । शठितासि शठितास्थः शठितास्थ । शठितास्मि शठितास्वः शठितास्मः । **४. लृट्** – शठिष्यति शठिष्यतः शठिष्यन्ति । शठिष्यसि शठिष्यथः शठिष्यथ । शठिष्यामि शठिष्यावः शठिष्यामः । **५. लोट्** – शठतु, शठतात् शठताम् शठन्तु । शठ, शठतात् शठतम् शठत । शठानि शठाव शठाम । **६. लङ्** – अशठत् अशठताम् अशठन् । अशठः अशठतम् अशठत । अशठम् अशठाव अशठाम । **७. विधिलिङ्** – शठेत् शठेताम् शठेयुः । शठेः शठेतम् शठेत । शठेयम् शठेव शठेम । **८. आशीर्लिङ्** – शठ्यात् शठ्यास्ताम् शठ्यासुः । शठ्याः शठ्यास्तम् शठ्यास्त । शठ्यासम् शठ्यास्व शठ्यास्म । **९. लुङ्** – (i) अशठीत्[1] अशठिष्टाम् अशठिषुः । अशठीः अशठिष्टम् अशठिष्ट । अशठिषम् अशठिष्व अशठिष्म । (ii) अशाठीत् अशाठिष्टाम् अशाठिषुः । अशाठीः अशाठिष्टम् अशाठिष्ट । अशाठिषम् अशाठिष्व अशाठिष्म । **१०. लृङ्** – अशठिष्यत् अशठिष्यताम् अशठिष्यन् । अशठिष्यः अशठिष्यतम् अशठिष्यत । अशठिष्यम् अशठिष्याव अशठिष्याम ।

णिचि – शाठयति – ते, **सनि** – शिशठिषति, **यकि** – शठ्यते ।

१. 'अतो हलादेः...' इति वा वृद्धिः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३४१. शुठ – प्रतिघाते । सकर्म, सेट्, परस्मै । 'गतिप्रतिहतौ शोठति, आलस्ये शोठयेदिति' (श्लो.८०) इति देवः । 'प्रतिघाते' इत्येव धनपालः । 'शुठ' इति क्षीरस्वामी इति पुरुषकारे उक्तम् । क्षीरतरङ्गिण्यां तु 'शुठि' इत्येव दृश्यते ।

१. लट् – शोठति शोठतः शोठन्ति । शोठसि शोठथः शोठथ । शोठामि शोठावः शोठामः । **२. लिट्** – शुशोठ शुशुठतुः शुशुठुः । शुशुठिथ शुशुठथुः शुशुठ । शुशोठ शुशुठिव शुशुठिम । **३. लुट्** – शोठिता शोठितारौ शोठितारः । शोठितासि शोठितास्थः शोठितास्थ । शोठितास्मि शोठितास्वः शोठितास्मः । **४. लृट्** – शोठिष्यति शोठिष्यतः शोठिष्यन्ति । शोठिष्यसि शोठिष्यथः शोठिष्यथ । शोठिष्यामि शोठिष्यावः शोठिष्यामः । **५. लोट्** – शोठतु, शोठतात् शोठताम् शोठन्तु । शोठ, शोठतात् शोठतम् शोठत । शोठानि शोठाव शोठाम । **६. लङ्** – अशोठत् अशोठताम् अशोठन् । अशोठः अशोठतम् अशोठत । अशोठम् अशोठाव अशोठाम । **७. विधिलिङ्** – शोठेत् शोठेताम् शोठेयुः । शोठेः शोठेतम् शोठेत । शोठेयम् शोठेव शोठेम । **८. आशीर्लिङ्** – शुठ्यात् शुठ्यास्ताम् शुठ्यासुः । शुठ्याः शुठ्यास्तम् शुठ्यास्त । शुठ्यासम् शुठ्यास्व शुठ्यास्म । **९. लुङ्** – अशोठीत् अशोठिष्टाम् अशोठिषुः । अशोठीः अशोठिष्टम् अशोठिष्ट । अशोठिषम् अशोठिष्व अशोठिष्म । **१०. लृङ्** – अशोठिष्यत् अशोठिष्यताम् अशोठिष्यन् । अशोठिष्यः अशोठिष्यतम् अशोठिष्यत । अशोठिष्यम् अशोठिष्याव अशोठिष्याम ।

णिचि – शोठयति – ते, **सनि** – शुशुठिषति/शुशोठिषति, **यकि** – शुठ्यते ।

३४२. कुठि – प्रतिघाते । सकर्म, सेट्, परस्मै । 'श्लेषालस्योपघातेषु प्रतिघाते क्रमाल्लुठेत् । लुण्ठेत्, लोठति लोठेत किन्तु गत्यां च लुण्ठति' (श्लो.७८) इति देवः । अत्र क्षीरतरङ्गिण्यां 'रुठि आलस्ये गतिप्रतिघाते च' इत्येव दृश्यते । अन्यत्र सर्वेषु कोशेषु 'लुठि' इत्येव दृश्यते ।

१. लट् – कुण्ठति कुण्ठतः कुण्ठन्ति । कुण्ठसि कुण्ठथः कुण्ठथ । कुण्ठामि कुण्ठावः कुण्ठामः । **२. लिट्** – चुकुण्ठ चुकुण्ठतुः चुकुण्ठुः । चुकुण्ठिथ चुकुण्ठथुः चुकुण्ठ । चुकुण्ठ चुकुण्ठिव चुकुण्ठिम । **३. लुट्** – कुण्ठिता कुण्ठितारौ कुण्ठितारः । कुण्ठितासि कुण्ठितास्थः कुण्ठितास्थ । कुण्ठितास्मि कुण्ठितास्वः कुण्ठितास्मः । **४. लृट्** – कुण्ठिष्यति कुण्ठिष्यतः कुण्ठिष्यन्ति । कुण्ठिष्यसि कुण्ठिष्यथः कुण्ठिष्यथ । कुण्ठिष्यामि कुण्ठिष्यावः कुण्ठिष्यामः । **५. लोट्** – कुण्ठतु, कुण्ठतात् कुण्ठताम् कुण्ठन्तु । कुण्ठ, कुण्ठतात् कुण्ठतम् कुण्ठत । कुण्ठानि कुण्ठाव कुण्ठाम । **६. लङ्** – अकुण्ठत् अकुण्ठताम् अकुण्ठन् । अकुण्ठः अकुण्ठतम् अकुण्ठत । अकुण्ठम् अकुण्ठाव अकुण्ठाम । **७. विधिलिङ्** – कुण्ठेत् कुण्ठेताम् कुण्ठेयुः । कुण्ठेः कुण्ठेतम् कुण्ठेत । कुण्ठेयम् कुण्ठेव कुण्ठेम । **८. आशीर्लिङ्** – कुण्ठ्यात् कुण्ठ्यास्ताम् कुण्ठ्यासुः । कुण्ठ्याः कुण्ठ्यास्तम् कुण्ठ्यास्त । कुण्ठ्यासम् कुण्ठ्यास्व कुण्ठ्यास्म । **९. लुङ्** – अकुण्ठीत् अकुण्ठिष्टाम् अकुण्ठिषुः । अकुण्ठीः अकुण्ठिष्टम् अकुण्ठिष्ट । अकुण्ठिषम् अकुण्ठिष्व अकुण्ठिष्म । **१०. लृङ्** – अकुण्ठिष्यत् अकुण्ठिष्यताम् अकुण्ठिष्यन् । अकुण्ठिष्यः अकुण्ठिष्यतम् अकुण्ठिष्यत । अकुण्ठिष्यम् अकुण्ठिष्याव अकुण्ठिष्याम ।

णिचि – कुण्ठयति – ते, **सनि** – चुकुण्ठिषति, **यकि** – कुण्ठ्यते

३४३. लुठि – आलस्ये प्रतिघाते च । सकर्म, सेट्, परस्मै । 'शुण्ठयेत् शुण्ठतीत्येवं शोषणे णौ शपि क्रमात्' (श्लो.८०) इति देवः ।

१. लट् – लुण्ठति लुण्ठतः लुण्ठन्ति । लुण्ठसि लुण्ठथः लुण्ठथ । लुण्ठामि लुण्ठावः लुण्ठामः । **२. लिट्** – लुलुण्ठ लुलुण्ठतुः लुलुण्ठुः । लुलुण्ठिथ लुलुण्ठथुः लुलुण्ठ । लुलुण्ठ लुलुण्ठिव लुलुण्ठिम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. लुट् – लुण्ठिता लुण्ठितारौ लुण्ठितारः । लुण्ठितासि लुण्ठितास्थः लुण्ठितास्थ । लुण्ठितास्मि लुण्ठितास्वः लुण्ठितास्मः । **४. लृट्** – लुण्ठिष्यति लुण्ठिष्यतः लुण्ठिष्यन्ति । लुण्ठिष्यसि लुण्ठिष्यथः लुण्ठिष्यथ । लुण्ठिष्यामि लुण्ठिष्यावः लुण्ठिष्यामः । **५. लोट्** – लुण्ठतु, लुण्ठतात् लुण्ठताम् लुण्ठन्तु । लुण्ठ, लुण्ठतात् लुण्ठतम् लुण्ठत । लुण्ठानि लुण्ठाव लुण्ठाम । **६. लङ्** – अलुण्ठत् अलुण्ठताम् अलुण्ठन् । अलुण्ठः अलुण्ठतम् अलुण्ठत । अलुण्ठम् अलुण्ठाव अलुण्ठाम । **७. विधिलिङ्** – लुण्ठेत् लुण्ठेताम् लुण्ठेयुः । लुण्ठेः लुण्ठेतम् लुण्ठेत । लुण्ठेयम् लुण्ठेव लुण्ठेम । **८. आशीर्लिङ्** – लुण्ठ्यात् लुण्ठ्यास्ताम् लुण्ठ्यासुः । लुण्ठ्याः लुण्ठ्यास्तम् लुण्ठ्यास्त । लुण्ठ्यासम् लुण्ठ्यास्व लुण्ठ्यास्म । **९. लुङ्** – अलुण्ठीत् अलुण्ठिष्टाम् अलुण्ठिषुः । अलुण्ठीः अलुण्ठिष्टम् अलुण्ठिष्ट । अलुण्ठिषम् अलुण्ठिष्व अलुण्ठिष्म । **१०. लृङ्** – अलुण्ठिष्यत् अलुण्ठिष्यताम् अलुण्ठिष्यन् । अलुण्ठिष्यः अलुण्ठिष्यतम् अलुण्ठिष्यत । अलुण्ठिष्यम् अलुण्ठिष्याव अलुण्ठिष्याम ।

णिचि – लुण्ठयति – ते, **सनि** – लुलुण्ठिषति, **यङि** – लुण्ठ्यते ।

३४४. शुठि – शोषणे । सकर्म, सेट्, परस्मै । 'शुण्ठयेत् शुण्ठतीत्येवं शोषणे णौ शपि क्रमात्' (श्लो.८०) इति देवः ।

१. लट् – शुण्ठति शुण्ठतः शुण्ठन्ति । शुण्ठसि शुण्ठथः शुण्ठथ । शुण्ठामि शुण्ठावः शुण्ठामः । **२. लिट्** – शुशुण्ठ शुशुण्ठतुः शुशुण्ठुः । शुशुण्ठिथ शुशुण्ठथुः शुशुण्ठ । शुशुण्ठ शुशुण्ठिव शुशुण्ठिम । **३. लुट्** – शुण्ठिता शुण्ठितारौ शुण्ठितारः । शुण्ठितासि शुण्ठितास्थः शुण्ठितास्थ । शुण्ठितास्मि शुण्ठितास्वः शुण्ठितास्मः । **४. लृट्** – शुण्ठिष्यति शुण्ठिष्यतः शुण्ठिष्यन्ति । शुण्ठिष्यसि शुण्ठिष्यथः शुण्ठिष्यथ । शुण्ठिष्यामि शुण्ठिष्यावः शुण्ठिष्यामः । **५. लोट्** – शुण्ठतु, शुण्ठतात् शुण्ठताम् शुण्ठन्तु । शुण्ठ, शुण्ठतात् शुण्ठतम् शुण्ठत । शुण्ठानि शुण्ठाव शुण्ठाम । **६. लङ्** – अशुण्ठत् अशुण्ठताम् अशुण्ठन् । अशुण्ठः अशुण्ठतम् अशुण्ठत । अशुण्ठम् अशुण्ठाव अशुण्ठाम । **७. विधिलिङ्** – शुण्ठेत् शुण्ठेताम् शुण्ठेयुः । शुण्ठेः शुण्ठेतम् शुण्ठेत । शुण्ठेयम् शुण्ठेव शुण्ठेम । **८. आशीर्लिङ्** – शुण्ठ्यात् शुण्ठ्यास्ताम् शुण्ठ्यासुः । शुण्ठ्याः शुण्ठ्यास्तम् शुण्ठ्यास्त । शुण्ठ्यासम् शुण्ठ्यास्व शुण्ठ्यास्म । **९. लुङ्** – अशुण्ठीत् अशुण्ठिष्टाम् अशुण्ठिषुः । अशुण्ठीः अशुण्ठिष्टम् अशुण्ठिष्ट । अशुण्ठिषम् अशुण्ठिष्व अशुण्ठिष्म । **१०. लृङ्** – अशुण्ठिष्यत् अशुण्ठिष्यताम् अशुण्ठिष्यन् । अशुण्ठिष्यः अशुण्ठिष्यतम् अशुण्ठिष्यत । अशुण्ठिष्यम् अशुण्ठिष्याव अशुण्ठिष्याम ।

णिचि – शुण्ठयति – ते, **सनि** – शुशुण्ठिषति, **यङि** – शुण्ठ्यते ।

३४५. रुठि – गतौ । सकर्म, सेट्, परस्मै । 'रुण्ठतीति गतौ रोठेदुपघाते' (श्लो.७९) इति देवः । 'आलस्ये गतिप्रतिघाते च' इति क्षीरस्वामी ।

१. लट् – रुण्ठति रुण्ठतः रुण्ठन्ति । रुण्ठसि रुण्ठथः रुण्ठथ । रुण्ठामि रुण्ठावः रुण्ठामः । **२. लिट्** – रुरुण्ठ रुरुण्ठतुः रुरुण्ठुः । रुरुण्ठिथ रुरुण्ठथुः रुरुण्ठ । रुरुण्ठ रुरुण्ठिव रुरुण्ठिम । **३. लुट्** – रुण्ठिता रुण्ठितारौ रुण्ठितारः । रुण्ठितासि रुण्ठितास्थः रुण्ठितास्थ । रुण्ठितास्मि रुण्ठितास्वः रुण्ठितास्मः । **४. लृट्** – रुण्ठिष्यति रुण्ठिष्यतः रुण्ठिष्यन्ति । रुण्ठिष्यसि रुण्ठिष्यथः रुण्ठिष्यथ । रुण्ठिष्यामि रुण्ठिष्यावः रुण्ठिष्यामः । **५. लोट्** – रुण्ठतु, रुण्ठतात् रुण्ठताम् रुण्ठन्तु । रुण्ठ, रुण्ठतात् रुण्ठतम् रुण्ठत । रुण्ठानि रुण्ठाव रुण्ठाम । **६. लङ्** – अरुण्ठत् अरुण्ठताम् अरुण्ठन् । अरुण्ठः अरुण्ठतम् अरुण्ठत । अरुण्ठम् अरुण्ठाव अरुण्ठाम । **७. विधिलिङ्** – रुण्ठेत् रुण्ठेताम् रुण्ठेयुः । रुण्ठेः रुण्ठेतम् रुण्ठेत । रुण्ठेयम् रुण्ठेव रुण्ठेम । **८. आशीर्लिङ्** – रुण्ठ्यात् रुण्ठ्यास्ताम् रुण्ठ्यासुः । रुण्ठ्याः रुण्ठ्यास्तम् रुण्ठ्यास्त । रुण्ठ्यासम् रुण्ठ्यास्व रुण्ठ्यास्म । **९. लुङ्** – अरुण्ठीत् अरुण्ठिष्टाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अरुण्ठिषुः । अरुण्ठीः अरुण्ठिष्टम् अरुण्ठिष्ट । अरुण्ठिषम् अरुण्ठिष्व अरुण्ठिष्म । **१०. लृङ्** - अरुण्ठिष्यत् अरुण्ठिष्यताम् अरुण्ठिष्यन् । अरुण्ठिष्यः अरुण्ठिष्यतम् अरुण्ठिष्यत । अरुण्ठिष्यम् अरुण्ठिष्याव अरुण्ठिष्याम ।

णिचि - रुण्ठयति - ते, **सनि** - रुरुण्ठिषति, **यकि** - रुण्ठ्यते

३४६. लुठि - गतौ । सकर्म, सेट्, परस्मै । '....गत्यां च लुण्ठति' (श्लो.७८) इति देवः ।

१. लट् - लुण्ठति लुण्ठतः लुण्ठन्ति । लुण्ठसि लुण्ठथः लुण्ठथ । लुण्ठामि लुण्ठावः लुण्ठामः । **२. लिट्** - लुलुण्ठ लुलुण्ठतुः लुलुण्ठुः । लुलुण्ठिथ लुलुण्ठथुः लुलुण्ठ । लुलुण्ठ लुलुण्ठिव लुलुण्ठिम । **३. लुट्** - लुण्ठिता लुण्ठितारौ लुण्ठितारः । लुण्ठितासि लुण्ठितास्थः लुण्ठितास्थ । लुण्ठितास्मि लुण्ठितास्वः लुण्ठितास्मः । **४. लृट्** - लुण्ठिष्यति लुण्ठिष्यतः लुण्ठिष्यन्ति । लुण्ठिष्यसि लुण्ठिष्यथः लुण्ठिष्यथ । लुण्ठिष्यामि लुण्ठिष्यावः लुण्ठिष्यामः । **५. लोट्** - लुण्ठतु, लुण्ठतात् लुण्ठताम् लुण्ठन्तु । लुण्ठ, लुण्ठतात् लुण्ठतम् लुण्ठत । लुण्ठानि लुण्ठाव लुण्ठाम । **६. लङ्** - अलुण्ठत् अलुण्ठताम् अलुण्ठन् । अलुण्ठः अलुण्ठतम् अलुण्ठत । अलुण्ठम् अलुण्ठाव अलुण्ठाम । **७. विधिलिङ्** - लुण्ठेत् लुण्ठेताम् लुण्ठेयुः । लुण्ठेः लुण्ठेतम् लुण्ठेत । लुण्ठेयम् लुण्ठेव लुण्ठेम । **८. आशीर्लिङ्** - लुण्ठ्यात् लुण्ठ्यास्ताम् लुण्ठ्यासुः । लुण्ठ्याः लुण्ठ्यास्तम् लुण्ठ्यास्त । लुण्ठ्यासम् लुण्ठ्यास्व लुण्ठ्यास्म । **९. लुङ्** - अलुण्ठीत् अलुण्ठिष्टाम् अलुण्ठिषुः । अलुण्ठीः अलुण्ठिष्टम् अलुण्ठिष्ट । अलुण्ठिषम् अलुण्ठिष्व अलुण्ठिष्म । **१०. लृङ्** - अलुण्ठिष्यत् अलुण्ठिष्यताम् अलुण्ठिष्यन् । अलुण्ठिष्यः अलुण्ठिष्यतम् अलुण्ठिष्यत । अलुण्ठिष्यम् अलुण्ठिष्याव अलुण्ठिष्याम ।

णिचि - लुण्ठयति - ते, **सनि** - लुलुण्ठिषति, **यकि** - लुण्ठ्यते

३४७. चुड्ड - भावकरणे । अकर्म, सेट्, परस्मै । दोपधोऽयं धातुः । भावकरणम् = अभिप्रायाविष्करणम् ।

१. लट् - चुड्डति चुड्डतः चुड्डन्ति । चुड्डसि चुड्डथः चुड्डथ । चुड्डामि चुड्डावः चुड्डामः । **२. लिट्** - चुचुड्ड चुचुड्डतुः चुचुड्डुः । चुचुड्डिथ चुचुड्डथुः चुचुड्ड । चुचुड्ड चुचुड्डिव चुचुड्डिम । **३. लुट्** - चुड्डिता चुड्डितारौ चुड्डितारः । चुड्डितासि चुड्डितास्थः चुड्डितास्थ । चुड्डितास्मि चुड्डितास्वः चुड्डितास्मः । **४. लृट्** - चुड्डिष्यति चुड्डिष्यतः चुड्डिष्यन्ति । चुड्डिष्यसि चुड्डिष्यथः चुड्डिष्यथ । चुड्डिष्यामि चुड्डिष्यावः चुड्डिष्यामः । **५. लोट्** - चुड्डतु, चुड्डतात् चुड्डताम् चुड्डन्तु । चुड्ड, चुड्डतात् चुड्डतम् चुड्डत । चुड्डानि चुड्डाव चुड्डाम । **६. लङ्** - अचुड्डत् अचुड्डताम् अचुड्डन् । अचुड्डः अचुड्डतम् अचुड्डत । अचुड्डम् अचुड्डाव अचुड्डाम । **७. विधिलिङ्** - चुड्डेत् चुड्डेताम् चुड्डेयुः । चुड्डेः चुड्डेतम् चुड्डेत । चुड्डेयम् चुड्डेव चुड्डेम । **८. आशीर्लिङ्** - चुड्ड्यात् चुड्ड्यास्ताम् चुड्ड्यासुः । चुड्ड्याः चुड्ड्यास्तम् चुड्ड्यास्त । चुड्ड्यासम् चुड्ड्यास्व चुड्ड्यास्म । **९. लुङ्** - अचुड्डीत् अचुड्डिष्टाम् अचुड्डिषुः । अचुड्डीः अचुड्डिष्टम् अचुड्डिष्ट । अचुड्डिषम् अचुड्डिष्व अचुड्डिष्म । **१०. लृङ्** - अचुड्डिष्यत् अचुड्डिष्यताम् अचुड्डिष्यन् । अचुड्डिष्यः अचुड्डिष्यतम् अचुड्डिष्यत । अचुड्डिष्यम् अचुड्डिष्याव अचुड्डिष्याम ।

णिचि - चुड्डयति - ते, **सनि** - चुचुड्डिषति, **यकि** - चुड्ड्यते

३४८. अड्ड - अभियोगे । सकर्म, सेट्, परस्मै । अभियोगः = समाधानम् । दोपधः अयं धातुः ।

१. लट् - अड्डति अड्डतः अड्डन्ति । अड्डसि अड्डथः अड्डथ । अड्डामि अड्डावः अड्डामः । **२. लिट्** - आनड्ड आनड्डतुः आनड्डुः । आनड्डिथ आनड्डथुः आनड्ड । आनड्ड आनड्डिव आनड्डिम । **३. लुट्** - अड्डिता अड्डितारौ अड्डितारः । अड्डितासि अड्डितास्थः अड्डितास्थ । अड्डितास्मि अड्डितास्वः अड्डितास्मः । **४. लृट्** - अड्डिष्यति अड्डिष्यतः अड्डिष्यन्ति । अड्डिष्यसि अड्डिष्यथः अड्डिष्यथ । अड्डिष्यामि अड्डिष्यावः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अड्डिष्यामः । **५. लोट्** – अड्डतु, अड्डतात् अड्डताम् अड्डन्तु । अड्ड, अड्डतात् अड्डतम् अड्डत । अड्डानि अड्डाव अड्डाम । **६. लङ्** – आड्डत् आड्डताम् आड्डन् । आड्डः आड्डतम् आड्डत । आड्डम् आड्डाव आड्डाम । **७. विधिलिङ्** – अड्डेत् अड्डेताम् अड्डेयुः । अड्डेः अड्डेतम् अड्डेत । अड्डेयम् अड्डेव अड्डेम । **८. आशीर्लिङ्** – अड्ड्यात् अड्ड्यास्ताम् अड्ड्यासुः । अड्ड्याः अड्ड्यास्तम् अड्ड्यास्त । अड्ड्यासम् अड्ड्यास्व अड्ड्यास्म । **९. लुङ्** – आड्डीत् आड्डिष्टाम् आड्डिषुः । आड्डीः आड्डिष्टम् आड्डिष्ट । आड्डिषम् आड्डिष्व आड्डिष्म । **१०. लृङ्** – आड्डिष्यत् आड्डिष्यताम् आड्डिष्यन् । आड्डिष्यः आड्डिष्यतम् आड्डिष्यत । आड्डिष्यम् आड्डिष्याव आड्डिष्याम ।

णिचि – अड्डयति – ते, **सनि** – अडिड्डिषति[१], **यकि** – अड्ड्यते ।

१. 'न न्द्राः संयोगादयः' इति निषेधात् धकारस्य द्वित्वनिषेधः ।

३४९. कड्ड – कार्कश्ये । अकर्म, सेट्, परस्मै । 'चुड्डादयस्त्रयः दोपधाः' इति कौमुदी ।

१. लट् – कड्डति कड्डतः कड्डन्ति । कड्डसि कड्डथः कड्डथ । कड्डामि कड्डावः कड्डामः । **२. लिट्** – चकड्ड चकड्डतुः चकड्डुः । चकड्डिथ चकड्डथुः चकड्ड । चकड्ड चकड्डिव चकड्डिम । **३. लुट्** – कड्डिता कड्डितारौ कड्डितारः । कड्डितासि कड्डितास्थः कड्डितास्थ । कड्डितास्मि कड्डितास्वः कड्डितास्मः । **४. लृट्** – कड्डिष्यति कड्डिष्यतः कड्डिष्यन्ति । कड्डिष्यसि कड्डिष्यथः कड्डिष्यथ । कड्डिष्यामि कड्डिष्यावः कड्डिष्यामः । **५. लोट्** – कड्डतु, कड्डतात् कड्डताम् कड्डन्तु । कड्ड, कड्डतात् कड्डतम् कड्डत । कड्डानि कड्डाव कड्डाम । **६. लङ्** – अकड्डत् अकड्डताम् अकड्डन् । अकड्डः अकड्डतम् अकड्डत । अकड्डम् अकड्डाव अकड्डाम । **७. विधिलिङ्** – कड्डेत् कड्डेताम् कड्डेयुः । कड्डेः कड्डेतम् कड्डेत । कड्डेयम् कड्डेव कड्डेम । **८. आशीर्लिङ्** – कड्ड्यात् कड्ड्यास्ताम् कड्ड्यासुः । कड्ड्याः कड्ड्यास्तम् कड्ड्यास्त । कड्ड्यासम् कड्ड्यास्व कड्ड्यास्म । **९. लुङ्** – अकड्डीत् अकड्डिष्टाम् अकड्डिषुः । अकड्डीः अकड्डिष्टम् अकड्डिष्ट । अकड्डिषम् अकड्डिष्व अकड्डिष्म । **१०. लृङ्** – अकड्डिष्यत् अकड्डिष्यताम् अकड्डिष्यन् । अकड्डिष्यः अकड्डिष्यतम् अकड्डिष्यत । अकड्डिष्यम् अकड्डिष्याव अकड्डिष्याम ।

णिचि – कड्डयति – ते, **सनि** – चिकड्डिषति, **यकि** – कड्ड्यते

३५०. क्रीड् – विहारे । अकर्म, सेट्, परस्मै ।

१. लट् – क्रीडति क्रीडतः क्रीडन्ति । क्रीडसि क्रीडथः क्रीडथ । क्रीडामि क्रीडावः क्रीडामः । **२. लिट्** – चिक्रीड चिक्रीडतुः चिक्रीडुः । चिक्रीडिथ चिक्रीडथुः चिक्रीड । चिक्रीड चिक्रीडिव चिक्रीडिम । **३. लुट्** – क्रीडिता क्रीडितारौ क्रीडितारः । क्रीडितासि क्रीडितास्थः क्रीडितास्थ । क्रीडितास्मि क्रीडितास्वः क्रीडितास्मः । **४. लृट्** – क्रीडिष्यति क्रीडिष्यतः क्रीडिष्यन्ति । क्रीडिष्यसि क्रीडिष्यथः क्रीडिष्यथ । क्रीडिष्यामि क्रीडिष्यावः क्रीडिष्यामः । **५. लोट्** – क्रीडतु, क्रीडतात् क्रीडताम् क्रीडन्तु । क्रीड, क्रीडतात् क्रीडतम् क्रीडत । क्रीडानि क्रीडाव क्रीडाम । **६. लङ्** – अक्रीडत् अक्रीडताम् अक्रीडन् । अक्रीडः अक्रीडतम् अक्रीडत । अक्रीडम् अक्रीडाव अक्रीडाम । **७. विधिलिङ्** – क्रीडेत् क्रीडेताम् क्रीडेयुः । क्रीडेः क्रीडेतम् क्रीडेत । क्रीडेयम् क्रीडेव क्रीडेम । **८. आशीर्लिङ्** – क्रीड्यात् क्रीड्यास्ताम् क्रीड्यासुः । क्रीड्याः क्रीड्यास्तम् क्रीड्यास्त । क्रीड्यासम् क्रीड्यास्व क्रीड्यास्म । **९. लुङ्** – अक्रीडीत् अक्रीडिष्टाम् अक्रीडिषुः । अक्रीडीः अक्रीडिष्टम् अक्रीडिष्ट । अक्रीडिषम् अक्रीडिष्व अक्रीडिष्म । **१०. लृङ्** – अक्रीडिष्यत् अक्रीडिष्यताम् अक्रीडिष्यन् । अक्रीडिष्यः अक्रीडिष्यतम् अक्रीडिष्यत । अक्रीडिष्यम् अक्रीडिष्याव अक्रीडिष्याम ।

णिचि – क्रीडयति – ते, **सनि** – चिक्रीडिषति, **यकि** – क्रीड्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३५१. तुड्ड – तोडने । सकर्म, सेट्, परस्मै । 'तूड्ड इत्येके' इति कौमुदी । 'तूड्ड' इति स्वामिशाकटायनादयः । तोडनम् = दारणं हिंसनं च । 'तोडनार्थे तुडेस्तुण्डेः तुडेत् तोडति तुण्डते' (श्लो.८८) इति देवः ।

१. लट् – तोडति तोडतः तोडन्ति । तोडसि तोडथः तोडथ । तोडामि तोडावः तोडामः । **२. लिट्** – तुतोड तुतुडतुः तुतुडुः । तुतुडिथ तुतुडथुः तुतुड । तुतोड तुतुडिव तुतुडिम । **३. लुट्** – तोडिता तोडितारौ तोडितारः । तोडितासि तोडितास्थः तोडितास्थ । तोडितास्मि तोडितास्वः तोडितास्मः ।**४. लृट्** – तोडिष्यति तोडिष्यतः तोडिष्यन्ति । तोडिष्यसि तोडिष्यथः तोडिष्यथ । तोडिष्यामि तोडिष्यावः तोडिष्यामः । **५. लोट्** – तोडतु, तोडतात् तोडताम् तोडन्तु । तोड, तोडतात् तोडतम् तोडत । तोडानि तोडाव तोडाम । **६. लङ्** – अतोडत् अतोडताम् अतोडन् । अतोडः अतोडतम् अतोडत । अतोडम् अतोडाव अतोडाम । **७. विधिलिङ्** – तोडेत् तोडेताम् तोडेयुः । तोडेः तोडेतम् तोडेत । तोडेयम् तोडेव तोडेम । **८. आशीर्लिङ्** – तोड्यात् तोड्यास्ताम् तोड्यासुः । तोड्याः तोड्यास्तम् तोड्यास्त । तोड्यासम् तोड्यास्व तोड्यास्म । **९. लुङ्** – अतोडीत् अतोडिष्टाम् अतोडिषुः । अतोडीः अतोडिष्टम् अतोडिष्ट । अतोडिषम् अतोडिष्व अतोडिष्म । **१०. लृङ्** – अतोडिष्यत् अतोडिष्यताम् अतोडिष्यन् । अतोडिष्यः अतोडिष्यतम् अतोडिष्यत । अतोडिष्यम् अतोडिष्याव अतोडिष्याम ।

णिचि – तोडयति – ते, **सनि** – तुतुडिषति/तुतोडिषति, **यकि** – तोड्यते ।

३५२. हुड्ड – गतौ । सकर्म, सेट्, परस्मै । 'होडतीति गतौ होडेर्होडतेऽनादरे पुनः' (श्लो. ८६) इति देवः ।

१. लट् – होडति होडतः होडन्ति । होडसि होडथः होडथ । होडामि होडावः होडामः । **२. लिट्** – जुहोड जुहुडतुः जुहुडुः । जुहोडिथ जुहुडथुः जुहुड । जुहोड जुहुडिव जुहुडिम । **३. लुट्** – होडिता होडितारौ होडितारः । होडितासि होडितास्थः होडितास्थ । होडितास्मि होडितास्वः होडितास्मः । **४. लृट्** – होडिष्यति होडिष्यतः होडिष्यन्ति । होडिष्यसि होडिष्यथः होडिष्यथ । होडिष्यामि होडिष्यावः होडिष्यामः । **५. लोट्** – होडतु, होडतात् होडताम् होडन्तु । होड, होडतात् होडतम् होडत । होडानि होडाव होडाम । **६. लङ्** – अहोडत् अहोडताम् अहोडन् । अहोडः अहोडतम् अहोडत । अहोडम् अहोडाव अहोडाम । **७. विधिलिङ्** – होडेत् होडेताम् होडेयुः । होडेः होडेतम् होडेत । होडेयम् होडेव होडेम । **८. आशीर्लिङ्** – हुड्यात् हुड्यास्ताम् हुड्यासुः । हुड्याः हुड्यास्तम् हुड्यास्त । हुड्यासम् हुड्यास्व हुड्यास्म । **९. लुङ्** – अहोडीत् अहोडिष्टाम् अहोडिषुः । अहोडीः अहोडिष्टम् अहोडिष्ट । अहोडिषम् अहोडिष्व अहोडिष्म । **१०. लृङ्** – अहोडिष्यत् अहोडिष्यताम् अहोडिष्यन् । अहोडिष्यः अहोडिष्यतम् अहोडिष्यत । अहोडिष्यम् अहोडिष्याव अहोडिष्याम ।

णिचि – होडयति – ते, **सनि** – जुहुडिषति/जुहोडिषति, **यकि** – हुड्यते ।

३५३. हूड्ड – गतौ । सकर्म, सेट्, परस्मै ।

१. लट् – हूडति हूडतः हूडन्ति । हूडसि हूडथः हूडथ । हूडामि हूडावः हूडामः । **२. लिट्** – जुहूड जुहूडतुः जुहूडुः । जुहूडिथ जुहूडथुः जुहूड । जुहूड जुहूडिव जुहूडिम । **३. लुट्** – हूडिता हूडितारौ हूडितारः । हूडितासि हूडितास्थः हूडितास्थ । हूडितास्मि हूडितास्वः हूडितास्मः । **४. लृट्** – हूडिष्यति हूडिष्यतः हूडिष्यन्ति । हूडिष्यसि हूडिष्यथः हूडिष्यथ । हूडिष्यामि हूडिष्यावः हूडिष्यामः । **५. लोट्** – हूडतु, हूडतात् हूडताम् हूडन्तु । हूड, हूडतात् हूडतम् हूडत । हूडानि हूडाव हूडाम । **६. लङ्** – अहूडत् अहूडताम् अहूडन् । अहूडः अहूडतम् अहूडत । अहूडम् अहूडाव अहूडाम । **७. विधिलिङ्** – हूडेत् हूडेताम् हूडेयुः । हूडेः हूडेतम् हूडेत । हूडेयम् हूडेव हूडेम । **८. आशीर्लिङ्** – हूड्यात् हूड्यास्ताम् हूड्यासुः । हूड्याः हूड्यास्तम् हूड्यास्त । हूड्यासम् हूड्यास्व हूड्यास्म । **९. लुङ्** – अहूडीत् अहूडिष्टाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अहूडिषुः । अहूडीः अहूडिष्टम् अहूडिष्ट । अहूडिषम् अहूडिष्व अहूडिष्म । **१०. लृङ्** – अहूडिष्यत् अहूडिष्यताम् अहूडिष्यन् । अहूडिष्यः अहूडिष्यतम् अहूडिष्यत । अहूडिष्यम् अहूडिष्याव अहूडिष्याम ।
णिचि – हूडयति – ते, **सनि** – जुहूडिषति, **यकि** – हूड्यते ।

३५४. होडृ – गतौ । सकर्म, सेट्, परस्मै । ('होट्ट' इति क्षीरतरङ्गिणी)

१. लट् – होडति होडतः होडन्ति । होडसि होडथः होडथ । होडामि होडावः होडामः । **२. लिट्** – जुहोड जुहोडतुः जुहोडुः । जुहोडिथ जुहोडथुः जुहोड । जुहोड जुहोडिव जुहोडिम । **३. लुट्** – होडिता होडितारौ होडितारः । होडितासि होडितास्थः होडितास्थ । होडितास्मि होडितास्वः होडितास्मः । **४. लृट्** – होडिष्यति होडिष्यतः होडिष्यन्ति । होडिष्यसि होडिष्यथः होडिष्यथ । होडिष्यामि होडिष्यावः होडिष्यामः । **५. लोट्** – होडतु, होडतात् होडताम् होडन्तु । होड, होडतात् होडतम् होडत । होडानि होडाव होडाम । **६. लङ्** – अहोडत् अहोडताम् अहोडन् । अहोडः अहोडतम् अहोडत । अहोडम् अहोडाव अहोडाम । **७. विधिलिङ्** – होडेत् होडेताम् होडेयुः । होडेः होडेतम् होडेत । होडेयम् होडेव होडेम । **८. आशीर्लिङ्** – होड्यात् होड्यास्ताम् होड्यासुः । होड्याः होड्यास्तम् होड्यास्त । होड्यासम् होड्यास्व होड्यास्म । **९. लुङ्** – अहोडीत् अहोडिष्टाम् अहोडिषुः । अहोडीः अहोडिष्टम् अहोडिष्ट । अहोडिषम् अहोडिष्व अहोडिष्म । **१०. लृङ्** – अहोडिष्यत् अहोडिष्यताम् अहोडिष्यन् । अहोडिष्यः अहोडिष्यतम् अहोडिष्यत । अहोडिष्यम् अहोडिष्याव अहोडिष्याम ।
णिचि – होडयति – ते, **सनि** – जुहोडिषति, **यकि** – होड्यते ।

३५५. रौडृ – अनादरे । सकर्म, सेट्, परस्मै । ('रौट्ट' इति केचित्)

१. लट् – रौडति रौडतः रौडन्ति । रौडसि रौडथः रौडथ । रौडामि रौडावः रौडामः । **२. लिट्** – रुरौड रुरौडतुः रुरौडुः । रुरौडिथ रुरौडथुः रुरौड । रुरौड रुरौडिव रुरौडिम । **३. लुट्** – रौडिता रौडितारौ रौडितारः । रौडितासि रौडितास्थः रौडितास्थ । रौडितास्मि रौडितास्वः रौडितास्मः । **४. लृट्** – रौडिष्यति रौडिष्यतः रौडिष्यन्ति । रौडिष्यसि रौडिष्यथः रौडिष्यथ । रौडिष्यामि रौडिष्यावः रौडिष्यामः । **५. लोट्** – रौडतु, रौडतात् रौडताम् रौडन्तु । रौड, रौडतात् रौडतम् रौडत । रौडानि रौडाव रौडाम । **६. लङ्** – अरौडत् अरौडताम् अरौडन् । अरौडः अरौडतम् अरौडत । अरौडम् अरौडाव अरौडाम । **७. विधिलिङ्** – रौडेत् रौडेताम् रौडेयुः । रौडेः रौडेतम् रौडेत । रौडेयम् रौडेव रौडेम । **८. आशीर्लिङ्** – रौड्यात् रौड्यास्ताम् रौड्यासुः । रौड्याः रौड्यास्तम् रौड्यास्त । रौड्यासम् रौड्यास्व रौड्यास्म । **९. लुङ्** – अरौडीत् अरौडिष्टाम् अरौडिषुः । अरौडीः अरौडिष्टम् अरौडिष्ट । अरौडिषम् अरौडिष्व अरौडिष्म । **१०. लृङ्** – अरौडिष्यत् अरौडिष्यताम् अरौडिष्यन् । अरौडिष्यः अरौडिष्यतम् अरौडिष्यत । अरौडिष्यम् अरौडिष्याव अरौडिष्याम ।
णिचि – रौडयति – ते, **सनि** – रुरौडिषति, **यकि** – रौड्यते ।

३५६. रोडृ – उन्मादे । अकर्म, सेट्, परस्मै । (केचिदमुं धातुं न पठन्ति)

१. लट् – श्रायति श्रायतः श्रायन्ति । श्रायसि श्रायथः श्रायथ । श्रायामि श्रायावः श्रायामः । **२. लिट्** – शश्रौ शश्रतुः शश्रुः । शश्रिथ शश्रथुः शश्र । शश्र शश्रिव शश्रिम । **३. लुट्** – श्राता श्रातारौ श्रातारः । श्रातासि श्रातास्थः श्रातास्थ । श्रातास्मि श्रातास्वः श्रातास्मः । **४. लृट्** – श्रास्यति श्रास्यतः श्रास्यन्ति । श्रास्यसि श्रास्यथः श्रास्यथ । श्रास्यामि श्रास्यावः श्रास्यामः । **५. लोट्** – श्रायतु, श्रायतात् श्रायताम् श्रायन्तु । श्राय, श्रायतात् श्रायतम् श्रायत । श्रायाणि श्रायाव श्रायाम । **६. लङ्** – अश्रायत् अश्रायताम् अश्रायन् । अश्रायः अश्रायतम् अश्रायत । अश्रायम् अश्रायाव अश्रायाम । **७. विधिलिङ्** – श्रायेत् श्रायेताम् श्रायेयुः । श्रायेः श्रायेतम् श्रायेत । श्रायेयम् श्रायेव श्रायेम । **८. आशीर्लिङ्** – (i) श्रेयात् श्रेयास्ताम् श्रेयासुः । श्रेयाः श्रेयास्तम् श्रेयास्त । श्रेयासम् श्रेयास्व श्रेयास्म । (ii) श्रायात् श्रायास्ताम् श्रायासुः । श्रायाः श्रायास्तम् श्रायास्त । श्रायासम् श्रायास्व श्रायास्म । **९. लुङ्** – अश्रासीत् अश्रासिष्टाम् अश्रासिषुः । अश्रासीः अश्रासिष्टम् अश्रासिष्ट । अश्रासिषम् अश्रासिष्व अश्रासिष्म । **१०. लृङ्** – अश्रास्यत् अश्रास्यताम् अश्रास्यन् । अश्रास्यः अश्रास्यतम् अश्रास्यत । अश्रास्यम् अश्रास्याव अश्रास्याम ।

णिचि – श्रपयति[1] = विक्लेदयति । तदन्यत्र श्रापयति = स्वेदयति, **सनि** – शिश्रासति, **यकि** – श्रायते ।

१. 'अर्तिह्रीब्लीरी...' इति पुक् । पाकात् अन्यत्र तु न उपधाह्रस्वः ।

८११. ज्ञा – मारणतोषणेनिशामनेषु । सकर्म, सेट्, परस्मै, (घटादिः) निशामनं ज्ञापनम् । 'जानातीति श्रि सिद्ध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेः, णौ (चौ) मित्त्वेऽपीदमेव 'ज्ञप मिद्' (ज्ञपनम्) इति पदं ज्ञापने मारणादौ । तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्याद्, उक्तस्योक्तिः 'णिचश्चे'त्युदितविहतये ज्ञापयेज् 'ज्ञा नियोगे' (श्लो. ८) इति देवः । अस्य मित्त्वविषये अनेके अंशाः मा.धा.वृत्तौ उक्ताः ।

१. लट् – जानाति[1] जानीतः जानन्ति । जानासि जानीथः जानीथ । जानामि जानीवः जानीमः । **२. लिट्** – जज्ञौ जज्ञतुः जज्ञुः । जज्ञिथ-जज्ञाथ जज्ञथुः जज्ञ । जज्ञौ जज्ञिव जज्ञिम । **३. लुट्** – ज्ञाता ज्ञातारौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ज्ञातारः । ज्ञातासि ज्ञातास्थः ज्ञातास्थ । ज्ञातास्मि ज्ञातास्वः ज्ञातास्मः । **४. लृट्** – ज्ञास्यति ज्ञास्यतः ज्ञास्यन्ति । ज्ञास्यसि ज्ञास्यथः ज्ञास्यथ । ज्ञास्यामि ज्ञास्यावः ज्ञास्यामः । **५. लोट्** – जानातु, जानीतात् जानीताम् जानन्तु । जानीहि जानीतात् जानीतम् जानीत । जानानि जानाव जानाम । **६. लङ्** – अजानात् अजानीताम् अजानन् । अजानाः अजानीतम् अजानीत । अजानाम् अजानीव अजानीम । **७. विधिलिङ्** – जानीयात् जानीयाताम् जानीयुः । जानीयाः जानीयातम् जानीयात । जानीयाम् जानीयाव जानीयाम ।

८. आशीर्लिङ् – (i) ज्ञायात्[२] ज्ञायास्ताम् ज्ञायासुः । ज्ञायाः ज्ञायास्तम् ज्ञायास्त । ज्ञायासम् ज्ञायास्व ज्ञायास्म । (ii) ज्ञेयात् ज्ञेयास्ताम् ज्ञेयासुः । । ज्ञेयाः ज्ञेयास्तम् ज्ञेयास्त । ज्ञेयासम् ज्ञेयास्व ज्ञेयास्म ।

९. लुङ् – अज्ञासीत् अज्ञासिष्टाम् अज्ञासिषुः । अज्ञासीः अज्ञासिष्टम् अज्ञासिष्ट । अज्ञासिषम् अज्ञासिष्व अज्ञासिष्म । **१०. लृङ्** – अज्ञास्यत् अज्ञास्यताम् अज्ञास्यन् । अज्ञास्यः अज्ञास्यतम् अज्ञास्यत । अज्ञास्यम् अज्ञास्याव अज्ञास्याम ।

णिचि – पशुं संज्ञपयति = मारयति । विष्णुं विज्ञपयति = सन्तोषयति । रूपं प्रज्ञपयति = दर्शयति । अन्यत्र ज्ञापयति, बोधयति, **सनि** – जिज्ञासते[३], **यकि** – ज्ञायते ।

१. 'क्र्यादिषु पठिष्यमाणस्य अयम् अनुवादः' इति कौमुदी । तदनुरोधेन अत्र रूपाणि लिखितानि ।

२. 'वान्यस्य संयोगादेः' इति एत्वविकल्पः ।

३. 'ज्ञाश्रुस्मृदृशां सनः' इति सनि आत्मनेपदित्वम् ।

८१२. चल – कम्पने । अकर्म, सेट्, परस्मै, (घटादिः) 'चल कम्पने' इति ज्वलादौ स्थितस्य (दृश्यताम् – ८३२) मित्त्वार्थे अनुवादः । '...भृत्यां चालयेत् कम्पने चलेत्' (श्लो.१५८) इति देवः ।

१. लट् – चलति चलतः चलन्ति । चलसि चलथः चलथ । चलामि चलावः चलामः । **२. लिट्** – चचाल चेलतुः चेलुः । चेलिथ चेलथुः चेल । चचाल, चचल चेलिव चेलिम । **३. लुट्** – चलिता चलितारौ चलितारः । चलितासि चलितास्थः चलितास्थ । चलितास्मि चलितास्वः चलितास्मः । **४. लृट्** – चलिष्यति चलिष्यतः चलिष्यन्ति । चलिष्यसि चलिष्यथः चलिष्यथ । चलिष्यामि चलिष्यावः चलिष्यामः ।

५. लोट् – चलतु, चलतात् चलताम् चलन्तु । चल, चलतात् चलतम् चलत । चलानि चलाव चलाम ।

६. लङ् – अचलत् अचलताम् अचलन् । अचलः अचलतम् अचलत । अचलम् अचलाव अचलाम ।

७. विधिलिङ् – चलेत् चलेताम् चलेयुः । चलेः चलेतम् चलेत । चलेयम् चलेव चलेम । **८. आशीर्लिङ्** – चल्यात् चल्यास्ताम् चल्यासुः । चल्याः चल्यास्तम् चल्यास्त । चल्यासम् चल्यास्व चल्यास्म । **९. लुङ्** – अचालीत्[१] अचालिष्टाम् अचालिषुः । अचालीः अचालिष्टम् अचालिष्ट । अचालिषम् अचालिष्व अचालिष्म । **१०. लृङ्** – अचलिष्यत् अचलिष्यताम् अचलिष्यन् । अचलिष्यः अचलिष्यतम् अचलिष्यत । अचलिष्यम् अचलिष्याव अचलिष्याम ।

णिचि – चलयति-चालयति[२], **सनि** – चिचलिषति, **यकि** – चल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

३. कम्पनार्थे मित्त्वसामर्थ्यात् ह्रस्वः । 'अन्यथा करोति' क्षिपति' इत्यादिषु अर्थेषु दीर्घः । कम्पनार्थकत्वात् परस्मैपदित्वम् ।

८१३. छदिः – ऊर्जने । अकर्म, सेट्, परस्मै । (घटादिः) ऊर्जनं बलं जीवनं च । ''छद अपवारणे' इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थम् अयमनुवादः । अनेकार्थत्वात् ऊर्जेरर्थे वृत्तिः । छदन्तं प्रयुङ्क्ते छदयति । अपवारयन्तं प्रयुङ्क्ते इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति प्राणीभवति अपवारयति वा इत्यर्थः'' इति सिद्धान्तकौमुदी । 'यौ वा णावपवारणे छदत इत्येकम्, द्वितीयं छदेत्, (छदन्) अन्यत् छादयति, छदेदिति पुनः स्यादूर्जनेऽर्थे मितः । यत्तु च्छन्दयतीति णौ नुमि पदं तत् संवृताविष्यते' (श्लो.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११३) इति देवः ।

१. लट् – छदति छदतः छदन्ति । छदसि छदथः छदथ । छदामि छदावः छदामः । **२. लिट्** – चच्छाद चच्छदतुः चच्छदुः । चच्छदिथ चच्छदथुः चच्छद । चच्छाद, चच्छद चच्छदिव चच्छदिम । **३. लुट्** – छदिता छदितारौ छदितारः । छदितासि छदितास्थः छदितास्थ । छदितास्मि छदितास्वः छदितास्मः । **४. लृट्** – छदिष्यति छदिष्यतः छदिष्यन्ति । छदिष्यसि छदिष्यथः छदिष्यथ । छदिष्यामि छदिष्यावः छदिष्यामः । **५. लोट्** – छदतु, छदतात् छदताम् छदन्तु । छद, छदतात् छदतम् छदत । छदानि छदाव छदाम । **६. लङ्** – अच्छदत् अच्छदताम् अच्छदन् । अच्छदः अच्छदतम् अच्छदत । अच्छदम् अच्छदाव अच्छदाम । **७. विधिलिङ्** – छदेत् छदेताम् छदेयुः । छदेः छदेतम् छदेत । छदेयम् छदेव छदेम । **८. आशीर्लिङ्** – छद्यात् छद्यास्ताम् छद्यासुः । छद्याः छद्यास्तम् छद्यास्त । छद्यासम् छद्यास्व छद्यास्म । **९. लुङ्** – अच्छदीत् अच्छदिष्टाम् अच्छदिषुः । अच्छदीः अच्छदिष्टम् अच्छदिष्ट । अच्छदिषम् अच्छदिष्व अच्छदिष्म । **१०. लृङ्** – अच्छदिष्यत् अच्छदिष्यताम् अच्छदिष्यन् । अच्छदिष्यः अच्छदिष्यतम् अच्छदिष्यत । अच्छदिष्यम् अच्छदिष्याव अच्छदिष्याम ।

णिचि - छदयति = बलवन्तं प्राणवन्तं वा करोति । तदन्यत्र छादयति - अपवारयति, **सनि** - चिच्छदिषति, **यकि** - छद्यते ।

८१४. लड – जिह्वोन्मथने । अकर्म, सेट्, परस्मै, (घटादिः) 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः । उन्मथनं = ज्ञापनम् इति कौमुदी । उन्मथनम् = क्षोभणम् इति मैत्रेयः । 'लाडयत्युपसेवायां विलासे तु लडेच्छपि' (श्लो. ८७) इति देवः । 'विकासे इति मैत्रेयः' इति माधवीयधातुवृत्तौ टिप्पण्याम् । 'लल ईप्सायाम्' इति केचित् भ्वादावेव पठन्ति । तत्तु क्षीरस्वामिपुरुषकारादयः न अनुमन्यन्ते ।

१. लट् – लडति लडतः लडन्ति । लडसि लडथः लडथ । लडामि लडावः लडामः । **२. लिट्** – ललाड लेडतुः लेडुः । लेडिथ लेडथुः लेड । ललाड, ललड लेडिव लेडिम । **३. लुट्** – लडिता लडितारौ लडितारः । लडितासि लडितास्थः लडितास्थ । लडितास्मि लडितास्वः लडितास्मः । **४. लृट्** – लडिष्यति लडिष्यतः लडिष्यन्ति । लडिष्यसि लडिष्यथः लडिष्यथ । लडिष्यामि लडिष्यावः लडिष्यामः । **५. लोट्** – लडतु, लडतात् लडताम् लडन्तु । लड, लडतात् लडतम् लडत । लडानि लडाव लडाम । **६. लङ्** – अलडत् अलडताम् अलडन् । अलडः अलडतम् अलडत । अलडम् अलडाव अलडाम । **७. विधिलिङ्** – लडेत् लडेताम् लडेयुः । लडेः लडेतम् लडेत । लडेयम् लडेव लडेम । **८. आशीर्लिङ्** – लड्यात् लड्यास्ताम् लड्यासुः । लड्याः लड्यास्तम् लड्यास्त । लड्यासम् लड्यास्व लड्यास्म । **९. लुङ्** – (i) अलडीत्[1] अलडिष्टाम् अलडिषुः । अलडीः अलडिष्टम् अलडिष्ट । अलडिषम् अलडिष्व अलडिष्म । (ii) अलाडीत् अलाडिष्टाम् अलाडिषुः । अलाडीः अलाडिष्टम् अलाडिष्ट । अलाडिषम् अलाडिष्व अलाडिष्म । **१०. लृङ्** – अलडिष्यत् अलडिष्यताम् अलडिष्यन् । अलडिष्यः अलडिष्यतम् अलडिष्यत । अलडिष्यम् अलडिष्याव अलडिष्याम ।

णिचि – लडयति[2]–ते, लाडयति, **सनि** – लिलडिषति, **यकि** – लड्यते

१. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

२. जिह्वोन्मथनम् इत्यत्र (i) षष्ठीतत्पुरुषे – लडयति जिह्वाम् । रसनां रसं ज्ञापयति इति अर्थः । (द्विकर्मकत्वम् अत्र) (ii) तृतीया-तत्पुरुषे – लडयति जिह्वया । देवदत्तः रसान् जानाति । तत् जिह्वा ज्ञापयति इत्यर्थः । (iii) समाहारद्वन्द्वे – (अ) लडयति शत्रून् – अपशब्दप्रयोगेण गर्हते इत्यर्थः । (आ) लडयति दधि – विलोडयति इत्यर्थः । एतदन्यत्र लाडयति पुत्रम् । क्रीडयति इत्यर्थः । 'शर्करादिदानेन अनुकूलयति इत्यर्थः' इति तत्त्वबोधिनी ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८१५. मदी – हर्षग्लेपनयोः । अकर्म, सेट्, परस्मै । घटादिः, शमादिश्च । दैवादिकस्य मित्त्वार्थोऽनुवादः । 'ग्लेपनम् = दैन्यम्' इति माधवीयधातुवृत्तिः । 'ग्लेपने' इति क्षीरतरङ्गिण्यां पाठः । 'स्तुत्यादौ मन्दते, हर्षे माद्येत्, मादयते णिचि' (श्लो. ११२) इति देवः ।

१. लट् – माद्यति[1] माद्यतः माद्यन्ति । माद्यसि माद्यथः माद्यथ । माद्यामि माद्यावः माद्यामः । **२. लिट्** – ममाद मेदतुः मेदुः । मेदिथ मेदथुः मेद । ममाद, ममद मेदिव मेदिम । **३. लुट्** – मदिता मदितारौ मदितारः । मदितासि मदितास्थः मदितास्थ । मदितास्मि मदितास्वः मदितास्मः । **४. लृट्** – मदिष्यति मदिष्यतः मदिष्यन्ति । मदिष्यसि मदिष्यथः मदिष्यथ । मदिष्यामि मदिष्यावः मदिष्यामः । **५. लोट्** – माद्यतु, माद्यतात् माद्यताम् माद्यन्तु । माद्य, माद्यतात् माद्यतम् माद्यत । माद्यानि माद्याव माद्याम ।
६. लङ् – अमाद्यत् अमाद्यताम् अमाद्यन् । अमाद्यः अमाद्यतम् अमाद्यत । अमाद्यम् अमाद्याव अमाद्याम ।
७. विधिलिङ् – माद्येत् माद्येताम् माद्येयुः । माद्येः माद्येतम् माद्येत । माद्येयम् माद्येव माद्येम ।
८. आशीर्लिङ् – मद्यात् मद्यास्ताम् मद्यासुः । मद्याः मद्यास्तम् मद्यास्त । मद्यासम् मद्यास्व मद्यास्म ।
९. लुङ् – अमदत् अमदताम् अमदन् । अमदः अमदतम् अमदत । अमदम् अमदाम अमदाम ।
१०. लृङ् – अमदिष्यत् अमदिष्यताम् अमदिष्यन् । अमदिष्यः अमदिष्यतम् अमदिष्यत । अमदिष्यम् अमदिष्याव अमदिष्याम ।

णिचि – मदयति[2]-मादयति-ते, **सनि** – मिमदिषति, **यकि** – मद्यते

१. दैवादिकस्य मित्त्वार्थोऽनुवादः ।

२. मदयति = हर्षयति ग्लेपयति वा इति अर्थः । अन्यत्र मादयति – चित्तविकारम् उत्पादयति इत्यर्थः ।

८१६. ध्वन[1] – शब्दे । अकर्म, सेट्, परस्मै, (घटादिः) 'भाव्ययं मित्त्वार्थम् अनूद्यते' इति कौमुदी । 'ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेत् शपि' (श्लो. १२६) इति देवः । ['अत्र भोजः दलि-वलि-स्खलि-रणि-ध्वनि-त्रपि-क्षपयश्चेति पपाठ । तत्र ध्वनिरणी उदाहृतौ । दल विशरणे । वल संवरणे । स्खल सञ्चलने । त्रपूष् लज्जायाम् इति गताः । तेषां णौ दलयति, वलयति, स्खलयति, त्रपयति । क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः । क्षपयति' इति मा.धा.वृत्तिः]

१. लट् – ध्वनति ध्वनतः ध्वनन्ति । ध्वनसि ध्वनथः ध्वनथ । ध्वनामि ध्वनावः ध्वनामः । **२. लिट्** – दध्वान दध्वनतुः दध्वनुः । दध्वनिथ दध्वथुः दध्वन । दध्वान, दध्वन दध्वनिव दध्वनिम । **३. लुट्** – ध्वनिता ध्वनितारौ ध्वनितारः । ध्वनितासि ध्वनितास्थः ध्वनितास्थ । ध्वनितास्मि ध्वनितास्वः ध्वनितास्मः । **४. लृट्** – ध्वनिष्यति ध्वनिष्यतः ध्वनिष्यन्ति । ध्वनिष्यसि ध्वनिष्यथः ध्वनिष्यथ । ध्वनिष्यामि ध्वनिष्यावः ध्वनिष्यामः । **५. लोट्** – ध्वनतु, ध्वनतात् ध्वनताम् ध्वनन्तु । ध्वन, ध्वनतात् ध्वनतम् ध्वनत । ध्वनानि ध्वनाव ध्वनाम । **६. लङ्** – अध्वनत् अध्वनताम् अध्वनन् । अध्वनः अध्वनतम् अध्वनत । अध्वनम् अध्वनाव अध्वनाम । **७. विधिलिङ्** – ध्वनेत् ध्वनेताम् ध्वनेयुः । ध्वनेः ध्वनेतम् ध्वनेत । ध्वनेयम् ध्वनेव ध्वनेम । **८. आशीर्लिङ्** – ध्वन्यात् ध्वन्यास्ताम् ध्वन्यासुः । ध्वन्याः ध्वन्यास्तम् ध्वन्यास्त । ध्वन्यावम् ध्वन्यास्व ध्वन्यास्म । **९. लुङ्** – (i) अध्वनीत्[2] अध्वनिष्टाम् अध्वनिषुः । अध्वनीः अध्वनिष्टम् अध्वनिष्ट । अध्वनिषम् अध्वनिष्व अध्वनिष्म । (ii) अध्वानीत् अध्वानिष्टाम् अध्वानिषुः । अध्वानीः अध्वानिष्टम् अध्वानिष्ट । अध्वानिषम् अध्वानिष्व अध्वानिष्म । **१०. लृङ्** – अध्वनिष्यत् अध्वनिष्यताम् अध्वनिष्यन् । अध्वनिष्यः अध्वनिष्यतम् अध्वनिष्यत । अध्वनिष्यम् अध्वनिष्याव अध्वनिष्याम ।

णिचि – ध्वनयति[3] ध्वानयति-ते, **सनि** – दिध्वनिषति, **यकि** – ध्वन्यते

१. अमित्त्वार्थकः अयं धातुः (८२८) इत्यत्र द्रष्टव्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३. ध्वनयति घण्टाम् । अन्यत्र ध्वानयति - अस्पष्टाक्षरम् उच्चारयति इत्यर्थः ।

८१७. स्वन - अवतंसने । अकर्म, सेट्, परस्मै, (घटादिः) 'शब्दे' इति पठिष्यमाणस्य अयम् अनुवादः । अमित्त्वार्थकः अयं धातुः (८२७) इत्यत्र द्रष्टव्यः ।

१. लट् - स्वनति स्वनतः स्वनन्ति । स्वनसि स्वनथः स्वनथ । स्वनामि स्वनावः स्वनामः । **२. लिट्** - सस्वान[1] सस्वनतुः-स्वेनतुः सस्वनुः-स्वेनुः । सस्वनिथ-स्वेनिथ सस्वनथुः-स्वेनथुः सस्वन-स्वेन । सस्वान-सस्वन सस्वनिव-स्वेनिव सस्वनिम-स्वेनिम । **३. लुट्** - स्वनिता स्वनितारौ स्वनितारः । स्वनितासि स्वनितास्थः स्वनितास्थ । स्वनितास्मि स्वनितास्वः स्वनितास्मः । **४. लृट्** - स्वनिष्यति स्वनिष्यतः स्वनिष्यन्ति । स्वनिष्यसि स्वनिष्यथः स्वनिष्यथ । स्वनिष्यामि स्वनिष्यावः स्वनिष्यामः । **५. लोट्** - स्वनतु, स्वनतात् स्वनताम् स्वनन्तु । स्वन, स्वनतात् स्वनतम् स्वनत । स्वनानि स्वनाव स्वनाम । **६. लङ्** - अस्वनत् अस्वनताम् अस्वनन् । अस्वनः अस्वनतम् अस्वनत । अस्वनम् अस्वनाव अस्वनाम । **७. विधिलिङ्** - स्वनेत् स्वनेताम् स्वनेयुः । स्वनेः स्वनेतम् स्वनेत । स्वनेयम् स्वनेव स्वनेम । **८. आशीर्लिङ्** - स्वन्यात् स्वन्यास्ताम् स्वन्यासुः । स्वन्याः स्वन्यास्तम् स्वन्यास्त । स्वन्यावम् स्वन्यास्व स्वन्यास्म । **९. लुङ्** - (i) अस्वनीत्[2] अस्वनिष्टाम् अस्वनिषुः । अस्वनीः अस्वनिष्टम् अस्वनिष्ट । अस्वनिषम् अस्वनिष्व अस्वनिष्म । (ii) अस्वानीत् अस्वानिष्टाम् अस्वानिषुः । अस्वानीः अस्वानिष्टम् अस्वानिष्ट । अस्वानिषम् अस्वानिष्व अस्वानिष्म । **१०. लृङ्** - अस्वनिष्यत् अस्वनिष्यताम् अस्वनिष्यन् । अस्वनिष्यः अस्वनिष्यतम् अस्वनिष्यत । अस्वनिष्यम् अस्वनिष्याव अस्वनिष्याम ।

णिचि - स्वनयति-न्ते = भूषयति । तदन्यत्र स्वानयति-न्ते = शब्दयति, **सनि** - सिस्वनिषति, **यकि** - स्वन्यते

१. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

२. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

८१८. शमो - दर्शने । सकर्म, सेट्, परस्मै, (घटादिः) ।

१. लट् - शमति[1] शमतः शमन्ति । शमसि शमथः शमथ । शमामि शमावः शमामः । **२. लिट्** - शशाम शेमतुः शेमुः । शेमिथ शेमथुः शेम । शशाम, शशम शेमिव शेमिम । **३. लुट्** - शमिता शमितारौ शमितारः । शमितासि शमितास्थः शमितास्थ । शमितास्मि शमितास्वः शमितास्मः । **४. लृट्** - शमिष्यति शमिष्यतः शमिष्यन्ति । शमिष्यसि शमिष्यथः शमिष्यथ । शमिष्यामि शमिष्यावः शमिष्यामः । **५. लोट्** - शमतु, शमतात् शमताम् शमन्तु । शम, शमतात् शमतम् शमत । शमानि शमाव शमाम । **६. लङ्** - अशमत् अशमताम् अशमन् । अशमः अशमतम् अशमत । अशमम् अशमाव अशमाम । **७. विधिलिङ्** - शमेत् शमेताम् शमेयुः । शमेः शमेतम् शमेत । शमेयम् शमेव शमेम । **८. आशीर्लिङ्** - शम्यात् शम्यास्ताम् शम्यासुः । शम्याः शम्यास्तम् शम्यास्त । शम्यासम् शम्यास्व कम्यास्म । **९. लुङ्** - अशमीत्[2] अशमिष्टाम् अशमिषुः । अशमीः अशमिष्टम् अशमिष्ट । अशमिषम् अशमिष्व अशमिष्म । **१०. लृङ्** - अशमिष्यत् अशमिष्यताम् अशमिष्यन् । अशमिष्यः अशमिष्यतम् अशमिष्यत । अशमिष्यम् अशमिष्याव अशमिष्याम ।

णिचि - निशमयति-न्ते वधूकथाः = श्रावयति । दर्शनार्थत्वे न मित् । निशामयति रूपम् = दर्शयति, **सनि** - शिशमिषति, **यकि** - शम्यते

१. शम इति स्वतन्त्रः धातुः इति मत्वा इह रूपाणि दर्शितानि । शम उपशमे इति दैवादिकस्य मित्त्वार्थम् अनुवादः इति पक्षे **शाम्यति, शाम्यतु, अशाम्यत्, शाम्येत्** इति रूपाणि भवन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिनिषेधः ।

८१९. यम – अपरिवेषणे । सकर्म, अनिट्, परस्मै, (घटादिः) 'यमेरुपरमे यच्छेद् यमयेद् परिवेषणे' (श्लो. १४८) इति देवः ।

१. लट् – यच्छति[1] यच्छतः यच्छन्ति । यच्छसि यच्छथः यच्छथ । यच्छामि यच्छावः यच्छामः । **२. लिट्** – ययाम येमतुः येमुः । येमिथ-ययन्थ येमथुः येम । ययाम-ययम येमिव येमिम । **३. लुट्** – यन्ता यन्तारौ यन्तारः । यन्तासि यन्तास्थः यन्तास्थ । यन्तास्मि यन्तास्वः यन्तास्मः । **४. लृट्** – यंस्यति यंस्यतः यंस्यन्ति । यंस्यसि यंस्यथः यंस्यथ । यंस्यामि यंस्यावः यंस्यामः । **५. लोट्** – यच्छतु, यच्छतात् यच्छताम् यच्छन्तु । यच्छ, यच्छतात् यच्छतम् यच्छत । यच्छानि यच्छाव यच्छाम । **६. लङ्** – अयच्छत् अयच्छताम् अयच्छन् । अयच्छः अयच्छतम् अयच्छत । अयच्छम् अयच्छाव अयच्छाम । **७. विधिलिङ्** – यच्छेत् यच्छेताम् यच्छेयुः । यच्छेः यच्छेतम् यच्छेत । यच्छेयम् यच्छेव यच्छेम । **८. आशीर्लिङ्** – यम्यात् यम्यास्ताम् यम्यासुः । यम्याः यम्यास्तम् यम्यास्त । यम्यासम् यम्यास्व यम्यास्म । **९. लुङ्** – अयंसीत् अयंसिष्टाम् अयंसिषुः । अयंसीः अयंसिष्टम् अयंसिष्ट । अयंसिषम् अयंसिष्व अयंसिष्म । **१०. लृङ्** – अयंस्यत् अयंस्यताम् अयंस्यन् । अयंस्यः अयंस्यतम् अयंस्यत । अयंस्यम् अयंस्याव अयंस्याम ।

णिचि – यामयति-यमयति-ते[2], **सनि** – यियंसति, **यकि** – यम्यते ।

१. उपरमार्थकः 'यम'धातुः अत्र । तदानुगुण्येन एव रूपाणि अत्र लिखितानि । 'इषुगमियमां छः' इति छकारे अन्तादेशे तुकि श्चुत्वेन चकारः । 'छे च' इति तुक् ।

२. अपरिवेषणे मित् न । (आयामयति – द्राघयति (दीर्घीकरोति) व्यापारयति (प्रवर्तयति) वा । परिवेषणे तु मित् । यमयति ब्राह्मणान् । भोजयति इत्यर्थः । 'यच्छतिर्भोजनतोऽन्यत्र मिन्न स्यात्' इति कौमुदी । क्षीरस्वामी तु एतद्विपरीततया व्याख्याति । पुरुषकाराभिधे दैवव्याख्याने तत् खण्डितम् ।

८२०. स्खदिर् – विद्रावणे । सकर्म, सेट्, आत्मने, (घटादिः)

१. लट् – स्खदते स्खदेते स्खदन्ते । स्खदसे स्खदेथे स्खदध्वे । स्खदे स्खदावहे स्खदामहे । **२. लिट्** – चस्खदे चस्खदाते चस्खदिरे । चस्खदिषे चस्खदाथे चस्खदिध्वे । चस्खदे चस्खदिवहे चस्खदिमहे । **३. लुट्** – स्खदिता स्खदितारौ स्खदितारः । स्खदितासे स्खदितासाथे स्खदिताध्वे । स्खदिताहे स्खदितास्वहे स्खदितास्महे । **४. लृट्** – स्खदिष्यते स्खदिष्येते स्खदिष्यन्ते । स्खदिष्यसे स्खदिष्येथे स्खदिष्यध्वे । स्खदिष्ये स्खदिष्यावहे स्खदिष्यामहे । **५. लोट्** – स्खदताम् स्खदेताम् स्खदन्ताम् । स्खदस्व स्खदेथाम् स्खदध्वम् । स्खदै स्खदावहै स्खदामहै । **६. लङ्** – अस्खदत अस्खदेताम् अस्खदन्त । अस्खदथाः अस्खदेथाम् अस्खदध्वम् । अस्खदे अस्खदावहि अस्खदामहि । **७. विधिलिङ्** – स्खदेत स्खदेयाताम् स्खदेरन् । स्खदेथाः स्खदेयाथाम् स्खदेध्वम् । स्खदेय स्खदेवहि स्खदेमहि । **८. आशीर्लिङ्** – स्खदिषीष्ट स्खदिषीयास्ताम् स्खदिषीरन् । स्खदिषीष्ठाः स्खदिषीयास्थाम् स्खदिषीध्वम्/ढ्वम् । स्खदिषीय स्खदिषीवहि स्खदिषीमहि । **९. लुङ्** – अस्खदिष्ट अस्खदिषाताम् अस्खदिषत । अस्खदिष्ठाः अस्खदिषाथाम् अस्खदिध्वम्/अस्खदिढ्वम् । अस्खदिषि अस्खदिष्वहि अस्खदिष्महि । **१०. लृङ्** – अस्खदिष्यत अस्खदिष्येताम् अस्खदिष्यन्त । अस्खदिष्यथाः अस्खदिष्येथाम् अस्खदिष्यध्वम् । अस्खदिष्ये अस्खदिष्यावहि अस्खदिष्यामहि ।

णिचि – स्खदयति[1] – ते, **सनि** – चिस्कदिषते, **यकि** – स्कद्यते

१. अवस्खादयति परिस्कारयति इत्यत्र न मित्त्वं 'स्खदिरवपरिभ्यां च' इति मित्त्वनिषेधात् ।

८२१. फण – गतौ । सकर्म, सेट्, परस्मै, (घटादिः, फणादिश्च) ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – फणति फणतः फणन्ति । फणसि फणथः फणथ । फणामि फणावः फणामः । **२. लिट्** – पफाण पफणतुः-फेणतुः[1] पफणुः-फेणुः । पफणिथ-फेणिथ पफणथुः-फेणथुः फेण-पफण । पफाण-पफण फेणिव-पफणिव फेणिम-पफणिम । **३. लुट्** – फणिता फणितारौ फणितारः । फणितासि फणितास्थः फणितास्थ । फणितास्मि फणितास्वः फणितास्मः । **४. लृट्** – फणिष्यति फणिष्यतः फणिष्यन्ति । फणिष्यसि फणिष्यथः फणिष्यथ । फणिष्यामि फणिष्यावः फणिष्यामः । **५. लोट्** – फणतु, फणतात् फणताम् फणन्तु । फण, फणतात् फणतम् फणत । फणानि फणाव फणाम ।
६. लङ् – अफणत् अफणताम् अफणन् । अफणः अफणतम् अफणत । अफणम् अफणाव अफणाम ।
७. विधिलिङ् – फणेत् फणेताम् फणेयुः । फणेः फणेतम् फणेत । फणेयम् फणेव फणेम ।
८. आशीर्लिङ् – फण्यात् फण्यास्ताम् फण्यासुः । फण्याः फण्यास्तम् फण्यास्त । फण्यासम् फण्यास्व फण्यास्म । **९. लुङ्** – (i) अफणीत्[2] अफणिष्टाम् अफणिषुः । अफणीः अफणिष्टम् अफणिष्ट । अफणिषम् अफणिष्व अफणिष्म । (ii) अफाणीत् अफाणिष्टाम् अफाणिषुः । अफाणीः अफाणिष्टम् अफाणिष्ट । अफाणिषम् अफाणिष्व अफाणिष्म । **१०. लृङ्** – अफणिष्यत् अफणिष्यताम् अफणिष्यन् । अफणिष्यः अफणिष्यतम् अफणिष्यत । अफणिष्यम् अफणिष्याव अफणिष्याम ।
णिचि – फणयति/फाणयति[3] – ते, **सनि** – पिफणिषति, **यकि** – फण्यते ।

१. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।
२. 'अतो हलादेः...' इति वृद्धिविकल्पः ।
३. केचन एतं धातुं घटादौ न अन्तर्भावयन्ति । तदा तु 'फाणयति' इत्यपि ।

८२२. राजृ – दीप्तौ । अकर्म, सेट्, उभय, (फणादिः)

१. लट् – (i) राजति राजतः राजन्ति । राजसि राजथः राजथ । राजामि राजावः राजामः । (ii) राजते राजेते राजन्ते । राजसे राजेथे राजध्वे । राजे राजावहे राजामहे । **२. लिट्** – (i) रराज रेजतुः[1]–रराजतुः रेजुः-रराजुः । रराजिथ –रेजिथ रराजथुः-रेजथुः रराज-रेज । रराज रराजिव-रेजिव रराजिम-रेजिम । (ii) रेजे रेजाथे रेजिरे । रेजिषे रेजाथे रेजिध्वे । रेजे रेजिवहे रेजिमहे । (iii) रराजे रराजाते रराजिरे । रराजिषे रराजाथे रराजिध्वे । रराजे रराजिवहे रराजिमहे । **३. लुट्** – (i) राजिता राजितारौ राजितारः । राजितासि राजितास्थः राजितास्थ । राजितास्मि राजितास्वः राजितास्मः । (ii) राजिता राजितारौ राजितारः । राजितासे राजितासाथे राजिताध्वे । राजिताहे राजितास्वहे राजितास्महे । **४. लृट्** – (i) राजिष्यति राजिष्यतः राजिष्यन्ति । राजिष्यसि राजिष्यथः राजिष्यथ । राजिष्यामि राजिष्यावः राजिष्यामः । (ii) राजिष्यते राजिष्येते राजिष्यन्ते । राजिष्यसे राजिष्येथे राजिष्यध्वे । राजिष्ये राजिष्यावहे राजिष्यामहे । **५. लोट्** – (i) राजतु, राजतात् राजताम् राजन्तु । राज, राजतात् राजतम् राजत । राजानि राजाव राजाम । (ii) राजताम् राजेताम् राजन्ताम् । राजस्व राजेथाम् राजध्वम् । राजै राजावहै राजामहै । **६. लङ्** – (i) अराजत् अराजताम् अराजन् । अराजः अराजतम् अराजत । अराजम् अराजाव अराजाम । (ii) अराजत अराजेताम् अराजन्त । अराजथाः अराजेथाम् अराजध्वम् । अराजे अराजावहि अराजामहि । **७. विधिलिङ्** –(i) राजेत् राजेताम् राजेयुः । राजेः राजेतम् राजेत । राजेयम् राजेव राजेम । (ii) राजेत राजेयाताम् राजेरन् । राजेथाः राजेयाथाम् राजेध्वम् । राजेय राजेवहि राजेमहि । **८. आशीर्लिङ्** – (i) राज्यात् राज्यास्ताम् राज्यासुः । राज्याः राज्यास्तम् राज्यास्त । राज्यासम् राज्यास्व राज्यास्म । (ii) राजिषीष्ट राजिषीयास्ताम् राजिषीरन् । राजिषीष्ठाः राजिषीयास्थाम् राजिषीध्वम्/ढ्वम् । राजिषीय राजिषीवहि राजिषीमहि । **९. लुङ्** – (i) अराजीत् अराजिष्टाम् अराजिषुः । अराजीः अराजिष्टम् अराजिष्ट । अराजिषम् अराजिष्व अराजिष्म ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(ii) अराजिष्ट अराजिषाताम् अराजिषत । अराजिष्ठाः अराजिषाथाम् अराजिध्वम्/ढ्वम् । अराजिषि अराजिष्वहि अराजिष्महि । **१०. लृङ्** - (i) अराजिष्यत् अराजिष्यताम् अराजिष्यन् । अराजिष्यः अराजिष्यतम् अराजिष्यत । अराजिष्यम् अराजिष्याव अराजिष्याम । (ii) अराजिष्यत अराजिष्येताम् अराजिष्यन्त । अराजिष्यथाः अराजिष्येथाम् अराजिष्यध्वम् । अराजिष्ये अराजिष्यावहि अराजिष्यामहि ।

णिचि - राजयति - ते, **सनि** - रिराजिषति/ते, **यकि** - राज्यते ।

१. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

८२३. टु भ्राजृ - दीप्तौ । अकर्म, सेट्, आत्मने, (फणादिः) ऋदित् दीप्त्यर्थकः भ्राजृधातुः पूर्वमपि (१८१) पठितः । टिप्पणी तत्रैव द्रष्टव्या । ततोऽपि विस्तरः कृदन्तरूपमालायां द्रष्टुं शक्यः ।

१. लट् - भ्राजते भ्राजेते भ्राजन्ते । भ्राजसे भ्राजेथे भ्राजध्वे । भ्राजे भ्राजावहे भ्राजामहे । **२. लिट्** - (i) बभ्राजे बभ्राजाते बभ्राजिरे । बभ्राजिषे बभ्राजाथे बभ्राजिध्वे । बभ्राजे बभ्राजिवहे बभ्राजिमहे । (ii) भ्रेजे[1] भ्रेजाते भ्रेजिरे । भ्रेजिषे भ्रेजाथे भ्रेजिध्वे । भ्रेजे भ्रेजिवहे भ्रेजिमहे । **३. लुट्** - भ्राजिता भ्राजितारौ भ्राजितारः । भ्राजितासे भ्राजितासाथे भ्राजिताध्वे । भ्राजिताहे भ्राजितास्वहे भ्राजितास्महे । **४. लृट्** - भ्राजिष्यते भ्राजिष्येते भ्राजिष्यन्ते । भ्राजिष्यसे भ्राजिष्येथे भ्राजिष्यध्वे । भ्राजिष्ये भ्राजिष्यावहे भ्राजिष्यामहे । **५. लोट्** - भ्राजताम् भ्राजेताम् भ्राजन्ताम् । भ्राजस्व भ्राजेथाम् भ्राजध्वम् । भ्राजै भ्राजावहै भ्राजामहै । **६. लङ्** - अभ्राजत अभ्राजेताम् अभ्राजन्त । अभ्राजथाः अभ्राजेथाम् अभ्राजध्वम् । अभ्राजे अभ्राजावहि अभ्राजामहि । **७. विधिलिङ्** - भ्राजेत भ्राजेयाताम् भ्राजेरन् । भ्राजेथाः भ्राजेयाथाम् भ्राजेध्वम् । भ्राजेय भ्राजेवहि भ्राजेमहि । **८. आशीर्लिङ्** - भ्राजिषीष्ट भ्राजिषीयास्ताम् भ्राजिषीरन् । भ्राजिषीष्ठाः भ्राजिषीयास्थाम् भ्राजिषीध्वम्/भ्राजिषीढ्वम् । भ्राजिषीय भ्राजिषीवहि भ्राजिषीमहि । **९. लुङ्** - अभ्राजिष्ट अभ्राजिषाताम् अभ्राजिषत । अभ्राजिष्ठाः अभ्राजिषाथाम् अभ्राजिध्वम्/अभ्राजिढ्वम् । अभ्राजिषि अभ्राजिष्वहि अभ्राजिष्महि । **१०. लृङ्** - अभ्राजिष्यत अभ्राजिष्येताम् अभ्राजिष्यन्त । अभ्राजिष्यथाः अभ्राजिष्येथाम् अभ्राजिष्यध्वम् । अभ्राजिष्ये अभ्राजिष्यावहि अभ्राजिष्यामहि ।

णिचि - भ्राजयति - ते, **सनि** - बिभ्राजिषते, **यकि** - भ्राज्यते ।

१. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

८२४. टु भ्राशृ - दीप्तौ । अकर्म, सेट्, आत्मने, (फणादिः) तालव्यान्तः ।

१. लट् - (i) भ्राशते[1] भ्राशेते भ्राशन्ते । भ्राशसे भ्राशेथे भ्राशध्वे । भ्राशे भ्राशावहे भ्राशामहे । (ii) भ्राश्यते भ्राश्येते भ्राश्यन्ते । भ्राश्यसे भ्राश्येथे भ्राश्यध्वे । भ्राश्ये भ्राश्यावहे भ्राश्यामहे । **२. लिट्** - (i) बभ्राशे बभ्राशाते बभ्राशिरे । बभ्राशिषे बभ्राशाथे बभ्राशिध्वे । बभ्राशे बभ्राशिवहे बभ्राशिमहे । (ii) भ्रेशे[2] भ्रेशाते भ्रेशिरे । भ्रेशिषे भ्रेशाथे भ्रेशिध्वे । भ्रेशे भ्रेशिवहे भ्रेशिमहे । **३. लुट्** - भ्राशिता भ्राशितारौ भ्राशितारः । भ्राशितासे भ्राशितासाथे भ्राशिताध्वे । भ्राशिताहे भ्राशितास्वहे भ्राशितास्महे । **४. लृट्** - भ्राशिष्यते भ्राशिष्येते भ्राशिष्यन्ते । भ्राशिष्यसे भ्राशिष्येथे भ्राशिष्यध्वे । भ्राशिष्ये भ्राशिष्यावहे भ्राशिष्यामहे । **५. लोट्** - (i) भ्राशताम् भ्राशेताम् भ्राशन्ताम् । भ्राशस्व भ्राशेथाम् भ्राशध्वम् । भ्राशै भ्राशावहै भ्राशामहै । (ii) भ्राश्यताम् भ्राश्येताम् भ्राश्यन्ताम् । भ्राश्यस्व भ्राश्येथाम् भ्राश्यध्वम् । भ्राश्यै भ्राश्यावहै भ्राश्यामहै । **६. लङ्** - (i) अभ्राशत अभ्राशेताम् अभ्राशन्त । अभ्राशथाः अभ्राशेथाम् अभ्राशध्वम् । अभ्राशे अभ्राशावहि अभ्राशामहि । (ii) अभ्राश्यत अभ्राश्येताम् अभ्राश्यन्त । अभ्राश्यथाः अभ्राश्येथाम् अभ्राश्यध्वम् । अभ्राश्ये अभ्राश्यावहि अभ्राश्यामहि । **७. विधिलिङ्** - (i) भ्राशेत भ्राशेयाताम् भ्राशेरन् । भ्राशेथाः भ्राशेयाथाम् भ्राशेध्वम् । भ्राशेय भ्राशेवहि भ्राशेमहि । (ii) भ्राश्येत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भ्राश्येयाताम् भ्राश्येरन् । भ्राश्येथाः भ्राश्येयाथाम् भ्राश्येध्वम् । भ्राश्येय भ्राश्येवहि भ्राश्येमहि । **८. आशीर्लिङ्** – भ्राशिषीष्ट भ्राशिषीयास्ताम् भ्राशिषीरन् । भ्राशिषीष्ठाः भ्राशिषीयास्थाम् भ्राशिषीध्वम्/ढ्वम् । भ्राशिषीय भ्राशिषीवहि भ्राशिषीमहि । **९. लुङ्** – अभ्राशिष्ट अभ्राशिषाताम् अभ्राशिषत । अभ्राशिष्ठाः अभ्राशिषाथाम् अभ्राशिध्वम्/ढ्वम् । अभ्राशिषि अभ्राशिष्वहि अभ्राशिष्महि । **१०. लृङ्** – अभ्राशिष्यत अभ्राशिष्येताम् अभ्राशिष्यन्त । अभ्राशिष्यथाः अभ्राशिष्येथाम् अभ्राशिष्यध्वम् । अभ्राशिष्ये अभ्राशिष्यावहि अभ्राशिष्यामहि ।

णिचि – भ्राशयति – ते, **सनि** – बिभ्राशिषते, **यकि** – भ्राश्यते ।

१. 'वा भ्राशभ्लाशभ्रमुकमुक्लमु....' – एभ्यः श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे ।

२. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

८२५. टु भ्लाशृ – दीप्तौ । अकर्म, सेट्, आत्मने, (फणादिः) तालव्यान्तः ।

१. लट् – (i) भ्लाशते[1] भ्लाशेते भ्लाशन्ते । भ्लाशसे भ्लाशेथे भ्लाशध्वे । भ्लाशे भ्लाशावहे भ्लाशामहे । (ii) भ्लाश्यते भ्लाश्येते भ्लाश्यन्ते । भ्लाश्यसे भ्लाश्येथे भ्लाश्यध्वे । भ्लाश्ये भ्लाश्यावहे भ्लाश्यामहे । **२. लिट्** – (i) बभ्लाशे बभ्लाशाते बभ्लाशिरे । बभ्लाशिषे बभ्लाशाथे बभ्लाशिध्वे । बभ्लाशे बभ्लाशिवहे बभ्लाशिमहे । (ii) भ्लेशे[2] भ्लेशाते भ्लेशिरे । भ्लेशिषे भ्लेशाथे भ्लेशिध्वे । भ्लेशे भ्लेशिवहे भ्लेशिमहे । **३. लुट्** – भ्लाशिता भ्लाशितारौ भ्लाशितारः । भ्लाशितासे भ्लाशितासाथे भ्लाशिताध्वे । भ्लाशिताहे भ्लाशितास्वहे भ्लाशितास्महे । **४. लृट्** – भ्लाशिष्यते भ्लाशिष्येते भ्लाशिष्यन्ते । भ्लाशिष्यसे भ्लाशिष्येथे भ्लाशिष्यध्वे । भ्लाशिष्ये भ्लाशिष्यावहे भ्लाशिष्यामहे । **५. लोट्** – (i) भ्लाशताम् भ्लाशेताम् भ्लाशन्ताम् । भ्लाशस्व भ्लाशेथाम् भ्लाशध्वम् । भ्लाशै भ्लाशावहै भ्लाशामहै । (ii) भ्लाश्यताम् भ्लाश्येताम् भ्लाश्यन्ताम् । भ्लाश्यस्व भ्लाश्येथाम् भ्लाश्यध्वम् । भ्लाश्यै भ्लाश्यावहै भ्लाश्यामहै । **६. लङ्** – (i) अभ्लाशत अभ्लाशेताम् अभ्लाशन्त । अभ्लाशथाः अभ्लाशेथाम् अभ्लाशध्वम् । अभ्लाशे अभ्लाशावहि अभ्लाशामहि । (ii) अभ्लाश्यत अभ्लाश्येताम् अभ्लाश्यन्त । अभ्लाश्यथाः अभ्लाश्येथाम् अभ्लाश्यध्वम् । अभ्लाश्ये अभ्लाश्यावहि अभ्लाश्यामहि । **७. विधिलिङ्** – (i) भ्लाशेत भ्लाशेयाताम् भ्लाशेरन् । भ्लाशेथाः भ्लाशेयाथाम् भ्लाशेध्वम् । भ्लाशेय भ्लाशेवहि भ्लाशेमहि । (ii) भ्लाश्येत भ्लाश्येयाताम् भ्लाश्येरन् । भ्लाश्येथाः भ्लाश्येयाथाम् भ्लाश्येध्वम् । भ्लाश्येय भ्लाश्येवहि भ्लाश्येमहि । **८. आशीर्लिङ्** – भ्लाशिषीष्ट भ्लाशिषीयास्ताम् भ्लाशिषीरन् । भ्लाशिषीष्ठाः भ्लाशिषीयास्थाम् भ्लाशिषीध्वम्/ढ्वम् । भ्लाशिषीय भ्लाशिषीवहि भ्लाशिषीमहि । **९. लुङ्** – अभ्लाशिष्ट अभ्लाशिषाताम् अभ्लाशिषत । अभ्लाशिष्ठाः अभ्लाशिषाथाम् अभ्लाशिध्वम्/ढ्वम् । अभ्लाशिषि अभ्लाशिष्वहि अभ्लाशिष्महि । **१०. लृङ्** – अभ्लाशिष्यत अभ्लाशिष्येताम् अभ्लाशिष्यन्त । अभ्लाशिष्यथाः अभ्लाशिष्येथाम् अभ्लाशिष्यध्वम् । अभ्लाशिष्ये अभ्लाशिष्यावहि अभ्लाशिष्यामहि ।

णिचि – भ्लाशयति – ते, **सनि** – बिभ्लाशिषते, **यकि** – भ्लाश्यते ।

१. 'वा भ्राशभ्लाशभ्रमुकमुक्लमु....' – एभ्यः श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे ।

२. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः

८२६. स्यमु – शब्दे । अकर्म, सेट्, परस्मै, (फणादिः) 'स्यमेः स्यमति शब्दार्थे वितर्के स्यामयेत णौ' (श्लो.१४८) इति देवः ।

१. लट् – स्यमति स्यमतः स्यमन्ति । स्यमसि स्यमथः स्यमथ । स्यमामि स्यमावः स्यमामः । **२. लिट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सस्याम सस्यमतुः-स्येमतुः[1] सस्यमुः-स्येमुः । सस्यमिथ-स्येमिथ सस्यमथुः-स्येमथुः सस्यम-स्येम । सस्याम-सस्यम सस्यमिव-स्येमिव सस्यमिम-स्येमिम । **३. लुट्** – स्यमिता स्यमितारौ स्यमितारः । स्यमितासि स्यमितास्थः स्यमितास्थ । स्यमितास्मि स्यमितास्वः स्यमितास्मः । **४. लृट्** – स्यमिष्यति स्यमिष्यतः स्यमिष्यन्ति । स्यमिष्यसि स्यमिष्यथः स्यमिष्यथ । स्यमिष्यामि स्यमिष्यावः स्यमिष्यामः । **५. लोट्** – स्यमतु, स्यमतात् स्यमताम् स्यमन्तु । स्यम, स्यमतात् स्यमतम् स्यमत । स्यमानि स्यमाव स्यमाम । **६. लङ्** – अस्यमत् अस्यमताम् अस्यमन् । अस्यमः अस्यमतम् अस्यमत । अस्यमम् अस्यमाव अस्यमाम । **७. विधिलिङ्** – स्यमेत् स्यमेताम् स्यमेयुः । स्यमेः स्यमेतम् स्यमेत । स्यमेयम् स्यमेव स्यमेम । **८. आशीर्लिङ्** – स्यम्यात् स्यम्यास्ताम् स्यम्यासुः । स्यम्याः स्यम्यास्तम् स्यम्यास्त । स्यम्यासम् स्यम्यास्व कम्यास्म । **९. लुङ्** – अस्यमीत्[2] अस्यमिष्टाम् अस्यमिषुः । अस्यमीः अस्यमिष्टम् अस्यमिष्ट । अस्यमिषम् अस्यमिष्व अस्यमिष्म । **१०. लृङ्** – अस्यमिष्यत् अस्यमिष्यताम् अस्यमिष्यन् । अस्यमिष्यः अस्यमिष्यतम् अस्यमिष्यत । अस्यमिष्यम् अस्यमिष्याव अस्यमिष्याम ।

णिचि – स्यमयति[3] – ते, **सनि** – सिस्यमिषति, **यकि** – स्यम्यते ।

१. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

२. 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिनिषेधः ।

३. अमन्तत्वेन मित्त्वात् णिचि उपधाह्रस्वः ।

८२७. स्वन[1] – शब्दे । अकर्म, सेट्, परस्मै, (फणादिः)

१. लट् – स्वनति स्वनतः स्वनन्ति । स्वनसि स्वनथः स्वनथ । स्वनामि स्वनावः स्वनामः । **२. लिट्** – सस्वान सस्वनतुः-स्वेनतुः[2] सस्वनुः-स्वेनुः । सस्वनिथ-स्येनिथ सस्वनथुः-स्येनथुः सस्वन-स्येन । सस्वान-सस्वन सस्वनिव-स्येनिव सस्वनिम-स्येनिम । **३. लुट्** – स्वनिता स्वनितारौ स्वनितारः । स्वनितासि स्वनितास्थः स्वनितास्थ । स्वनितास्मि स्वनितास्वः स्वनितास्मः । **४. लृट्** – स्वनिष्यति स्वनिष्यतः स्वनिष्यन्ति । स्वनिष्यसि स्वनिष्यथः स्वनिष्यथ । स्वनिष्यामि स्वनिष्यावः स्वनिष्यामः । **५. लोट्** – स्वनतु, स्वनतात् स्वनताम् स्वनन्तु । स्वन, स्वनतात् स्वनतम् स्वनत । स्वनानि स्वनाव स्वनाम । **६. लङ्** – अस्वनत् अस्वनताम् अस्वनन् । अस्वनः अस्वनतम् अस्वनत । अस्वनम् अस्वनाव अस्वनाम । **७. विधिलिङ्** – स्वनेत् स्वनेताम् स्वनेयुः । स्वनेः स्वनेतम् स्वनेत । स्वनेयम् स्वनेव स्वनेम । **८. आशीर्लिङ्** – स्वन्यात् स्वन्यास्ताम् स्वन्यासुः । स्वन्याः स्वन्यास्तम् स्वन्यास्त । स्वन्यासम् स्वन्यास्व स्वन्यास्म । **९. लुङ्** – (i) अस्वनीत्[3] अस्वनिष्टाम् अस्वनिषुः । अस्वनीः अस्वनिष्टम् अस्वनिष्ट । अस्वनिषम् अस्वनिष्व अस्वनिष्म । (ii) अस्वानीत् अस्वानिष्टाम् अस्वानिषुः । अस्वानीः अस्वानिष्टम् अस्वानिष्ट । अस्वानिषम् अस्वानिष्व अस्वानिष्म । **१०. लृङ्** – अस्वनिष्यत् अस्वनिष्यताम् अस्वनिष्यन् । अस्वनिष्यः अस्वनिष्यतम् अस्वनिष्यत । अस्वनिष्यम् अस्वनिष्याव अस्वनिष्याम ।

णिचि – स्वानयति, स्वनयति – ते, **सनि** – सिस्वनिषति, **यकि** – स्वन्यते ।

१. घटादिकार्यार्थम् अयं पूर्वम् (८१७) इत्यत्र अनूदितः अस्ति ।

२. 'फणां च सप्तानाम्' इति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः ।

३. 'अतो हलादेः' इति वा वृद्धिः ।

८२८. ध्वन[1] – शब्दे । अकर्म, सेट्, परस्मै । 'ध्वनयेदित्यदन्तस्य ध्वनेः शब्दे ध्वनेच्छपि' (श्लो. १२६) इति देवः ।

१. लट् – ध्वनति ध्वनतः ध्वनन्ति । ध्वनसि ध्वनथः ध्वनथ । ध्वनामि ध्वनावः ध्वनामः । **२. लिट्** – दध्वान दध्वनतुः दध्वनुः । दध्वनिथ दध्वथुः दध्वन । दध्वान, दध्वन दध्वनिव दध्वनिम । **३. लुट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ध्वनिता ध्वनितारौ ध्वनितारः । ध्वनितासि ध्वनितास्थः ध्वनितास्थ । ध्वनितास्मि ध्वनितास्वः ध्वनितास्मः । **४. लृट्** – ध्वनिष्यति ध्वनिष्यतः ध्वनिष्यन्ति । ध्वनिष्यसि ध्वनिष्यथः ध्वनिष्यथ । ध्वनिष्यामि ध्वनिष्यावः ध्वनिष्यामः । **५. लोट्** – ध्वनतु, ध्वनतात् ध्वनताम् ध्वनन्तु । ध्वन, ध्वनतात् ध्वनतम् ध्वनत । ध्वनानि ध्वनाव ध्वनाम । **६. लङ्** – अध्वनत् अध्वनताम् अध्वनन् । अध्वनः अध्वनतम् अध्वनत । अध्वनम् अध्वनाव अध्वनाम । **७. विधिलिङ्** – ध्वनेत् ध्वनेताम् ध्वनेयुः । ध्वनेः ध्वनेतम् ध्वनेत । ध्वनेयम् ध्वनेव ध्वनेम । **८. आशीर्लिङ्** – ध्वन्यात् ध्वन्यास्ताम् ध्वन्यासुः । ध्वन्याः ध्वन्यास्तम् ध्वन्यास्त । ध्वन्यासम् ध्वन्यास्व ध्वन्यास्म । **९. लुङ्** – (i) अध्वनीत्[2] अध्वनिष्टाम् अध्वनिषुः । अध्वनीः अध्वनिष्टम् अध्वनिष्ट । अध्वनिषम् अध्वनिष्व अध्वनिष्म । (ii) अध्वानीत् अध्वानिष्टाम् अध्वानिषुः । अध्वानीः अध्वानिष्टम् अध्वानिष्ट । अध्वानिषम् अध्वानिष्व अध्वानिष्म । **१०. लृङ्** – अध्वनिष्यत् अध्वनिष्यताम् अध्वनिष्यन् । अध्वनिष्यः अध्वनिष्यतम् अध्वनिष्यत । अध्वनिष्यम् अध्वनिष्याव अध्वनिष्याम ।

णिचि – ध्वनयति[3] – ध्वानयति/ते, **सनि** – दिध्वनिषति, **यकि** – ध्वन्यते

१. घटादिकार्यार्थम् अयं पूर्वम् (८१६) इत्यत्र अनूदितः अस्ति ।

२. 'अतो हलादेः...' इति वृद्धिविकल्पः ।

३. ध्वनयति घण्टाम् । अन्यत्र ध्वानयति – अस्पष्टाक्षरम् उच्चारयति इत्यर्थः ।

८२९. षम – अवैकल्ये । अकर्म, सेट्, परस्मै, 'वैक्लव्ये' इति मा.धा.वृत्तिः ।

१. लट् – समति समतः समन्ति । समसि समथः समथ । समामि समावः समामः । **२. लिट्** – ससाम सेमतुः सेमुः । सेमिथ सेमथुः सेम । ससाम, ससम सेमिव सेमिम । **३. लुट्** – समिता समितारौ समितारः । समितासि समितास्थः समितास्थ । समितास्मि समितास्वः समितास्मः । **४. लृट्** – समिष्यति समिष्यतः समिष्यन्ति । समिष्यसि समिष्यथः समिष्यथ । समिष्यामि समिष्यावः समिष्यामः । **५. लोट्** – समतु, समतात् समताम् समन्तु । सम, समतात् समतम् समत । समानि समाव समाम । **६. लङ्** – असमत् असमताम् असमन् । असमः असमतम् असमत । असमम् असमाव असमाम । **७. विधिलिङ्** – समेत् समेताम् समेयुः । समेः समेतम् समेत । समेयम् समेव समेम । **८. आशीर्लिङ्** – सम्यात् सम्यास्ताम् सम्यासुः । सम्याः सम्यास्तम् सम्यास्त । सम्यासम् सम्यास्व सम्यास्म । **९. लुङ्** – असमीत्[1] असमिष्टाम् असमिषुः । असमीः असमिष्टम् असमिष्ट । असमिषम् असमिष्व असमिष्म । **१०. लृङ्** – असमिष्यत् असमिष्यताम् असमिष्यन् । असमिष्यः असमिष्यतम् असमिष्यत । असमिष्यम् असमिष्याव असमिष्याम ।

णिचि – समयति[2] – ते, **सनि** – सिसमिषति, **यकि** – सम्यते

१. 'ह्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिनिषेधः ।

२. अमन्तत्वेन मित्त्वात् णिचि उपधाह्रस्वः ।

८३०. ष्टम – अवैकल्ये । अकर्म, सेट्, परस्मै । सिद्धान्तकौमुद्यादिषु केषुचिदेव अयं पठितः । 'वैक्लव्ये' इति मा.धा.वृत्तिः ।

१. लट् – स्तमति स्तमतः स्तमन्ति । स्तमसि स्तमथः स्तमथ । स्तमामि स्तमावः स्तमामः । **२. लिट्** – तस्ताम तस्तमतुः तस्तमुः । तस्तमिथ तस्तमथुः तस्तम । तस्ताम, तस्तम तस्तमिव तस्तमिम । **३. लुट्** – स्तमिता स्तमितारौ स्तमितारः । स्तमितासि स्तमितास्थः स्तमितास्थ । स्तमितास्मि स्तमितास्वः स्तमितास्मः । **४. लृट्** – स्तमिष्यति स्तमिष्यतः स्तमिष्यन्ति । स्तमिष्यसि स्तमिष्यथः स्तमिष्यथ । स्तमिष्यामि स्तमिष्यावः स्तमिष्यामः । **५. लोट्** – स्तमतु, स्तमतात् स्तमताम् स्तमन्तु । स्तम, स्तमतात् स्तमतम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तमत । स्तमानि स्तमाव स्तमाम । **६. लङ्** – अस्तमत् अस्तमताम् अस्तमन् । अस्तमः अस्तमतम् अस्तमत । अस्तमम् अस्तमाव अस्तमाम । **७. विधिलिङ्** – स्तमेत् स्तमेताम् स्तमेयुः । स्तमेः स्तमेतम् स्तमेत । स्तमेयम् स्तमेव स्तमेम । **८. आशीर्लिङ्** – स्तम्यात् स्तम्यास्ताम् स्तम्यासुः । स्तम्याः स्तम्यास्तम् स्तम्यास्त । स्तम्यासम् स्तम्यास्व स्तम्यास्म । **९. लुङ्** – अस्तमीत्[1] अस्तमिष्टाम् अस्तमिषुः । अस्तमीः अस्तमिष्टम् अस्तमिष्ट । अस्तमिषम् अस्तमिष्व अस्तमिष्म । **१०. लृङ्** – अस्तमिष्यत् अस्तमिष्यताम् अस्तमिष्यन् । अस्तमिष्यः अस्तमिष्यतम् अस्तमिष्यत । अस्तमिष्यम् अस्तमिष्याव अस्तमिष्याम ।

णिचि – स्तमयति[2] – ते, **सनि** – तिस्तमिषति, **यकि** – स्तम्यते ।

१. 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिनिषेधः ।

२. अमन्तत्वेन मित्त्वात् णिचि उपधाह्रस्वः ।

८३१. ज्वल – दीप्तौ । अकर्म, सेट्, परस्मै । (ज्वलादिः[1])

१. लट् – ज्वलति ज्वलतः ज्वलन्ति । ज्वलसि ज्वलथः ज्वलथ । ज्वलामि ज्वलावः ज्वलामः । **२. लिट्** – जज्वाल जज्वलतुः जज्वलुः । जज्वलिथ जज्वलथुः जज्वल । जज्वाल, जज्वल जज्वलिव जज्वलिम । **३. लुट्** – ज्वलिता ज्वलितारौ ज्वलितारः । ज्वलितासि ज्वलितास्थः ज्वलितास्थ । ज्वलितास्मि ज्वलितास्वः ज्वलितास्मः । **४. लृट्** – ज्वलिष्यति ज्वलिष्यतः ज्वलिष्यन्ति । ज्वलिष्यसि ज्वलिष्यथः ज्वलिष्यथ । ज्वलिष्यामि ज्वलिष्यावः ज्वलिष्यामः । **५. लोट्** – ज्वलतु, ज्वलतात् ज्वलताम् ज्वलन्तु । ज्वल, ज्वलतात् ज्वलतम् ज्वलत । ज्वलानि ज्वलाव ज्वलाम । **६. लङ्** – अज्वलत् अज्वलताम् अज्वलन् । अज्वलः अज्वलतम् अज्वलत । अज्वलम् अज्वलाव अज्वलाम । **७. विधिलिङ्** – ज्वलेत् ज्वलेताम् ज्वलेयुः । ज्वलेः ज्वलेतम् ज्वलेत । ज्वलेयम् ज्वलेव ज्वलेम । **८. आशीर्लिङ्** – ज्वल्यात् ज्वल्यास्ताम् ज्वल्यासुः । ज्वल्याः ज्वल्यास्तम् ज्वल्यास्त । ज्वल्यासम् ज्वल्यास्व ज्वल्यास्म । **९. लुङ्** – अज्वालीत्[2] अज्वालिष्टाम् अज्वालिषुः । अज्वालीः अज्वालिष्टम् अज्वालिष्ट । अज्वालिषम् अज्वालिष्व अज्वालिष्म । **१०. लृङ्** – अज्वलिष्यत् अज्वलिष्यताम् अज्वलिष्यन् । अज्वलिष्यः अज्वलिष्यतम् अज्वलिष्यत । अज्वलिष्यम् अज्वलिष्याव अज्वलिष्याम ।

णिचि – ज्वालयति – ज्वलयति[3] – ते/, **सनि** – जिज्वलिषति, **यकि** – ज्वल्यते ।

१. ज्वलादिप्रयोजनं तु कृत्सु एव । तथापि गणज्ञानाय अत्र ज्वलादित्वं निर्दिष्टम् । 'कस गतौ' इत्यन्ताः ज्वलादयः ।

२. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

३. 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इति वार्तिकेन मित्त्वविकल्पः । मित्त्वे ह्रस्वः ।

८३२. चल[1] कम्पने । अकर्म, सेट्, परस्मै, (ज्वलादिः) । 'कल्पने' इति माधवः । '..भृत्यां चालयेत् कम्पने चलेत्' (श्लो. १५८) इति देवः ।

१. लट् – चलति चलतः चलन्ति । चलसि चलथः चलथ । चलामि चलावः चलामः । **२. लिट्** – चचाल चेलतुः चेलुः । चेलिथ चेलथुः चेल । चचाल, चचल चेलिव चेलिम । **३. लुट्** – चलिता चलितारौ चलितारः । चलितासि चलितास्थः चलितास्थ । चलितास्मि चलितास्वः चलितास्मः । **४. लृट्** – चलिष्यति चलिष्यतः चलिष्यन्ति । चलिष्यसि चलिष्यथः चलिष्यथ । चलिष्यामि चलिष्यावः चलिष्यामः । **५. लोट्** – चलतु, चलतात् चलताम् चलन्तु । चल, चलतात् चलतम् चलत । चलानि चलाव चलाम । **६. लङ्** – अचलत् अचलताम् अचलन् । अचलः अचलतम् अचलत । अचलम् अचलाव अचलाम । **७. विधिलिङ्** – चलेत् चलेताम् चलेयुः । चलेः चलेतम् चलेत । चलेयम् चलेव चलेम । **८. आशीर्लिङ्** – चल्यात् चल्यास्ताम् चल्यासुः । चल्याः चल्यास्तम् चल्यास्त । चल्यासम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चल्यास्व चल्यास्म । **९. लुङ्** – अचालीत्[२] अचालिष्टाम् अचालिषुः । अचालीः अचालिष्टम् अचालिष्ट । अचालिषम् अचालिष्व अचालिष्म । **१०. लृङ्** – अचलिष्यत् अचलिष्यताम् अचलिष्यन् । अचलिष्यः अचलिष्यतम् अचलिष्यत । अचलिष्यम् अचलिष्याव अचलिष्याम ।

णिचि – चलयति-चालयति[३], **सनि** – चिचलिषति, **यकि** – चल्यते ।

१. अयं धातुः घटादौ अपि अस्ति । (दृश्यताम् - ८१२)

२. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

३. कम्पनार्थे मित्त्वसामर्थ्यात् ह्रस्वः । 'अन्यथा करोति' 'क्षिपति' इत्यादिषु अर्थेषु दीर्घः कम्पनार्थकत्वात् परस्मैपदित्वम् ।

८३३. जल – घातने । सकर्म, सेट्, परस्मै, (ज्वलादिः) घातनं = तैक्ष्ण्यम् इति सिद्धान्तकौमुदी । 'जल घान्ये' इति क्षीरतरङ्गिण्यां धातुकाव्ये च पाठः । घान्यम् - अतैक्ष्ण्यम् ।

१. लट् – जलति जलतः जलन्ति । जलसि जलथः जलथ । जलामि जलावः जलामः । **२. लिट्** – जजाल जेलतुः जेलुः । जेलिथ जेलथुः जेल । जजाल, जजल जेलिव जेलिम । **३. लुट्** – जलिता जलितारौ जलितारः । जलितासि जलितास्थः जलितास्थ । जलितास्मि जलितास्वः जलितास्मः । **४. लृट्** – जलिष्यति जलिष्यतः जलिष्यन्ति । जलिष्यसि जलिष्यथः जलिष्यथ । जलिष्यामि जलिष्यावः जलिष्यामः । **५. लोट्** – जलतु, जलतात् जलताम् जलन्तु । जल, जलतात् जलतम् जलत । जलानि जलाव जलाम । **६. लङ्** – अजलत् अजलताम् अजलन् । अजलः अजलतम् अजलत । अजलम् अजलाव अजलाम । **७. विधिलिङ्** – जलेत् जलेताम् जलेयुः । जलेः जलेतम् जलेत । जलेयम् जलेव जलेम । **८. आशीर्लिङ्** – जल्यात् जल्यास्ताम् जल्यासुः । जल्याः जल्यास्तम् जल्यास्त । जल्यासम् जल्यास्व जल्यास्म । **९. लुङ्** – अजालीत्[१] अजालिष्टाम् अजालिषुः । अजालीः अजालिष्टम् अजालिष्ट । अजालिषम् अजालिष्व अजालिष्म । **१०. लृङ्** – अजलिष्यत् अजलिष्यताम् अजलिष्यन् । अजलिष्यः अजलिष्यतम् अजलिष्यत । अजलिष्यम् अजलिष्याव अजलिष्याम ।

णिचि – जालयति/ते, **सनि** – जिजलिषति, **यकि** – जल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३४. टल – वैक्लव्ये । अकर्म, सेट्, परस्मै । (ज्वलादिः) । वैक्लव्यं भयादिजनिता उद्विग्नता । 'वैप्लव्ये', 'विप्लव एव वैप्लव्यम्' इति क्षीरस्वामी । 'वैकल्ये' इति धातुकाव्ये (२.२१)

१. लट् – टलति टलतः टलन्ति । टलसि टलथः टलथ । टलामि टलावः टलामः । **२. लिट्** – टटाल टेलतुः टेलुः । टेलिथ टेलथुः टेल । टटाल, टटल टेलिव टेलिम । **३. लुट्** – टलिता टलितारौ टलितारः । टलितासि टलितास्थः टलितास्थ । टलितास्मि टलितास्वः टलितास्मः । **४. लृट्** – टलिष्यति टलिष्यतः टलिष्यन्ति । टलिष्यसि टलिष्यथः टलिष्यथ । टलिष्यामि टलिष्यावः टलिष्यामः । **५. लोट्** – टलतु, टलतात् टलताम् टलन्तु । टल, टलतात् टलतम् टलत । टलानि टलाव टलाम । **६. लङ्** – अटलत् अटलताम् अटलन् । अटलः अटलतम् अटलत । अटलम् अटलाव अटलाम । **७. विधिलिङ्** – टलेत् टलेताम् टलेयुः । टलेः टलेतम् टलेत । टलेयम् टलेव टलेम । **८. आशीर्लिङ्** – टल्यात् टल्यास्ताम् टल्यासुः । टल्याः टल्यास्तम् टल्यास्त । टल्यासम् टल्यास्व टल्यास्म । **९. लुङ्** – अटालीत्[१] अटालिष्टाम् अटालिषुः । अटालीः अटालिष्टम् अटालिष्ट । अटालिषम् अटालिष्व अटालिष्म । **१०. लृङ्** – अटलिष्यत् अटलिष्यताम् अटलिष्यन् । अटलिष्यः अटलिष्यतम् अटलिष्यत । अटलिष्यम् अटलिष्याव अटलिष्याम ।

णिचि – टालयति/ते, **सनि** – टिटलिषति, **यकि** – टल्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३५. ट्वल – वैक्लव्ये । अकर्म, सेट्, परस्मै, (ज्वलादिः)

१. लट् – ट्वलति ट्वलतः ट्वलन्ति । ट्वलसि ट्वलथः ट्वलथ । ट्वलामि ट्वलावः ट्वलामः । **२. लिट्** – टट्वाल टट्वलतुः टट्वलुः । टट्वलिथ टट्वलथुः टट्वल । टट्वाल, टट्वल टट्वलिव टट्वलिम । **३. लुट्** – ट्वलिता ट्वलितारौ ट्वलितारः । ट्वलितासि ट्वलितास्थः ट्वलितास्थ । ट्वलितास्मि ट्वलितास्वः ट्वलितास्मः । **४. लृट्** – ट्वलिष्यति ट्वलिष्यतः ट्वलिष्यन्ति । ट्वलिष्यसि ट्वलिष्यथः ट्वलिष्यथ । ट्वलिष्यामि ट्वलिष्यावः ट्वलिष्यामः । **५. लोट्** – ट्वलतु, ट्वलतात् ट्वलताम् ट्वलन्तु । ट्वल, ट्वलतात् ट्वलतम् ट्वलत । ट्वलानि ट्वलाव ट्वलाम । **६. लङ्** – अट्वलत् अट्वलताम् अट्वलन् । अट्वलः अट्वलतम् अट्वलत । अट्वलम् अट्वलाव अट्वलाम । **७. विधिलिङ्** – ट्वलेत् ट्वलेताम् ट्वलेयुः । ट्वलेः ट्वलेतम् ट्वलेत । ट्वलेयम् ट्वलेव ट्वलेम । **८. आशीर्लिङ्** – ट्वल्यात् ट्वल्यास्ताम् ट्वल्यासुः । ट्वल्याः ट्वल्यास्तम् ट्वल्यास्त । ट्वल्यासम् ट्वल्यास्व ट्वल्यास्म । **९. लुङ्** – अट्वालीत्[1] अट्वालिष्टाम् अट्वालिषुः । अट्वालीः अट्वालिष्टम् अट्वालिष्ट । अट्वालिषम् अट्वालिष्व अट्वालिष्म । **१०. लृङ्** – अट्वलिष्यत् अट्वलिष्यताम् अट्वलिष्यन् । अट्वलिष्यः अट्वलिष्यतम् अट्वलिष्यत । अट्वलिष्यम् अट्वलिष्याव अट्वलिष्याम ।

णिचि – ट्वालयति/ते, **सनि** – टिट्वलिषति, **यकि** – ट्वल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३६. ष्ठल – स्थाने । अकर्म, सेट्, परस्मै, (ज्वलादिः) 'स्थल' इति क्षीरतरङ्गिणी ।

१. लट् – स्थलति स्थलतः स्थलन्ति । स्थलसि स्थलथः स्थलथ । स्थलामि स्थलावः स्थलामः । **२. लिट्** – तस्थाल तस्थलतुः तस्थलुः । तस्थलिथ तस्थलथुः तस्थल । तस्थाल, तस्थल तस्थलिव तस्थलिम । **३. लुट्** – स्थलिता स्थलितारौ स्थलितारः । स्थलितासि स्थलितास्थः स्थलितास्थ । स्थलितास्मि स्थलितास्वः स्थलितास्मः । **४. लृट्** – स्थलिष्यति स्थलिष्यतः स्थलिष्यन्ति । स्थलिष्यसि स्थलिष्यथः स्थलिष्यथ । स्थलिष्यामि स्थलिष्यावः स्थलिष्यामः । **५. लोट्** – स्थलतु, स्थलतात् स्थलताम् स्थलन्तु । स्थल, स्थलतात् स्थलतम् स्थलत । स्थलानि स्थलाव स्थलाम । **६. लङ्** – अस्थलत् अस्थलताम् अस्थलन् । अस्थलः अस्थलतम् अस्थलत । अस्थलम् अस्थलाव अस्थलाम । **७. विधिलिङ्** – स्थलेत् स्थलेताम् स्थलेयुः । स्थलेः स्थलेतम् स्थलेत । स्थलेयम् स्थलेव स्थलेम । **८. आशीर्लिङ्** – स्थल्यात् स्थल्यास्ताम् स्थल्यासुः । स्थल्याः स्थल्यास्तम् स्थल्यास्त । स्थल्यासम् स्थल्यास्व स्थल्यास्म । **९. लुङ्** – अस्थालीत्[1] अस्थालिष्टाम् अस्थालिषुः । अस्थालीः अस्थालिष्टम् अस्थालिष्ट । अस्थालिषम् अस्थालिष्व अस्थालिष्म । **१०. लृङ्** – अस्थलिष्यत् अस्थलिष्यताम् अस्थलिष्यन् । अस्थलिष्यः अस्थलिष्यतम् अस्थलिष्यत । अस्थलिष्यम् अस्थलिष्याव अस्थलिष्याम ।

णिचि – स्थालयति/ते, **सनि** – तिस्थलिषति, **यकि** – स्थल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३७. हल – विलेखने । सकर्म, सेट्, परस्मै, (विलेखनं = कर्षणम्) (ज्वलादिः) ।

१. लट् – हलति हलतः हलन्ति । हलसि हलथः हलथ । हलामि हलावः हलामः । **२. लिट्** – जहाल जहलतुः जहलुः । जहलिथ जहलथुः जहल । जहाल, जहल जहलिव जहलिम । **३. लुट्** – हलिता हलितारौ हलितारः । हलितासि हलितास्थः हलितास्थ । हलितास्मि हलितास्वः हलितास्मः । **४. लृट्** – हलिष्यति हलिष्यतः हलिष्यन्ति । हलिष्यसि हलिष्यथः हलिष्यथ । हलिष्यामि हलिष्यावः हलिष्यामः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. लोट् – हलतु, हलतात् हलताम् हलन्तु । हल, हलतात् हलतम् हलत । हलानि हलाव हलाम । **६. लङ्** – अहलत् अहलताम् अहलन् । अहलः अहलतम् अहलत । अहलम् अहलाव अहलाम । **७. विधिलिङ्** – हलेत् हलेताम् हलेयुः । हलेः हलेतम् हलेत । हलेयम् हलेव हलेम । **८. आशीर्लिङ्** – हल्यात् हल्यास्ताम् हल्यासुः । हल्याः हल्यास्तम् हल्यास्त । हल्यासम् हल्यास्व हल्यास्म । **९. लुङ्** – अहालीत्[1] अहालिष्टाम् अहालिषुः । अहालीः अहालिष्टम् अहालिष्ट । अहालिषम् अहालिष्व अहालिष्म । **१०. लृङ्** – अहलिष्यत् अहलिष्यताम् अहलिष्यन् । अहलिष्यः अहलिष्यतम् अहलिष्यत । अहलिष्यम् अहलिष्याव अहलिष्याम ।

णिचि – हालयति/ते, **सनि** – जिहलिषति, **यकि** – हल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३८. णल – गन्धे । सकर्म, सेट्, परस्मै, । बन्धने इति काश्यपः । (ज्वलादिः) ।

१. लट् – नलति नलतः नलन्ति । नलसि नलथः नलथ । नलामि नलावः नलामः । **२. लिट्** – ननाल नेलतुः नेलुः । नेलिथ नेलथुः नेल । ननाल, ननल नेलिव नेलिम । **३. लुट्** – नलिता नलितारौ नलितारः । नलितासि नलितास्थः नलितास्थ । नलितास्मि नलितास्वः नलितास्मः । **४. लृट्** – नलिष्यति नलिष्यतः नलिष्यन्ति । नलिष्यसि नलिष्यथः नलिष्यथ । नलिष्यामि नलिष्यावः नलिष्यामः । **५. लोट्** – नलतु, नलतात् नलताम् नलन्तु । नल, नलतात् नलतम् नलत । नलानि नलाव नलाम । **६. लङ्** – अनलत् अनलताम् अनलन् । अनलः अनलतम् अनलत । अनलम् अनलाव अनलाम । **७. विधिलिङ्** – नलेत् नलेताम् नलेयुः । नलेः नलेतम् नलेत । नलेयम् नलेव नलेम । **८. आशीर्लिङ्** – नल्यात् नल्यास्ताम् नल्यासुः । नल्याः नल्यास्तम् नल्यास्त । नल्यासम् नल्यास्व नल्यास्म । **९. लुङ्** – अनालीत्[1] अनालिष्टाम् अनालिषुः । अनालीः अनालिष्टम् अनालिष्ट । अनालिषम् अनालिष्व अनालिष्म । **१०. लृङ्** – अनलिष्यत् अनलिष्यताम् अनलिष्यन् । अनलिष्यः अनलिष्यतम् अनलिष्यत । अनलिष्यम् अनलिष्याव अनलिष्याम ।

णिचि – नालयति/ते, **सनि** – निनलिषति, **यकि** – नल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८३९. पल – गतौ । सकर्म, सेट्, परस्मै, (ज्वलादिः) । पूर्वं मैत्रेयः 'गल गरणे' इति अधिकं पठति ।

१. लट् – पलति पलतः पलन्ति । पलसि पलथः पलथ । पलामि पलावः पलामः । **२. लिट्** – पपाल पेलतुः पेलुः । पेलिथ पेलथुः पेल । पपाल, पपल पेलिव पेलिम । **३. लुट्** – पलिता पलितारौ पलितारः । पलितासि पलितास्थः पलितास्थ । पलितास्मि पलितास्वः पलितास्मः । **४. लृट्** – पलिष्यति पलिष्यतः पलिष्यन्ति । पलिष्यसि पलिष्यथः पलिष्यथ । पलिष्यामि पलिष्यावः पलिष्यामः । **५. लोट्** – पलतु, पलतात् पलताम् पलन्तु । पल, पलतात् पलतम् पलत । पलानि पलाव पलाम । **६. लङ्** – अपलत् अपलताम् अपलन् । अपलः अपलतम् अपलत । अपलम् अपलाव अपलाम । **७. विधिलिङ्** – पलेत् पलेताम् पलेयुः । पलेः पलेतम् पलेत । पलेयम् पलेव पलेम । **८. आशीर्लिङ्** – पल्यात् पल्यास्ताम् पल्यासुः । पल्याः पल्यास्तम् पल्यास्त । पल्यासम् पल्यास्व पल्यास्म । **९. लुङ्** – अपालीत्[1] अपालिष्टाम् अपालिषुः । अपालीः अपालिष्टम् अपालिष्ट । अपालिषम् अपालिष्व अपालिष्म । **१०. लृङ्** – अपलिष्यत् अपलिष्यताम् अपलिष्यन् । अपलिष्यः अपलिष्यतम् अपलिष्यत । अपलिष्यम् अपलिष्याव अपलिष्याम ।

णिचि – पालयति/ते, **सनि** – पिपलिषति, **यकि** – पल्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८४०. बल – प्राणने धान्यावरोधने च । अकर्म, सेट्, परस्मै, (ज्वलादिः) । प्राणनम् = जीवनम् । धान्यावरोधनम् = कुसूलादिव्यापारः । प्राणनेऽकर्मकः, धान्यावरोधने सकर्मकः ।

१. लट् – बलति बलतः बलन्ति । बलसि बलथः बलथ । बलामि बलावः बलामः । **२. लिट्** – बबाल बेलतुः बेलुः । बेलिथ बेलथुः बेल । बबाल, बबल बेलिव बेलिम । **३. लुट्** – बलिता बलितारौ बलितारः । बलितासि बलितास्थः बलितास्थ । बलितास्मि बलितास्वः बलितास्मः । **४. लृट्** – बलिष्यति बलिष्यतः बलिष्यन्ति । बलिष्यसि बलिष्यथः बलिष्यथ । बलिष्यामि बलिष्यावः बलिष्यामः । **५. लोट्** – बलतु, बलतात् बलताम् बलन्तु । बल, बलतात् बलतम् बलत । बलानि बलाव बलाम । **६. लङ्** – अबलत् अबलताम् अबलन् । अबलः अबलतम् अबलत । अबलम् अबलाव अबलाम । **७. विधिलिङ्** – बलेत् बलेताम् बलेयुः । बलेः बलेतम् बलेत । बलेयम् बलेव बलेम । **८. आशीर्लिङ्** – बल्यात् बल्यास्ताम् बल्यासुः । बल्याः बल्यास्तम् बल्यास्त । बल्यासम् बल्यास्व बल्यास्म । **९. लुङ्** – अबालीत्[1] अबालिष्टाम् अबालिषुः । अबालीः अबालिष्टम् अबालिष्ट । अबालिषम् अबालिष्व अबालिष्म । **१०. लृङ्** – अबलिष्यत् अबलिष्यताम् अबलिष्यन् । अबलिष्यः अबलिष्यतम् अबलिष्यत । अबलिष्यम् अबलिष्याव अबलिष्याम ।

णिचि – बालयति/ते, **सनि** – बिबलिषति, **यकि** – बल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८४१. पुल – महत्त्वे । अकर्म, सेट्, परस्मै, (ज्वलादिः) । 'महत्त्वे पोलति पुलेर्णौ तु तत्रैव पोलयेत्' (श्लो. १५६) इति देवः ।

१. लट् – पोलति पोलतः पोलन्ति । पोलसि पोलथः पोलथ । पोलामि पोलावः पोलामः । **२. लिट्** – पुपोल पुपुलतुः पुपुलुः । पुपोलिथ पुपुलथुः पुपुल । पुपोल पुपुलिव पुपुलिम । **३. लुट्** – पोलिता पोलितारौ पोलितारः । पोलितासि पोलितास्थः पोलितास्थ । पोलितास्मि पोलितास्वः पोलितास्मः । **४. लृट्** – पोलिष्यति पोलिष्यतः पोलिष्यन्ति । पोलिष्यसि पोलिष्यथः पोलिष्यथ । पोलिष्यामि पोलिष्यावः पोलिष्यामः । **५. लोट्** – पोलतु, पोलतात् पोलताम् पोलन्तु । पोल, पोलतात् पोलतम् पोलत । पोलानि पोलाव पोलाम । **६. लङ्** – अपोलत् अपोलताम् अपोलन् । अपोलः अपोलतम् अपोलत । अपोलम् अपोलाव अपोलाम । **७. विधिलिङ्** – पोलेत् पोलेताम् पोलेयुः । पोलेः पोलेतम् पोलेत । पोलेयम् पोलेव पोलेम । **८. आशीर्लिङ्** – पोल्यात् पोल्यास्ताम् पोल्यासुः । पोल्याः पोल्यास्तम् पोल्यास्त । पोल्यासम् पोल्यास्व पोल्यास्म । **९. लुङ्** – अपोलीत्[1] अपोलिष्टाम् अपोलिषुः । अपोलीः अपोलिष्टम् अपोलिष्ट । अपोलिषम् अपोलिष्व अपोलिष्म । **१०. लृङ्** – अपोलिष्यत् अपोलिष्यताम् अपोलिष्यन् । अपोलिष्यः अपोलिष्यतम् अपोलिष्यत । अपोलिष्यम् अपोलिष्याव अपोलिष्याम ।

णिचि – पोलयति/ते, **सनि** – पुपोलिषति/पुपुलिषति, **यकि** – पुल्यते ।

१. 'अतो ल्रान्तस्य...' इति वृद्धिः ।

८४२. कुल – संस्त्याने बन्धुषु च । अकर्म, सेट्, परस्मै, (ज्वलादिः) । 'सन्ताने' इत्येके । सन्तानो विजातीयैः अविच्छिन्नः प्रवाहः । संस्त्यानम् = सङ्घातः । बन्धुशब्देन तद्व्यापारो विवाहादिः लक्ष्यते ।

१. लट् – कोलति कोलतः कोलन्ति । कोलसि कोलथः कोलथ । कोलामि कोलावः कोलामः ।
२. लिट् – चुकोल चुकुलतुः चुकुलुः । चुकोलिथ चुकुलथुः चुकुल । चुकोल चुकुलिव चुकुलिम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९२०. पै – शोषणे । अकर्म, अनिट्, परस्मै । 'पाने पिबति, रक्षायां पाति, पायति शोषणे' (श्लो. ५) इति देवः ।

१. लट् – पायति पायतः पायन्ति । पायसि पायथः पायथ । पायामि पायावः पायामः । **२. लिट्** – पपौ पपतुः पपुः । पपिथ-पपाथ पपथुः पप । पपौ पपिव पपिम । **३. लुट्** – पाता पातारौ पातारः । पातासि पातास्थः पातास्थ । पातास्मि पातास्वः पातास्मः । **४. लृट्** – पास्यति पास्यतः पास्यन्ति । पास्यसि पास्यथः पास्यथ । पास्यामि पास्यावः पास्यामः । **५. लोट्** – पायतु, पायतात् पायताम् पायन्तु । पाय, पायतात् पायतम् पायत । पायानि पायाव पायाम । **६. लङ्** – अपायत् अपायताम् अपायन् । अपायः अपायतम् अपायत । अपायम् अपायाव अपायाम । **७. विधिलिङ्** – पायेत् पायेताम् पायेयुः । पायेः पायेतम् पायेत । पायेयम् पायेव पायेम । **८. आशीर्लिङ्** – पायात् पायास्ताम् पायासुः । पायाः पायास्तम् पायास्त । पायासम् पायास्व पायास्म । **९. लुङ्** – अपासीत् अपासिष्टाम् अपासिषुः । अपासीः अपासिष्टम् अपासिष्ट । अपासिषम् अपासिष्व अपासिष्म । **१०. लृङ्** – अपास्यत् अपास्यताम् अपास्यन् । अपास्यः अपास्यतम् अपास्यत । अपास्यम् अपास्याव अपास्याम ।

णिचि – पाययति – ते, **सनि** – पिपासति, **यकि** – पायते ।

९२१. ओ वै – शोषणे । अकर्म, अनिट्, परस्मै । 'गतिगन्धनयोर्वाति वायतीति तु शोषणे' (श्लो. १०) इति देवः ।

१. लट् – वायति वायतः वायन्ति । वायसि वायथः वायथ । वायामि वायावः वायामः । **२. लिट्** – ववौ ववतुः ववुः । वविथ-ववाथ ववथुः वव । ववौ वविव वविम । **३. लुट्** – वाता वातारौ वातारः । वातासि वातास्थः वातास्थ । वातास्मि वातास्वः वातास्मः । **४. लृट्** – वास्यति वास्यतः वास्यन्ति । वास्यसि वास्यथः वास्यथ । वास्यामि वास्यावः वास्यामः । **५. लोट्** – वायतु, वायतात् वायताम् वायन्तु । वाय, वायतात् वायतम् वायत । वायानि वायाव वायाम । **६. लङ्** – अवायत् अवायताम् अवायन् । अवायः अवायतम् अवायत । अवायम् अवायाव अवायाम । **७. विधिलिङ्** – वायेत् वायेताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वायेयुः । वायेः वायेतम् वायेत । वायेयम् वायेव वायेम । **८. आशीर्लिङ्** - वायात् वायास्ताम् वायासुः । वायाः वायास्तम् वायास्त । वायासम् वायास्व वायास्म । **९. लुङ्** - अवासीत् अवासिष्टाम् अवासिषुः । अवासीः अवासिष्टम् अवासिष्ट । अवासिषम् अवासिष्व अवासिष्म । **१०. लृङ्** - अवास्यत् अवास्यताम् अवास्यन् । अवास्यः अवास्यतम् अवास्यत । अवास्यम् अवास्याव अवास्याम ।

णिचि - वाययति - ते, **सनि** - विवासति, **यकि** - वायते ।

१२२. ष्टै - वेष्टने । सकर्म, अनिट्, परस्मै ।

१. लट् - स्तायति स्तायतः स्तायन्ति । स्तायसि स्तायथः स्तायथ । स्तायामि स्तायावः स्तायामः । **२. लिट्** - तस्तौ तस्ततुः तस्तुः । तस्तिथ-तस्ताथ तस्तथुः तस्त । तस्तौ तस्तिव तस्तिम । **३. लुट्** - स्ताता स्तातारौ स्तातारः । स्तातासि स्तातास्थः स्तातास्थ । स्तातास्मि स्तातास्वः स्तातास्मः । **४. लृट्** - स्तास्यति स्तास्यतः स्तास्यन्ति । स्तास्यसि स्तास्यथः स्तास्यथ । स्तास्यामि स्तास्यावः स्तास्यामः । **५. लोट्** - स्तायतु, स्तायतात् स्तायताम् स्तायन्तु । स्ताय, स्तायतात् स्तायतम् स्तायत । स्तायानि स्तायाव स्तायाम । **६. लङ्** - अस्तायत् अस्तायताम् अस्तायन् । अस्तायः अस्तायतम् अस्तायत । अस्तायम् अस्तायाव अस्तायाम । **७. विधिलिङ्** - स्तायेत् स्तायेताम् स्तायेयुः । स्तायेः स्तायेतम् स्तायेत । स्तायेयम् स्तायेव स्तायेम । **८. आशीर्लिङ्** - (i) स्तायात् स्तायास्ताम् स्तायासुः । स्तायाः स्तायास्तम् स्तायास्त । स्तायासम् स्तायास्व स्तायास्म । (ii) स्तेयात्[1] स्तेयास्ताम् स्तेयासुः । स्तेयाः स्तेयास्तम् स्तेयास्त । स्तेयासम् स्तेयास्व स्तेयास्म । **९. लुङ्** - अस्तासीत् अस्तासिष्टाम् अस्तासिषुः । अस्तासीः अस्तासिष्टम् अस्तासिष्ट । अस्तासिषम् अस्तासिष्व अस्तासिष्म । **१०. लृङ्** - अस्तास्यत् अस्तास्यताम् अस्तास्यन् । अस्तास्यः अस्तास्यतम् अस्तास्यत । अस्तास्यम् अस्तास्याव अस्तास्याम ।

णिचि - स्ताययति - ते, **सनि** - तिस्तासति, **यकि** - स्तायते ।

१. 'वान्यस्य संयोगादेः' - (घुमास्थादेरन्यस्य धातोरात एत्वं वा स्यादार्धधातुके किति लिङि) इति एत्वं वा ।

१२३. ष्णै - वेष्टने । सकर्म, अनिट्, परस्मै । 'शोभायां च' इत्येके । 'शौच इत्यन्ये' इति कौमुदी । 'स्नातीति शौचे स्नः स्नायेदिति चेच्छन्ति केचन' (श्लो. १२) इति देवः ।

१. लट् - स्नायति स्नायतः स्नायन्ति । स्नायसि स्नायथः स्नायथ । स्नायामि स्नायावः स्नायामः । **२. लिट्** - सस्नौ सस्नतुः सस्नुः । सस्निथ-सस्नाथ सस्नथुः सस्न । सस्नौ सस्निव सस्निम । **३. लुट्** - स्नाता स्नातारौ स्नातारः । स्नातासि स्नातास्थः स्नातास्थ । स्नातास्मि स्नातास्वः स्नातास्मः । **४. लृट्** - स्नास्यति स्नास्यतः स्नास्यन्ति । स्नास्यसि स्नास्यथः स्नास्यथ । स्नास्यामि स्नास्यावः स्नास्यामः । **५. लोट्** - स्नायतु, स्नायतात् स्नायताम् स्नायन्तु । स्नाय, स्नायतात् स्नायतम् स्नायत । स्नायानि स्नायाव स्नायाम । **६. लङ्** - अस्नायत् अस्नायताम् अस्नायन् । अस्नायः अस्नायतम् अस्नायत । अस्नायम् अस्नायाव अस्नायाम । **७. विधिलिङ्** - स्नायेत् स्नायेताम् स्नायेयुः । स्नायेः स्नायेतम् स्नायेत । स्नायेयम् स्नायेव स्नायेम । **८. आशीर्लिङ्** - (i) स्नायात् स्नायास्ताम् स्नायासुः । स्नायाः स्नायास्तम् स्नायास्त । स्नायासम् स्नायास्व स्नायास्म । (ii) स्नेयात्[1] स्नेयास्ताम् स्नेयासुः । स्नेयाः स्नेयास्तम् स्नेयास्त । स्नेयासम् स्नेयास्व स्नेयास्म । **९. लुङ्** - अस्नासीत् अस्नासिष्टाम् अस्नासिषुः । अस्नासीः अस्नासिष्टम् अस्नासिष्ट । अस्नासिषम् अस्नासिष्व अस्नासिष्म । **१०. लृङ्** - अस्नास्यत् अस्नास्यताम् अस्नास्यन् । अस्नास्यः अस्नास्यतम् अस्नास्यत । अस्नास्यम् अस्नास्याव अस्नास्याम ।

णिचि - स्नाययति - ते, **सनि** - सिष्णासति, **यकि** - स्नायते

१. 'वान्यस्य संयोगादेः' इति एत्वं वा ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९२४. दैपृ – शोधने । सकर्म, अनिट्, परस्मै । 'दाति दायति दापृदैपोः दयते रक्षणे डितः' (श्लो. ४) इति देवः ।

१. लट् – दायति दायतः दायन्ति । दायसि दायथः दायथ । दायामि दायावः दायामः । **२. लिट्** – ददौ ददतुः ददुः । ददिथ-ददाथ ददथुः दद । ददौ ददिव ददिम । **३. लुट्** – दाता दातारौ दातारः । दातासि दातास्थः दातास्थ । दातास्मि दातास्वः दातास्मः । **४. लृट्** – दास्यति दास्यतः दास्यन्ति । दास्यसि दास्यथः दास्यथ । दास्यामि दास्यावः दास्यामः । **५. लोट्** – दायतु, दायतात् दायताम् दायन्तु । दाय, दायतात् दायतम् दायत । दायानि दायाव दायाम । **६. लङ्** – अदायत् अदायताम् अदायन् । अदायः अदायतम् अदायत । अदायम् अदायाव अदायाम । **७. विधिलिङ्** – दायेत् दायेताम् दायेयुः । दायेः दायेतम् दायेत । दायेयम् दायेव दायेम । **८. आशीर्लिङ्** – दायात् दायास्ताम् दायासुः । दायाः दायास्तम् दायास्त । दायासम् दायास्व दायास्म । **९. लुङ्** – अदासीत् अदासिष्टाम् अदासिषुः । अदासीः अदासिष्टम् अदासिष्ट । अदासिषम् अदासिष्व अदासिष्म । **१०. लृङ्** – अदास्यत् अदास्यताम् अदास्यन् । अदास्यः अदास्यतम् अदास्यत । अदास्यम् अदास्याव अदास्याम ।

णिचि – दापयति – ते, **सनि** – दिदासति, **यकि** – दायते ।

९२५. पा – पाने । सकर्म, अनिट्, परस्मै । 'पाने पिबति, रक्षायां पाति, पायति शोषणे' (श्लो.५) इति देवः ।

१. लट् – पिबति[1] पिबतः पिबन्ति । पिबसि पिबथः पिबथ । पिबामि पिबावः पिबामः । **२. लिट्** – पपौ पपतुः पपुः । पपिथ-पपाथ पपथुः पप । पपौ पपिव पपिम । **३. लुट्** – पाता पातारौ पातारः । पातासि पातास्थः पातास्थ । पातास्मि पातास्वः पातास्मः । **४. लृट्** – पास्यति पास्यतः पास्यन्ति । पास्यसि पास्यथः पास्यथ । पास्यामि पास्यावः पास्यामः । **५. लोट्** – पिबतु, पिबतात् पिबताम् पिबन्तु । पिब, पिबतात् पिबतम् पिबत । पिबानि पिबाव पिबाम । **६. लङ्** – अपिबत् अपिबताम् अपिबन् । अपिबः अपिबतम् अपिबत । अपिबम् अपिबाव अपिबाम । **७. विधिलिङ्** – पिबेत् पिबेताम् पिबेयुः । पिबेः पिबेतम् पिबेत । पिबेयम् पिबेव पिबेम । **८. आशीर्लिङ्** – पेयात्[2] पेयास्ताम् पेयासुः । पेयाः पेयास्तम् पेयास्त । पेयासम् पेयास्व पेयास्म । **९. लुङ्** – अपात् अपाताम् अपुः[3] । अपाः अपातम् अपात । अपाम् अपाव अपाव । **१०. लृङ्** – अपास्यत् अपास्यताम् अपास्यन् । अपास्यः अपास्यतम् अपास्यत । अपास्यम् अपास्याव अपास्याम ।

णिचि – पाययति-ते[4], **सनि** – पिपासति, **यकि** – पीयते ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन पिबादेशः ।

२. 'एर्लिङि' इति एत्वम् ।

३. 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक् ।

४. 'निगरणचलनार्थेभ्यश्च' इत्यनेन यत् परस्मैपदित्वं प्राप्तं तस्य 'न पादम्याङ्..' इति निषेधात् आत्मनेपदम् । अकर्त्रभिप्राये क्रियाफले तु परस्मैपदम् । 'शाच्छासा...' इति पुकोऽपवादः युक् ।

९२६. घ्रा – गन्धोपादाने । सकर्म, अनिट्, परस्मै । 'अग्निसंयोगश्च मुखवायुना । लक्षणया विधूनने, सन्तापेन पूरणे च' इति धा.का. व्याख्यायाम् (२.३३) ।

१. लट् – जिघ्रति[1] जिघ्रतः जिघ्रन्ति । जिघ्रसि जिघ्रथः जिघ्रथ । जिघ्रामि जिघ्रावः जिघ्रामः । **२. लिट्** – जघ्रौ जघ्रतुः जघ्रुः । जघ्रिथ-जघ्राथ जघ्रथुः जघ्र । जघ्रौ जघ्रिव जघ्रिम । **३. लुट्** – घ्राता घ्रातारौ घ्रातारः । घ्रातासि घ्रातास्थः घ्रातास्थ । घ्रातास्मि घ्रातास्वः घ्रातास्मः । **४. लृट्** – घ्रास्यति घ्रास्यतः घ्रास्यन्ति । घ्रास्यसि घ्रास्यथः घ्रास्यथ । घ्रास्यामि घ्रास्यावः घ्रास्यामः । **५. लोट्** – जिघ्रतु, जिघ्रतात् जिघ्रताम् जिघ्रन्तु । जिघ्र, जिघ्रतात् जिघ्रतम् जिघ्रत । जिघ्राणि जिघ्राव जिघ्राम । **६. लङ्** – अजिघ्रत् अजिघ्रताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजिघ्रन् । अजिघ्रः अजिघ्रतम् अजिघ्रत । अजिघ्रम् अजिघ्राव अजिघ्राम । **७. विधिलिङ्** – जिघ्रेत् जिघ्रेताम् जिघ्रेयुः । जिघ्रेः जिघ्रेतम् जिघ्रेत । जिघ्रेयम् जिघ्रेव जिघ्रेम । **८. आशीर्लिङ्** – (i) घ्रायात् घ्रायास्ताम् घ्रायासुः । घ्रायाः घ्रायास्तम् घ्रायास्त । घ्रायासम् घ्रायास्व घ्रायास्म । (ii) घ्रेयात्[२] घ्रेयास्ताम् घ्रेयासुः । घ्रेयाः घ्रेयास्तम् घ्रेयास्त । घ्रेयासम् घ्रेयास्व घ्रेयास्म । **९. लुङ्** – (i) अघ्रासीत्[३] अघ्रासिष्टाम् अघ्रासिषुः । अघ्रासीः अघ्रासिष्टम् अघ्रासिष्ट । अघ्रासिषम् अघ्रासिष्व अघ्रासिष्म । (ii) अघ्रात् अघ्राताम् अघ्रुः । अघ्राः अघ्रातम् अघ्रात । अघ्राम् अघ्राव अघ्राम । **१०. लृङ्** – अघ्रास्यत् अघ्रास्यताम् अघ्रास्यन् । अघ्रास्यः अघ्रास्यतम् अघ्रास्यत । अघ्रास्यम् अघ्रास्याव अघ्रास्याम ।

णिचि – घ्रापयति – ते, **सनि** – जिघ्रासति, **यकि** – घ्रायते ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन जिघादेशः ।
२. 'वान्यस्य संयोगादेः' इति एत्वं वा ।
३. 'विभाषा घ्राधेट्.....' इति सिचः वा लुक् ।

१२७. ध्मा – शब्दाग्निसंयोगयोः । सकर्म, अनिट्, परस्मै ।

१. लट् – धमति[१] धमतः धमन्ति । धमसि धमथः धमथ । धमामि धमावः धमामः । **२. लिट्** – दध्मौ दध्मतुः दध्मुः । दध्मिथ-दध्माथ दध्मथुः दध्म । दध्मौ दध्मिव दध्मिम । **३. लुट्** – ध्माता ध्मातारौ ध्मातारः । ध्मातासि ध्मातास्थः ध्मातास्थ । ध्मातास्मि ध्मातास्वः ध्मातास्मः । **४. लृट्** – ध्मास्यति ध्मास्यतः ध्मास्यन्ति । ध्मास्यसि ध्मास्यथः ध्मास्यथ । ध्मास्यामि ध्मास्यावः ध्मास्यामः । **५. लोट्** – धमतु, धमतात् धमताम् धमन्तु । धम, धमतात् धमतम् धमत । धमानि धमाव धमाम । **६. लङ्** – अधमत् अधमताम् अधमन् । अधमः अधमतम् अधमत । अधमम् अधमाव अधमाम । **७. विधिलिङ्** – धमेत् धमेताम् धमेयुः । धमेः धमेतम् धमेत । धमेयम् धमेव धमेम । **८. आशीर्लिङ्** – (i) ध्मायात् ध्मायास्ताम् ध्मायासुः । ध्मायाः ध्मायास्तम् ध्मायास्त । ध्मायासम् ध्मायास्व ध्मायास्म । (ii) ध्मेयात्[२] ध्मेयास्ताम् ध्मेयासुः । ध्मेयाः ध्मेयास्तम् ध्मेयास्त । ध्मेयासम् ध्मेयास्व ध्मेयास्म । **९. लुङ्** – अध्मासीत्[३] अध्मासिष्टाम् अध्मासिषुः । अध्मासीः अध्मासिष्टम् अध्मासिष्ट । अध्मासिषम् अध्मासिष्व अध्मासिष्म । **१०. लृङ्** – अध्मास्यत् अध्मास्यताम् अध्मास्यन् । अध्मास्यः अध्मास्यतम् अध्मास्यत । अध्मास्यम् अध्मास्याव अध्मास्याम ।

णिचि – ध्मापयति – ते, **सनि** – दिध्मासति, **यकि** – ध्मायते ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन धमादेशः ।
२. 'वान्यस्य संयोगादेः' इति एत्वं वा ।

१२८. ष्ठा – गतिनिवृत्तौ । अकर्म, अनिट्, परस्मै,

१. लट् – तिष्ठति[१] तिष्ठतः तिष्ठन्ति । तिष्ठसि तिष्ठथः तिष्ठथ । तिष्ठामि तिष्ठावः तिष्ठामः । **२. लिट्** – तस्थौ तस्थतुः तस्थुः । तस्थिथ-तस्थाथ तस्थथुः तस्थ । तस्थौ तस्थिव तस्थिम । **३. लुट्** – स्थाता स्थातारौ स्थातारः । स्थातासि स्थातास्थः स्थातास्थ । स्थातास्मि स्थातास्वः स्थातास्मः । **४. लृट्** – स्थास्यति स्थास्यतः स्थास्यन्ति । स्थास्यसि स्थास्यथः स्थास्यथ । स्थास्यामि स्थास्यावः स्थास्यामः । **५. लोट्** – तिष्ठतु, तिष्ठतात् तिष्ठताम् तिष्ठन्तु । तिष्ठ, तिष्ठतात् तिष्ठतम् तिष्ठत । तिष्ठानि तिष्ठाव तिष्ठाम । **६. लङ्** – अतिष्ठत् अतिष्ठताम् अतिष्ठन् । अतिष्ठः अतिष्ठतम् अतिष्ठत । अतिष्ठम् अतिष्ठाव अतिष्ठाम । **७. विधिलिङ्** – तिष्ठेत् तिष्ठेताम् तिष्ठेयुः । तिष्ठेः तिष्ठेतम् तिष्ठेत । तिष्ठेयम् तिष्ठेव तिष्ठेम । **८. आशीर्लिङ्** – स्थेयात् स्थेयास्ताम् स्थेयासुः । स्थेयाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्थेयास्तम् स्थेयास्त । स्थेयासम् स्थेयास्व स्थेयास्म । **९. लुङ्** – अस्थात् अस्थाताम् अस्थुः । अस्थाः अस्थातम् अस्थात । अस्थाम् अस्थाव अस्थाम । **१०. लृङ्** – अस्थास्यत् अस्थास्यताम् अस्थास्यन् । अस्थास्यः अस्थास्यतम् अस्थास्यत । अस्थास्यम् अस्थास्याव अस्थास्याम ।

णिचि – स्थापयति - ते, **सनि** – तिष्ठासति, **यकि** – स्थीयते[२] ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन 'तिष्ठ' इति आदेशः ।

२. 'घुमास्थागापा...' इति ईत् ।

९२९. म्ना – अभ्यासे । सकर्म, अनिट्, परस्मै, 'प्रायेणायमाङ्पूर्वक एव प्रयुज्यते । 'अभ्यासः = पारम्पर्येण वृत्तिः' इति क्षीरस्वामी ।

१. लट् – मनति[१] मनतः मनन्ति । मनसि मनथः मनथ । मनामि मनावः मनामः । **२. लिट्** – मम्नौ मम्नतुः मम्नुः । मम्निथ-मम्नाथ मम्नथुः मम्न । मम्नौ मम्निव मम्निम । **३. लुट्** – म्नाता म्नातारौ म्नातारः । म्नातासि म्नातास्थः म्नातास्थ । म्नातास्मि म्नातास्वः म्नातास्मः । **४. लृट्** – म्नास्यति म्नास्यतः म्नास्यन्ति । म्नास्यसि म्नास्यथः म्नास्यथ । म्नास्यामि म्नास्यावः म्नास्यामः । **५. लोट्** – मनतु, मनतात् मनताम् मनन्तु । मन, मनतात् मनतम् मनत । मनानि मनाव मनाम । **६. लङ्** – अमनत् अमनताम् अमनन् । अमनः अमनतम् अमनत । अमनम् अमनाव अमनाम । **७. विधिलिङ्** – मनेत् मनेताम् मनेयुः । मनेः मनेतम् मनेत । मनेयम् मनेव मनेम । **८. आशीर्लिङ्** – (i) म्नायात् म्नायास्ताम् म्नायासुः । म्नायाः म्नायास्तम् म्नायास्त । म्नायासम् म्नायास्व म्नायास्म । (ii) म्नेयात्[२] म्नेयास्ताम् म्नेयासुः । म्नेयाः म्नेयास्तम् म्नेयास्त । म्नेयासम् म्नेयास्व म्नेयास्म । **९. लुङ्** – अम्नासीत् अम्नासिष्टाम् अम्नासिषुः । अम्नासीः अम्नासिष्टम् अम्नासिष्ट । अम्नासिषम् अम्नासिष्व अम्नासिष्म । **१०. लृङ्** – अम्नास्यत् अम्नास्यताम् अम्नास्यन् । अम्नास्यः अम्नास्यतम् अम्नास्यत । अम्नास्यम् अम्नास्याव अम्नास्याम ।

णिचि – म्नापयति - ते, **सनि** – मिम्नासति, **यकि** – म्नायते ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन 'मन' इति आदेशः ।

२. 'वान्यस्य संयोगादेः' इति एत्वं वा ।

९३०. दाण् – दाने । सकर्म. अनिट्. परस्मै ।

१. लट् – यच्छति[१] यच्छतः यच्छन्ति । यच्छसि यच्छथः यच्छथ । यच्छामि यच्छावः यच्छामः । **२. लिट्** – ददौ ददतुः ददुः । ददिथ-ददाथ ददथुः दद । ददौ ददिव ददिम । **३. लुट्** – दाता दातारौ दातारः । दातासि दातास्थः दातास्थ । दातास्मि दातास्वः दातास्मः । **४. लृट्** – दास्यति दास्यतः दास्यन्ति । दास्यसि दास्यथः दास्यथ । दास्यामि दास्यावः दास्यामः । **५. लोट्** – यच्छतु, यच्छतात् यच्छताम् यच्छन्तु । यच्छ, यच्छतात् यच्छतम् यच्छत । यच्छानि यच्छाव यच्छाम । **६. लङ्** – अयच्छत् अयच्छताम् अयच्छन् । अयच्छः अयच्छतम् अयच्छत । अयच्छम् अयच्छाव अयच्छाम । **७. विधिलिङ्** – यच्छेत् यच्छेताम् यच्छेयुः । यच्छेः यच्छेतम् यच्छेत । यच्छेयम् यच्छेव यच्छेम । **८. आशीर्लिङ्** – देयात् देयास्ताम् देयासुः । देयाः देयास्तम् देयास्त । देयासम् देयास्व देयास्म । **९. लुङ्** – अदात् अदाताम् अदुः । अदाः अदातम् अदात । अदाम् अदाव अदाम । **१०. लृङ्** – अदास्यत् अदास्यताम् अदास्यन् । अदास्यः अदास्यतम् अदास्यत । अदास्यम् अदास्याव अदास्याम ।

णिचि – दापयति/ते, **सनि** – दित्सति, **यकि** – दीयते[२] ।

१. 'पा-घ्रा-ध्मा....' इत्यनेन 'यच्छ' इति आदेशः ।

२. 'घुमास्थागापा...' इति ईत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९३१. ह्वृ – कौटिल्ये । अकर्म, अनिट्, परस्मै ।

१. लट् – ह्वरति ह्वरतः ह्वरन्ति । ह्वरसि ह्वरथः ह्वरथ । ह्वरामि ह्वरावः ह्वरामः । **२. लिट्** – जह्वार जह्वरतुः जह्वरुः । जह्वर्थ जह्वरथुः जह्वर । जह्वार, जह्वर जह्वरिव जह्वरिम । **३. लुट्** – ह्वर्ता ह्वर्तारौ ह्वर्तारः । ह्वर्तासि ह्वर्तास्थः ह्वर्तास्थ । ह्वर्तास्मि ह्वर्तास्वः ह्वर्तास्मः । **४. लृट्** – ह्वरिष्यति ह्वरिष्यतः ह्वरिष्यन्ति । ह्वरिष्यसि ह्वरिष्यथः ह्वरिष्यथ । ह्वरिष्यामि ह्वरिष्यावः ह्वरिष्यामः । **५. लोट्** – ह्वरतु, ह्वरतात् ह्वरताम् ह्वरन्तु । ह्वर, ह्वरतात् ह्वरतम् ह्वरत । ह्वराणि ह्वराव ह्वराम । **६. लङ्** – अह्वरत् अह्वरताम् अह्वरन् । अह्वरः अह्वरतम् अह्वरत । अह्वरम् अह्वराव अह्वराम । **७. विधिलिङ्** – ह्वरेत् ह्वरेताम् ह्वरेयुः । ह्वरेः ह्वरेतम् ह्वरेत । ह्वरेयम् ह्वरेव ह्वरेम । **८. आशीर्लिङ्** – ह्वर्यात् ह्वर्यास्ताम् ह्वर्यासुः । ह्वर्याः ह्वर्यास्तम् ह्वर्यास्त । ह्वर्यासम् ह्वर्यास्व ह्वर्यास्म । **९. लुङ्** – अह्वार्षीत् अह्वार्ष्टाम् अह्वार्षुः । अह्वार्षीः अह्वार्ष्टम् अह्वार्ष्ट । अह्वार्षम् अह्वार्ष्व अह्वार्ष्म । **१०. लृङ्** – अह्वरिष्यत् अह्वरिष्यताम् अह्वरिष्यन् । अह्वरिष्यः अह्वरिष्यतम् अह्वरिष्यत । अह्वरिष्यम् अह्वरिष्याव अह्वरिष्याम ।

णिचि – ह्वारयति/ते, **सनि** – जिह्वरिषति, **यकि** – ह्वर्यते ।

९३२. स्वृ – शब्दोपतातयोः । अकर्म, वेट्, परस्मै । उपतापः = रोगः ।

१. लट् – स्वरति स्वरतः स्वरन्ति । स्वरसि स्वरथः स्वरथ । स्वरामि स्वरावः स्वरामः । **२. लिट्** – सस्वार सस्वरतुः सस्वरुः । सस्वरिथ-सस्वर्थ सस्वरथुः सस्वर । सस्वार-सस्वर सस्वरिव सस्वरिम । **३. लुट्** – (i) स्वर्ता[१] स्वर्तारौ स्वर्तारः । स्वर्तासि स्वर्तास्थः स्वर्तास्थ । स्वर्तास्मि स्वर्तास्वः स्वर्तास्मः । (ii) स्वरिता स्वरितारौ स्वरितारः । स्वरितासि स्वरितास्थः स्वरितास्थ । स्वरितास्मि स्वरितास्वः स्वरितास्मः । **४. लृट्** – स्वरिष्यति[२] स्वरिष्यतः स्वरिष्यन्ति । स्वरिष्यसि स्वरिष्यथः स्वरिष्यथ । स्वरिष्यामि स्वरिष्यावः स्वरिष्यामः । **५. लोट्** – स्वरतु, स्वरतात् स्वरताम् स्वरन्तु । स्वर, स्वरतात् स्वरतम् स्वरत । स्वराणि स्वराव स्वराम । **६. लङ्** – अस्वरत् अस्वरताम् अस्वरन् । अस्वरः अस्वरतम् अस्वरत । अस्वरम् अस्वराव अस्वराम । **७. विधिलिङ्** – स्वरेत् स्वरेताम् स्वरेयुः । स्वरेः स्वरेतम् स्वरेत । स्वरेयम् स्वरेव स्वरेम । **८. आशीर्लिङ्** – स्वर्यात्[३] स्वर्यास्ताम् स्वर्यासुः । स्वर्याः स्वर्यास्तम् स्वर्यास्त । स्वर्यासम् स्वर्यास्व स्वर्यास्म । **९. लुङ्** – (i) अस्वारीत्[४] अस्वारिष्टाम् अस्वारिषुः । अस्वारीः अस्वारिष्टम् अस्वारिष्ट । अस्वारिषम् अस्वारिष्व अस्वारिष्म । (ii) अस्वार्षीत् अस्वार्ष्टाम् अस्वार्षुः । अस्वार्षीः अस्वार्ष्टम् अस्वार्ष्ट । अस्वार्षम् अस्वार्ष्व अस्वार्ष्म । **१०. लृङ्** – अस्वरिष्यत् अस्वरिष्यताम् अस्वरिष्यन् । अस्वरिष्यः अस्वरिष्यतम् अस्वरिष्यत । अस्वरिष्यम् अस्वरिष्याव अस्वरिष्याम ।

णिचि – स्वारयति/ते, **सनि** – सिस्वरिषति/सुस्वूर्षति[५], **यकि** – स्वर्यते ।

१. 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वेट् ।
२. 'ऋद्धनोः स्ये' इति नित्यम् इट् ।
३. 'गुणोऽर्तिसंयोगाद्योः' इति गुणः ।
४. 'स्वरतिसूतिसूयतिधूञूदितो वा...' इत्यादिना वेट् । इट्पक्षे 'अतो ल्रान्तस्य' इति वृद्धिः । इडभावे 'सिचि वृद्धिः' वृद्धिभावः ।
५. 'स्वरतिसूति...' इति वेट् । 'सनीवन्तर्ध...' इति इड्विकल्पः ।

९३३. स्मृ – चिन्तायाम् । सकर्म, अनिट्, परस्मै । 'अयमनेकार्थत्वात् विस्मरणे चित्तादपक्रमणे च वर्तते' इति मा.धा.वृत्तिः ।

१. लट् – स्मरति स्मरतः स्मरन्ति । स्मरसि स्मरथः स्मरथ । स्मरामि स्मरावः स्मरामः । **२. लिट्** – सस्मार सस्मरतुः सस्मरुः । सस्मर्थ सस्मरथुः सस्मर । सस्मार-सस्मर सस्मरिव सस्मरिम । **३. लुट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मर्ता स्मर्तारौ स्मर्तारः । स्मर्तासि स्मर्तास्थः स्मर्तास्थ । स्मर्तास्मि स्मर्तास्वः स्मर्तास्मः । **४. लृट्** – स्मरिष्यति स्मरिष्यतः स्मरिष्यन्ति । स्मरिष्यसि स्मरिष्यथः स्मरिष्यथ । स्मरिष्यामि स्मरिष्यावः स्मरिष्यामः । **५. लोट्** – स्मरतु, स्मरतात् स्मरताम् स्मरन्तु । स्मर, स्मरतात् स्मरतम् स्मरत । स्मराणि स्मराव स्मराम । **६. लङ्** – अस्मरत् अस्मरताम् अस्मरन् । अस्मरः अस्मरतम् अस्मरत । अस्मरम् अस्मराव अस्मराम । **७. विधिलिङ्** – स्मरेत् स्मरेताम् स्मरेयुः । स्मरेः स्मरेतम् स्मरेत । स्मरेयम् स्मरेव स्मरेम । **८. आशीर्लिङ्** – स्मर्यात् स्मर्यास्ताम् स्मर्यासुः । स्मर्याः स्मर्यास्तम् स्मर्यास्त । स्मर्यासम् स्मर्यास्व स्मर्यास्म । **९. लुङ्** – अस्मार्षीत् अस्मार्ष्टाम् अस्मार्षुः । अस्मार्षीः अस्मार्ष्टम् अस्मार्ष्ट । अस्मार्षम् अस्मार्ष्व अस्मार्ष्म । **१०. लृङ्** – अस्मरिष्यत् अस्मरिष्यताम् अस्मरिष्यन् । अस्मरिष्यः अस्मरिष्यतम् अस्मरिष्यत । अस्मरिष्यम् अस्मरिष्याव अस्मरिष्याम ।

णिचि – स्मारयति-ते/स्मरयति-ते[1] सनि – सुस्मूर्षते[2], यकि – स्मर्यते

१. आध्यानार्थकत्वे घटादित्वात् मित्त्वम् । मित्त्वाद् ह्रस्वः ।

२. 'ज्ञा श्रुस्मृदृशां सनः' इति सनि आत्मनेपदम् ।

१३४. वृ – संवरणे । सकर्म, अनिट्, परस्मै, (क्वचित्तु 'ह्व'[1] इति पाठः)

१. लट् – वरति वरतः वरन्ति । वरसि वरथः वरथ । वरामि वरावः वरामः । **२. लिट्** – ववार वव्रतुः वव्रुः । ववर्थ वव्रथुः वव्र । ववार-ववर वव्रिव वव्रिम । **३. लुट्** – वर्ता वर्तारौ वर्तारः । वर्तासि वर्तास्थः वर्तास्थ । वर्तास्मि वर्तास्वः वर्तास्मः । **४. लृट्** – वरिष्यति वरिष्यतः वरिष्यन्ति । वरिष्यसि वरिष्यथः वरिष्यथ । वरिष्यामि वरिष्यावः वरिष्यामः । **५. लोट्** – वरतु, वरतात् वरताम् वरन्तु । वर, वरतात् वरतम् वरत । वराणि वराव वराम । **६. लङ्** – अवरत् अवरताम् अवरन् । अवरः अवरतम् अवरत । अवरम् अवराव अवराम । **७. विधिलिङ्** – वरेत् वरेताम् वरेयुः । वरेः वरेतम् वरेत । वरेयम् वरेव वरेम । **८. आशीर्लिङ्** – वर्यात् वर्यास्ताम् वर्यासुः । वर्याः वर्यास्तम् वर्यास्त । वर्यासम् वर्यास्व वर्यास्म । **९. लुङ्** – अवार्षीत् अवार्ष्टाम् अवार्षुः । अवार्षीः अवार्ष्टम् अवार्ष्ट । अवार्षम् अवार्ष्व अवार्ष्म । **१०. लृङ्** – अवरिष्यत् अवरिष्यताम् अवरिष्यन् । अवरिष्यः अवरिष्यतम् अवरिष्यत । अवरिष्यम् अवरिष्याव अवरिष्याम ।

णिचि – वारयति-ते, **सनि** – विवीर्षति, **यकि** – वर्यते ।

१. तत्त्वबोधिनीयुक्तयां कौमुद्याम् अयं पाठः । बालमनोरमायुक्तायां तु 'ह्व' इत्येव दृश्यते । क्षीरतरङ्गिणीटिप्पण्याम् 'वृ' इत्यस्य पाठस्य युक्तता दर्श्यते । 'ह्व' इति क्वचित् पाठः । 'ह्व वर' इति क्वचित् पठ्यते' इति मा.धा.वृत्तिः ।

१३५. सृ – गतौ । सकर्म, अनिट्, परस्मै, । अयं धातुः अर्थभेदेन अकर्मकः सकर्मकोऽपि दृश्यते । 'गतौ ससर्ति सरति श्लुशपोर्धावति क्वचित्' (श्लो.३०) इति देवः ।

१. लट् – (i) सरति सरतः सरन्ति । सरसि सरथः सरथ । सरामि सरावः सरामः । (ii) धावति[1] धावतः धावन्ति । धावसि धावथः धावथ । धावामि धावावः धावामः । **२. लिट्** – ससार सस्रतुः सस्रुः । ससर्थ सस्रथुः सस्र । ससार-ससर ससृव ससृम । **३. लुट्** – सर्ता सर्तारौ सर्तारः । सर्तासि सर्तास्थः सर्तास्थ । सर्तास्मि सर्तास्वः सर्तास्मः । **४. लृट्** – सरिष्यति सरिष्यतः सरिष्यन्ति । सरिष्यसि सरिष्यथः सरिष्यथ । सरिष्यामि सरिष्यावः सरिष्यामः । **५. लोट्** – (i) सरतु, सरतात् सरताम् सरन्तु । सर, सरतात् सरतम् सरत । सराणि सराव सराम । (ii) धावतु, धावतात् धावताम् धावन्तु । धाव, धावतात् धावतम् धावत । धावानि धावाव धावाम । **६. लङ्** – (i) असरत् असरताम् असरन् । असरः असरतम् असरत । असरम् असराव असराम । (ii) अधावत् अधावताम् अधावन् । अधावः अधावतम् अधावत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अधावम् अधावाव अधावाम । **७. विधिलिङ्** – (i) सरेत् सरेताम् सरेयुः । सरेः सरेतम् सरेत । सरेयम् सरेव सरेम । (ii) धावेत् धावेताम् धावेयुः । धावेः धावेतम् धावेत । धावेयम् धावेव धावेम । **८. आशीर्लिङ्** – स्त्रियात् स्त्रियास्ताम् स्त्रियासुः । स्त्रियाः स्त्रियास्तम् स्त्रियास्त । स्त्रियासम् स्त्रियास्व स्त्रियास्म । **९. लुङ्** – असार्षीत् असार्ष्टाम् असार्षुः । असार्षीः असार्ष्टम् असार्ष्ट । असार्षम् असार्ष्व असार्ष्म । **१०. लृङ्** – असरिष्यत् असरिष्यताम् असरिष्यन् । असरिष्यः असरिष्यतम् असरिष्यत । असरिष्यम् असरिष्याव असरिष्याम ।

णिचि – सारयति – ते, **सनि** – सिसीर्षति, **यकि** – स्त्रियते[२] ।

१. 'सर्तेर्वेगितायां गतौ धावादेशः' इति वार्तिकेन शीघ्रार्थे धावादेशः अपि । अतः धावति, धावतु, अधावत्, धावेत् इत्यपि रूपाणि ।

२. 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशः ।

९३६. ऋ – गतिप्रापणयोः । सकर्म, अनिट्, परस्मै । 'तत्रेयर्त्यृच्छतीत्यर्तेः श्रि गतौ स्याद् ऋणाति तु' (श्लो.३०) इति देवः ।

१. लट् – ऋच्छति[१] ऋच्छतः ऋच्छन्ति । ऋच्छसि ऋच्छथः ऋच्छथ । ऋच्छामि ऋच्छावः ऋच्छामः । **२. लिट्** – आर आरतुः आरुः । आरिथ आरथुः आर । आर आरिव आरिम । **३. लुट्** – अर्ता अर्तारौ अर्तारः । अर्तासि अर्तास्थः अर्तास्थ । अर्तास्मि अर्तास्वः अर्तास्मः । **४. लृट्** – अरिष्यति अरिष्यतः अरिष्यन्ति । अरिष्यसि अरिष्यथः अरिष्यथ । अरिष्यामि अरिष्यावः अरिष्यामः । **५. लोट्** – ऋच्छतु, ऋच्छतात् ऋच्छताम् ऋच्छन्तु । ऋच्छ, ऋच्छतात् ऋच्छतम् ऋच्छत । ऋच्छानि ऋच्छाव ऋच्छाम । **६. लङ्** – आर्च्छत् आर्च्छताम् आर्च्छन् । आर्च्छः आर्च्छतम् आर्च्छत । आर्च्छम् आर्च्छाव आर्च्छाम । **७. विधिलिङ्** – ऋच्छेत् ऋच्छेताम् ऋच्छेयुः । ऋच्छेः ऋच्छेतम् ऋच्छेत । ऋच्छेयम् ऋच्छेव ऋच्छेम । **८. आशीर्लिङ्** – अर्यात् अर्यास्ताम् अर्यासुः । अर्याः अर्यास्तम् अर्यास्त । अर्यासम् अर्यास्व अर्यास्म । **९. लुङ्** – आर्षीत् आर्ष्टाम् आर्षुः । आर्षीः आर्ष्टम् आर्ष्ट । आर्षम् आर्ष्व आर्ष्म । **१०. लृङ्** – आरिष्यत् आरिष्यताम् आरिष्यन् । आरिष्यः आरिष्यतम् आरिष्यत । आरिष्यम् आरिष्याव आरिष्याम ।

णिचि – अर्पयति-ते[२], **सनि** – अरिरिषति[३], **यकि** – अर्यते ।

१. 'पाघ्राध्मा....' इत्यनेन ऋच्छादेशः ।

२. 'अर्तिह्रीव्ली...' (७.३.३६) इति णौ पुगागमः । 'पुगन्त...' इति गुणः ।

३. 'स्मिपूङ्रञ्ज्वशां सनि' इति इटि रिस्शब्दस्य द्वित्वे हलादिशेषे षत्वे च रूपम् ।

९३७. गॄ – सेचने । सकर्म, अनिट्, परस्मै । 'ज्ञाने गारयते, गिरेन्निगरणे, शब्दे गृणाति, त्रयं, युक्तं ग्रो गरतीति सेकविषये ह्रस्वान्तधातोः शपि' (श्लो. ३३) इति देवः ।

१. लट् – गरति गरतः गरन्ति । गरसि गरथः गरथ । गरामि गरावः गरामः । **२. लिट्** – जगार जग्रतुः जग्रुः । जगर्थ जग्रथुः जग्र । जगार-जगर जग्रिव जग्रिम । **३. लुट्** – गर्ता गर्तारौ गर्तारः । गर्तासि गर्तास्थः गर्तास्थ । गर्तास्मि गर्तास्वः गर्तास्मः । **४. लृट्** – गरिष्यति गरिष्यतः गरिष्यन्ति । गरिष्यसि गरिष्यथः गरिष्यथ । गरिष्यामि गरिष्यावः गरिष्यामः । **५. लोट्** – गरतु, गरतात् गरताम् गरन्तु । गर, गरतात् गरतम् गरत । गराणि गराव गराम । **६. लङ्** – अगरत् अगरताम् अगरन् । अगरः अगरतम् अगरत । अगरम् अगराव अगराम । **७. विधिलिङ्** – गरेत् गरेताम् गरेयुः । गरेः गरेतम् गरेत । गरेयम् गरेव गरेम । **८. आशीर्लिङ्** – ग्रियात् ग्रियास्ताम् ग्रियासुः । ग्रियाः ग्रियास्तम् ग्रियास्त । ग्रियासम् ग्रियास्व ग्रियास्म । **९. लुङ्** – अगार्षीत् अगार्ष्टाम् अगार्षुः । अगार्षीः अगार्ष्टम् अगार्ष्ट । अगार्षम् अगार्ष्व अगार्ष्म । **१०. लृङ्** – अगरिष्यत् अगरिष्यताम् अगरिष्यन् । अगरिष्यः अगरिष्यतम् अगरिष्यत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अगरिष्यम् अगरिष्याव अगरिष्याम ।

णिचि – गारयति – ते, **सनि** – जिगीर्षति, **यकि** – ग्रियते[1] ।

१. 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशः ।

९३८. घृ – सेचने । सकर्म, अनिट्, परस्मै । 'घरेद् घारयेद्, यद्दीप्तौ क्षरणे जिघर्ति तदिदं केचिद् विदुः छान्दसम्' (श्लो. ३३) इति देवः । भौवादिकस्य घृधातोस्तु घृतं, घर्मः, घृणा इत्यत्रैव प्रयोगः, नान्यत्र इति 'तृज्वत्क्रोष्टुः' इति सूत्रे भाष्ये स्पष्टम्' इति बालमनोरमा । पुरुषकारः अपि अमुं समर्थयति ।

१. लट् – घरति घरतः घरन्ति । घरसि घरथः घरथ । घरामि घरावः घरामः । **२. लिट्** – जघार जघ्रतुः जघ्रुः । जघर्थ जघ्रथुः जघ्र । जघार-जघर जघ्रिव जघ्रिम । **३. लुट्** – घर्ता घर्तारौ घर्तारः । घर्तासि घर्तास्थः घर्तास्थ । घर्तास्मि घर्तास्वः घर्तास्मः । **४. लृट्** – घरिष्यति घरिष्यतः घरिष्यन्ति । घरिष्यसि घरिष्यथः घरिष्यथ । घरिष्यामि घरिष्यावः घरिष्यामः । **५. लोट्** – घरतु, घरतात् घरताम् घरन्तु । घर, घरतात् घरतम् घरत । घराणि घराव घराम । **६. लङ्** – अघरत् अघरताम् अघरन् । अघरः अघरतम् अघरत । अघरम् अघराव अघराम । **७. विधिलिङ्** – घरेत् घरेताम् घरेयुः । घरेः घरेतम् घरेत । घरेयम् घरेव घरेम । **८. आशीर्लिङ्** – घ्रियात्[1] घ्रियास्ताम् घ्रियासुः । घ्रियाः घ्रियास्तम् घ्रियास्त । घ्रियासम् घ्रियास्व घ्रियास्म । **९. लुङ्** – अघार्षीत् अघार्ष्टाम् अघार्षुः । अघार्षीः अघार्ष्टम् अघार्ष्ट । अघार्षम् अघार्ष्व अघार्ष्म । **१०. लृङ्** – अघरिष्यत् अघरिष्यताम् अघरिष्यन् । अघरिष्यः अघरिष्यतम् अघरिष्यत । अघरिष्यम् अघरिष्याव अघरिष्याम ।

णिचि – घारयति – ते, **सनि** – जिघीर्षति, **यकि** – घ्रियते[1] ।

१. 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशः ।

९३९. ध्वृ – हूर्च्छने । अकर्म, अनिट्, परस्मै । 'हूर्च्छनं कौटिल्यम् । 'भ्रातृव्यमेव तदपध्वरति' इत्यादौ हिंसायामपि दृश्यते' इति मा.धा.वृत्तिः ।

१. लट् – ध्वरति ध्वरतः ध्वरन्ति । ध्वरसि ध्वरथः ध्वरथ । ध्वरामि ध्वरावः ध्वरामः । **२. लिट्** – दध्वार दध्वरतुः दध्वरुः । दध्वार्थ दध्वरथुः दध्वर । दध्वार-दध्वर दध्वरिव दध्वरिम । **३. लुट्** – ध्वर्ता ध्वर्तारौ ध्वर्तारः । ध्वर्तासि ध्वर्तास्थः ध्वर्तास्थ । ध्वर्तास्मि ध्वर्तास्वः ध्वर्तास्मः । **४. लृट्** – ध्वरिष्यति ध्वरिष्यतः ध्वरिष्यन्ति । ध्वरिष्यसि ध्वरिष्यथः ध्वरिष्यथ । ध्वरिष्यामि ध्वरिष्यावः ध्वरिष्यामः । **५. लोट्** – ध्वरतु, ध्वरतात् ध्वरताम् ध्वरन्तु । ध्वर, ध्वरतात् ध्वरतम् ध्वरत । ध्वराणि ध्वराव ध्वराम । **६. लङ्** – अध्वरत् अध्वरताम् अध्वरन् । अध्वरः अध्वरतम् अध्वरत । अध्वरम् अध्वराव अध्वराम । **७. विधिलिङ्** – ध्वरेत् ध्वरेताम् ध्वरेयुः । ध्वरेः ध्वरेतम् ध्वरेत । ध्वरेयम् ध्वरेव ध्वरेम । **८. आशीर्लिङ्** – ध्वर्यात् ध्वर्यास्ताम् ध्वर्यासुः । ध्वर्याः ध्वर्यास्तम् ध्वर्यास्त । ध्वर्यासम् ध्वर्यास्व ध्वर्यास्म । **९. लुङ्** – अध्वार्षीत् अध्वार्ष्टाम् अध्वार्षुः । अध्वार्षीः अध्वार्ष्टम् अध्वार्ष्ट । अध्वार्षम् अध्वार्ष्व अध्वार्ष्म । **१०. लृङ्** – अध्वरिष्यत् अध्वरिष्यताम् अध्वरिष्यन् । अध्वरिष्यः अध्वरिष्यतम् अध्वरिष्यत । अध्वरिष्यम् अध्वरिष्याव अध्वरिष्याम ।

णिचि – ध्वारयति – ते, **सनि** – दुध्वूर्षति, **यकि** – ध्व्रियते ।

९४०. स्रु – गतौ । सकर्म, अनिट्, परस्मै, 'स्रुतौ च द्रुमे । शु स्रु गतावित्येके' इति धा.का. व्या. (२-३४)

१. लट् – स्रवति स्रवतः स्रवन्ति । स्रवसि स्रवथः स्रवथ । स्रवामि स्रवावः स्रवामः । **२. लिट्** – सुस्राव[1] सुस्रुवतुः सुस्रुवुः । सुस्रोथ सुस्रुवथुः सुस्रुव । सुस्राव-सुस्रव, सुस्रुव सुस्रुम । **३. लुट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्रोता स्रोतारौ स्रोतारः । स्रोतासि स्रोतास्थः स्रोतास्थ । स्रोतास्मि स्रोतास्वः स्रोतास्मः । **४. लृट्** - स्रोष्यति स्रोष्यतः स्रोष्यन्ति । स्रोष्यसि स्रोष्यथः स्रोष्यथ । स्रोष्यामि स्रोष्यावः स्रोष्यामः । **५. लोट्** - स्रवतु, स्रवतात् स्रवताम् स्रवन्तु । स्रव, स्रवतात् स्रवतम् स्रवत । स्रवाणि स्रवाव स्रवाम । **६. लङ्** - अस्रवत् अस्रवताम् अस्रवन् । अस्रवः अस्रवतम् अस्रवत । अस्रवम् अस्रवाव अस्रवाम । **७. विधिलिङ्** - स्रवेत् स्रवेताम् स्रवेयुः । स्रवेः स्रवेतम् स्रवेत । स्रवेयम् स्रवेव स्रवेम । **८. आशीर्लिङ्** - स्रूयात् स्रूयास्ताम् स्रूयासुः । स्रूयाः स्रूयास्तम् स्रूयास्त । स्रूयासम् स्रूयास्व स्रूयास्म । **९. लुङ्** - असुस्रुवत्[२] असुस्रुवताम् असुस्रुवन् । असुस्रुवः असुस्रुवतम् असुस्रुवत । असुस्रुवम् असुस्रुवाव असुस्रुवाम । **१०. लृङ्** - अस्रोष्यत् अस्रोष्यताम् अस्रोष्यन् । अस्रोष्यः अस्रोष्यतम् अस्रोष्यत । अस्रोष्यम् अस्रोष्याव अस्रोष्याम ।

णिचि – स्रावयति[३], **सनि** – सुस्रूषति, **यकि** – स्रूयते ।

१. 'कृसृभृवृस्तुद्रु....' इति इण्निषेधः ।

२. 'णिश्रिद्रुस्रुभ्यः..' इति चङ् ।

३. 'बुधयुध.... स्रुभ्यो णेः' इति नित्यं परस्मैपदित्वम् ।

९४१. षु – प्रसवैश्वर्ययोः । सकर्म, अनिट्, परस्मै । प्रसवोऽभ्यनुज्ञानम् । आद्ये सकर्मकः । द्वितीये तु अकर्मकः ।

१. लट् – सवति सवतः सवन्ति । सवसि सवथः सवथ । सवामि सवावः सवामः । **२. लिट्** – सुषाव सुषुवतुः सुषुवुः । सुषोथ-सुषविथ सुषुवथुः सुषुव । सुषाव-सुषव, सुषुविव सुषुविम । **३. लुट्** – सोता सोतारौ सोतारः । सोतासि सोतास्थः सोतास्थ । सोतास्मि सोतास्वः सोतास्मः । **४. लृट्** – सोष्यति सोष्यतः सोष्यन्ति । सोष्यसि सोष्यथः सोष्यथ । सोष्यामि सोष्यावः सोष्यामः । **५. लोट्** – सवतु, सवतात् सवताम् सवन्तु । सव, सवतात् सवतम् सवत । सवानि सवाव सवाम । **६. लङ्** – असवत् असवताम् असवन् । असवः असवतम् असवत । असवम् असवाव असवाम । **७. विधिलिङ्** – सवेत् सवेताम् सवेयुः । सवेः सवेतम् सवेत । सवेयम् सवेव सवेम । **८. आशीर्लिङ्** – सूयात् सूयास्ताम् सूयासुः । सूयाः सूयास्तम् सूयास्त । सूयासम् सूयास्व सूयास्म । **९. लुङ्** – (i) असावीत्[१] असाविष्टाम् असाविषुः । असावीः असाविष्टम् असाविष्ट । असाविषम् असाविष्व असाविष्म । (ii) असौषीत्[२] असौष्टाम् असौषुः । असौषीः असौष्टम् असौष्ट । असौषम् असौष्व असौष्म । **१०. लृङ्** – असोष्यत् असोष्यताम् असोष्यन् । असोष्यः असोष्यतम् असोष्यत । असोष्यम् असोष्याव असोष्याम ।

णिचि – सावयति – ते, **सनि** – सुसूषति, **यकि** – सूयते ।

१. 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति सिचः इट् ।

२. 'स्तुसुधूञ्भ्यः...' इत्यत्र पूर्वोत्तरभ्यां ञिद्भ्यां साहचर्यात् सुनोतेरेव ग्रहणमिति पक्षे असौषीत् – सिद्धान्तकौमुदी ।

९४२. श्रु – श्रवणे । सकर्म, अनिट्, परस्मै ।

१. लट् – शृणोति[१] शृणुतः शृण्वन्ति । शृणोषि शृणुथः शृणुथ । शृणोमि शृणुवः-शृण्वः शृणुमः-शृण्मः । **२. लिट्** – शुश्राव शुश्रुवतुः शुश्रुवुः । शुश्रोथ शुश्रुवथुः शुश्रुव । शुश्राव-शुश्रव शुश्रुव शुश्रुम । **३. लुट्** – श्रोता श्रोतारौ श्रोतारः । श्रोतासि श्रोतास्थः श्रोतास्थ । श्रोतास्मि श्रोतास्वः श्रोतास्मः । **४. लृट्** – श्रोष्यति श्रोष्यतः श्रोष्यन्ति । श्रोष्यसि श्रोष्यथः श्रोष्यथ । श्रोष्यामि श्रोष्यावः श्रोष्यामः । **५. लोट्** – शृणोतु, शृणुतात् शृणुताम् शृण्वन्तु । शृणु, शृणुतात् शृणुतम् शृणुत । शृणवानि शृणवाव शृणवाम । **६. लङ्** – अशृणोत् अशृणुताम् अशृण्वन् । अशृणोः अशृणुतम् अशृणुत । अशृणवम् अशृणवाव अशृणवाम । **७. विधिलिङ्** – शृणुयात् शृणुयाताम् शृणुयुः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शृणुयाः शृणुयातम् शृणुयात । शृणुयाम् शृणुयाव शृणुयाम । **८. आशीर्लिङ्** – श्रूयात् श्रूयास्ताम् श्रूयासुः । श्रूयाः श्रूयास्तम् श्रूयास्त । श्रूयासम् श्रूयास्व श्रूयास्म । **९. लुङ्** – अश्रौषीत् अश्रौष्टाम् अश्रौषुः । अश्रौषीः अश्रौष्टम् अश्रौष्ट । अश्रौषम् अश्रौष्व अश्रौष्म । **१०. लृङ्** – अश्रोष्यत् अश्रोष्यताम् अश्रोष्यन् । अश्रोष्यः अश्रोष्यतम् अश्रोष्यत । अश्रोष्यम् अश्रोष्याव अश्रोष्याम ।

णिचि – श्रावयति – ते, **सनि** – शुश्रूषते[2], **यकि** – श्रूयते ।

१. 'श्रुवः शृ च' इति 'शृ' इत्यादेशः । 'श्नुप्रत्ययश्च शब्विषये' इति श्नुः ।

२. 'ज्ञाश्रुस्मृदृशां सनः' इति आत्मनेपदम् ।

९४३. ध्रु – स्थैर्ये । अकर्म, अनिट्, परस्मै । 'स्थैर्ये ध्रवति गत्यां तु स्थैर्ये च ध्रुवतीति शे' (श्लो. २२) – देवः ।

१. लट् – ध्रवति ध्रवतः ध्रवन्ति । ध्रवसि ध्रवथः ध्रवथ । ध्रवामि ध्रवावः ध्रवामः । **२. लिट्** – दुध्राव दुध्रुवतुः दुध्रुवुः । दुध्रोथ-दुध्रविथ दुध्रुवथुः दुध्रुव । दुध्राव-दुध्रव, दुध्रुविव दुध्रुविम । **३. लुट्** – ध्रोता ध्रोतारौ ध्रोतारः । ध्रोतासि ध्रोतास्थः ध्रोतास्थ । ध्रोतास्मि ध्रोतास्वः ध्रोतास्मः । **४. लृट्** – ध्रोष्यति ध्रोष्यतः ध्रोष्यन्ति । ध्रोष्यसि ध्रोष्यथः ध्रोष्यथ । ध्रोष्यामि ध्रोष्यावः ध्रोष्यामः । **५. लोट्** – ध्रवतु, ध्रवतात् ध्रवताम् ध्रवन्तु । ध्रव, ध्रवतात् ध्रवतम् ध्रवत । ध्रवाणि ध्रवाव ध्रवाम । **६. लङ्** – अध्रवत् अध्रवताम् अध्रवन् । अध्रवः अध्रवतम् अध्रवत । अध्रवम् अध्रवाव अध्रवाम । **७. विधिलिङ्** – ध्रवेत् ध्रवेताम् ध्रवेयुः । ध्रवेः ध्रवेतम् ध्रवेत । ध्रवेयम् ध्रवेव ध्रवेम । **८. आशीर्लिङ्** – ध्रूयात् ध्रूयास्ताम् ध्रूयासुः । ध्रूयाः ध्रूयास्तम् ध्रूयास्त । ध्रूयासम् ध्रूयास्व ध्रूयास्म । **९. लुङ्** – अध्रौषीत् अध्रौष्टाम् अध्रौषुः । अध्रौषीः अध्रौष्टम् अध्रौष्ट । अध्रौषम् अध्रौष्व अध्रौष्म । **१०. लृङ्** – अध्रोष्यत् अध्रोष्यताम् अध्रोष्यन् । अध्रोष्यः अध्रोष्यतम् अध्रोष्यत । अध्रोष्यम् अध्रोष्याव अध्रोष्याम ।

णिचि – ध्रावयति – ते, **सनि** – दुध्रूषति, **यकि** – ध्रूयते ।

९४४. दु – गतौ । सकर्म, अनिट्, परस्मै । 'दुनोति दूयते तापे दवतीति गतौ पदम्' (श्लो. २२) इति देवः ।

१. लट् – दवति दवतः दवन्ति । दवसि दवथः दवथ । दवामि दवावः दवामः । **२. लिट्** – दुदाव दुदुवतुः दुदुवुः । दुदोथ-दुदविथ दुदुवथुः दुदुव । दुदाव-दुदव दुदुविव दुदुविम । **३. लुट्** – दोता दोतारौ दोतारः । दोतासि दोतास्थः दोतास्थ । दोतास्मि दोतास्वः दोतास्मः । **४. लृट्** – दोष्यति दोष्यतः दोष्यन्ति । दोष्यसि दोष्यथः दोष्यथ । दोष्यामि दोष्यावः दोष्यामः । **५. लोट्** – दवतु, दवतात् दवताम् दवन्तु । दव, दवतात् दवतम् दवत । दवानि दवाव दवाम । **६. लङ्** – अदवत् अदवताम् अदवन् । अदवः अदवतम् अदवत । अदवम् अदवाव अदवाम । **७. विधिलिङ्** – दवेत् दवेताम् दवेयुः । दवेः दवेतम् दवेत । दवेयम् दवेव दवेम । **८. आशीर्लिङ्** – दूयात् दूयास्ताम् दूयासुः । दूयाः दूयास्तम् दूयास्त । दूयासम् दूयास्व दूयास्म । **९. लुङ्** – अदौषीत् अदौष्टाम् अदौषुः । अदौषीः अदौष्टम् अदौष्ट । अदौषम् अदौष्व अदौष्म । **१०. लृङ्** – अदोष्यत् अदोष्यताम् अदोष्यन् । अदोष्यः अदोष्यतम् अदोष्यत । अदोष्यम् अदोष्याव अदोष्याम ।

णिचि – दावयति – ते, **सनि** – दुदूषति, **यकि** – दूयते ।

९४५. द्रु – गतौ । सकर्म, अनिट्, परस्मै ।

१. लट् – द्रवति द्रवतः द्रवन्ति । द्रवसि द्रवथः द्रवथ । द्रवामि द्रवावः द्रवामः । **२. लिट्** – दुद्राव दुद्रुवतुः दुद्रुवुः । दुद्रोथ दुद्रुवथुः दुद्रुव । दुद्राव-दुद्रव, दुद्रुव दुद्रुम । **३. लुट्** – द्रोता द्रोतारौ द्रोतारः । द्रोतासि द्रोतास्थः द्रोतास्थ । द्रोतास्मि द्रोतास्वः द्रोतास्मः । **४. लृट्** – द्रोष्यति द्रोष्यतः द्रोष्यन्ति । द्रोष्यसि द्रोष्यथः द्रोष्यथ । द्रोष्यामि द्रोष्यावः द्रोष्यामः । **५. लोट्** – द्रवतु, द्रवतात् द्रवताम् द्रवन्तु ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्रव, द्रवतात् द्रवतम् द्रवत । द्रवाणि द्रवाव द्रवाम । ६. लङ् – अद्रवत् अद्रवताम् अद्रवन् । अद्रवः अद्रवतम् अद्रवत । अद्रवम् अद्रवाव अद्रवाम । ७. विधिलिङ् – द्रवेत् द्रवेताम् द्रवेयुः । द्रवेः द्रवेतम् द्रवेत । द्रवेयम् द्रवेव द्रवेम । ८. आशीर्लिङ् – द्रूयात् द्रूयास्ताम् द्रूयासुः । द्रूयाः द्रूयास्तम् द्रूयास्त । द्रूयासम् द्रूयास्व द्रूयास्म । ९. लुङ् – अदुद्रवत्[1] अदुद्रवताम् अदुद्रवन् । अदुद्रवः अदुद्रवतम् अदुद्रवत । अदुद्रवम् अदुद्रवाव अदुद्रवाम । १०. लृङ् – अद्रोष्यत् अद्रोष्यताम् अद्रोष्यन् । अद्रोष्यः अद्रोष्यतम् अद्रोष्यत । अद्रोष्यम् अद्रोष्याव अद्रोष्याम ।

णिचि – द्रावयति[2], **सनि** – दुद्रूषति, **यकि** – द्रूयते ।

१. 'णिश्रिद्रु....' इति चङ् ।

२. 'बुधयुध.... स्रुभ्यो णेः' इति नित्यं परस्मैपदित्वम् ।

९४६. जि – अभिभवे । अकर्म, अनिट्, परस्मै । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सक., द्वितीये त्वक. ।

१. लट् – जयति जयतः जयन्ति । जयसि जयथः जयथ । जयामि जयावः जयामः । **२. लिट्** – जिगाय[1] जिग्यतुः जिग्युः । जिगयिथ-जिगेथ जिग्यथुः जिग्य । जिगाय-जिगय जिग्यिव जिग्यिम । **३. लुट्** – जेता जेतारौ जेतारः । जेतासि जेतास्थः जेतास्थ । जेतास्मि जेतास्वः जेतास्मः । **४. लृट्** – जेष्यति जेष्यतः जेष्यन्ति । जेष्यसि जेष्यथः जेष्यथ । जेष्यामि जेष्यावः जेष्यामः । **५. लोट्** – जयतु, जयतात् जयताम् जयन्तु । जय, जयतात् जयतम् जयत । जयानि जयाव जयाम । **६. लङ्** – अजयत् अजयताम् अजयन् । अजयः अजयतम् अजयत । अजयम् अजयाव अजयाम । **७. विधिलिङ्** – जयेत् जयेताम् जयेयुः । जयेः जयेतम् जयेत । जयेयम् जयेव जयेम । **८. आशीर्लिङ्** – जीयात् जीयास्ताम् जीयासुः । जीयाः जीयास्तम् जीयास्त । जीयावम् जीयास्व जीयास्म । **९. लुङ्** – अजैषीत् अजैष्टाम् अजैषुः । अजैषीः अजैष्टम् अजैष्ट । अजैषम् अजैष्व अजैष्म । **१०. लृङ्** – अजेष्यत् अजेष्यताम् अजेष्यन् । अजेष्यः अजेष्यतम् अजेष्यत । अजेष्यम् अजेष्याव अजेष्याम ।

णिचि – जापयति[2]/ते, **सनि** – जिगीषति, **यकि** – जीयते ।

१. 'सन्लिटोर्जेः' इति कुत्वम् ।

२. 'क्रीङ्जीनां णौ' इति आत्वम् । 'अर्तिह्री...' इति पुक् ।

९४७. ज्रि – अभिभवे । सकर्म. अनिट्. परस्मै । 'अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः, द्वितीये त्वकर्मकः' इति सि.कौमुदी । क्षीरस्वामी तु 'जृ' इति पठति । तन्मते जारकः, जरन् इत्यादीनि रूपाणि । देवः क्षीरस्वामिसम्मतपाठस्य अनुकूलः । यदाह – 'जृणाति जीर्यति जरत्येकार्थे जारयत्यपि' (श्लो. ३९) इति । धातुकाव्ये तु 'ज्रि अभिभवे' इति पठित्वा, तदनुगुणः प्रयोगोऽपि प्रदर्शितः ।

१. लट् – ज्रयति ज्रयतः ज्रयन्ति । ज्रयसि ज्रयथः ज्रयथ । ज्रयामि ज्रयावः ज्रयामः । **२. लिट्** – जिज्राय जिज्रियतुः जिज्रियुः । जिज्रयिथ-जिज्रेथ जिज्रियथुः जिज्रिय । जिज्राय-जिज्रय जिज्रियिव जिज्रियिम । **३. लुट्** – ज्रेता ज्रेतारौ ज्रेतारः । ज्रेतासि ज्रेतास्थः ज्रेतास्थ । ज्रेतास्मि ज्रेतास्वः ज्रेतास्मः । **४. लृट्** – ज्रेष्यति ज्रेष्यतः ज्रेष्यन्ति । ज्रेष्यसि ज्रेष्यथः ज्रेष्यथ । ज्रेष्यामि ज्रेष्यावः ज्रेष्यामः । **५. लोट्** – ज्रयतु, ज्रयतात् ज्रयताम् ज्रयन्तु । ज्रय, ज्रयतात् ज्रयतम् ज्रयत । ज्रयाणि ज्रयाव ज्रयाम । **६. लङ्** – अज्रयत् अज्रयताम् अज्रयन् । अज्रयः अज्रयतम् अज्रयत । अज्रयम् अज्रयाव अज्रयाम । **७. विधिलिङ्** – ज्रयेत् ज्रयेताम् ज्रयेयुः । ज्रयेः ज्रयेतम् ज्रयेत । ज्रयेयम् ज्रयेव ज्रयेम । **८. आशीर्लिङ्** – ज्रीयात् ज्रीयास्ताम् ज्रीयासुः । ज्रीयाः ज्रीयास्तम् ज्रीयास्त । ज्रीयासम् ज्रीयास्व ज्रीयास्म । **९. लुङ्** – अज्रैषीत् अज्रैष्टाम् अज्रैषुः । अज्रैषीः अज्रैष्टम् अज्रैष्ट । अज्रैषम् अज्रैष्व अज्रैष्म । **१०. लृङ्** – अज्रेष्यत् अज्रेष्यताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अघ्रेष्यन् । अघ्रेष्यः अघ्रेष्यतम् अघ्रेष्यत । अघ्रेष्यम् अघ्रेष्याव अघ्रेष्याम ।

णिचि – घ्रापयति[2]/ते, **सनि** – जिघ्रीषति, **यकि** – घ्रीयते ।

९४८. ष्मिङ् – ईषद्धसने । अकर्म, अनिट्, आत्मने ।

१. लट् – स्मयते स्मयेते स्मयन्ते । स्मयसे स्मयेथे स्मयध्वे । स्मये स्मयावहे स्मयामहे । **२. लिट्** – सिष्मिये सिष्मियाते सिष्मियिरे । सिष्मियिषे सिष्मियाथे सिष्मियिध्वे-ढ्वे । सिष्मिये सिष्मियिवहे सिष्मियिमहे ।

३. लुट् – स्मेता स्मेतारौ स्मेतारः । स्मेतासि स्मेतास्थः स्मेतास्थ । स्मेतास्मि स्मेतास्वः स्मेतास्मः ।

४. लृट् – स्मेष्यते स्मेष्येते स्मेष्यन्ते । स्मेष्यसे स्मेष्येथे स्मेष्यध्वे । स्मेष्ये स्मेष्यावहे स्मेष्यामहे । **५. लोट्** – स्मयताम् स्मयेताम् स्मयन्ताम् । स्मयस्व स्मयेथाम् स्मयध्वम् । स्मयै स्मयावहै स्मयामहै । **६. लङ्** – अस्मयत अस्मयेताम् अस्मयन्त । अस्मयथाः अस्मयेथाम् अस्मयध्वम् । अस्मये अस्मयावहि अस्मयामहि ।

७. विधिलिङ् – स्मयेत स्मयेयाताम् स्मयेरन् । स्मयेथाः स्मयेयाथाम् स्मयेध्वम् । स्मयेय स्मयेवहि स्मयेमहि । **८. आशीर्लिङ्** – स्मेषीष्ट स्मेषीयास्ताम् स्मेषीरन् । स्मेषीष्ठाः स्मेषीयास्थाम् स्मेषीध्वम् । स्मेषीय स्मेषीवहि स्मेषीमहि । **९. लुङ्** – अस्मेष्ट अस्मेषाताम् अस्मेषत । अस्मेष्ठाः अस्मेषाथाम् अस्मेध्वम्/ढ्वम् । अस्मेषि अस्मेष्वहि अस्मेष्महि । **१०. लृङ्** – अस्मेष्यत अस्मेष्येताम् अस्मेष्यन्त । अस्मेष्यथाः अस्मेष्येथाम् अस्मेष्यध्वम् । अस्मेष्ये अस्मेष्यावहि अस्मेष्यावहि ।

णिचि – विस्माययति,[1] स्मापयते, **सनि** – सिस्मयिषते[2], **यकि** – स्मीयते ।

१. 'नित्यं स्मयतेः' इति नित्यम् आत्वं स्यात् णौ हेतोः स्मये । 'भीस्म्योः हेतुभये' इति हेतुतः स्मये आत्मनेपदम् ।

२. 'स्मिपूङ्रञ्ज्वशां सनि' (७.२.७४) इति सन्नन्ते इडागमः । 'सनि ग्रहगुहोश्च' (७.२.१२) इत्यस्य अपवादः ।

९४९. गुङ् – अव्यक्ते शब्दे । अकर्म, अनिट्, आत्मने ।

१. लट् – गवते गवेते गवन्ते । गवसे गवेथे गवध्वे । गवे गवावहे गवामहे । **२. लिट्** – जुगुवे जुगुवाते जुगुविरे । जुगुविषे जुगुवाथे जुगुविध्वे । जुगुवे जुगुविवहे जुगुविमहे । **३. लुट्** – गोता गोतारौ गोतारः । गोतासे गोतासाथे गोताध्वे । गोताहे गोतास्वहे गोतास्महे । **४. लृट्** – गोष्यते गोष्येते गोष्यन्ते । गोष्यसे गोष्येथे गोष्यध्वे । गोष्ये गोष्यावहे गोष्यामहे । **५. लोट्** – गवताम् गवेताम् गवन्ताम् । गवस्व गवेथाम् गवध्वम् । गवै गवावहै गवामहै । **६. लङ्** – अगवत अगवेताम् अगवन्त । अगवथाः अगवेथाम् अगवध्वम् । अगवे अगवावहि अगवामहि । **७. विधिलिङ्** – गवेत गवेयाताम् गवेरन् । गवेथाः गवेयाथाम् गवेध्वम् । गवेय गवेवहि गवेमहि । **८. आशीर्लिङ्** – गोषीष्ट गोषीयास्ताम् गोषीरन् । गोषीष्ठाः गोषीयास्थाम् गोषीध्वम्/गोषीढ्वम् । गोषीय गोषीवहि गोषीमहि । **९. लुङ्** – अगोष्ट अगोषाताम् अगोषत । अगोष्ठाः अगोषाथाम् अगोध्वम्/अगोढ्वम् । अगोषि अगोष्वहि अगोष्महि । **१०. लृङ्** – अगोष्यत अगोष्येताम् अगोष्यन्त । अगोष्यथाः अगोष्येथाम् अगोष्यध्वम् । अगोष्ये अगोष्यावहि अगोष्यामहि ।

णिचि – गवयति – ते, **सनि** – जुगूषते, **यकि** – गूयते

९५०. गाङ्[1] – गतौ । सकर्म, अनिट्, आत्मने । 'गाते गाङो गतावर्थे, कैगै शब्देऽस्य गायति' (श्लो.५) इति देवः ।

१. लट् – गाते[2] गाते गाते[3] । गासे गाथे गाध्वे । गै गावहे गामहे । **२. लिट्** – जगे जगाते जगिरे । जगिषे जगाथे जगिध्वे । जगे जगिवहे जगिमहे । **३. लुट्** – गाता गातारौ गातारः । गातासे गातासाथे गाताध्वे । गाताहे गातास्वहे गातास्महे । **४. लृट्** – गास्यते गास्येते गास्यन्ते । गास्यसे गास्येथे गास्यध्वे । गास्ये गास्यावहे गास्यामहे । **५. लोट्** – गाताम् गाताम् गाताम् । गास्व गाथाम् गाध्वम् । गै गावहै गामहै । **६. लङ्** – अगात अगाताम् अगात । अगाथाः अगाथाम् अगाध्वम् । अगे अगावहि अगामहि । **७. विधिलिङ्** – गेत गेयाताम् गेरन् । गेथाः गायाथाम् गेध्वम् । गेय गेवहि गेमहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८. आशीर्लिङ् - गासीष्ट गासीयास्ताम् गासीरन् । गासीष्ठाः गासीयास्थाम् गासीध्वम्/गासीढ्वम् । गासीय गासीवहि गासीमहि । **९. लुङ्** - अगास्त अगासाताम् अगासत । अगास्थाः अगासाथाम् अगाध्वम् । अगासि अगास्वहि अगास्वहि । **१०. लृङ्** - अगास्यत अगास्येताम् अगास्यन्त । अगास्यथाः अगास्येथाम् अगास्यध्वम् । अगास्ये अगास्यावहि अगास्यामहि ।

णिचि - गाययति-ते, **सनि** - जिगासते, **यकि** - गायते ।

१. ''अयं धातुरादादिकः इति न्यासपरमञ्जर्योः ('गापोष्ठक्' इत्यत्र) स्थितम् । शपि पाठे चास्य प्रयोजनं नास्ति । अस्माभिस्तु 'क्वापि पठितव्यः' इति मैत्रेयाद्यनुसारेण इह पठितः'' इति माधवीयधातुवृत्तिः ।

२. गाङ्धातोः लटः तादेशे शपि सवर्णदीर्घे टेः एत्वे 'गाते' इति रूपम् ।

३. ए.व. गा + अ + ते । द्वि.व. गा + अ + आते । ब.व. गा + अ + अते ।

९५१. कुङ् - शब्दे । अकर्म, अनिट्, आत्मने । 'अव्यक्ते शब्दे कवते कुवते त्वार्तशब्दने । कौतीति शब्दमात्रे स्यात्' (श्लो. २३) इति देवः ।

१. लट् - कवते कवेते कवन्ते । कवसे कवेथे कवध्वे । कवे कवावहे कवामहे । **२. लिट्** - चुकुवे चुकुवाते चुकुविरे । चुकुविषे चुकुवाथे चुकुविध्वे । चुकुवे चुकुविवहे चुकुविमहे । **३. लुट्** - कोता कोतारौ कोतारः । कोतासे कोतासाथे कोताध्वे । कोताहे कोतास्वहे कोतास्महे । **४. लृट्** - कोष्यते कोष्येते कोष्यन्ते । कोष्यसे कोष्येथे कोष्यध्वे । कोष्ये कोष्यावहे कोष्यामहे । **५. लोट्** - कवताम् कवेताम् कवन्ताम् । कवस्व कवेथाम् कवध्वम् । कवै कवावहै कवामहै । **६. लङ्** - अकवत अकवेताम् अकवन्त । अकवथाः अकवेथाम् अकवध्वम् । अकवे अकवावहि अकवामहि । **७. विधिलिङ्** - कवेत कवेयाताम् कवेरन् । कवेथाः कवेयाथाम् कवेध्वम् । कवेय कवेवहि कवेमहि । **८. आशीर्लिङ्** - कोषीष्ट कोषीयास्ताम् कोषीरन् । कोषीष्ठाः कोषीयास्थाम् कोषीध्वम्/ढ्वम् । कोषीय कोषीवहि कोषीमहि । **९. लुङ्** - अकोष्ट अकोषाताम् अकोषत । अकोष्ठाः अकोषाथाम् अकोध्वम्/ढ्वम् । अकोषि अकोष्वहि अकोष्महि । **१०. लृङ्** - अकोष्यत अकोष्येताम् अकोष्यन्त । अकोष्यथाः अकोष्येथाम् अकोष्यध्वम् । अकोष्ये अकोष्यावहि अकोष्यामहि ।

णिचि - कावयति - ते, **सनि** - चुकूषते, **यकि** - कूयते ।

९५२. घुङ् - शब्दे । अकर्म, अनिट्, आत्मने ।

१. लट् - घवते घवेते घवन्ते । घवसे घवेथे घवध्वे । घवे घवावहे घवामहे । **२. लिट्** - जुघुवे जुघुवाते जुघुविरे । जुघुविषे जुघुवाथे जुघुविध्वे । जुघुवे जुघुविवहे जुघुविमहे । **३. लुट्** - घोता घोतारौ घोतारः । घोतासे घोतासाथे घोताध्वे । घोताहे घोतास्वहे घोतास्महे । **४. लृट्** - घोष्यते घोष्येते घोष्यन्ते । घोष्यसे घोष्येथे घोष्यध्वे । घोष्ये घोष्यावहे घोष्यामहे । **५. लोट्** - घवताम् घवेताम् घवन्ताम् । घवस्व घवेथाम् घवध्वम् । घवै घवावहै घवामहै । **६. लङ्** - अघवत अघवेताम् अघवन्त । अघवथाः अघवेथाम् अघवध्वम् । अघवे अघवावहि अघवामहि । **७. विधिलिङ्** - घवेत घवेयाताम् घवेरन् । घवेथाः घवेयाथाम् घवेध्वम् । घवेय घवेवहि घवेमहि । **८. आशीर्लिङ्** - घोषीष्ट घोषीयास्ताम् घोषीरन् । घोषीष्ठाः घोषीयास्थाम् घोषीध्वम्/ढ्वम् । घोषीय घोषीवहि घोषीमहि । **९. लुङ्** - अघोष्ट अघोषाताम् अघोषत । अघोष्ठाः अघोषाथाम् अघोध्वम्/ढ्वम् । अघोषि अघोष्वहि अघोष्महि । **१०. लृङ्** - अघोष्यत अघोष्येताम् अघोष्यन्त । अघोष्यथाः अघोष्येथाम् अघोष्यध्वम् । अघोष्ये अघोष्यावहि अघोष्यामहि ।

णिचि - घावयति - ते, **सनि** - जुघूषते, **यकि** - घूयते ।

९५३. ढङ् - शब्दे । अकर्म, अनिट्, आत्मने,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् - अवते अवेते अवन्ते । अवसे अवेथे अवध्वे । अवे अवावहे अवामहे । **२. लिट्** - ऊवे ऊवाते ऊविरे । ऊविषे ऊवाथे ऊविध्वे । ऊवे ऊविवहे ऊविमहे । **३. लुट्** - ओता ओतारौ ओतारः । ओतासे ओतासाथे ओताध्वे । ओताहे ओतास्वहे ओतास्महे । **४. लृट्** - ओष्यते ओष्येते ओष्यन्ते । ओष्यसे ओष्येथे ओष्यध्वे । ओष्ये ओष्यावहे ओष्यामहे । **५. लोट्** - अवताम् अवेताम् अवन्ताम् । अवस्व अवेथाम् अवध्वम् । अवै अवावहै अवामहै । **६. लङ्** - आवत आवेताम् आवन्त । आवथाः आवेथाम् आवध्वम् । आवे आवावहि आवामहि । **७. विधिलिङ्** - अवेत अवेयाताम् अवेरन् । अवेथाः अवेयाथाम् अवेध्वम् । अवेय अवेवहि अवेमहि । **८. आशीर्लिङ्** - ओषीष्ट ओषीयास्ताम् ओषीरन् । ओषीष्ठाः ओषीयास्थाम् ओषीध्वम्/ढ्वम् । ओषीय ओषीवहि ओषीमहि । **९. लुङ्** - औष्ट औषाताम् औषत । औष्ठाः औषाथाम् औध्वम्/ढ्वम् । औषि औष्वहि औष्महि । **१०. लृङ्** - औष्यत औष्येताम् औष्यन्त । औष्यथाः औष्येथाम् औष्यध्वम् । औष्ये औष्यावहि औष्यामहि ।

णिचि - आवयति - ते, **सनि** - ऊषिषते, **यकि** - ऊयते ।

१५४. ङुङ् - शब्दे । अकर्म, अनिट्, आत्मने,

१. लट् - ङवते ङवेते ङवन्ते । ङवसे ङवेथे ङवध्वे । ङवे ङवावहे ङवामहे । **२. लिट्** - जुङुवे जुङुवाते जुङुविरे । जुङुविषे जुङुवाथे जुङुविध्वे । जुङुवे जुङुविवहे जुङुविमहे । **३. लुट्** - ङोता ङोतारौ ङोतारः । ङोतासे ङोतासाथे ङोताध्वे । ङोताहे ङोतास्वहे ङोतास्महे । **४. लृट्** - ङोष्यते ङोष्येते ङोष्यन्ते । ङोष्यसे ङोष्येथे ङोष्यध्वे । ङोष्ये ङोष्यावहे ङोष्यामहे । **५. लोट्** - ङवताम् ङवेताम् ङवन्ताम् । ङवस्व ङवेथाम् ङवध्वम् । ङवै ङवावहै ङवामहै । **६. लङ्** - अङवत अङवेताम् अङवन्त । अङवथाः अङवेथाम् अङवध्वम् । अङवे अङवावहि अङवामहि । **७. विधिलिङ्** - ङवेत ङवेयाताम् ङवेरन् । ङवेथाः ङवेयाथाम् ङवेध्वम् । ङवेय ङवेवहि ङवेमहि । **८. आशीर्लिङ्** - ङोषीष्ट ङोषीयास्ताम् ङोषीरन् । ङोषीष्ठाः ङोषीयास्थाम् ङोषीध्वम्/ढ्वम् । ङोषीय ङोषीवहि ङोषीमहि । **९. लुङ्** - अङोष्ट अङोषाताम् अङोषत । अङोष्ठाः अङोषाथाम् अङोध्वम्/ढ्वम् । अङोषि अङोष्वहि अङोष्महि । **१०. लृङ्** - अङोष्यत अङोष्येताम् अङोष्यन्त । अङोष्यथाः अङोष्येथाम् अङोष्यध्वम् । अङोष्ये अङोष्यावहि अङोष्यामहि ।

णिचि - ङावयति - ते, **सनि** - जिङूषते, **यकि** - ङूयते ।

१५५. च्युङ् - गतौ । सकर्म, अनिट्, आत्मने,

१. लट् - च्यवते च्यवेते च्यवन्ते । च्यवसे च्यवेथे च्यवध्वे । च्यवे च्यवावहे च्यवामहे । **२. लिट्** - चुच्युवे चुच्युवाते चुच्युविरे । चुच्युविषे चुच्युवाथे चुच्युविध्वे । चुच्युवे चुच्युविवहे चुच्युविमहे । **३. लुट्** - च्योता च्योतारौ च्योतारः । च्योतासे च्योतासाथे च्योताध्वे । च्योताहे च्योतास्वहे च्योतास्महे । **४. लृट्** - च्योष्यते च्योष्येते च्योष्यन्ते । च्योष्यसे च्योष्येथे च्योष्यध्वे । च्योष्ये च्योष्यावहे च्योष्यामहे । **५. लोट्** - च्यवताम् च्यवेताम् च्यवन्ताम् । च्यवस्व च्यवेथाम् च्यवध्वम् । च्यवै च्यवावहै च्यवामहै । **६. लङ्** - अच्यवत अच्यवेताम् अच्यवन्त । अच्यवथाः अच्यवेथाम् अच्यवध्वम् । अच्यवे अच्यवावहि अच्यवामहि । **७. विधिलिङ्** - च्यवेत च्यवेयाताम् च्यवेरन् । च्यवेथाः च्यवेयाथाम् च्यवेध्वम् । च्यवेय च्यवेवहि च्यवेमहि । **८. आशीर्लिङ्** - च्योषीष्ट च्योषीयास्ताम् च्योषीरन् । च्योषीष्ठाः च्योषीयास्थाम् च्योषीध्वम्/ढ्वम् । च्योषीय च्योषीवहि च्योषीमहि । **९. लुङ्** - अच्योष्ट अच्योषाताम् अच्योषत । अच्योष्ठाः अच्योषाथाम् अच्योध्वम्/ढ्वम् । अच्योषि अच्योष्वहि अच्योष्महि । **१०. लृङ्** - अच्योष्यत अच्योष्येताम् अच्योष्यन्त । अच्योष्यथाः अच्योष्येथाम् अच्योष्यध्वम् । अच्योष्ये अच्योष्यावहि अच्योष्यामहि ।

णिचि - च्यावयति - ते, **सनि** - चिच्यूषते, **यकि** - च्यूयते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

९५६. ज्युङ् - गतौ । सकर्म, अनिट्, आत्मने,

१. लट् - ज्यवते ज्यवेते ज्यवन्ते । ज्यवसे ज्यवेथे ज्यवध्वे । ज्यवे ज्यवावहे ज्यवामहे । **२. लिट्** - जुज्युवे जुज्युवाते जुज्युविरे । जुज्युविषे जुज्युवाथे जुज्युविध्वे । जुज्युवे जुज्युविवहे जुज्युविमहे । **३. लुट्** - ज्योता ज्योतारौ ज्योतारः । ज्योतासे ज्योतासाथे ज्योताध्वे । ज्योताहे ज्योतास्वहे ज्योतास्महे । **४. लृट्** - ज्योष्यते ज्योष्येते ज्योष्यन्ते । ज्योष्यसे ज्योष्येथे ज्योष्यध्वे । ज्योष्ये ज्योष्यावहे ज्योष्यामहे । **५. लोट्** - ज्यवताम् ज्यवेताम् ज्यवन्ताम् । ज्यवस्व ज्यवेथाम् ज्यवध्वम् । ज्यवै ज्यवावहै ज्यवामहै । **६. लङ्** - अज्यवत अज्यवेताम् अज्यवन्त । अज्यवथाः अज्यवेथाम् अज्यवध्वम् । अज्यवे अज्यवावहि अज्यवामहि ।

७. विधिलिङ् - ज्यवेत ज्यवेयाताम् ज्यवेरन् । ज्यवेथाः ज्यवेयाथाम् ज्यवेध्वम् । ज्यवेय ज्यवेवहि ज्यवेमहि । **८. आशीर्लिङ्** - ज्योषीष्ट ज्योषीयास्ताम् ज्योषीरन् । ज्योषीष्ठाः ज्योषीयास्थाम् ज्योषीध्वम्/ढ्वम् । ज्योषीय ज्योषीवहि ज्योषीमहि । **९. लुङ्** - अज्योष्ट अज्योषाताम् अज्योषत । अज्योष्ठाः अज्योषाथाम् अज्योध्वम्/ढ्वम् । अज्योषि अज्योष्वहि अज्योष्महि । **१०. लृङ्** - अज्योष्यत अज्योष्येताम् अज्योष्यन्त । अज्योष्यथाः अज्योष्येथाम् अज्योष्यध्वम् । अज्योष्ये अज्योष्यावहि अज्योष्यामहि ।

णिचि - ज्यावयति - ते, **सनि** - जिज्यूषते, **यकि** - ज्यूयते ।

९५७. प्रुङ् - गतौ । सकर्म, अनिट्, आत्मने,

१. लट् - प्रवते प्रवेते प्रवन्ते । प्रवसे प्रवेथे प्रवध्वे । प्रवे प्रवावहे प्रवामहे । **२. लिट्** - पुप्रुवे पुप्रुवाते पुप्रुविरे । पुप्रुविषे पुप्रुवाथे पुप्रुविध्वे । पुप्रुवे पुप्रुविवहे पुप्रुविमहे । **३. लुट्** - प्रोता प्रोतारौ प्रोतारः । प्रोतासे प्रोतासाथे प्रोताध्वे । प्रोताहे प्रोतास्वहे प्रोतास्महे । **४. लृट्** - प्रोष्यते प्रोष्येते प्रोष्यन्ते । प्रोष्यसे प्रोष्येथे प्रोष्यध्वे । प्रोष्ये प्रोष्यावहे प्रोष्यामहे । **५. लोट्** - प्रवताम् प्रवेताम् प्रवन्ताम् । प्रवस्व प्रवेथाम् प्रवध्वम् । प्रवै प्रवावहै प्रवामहै । **६. लङ्** - अप्रवत अप्रवेताम् अप्रवन्त । अप्रवथाः अप्रवेथाम् अप्रवध्वम् । अप्रवे अप्रवावहि अप्रवामहि । **७. विधिलिङ्** - प्रवेत प्रवेयाताम् प्रवेरन् । प्रवेथाः प्रवेयाथाम् प्रवेध्वम् । प्रवेय प्रवेवहि प्रवेमहि । **८. आशीर्लिङ्** - प्रोषीष्ट प्रोषीयास्ताम् प्रोषीरन् । प्रोषीष्ठाः प्रोषीयास्थाम् प्रोषीध्वम्/ढ्वम् । प्रोषीय प्रोषीवहि प्रोषीमहि । **९. लुङ्** - अप्रोष्ट अप्रोषाताम् अप्रोषत । अप्रोष्ठाः अप्रोषाथाम् अप्रोध्वम्/ढ्वम् । अप्रोषि अप्रोष्वहि अप्रोष्महि । **१०. लृङ्** - अप्रोष्यत अप्रोष्येताम् अप्रोष्यन्त । अप्रोष्यथाः अप्रोष्येथाम् अप्रोष्यध्वम् । अप्रोष्ये अप्रोष्यावहि अप्रोष्यामहि ।

णिचि - प्रावयति*, **सनि** - पुप्रूषते, **यकि** - प्रूयते ।

णिचि – यामयति-यमयति[2] – ते, **सनि** – यियंसति, **यकि** – यम्यते ।

१. 'इषुगमियमां छः' इति छकारे अन्तादेशे तुकि श्चुत्वेन चकारः । 'छे च' इति तुक् ।

२. परिवेषणे तु मित्त्वम् । मित्त्वात् ह्रस्वः । 'यमोऽपरिवेषणे' इति भोजनादन्यत्र मित्त्वं न ।

९८५. तप – सन्तापे । सकर्म, अनिट्, परस्मै । 'सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् । ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति च' (श्लो. १३१) इति देवः ।

१. लट् – तपति तपतः तपन्ति । तपसि तपथः तपथ । तपामि तपावः तपामः । **२. लिट्** – तताप तेपतुः तेपुः । तेपिथ-ततप्थ तेपथुः तेप । तताप, ततप तेपिव तेपिम । **३. लुट्** – तप्ता तप्तारौ तप्तारः । तप्तासि तप्तास्थः तप्तास्थ । तप्तास्मि तप्तास्वः तप्तास्मः । **४. लृट्** – तप्स्यति तप्स्यतः तप्स्यन्ति । तप्स्यसि तप्स्यथः तप्स्यथ । तप्स्यामि तप्स्यावः तप्स्यामः । **५. लोट्** – तपतु, तपतात् तपताम् तपन्तु । तप, तपतात् तपतम् तपत । तपानि तपाव तपाम । **६. लङ्** – अतपत् अतपताम् अतपन् । अतपः अतपतम् अतपत । अतपम् अतपाव अतपाम । **७. विधिलिङ्** – तपेत् तपेताम् तपेयुः । तपेः तपेतम् तपेत । तपेयम् तपेव तपेम । **८. आशीर्लिङ्** – तप्यात् तप्यास्ताम् तप्यासुः । तप्याः तप्यास्तम् तप्यास्त । तप्यासम् तप्यास्व तप्यास्म । **९. लुङ्** – अताप्सीत् अताप्ताम् अताप्सुः । अताप्सीः अताप्तम् अताप्त । अताप्सम् अताप्स्व अताप्स्म । **१०. लृङ्** – अतप्स्यत् अतप्स्यताम् अतप्स्यन् । अतप्स्यः अतप्स्यतम् अतप्स्यत । अतप्स्यम् अतप्स्याव अतप्स्याम ।

णिचि – तापयति – ते, **सनि** – तितप्सति, **यकि** – तप्यते ।

९८६. त्यज – हानौ । सकर्म, अनिट्, परस्मै । हानिः = उत्सर्गः इति बालमनोरमा । त्यागः इति क्षीरस्वामी ।

१. लट् – त्यजति त्यजतः त्यजन्ति । त्यजसि त्यजथः त्यजथ । त्यजामि त्यजावः त्यजामः । **२. लिट्** – तत्याज तत्यजतुः तत्यजुः । तत्यजिथ-तत्यक्थ तत्यजथुः तत्यज । तत्याज, तत्यज तत्यजिव तत्यजिम । **३. लुट्** – त्यक्ता त्यक्तारौ त्यक्तारः । त्यक्तासि त्यक्तास्थः त्यक्तास्थ । त्यक्तास्मि त्यक्तास्वः त्यक्तास्मः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. लृट् – त्यक्ष्यति त्यक्ष्यतः त्यक्ष्यन्ति । त्यक्ष्यसि त्यक्ष्यथः त्यक्ष्यथ । त्यक्ष्यामि त्यक्ष्यावः त्यक्ष्यामः । **५. लोट्** – त्यजतु, त्यजतात् त्यजताम् त्यजन्तु । त्यज, त्यजतात् त्यजतम् त्यजत । त्यजानि त्यजाव त्यजाम । **६. लङ्** – अत्यजत् अत्यजताम् अत्यजन् । अत्यजः अत्यजतम् अत्यजत । अत्यजम् अत्यजाव अत्यजाम । **७. विधिलिङ्** – त्यजेत् त्यजेताम् त्यजेयुः । त्यजेः त्यजेतम् त्यजेत । त्यजेयम् त्यजेव त्यजेम । **८. आशीर्लिङ्** – त्यज्यात् त्यज्यास्ताम् त्यज्यासुः । त्यज्याः त्यज्यास्तम् त्यज्यास्त । त्यज्यासम् त्यज्यास्व त्यज्यास्म । **९. लुङ्** – अत्याक्षीत् अत्याक्ताम् अत्याक्षुः । अत्याक्षीः अत्याक्तम् अत्याक्त । अत्याक्षम् अत्याक्ष्व अत्याक्ष्म । **१०. लृङ्** – अत्यक्ष्यत् अत्यक्ष्यताम् अत्यक्ष्यन् । अत्यक्ष्यः अत्यक्ष्यतम् अत्यक्ष्यत । अत्यक्ष्यम् अत्यक्ष्याव अत्यक्ष्याम ।

णिचि – त्याजयति – ते, **सनि** – तित्यक्षति, **यकि** – त्यज्यते ।

९८७. षञ्ज – सङ्गे । सकर्म, अनिट्, परस्मै ।

१. लट् – सजति[1] सजतः सजन्ति । सजसि सजथः सजथ । सजामि सजावः सजामः । **२. लिट्** – ससञ्ज ससञ्जतुः[2] ससञ्जुः । ससञ्जिथ-ससङ्क्थ ससञ्जथुः ससञ्ज । ससञ्ज ससञ्जिव ससञ्जिम । **३. लुट्** – सङ्क्ता सङ्क्तारौ सङ्क्तारः । सङ्क्तासि सङ्क्तास्थः सङ्क्तास्थ । सङ्क्तास्मि सङ्क्तास्वः सङ्क्तास्मः । **४. लृट्** – सङ्क्ष्यति सङ्क्ष्यतः सङ्क्ष्यन्ति । सङ्क्ष्यसि सङ्क्ष्यथः सङ्क्ष्यथ । सङ्क्ष्यामि सङ्क्ष्यावः सङ्क्ष्यामः । **५. लोट्** – सजतु, सजतात् सजताम् सजन्तु । सज, सजतात् सजतम् सजत । सजानि सजाव सजाम । **६. लङ्** – असजत् असजताम् असजन् । असजः असजतम् असजत । असजम् असजाव असजाम । **७. विधिलिङ्** – सजेत् सजेताम् सजेयुः । सजेः सजेतम् सजेत । सजेयम् सजेव सजेम । **८. आशीर्लिङ्** – सज्यात् सज्यास्ताम् सज्यासुः । सज्याः सज्यास्तम् सज्यास्त । सज्यासम् सज्यास्व सज्यास्म । **९. लुङ्** – असाङ्क्षीत् असाङ्क्ताम् असाङ्क्षुः । असाङ्क्षीः असाङ्क्तम् असाङ्क्त । असाङ्क्षम् असाङ्क्ष्व असाङ्क्ष्म । **१०. लृङ्** – असङ्क्ष्यत् असङ्क्ष्यताम् असङ्क्ष्यन् । असङ्क्ष्यः असङ्क्ष्यतम् असङ्क्ष्यत । असङ्क्ष्यम् असङ्क्ष्याव असङ्क्ष्याम ।

णिचि – सञ्जयति – ते, **सनि** – सिसङ्क्षति, **यकि** – सज्यते ।

१. 'दंशसञ्जस्वञ्जां शपि' इति शपि नलोपः ।

२. 'अतुसादौ कित्त्वान् नलोपः । ससजतुः ससजुः' इति बालमनोरमा । माधवीयधातुवृत्तौ लिख्यते – ''असंयोगात् लिट् कित्' इति कित्त्वनिषेधात् 'अनिदिताम्...' इति उपधालोपो न भवति'' इति । अत्र माधवीयधातुवृत्तिकारस्य मतम् एव युक्तिसम्मतम् इति भाति । अतः नलोपघटितानि रूपाणि इह न दर्शितानि ।

९८८. दृशिर् – प्रेक्षणे । सकर्म, अनिट्, परस्मै ।

१. लट् – पश्यति[1] पश्यतः पश्यन्ति । पश्यसि पश्यथः पश्यथ । पश्यामि पश्यावः पश्यामः । **२. लिट्** – ददर्श ददृशतुः ददृशुः । ददर्शिथ-दद्रष्ठ ददृशथुः ददृश । ददर्श ददृशिव ददृशिम । **३. लुट्** – द्रष्टा द्रष्टारौ द्रष्टारः । द्रष्टासि द्रष्टास्थः द्रष्टास्थ । द्रष्टास्मि द्रष्टास्वः द्रष्टास्मः । **४. लृट्** – द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति । द्रक्ष्यसि द्रक्ष्यथः द्रक्ष्यथ । द्रक्ष्यामि द्रक्ष्यावः द्रक्ष्यामः । **५. लोट्** – पश्यतु, पश्यतात् पश्यताम् पश्यन्तु । पश्य, पश्यतात् पश्यतम् पश्यत । पश्यानि पश्याव पश्याम । **६. लङ्** – अपश्यत् अपश्यताम् अपश्यन् । अपश्यः अपश्यतम् अपश्यत । अपश्यम् अपश्याव अपश्याम । **७. विधिलिङ्** – पश्येत् पश्येताम् पश्येयुः । पश्येः पश्येतम् पश्येत । पश्येयम् पश्येव पश्येम । **८. आशीर्लिङ्** – दृश्यात् दृश्यास्ताम् दृश्यासुः । दृश्याः दृश्यास्तम् दृश्यास्त । दृश्यासम् दृश्यास्व दृश्यास्म । **९. लुङ्** – (i) अद्राक्षीत् अद्राष्टाम् अद्राक्षुः । अद्राक्षीः अद्राष्टम् अद्राष्ट । अद्राक्षम् अद्राक्ष्व अद्राक्ष्म । (ii) अदर्शत्[2] अदर्शताम् अदर्शन् । अदर्शः अदर्शतम् अदर्शत । अदर्शम् अदर्शाव अदर्शाम । **१०. लृङ्** – अद्रक्ष्यत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अद्रक्ष्यताम् अद्रक्ष्यन् । अद्रक्ष्यः अद्रक्ष्यतम् अद्रक्ष्यत । अद्रक्ष्यम् अद्रक्ष्याव अद्रक्ष्याम ।

णिचि – दर्शयति – ते, **सनि** – दिदृक्षते[३], **यकि** – दृश्यते ।

१. 'पाघ्राध्मा...' इत्यनेन पश्यादेशः ।

२. 'इरितो वा' इति वा अङ् । 'ऋदृशोऽङि गुणः' इति गुणः ।

३. 'ज्ञाश्रुस्मृदृशां सनः' इति सन्नन्तस्य आत्मनेपदिता ।

९८९. दंश – दशने । सकर्म, अनिट्, परस्मै । 'दशनम् = दंष्ट्राव्यापारः । हनुमूलगताः स्थूलदन्ताः दंष्ट्राः । तद्व्यापारः तत्क्रियादिरूप इत्यर्थः' इति बालमनोरमा । 'दंशने दशतीति स्यात् तत्र दंशयते णिचि । भाषणे दंशयेत्' (श्लो. १६४-१६५) इति देवः ।

१. लट् – दशति[१] दशतः दशन्ति । दशसि दशथः दशथ । दशामि दशावः दशामः । **२. लिट्** – ददंश ददंशतुः ददंशुः । ददंशिथ-ददंष्ठ ददंशथुः ददंश । ददंश ददंशिव ददंशिम । **३. लुट्** – दंष्टा दंष्टारौ दंष्टारः । दंष्टासि दंष्टास्थः दंष्टास्थ । दंष्टास्मि दंष्टास्वः दंष्टास्मः । **४. लृट्** – दङ्क्ष्यति दङ्क्ष्यतः दङ्क्ष्यन्ति । दङ्क्ष्यसि दङ्क्ष्यथः दङ्क्ष्यथ । दङ्क्ष्यामि दङ्क्ष्यावः दङ्क्ष्यामः । **५. लोट्** – दशतु, दशतात् दशताम् दशन्तु । दश, दशतात् दशतम् दशत । दशानि दशाव दशाम । **६. लङ्** – अदशत् अदशताम् अदशन् । अदशः अदशतम् अदशत । अदशम् अदशाव अदशाम । **७. विधिलिङ्** – दशेत् दशेताम् दशेयुः । दशेः दशेतम् दशेत । दशेयम् दशेव दशेम । **८. आशीर्लिङ्** – दश्यात् दश्यास्ताम् दश्यासुः । दश्याः दश्यास्तम् दश्यास्त । दश्यासम् दश्यास्व दश्यास्म । **९. लुङ्** – अदाङ्क्षीत् अदांष्टाम् अदांक्षुः । अदांक्षीः अदांष्टम् अदांष्ट । अदांक्षम् अदांक्ष्व अदांक्ष्म । **१०. लृङ्** – अदङ्क्ष्यत् अदङ्क्ष्यताम् अदङ्क्ष्यन् । अदङ्क्ष्यः अदङ्क्ष्यतम् अदङ्क्ष्यत । अदङ्क्ष्यम् अदङ्क्ष्याव अदङ्क्ष्याम ।

णिचि – दंशयति – ते, **सनि** – दिदङ्क्षति, **यकि** – दश्यते ।

१. 'दंशसञ्जस्वञ्जां शपि' इति शपि नलोपः ।

९९०. कृष – विलेखने । द्विकर्म, अनिट्, परस्मै । विलेखनम् = आकर्षणम् । हलोत्किरणमिति क्षीरस्वामी ।

१. लट् – कर्षति कर्षतः कर्षन्ति । कर्षसि कर्षथः कर्षथ । कर्षामि कर्षावः कर्षामः । **२. लिट्** – चकर्ष चकृषतुः चकृषुः । चकर्षिथ चकृषथुः चकृष । चकर्ष चकृषिव चकृषिम । **३. लुट्** – (i) क्रष्टा क्रष्टारौ क्रष्टारः । क्रष्टासि क्रष्टास्थः क्रष्टास्थ । क्रष्टास्मि क्रष्टास्वः क्रष्टास्मः । (ii) कर्ष्टा[१] कर्ष्टारौ कर्ष्टारः । कर्ष्टासि कर्ष्टास्थः कर्ष्टास्थ । कर्ष्टास्मि कर्ष्टास्वः कर्ष्टास्मः । **४. लृट्** – (i) क्रक्ष्यति क्रक्ष्यतः क्रक्ष्यन्ति । क्रक्ष्यसि क्रक्ष्यथः क्रक्ष्यथ । क्रक्ष्यामि क्रक्ष्यावः क्रक्ष्यामः । (ii) कर्क्ष्यति कर्क्ष्यतः कर्क्ष्यन्ति । कर्क्ष्यसि कर्क्ष्यथः कर्क्ष्यथ । कर्क्ष्यामि कर्क्ष्यावः कर्क्ष्यामः । **५. लोट्** – कर्षतु, कर्षतात् कर्षताम् कर्षन्तु । कर्ष, कर्षतात् कर्षतम् कर्षत । कर्षाणि कर्षाव कर्षाम । **६. लङ्** – अकर्षत् अकर्षताम् अकर्षन् । अकर्षः अकर्षतम् अकर्षत । अकर्षम् अकर्षाव अकर्षाम । **७. विधिलिङ्** – कर्षेत् कर्षेताम् कर्षेयुः । कर्षेः कर्षेतम् कर्षेत । कर्षेयम् कर्षेव कर्षेम । **८. आशीर्लिङ्** – कृष्यात् कृष्यास्ताम् कृष्यासुः । कृष्याः कृष्यास्तम् कृष्यास्त । कृष्यासम् कृष्यास्व कृष्यास्म । **९. लुङ्** – (i) अक्राक्षीत्[२] अक्राष्टाम् अक्राक्षुः । अक्राक्षीः अक्राष्टम् अक्राष्ट । अक्राक्षम् अक्राक्ष्व अक्राक्ष्म । (ii) अकार्क्षीत् अकार्ष्टाम् अकार्क्षुः । अकार्क्षीः अकार्ष्टम् अकार्ष्ट । अकार्क्षम् अकार्क्ष्व अकार्क्ष्म । (iii) अकृक्षत् अकृक्षताम् अकृक्षन् । अकृक्षः अकृक्षतम् अकृक्षत । अकृक्षम् अकृक्षाव अकृक्षाम । **१०. लृङ्** - (i) अक्रक्ष्यत् अक्रक्ष्यताम् अक्रक्ष्यन् । अक्रक्ष्यः अक्रक्ष्यतम् अक्रक्ष्यत । अक्रक्ष्यम् अक्रक्ष्याव अक्रक्ष्याम । (ii) अकर्क्ष्यत् अकर्क्ष्यताम् अकर्क्ष्यन् । अकर्क्ष्यः अकर्क्ष्यतम् अकर्क्ष्यत । अकर्क्ष्यम् अकर्क्ष्याव अकर्क्ष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – कर्षयति – ते, **सनि** – चिकृक्षते, **यकि** – कृष्यते ।

१. 'अनुदात्तस्य च ऋदुपधस्यान्यतरस्याम्' इति अम् विकल्पेन । अमागमाभावे लघूपधगुणे 'कर्ष्टा' इति रूपम् ।

२. 'तृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति सिचि 'अनुदात्तस्य...' इति अमागमः । अमागमाभावे 'अकार्क्षीत्' । 'शल इगुपधात..' इति क्सादेशे 'अकृक्षत्' इति ।

९९१. दह – भस्मीकरणे । सकर्म, अनिट्, परस्मै,

१. लट् – दहति दहतः दहन्ति । दहसि दहथः दहथ । दहामि दहावः दहामः । **२. लिट्** – ददाह देहतुः देहुः । देहिथ-ददग्ध देहथुः देह । ददाह-ददह देहिव देहिम । **३. लुट्** – दग्धा दग्धारौ दग्धारः । दग्धासि दग्धास्थः दग्धास्थ । दग्धास्मि दग्धास्वः दग्धास्मः । **४. लृट्** – धक्ष्यति धक्ष्यतः धक्ष्यन्ति । धक्ष्यसि धक्ष्यथः धक्ष्यथ । धक्ष्यामि धक्ष्यावः धक्ष्यामः । **५. लोट्** – दहतु, दहतात् दहताम् दहन्तु । दह, दहतात् दहतम् दहत । दहानि दहाव दहाम । **६. लङ्** – अदहत् अदहताम् अदहन् । अदहः अदहतम् अदहत । अदहम् अदहाव अदहाम । **७. विधिलिङ्** – दहेत् दहेताम् दहेयुः । दहेः दहेतम् दहेत । दहेयम् दहेव दहेम । **८. आशीर्लिङ्** – दह्यात् दह्यास्ताम् दह्यासुः । दह्याः दह्यास्तम् दह्यास्त । दह्यासम् दह्यास्व दह्यास्म । **९. लुङ्** – अधाक्षीत् अदाग्धाम् अधाक्षुः । अधाक्षीः अदाग्धम् अदाग्ध । अधाक्षम् अधाक्ष्व अधाक्ष्म । **१०. लृङ्** – अधक्ष्यत् अधक्ष्यताम् अधक्ष्यन् । अधक्ष्यः अधक्ष्यतम् अधक्ष्यत । अधक्ष्यम् अधक्ष्याव अधक्ष्याम ।

णिचि – दाहयति – ते, **सनि** – दिधक्षति, **यकि** – दह्यते ।

९९२. मिह – सेचने । सकर्म, अनिट्, परस्मै,

१. लट् – मेहति मेहतः मेहन्ति । मेहसि मेहथः मेहथ । मेहामि मेहावः मेहामः । **२. लिट्** – मिमेह मिमिहतुः मिमिहुः । मिमेहिथ मिमिहथुः मिमिह । मिमेह मिमिहिव मिमिहिम । **३. लुट्** – मेढा मेढारौ मेढारः । मेढासि मेढास्थः मेढास्थ । मेढास्मि मेढास्वः मेढास्मः । **४. लृट्** – मेक्ष्यति मेक्ष्यतः मेक्ष्यन्ति । मेक्ष्यसि मेक्ष्यथः मेक्ष्यथ । मेक्ष्यामि मेक्ष्यावः मेक्ष्यामः । **५. लोट्** – मेहतु, मेहतात् मेहताम् मेहन्तु । मेह, मेहतात् मेहतम् मेहत । मेहानि मेहाव मेहाम । **६. लङ्** – अमेहत् अमेहताम् अमेहन् । अमेहः अमेहतम् अमेहत । अमेहम् अमेहाव अमेहाम । **७. विधिलिङ्** – मेहेत् मेहेताम् मेहेयुः । मेहेः मेहेतम् मेहेत । मेहेयम् मेहेव मेहेम । **८. आशीर्लिङ्** – मिह्यात् मिह्यास्ताम् मिह्यासुः । मिह्याः मिह्यास्तम् मिह्यास्त । मिह्यासम् मिह्यास्व मिह्यास्म । **९. लुङ्** – अमिक्षत् अमिक्षताम् अमिक्षन् । अमिक्षः अमिक्षतम् अमिक्षत । अमिक्षम् अमिक्षाव अमिक्षाम । **१०. लृङ्** – अमेक्ष्यत् अमेक्ष्यताम् अमेक्ष्यन् । अमेक्ष्यः अमेक्ष्यतम् अमेक्ष्यत । अमेक्ष्यम् अमेक्ष्याव अमेक्ष्याम ।

णिचि – मेहयति – ते, **सनि** – मिमिक्षति, **यकि** – मिह्यते ।

९९३. कित – निवासे रोगापनयने च । सकर्म, सेट्, परस्मै । 'अर्थनिर्देशस्य उपलक्षणत्वात् अर्थान्तरेषु वृत्तिः । 'कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च' इति निबद्धेष्वर्थेषु 'गुप्तिज्किद्भ्यः सन्' इति सन् विहितः' इति तत्त्वबोधिनीटीका । 'निवासे तु केतयति (चुरादौ उक्तः)' इति सि.कौमुदी । आभरणकारः अस्य आत्मनेपदं मनुते । मा.धा.वृत्तौ तत् खण्डितम् ।

१. लट् – (i) चिकित्सति[1] चिकित्सतः चिकित्सन्ति । चिकित्ससि चिकित्सथः चिकित्सथ । चिकित्सामि चिकित्सावः चिकित्सामः । (ii) केतयति केतयतः केतयन्ति । केतयसि केतयथः केतयथ । केतयामि केतयावः केतयामः । (iii) केतयते केतयेते केतयन्ते । केतयसे केतयेथे केतयध्वे । केतये केतयावहे केतयामहे । **२. लिट्** – (i) चिकित्साञ्चकार चिकित्साञ्चक्रतुः चिकित्साञ्चक्रुः । चिकित्साञ्चकर्थ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिकित्साञ्चक्रथुः चिकित्साञ्चक्र । चिकित्साञ्चकार/चिकित्साञ्चकर चिकित्साञ्चकृव चिकित्साञ्चकृम । (ii) चिकित्साम्बभूव चिकित्साम्बभूवतुः चिकित्साम्बभूवुः । चिकित्साम्बभूविथ चिकित्साम्बभूवथुः चिकित्साम्बभूव । चिकित्साम्बभूव चिकित्साम्बभूविव चिकित्साम्बभूविम । (iii) चिकित्सामास चिकित्सामासतुः चिकित्सामासुः । चिकित्सामासिथ चिकित्सामासथुः चिकित्सामास । चिकित्सामास चिकित्सामासिव चिकित्सामासिम । (iv) केतयाञ्चकार केतयाञ्चक्रतुः केतयाञ्चक्रुः । केतयाञ्चकर्थ केतयाञ्चक्रथुः केतयाञ्चक्र । केतयाञ्चकार, केतयाञ्चकर केतयाञ्चकृव केतयाञ्चकृम । (v) केतयाञ्चक्रे केतयाञ्चक्राते केतयाञ्चक्रिरे । केतयाञ्चकृषे केतयाञ्चक्राथे केतयाञ्चकृढ्वे । केतयाञ्चक्रे केतयाञ्चकृवहे केतयाञ्चकृमहे । (vi) केतयाम्बभूव केतयाम्बभूवतुः केतयाम्बभूवुः । केतयाम्बभूविथ केतयाम्बभूवथुः केतयाम्बभूव । केतयाम्बभूव केतयाम्बभूविव केतयाम्बभूविम । (vii) केतयामास केतयामासतुः केतयामासुः । केतयामासिथ केतयामासथुः केतयामास । केतयामास केतयामासिव केतयामासिम । **३. लुट्** – (i) चिकित्सिता चिकित्सितारौ चिकित्सितारः । चिकित्सितासि चिकित्सितास्थः चिकित्सितास्थ । चिकित्सितास्मि चिकित्सितास्वः चिकित्सितास्मः । (ii) केतयिता केतयितारौ केतयितारः । केतयितासि केतयितास्थः केतयितास्थ । केतयितास्मि केतयितास्वः केतयितास्मः । (iii) केतयिता केतयितारौ केतयितारः । केतयितासे केतयितासाथे केतयिताध्वे । केतयिताहे केतयितास्वहे केतयितास्महे । **४. लृट्** – (i) चिकित्सिष्यति चिकित्सिष्यतः चिकित्सिष्यन्ति । चिकित्सिष्यसि चिकित्सिष्यथः चिकित्सिष्यथ । चिकित्सिष्यामि चिकित्सिष्यावः चिकित्सिष्यामः । (ii) केतयिष्यति केतयिष्यतः केतयिष्यन्ति । केतयिष्यसि केतयिष्यथः केतयिष्यथ । केतयिष्यामि केतयिष्यावः केतयिष्यामः । (iii) केतयिष्यते केतयिष्येते केत-यिष्यन्ते । केतयिष्यसे केतयिष्येथे केतयिष्यध्वे । केतयिष्ये केतयिष्यावहे केतयिष्यामहे । **५. लोट्** – (i) चिकित्सतु, चिकित्सतात् चिकित्सताम् चिकित्सन्तु । चिकित्स, चिकित्सतात् चिकित्सतम् चिकित्सत । चिकित्सानि चिकित्साव चिकित्साम । (ii) केतयतु, केतयतात् केतयताम् केतयन्तु । केतय, केतयतात् केतयतम् केतयत । केतयानि केतयाव केतयाम । (iii) केतयताम् केतयेताम् केतयन्ताम् । केतयस्व केतयेथाम् केतयध्वम् । केतयै केतयावहै केतयामहै । **६. लङ्** – (i) अचिकित्सत् अचिकित्सताम् अचिकित्सन् । अचिकित्सः अचिकित्सतम् अचिकित्सत । अचिकित्सम् अचिकित्साव अचिकित्साम । (ii) अकेतयत् अकेतयताम् अकेतयन् । अकेतयः अकेतयतम् अकेतयत । अकेतयम् अकेतयाव अकेतयाम । (iii) अकेतयत अकेतयेताम् अकेतयन्त । अकेतयथाः अकेतयेथाम् अकेतयध्वम् । अकेतये अकेतयावहि अकेतयामहि । **७. विधिलिङ्** – (i) चिकित्सेत् चिकित्सेताम् चिकित्सेयुः । चिकित्सेः चिकित्सेतम् चिकित्सेत । चिकित्सेयम् चिकित्सेव चिकित्सेम । (ii) केतयेत् केतयेताम् केतयेयुः । केतयेः केतयेतम् केतयेत । केतयेयम् केतयेव केतयेम । (iii) केतयेत केतयेयाताम् केतयेरन् । केतयेथाः केतये-याथाम् केतयेध्वम् । केतयेय केतयेवहि केतयेमहि । **८. आशीर्लिङ्** – (i) चिकित्स्यात् चिकित्स्यास्ताम् चिकित्स्यासुः । चिकित्स्याः चिकित्स्यास्तम् चिकित्स्यास्त । चिकित्स्यासम् चिकित्स्यास्व चिकित्स्यास्म । (ii) केत्यात् केत्यास्ताम् केत्यासुः । केत्याः केत्यास्तम् केत्यास्त । केत्यासम् केत्यास्व केत्यास्म । (iii) केतयिषीष्ट केतयिषीयास्ताम् केतयिषीरन् । केतयिषीष्ठाः केतयिषीयास्थाम् केतयिषीध्वम् । केतयिषीय केतयिषीवहि केतयिषीमहि । **९. लुङ्** – (i) अचिकित्सीत् अचिकित्सिष्टाम् अचिकित्सिषुः । अचिकित्सीः अचिकित्सिष्टम् अचिकित्सिष्ट । अचिकित्सिषम् अचिकित्सिष्व अचिकित्सिष्म । (ii) अचीकितत् अचीकितताम् अचीकितन् । अचीकितः अचीकिततम् अचीकितत । अचीकितम् अचीकिताव अची-किताम । (iii) अचीकितत अचीकितेताम् अचीकितन्त । अचीकितथाः अचीकितेथाम् अचीकितध्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अचीकिते अचीकितावहि अचीकितामहि । **१०. लृङ्** – (i) अचिकित्सिष्यत् अचिकित्सिष्यताम् अचिकित्सिष्यन् । अचिकित्सिष्यः अचिकित्सिष्यतम् अचिकित्सिष्यत । अचिकित्सिष्यम् अचिकित्सिष्याव अचिकित्सिष्याम । (ii) अकेतयिष्यत् अकेतयिष्यताम् अकेतयिष्यन् । अकेतयिष्यः अकेतयिष्यतम् अकेतयिष्यत । अकेतयिष्यम् अकेतयिष्याव अकेतयिष्याम । (iii) अकेतयिष्यत अकेतयिष्येताम् अकेतयिष्यन्त । अकेतयिष्यथाः अकेतयिष्येथाम् अकेतयिष्यध्वम् । अकेतयिष्ये अकेतयिष्यावहि अकेतयिष्यामहि । **णिचि** – चिकित्सयति/केतयति – ते, **सनि** – चिकित्सिषति[२], चिकेतयिषति/ते, **यकि** – चिकित्स्यते/केत्यते ।

१. 'गुप्तिज्किद्भ्यः...' इति व्याधिप्रतीकारार्थे नित्यं सन् । निवासार्थे तु सन् न, अपि तु णिच् । अतः 'केतयति' इति रूपम् ।
२. 'सन्नन्तान्न सनिष्यते' (भाष्येष्टिः – ३.१७) इति सन्नन्तात् सन् न भवति इति न शङ्कनीयम् । 'सरूपः प्रत्ययो नेष्टः' इत्यत्र 'सरूपः' इत्यस्य 'समानार्थकः' इति भाष्यकृता उक्तत्वेन स्वार्थसन्नन्तात् इच्छासन् भवत्येव ।

९९४. दान – खण्डने । सकर्म, सेट्, उभय । 'अर्थविशेषे सन् । अन्यत्र दानयति' इति कौमुदी । 'अवखण्डने' इति मा.धा.वृत्तिः ।

१. लट् – (i) दीदांसति[१] दीदांसतः दीदांसन्ति । दीदांससि दीदांसथः दीदांसथ । दीदांसामि दीदांसावः दीदांसामः । (ii) दीदांसते दीदांसेते दीदांसन्ते । दीदांससे दीदांसेथे दीदांसध्वे । दीदांसे दीदांसावहे दीदांसामहे । (iii) दानयति[२] दानयतः दानयन्ति । दानयसि दानयथः दानयथ । दानयामि दानयावः दानयामः । (iv) दानयते दानयेते दानयन्ते । दानयसे दानयेथे दानयध्वे । दानये दानयावहे दानयामहे ।

२. लिट् – (i) दीदांसाञ्चकार दीदांसाञ्चक्रतुः दीदांसाञ्चक्रुः । दीदांसाञ्चकर्थ दीदांसाञ्चक्रथुः दीदांसाञ्चक्र । दीदांसाञ्चकार/दीदांसाञ्चकर दीदांसाञ्चकृव दीदांसाञ्चकृम । (ii) दीदांसाञ्चक्रे दीदांसाञ्चक्राते दीदांसाञ्चक्रिरे । दीदांसाञ्चकृषे दीदांसाञ्चक्राथे दीदांसाञ्चकृढ्वे । दीदांसाञ्चक्रे दीदांसाञ्चकृवहे दीदांसाञ्चकृमहे । (iii) दीदांसाम्बभूव दीदांसाम्बभूवतुः दीदांसाम्बभूवुः । दीदांसाम्बभूविथ दीदांसाम्बभूवथुः दीदांसाम्बभूव । दीदांसाम्बभूव दीदांसाम्बभूविव दीदांसाम्बभूविम । (iv) दीदांसामास दीदांसामासतुः दीदांसामासुः । दीदांसामासिथ दीदांसामासथुः दीदांसामास । दीदांसामास दीदांसामासिव दीदांसामासिम । (v) दानयाञ्चकार दानयाञ्चक्रतुः दानयाञ्चक्रुः । दानयाञ्चकर्थ दानयाञ्चक्रथुः दानयाञ्चक्र । दानयाञ्चकार/दानयाञ्चकर दानयाञ्चकृव दानयाञ्चकृम । (vi) दानयाञ्चक्रे दानयाञ्चक्राते दानयाञ्चक्रिरे । दानयाञ्चकृषे दानयाञ्चक्राथे दानयाञ्चकृढ्वे । दानयाञ्चक्रे दानयाञ्चकृवहे दानयाञ्चकृमहे । (vii) दानयाम्बभूव दानयाम्बभूवतुः दानयाम्बभूवुः । दानयाम्बभूविथ दानयाम्बभूवथुः दानयाम्बभूव । दानयाम्बभूव दानयाम्बभूविव दानयाम्बभूविम । (viii) दानयामास दानयामासतुः दानयामासुः । दानयामासिथ दानयामासथुः दानयामास । दानयामास दानयामासिव दानयामासिम । **३. लुट्** – (i) दीदांसिता दीदांसितारौ दीदांसितारः । दीदांसितासि दीदांसितास्थः दीदांसितास्थ । दीदांसितास्मि दीदांसितास्वः दीदांसितास्मः । (ii) दीदांसिता दीदांसितारौ दीदांसितारः । दीदांसितासे दीदांसितासाथे दीदांसिताध्वे । दीदांसिताहे दीदांसितास्वहे दीदांसितास्महे । (iii) दानयिता दानयितारौ दानयितारः । दानयितासि दानयितास्थः दानयितास्थ । दानयितास्मि दानयितास्वः दानयितास्मः । (iv) दानयिता दानयितारौ दानयितारः । दानयितासे दानयितासाथे दानयिताध्वे । दानयिताहे दानयितास्वहे दानयितास्महे । **४. लृट्** – (i) दीदांसिष्यति दीदांसिष्यतः दीदांसिष्यन्ति । दीदांसिष्यसि दीदांसिष्यथः दीदांसिष्यथ । दीदांसिष्यामि दीदांसिष्यावः दीदांसिष्यामः । (ii) दीदांसिष्यते दीदांसिष्येते दीदांसिष्यन्ते । दीदांसिष्यसे दीदांसिष्येथे दीदांसिष्यध्वे । दीदांसिष्ये दीदांसिष्यावहे दीदांसिष्यामहे । (iii) दानयिष्यति दानयिष्यतः दानयिष्यन्ति । दानयिष्यसि दानयिष्यथः दानयिष्यथ । दानयिष्यामि दानयिष्यावः दानयिष्यामः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(iv) दानयिष्यते दानयिष्येते दानयिष्यन्ते । दानयिष्यसे दानयिष्येथे दानयिष्यध्वे । दानयिष्ये दानयिष्यावहे दानयिष्यामहे । **५. लोट्** - (i) दीदांसतु, दीदांसतात् दीदांसताम् दीदांसन्तु । दीदांस, दीदांसतात् दीदांसतम् दीदांसत । दीदांसानि दीदांसाव दीदांसाम । (ii) दीदांसताम् दीदांसेताम् दीदांसन्ताम् । दीदांसस्व दीदांसेथाम् दीदांसध्वम् । दीदांसै दीदांसावहै दीदांसामहै । (iii) दानयतु, दानयतात् दानयताम् दानयन्तु । दानय, दानयतात् दानयतम् दानयत । दानयानि दानयाव दानयाम । (iv) दानयताम् दानयेताम् दानयन्ताम् । दानयस्व दानयेथाम् दानयध्वम् । दानयै दानयावहै दानयामहै । **६. लङ्** - (i) अदीदांसत् अदीदांसताम् अदीदांसन् । अदीदांसः अदीदांसतम् अदीदांसत । अदीदांसम् अदीदांसाव अदीदांसाम । (ii) अदीदांसत अदीदांसेताम् अदीदांसन्त । अदीदांसथाः अदीदांसेथाम् अदीदांसध्वम् । अदीदांसे अदीदांसावहि अदीदांसामहि । (iii) अदानयत् अदानयताम् अदानयन् । अदानयः अदानयतम् अदानयत । अदानयम् अदानयाव अदानयाम । (iv) अदानयत अदानयेताम् अदानयन्त । अदानयथाः अदानयेथाम् अदानयध्वम् । अदानये अदानयावहि अदानयामहि । **७. विधिलिङ्** - (i) दीदांसेत् दीदांसेताम् दीदांसेयुः । दीदांसेः दीदांसेतम् दीदांसेत । दीदांसेयम् दीदांसेव दीदांसेम । (ii) दीदांसेत दीदांसेयाताम् दीदांसेरन् । दीदांसेथाः दीदांसेयाथाम् दीदांसेध्वम् । दीदांसेय दीदांसेवहि दीदांसेमहि । (iii) दानयेत् दानयेताम् दानयेयुः । दानयेः दानयेतम् दानयेत । दानयेयम् दानयेव दानयेम । (iv) दानयेत दानयेयाताम् दानयेरन् । दानयेथाः दानयेयाथाम् दानयेध्वम् । दानयेय दानयेवहि दानयेमहि । **८. आशीर्लिङ्** - (i) दीदांस्यात् दीदांस्यास्ताम् दीदांस्यासुः । दीदांस्याः दीदांस्यास्तम् दीदांस्यास्त । दीदांस्यासम् दीदांस्यास्व दीदांस्यास्म । (ii) दीदांसिषीष्ट दीदांसिषीयास्ताम् दीदांसिषीरन् । दीदांसिषीष्ठाः दीदांसिषीयास्थाम् दीदांसिषीध्वम् । दीदांसिषीय दीदांसिषीवहि दीदांसिषीमहि । (iii) दान्यात् दान्यास्ताम् दान्यासुः । दान्याः दान्यास्तम् दान्यास्त । दान्यासम् दान्यास्व दान्यास्म । (iv) दानिषीष्ट दानषीयास्ताम् दानिषीरन् । दानिषीष्ठाः दानि-षीयास्थाम् दानिषीध्वम् । दानिषीय दानिषीवहि दानिषीमहि । **९. लुङ्** - (i) अदीदांसीत् अदीदांसिष्टाम् अदीदांसिषुः । अदीदांसीः अदीदांसिष्टम् अदीदांसिष्ट । अदीदांसिषम् अदीदांसिष्व अदीदांसिष्म । (ii) अदीदांसिष्ट अदीदांसिषाताम् अदीदांसिषत । अदीदांसिष्ठाः अदीदांसिषाथाम् अदीदांसिध्वम्/ढ्वम् । अदीदांसिषि अदीदांसिष्वहि अदीदांसिष्महि । (iii) अदीदनत् अदीदनताम् अदीदनन् । अदीदनः अदीदनतम् अदीदनत । अदीदनम् अदीदनाव अदीदनाम । (iv) अदीदनत अदीदनेताम् अदीदनन्त । अदीदनथाः अदीद-नेथाम् अदीदनध्वम् । अदीदने अदीदनावहि अदीदनामहि । **१०. लृङ्** - (i) अदीदांसिष्यत् अदीदांसिष्यताम् अदीदांसिष्यन् । अदीदांसिष्यः अदीदांसिष्यतम् अदीदांसिष्यत । अदीदांसिष्यम् अदीदांसिष्याव अदीदांसि-ष्याम । (ii) अदीदांसिष्यत अदीदांसिष्येताम् अदीदांसिष्यन्त । अदीदांसिष्यथाः अदीदांसिष्येथाम् अदीदांसि-ष्यध्वम् । अदीदांसिष्ये अदीदांसिष्यावहि अदीदांसिष्यावहि । (iii) अदानयिष्यत् अदानयिष्यताम् अदानयिष्यन् । अदानयिष्यः अदानयिष्यतम् अदानयिष्यत । अदानयिष्यम् अदानयिष्याव अदानयिष्याम । (iv) अदानयिष्यत अदानयिष्येताम् अदानयिष्यन्त । अदानयिष्यथाः अदानयिष्येथाम् अदानयिष्यध्वम् । अदानयिष्ये अदान-यिष्यावहि अदानयिष्यामहि ।

णिचि - दीदांसयति/दानयति - ते, **सनि** - दीदांसिषति/ते, दिदानयिषति/ते, **यकि** - दीदांस्यते/दान्यते ।

१. 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' इति सन् अभ्यासेकारस्य दीर्घश्च ।

२. दानेरार्जवे सन् । अन्येषु अर्थेषु सनः अभावे णिच् । णिजन्तस्यापि उभयपदिता ।

१९५. शान - तेजने । सकर्म, सेट्, उभय । तेजनम् = आयुधानां तीक्ष्णीकरणम् ।

१. लट् - (i) शीशांसति[1] शीशांसतः शीशांसन्ति । शीशांससि शीशांसथः शीशांसथ । शीशांसामि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शीशांसावः शीशांसामः । (ii) शीशांसते शीशांसेते शीशांसन्ते । शीशांससे शीशांसेथे शीशांसध्वे । शीशांसे शीशांसावहे शीशांसामहे । (iii) शानयति[२] शानयतः शानयन्ति । शानयसि शानयथः शानयथ । शानयामि शानयावः शानयामः । (iv) शानयते शानयेते शानयन्ते । शानयसे शानयेथे शानयध्वे । शानये शानयावहे शानयामहे । **२. लिट्** – (i) शीशांसाञ्चकार शीशांसाञ्चक्रतुः शीशांसाञ्चक्रुः । शीशांसाञ्चकर्थ शीशांसाञ्चक्रथुः शीशांसाञ्चक्र । शीशांसाञ्चकार/शीशांसाञ्चकर शीशांसाञ्चकृव शीशांसाञ्चकृम । (ii) शीशांसाञ्चक्रे शीशांसाञ्चक्राते शीशांसाञ्चक्रिरे । शीशांसाञ्चकृषे शीशांसाञ्चक्राथे शीशांसाञ्चकृढ्वे । शीशांसाञ्चक्रे शीशांसाञ्चकृवहे शीशांसाञ्चकृमहे । (iii) शीशांसाम्बभूव शीशांसाम्बभूवतुः शीशांसाम्बभूवुः । शीशांसाम्बभूविथ शीशांसाम्बभूवथुः शीशांसाम्बभूव । शीशांसाम्बभूव शीशांसाम्बभूविव शीशांसाम्बभूविम । (iv) शीशांसामास शीशांसामासतुः शीशांसामासुः । शीशांसामासिथ शीशांसामासथुः शीशांसामास । शीशांसामास शीशांसामासिव शीशांसामासिम । (v) शानयाञ्चकार शानयाञ्चक्रतुः शानयाञ्चक्रुः । शानयाञ्चकर्थ शानयाञ्चक्रथुः शानयाञ्चक्र । शानयाञ्चकार/शानयाञ्चकर शानयाञ्चकृव शानयाञ्चकृम । (vi) शानयाञ्चक्रे शानयाञ्चक्राते शानयाञ्चक्रिरे । शानयाञ्चकृषे शानयाञ्चक्राथे शानयाञ्चकृढ्वे । शानयाञ्चक्रे शानयाञ्चकृवहे शानयाञ्चकृमहे । (vii) शानयाम्बभूव शानयाम्बभूवतुः शानयाम्बभूवुः । शानयाम्बभूविथ शानयाम्बभूवथुः शानयाम्बभूव । शानयाम्बभूव शानयाम्बभूविव शानयाम्बभूविम । (viii) शानयामास शानयामासतुः शानयामासुः । शानयामासिथ शानयामासथुः शानयामास । शानयामास शानयामासिव शानयामासिम । **३. लुट्** – (i) शीशांसिता शीशांसितारौ शीशांसितारः । शीशांसितासि शीशांसितास्थः शीशांसितास्थ । शीशांसितास्मि शीशांसितास्वः शीशांसितास्मः । (ii) शीशांसिता शीशांसितारौ शीशांसितारः । शीशांसितासे शीशांसितासाथे शीशांसिताध्वे । शीशांसिताहे शीशांसितास्वहे शीशांसितास्महे । (iii) शानयिता शानयितारौ शानयितारः । शानयितासि शानयितास्थः शानयितास्थ । शानयितास्मि शानयितास्वः शानयितास्मः । (iv) शानयिता शानयितारौ शानयितारः । शानयितासे शानयितासाथे शानयिताध्वे । शानयिताहे शानयितास्वहे शानयितास्महे । **४. लृट्** – (i) शीशांसिष्यति शीशांसिष्यतः शीशांसिष्यन्ति । शीशांसिष्यसि शीशांसिष्यथः शीशांसिष्यथ । शीशांसिष्यामि शीशांसिष्यावः शीशांसिष्यामः । (ii) शीशांसिष्यते शीशांसिष्येते शीशांसिष्यन्ते । शीशांसिष्यसे शीशांसिष्येथे शीशांसिष्यध्वे । शीशांसिष्ये शीशांसिष्यावहे शीशांसिष्यामहे । (iii) शानयिष्यति शानयिष्यतः शानयिष्यन्ति । शानयिष्यसि शानयिष्यथः शानयिष्यथ । शानयिष्यामि शानयिष्यावः शानयिष्यामः । (iv) शानयिष्यते शानयिष्येते शानयिष्यन्ते । शानयिष्यसे शानयिष्येथे शानयिष्यध्वे । शानयिष्ये शानयिष्यावहे शानयिष्यामहे । **५. लोट्** – (i) शीशांसतु, शीशांसतात् शीशांसताम् शीशांसन्तु । शीशांस, शीशांसतात् शीशांसतम् शीशांसत । शीशांसानि शीशांसाव शीशांसाम । (ii) शीशांसताम् शीशांसेताम् शीशांसन्ताम् । शीशांसस्व शीशांसेथाम् शीशांसध्वम् । शीशांसै शीशांसवहै शीशांसमहै । (iii) शानयतु, शानयतात् शानयताम् शानयन्तु । शानय, शानयतात् शानयतम् शानयत । शानयानि शानयाव शानयाम । (iv) शानयताम् शानयेताम् शानयन्ताम् । शानयस्व शानयेथाम् शानयध्वम् । शानयै शानयावहै शानयामहै । **६. लङ्** – (i) अशीशांसत् अशीशांसताम् अशीशांसन् । अशीशांसः अशीशांसतम् अशीशांसत । अशीशांसम् अशीशांसाव अशीशांसाम । (ii) अशीशांसत अशीशांसेताम् अशीशांसन्त । अशीशांसथाः अशीशांसेथाम् अशीशांसध्वम् । अशीशांसे अशीशांसावहि अशीशांसामहि । (ii) अशानयत् अशानयताम् अशानयन् । अशानयः अशानयतम् अशानयत । अशानयम् अशानयाव अशानयाम । (iii) अशानयत अशानयेताम् अशानयन्त । अशानयथाः अशानयेथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अशानयध्वम् । अशानये अशानयावहि अशानयामहि । **७. विधिलिङ्** - (i) शीशांसेत् शीशांसेताम् शीशांसेयुः । शीशांसेः शीशांसेतम् शीशांसेत । शीशांसेयम् शीशांसेव शीशांसेम । (ii) शीशांसेत शीशांसेयाताम् शीशांसेरन् । शीशांसेथाः शीशांसेयाथाम् शीशांसेध्वम् । शीशांसेय शीशांसेवहि शीशांसेमहि । (iii) शानयेत् शानयेताम् शानयेयुः । शानयेः शानयेतम् शानयेत । शानयेयम् शानयेव शानयेम । (iv) शानयेत शानयेयाताम् शानयेरन् । शानयेथाः शानयेयाथाम् शानयेध्वम् । शानयेय शानयेवहि शानयेमहि । **८. आशीर्लिङ्** - (i) शीशांस्यात् शीशांस्यास्ताम् शीशांस्यासुः । शीशांस्याः शीशांस्यास्तम् शीशांस्यास्त । शीशांस्यासम् शीशांस्यास्व शीशांस्यास्म । (ii) शीशांसिषीष्ट शीशांसि-षीयास्ताम् शीशांसिषीरन् । शीशांसिषीष्ठाः शीशांसिषीयास्थाम् शीशांसिषीध्वम् । शीशांसिषीय शीशांसिषीवहि शीशांसिषीमहि । (iii) शान्यात् शान्यास्ताम् शान्यासुः । शान्याः शान्यास्तम् शान्यास्त । शान्यासम् शान्यास्व शान्यास्म । (iv) शानयिष्ट शानयिषाताम् शानयिषत । शानयिष्ठाः शानयिषाथाम् शानयिध्वम् । शानयिषि शानयिष्वहि शानयिष्महि । **९. लुङ्** - (i) अशीशांसीत् अशीशांसिष्टाम् अशीशांसिषुः । अशीशांसीः अशीशांसिष्टम् अशीशांसिष्ट । अशीशांसिषम् अशीशांसिष्व अशीशांसिष्म । (ii) अशीशांसिष्ट अशीशांसिषाताम् अशीशांसिषत । अशीशांसिष्ठाः अशीशांसिषाथाम् अशीशांसिध्वम्/ढ्वम् । अशीशांसिषि अशीशांसिष्वहि अशीशांसिष्महि । (iii) अशीशनत् अशीशनताम् अशीशनन् । अशीशनः अशीशनतम् अशीशनत । अशीशनम् अशीशनाव अशीशनाम । (iv) अशीशनत अशीशनेताम् अशीशनन्त । अशीशनथाः अशीशनेथाम् अशीशनध्वम् । अशीशने अशीशनावहि अशीशनामहि ।

१०. लृङ् - (i) अशीशांसिष्यत् अशीशांसिष्यताम् अशीशांसिष्यन् । अशीशांसिष्यः अशीशांसिष्यतम् अशीशांसिष्यत । अशीशांसिष्यम् अशीशांसिष्याव अशीशांसिष्याम । (ii) अशीशांसिष्यत अशीशांसिष्येताम् अशीशांसिष्यन्त । अशीशांसिष्यथाः अशीशांसिष्येथाम् अशीशांसिष्यध्वम् । अशीशांसिष्ये अशीशांसिष्यावहि अशीशांसिष्यावहि । (iii) अशानयिष्यत् अशानयिष्यताम् अशानयिष्यन् । अशानयिष्यः अशानयिष्यतम् अशानयिष्यत । अशानयिष्यम् अशानयिष्याव अशानयिष्याम । (iv) अशानयिष्यत अशानयिष्येताम् अशानयिष्यन्त । अशानयिष्यथाः अशानयिष्येथाम् अशानयिष्यध्वम् । अशानयिष्ये अशानयिष्यावहि अशीशांनयिष्यामहि ।

णिचि - शीशांसयति/शानयति - ते, **सनि** - शीशांसिषति/ते, शिशानयिषति/ते, **यकि** - शीशांस्यते/शान्यते ।

१. 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' इति सन् अभ्यासेकारस्य दीर्घश्च ।

२. शानेर्निशाने सन् । तद्भिन्नार्थे सनः अभावे णिच् । णिजन्तस्यापि उभयपदिता ।

९९६. डु पचष् - पाके । सकर्म, अनिट्, उभय ।

१. लट् - (i) पचति पचतः पचन्ति । पचसि पचथः पचथ । पचामि पचावः पचामः । (ii) पचते पचेते पचन्ते । पचसे पचेथे पचध्वे । पचे पचावहे पचामहे । **२. लिट्** - (i) पपाच पेचतुः पेचुः । पेचिथ-पपक्थ पेचथुः पेच । पपाच-पपच पेचिव पेचिम । (ii) पेचे पेचाते पेचिरे । पेचिषे पेचाथे पेचिध्वे । पेचे पेचिवहे पेचिमहे । **३. लुट्** - (i) पक्ता पक्तारौ पक्तारः । पक्तासि पक्तास्थः पक्तास्थ । पक्तास्मि पक्तास्वः पक्तास्मः । (ii) पक्ता पक्तारौ पक्तारः । पक्तासे पक्तासाथे पक्ताध्वे । पक्ताहे पक्तास्वहे पक्तास्महे । **४. लृट्** - (i) पक्ष्यति पक्ष्यतः पक्ष्यन्ति । पक्ष्यसि पक्ष्यथः पक्ष्यथ । पक्ष्यामि पक्ष्यावः पक्ष्यामः । (ii) पक्ष्यते पक्ष्येते पक्ष्यन्ते । पक्ष्यसे पक्ष्येथे पक्ष्यध्वे । पक्ष्ये पक्ष्यावहे पक्ष्यामहे । **५. लोट्** - (i) पचतु, पचतात् पचताम् पचन्तु । पच, पचतात् पचतम् पचत । पचानि पचाव पचाम । (ii) पचताम् पचेताम् पचन्ताम् । पचस्व

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पचेथाम् पचध्वम् । पचै पचावहै पचामहै । **६. लङ्** – (i) अपचत् अपचाम् अपचन् । अपचः अपचतम् अपचत । अपचम् अपचाव अपचाम । (ii) अपचत अपचेताम् अपचन्त । अपचथाः अपचेथाम् अपचध्वम् । अपचे अपचावहि अपचामहि । **७. विधिलिङ्** – (i) पचेत् पचेताम् पचेयुः । पचेः पचेतम् पचेत । पचेयम् पचेव पचेम । (ii) पचेत पचेयाताम् पचेरन् । पचेथाः पचेयाथाम् पचेध्वम् । पचेय पचेवहि पचेमहि । **८. आशीर्लिङ्** – (i) पच्यात् पच्यास्ताम् पच्यासुः । पच्याः पच्यास्तम् पच्यास्त । पच्यासम् पच्यास्व पच्यास्म । (ii) पक्षीष्ट पक्षीयास्ताम् पक्षीरन् । पक्षीष्ठाः पक्षीयास्थाम् पक्षीध्वम्/ढ्वम् । पक्षीय पक्षीवहि पक्षीमहि । **९. लुङ्** – (i) अपाक्षीत् अपाक्ताम् अपाक्षुः । अपाक्षीः अपाक्तम् अपाक्त । अपाक्षम् अपाक्ष्व अपाक्ष्म । (ii) अपक्त अपक्षाताम् अपक्षत । अपक्थाः अपक्षाथम् अपग्ध्वम् । अपक्षि अपक्ष्वहि अपक्ष्महि । **१०. लृङ्** – (i) अपक्ष्यत् अपक्ष्यताम् अपक्ष्यन् । अपक्ष्यः अपक्ष्यतम् अपक्ष्यत । अपक्ष्यम् अपक्ष्याव अपक्ष्याम । (ii) अपक्ष्यत अपक्ष्येताम् अपक्ष्यन्त । अपक्ष्यथाः अपक्ष्येथाम् अपक्ष्यध्वम् । अपक्ष्ये अपक्ष्यावहि अपक्ष्यामहि ।

णिचि – पाचयति – ते, **सनि** – पिपक्षति – ते, **यकि** – पच्यते ।

९९७. षच – समवाये । अकर्म, सेट्[1], उभय । केचिदमुं न पठन्ति । 'सेचने समवाये च सचते, सचति क्रमात्' (श्लो.४६) इति देवः ।

१. लट् – (i) सचति सचतः सचन्ति । सचसि सचथः सचथ । सचामि सचावः सचामः । (ii) सचते सचेते सचन्ते । सचसे सचेथे सचध्वे । सचे सचावहे सचामहे । **२. लिट्** – (i) ससाच सेचतुः सेचुः । सेचिथ सेचथुः सेच । ससाच-ससच सेचिव सेचिम । (ii) सेचे सेचाते सेचिरे । सेचिषे सेचाथे सेचिध्वे । सेचे सेचिवहे सेचिमहे । **३. लुट्** – (i) सचिता सचितारौ सचितारः । सचितासि सचितास्थः सचितास्थ । सचितास्मि सचितास्वः सचितास्मः । (ii) सचिता सचितारौ सचितारः । सचितासे सचितासाथे सचिताध्वे । सचिताहे सचितास्वहे सचितास्महे । **४. लृट्** – (i) सचिष्यति सचिष्यतः सचिष्यन्ति । सचिष्यसि सचिष्यथः सचिष्यथ । सचिष्यामि सचिष्यावः सचिष्यामः । (ii) सचिष्यते सचिष्येते सचिष्यन्ते । सचिष्यसे सचिष्येथे सचिष्यध्वे । सचिष्ये सचिष्यावहे सचिष्यामहे । **५. लोट्** – (i) सचतु, सचतात् सचताम् सचन्तु । सच, सचतात् सचतम् सचत । सचानि सचाव सचाम । (ii) सचताम् सचेताम् सचन्ताम् । सचस्व सचेथाम् सचध्वम् । सचै सचावहै सचामहै । **६. लङ्** – (i) असचत् असचाम् असचन् । असचः असचतम् असचत । असचम् असचाव असचाम । (ii) असचत असचेताम् असचन्त । असचथाः असचेथाम् असचध्वम् । असचे असचावहि असचामहि । **७. विधिलिङ्** – (i) सचेत् सचेताम् सचेयुः । सचेः सचेतम् सचेत । सचेयम् सचेव सचेम । (ii) सचेत सचेयाताम् सचेरन् । सचेथाः सचेयाथाम् सचेध्वम् । सचेय सचेवहि सचेमहि । **८. आशीर्लिङ्** – (i) सच्यात् सच्यास्ताम् सच्यासुः । सच्याः सच्यास्तम् सच्यास्त । सच्यासम् सच्यास्व सच्यास्म । (ii) सचिषीष्ट सचिषीयास्ताम् सचिषीरन् । सचिषीष्ठाः सचिषीयास्थाम् सचिषीध्वम्/ढ्वम् । सचिषीय सचिषीवहि सचिषीमहि । **९. लुङ्** – (i) असाचीत्[2] असाचिष्टाम् असाचिषुः । असाचीः असाचिष्टम् असाचिष्ट । असाचिषम् असाचिष्व असाचिष्म । (ii) असचीत् असचिष्टाम् असचिषुः । असचीः असचिष्टम् असचिष्ट । असचिषम् असचिष्व असचिष्म । (iii) असचिष्ट असचिषाताम् असचिषत । असचिष्ठाः असचिषाथाम् असचिध्वम्/ढ्वम् । असचिषि असचिष्वहि असचिष्महि । **१०. लृङ्** – (i) असचिष्यत् असचिष्यताम् असचिष्यन् । असचिष्यः असचिष्यतम् असचिष्यत । असचिष्यम् असचिष्याव असचिष्याम । (ii) असचिष्यत असचिष्येताम् असचिष्यन्त । असचिष्यथाः असचिष्येथाम् असचिष्यध्वम् । असचिष्ये असचिष्यावहि असचिष्यामहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – साचयति – ते, **सनि** – सिसचिषति – ते, **यकि** – सच्यते ।

१. माधवीयधातुवृत्तिकारः अमुं धातुं परस्मैपदिनं सेटं च मन्यते । सः लिखति – 'पचिं वचिम् इत्यादौ व्याघ्रभूतिकारिकायां चकारान्तानाम् अनिटां परिगणनात् सेट् । अनिटां मध्ये पाठस्तु स्वरितेत्त्वसाम्यात्' इति । बालमनोरमायां तु अस्य सेट्त्वम् उक्तम् । अनिट्त्वे तु **साता, सक्ष्यति, सक्षीष्ट, असाक्षीत्–असक्त** इत्यादीनि रूपाणि भवेयुः ।

२. 'अतो हलादेः..' इति वृद्धिविकल्पः ।

९९८. भज – सेवायाम् । सकर्म, अनिट्, उभय । 'विभागसेवयोः' इति द्रुमे (श्लो. १२३) । 'सेवायां भजते भजेदिति भजेः, विश्राणने भाजयेद् । आमर्दे तु भनक्ति, भाजयति णौ भाजेः पृथक्कर्मणि' (श्लो. ६६) इति देवः ।

१. लट् – (i) भजति भजतः भजन्ति । भजसि भजथः भजथ । भजामि भजावः भजामः । (ii) भजते भजेते भजन्ते । भजसे भजेथे भजध्वे । भजे भजावहे भजामहे । **२. लिट्** – (i) बभाज भेजतुः भेजुः । भेजिथ-बभक्थ भेजथुः भेज । बभाज-बभज भेजिव भेजिम । (ii) भेजे भेजाथे भेजिरे । भेजिषे भेजाथे भेजिध्वे । भेजे भेजिवहे भेजिमहे । **३. लुट्** – (i) भक्ता भक्तारौ भक्तारः । भक्तासि भक्तास्थः भक्तास्थ । भक्तास्मि भक्तास्वः भक्तास्मः । (ii) भक्ता भक्तारौ भक्तारः । भक्तासे भक्तासाथे भक्ताध्वे । भक्ताहे भक्तास्वहे भक्तास्महे । **४. लृट्** – (i) भक्ष्यति भक्ष्यतः भक्ष्यन्ति । भक्ष्यसि भक्ष्यथः भक्ष्यथ । भक्ष्यामि भक्ष्यावः भक्ष्यामः । (ii) भक्ष्यते भक्ष्येते भक्ष्यन्ते । भक्ष्यसे भक्ष्येथे भक्ष्यध्वे । भक्ष्ये भक्ष्यावहे भक्ष्यामहे । **५. लोट्** – (i) भजतु, भजतात् भजताम् भजन्तु । भज, भजतात् भजतम् भजत । भजानि भजाव भजाम । (ii) भजताम् भजेताम् भजन्ताम् । भजस्व भजेथाम् भजध्वम् । भजै भजावहै भजामहै ।

६. लङ् – (i) अभजत् अभजताम् अभजन् । अभजः अभजतम् अभजत । अभजम् अभजाव अभजाम । (ii) अभजत अभजेताम् अभजन्त । अभजथाः अभजेथाम् अभजध्वम् । अभजे अभजावहि अभजामहि ।

७. विधिलिङ् – (i) भजेत् भजेताम् भजेयुः । भजेः भजेतम् भजेत । भजेयम् भजेव भजेम । (ii) भजेत भजेयाताम् भजेरन् । भजेथाः भजेयाथाम् भजेध्वम् । भजेय भजेवहि भजेमहि । **८. आशीर्लिङ्** – (i) भज्यात् भज्यास्ताम् भज्यासुः । भज्याः भज्यास्तम् भज्यास्त । भज्यासम् भज्यास्व भज्यास्म । (ii) भक्षीष्ट भक्षीयास्ताम् भक्षीरन् । भक्षीष्ठाः भक्षीयास्थाम् भक्षीध्वम् । भक्षीय भक्षीवहि भक्षीमहि । **९. लुङ्** – (i) अभाक्षीत् अभाक्ताम् अभाक्षुः । अभाक्षीः अभाक्तम् अभाक्त । अभाक्षम् अभाक्ष्व अभाक्ष्म । (ii) अभक्त अभक्षाताम् अभक्षत । अभक्थाः अभक्षाथाम् अभाग्ध्वम् । अभक्षि अभक्ष्वहि अभक्ष्महि ।

१०. लृङ् – (i) अभक्ष्यत् अभक्ष्यताम् अभक्ष्यन् । अभक्ष्यः अभक्ष्यतम् अभक्ष्यत । अभक्ष्यम् अभक्ष्याव अभक्ष्याम । (ii) अभक्ष्यत अभक्ष्येताम् अभक्ष्यन्त । अभक्ष्यथाः अभक्ष्येथाम् अभक्ष्यध्वम् । अभक्ष्ये अभक्ष्यावहि अभक्ष्यामहि ।

णिचि – भाजयति – ते, **सनि** – बिभक्षति – ते, **यकि** – भज्यते ।

९९९. रञ्ज – रागे । अकर्म, अनिट्, उभय । 'रजते रजतीत्येव रज्यते रज्यतीत्यपि । रागार्थे शप्श्यनोर्द्वे द्वे' (श्लो. ५७.५८) इति देवः ।

१. लट् – (i) रजति[1] रजतः रजन्ति । रजसि रजथः रजथ । रजामि रजावः रजामः । (ii) रजते रजेते रजन्ते । रजसे रजेथे रजध्वे । रजे रजावहे रजामहे । **२. लिट्** – (i) ररञ्ज ररञ्जतुः ररञ्जुः । ररङ्क्थ-ररञ्जिथ ररञ्जथुः ररञ्ज । ररञ्ज ररञ्जिव ररञ्जिम । (ii) ररञ्जे ररञ्जाते ररञ्जिरे । ररञ्जिषे ररञ्जाथे ररञ्जिध्वे । ररञ्जे ररञ्जिवहे ररञ्जिमहे । **३. लुट्** – (i) रङ्क्ता रङ्क्तारौ रङ्क्तारः । रङ्क्तासि रङ्क्तास्थः रङ्क्तास्थ । रङ्क्तास्मि रङ्क्तास्वः रङ्क्तास्मः । (ii) रङ्क्ता रङ्क्तारौ रङ्क्तारः । रङ्क्तासे रङ्क्तासाथे रङ्क्ताध्वे । रङ्क्ताहे रङ्क्तास्वहे रङ्क्तास्महे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. लृट् – (i) रङ्क्ष्यति रङ्क्ष्यतः रङ्क्ष्यन्ति । रङ्क्ष्यसि रङ्क्ष्यथः रङ्क्ष्यथ । रङ्क्ष्यामि रङ्क्ष्यावः रङ्क्ष्यामः । (ii) रङ्क्ष्यते रङ्क्ष्येते रङ्क्ष्यन्ते । रङ्क्ष्यसे रङ्क्ष्येथे रङ्क्ष्यध्वे । रङ्क्ष्ये रङ्क्ष्यावहे रङ्क्ष्यामहे । **५. लोट्** – (i) रजतु, रजतात् रजताम् रजन्तु । रज, रजतात् रजतम् रजत । रजानि रजाव रजाम । (ii) रजताम् रजेताम् रजन्ताम् । रजस्व रजेथाम् रजध्वम् । रजै रजावहै रजामहै । **६. लङ्** – (i) अरजत् अरजताम् अरजन् । अरजः अरजतम् अरजत । अरजम् अरजाव अरजाम । (ii) अरजत अरजेताम् अरजन्त । अरजथाः अरजेथाम् अरजध्वम् । अरजे अरजावहि अरजामहि । **७. विधिलिङ्** – (i) रजेत् रजेताम् रजेयुः । रजेः रजेतम् रजेत । रजेयम् रजेव रजेम । (ii) रजेत रजेयाताम् रजेरन् । रजेथाः रजेयाथाम् रजेध्वम् । रजेय रजेवहि रजेमहि । **८. आशीर्लिङ्** – (i) रज्यात् रज्यास्ताम् रज्यासुः । रज्याः रज्यास्तम् रज्यास्त । रज्यासम् रज्यास्व रज्यास्म । (ii) रङ्क्षीष्ट रङ्क्षीयास्ताम् रङ्क्षीरन् । रङ्क्षीष्ठाः रङ्क्षीयास्थाम् रङ्क्षीध्वम् । रङ्क्षीय रङ्क्षीवहि रङ्क्षीमहि । **९. लुङ्** – (i) अराङ्क्षीत् अराङ्क्ताम् अराङ्क्षुः । अराङ्क्षीः अराङ्क्तम् अराङ्क्त । अराङ्क्षम् अराङ्क्ष्व अराङ्क्ष्म । (ii) अरङ्क्त अरङ्क्षाताम् अरङ्क्षत । अरङ्क्थाः अरङ्क्षाथाम् अरङ्ग्ध्वम् । अरङ्क्षि अरङ्क्ष्वहि अरङ्क्ष्महि । **१०. लृङ्** – (i) अरङ्क्ष्यत् अरङ्क्ष्यताम् अरङ्क्ष्यन् । अरङ्क्ष्यः अरङ्क्ष्यतम् अरङ्क्ष्यत । अरङ्क्ष्यम् अरङ्क्ष्याव अरङ्क्ष्याम । (ii) अरङ्क्ष्यत अरङ्क्ष्येताम् अरङ्क्ष्यन्त । अरङ्क्ष्यथाः अरङ्क्ष्येथाम् अरङ्क्ष्यध्वम् । अरङ्क्ष्ये अरङ्क्ष्यावहि अङ्क्ष्यामह

णिचि – रञ्जयति/रजयति[2], **सनि** – रिरङ्क्षति-ते, **यकि** – रज्यते ।

१. 'रञ्जेश्च' इति शपि नकारलोपः ।

२. 'रञ्जेर्णौ मृगरमणे' इति नलोपः । मृगरमणम् आखेटनम् । रजयति मृगान् ।

१०००. शप – आक्रोशे । सकर्मकः, अनिट्, उभय । 'आक्रोशे शप्यते शप्येत्, शपते शपतीति च । उपालम्भे शपेः वाक्यात्तङि स्यात् शपते पदम्' (श्लो. १३२) इति देवः । 'आक्रोशो विरुद्धानुध्यानम्' इति क्षीरस्वामी ।

१. लट् – (i) शपति शपतः शपन्ति । शपसि शपथः शपथ । शपामि शपावः शपामः । (ii) शपते शपेते शपन्ते । शपसे शपेथे शपध्वे । शपे शपावहे शपामहे । **२. लिट्** – (i) शशाप शेपतुः शेपुः । शेपिथ-शशप्थ शेपथुः शेप । शशाप, शशप शेपिव शेपिम । (ii) शेपे शेपाते शेपिरे । शेपिषे शेपाथे शेपिध्वे । शेपे शेपिवहे शेपिमहे । **३. लुट्** – (i) शप्ता शप्तारौ शप्तारः । शप्तासि शप्तास्थः शप्तास्थ । शप्तास्मि शप्तास्वः शप्तास्मः । (ii) शप्ता शप्तारौ शप्तारः । शप्तासे शप्तासाथे शप्ताध्वे । शप्ताहे शप्तास्वहे शप्तास्महे । **४. लृट्** – (i) शप्स्यति शप्स्यतः शप्स्यन्ति । शप्स्यसि शप्स्यथः शप्स्यथ । शप्स्यामि शप्स्यावः शप्स्यामः । (ii) शप्स्यते शप्स्येते शप्स्यन्ते । शप्स्यसे शप्स्येथे शप्स्यध्वे । शप्स्ये शप्स्यावहे शप्स्यामहे । **५. लोट्** – (i) शपतु, शपतात् शपताम् शपन्तु । शप, शपतात् शपतम् शपत । शपानि शपाव शपाम । (ii) शपताम् शपेताम् शपन्ताम् । शपस्व शपेथाम् शपध्वम् । शपै शपावहै शपामहै । **६. लङ्** – (i) अशपत् अशपताम् अशपन् । अशपः अशपतम् अशपत । अशपम् अशपाव अशपाम । (ii) अशपत अशपेताम् अशपन्त । अशपथाः अशपेथाम् अशपध्वम् । अशपे अशपावहि अशपामहि । **७. विधिलिङ्** – (i) शपेत् शपेताम् शपेयुः । शपेः शपेतम् शपेत । शपेयम् शपेव शपेम । (ii) शपेत शपेयाताम् शपेरन् । शपेथाः शपेयाथाम् शपेध्वम् । शपेय शपेवहि शपेमहि । **८. आशीर्लिङ्** – (i) शप्यात् शप्यास्ताम् शप्यासुः । शप्याः शप्यास्तम् शप्यास्त । शप्यासम् शप्यास्व शप्यास्म । (ii) शप्सीष्ट शप्सीयास्ताम् शप्सीरन् । शप्सीष्ठाः शप्सीयास्थाम् शप्सीध्वम् । शप्सीय शप्सीवहि शप्सीमहि । **९. लुङ्** – (ii) अशाप्सीत् अशाप्ताम् अशाप्सुः । अशाप्सीः अशाप्तम् अशाप्त । अशाप्सम् अशाप्स्व अशाप्स्म । (ii) अशप्त अशप्साताम् अशप्सत । अशप्थाः अशप्साथाम् अशब्ध्वम् । अशप्सि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अशप्स्वहि अशप्स्महि । **१०. लृङ्** - (i) अशप्स्यत् अशप्स्यताम् अशप्स्यन् । अशप्स्यः अशप्स्यतम् अशप्स्यत । अशप्स्यम् अशप्स्याव अशप्स्याम । (ii) अशप्स्यत अशप्स्येताम् अशप्स्यन्त । अशप्स्थाः अशप्स्येथाम् अशप्स्यध्वम् । अशप्स्ये अशप्स्यावहि अशप्स्यामहि ।

णिचि - शापयति - ते, **सनि** - शिशप्सति - ते, **यकि** - शप्यते ।

१००१. त्विष - दीप्तौ । अकर्म, अनिट्, उभय ।

१. लट् - (i) त्वेषति त्वेषतः त्वेषन्ति । त्वेषसि त्वेषथः त्वेषथ । त्वेषामि त्वेषावः त्वेषामः । (ii) त्वेषते त्वेषेते त्वेषन्ते । त्वेषसे त्वेषेथे त्वेषध्वे । त्वेषे त्वेषावहे त्वेषामहे । **२. लिट्** - (i) तित्वेष तित्विषतुः तित्विषुः । तित्वेषिथ तित्विषथुः तित्विष । तित्वेष तित्विषिव तित्विषिम । (ii) तित्विषे तित्विषाते तित्विषिरे । तित्विषिषे तित्विषाथे तित्विषिध्वे । तित्विषे तित्विषिवहे तित्विषिमहे । **३. लुट्** - (i) त्वेष्टा त्वेष्टारौ त्वेष्टारः । त्वेष्टासि त्वेष्टास्थः त्वेष्टास्थ । त्वेष्टास्मि त्वेष्टास्वः त्वेष्टास्मः । (ii) त्वेष्टा त्वेष्टारौ त्वेष्टारः । त्वेष्टासे त्वेष्टासाथे त्वेष्टाध्वे । त्वेष्टाहे त्वेष्टास्वहे त्वेष्टास्महे । **४. लृट्** - (i) त्वेक्ष्यति त्वेक्ष्यतः त्वेक्ष्यन्ति । त्वेक्ष्यसि त्वेक्ष्यथः त्वेक्ष्यथ । त्वेक्ष्यामि त्वेक्ष्यावः त्वेक्ष्यामः । (ii) त्वेक्ष्यते त्वेक्ष्येते त्वेक्ष्यन्ते । त्वेक्ष्यसे त्वेक्ष्येथे त्वेक्ष्यध्वे । त्वेक्ष्ये त्वेक्ष्यावहे त्वेक्ष्यामहे । **५. लोट्** - (i) त्वेषतु, त्वेषतात् त्वेषताम् त्वेषन्तु । त्वेष, त्वेषतात् त्वेषतम् त्वेषत । त्वेषाणि त्वेषाव त्वेषाम । (ii) त्वेषताम् त्वेषेताम् त्वेषन्ताम् । त्वेषस्व त्वेषेथाम् त्वेषध्वम् । त्वेषै त्वेषावहै त्वेषामहै । **६. लङ्** - (i) अत्वेषत् अत्वेषताम् अत्वेषन् । अत्वेषः अत्वेषतम् अत्वेषत । अत्वेषम् अत्वेषाव अत्वेषाम । (ii) अत्वेषत अत्वेषेताम् अत्वेषन्त । अत्वेषथाः अत्वेषेथाम् अत्वेषध्वम् । अत्वेषे अत्वेषावहि अत्वेषामहि । **७. विधिलिङ्** - (i) त्वेषेत् त्वेषेताम् त्वेषेयुः । त्वेषेः त्वेषेतम् त्वेषेत । त्वेषेयम् त्वेषेव त्वेषेम । (ii) त्वेषेत त्वेषेयाताम् त्वेषेरन् । त्वेषेथाः त्वेषेयाथाम् त्वेषेध्वम् । त्वेषेय त्वेषेवहि त्वेषेमहि । **८. आशीर्लिङ्** - (i) त्विष्यात् त्विष्यास्ताम् त्विष्यासुः । त्विष्याः त्विष्यास्तम् त्विष्यास्त । त्विष्यासम् त्विष्यास्व त्विष्यास्म । (ii) त्विक्षीष्ट त्विक्षीयास्ताम् त्विक्षीरन् । त्विक्षीष्ठाः त्विक्षीयास्थाम् त्विक्षीध्वम् । त्विक्षीय त्विक्षीवहि त्विक्षीमहि । **९. लुङ्** - (i) अत्विक्षत् अत्विक्षताम् अत्विक्षन् । अत्विक्षः अत्विक्षतम् अत्विक्षत । अत्विक्षम् अत्विक्षाव अत्विक्षाम । (ii) अत्विक्षत अत्विक्षाताम् अत्विक्षन्त । अत्विक्षथाः अत्विक्षाथाम् अत्विक्षध्वम् । अत्विक्षे अत्विक्षावहि अत्विक्षामहि । **१०. लृङ्** - (i) अत्वेक्ष्यत् अत्वेक्ष्यताम् अत्वेक्ष्यन् । अत्वेक्ष्यः अत्वेक्ष्यतम् अत्वेक्ष्यत । अत्वेक्ष्यम् अत्वेक्ष्याव अत्वेक्ष्याम । (ii) अत्वेक्ष्यत अत्वेक्ष्येताम् अत्वेक्ष्यन्त । अत्वेक्ष्यथाः अत्वेक्ष्येथाम् अत्वेक्ष्यध्वम् । अत्वेक्ष्ये अत्वेक्ष्यावहि अत्वेक्ष्यामहि ।

णिचि - त्वेषयति - ते, **सनि** - तित्विक्षति - ते, **यकि** - त्विष्यते ।

१००२. यज - देवपूजासङ्गतिकरणदानेषु । सकर्म, अनिट्, उभय । 'यजति देवान् पूजयति सङ्गमयति ददाति वा इत्यर्थः' इति बालमनोरमा ।

१. लट् - (i) यजति यजतः यजन्ति । यजसि यजथः यजथ । यजामि यजावः यजामः । (ii) यजते यजेते यजन्ते । यजसे यजेथे यजध्वे । यजे यजावहे यजामहे । **२. लिट्** - (i) इयाज ईजतुः ईजुः । इयजिथ-इयष्ठ ईजथुः ईज । इयाज-इयज ईजिव ईजिम । (ii) ईजे ईजाते ईजिरे । ईजिषे ईजाथे ईजिध्वे । ईजे ईजिवहे ईजिमहे । **३. लुट्** - (i) यष्टा यष्टारौ यष्टारः । यष्टासि यष्टास्थः यष्टास्थ । यष्टास्मि यष्टास्वः यष्टास्मः । (ii) यष्टा यष्टारौ यष्टारः । यष्टासे यष्टासाथे यष्टाध्वे । यष्टाहे यष्टास्वहे यष्टास्महे । **४. लृट्** - (i) यक्ष्यति यक्ष्यतः यक्ष्यन्ति । यक्ष्यसि यक्ष्यथः यक्ष्यथ । यक्ष्यामि यक्ष्यावः यक्ष्यामः । (ii) यक्ष्यते यक्ष्येते यक्ष्यन्ते । यक्ष्यसे यक्ष्येथे यक्ष्यध्वे । यक्ष्ये यक्ष्यावहे यक्ष्यामहे । **५. लोट्** - (i) यजतु,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यजतात् यजताम् यजन्तु । यज, यजतात् यजतम् यजत । यजानि यजाव यजाम । (ii) यजताम् यजेताम् यजन्ताम् । यजस्व यजेथाम् यजध्वम् । यजै यजावहै यजामहै । **६. लङ्** – (i) अयजत् अयजताम् अयजन् । अयजः अयजतम् अयजत । अयजम् अयजाव अयजाम । (ii) अयजत अयजेताम् अयजन्त । अयजथाः अयजेथाम् अयजध्वम् । अयजे अयजावहि अयजामहि । **७. विधिलिङ्** – (i) यजेत् यजेताम् यजेयुः । यजेः यजेतम् यजेत । यजेयम् यजेव यजेम । (ii) यजेत यजेयाताम् यजेरन् । यजेथाः यजेयाथाम् यजेध्वम् । यजेय यजेवहि यजेमहि । **८. आशीर्लिङ्** -(i) इज्यात् इज्यास्ताम् इज्यासुः । इज्याः इज्यास्तम् इज्यास्त । इज्यासम् इज्यास्व इज्यास्म । (ii) यक्षीष्ट यक्षीयास्ताम् यक्षीरन् । यक्षीष्ठाः यक्षीयास्थाम् यक्षीध्वम् । यक्षीय यक्षीवहि यक्षीमहि । **९. लुङ्** – (i) अयाक्षीत् अयाष्टाम् अयाक्षुः । अयाक्षीः अयाष्टम् अयाष्ट । अयाक्षम् अयाक्ष्व अयाक्ष्म । (ii) अयष्ट अयक्षाताम् अयक्षत । अयष्ठाः अयक्षाथाम् अयड्ढ्वम् । अयक्षि अयक्ष्वहि अयक्ष्महि । **१०. लृङ्** – (i) अयक्ष्यत् अयक्ष्यताम् अयक्ष्यन् । अयक्ष्यः अयक्ष्यतम् अयक्ष्यत । अयक्ष्यम् अयक्ष्याव अयक्ष्याम । (ii) अयक्ष्यत अयक्ष्येताम् अयक्ष्यन्त । अयक्ष्यथाः अयक्ष्येथाम् अयक्ष्यध्वम् । अयक्ष्ये अयक्ष्यावहि अयक्ष्यामहि ।

णिचि – याजयति – ते, **सनि** – यियक्षति – ते, **यङि** – इज्यते ।

१००३. डु वप् – बीजसन्ताने । सकर्म, अनिट्, उभय । बीजसन्तानः = क्षेत्रे बीजविकिरणम् । अयं गर्भाधानेऽपि दृश्यते – 'मा वः क्षेत्रे परबीजा(नि) न्यवाप्सुः' (आप.ध.सू. २.६.१३.६) । छेदनेऽपि दृश्यते । यथा – 'केशान् वपति' इति । 'बीजतन्तुसन्ताने' इति कातन्त्रः । द.उ.वृत्तावपि (९.३९) एवमेव । 'छेदने' इति केचित् । 'मुण्डबीजोप्त्योः' इति वोपदेवः । 'निपूर्वात् पितृक्रियार्थता' इति धा.का.व्याख्या (२.४२) । 'बीजतन्तुसन्ताने, वपने, घर्षणे, तन्तुनिर्माणे च' इति काशकृत्स्नः ।

१. लट् – (i) वपति वपतः वपन्ति । वपसि वपथः वपथ । वपामि वपावः वपामः । (ii) वपते वपेते वपन्ते । वपसे वपेथे वपध्वे । वपे वपावहे वपामहे । **२. लिट्** – (i) उवाप ऊपतुः ऊपुः । उवपिथ-उवप्थ ऊपथुः ऊप । उवाप-उवप ऊपिव ऊपिम । (ii) ऊपे ऊपाते ऊपिरे । ऊपिषे ऊपाथे ऊपिध्वे । ऊपे ऊपिवहे ऊपिमहे । **३. लुट्** – (i) वप्ता वप्तारौ वप्तारः । वप्तासि वप्तास्थः वप्तास्थ । वप्तास्मि वप्तास्वः वप्तास्मः । (ii) वप्ता वप्तारौ वप्तारः । वप्तासे वप्तासाथे वप्ताध्वे । वप्ताहे वप्तास्वहे वप्तास्महे । **४. लृट्** – (i) वप्स्यति वप्स्यतः वप्स्यन्ति । वप्स्यसि वप्स्यथः वप्स्यथ । वप्स्यामि वप्स्यावः वप्स्यामः । (ii) वप्स्यते वप्स्येते वप्स्यन्ते । वप्स्यसे वप्स्येथे वप्स्यध्वे । वप्स्ये वप्स्यावहे वप्स्यामहे । **५. लोट्** – (i) वपतु, वपतात् वपताम् वपन्तु । वप, वपतात् वपतम् वपत । वपानि वपाव वपाम । (ii) वपताम् वपेताम् वपन्ताम् । वपस्व वपेथाम् वपध्वम् । वपै वपावहै वपामहै । **६. लङ्** – (i) अवपत् अवपताम् अवपन् । अवपः अवपतम् अवपत । अवपम् अवपाव अवपाम । (ii) अवपत अवपेताम् अवपन्त । अवपथाः अवपेथाम् अवपध्वम् । अवपे अवपावहि अवपामहि । **७. विधिलिङ्** – (i) वपेत् वपेताम् वपेयुः । वपेः वपेतम् वपेत । वपेयम् वपेव वपेम । (ii) वपेत वपेयाताम् वपेरन् । वपेथाः वपेयाथाम् वपेध्वम् । वपेय वपेवहि वपेमहि । **८. आशीर्लिङ्** – (i) उप्यात् उप्यास्ताम् उप्यासुः । उप्याः उप्यास्तम् उप्यास्त । उप्यासम् उप्यास्व उप्यास्म । (ii) वप्सीष्ट वप्सीयास्ताम् वप्सीरन् । वप्सीष्ठाः वप्सीयास्थाम् वप्सीध्वम् । वप्सीय वप्सीवहि वप्सीमहि । **९. लुङ्** – (i) अवाप्सीत् अवाप्ताम् अवाप्सुः । अवाप्सीः अवाप्तम् अवाप्त । अवाप्सम् अवाप्स्व अवाप्स्म । (ii) अवप्त अवप्साताम् अवप्सत । अवप्थाः अवप्साथाम् अवब्ध्वम् । अवप्सि अवप्स्वहि अवप्स्महि । **१०. लृङ्** – (i) अवप्स्यत् अवप्स्यताम् अवप्स्यन् । अवप्स्यः अवप्स्यतम् अवप्स्यत । अवप्स्यम् अवप्स्याव अवप्स्याम । (ii) अवप्स्यत अवप्स्येताम् अवप्स्यन्त ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवप्स्यथाः अवप्स्येथाम् अवप्स्यध्वम् । अवप्स्ये अवप्स्यावहि अवप्स्यामहि ।

णिचि – वापयति – ते, **सनि** – विवप्सति – ते, **यकि** – उप्यते ।

१००४. वह – प्रापणे । द्विकर्म, अनिट्, उभय । 'प्रापणे = धारणे' इति काशकृत्स्नः ।

१. लट् – (i) वहति वहतः वहन्ति । वहसि वहथः वहथ । वहामि वहावः वहामः । (ii) वहते वहेते वहन्ते । वहसे वहेथे वहध्वे । वहे वहावहे वहामहे । **२. लिट्** – (i) उवाह ऊहतुः ऊहुः । उवहिथ-उवोढ ऊहथुः ऊह । उवाह-उवह ऊहिव ऊहिम । (ii) ऊहे ऊहाते ऊहिरे । ऊहिषे ऊहाथे ऊहिध्वे । ऊहे ऊहिवहे ऊहिमहे । **३. लुट्** – (i) वोढा[१] वोढारौ वोढारः । वोढासि वोढास्थः वोढास्थ । वोढास्मि वोढास्वः वोढास्मः । (ii) वोढा वोढारौ वोढारः । वोढासे वोढासाथे वोढाध्वे । वोढाहे वोढास्वहे वोढास्महे । **४. लृट्** – (i) वक्ष्यति वक्ष्यतः वक्ष्यन्ति । वक्ष्यसि वक्ष्यथः वक्ष्यथ । वक्ष्यामि वक्ष्यावः वक्ष्यामः । (ii) वक्ष्यते वक्ष्येते वक्ष्यन्ते । वक्ष्यसे वक्ष्येते वक्ष्यध्वे । वक्ष्ये वक्ष्यावहे वक्ष्यामहे । **५. लोट्** – (i) वहतु, वहतात् वहताम् वहन्तु । वह, वहतात् वहतम् वहत । वहानि वहाव वहाम । (ii) वहताम् वहेताम् वहन्ताम् । वहस्व वहेथाम् वहध्वम् । वहै वहावहै वहामहै । **६. लङ्** – (i) अवहत् अवहताम् अवहन् । अवहः अवहतम् अवहत । अवहम् अवहाव अवहाम । (ii) अवहत अवहेताम् अवहन्त । अवहथाः अवहेथाम् अवहध्वम् । अवहे अवहावहि अवहामहि । **७. विधिलिङ्** – (i) वहेत् वहेताम् वहेयुः । वहेः वहेतम् वहेत । वहेयम् वहेव वहेम । (ii) वहेत वहेयाताम् वहेरन् । वहेथाः वहेयाथाम् वहेध्वम् । वहेय वहेवहि वहेमहि । **८. आशीर्लिङ्** – (i) उह्यात् उह्यास्ताम् उह्यासुः । उह्याः उह्यास्तम् उह्यास्त । उह्यासम् उह्यास्व उह्यास्म । (ii) वक्षीष्ट वक्षीयास्ताम् वक्षीरन् । वक्षीष्ठाः वक्षीयास्थाम् वक्षीध्वम्/ढ्वम् । वक्षीय वक्षीवहि वक्षीमहि । **९. लुङ्** – (i) अवाक्षीत् अवोढाम् अवाक्षुः । अवाक्षीः अवोढम् अवोढ । अवाक्षम् अवाक्ष्व अवाक्ष्म । (ii) अवोढ अवक्षाताम् अवक्षत । अवोढाः अवक्षाथाम् अवोढ्वम् । अवाक्षि अवाक्ष्वहि अवाक्ष्महि । **१०. लृङ्** – (i) अवक्ष्यत् अवक्ष्यताम् अवक्ष्यन् । अवक्ष्यः अवक्ष्यतम् अवक्ष्यत । अवक्ष्यम् अवक्ष्याव अवक्ष्याम । (ii) अवक्ष्यत अवक्ष्येताम् अवक्ष्यन्त । अवक्ष्यथाः अवक्ष्येथाम् अवक्ष्यध्वम् । अवक्ष्ये अवक्ष्यवहि अवक्ष्यमहि ।

णिचि – वाहयति – ते, **सनि** – विवक्षति – ते, **यकि** – उह्यते ।

१. 'सहिवहोः...' इति ओत्वम् ।

१००५. वस – निवासे । अकर्म, अनिट्, परस्मै । 'वस्यति स्तम्भने वस्ते, छादने वसयेत्, वसेत् । निवासे वासयेत् स्नेहे, वासयत्युपसेवने' (श्लो. १८७-८) इति देवः ।

१. लट् – वसति वसतः वसन्ति । वससि वसथः वसथ । वसामि वसावः वसामः । **२. लिट्** – उवास ऊषतुः ऊषुः । उवसिथ-उवस्थ ऊषथुः ऊष । उवास-उवस ऊषिव ऊषिम । **३. लुट्** – वस्ता वस्तारौ वस्तारः । वस्तासि वस्तास्थः वस्तास्थ । वस्तास्मि वस्तास्वः वस्तास्मः । **४. लृट्** – वत्स्यति वत्स्यतः वत्स्यन्ति । वत्स्यसि वत्स्यथः वत्स्यथ । वत्स्यामि वत्स्यावः वत्स्यामः । **५. लोट्** – वसतु, वसतात् वसताम् वसन्तु । वस, वसतात् वसतम् वसत । वसानि वसाव वसाम । **६. लङ्** – अवसत् अवसताम् अवसन् । अवसः अवसतम् अवसत । अवसम् अवसाव अवसाम । **७. विधिलिङ्** – वसेत् वसेताम् वसेयुः । वसेः वसेतम् वसेत । वसेयम् वसेव वसेम । **८. आशीर्लिङ्** – उष्यात् उष्यास्ताम् उष्यासुः । उष्याः उष्यास्तम् उष्यास्त । उष्यासम् उष्यास्व उष्यास्म । **९. लुङ्** – अवात्सीत् अवात्ताम् अवात्सुः । अवात्सीः अवात्तम् अवात्त । अवात्सम् अवात्स्व अवात्स्म । **१०. लृङ्** – अवत्स्यत् अवत्स्यताम् अवत्स्यन् । अवत्स्यः अवत्स्यतम् अवत्स्यत । अवत्स्यम् अवत्स्याव अवत्स्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – वासयति-ते[1], **सनि** – विवत्सति, **यकि** – उष्यते ।

१. 'न पादम्याङ्....मुहरुचिनृतिवदवसः' इति कर्त्रभिप्राये क्रियाफले आत्मनेपदमेव ।

१००६. वेञ् – तन्तुसन्ताने । सकर्म, अनिट्, उभय । 'वयने वयतीत्येवं तन्तुसन्तान इष्यते' (श्लो.१०) इति देवः । 'तन्तुसन्तानो नाम पटनिर्माणार्थं तन्तूनां तिर्यगतिर्यक्प्रसारणविशेषः' इति बालमनोरमा ।

१. लट् – (i) वयति वयतः वयन्ति । वयसि वयथः वयथ । वयामि वयावः वयामः । (ii) वयते वयेते वयन्ते । वयसे वयेथे वयध्वे । वये वयावहे वयामहे । **२. लिट्** - (ii) उवाय[1] ऊयतुः-ऊवतुः[2] ऊयुः-ऊवुः । उवयिथ ऊयथुः-ऊवथुः ऊय-ऊव । उवाय-उवय ऊयिव-ऊविव ऊयिम-ऊविम । (ii) ऊये ऊयाते ऊयिरे । ऊयिषे ऊयाथे ऊयिध्वे-ढ्वे । ऊये ऊयिवहे ऊयिमहे । (iii) ऊवे ऊवाते ऊविरे । ऊविषे ऊवाथे ऊविध्वे-ढ्वे । ऊवे ऊविवहे ऊविमहे । **वयादेशाभावपक्षे** – (iv) ववौ ववतुः ववुः । वविथ-ववाथ ववथुः वव । ववौ वविव वविम । (v) ववे ववाते वविरे । वविषे ववाथे वविध्वे । ववे वविवहे वविमहे । **३. लुट्** – (i) वाता वातारौ वातारः । वातासि वातास्थः वातास्थ । वातास्मि वातास्वः वातास्मः । (ii) वाता वातारौ वातारः । वातासे वातासाथे वाताध्वे । वाताहे वातास्वहे वातास्महे । **४. लृट्** – (i) वास्यति वास्यतः वास्यन्ति । वास्यसि वास्यथः वास्यथ । वास्यामि वास्यावः वास्यामः । (ii) वास्यते वास्येते वास्यन्ते । वास्यसे वास्येते वास्यध्वे । वास्ये वास्यावहे वास्यामहे । **५. लोट्** – (i) वयतु, वयतात् वयताम् वयन्तु । वय, वयतात् वयतम् वयत । वयानि वयाव वयाम । (ii) वयताम् वयेताम् वयन्ताम् । वयस्व वयेथाम् वयध्वम् । वयै वयावहै वयामहै । **६. लङ्** – (i) अवयत् अवयताम् अवयन् । अवयः अवयतम् अवयत । अवयम् अवयाव अवयाम । (ii) अवयत अवयेताम् अवयन्त । अवयथाः अवयेथाम् अवयध्वम् । अवये अवयावहि अवयामहि । **७. विधिलिङ्** – (i) वयेत् वयेताम् वयेयुः । वयेः वयेतम् वयेत । वयेयम् वयेव वयेम । (ii) वयेत वयेयाताम् वयेरन् । वयेथाः वयेयाथाम् वयेध्वम् । वयेय वयेवहि वयेमहि । **८. आशीर्लिङ्** – (i) ऊयात् ऊयास्ताम् ऊयासुः । ऊयाः ऊयास्तम् ऊयास्त । ऊयासम् ऊयास्व ऊयास्म । (ii) वासीष्ट वासीयास्ताम् वासीरन् । वासीष्ठाः वासीयास्थाम् वासीध्वम्/ढ्वम् । वासीय वासीवहि वासीमहि । **९. लुङ्** – (i) अवासीत् अवासिष्टाम् अवासिषुः । अवासीः अवासिष्टम् अवासिष्ट । अवासिषम् अवासिष्व अवासिष्म । (ii) अवास्त अवासाताम् अवासत । अवास्थाः अवासाथाम् अवाध्वम् । अवासि अवास्वहि अवास्महि । **१०. लृङ्** – (i) अवास्यत् अवास्यताम् अवास्यन् । अवास्यः अवास्यतम् अवास्यत । अवास्यम् अवास्याव अवास्याम । (ii) अवास्यत अवास्येताम् अवास्यन्त । अवास्यथाः अवास्येथाम् अवास्यध्वम् । अवास्ये अवास्यावहि अवास्यामहि ।

णिचि – वाययति – ते[3], **सनि** – विवासति, **यकि** – ऊयते ।

१. 'वेञो वयिः' इति वयादेशः विकल्पेन ।
२. 'वश्चान्यतरस्यां किति' इति वयो यस्य वो वा स्यात् किति लिटि ।
३. 'शाच्छासाह्वाव्यावेपां युक्' इति युक् णौ परे । पुकोऽपवादः ।

१००७. व्येञ् – संवरणे । सकर्म, अनिट्, उभय,

१. लट् – (i) व्ययति व्ययतः व्ययन्ति । व्ययसि व्ययथः व्ययथ । व्ययामि व्ययावः व्ययामः । (ii) व्ययते व्ययेते व्ययन्ते । व्ययसे व्ययेथे व्ययध्वे । व्यये व्ययावहे व्ययामहे । **२. लिट्** – (i) विव्याय विव्यतुः विव्युः । विव्ययिथ विव्यथुः विव्य । विव्याय-विव्यय विव्यिव विव्यिम । (ii) विव्ये विव्याते विव्यिरे । विव्यिषे विव्याथे विव्यिध्वे । विव्ये विव्यिवहे विव्यिमहे । **३. लुट्** – (i) व्याता व्यातारौ व्यातारः । व्यातासि व्यातास्थः व्यातास्थ । व्यातास्मि व्यातास्वः व्यातास्मः । (ii) व्याता व्यातारौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्यातारः । व्यातासे व्यातासाथे व्याताध्वे । व्याताहे व्यातास्वहे व्यातास्महे । **४. लृट्** - (i) व्यास्यति व्यास्यतः व्यास्यन्ति । व्यास्यसि व्यास्यथः व्यास्यथ । व्यास्यामि व्यास्यावः व्यास्यामः । (ii) व्यास्यते व्यास्येते व्यास्यन्ते । व्यास्यसे व्यास्येते व्यास्यध्वे । व्यास्ये व्यास्यावहे व्यास्यामहे । **५. लोट्** - (i) व्ययतु, व्ययतात् व्ययताम् व्ययन्तु । व्यय, व्ययतात् व्ययतम् व्ययत । व्ययानि व्ययाव व्ययाम । (ii) व्ययताम् व्ययेताम् व्ययन्ताम् । व्ययस्व व्ययेथाम् व्ययध्वम् । व्ययै व्ययावहै व्ययामहै । **६. लङ्** - (i) अव्ययत् अव्ययताम् अव्ययन् । अव्ययः अव्ययतम् अव्ययत । अव्ययम् अव्ययाव अव्ययाम । (ii) अव्ययत अव्ययेताम् अव्ययन्त । अव्ययथाः अव्ययेथाम् अव्ययध्वम् । अव्यये अव्ययावहि अव्ययामहि । **७. विधिलिङ्** - (i) व्ययेत् व्ययेताम् व्ययेयुः । व्ययेः व्ययेतम् व्ययेत । व्ययेयम् व्ययेव व्ययेम । (ii) व्ययेत व्ययेयाताम् व्ययेरन् । व्ययेथाः व्ययेयाथाम् व्ययेध्वम् । व्ययेय व्ययेवहि व्ययेमहि । **८. आशीर्लिङ्** - (i) वीयात् वीयास्ताम् वीयासुः । वीयाः वीयास्तम् वीयास्त । वीयासम् वीयास्व वीयास्म । (ii) व्यासीष्ट व्यासीयास्ताम् व्यासीरन् । व्यासीष्ठाः व्यासीयास्थाम् व्यासीध्वम्/ढ्वम् । व्यासीय व्यासीवहि व्यासीमहि । **९. लुङ्** - (i) अव्यासीत् अव्यासिष्टाम् अव्यासिषुः । अव्यासीः अव्यासिष्टम् अव्यासिष्ट । अव्यासिषम् अव्यासिष्व अव्यासिष्म । (ii) अव्यास्त अव्यासाताम् अव्यासत । अव्यास्थाः अव्यासाथाम् अव्याध्वम् । अव्यासि अव्यास्वहि अव्यास्महि । **१०. लृङ्** - (i) अव्यास्यत् अव्यास्यताम् अव्यास्यन् । अव्यास्यः अव्यास्यतम् अव्यास्यत । अव्यास्यम् अव्यास्याव अव्यास्याम । (ii) अव्यास्यत अव्यास्येताम् अव्यास्यन्त । अव्यास्यथाः अव्यास्येथाम् अव्यास्यध्वम् । अव्यास्ये अव्यास्यावहि अव्यास्यामहि ।

णिचि - व्याययति - ते[1], **सनि** - विव्यासति-ते, **यकि** - वीयते ।

१. 'शाच्छासाह्वाव्यावेपां युक्' इति युक् णौ परे । पुकोऽपवादः ।

१००८. ह्वेञ् - स्पर्धायां शब्दे च । सकर्म, अनिट्, उभय ।

१. लट् - (i) ह्वयति ह्वयतः ह्वयन्ति । ह्वयसि ह्वयथः ह्वयथ । ह्वयामि ह्वयावः ह्वयामः । (ii) ह्वयते ह्वयेते ह्वयन्ते । ह्वयसे ह्वयेथे ह्वयध्वे । ह्वये ह्वयावहे ह्वयामहे । **२. लिट्** - (i) जुहाव जुहुवतुः जुहुवुः । जुहविथ-जुहोथ जुहुवथुः जुहुव । जुहाव-जुहव जुहुविव जुहुविम । (ii) जुहुवे जुहुवाते जुहुविरे । जुहुविषे जुहुवाथे जुहुविध्वे । जुहुवे जुहुविवहे जुहुविमहे । **३. लुट्** - (i) ह्वाता ह्वातारौ ह्वातारः । ह्वातासि ह्वातास्थः ह्वातास्थ । ह्वातास्मि ह्वातास्वः ह्वातास्मः । (ii) ह्वाता ह्वातारौ ह्वातारः । ह्वातासे ह्वातासाथे ह्वाताध्वे । ह्वाताहे ह्वातास्वहे ह्वातास्महे । **४. लृट्** - (i) ह्वास्यति ह्वास्यतः ह्वास्यन्ति । ह्वास्यसि ह्वास्यथः ह्वास्यथ । ह्वास्यामि ह्वास्यावः ह्वास्यामः । (ii) ह्वास्यते ह्वास्येते ह्वास्यन्ते । ह्वास्यसे ह्वास्येते ह्वास्यध्वे । ह्वास्ये ह्वास्यावहे ह्वास्यामहे । **५. लोट्** - (i) ह्वयतु, ह्वयतात् ह्वयताम् ह्वयन्तु । ह्वय, ह्वयतात् ह्वयतम् ह्वयत । ह्वयानि ह्वयाव ह्वयाम । (ii) ह्वयताम् ह्वयेताम् ह्वयन्ताम् । ह्वयस्व ह्वयेथाम् ह्वयध्वम् । ह्वयै ह्वयावहै ह्वयामहै । **६. लङ्** - (i) अह्वयत् अह्वयताम् अह्वयन् । अह्वयः अह्वयतम् अह्वयत । अह्वयम् अह्वयाव अह्वयाम । (ii) अह्वयत अह्वयेताम् अह्वयन्त । अह्वयथाः अह्वयेथाम् अह्वयध्वम् । अह्वये अह्वयावहि अह्वयामहि । **७. विधिलिङ्** - (i) ह्वयेत् ह्वयेताम् ह्वयेयुः । ह्वयेः ह्वयेतम् ह्वयेत । ह्वयेयम् ह्वयेव ह्वयेम । (ii) ह्वयेत ह्वयेयाताम् ह्वयेरन् । ह्वयेथाः ह्वयेयाथाम् ह्वयेध्वम् । ह्वयेय ह्वयेवहि ह्वयेमहि । **८. आशीर्लिङ्** - (i) हूयात् हूयास्ताम् हूयासुः । हूयाः हूयास्तम् हूयास्त । हूयासम् हूयास्व हूयास्म । (ii) ह्वासीष्ट ह्वासीयास्ताम् ह्वासीरन् । ह्वासीष्ठाः ह्वासीयास्थाम् ह्वासीध्वम्/ढ्वम् । ह्वासीय ह्वासीवहि ह्वासीमहि । **९. लुङ्** - (i) अह्वत् अह्वताम् अह्वन् । अह्वः अह्वतम् अह्वत । अह्वम् अह्वाव अह्वाम । (ii) अह्वत[1] अह्वेताम् अह्वन्त । अह्वथाः अह्वेथाम् अह्वध्वम् । अह्वे अह्वावहि अह्वामहि । (iii) अह्वास्त अह्वासाताम् अह्वासत । अह्वास्थाः अह्वासाथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अह्वाध्वम् । अह्वासि अह्वास्वहि अह्वास्महि । **१०. लृङ्** – (i) अह्वास्यत् अह्वास्यताम् अह्वास्यन् । अह्वास्यः अह्वास्यतम् अह्वास्यत । अह्वास्यम् अह्वास्याव अह्वास्याम । (ii) अह्वास्यत अह्वास्येताम् अह्वास्यन्त । अह्वास्यथाः अह्वास्येथाम् अह्वास्यध्वम् । अह्वास्ये अह्वास्यावहि अह्वास्यामहि ।

णिचि – ह्वाययति – ते, **सनि** – जुहूषति-ते, **यकि** – हूयते ।

१. 'आत्मनेपदेष्वन्यतरस्याम्' इति अङ् वा स्यात् ।

१००९. वद – व्यक्तायां वाचि । सकर्म, सेट्, परस्मै । 'व्यक्तवाचि वदेद्वा णौ वादयेद् वदते वदेत्' (श्लो. १०९) इति देवः ।

१. लट् – वदति वदतः वदन्ति । वदसि वदथः वदथ । वदामि वदावः वदामः । **२. लिट्** – उवाद ऊदतुः ऊदुः । उवदिथ ऊदथुः ऊद । उवाद-उवद ऊदिव ऊदिम । **३. लुट्** – वदिता वदितारौ वदितारः । वदितासि वदितास्थः वदितास्थ । वदितास्मि वदितास्वः वदितास्मः । **४. लृट्** – वदिष्यति वदिष्यतः वदिष्यन्ति । वदिष्यसि वदिष्यथः वदिष्यथ । वदिष्यामि वदिष्यावः वदिष्यामः । **५. लोट्** – वदतु, वदतात् वदताम् वदन्तु । वद, वदतात् वदतम् वदत । वदानि वदाव वदाम । **६. लङ्** – अवदत् अवदताम् अवदन् । अवदः अवदतम् अवदत । अवदम् अवदाव अवदाम । **७. विधिलिङ्** – वदेत् वदेताम् वदेयुः । वदेः वदेतम् वदेत । वदेयम् वदेव वदेम । **८. आशीर्लिङ्** – उद्यात् उद्यास्ताम् उद्यासुः । उद्याः उद्यास्तम् उद्यास्त । उद्यासम् उद्यास्व उद्यास्म । **९. लुङ्** – अवादीत्[1] अवादिष्टाम् अवादिषुः । अवादीः अवादिष्टम् अवादिष्ट । अवादिषम् अवादिष्व अवादिष्म । **१०. लृङ्** – अवदिष्यत् अवदिष्यताम् अवदिष्यन् । अवदिष्यः अवदिष्यतम् अवदिष्यत । अवदिष्यम् अवदिष्याव अवदिष्याम ।

णिचि – वादयते[2] (अकर्त्रभिप्राये तु वादयति) **यकि** – विवदिषति, **कर्मणि** – उद्यते ।

१. 'वदव्रजहलन्तस्याचः' इति नित्यं वृद्धिः ।

२. 'न पादम्याङ्...' इति परस्मैपदप्रतिषेधः ।

१०१०. टु ओ श्वि – गतिवृद्ध्योः । वृद्धौ अकर्म, सेट्, परस्मै ।

१. लट् – श्वयति श्वयतः श्वयन्ति । श्वयसि श्वयथः श्वयथ । श्वयामि श्वयावः श्वयामः । **२. लिट्** – (i) शुशाव[1] शुशुवतुः शुशुवुः । शुशविथ शुशुवथुः शुशुव । शुशाव-शुशव शुशुविव शुशुविम । (ii) शिश्वाय शिश्वियतुः शिश्वियुः । शिश्वियिथ शिश्वियथुः शिश्वियः । शिश्वाय-शिश्वय शिश्वियिव शिश्वियिम । **३. लुट्** – श्वयिता श्वयितारौ श्वयितारः । श्वयितासि श्वयितास्थः श्वयितास्थ । श्वयितास्मि श्वयितास्वः श्वयितास्मः । **४. लृट्** – श्वयिष्यति श्वयिष्यतः श्वयिष्यन्ति । श्वयिष्यसि श्वयिष्यथः श्वयिष्यथ । श्वयिष्यामि श्वयिष्यावः श्वयिष्यामः । **५. लोट्** – श्वयतु, श्वयतात् श्वयताम् श्वयन्तु । श्वय, श्वयतात् श्वयतम् श्वयत । श्वयानि श्वयाव श्वयाम । **६. लङ्** – अश्वयत् अश्वयताम् अश्वयन् । अश्वयः अश्वयतम् अश्वयत । अश्वयम् अश्वयाव अश्वयाम । **७. विधिलिङ्** – श्वयेत् श्वयेताम् श्वयेयुः । श्वयेः श्वयेतम् श्वयेत । श्वयेयम् श्वयेव श्वयेम । **८. आशीर्लिङ्** – शूयात् शूयास्ताम् शूयासुः । शूयाः शूयास्तम् शूयास्त । शूयासम् शूयास्व शूयास्म । **९. लुङ्** – (i) अश्वत् अश्वताम् अश्वन् । अश्वः अश्वतम् अश्वत । अश्वम् अश्वाव अश्वाम । (ii) अशिश्वियत्[2] अशिश्वियताम् अशिश्वियन् । अशिश्वियः अशिश्वियतम् अशिश्वियत । अशिश्वियम् अशिश्वियाव अशिश्वियाम । (iii) अश्वयीत् अश्वयिष्टाम् अश्वयिषुः । अश्वयीः अश्वयिष्टम् अश्वयिष्ट । अश्वयिषम् अश्वयिष्याव अश्वयिष्याम । **१०. लृङ्** – अश्वयिष्यत् अश्वयिष्यताम् अश्वयिष्यन् । अश्वयिष्यः अश्वयिष्यतम् अश्वयिष्यत । अश्वयिष्यम् अश्वयिष्याव अश्वयिष्याम

णिचि – श्वाययति – ते, **सनि** – शिश्वयिषति, **यकि** – शूयते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. 'विभाषा श्वेः' – श्वयतेः सम्प्रसारणं वा स्यात् लिटि यङि च ।

२. 'जृस्तम्भु....' इति विकल्पेन अङि 'श्वयतेरः' इति इकारस्य अकारः । 'विभाषा धेट्श्व्योः' इति वा चङ् ।

१०१०. (अ) ऋत् । अकर्मकः, सेट्, आत्मने । जुगुप्सायाम् इति बहवः । कृपायाम् इत्येके । सौत्रः अयं धातुः 'तकारान्तो धातुरयम् इका निर्दिष्टः, न तु इकारान्तः' इति सिद्धान्तकौमुदी । धातुपाठे अपठितः अपि सूत्रे अनुवादात् (ऋतेरीयङ् – ३.१.२९) धातुत्वं बोध्यम् । 'सनाद्यन्ताः...' (३.१.३२) इति ईयङन्तस्य धातुत्वम् । 'जुगुप्सायाम् अयं धातुः' इति बहवः । 'कृपायां च' इत्येके । (अयं धातुः तत्त्वबोधिनीयुक्तायां कौमुद्याम् अदादेः आदौ दत्तः अस्ति ।)

१. लट् – ऋतीयते ऋतीयेते ऋतीयन्ते । ऋतीयसे ऋतीयेथे ऋतीयध्वे । ऋतीये ऋतीयावहे ऋतीयामहे । **२. लिट्** – (i) ऋतीयाञ्चक्रे ऋतीयाञ्चक्राते ऋतीयाञ्चक्रिरे । ऋतीयाञ्चकृषे ऋतीयाञ्चक्राथे ऋतीयाञ्चकृढ्वे । ऋतीयाञ्चक्रे ऋतीयाञ्चकृवहे ऋतीयाञ्चकृमहे । (ii) ऋतीयाम्बभूव ऋतीयाम्बभूवतुः ऋतीयाम्बभूवुः । ऋतीयाम्बभूविथ ऋतीयाम्बभूवथुः ऋतीयाम्बभूव । ऋतीयाम्बभूव ऋतीयाम्बभूविव ऋतीयाम्बभूविम । (iii) ऋतीयामास ऋतीयामासतुः ऋतीयामासुः । ऋतीयामासिथ ऋतीयामासथुः ऋतीयामास । ऋतीयामास ऋतीयामासिव शानयामासिम । (iv) आनर्त[1] आनृततुः आनृतुः । आनर्तिथ आनृतथुः आनृत । आनर्त आनृतिव आनृतिम । **३. लुट्** – (i) ऋतीयिता ऋतीयितारौ ऋतीयितारः । ऋतीयितासे ऋतीयितासाथे ऋतीयिताध्वे । ऋतीयिताहे ऋतीयितास्वहे ऋतीयितास्महे । (ii) अर्तिता अर्तितारौ अर्तितारः । अर्तितासि अर्तितास्थः अर्तितास्थ । अर्तितास्मि अर्तितास्वः अर्तितास्मः । **४. लृट्** – (i) ऋतीयिष्यते ऋतीयिष्येते ऋतीयिष्यन्ते । ऋतीयिष्यसे ऋतीयिष्येते ऋतीयिष्यध्वे । ऋतीयिष्ये ऋतीयिष्यावहे ऋतीयिष्यामहे । (ii) अर्तिष्यति अर्तिष्यतः अर्तिष्यन्ति । अर्तिष्यसि अर्तिष्यथः अर्तिष्यथ । अर्तिष्यामि अर्तिष्यावः अर्तिष्यामः । **५. लोट्** – ऋतीयताम् ऋतीयेताम् ऋतीयन्ताम् । ऋतीयस्व ऋतीयेथाम् ऋतीयध्वम् । ऋतीयै ऋतीयावहै ऋतीयामहै । **६. लङ्** – अर्तीयत अर्तीयेताम् अर्तीयन्त । अर्तीयथाः अर्तीयेथाम् अर्तीयध्वम् । अर्तीये अर्तीयावहि अर्तीयामहि । **७. विधिलिङ्** – ऋतीयेत ऋतीयेयाताम् ऋतीयेरन् । ऋतीयेथाः ऋतीयेयाथाम् ऋतीयेध्वम् । ऋतीयेय ऋतीयेवहि ऋतीयेमहि । **८. आशीर्लिङ्** – (i) ऋतीयिषीष्ट ऋतीयिषीयास्ताम् ऋतीयिषीरन् । ऋतीयिषीष्ठाः ऋतीयिषीयास्थाम् ऋतीयिषीध्वम्/ढ्वम् । ऋतीयिषीय ऋतीयिषीवहि ऋतीयिषीमहि । (ii) ऋत्यात् ऋत्यास्ताम् ऋत्यासुः । ऋत्याः ऋत्यास्तम् ऋत्यास्त । ऋत्यासम् ऋत्यास्व ऋत्यास्म । **९. लुङ्** - (i) आर्तीयिष्ट आर्तीयिषाताम् आर्तीयिषत । आर्तीयिष्ठाः आर्तीयिषाथाम् आर्तीयिध्वम् । आर्तीयिषि आर्तीयिष्वहि आर्तीयिष्महि । (ii) आर्तीत् आर्तिष्टाम् आर्तिषुः । आर्तीः आर्तिष्टम् आर्तिष्ट । आर्तिषम् आर्तिष्व आर्तिष्म । **१०. लृङ्** – (i) आर्तीयिष्यत आर्तीयिष्येताम् आर्तीयिष्यन्त । आर्तीयिष्यथाः आर्तीयिष्येथाम् आर्तीयिष्यध्वम् । आर्तीयिष्ये आर्तीयिष्यावहि आर्तीयिष्यामहि । (ii) आर्तिष्यत् आर्तिष्यताम् आर्तिष्यन् । आर्तिष्यः आर्तिष्यतम् आर्तिष्यत । आर्तिष्यम् आर्तिष्याव आर्तिष्याम ।

१. 'ऋतेरीयङ्' इति स्वार्थे ईयङ्प्रत्ययः । स च ईयङ् आर्धधातुकविवक्षायां विकल्पेन – 'आयादयः आर्धधातुके वा' (३.१.३१) इति सूत्रेण । ईयङभावे 'शेषात्कर्तरि...' (१.३.७८) इति परस्मैपदम् ।

[भ्वादौ अन्ते कौमुद्यां लिख्यते – 'भ्वादिस्त्वाकृतिगणः । तेन चुलुम्पति इत्यादिसङ्ग्रहः' इति । चुलुम्पधातुः लोपार्थकः । शब्विकरणत्वात् भ्वादौ पाठः । अयं धातुः कविकल्पद्रुमे उक्तः ।]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ अदादिः (२)

१०११. अद - भक्षणे । सकर्म, अनिट्, परस्मै,

१. लट् - अत्ति[1] अत्तः अदन्ति । अत्सि अत्थः अत्थ । अद्मि अद्वः अद्मः । **२. लिट्** - (i) जघास[2] जक्षतुः जक्षुः । जघसिथ जक्षथुः जक्ष । जघास-जघस जक्षिव जक्षिम । (ii) आद आदतुः आदुः । आदिथ आदथुः आद । आद आदिव आदिम । **३. लुट्** - अत्ता अत्तारौ अत्तारः । अत्तासि अत्तास्थः अत्तास्थ । अत्तास्मि अत्तास्वः अत्तास्मः । **४. लृट्** - अत्स्यति अत्स्यतः अत्स्यन्ति । अत्स्यसि अत्स्यथः अत्स्यथ । अत्स्यामि अत्स्यावः अत्स्यामः । **५. लोट्** - अत्तु-अत्तात् अत्ताम् अदन्तु । अद्धि-अत्तात् अत्तम् अत्त । अदानि अदाव अदाम । **६. लङ्** - आदत्[3] आत्ताम् आदन् । आदः आत्तम् आत्त । आदम् आद्व आद्म । **७. विधिलिङ्** - अद्यात् अद्याताम् अद्युः । अद्याः अद्यातम् अद्यात । अद्याम् अद्याव अद्याम । **८. आशीर्लिङ्** - अद्यात् अद्यास्ताम् अद्यासुः । अद्याः अद्यास्तम् अद्यास्त । अद्यासम् अद्यास्व अद्यास्म । **९. लुङ्** - अघसत्[4] अघसताम् अघसन् । अघसः अघसतम् अघसत । अघसम् अघसाव अघसाम । **१०. लृङ्** - आत्स्यत् आत्स्यताम् आत्स्यन् । आत्स्यः आत्स्यतम् आत्स्यत । आत्स्यम् आत्स्याव आत्स्याम ।

णिचि - आदयति - ते[5], **सनि** - जिघत्सति[4], **यकि** - अद्यते

१. 'अदिप्रभृतिभ्यः शपः' इति शपः लुक् ।
२. 'लिट्यन्यतरस्याम्' - अदो घस् वा स्यात् लिटि ।
३. 'आडजादीनाम्' इति आट् । 'अदः सर्वेषाम्' इति अदः परस्य अपृक्तसार्वधातुकस्य अडागमः स्यात् सर्वेषां मतेन ।
४. 'लुङ्सनोर्घस्' - अदो घस् स्यात् लुङि सनि च ।
५. 'निगरणचलनार्थेभ्यश्च' इति प्राप्तस्य - 'अदेः प्रतिषेधः' इति निषेधात् आत्मनेपदम् । अकर्त्रभिप्राये 'शेषात्कर्तरि परस्मैपदम्' इति परस्मैपदम् अपि ।

१०१२. हन - हिंसागत्योः । सकर्म, अनिट् (वधादेशे सेट्) परस्मै,

१. लट् - (i) हन्ति हतः घ्नन्ति । हंसि हथः हथ । हन्मि हन्वः हन्मः । (ii) आहते[1] आघ्नाते आघ्नते । आहसे आघ्नाथे आहध्वे । आघ्ने आहन्वहे आहन्महे । **२. लिट्** - (i) जघान जघ्नतुः जघ्नुः । जघनिथ-जघन्थ जघ्नथुः जघ्न । जघान-जघन जघ्निव जघ्निम । (ii) आजघ्ने आजघ्नाते आजघ्निरे । आजघ्निषे आजघ्नाथे आजघ्निध्वे । आजघ्ने आजघ्निवहे आजघ्निमहे । **३. लुट्** - (i) हन्ता हन्तारौ हन्तारः । हन्तासि हन्तास्थः हन्तास्थ । हन्तास्मि हन्तास्वः हन्तास्मः । (ii) आहन्ता आहन्तारौ आहन्तारः । आहन्तासे आहन्तासाथे आहन्ताध्वे । आहन्ताहे आहन्तास्वहे आहन्तास्महे । **४. लृट्** - (i) हनिष्यति हनिष्यतः हनिष्यन्ति । हनिष्यसि हनिष्यथः हनिष्यथ । हनिष्यामि हनिष्यावः हनिष्यामः । (ii) आहनिष्यते आहनिष्येते आहनिष्यन्ते । आहनिष्यसे आहनिष्येते आहनिष्यध्वे । आहनिष्ये आहनिष्यावहे आहनिष्यामहे । **५. लोट्** - (i) हन्तु-हतात् हताम् घ्नन्तु । जहि-हतात् हतम् हत । हनानि हनाव हनाम । (ii) आहताम् आघ्नाताम् आघ्नताम् । आहस्व आघ्नाथाम् आहध्वम् । आहनै आहनावहै आहनामहै । **६. लङ्** - (i)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अहन् अहताम् अघ्नन् । अहन् अहतम् अहत । अहनम् अहन्व अहन्म । (ii) आहत आघ्नाताम् आघ्नत । आहथाः आघ्नाथाम् आहध्वम् । आघ्नि आहन्वहि आहन्महि । **७. विधिलिङ्** – (i) हन्यात् हन्याताम् हन्युः । हन्याः हन्यातम् हन्यात । हन्याम् हन्याव हन्याम । (ii) आघ्नीत आघ्नीयाताम् आघ्नीरन् । आघ्नीथाः आघ्नीयाथाम् आघ्नीध्वम् । आघ्नीय आघ्नीवहि आघ्नीमहि । **८. आशीर्लिङ्** – (i) वध्यात्[२] वध्यास्ताम् वध्यासुः । वध्याः वध्यास्तम् वध्यास्त । वध्यासम् वध्यास्व वध्यास्म । (ii) आवधिषीष्ट आवधिषीयास्ताम् आवधिषीरन् । आवधिषीष्ठाः आवधिषीयास्थाम् आवधिषीध्वम्/ढ्वम् । आवधिषीय आवधिषीवहि आवधिषीमहि । **९. लुङ्** – (i) अवधीत्[२] अवधिष्टाम् अवधिषुः । अवधीः अवधिष्टम् अवधिष्ट । अवधिषम् अवधिष्व अवधिस्म । (ii) आवधिष्ट आवधिषाताम् आवधिषत । आवधिष्ठाः आवधिषाथाम् आवधिध्वम् । आवधिषि आवधिष्वहि आवधिष्महि । (iii) आहत[३] आहसाताम् आहसत । आहथाः आहसाथाम् आहध्वम् । आहसि आहन्वहि आहन्महि । **१०. लृङ्** – (i) अहनिष्यत् अहनिष्यताम् अहनिष्यन् । अहनिष्यः अहनिष्यतम् अहनिष्यत । अहनिष्यम् अहनिष्याव अहनिष्याम । (ii) आहनिष्यत आहनिष्येताम् आहनिष्यन्त । आहनिष्यथाः आहनिष्येथाम् आहनिष्यध्वम् । आहनिष्ये आहनिष्यावहि आहनिष्यामहि ।

णिचि – घातयति-ते[४], **सनि** – आजिघांसते/जिघांसति[५], **यकि** – हन्यते

१. 'आङो यमहनः' – आङः परयोः यमहनोः आत्मनेपदं स्यात् ।
२. 'लुङि च' हन्तेः वधादेशः । (वधादेशस्य सेट्त्वम्)
३. 'आत्मनेपदेष्वन्यतरस्याम्' – हनः वधादेशः वा स्यात् लुङि आत्मनेपदेषु परेषु ।
४. 'हनस्तोचिण्णलोः' – हन्तेस्तकारोऽन्तादेशः स्यात् चिण्णल्वर्जे ञिति णिति ।
५. 'अज्झनगमां सनि' इति झलादौ सनि दीर्घः ।

१०१३. द्विष – अप्रीतौ । सकर्म, अनिट्, उभय ।

१. लट् – (i) द्वेष्टि द्विष्टः द्विषन्ति । द्वेक्षि द्विष्ठः द्विष्ठ । द्वेष्मि द्विष्वः द्विष्मः । (ii) द्विष्टे द्विषाते द्विषते । द्विक्षे द्विषाथे द्विड्ढ्वे । द्विषे द्विष्वहे द्विष्महे । **२. लिट्** – (i) दिद्वेष दिद्विषतुः दिद्विषुः । दिद्वेषिथ दिद्विषथुः दिद्विष । दिद्वेष दिद्विषिव दिद्विषिम । (ii) दिद्विषे दिद्विषाते दिद्विषिरे । दिद्विषिषे दिद्विषाथे दिद्विषिध्वे । दिद्विषे दिद्विषिवहे दिद्विषिमहे । **३. लुट्** – (i) द्वेष्टा द्वेष्टारौ द्वेष्टारः । द्वेष्टासि द्वेष्टास्थः द्वेष्टास्थ । द्वेष्टास्मि द्वेष्टास्वः द्वेष्टास्मः । (ii) द्वेष्टा द्वेष्टारौ द्वेष्टारः । द्वेष्टासे द्वेष्टासाथे द्वेष्टाध्वे । द्वेष्टाहे द्वेष्टास्वहे द्वेष्टास्महे । **४. लृट्** – (i) द्वेक्ष्यति द्वेक्ष्यतः द्वेक्ष्यन्ति । द्वेक्ष्यसि द्वेक्ष्यथः द्वेक्ष्यथ । द्वेक्ष्यामि द्वेक्ष्यावः द्वेक्ष्यामः । (ii) द्वेक्ष्यते द्वेक्ष्येते द्वेक्ष्यन्ते । द्वेक्ष्यसे द्वेक्ष्येथे द्वेक्ष्यध्वे । द्वेक्ष्ये द्वेक्ष्यावहे द्वेक्ष्यामहे । **५. लोट्** – (i) द्वेष्टु-द्विष्टात् द्विष्टाम् द्विषन्तु । द्विड्ढि-द्विष्टात् द्विष्टं द्विष्ट । द्वेषाणि द्वेषाव द्वेषाम । (ii) द्विष्टाम् द्विषाताम् द्विषताम् । द्विक्ष्व द्विषाथाम् द्विड्ढ्वम् । द्वेषै द्वेषावहै द्वेषामहै । **६. लङ्** – (i) अद्वेट्-अद्वेड् अद्विष्टाम् अद्विषन्[१]-अद्विषुः । अद्वेट्-अद्वेड् अद्विष्टम् अद्विष्ट । अद्वेषम् अद्विष्व अद्विष्म । (ii) अद्विष्ट अद्विषाताम् अद्विषत । अद्विष्ठाः अद्विषाथाम् अद्विड्ढ्वम् । अद्विषि अद्विष्वहि अद्विष्महि । **७. विधिलिङ्** – (i) द्विष्यात् द्विष्याताम् द्विष्युः । द्विष्याः द्विष्यातम् द्विष्यात । द्विष्याम् द्विष्याव द्विष्याम । (ii) द्विषीत द्विषीयाताम् द्विषीरन् । द्विषीथाः द्विषीयाथाम् द्विषीध्वम् । द्विषीय द्विषीवहि द्विषीमहि । **८. आशीर्लिङ्** – (i) द्विष्यात् द्विष्यास्ताम् द्विष्यासुः । द्विष्याः द्विष्यास्तम् द्विष्यास्त । द्विष्यासम् द्विष्यास्व द्विष्यास्म । (ii) द्विक्षीष्ट द्विक्षियास्ताम् द्विक्षीरन् । द्विक्षीष्ठाः द्विक्षीयास्थाम् द्विक्षीध्वम् । द्विक्षीय द्विक्षीवहि द्विक्षीमहि । **९. लुङ्** – (i) अद्विक्षत्[२] अद्विक्षाताम् अद्विक्षन् । अद्विक्षः अद्विक्षतम् अद्विक्षत । अद्विक्षम् अद्विक्षाव अद्विक्षाम । (ii) अद्विक्षत अद्विक्षेताम् अद्विक्षन्त । अद्विक्षथाः अद्विक्षेथाम् अद्विक्षध्वम् । अद्विक्षि अद्विक्षावहि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अद्विक्षामहि । **१०. लृङ्** - (i) अद्वेक्ष्यत् अद्वेक्ष्यताम् अद्वेक्ष्यन् । अद्वेक्ष्यः अद्वेक्ष्यतम् अद्वेक्ष्यत । अद्वेक्ष्यम् अद्वेक्ष्याव अद्वेक्ष्याम । (ii) अद्वेक्ष्यत अद्वेक्ष्येताम् अद्वेक्ष्यन्त । अद्वेक्ष्यथाः अद्वेक्ष्येथाम् अद्वेक्ष्यध्वम् । अद्वेक्ष्ये अद्वेक्ष्यावहि अद्वेक्ष्यामहि ।

णिचि - द्वेषयति - ते, **सनि** - दिद्विक्षति, **यकि** - द्विष्यते ।

१. 'द्विषश्च' लङो झेर्जुस् वा स्यात् ।

२. 'शल इगुपधात्...' इति च्लेः क्सः ।

१०१४. दुह - प्रपूरणे । द्विकर्म, अनिट्, उभय । अयं धातुः द्विकर्मकः । 'प्रपूरणम् = पूरणाभावः । उपसर्गोऽत्र धात्वर्थं बाधते प्रस्थानवत्' इति क्षीरस्वामी । 'ऊधः पूरणप्रतिकूलीभावः इत्यर्थः । ऊधसः सकाशत् क्षारणे इति यावत्' इति बालमनोरमा । 'प्रपूरणम् = त्याजनम्' इति तत्त्वबोधिनी । 'प्रपूरणे दोग्धि दुग्धे दोहतीत्यर्दने दुहेः' (श्लो. १९३) इति देवः ।

१. लट् - (i) दोग्धि[१] दुग्धः दुहन्ति । धोक्षि दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः । (ii) दुग्धे दुहाते दुहते । धुक्षे दुहाथे धुग्ध्वे । दुहे दुह्वहे दुह्महे । **२. लिट्** - (i) दुदोह दुदुहतुः दुदुहुः । दुदोहिथ दुदुहथुः दुदुह । दुदोह दुदुहिव दुदुहिम । (ii) दुदुहे दुदुहाते दुदुहिरे । दुदुहिषे दुदुहाथे दुदुहिध्वे-दुदुहिढ्वे । दुदुहे दुदुहिवहे दुदुहिमहे । **३. लुट्** - (i) दोग्धा दोग्धारौ दोग्धारः । दोग्धासि दोग्धास्थः दोग्धास्थ । दोग्धास्मि दोग्धास्वः दोग्धास्मः । (ii) दोग्धा दोग्धारौ दोग्धारः । दोग्धासे दोग्धासाथे दोग्धाध्वे । दोग्धाहे दोग्धास्वहे दोग्धास्महे । **४. लृट्** - (i) धोक्ष्यति धोक्ष्यतः धोक्ष्यन्ति । धोक्ष्यसि धोक्ष्यथः धोक्ष्यथ । धोक्ष्यामि धोक्ष्यावः धोक्ष्यामः । (ii) धोक्ष्यते धोक्ष्येते धोक्ष्यन्ते । धोक्ष्यसे धोक्ष्येते धोक्ष्यध्वे । धोक्ष्ये धोक्ष्यावहे धोक्ष्यामहे । **५. लोट्** - (i) दोग्धु-दुग्धात् दुग्धाम् दुहन्तु । दुग्धि-दुग्धात् दुग्धम् दुग्ध । दोहानि दोहाव दोहाम । (ii) दुग्धाम् दुहाताम् दुहताम् । धुक्ष्व दुहाथाम् धुग्ध्वम् । दोहै दोहावहै दोहामहै । **६. लङ्** - (i) अधोग्-क् अदुग्धाम् अदुहन् । अधोग् अदुग्धम् अदुग्ध । अदोहम् अदुह्व अदुह्म । (ii) अदुग्ध अदुहाताम् अदुहत । अदुग्धाः अदुहाथाम् अदुग्ध्वम् । अदुहि अदुह्वहि अदुह्महि । **७. विधिलिङ्** - (i) दुह्यात् दुह्याताम् दुह्युः । दुह्याः दुह्यातम् दुह्यात । दुह्याम् दुह्याव दुह्याम । (ii) दुहीत दुहीयाताम् दुहीरन् । दुहीथाः दुहीयाथाम् दुहीध्वम् । दुहीय दुहीवहि दुहीमहि । **८. आशीर्लिङ्** - (i) दुह्यात् दुह्यास्ताम् दुह्यासुः । दुह्याः दुह्यास्तम् दुह्यास्त । दुह्यासम् दुह्यास्व दुह्यास्म । (ii) धुक्षीष्ट धुक्षियास्ताम् धुक्षीरन् । धुक्षीष्ठाः धुक्षीयास्थाम् धुक्षीध्वम् । धुक्षीय धुक्षीवहि धुक्षीमहि । **९. लुङ्** - (i) अधुक्षत्[२] अधुक्षताम् अधुक्षन् । अधुक्षः अधुक्षतम् अधुक्षत । अधुक्षम् अधुक्षाव अधुक्षाम । (ii) अदुग्ध[३]-अधुक्षत अधुक्षाताम् अधुक्षन्त । अदुग्धाः-अदुक्षथाः अधुक्षाथाम् अधुक्षध्वम्-अधुग्ध्वम् । अधुक्षि अदुह्वहि-अधुक्षावहि अदुह्महि-अधुक्षामहि ।

१०. लृङ् - (i) अधोक्ष्यत् अधोक्ष्यताम् अधोक्ष्यन् । अधोक्ष्यः अधोक्ष्यतम् अधोक्ष्यत । अधोक्ष्यम् अधोक्ष्याव अधोक्ष्याम । (ii) अधोक्ष्यत अधोक्ष्येताम् अधोक्ष्यन्त । अधोक्ष्यथाः अधोक्ष्येथाम् अधोक्ष्यध्वम् । अधोक्ष्ये अधोक्ष्यावहि अधोक्ष्यामहि ।

णिचि - दोहयति - ते, **सनि** - दुधुक्षति - ते, **यकि** - दुह्यते

१. 'दादेर्धातोर्घः' - उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदान्ते च ।

२. 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति बशः स्थाने भष् ।

३. 'लुग्वा दुहदिह...' इति क्सस्य वा लुक् ।

१०१५. दिह - उपचये । अकर्म, अनिट्, उभय । उपचयः = लेपः, वृद्धिश्च ।

१. लट् - (i) देग्धि दिग्धः दिहन्ति । धेक्षि दिग्धः दिग्ध । देह्मि दिह्वः दिह्मः । (ii) दिग्धे दिहाते दिहते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धिक्षे दिहाथे धिग्ध्वे । दिहे दिह्वहे दिह्महे । **२. लिट्** - (i) दिदेह दिदिहतुः दिदिहुः । दिदेहिथ दिदिहथुः दिदिह । दिदेह दिदिहिव दिदिहिम । (ii) दिदिहे दिदिहाते दिदिहिरे । दिदिहिषे दिदिहाथे दिदिहिध्वे-दिदिहिढ्वे । दिदिहे दिदिहिवहे दिदिहिमहे । **३. लुट्** - (i) देग्धा देग्धारौ देग्धारः । देग्धासि देग्धास्थः देग्धास्थ । देग्धास्मि देग्धास्वः देग्धास्मः । (ii) देग्धा देग्धारौ दोग्धारः । देग्धासे देग्धासाथे देग्धाध्वे । देग्धाहे देग्धास्वहे देग्धास्महे । **४. लृट्** - (i) धेक्ष्यति धेक्ष्यतः धेक्ष्यन्ति । धेक्ष्यसि धेक्ष्यथः धेक्ष्यथ । धेक्ष्यामि धेक्ष्यावः धेक्ष्यामः । (ii) धेक्ष्यते धेक्ष्येते धेक्ष्यन्ते । धेक्ष्यसे धेक्ष्येते धेक्ष्यध्वे । धेक्ष्ये धेक्ष्यावहे धेक्ष्यामहे ।

५. लोट् - (i) देग्धु-दिग्धात् दिग्धाम् दिहन्तु । दिग्धि-दिग्धात् दिग्धम् दिग्ध । देहानि देहाव देहाम । (ii) दिग्धाम् दिहाताम् दिहताम् । धिक्ष्व दिहाथाम् दिग्ध्वम् । देहै देहावहै देहामहै । **६. लङ्** - (i) अधेग्-क् अदिग्धाम् अदिहन् । अधेग् अदिग्धम् अदिग्ध । अदेहम् अदिह्व अदिह्म । (ii) अदिग्ध अदिहाताम् अदिहत । अदिग्धाः अदिहाथाम् अदिग्ध्वम् । अदिहि अदिह्वहि अदिह्महि । **७. विधिलिङ्** - (i) दिह्यात् दिह्याताम् दिह्युः । दिह्याः दिह्यातम् दिह्यात । दिह्याम् दिह्याव दिह्याम । (ii) दिहीत दिहीयाताम् दिहीरन् । दिहीथाः दिहीयाथाम् दिहीध्वम् । दिहीय दिहीवहि दिहीमहि । **८. आशीर्लिङ्** - (i) दिह्यात् दिह्यास्ताम् दिह्यासुः । दिह्याः दिह्यास्तम् दिह्यास्त । दिह्यासम् दिह्यास्व दिह्यास्म । (ii) धिक्षीष्ट धिक्षियास्ताम् धिक्षीरन् । धिक्षीष्ठाः धिक्षीयास्थाम् धिक्षीध्वम् । धिक्षीय धिक्षीवहि धिक्षीमहि । **९. लुङ्** - अधिक्षत्[2] अधिक्षताम् अधिक्षन् । अधिक्षः अधिक्षतम् अधिक्षत । अधिक्षम् अधिक्षाव अधिक्षाम । (ii) अदिग्ध[3]-अधिक्षत अधिक्षाताम् अधिक्षन्त । अदिग्धाः-अदिक्षथाः अधिक्षाथाम् अधिक्षध्वम्-अधिग्ध्वम् । अधिक्षि अदिह्वहि-अधिक्षावहि अदिह्महि-अधिक्षामहि । **१०. लृङ्** - (i) अधेक्ष्यत् अधेक्ष्यताम् अधेक्ष्यन् । अधेक्ष्यः अधेक्ष्यतम् अधेक्ष्यत । अधेक्ष्यम् अधेक्ष्याव अधेक्ष्याम । (ii) अधेक्ष्यत अधेक्ष्येताम् अधेक्ष्यन्त । अधेक्ष्यथाः अधेक्ष्येथाम् अधेक्ष्यध्वम् । अधेक्ष्ये अधेक्ष्यावहि अधेक्ष्यामहि ।

णिचि - देहयति - ते, **सनि** - दिधिक्षति - ते, **यकि** - दिह्यते

१०१६. **लिह - आस्वादने** । सकर्म, अनिट्, उभय ।

१. लट् - (i) लेढि लीढः लिहन्ति । लेक्षि लीढः लीढ । लेह्मि लिह्वः लिह्मः । (ii) लीढे लिहाते लिहते । लिक्षे लिहाथे लीढ्वे । लिहे लिह्वहे लिह्महे । **२. लिट्** - (i) लिलेह लिलिहतुः लिलिहुः । लिलेहिथ लिलिहथुः लिलिह । लिलेह लिलिहिव लिलिहिम । (ii) लिलिहे लिलिहाते लिलिहिरे । लिलिहिषे लिलिहाथे लिलिहिध्वे-लिलिहिढ्वे । लिलिहे लिलिहिवहे लिलिहिमहे । **३. लुट्** - (i) लेढा लेढारौ लेढारः । लेढासि लेढास्थः लेढास्थ । लेढास्मि लेढास्वः लेढास्मः । (ii) लेढा लेढारौ लेढारः । लेढासे लेढासाथे लेढाध्वे । लेढाहे लेढास्वहे लेढास्महे । **४. लृट्** - (i) लेक्ष्यति लेक्ष्यतः लेक्ष्यन्ति । लेक्ष्यसि लेक्ष्यथः लेक्ष्यथ । लेक्ष्यामि लेक्ष्यावः लेक्ष्यामः । (ii) लेक्ष्यते लेक्ष्येते लेक्ष्यन्ते । लेक्ष्यसे लेक्ष्येते लेक्ष्यध्वे । लेक्ष्ये लेक्ष्यावहे लेक्ष्यामहे । **५. लोट्** - (i) लेढु-लीढात् लीढाम् लिहन्तु । लीढि, लीढात् लीढम् लीढ । लेहानि लेहाव लेहाम । (ii) लीढाम् लिहाताम् लिहताम् । लिक्ष्व लिहाथाम् लीढ्वम् । लेहै लेहावहै लेहामहै । **६. लङ्** - (i) अलेट्-ड् अलीढाम् अलिहन् । अलेट्-ड् अलीढम् अलीढ । अलेहम् अलिह्व अलिह्म । (ii) अलीढ अलिहाताम् अलिहत । अलीढाः अलिहाथाम् अलीढ्वम् । अलिहि अलिह्वहि अलिह्महि । **७. विधिलिङ्** - (i) लिह्यात् लिह्याताम् लिह्युः । लिह्याः लिह्यातम् लिह्यात । लिह्याम् लिह्याव लिह्याम । (ii) लिहीत लिहीयाताम् लिहीरन् । लिहीथाः लिहीयाथाम् लिहीध्वम् । लिहीय लिहीवहि लिहीमहि । **८. आशीर्लिङ्** - (i) लिह्यात् लिह्यास्ताम् लिह्यासुः । लिह्याः लिह्यास्तम् लिह्यास्त । लिह्यासम् लिह्यास्व लिह्यास्म । (ii) लिक्षीष्ट लिक्षियास्ताम् लिक्षीरन् । लिक्षीष्ठाः लिक्षीयास्थाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लिक्षीध्वम् । लिक्षीय लिक्षीवहि लिक्षीमहि । **९. लुङ्** - (i) अलिक्षत् अलिक्षताम् अलिक्षन् । अलिक्षः अलिक्षतम् अलिक्षत । अलिक्षम् अलिक्षाव अलिक्षाम । (ii) अलीढ-अलिक्षत अलिक्षाताम् अलिक्षन्त । अलिक्षथाः-अलीढाः अलिक्षाथाम् अलीढ्वम् अलिक्षध्वम् । अलिक्षि अलिक्षावहि-अलिह्वहि अलिक्षामहि-अलिह्महि । **१०. लृङ्** - (i) अलेक्ष्यत् अलेक्ष्यताम् अलेक्ष्यन् । अलेक्ष्यः अलेक्ष्यतम् अलेक्ष्यत । अलेक्ष्यम् अलेक्ष्याव अलेक्ष्याम । (ii) अलेक्ष्यत अलेक्ष्येताम् अलेक्ष्यन्त । अलेक्ष्यथाः अलेक्ष्येथाम् अलेक्ष्यध्वम् । अलेक्ष्ये अलेक्ष्यावहि अलेक्ष्यामहि ।

णिचि - लेहयति - ते, **सनि** - लिलिक्षति - ते, **यकि** - लिह्यते

१०१७. चक्षिङ् - व्यक्तायां वाचि । सकर्म, सेट्, ख्याञादेशे त्वनिट्, आत्मने । ख्याञादेशे त्वनिट्, आत्मने, "अयं दर्शनकर्मा च; यथा - 'विश्वा रूपाऽभिचष्टे शचीभिः' इति प्रायेण अयम् आङ्पूर्वः" इति माधवीयधातुवृत्तिः ।

१. लट् - चष्टे चक्षाते चक्षते । चक्षे चष्टाथे चड्ढ्वे । चक्षे चक्ष्वहे चक्ष्महे । **२. लिट्** - (i) चचक्षे चचक्षाते चचक्षिरे । चचक्षिषे चचक्षाथे चचक्षिध्वे । चचक्षे चचक्षिवहे चचक्षिमहे । (ii) चख्ये[१] चख्याते चख्यिरे । चख्यिषे चख्याथे चख्यिध्वे । चख्ये चख्यिवहे चख्यिमहे । (iii) चख्यौ[२] चख्यतुः चख्युः । चख्यिथ-चख्याथ चख्यथुः चख्य । चख्यौ चख्यिव चख्यिम । (iv) चक्शे[३] चक्शाते चक्शिरे । चक्शिषे चक्शाथे चक्शिध्वे । चक्शे चक्शिवहे चक्शिमहे । (v) चक्शौ चक्शतुः चक्शुः । चक्शिथ-चक्शाथ चक्शथुः चक्श । चक्शौ चक्शिव चक्शिम । **३. लुट्** - (i) ख्याता ख्यातारौ ख्यातारः । ख्यातासे ख्यातासाथे ख्याताध्वे । ख्याताहे ख्यातास्वहे ख्यातास्महे । (ii) ख्याता[४] ख्यातारौ ख्यातारः । ख्यातासि ख्यातास्थः ख्यातास्थ । ख्यातास्मि ख्यातास्वः ख्यातास्मः । (iii) क्शाता क्शातारौ क्शातारः । क्शातासे क्शातासाथे क्शाताध्वे । क्शाताहे क्शातास्वहे क्शातास्महे । (iv) क्शाता[४] क्शातारौ क्शातारः । क्शातासि क्शातास्थः क्शातास्थ । क्शातास्मि क्शातास्वः क्शातास्मः । **४. लृट्** - (i) ख्यास्यते ख्यास्येते ख्यास्यन्ते । ख्यास्यसे ख्यास्येथे ख्यास्यध्वे । ख्यास्ये ख्यास्यावहे ख्यास्यामहे । (ii) ख्यास्यति ख्यास्यतः ख्यास्यन्ति । ख्यास्यसि ख्यास्यथः ख्यास्यथ । ख्यास्यामि ख्यास्यावः ख्यास्यामः । (iii) क्शास्यते क्शास्येते क्शास्यन्ते । क्शास्यसे क्शास्येथे क्शास्यध्वे । क्शास्ये क्शास्यावहे क्शास्यामहे । (iv) क्शास्यति क्शास्यतः क्शास्यन्ति । क्शास्यसि क्शास्यथः क्शास्यथ । क्शास्यामि क्शास्यावः क्शास्यामः । **५. लोट्** - चष्टाम् चक्षाताम् चक्षताम् । चक्ष्व चक्षाथाम् चड्ढ्वम् । चक्षै चक्षावहै चक्षामहै । **६. लङ्** - अचष्ट अचक्षाताम् अचक्षत । अचष्ठाः अचक्षाथाम् अचड्ढ्वम् । अचक्षि अचक्ष्वहि अचक्ष्महि । **७. विधिलिङ्** - चक्षीत चक्षीयाताम् चक्षीरन् । चक्षीथाः चक्षीयाथाम् चक्षीध्वम् । चक्षीय चक्षीवहि चक्षीमहि । **८. आशीर्लिङ्** - (i) ख्यासीष्ट[५] ख्यासीयास्ताम् ख्यासीरन् । ख्यासीष्ठाः ख्यासीयास्थाम् ख्यासीध्वम् । ख्यासीय ख्यासीवहि ख्यासीमहि । (ii) ख्यायात् ख्यायास्ताम् ख्यायासुः । ख्यायाः ख्यायास्तम् ख्यायास्त । ख्यायासम् ख्यायास्व ख्यायास्म । (iii) ख्येयात् ख्येयास्ताम् ख्येयासुः । ख्येयाः ख्येयास्तम् ख्येयास्त । ख्येयासम् ख्येयास्व ख्येयास्म । (iv) क्शासीष्ट[६] क्शासीयास्ताम् क्शासीरन् । क्शासीष्ठाः क्शासीयास्थाम् क्शासीध्वम् । क्शासीय क्शासीवहि क्शासीमहि । (v) क्शायात् क्शायास्ताम् क्शायासुः । क्शायाः क्शायास्तम् क्शायास्त । क्शायासम् क्शायास्व क्शायास्म । (vi) क्शेयात् क्शेयास्ताम् क्शेयासुः । क्शेयाः क्शेयास्तम् क्शेयास्त । क्शेयासम् क्शेयास्व क्शेयास्म । **९. लुङ्** - (i) अख्यत अख्येताम् अख्यन्त । अख्यथाः अख्येथाम् अख्यध्वम् । अख्ये अख्यावहि अख्यामहि । (ii) अख्यत् अख्यताम् अख्यन् । अख्यः अख्यतम् अख्यत । अख्यम् अख्याव अख्याम । (iii) अक्शास्त

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अक्शासाताम् अक्शासत । अक्शास्थाः अक्शासाथाम् अक्शाध्वम् । अक्शासि अक्शास्वहि अक्शास्महि । (iv) अक्शासीत् अक्शासिष्टाम् अक्शासिषुः । अक्शासीः अक्शासिष्टम् अक्शासिष्ट । अक्शासिषम् अक्शासिष्व अक्शासिष्म । **१०. लृङ्** – (i) अख्यास्यत अख्यास्येताम् अख्यास्यन्त । अख्यास्यथाः अख्यास्यथाम् अख्यास्यध्वम् । अख्यास्ये अख्यास्यावहि अख्यास्यामहि । (ii) अख्यास्यत् अख्यास्येताम् अख्यास्यन् । अख्यास्यः अख्यास्यतम् अख्यास्यत । अख्यास्यम् अख्यास्याव अख्यास्याम । (iii) अक्शास्यत अक्शास्येताम् अक्शास्यन्त । अक्शास्यथाः अक्शास्येथाम् अक्शास्यध्वम् । अक्शास्ये अक्शास्यावहि अक्शास्यामहि । (iv) अक्शास्यत् अक्शास्यताम् अक्शास्यन् । अक्शास्यः अक्शास्यतम् अक्शास्यत । अक्शास्यम् अक्शास्याव अक्शास्याम ।

णिचि – ख्यापयति-ते/क्शापयति-ते, **सनि** – चिख्यासति/ते चिक्शासति-ते, **यकि** – ख्यायते/क्शायते ।

१. 'चक्षिङः ख्याञ्' – चक्षिङः ख्याञ् स्यात् आर्धधातुके । 'वा लिटि' ।

२. ख्याञो ञित्त्वात् परस्मैपदरूपाणि अपि ।

३. सर्वत्र ख्याञादेशस्थलेषु क्शाञादेश इति पक्षः अपि अस्ति । क्शाञो ञित्वात् अस्यापि परस्मैपदरूपाणि अपि ।

४. क्शाञादेश इति पक्षे उभयपदिता ।

५. 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेः अङ् ।

६. आशीर्लिङि क्शाञादेशपक्षीयाणि अपि पुनः त्रीणि रूपाणि ।

१०१८. ईर – गतौ कम्पने च । सकर्म, सेट्, आत्मने । 'ईरयतीरति । ईरः क्षेपे विभाषा णौ लुकीर्ते गतिकम्पयोः' (श्लो. १५३) इति देवः ।

१. लट् – ईर्ते ईराते ईरते । ईर्षे ईराथे ईर्ध्वे । ईरि ईर्वहे ईर्महे । **२. लिट्** – (i) ईराञ्चक्रे ईराञ्चक्राते ईराञ्चक्रिरे । ईराञ्चकृषे ईराञ्चक्राथे ईराञ्चकृढ्वे । ईराञ्चक्रे ईराञ्चकृवहे ईराञ्चकृमहे । (ii) ईराम्बभूव ईराम्बभूवतुः ईराम्बभूवुः । ईराम्बभूविथ ईराम्बभूवथुः ईराम्बभूव । ईराम्बभूव ईराम्बभूविव ईराम्बभूविम । (iii) ईरामास ईरामासतुः ईरामासुः । ईरामासिथ ईरामासथुः ईरामास । ईरामास ईरामासिव ईरामासिम । **३. लुट्** – ईरिता ईरितारौ ईरितारः । ईरितासे ईरितासाथे ईरिताध्वे । ईरिताहे ईरितास्वहे ईरितास्महे । **४. लृट्** – ईरिष्यते ईरिष्येते ईरिष्यन्ते । ईरिष्यसे ईरिष्येते ईरिष्यध्वे । ईरिष्ये ईरिष्यावहे ईरिष्यामहे । **५. लोट्** – ईर्ताम् ईराताम् ईरताम् । ईर्ष्व ईराथाम् ईर्ध्वम् । ईरै ईरावहै ईरामहै । **६. लङ्** – ऐर्त ऐराताम् ऐरत । ऐर्थाः ऐराथाम् ऐर्ध्वम् । ऐरि ऐर्वहि ऐर्महि । **७. विधिलिङ्** – ईरीत ईरीयाताम् ईरीरन् । ईरीथाः ईरीयाथाम् ईरीध्वम् । ईरीय ईरीवहि ईरीमहि । **८. आशीर्लिङ्** – ईरिषीष्ट ईरिषीयास्ताम् ईरिषीरन् । ईरिषीष्ठाः ईरिषीयास्थाम् ईरिषीध्वम्/ढ्वम् । ईरिषीय ईरिषीवहि ईरिषीमहि । **९. लुङ्** – ऐरिष्ट ऐरिषाताम् ऐरिषत । ऐरिष्ठाः ऐरिषाथाम् ऐरिध्वम्-ढ्वम् । ऐरिषि ऐरिष्वहि ऐरिष्महि । **१०. लृङ्** – ऐरिष्यत ऐरिष्येताम् ऐरिष्यन्त । ऐरिष्यथाः ऐरिष्येथाम् ऐरिष्यध्वम् । ऐरिष्ये ऐरिष्यावहि ऐरिष्यामहि । **णिचि** – ईरयति[१], **सनि** – ईरिरिषते, **यकि** – ईर्यते

१. कम्पनार्थकत्वात् 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदम् एव ।

१०१९. ईड – स्तुतौ । सकर्म, सेट्, आत्मने । 'स्तुत्यामीट्टे तत्रेडयेण्णिचि' (श्लो. ८४) इति देवः ।

१. लट् – ईट्टे ईडाते ईडते । ईडिषे[१] ईडाथे ईडिध्वे । ईडे ईड्वहे ईड्महे । **२. लिट्** – (i) ईडाञ्चक्रे ईडाञ्चक्राते ईडाञ्चक्रिरे । ईडाञ्चकृषे ईडाञ्चक्राथे ईडाञ्चकृढ्वे । ईडाञ्चक्रे ईडाञ्चकृवहे ईडाञ्चकृमहे । (ii) ईडाम्बभूव ईडाम्बभूवतुः ईडाम्बभूवुः । ईडाम्बभूविथ ईडाम्बभूवथुः ईडाम्बभूव । ईडाम्बभूव ईडाम्बभूविव ईडाम्बभूविम । (iii) ईडामास ईडामासतुः ईडामासुः । ईडामासिथ ईडामासथुः ईडामास । ईडामास ईडामासिव ईडामासिम । **३. लुट्** – ईडिता ईडितारौ ईडितारः । ईडितासे ईडितासाथे ईडिताध्वे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईडिताहे ईडितास्वहे ईडितास्महे । **४. लृट्** – ईडिष्यते ईडिष्येते ईडिष्यन्ते । ईडिष्यसे ईडिष्येते ईडिष्यध्वे । ईडिष्ये ईडिष्यावहे ईडिष्यामहे । **५. लोट्** – ईट्टाम् ईडाताम् ईडताम् । ईडिष्व ईडाथाम् ईड्ढ्वम् । ईडै ईडावहै ईडामहै । **६. लङ्** – ऐट्ट ऐडाताम् ऐडत । ऐट्ठाः ऐडाथाम् ऐड्ढ्वम् । ऐडि ऐड्वहि ऐड्महि । **७. विधिलिङ्** – ईडीत ईडीयाताम् ईडीरन् । ईडीथाः ईडीयाथाम् ईडीध्वम् । ईडीय ईडीवहि ईडीमहि । **८. आशीर्लिङ्** – ईडिषीष्ट ईडिषीयास्ताम् ईडिषीरन् । ईडिषीष्ठाः ईडिषीयास्थाम् ईडिषीध्वम्/ढ्वम् । ईडिषीय ईडिषीवहि ईडिषीमहि । **९. लुङ्** – ऐडिष्ट ऐडिषाताम् ऐडिषत । ऐडिष्ठाः ऐडिषाथाम् ऐडिध्वम्-ढ्वम् । ऐडिषि ऐडिष्वहि ऐडिष्महि । **१०. लृङ्** – ऐडिष्यत ऐडिष्येताम् ऐडिष्यन्त । ऐडिष्यथाः ऐडिष्येथाम् ऐडिष्यध्वम् । ऐडिष्ये ऐडिष्यावहि ऐडिष्यामहि ।

णिचि – ईडयति – ते, **सनि** – ईडिडिषते, **यकि** – ईड्यते

१. 'ईशः से ईडजनोर्ध्वे च' इति इट् ।

१०२०. ईश – ऐश्वर्ये । अकर्म, सेट्, आत्मने ।

१. लट् – ईष्टे ईशाते ईशते । ईशिषे१ ईशाथे ईशिध्वे । ईशे ईश्वहे ईश्महे । **२. लिट्** – (i) ईशाञ्चक्रे ईशाञ्चक्राते ईशाञ्चक्रिरे । ईशाञ्चकृषे ईशाञ्चक्राथे ईशाञ्चकृढ्वे । ईशाञ्चक्रे ईशाञ्चकृवहे ईशाञ्चकृमहे । (ii) ईशाम्बभूव ईशाम्बभूवतुः ईशाम्बभूवुः । ईशाम्बभूविथ ईशाम्बभूवथुः ईशाम्बभूव । ईशाम्बभूव ईशाम्बभूविव ईशाम्बभूविम । (iii) ईशामास ईशामासतुः ईशामासुः । ईशामासिथ ईशामासथुः ईशामास । ईशामास ईशामासिव ईशामासिम । **३. लुट्** – ईशिता ईशितारौ ईशितारः । ईशितासे ईशितासाथे ईशिताध्वे । ईशिताहे ईशितास्वहे ईशितास्महे । **४. लृट्** – ईशिष्यते ईशिष्येते ईशिष्यन्ते । ईशिष्यसे ईशिष्येते ईशिष्यध्वे । ईशिष्ये ईशिष्यावहे ईशिष्यामहे । **५. लोट्** – ईष्टाम् ईशाताम् ईशताम् । ईशिष्व ईशाथाम् ईड्ढ्वम् । ईशै ईशावहै ईशामहै । **६. लङ्** – ऐष्ट ऐशाताम् ऐशत । ऐष्ठाः ऐशाथाम् ऐड्ढ्वम् । ऐशि ऐश्वहि ऐश्महि । **७. विधिलिङ्** – ईशीत ईशीयाताम् ईशीरन् । ईशीथाः ईशीयाथाम् ईशीध्वम् । ईशीय ईशीवहि ईशीमहि । **८. आशीर्लिङ्** – ईशिषीष्ट ईशिषीयास्ताम् ईशिषीरन् । ईशिषीष्ठाः ईशिषीयास्थाम् ईशिषीध्वम्/ढ्वम् । ईशिषीय ईशिषीवहि ईशिषीमहि । **९. लुङ्** – ऐशिष्ट ऐशिषाताम् ऐशिषत । ऐशिष्ठाः ऐशिषाथाम् ऐशिध्वम्-ढ्वम् । ऐशिषि ऐशिष्वहि ऐशिष्महि । **१०. लृङ्** – ऐशिष्यत ऐशिष्येताम् ऐशिष्यन्त । ऐशिष्यथाः ऐशिष्येथाम् ऐशिष्यध्वम् । ऐशिष्ये ऐशिष्यावहि ऐशिष्यामहि ।

णिचि – ईशयति – ते, **सनि** – ईशिशिषते, **यकि** – ईश्यते

१. 'ईशः से ईडजनोर्ध्वे च' इति इट् ।

१०२१. आस – उपवेशने । अकर्म, सेट्, आत्मने,

१. लट् – आस्ते आसाते आसते । आस्से आसाथे आध्वे । आसे आस्वहे आस्महे । **२. लिट्** – (i) आसाञ्चक्रे[1] आसाञ्चक्राते आसाञ्चक्रिरे । आसाञ्चकृषे आसाञ्चक्राथे आसाञ्चकृढ्वे । आसाञ्चक्रे आसाञ्चकृवहे आसाञ्चकृमहे । (ii) आसाम्बभूव आसाम्बभूवतुः आसाम्बभूवुः । आसाम्बभूविथ आसाम्बभूवथुः आसाम्बभूव । आसाम्बभूव आसाम्बभूविव आसाम्बभूविम । (iii) आसामास आसामासतुः आसामासुः । आसामासिथ आसामासथुः आसामास । आसामास आसामासिव आसामासिम । **३. लुट्** – आसिता आसितारौ आसितारः । आसितासे आसितासाथे आसिताध्वे । आसिताहे आसितास्वहे आसितास्महे । **४. लृट्** – आसिष्यते आसिष्येते आसिष्यन्ते । आसिष्यसे आसिष्येते आसिष्यध्वे । आसिष्ये आसिष्यावहे आसिष्यामहे । **५. लोट्** – आस्ताम् आसाताम् आसताम् । आस्स्व आसाथाम् आध्वम् । आसै आसावहै आसामहै । **६. लङ्** – आस्त आसाताम् आसत । आस्थाः आसाथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आध्वम् । आसि आस्वहि आस्महि । **७. विधिलिङ्** – आसीत आसीयाताम् आसीरन् । आसीथाः आसीयाथाम् आसीध्वम् । आसीय आसीवहि आसीमहि । **८. आशीर्लिङ्** – आसिषीष्ट आसिषीयास्ताम् आसिषीरन् । आसिषीष्ठाः आसिषीयास्थाम् आसिषीध्वम्/ढ्वम् । आसिषीय आसिषीवहि आसिषीमहि । **९. लुङ्** – आसिष्ट आसिषाताम् आसिषत । आसिष्ठाः आसिषाथाम् आसिध्वम्-ढ्वम् । आसिषि आसिष्वहि आसिष्महि । **१०. लृङ्** – आसिष्यत आसिष्येताम् आसिष्यन्त । आसिष्यथाः आसिष्येथाम् आसिष्यध्वम् । आसिष्ये आसिष्यावहि आसिष्यामहि ।

णिचि – आसयति - ते, **सनि** – आसिसिषते, **यकि** – आस्यते

१. 'दयायासश्च' इति आम् स्यात् लिटि ।

१०२२. आङः[1] शासु इच्छायाम् । सकर्म, सेट्, आत्मने, । नित्यम् आङ्पूर्वकत्वम् अस्य ।

१. लट् – आशास्ते आशासाते आशासते । आशास्से आशासाथे आशाध्वे । आशासे आशास्वहे आशास्महे । **२. लिट्** – आशशासे आशशासाते आशशासिरे । आशशासिषे आशशासाथे आशशासिध्वे । आशशासे आशशासिवहे आशशासिमहे । **३. लुट्** – आशासिता आशासितारौ आशासितारः । आशासितासे आशासितासाथे आशासिताध्वे । आशासिताहे आशासितास्वहे आशासितास्महे । **४. लृट्** – आशासिष्यते आशासिष्येते आशासिष्यन्ते । आशासिष्यसे आशासिष्येते आशासिष्यध्वे । आशासिष्ये आशासिष्यावहे आशासिष्यामहे । **५. लोट्** – आशास्ताम् आशासाताम् आशासताम् । आशास्स्व आशासाथाम् आशाध्वम् । आशासै आशासावहै आशासामहै । **६. लङ्** – आशास्त आशासाताम् आशासत । आशास्थाः आशासाथाम् आशाध्वम् । आशासि आशास्वहि आशास्महि । **७. विधिलिङ्** – आशासीत आशासीयाताम् आशासीरन् । आशासीथाः आशासीयाथाम् आशासीध्वम् । आशासीय आशासीवहि आशासीमहि । **८. आशीर्लिङ्** – आशासिषीष्ट आशासिषीयास्ताम् आशासिषीरन् । आशासिषीष्ठाः आशासिषीयास्थाम् आशासिषीध्वम्/ढ्वम् । आशासिषीय आशासिषीवहि आशासिषीमहि । **९. लुङ्** – आशासिष्ट आशासिषाताम् आशासिषत । आशासिष्ठाः आशासिषाथाम् आशासिध्वम्-ढ्वम् । आशासिषि आशासिष्वहि आशासिष्महि । **१०. लृङ्** – आशासिष्यत आशासिष्येताम् आशासिष्यन्त । आशासिष्यथाः आशासिष्येथाम् आशासिष्यध्वम् । आशासिष्ये आशासिष्यावहि आशासिष्यामहि ।

णिचि – आशासयति-ते, **सनि** – आशशासिषते, **यकि** – आशास्यते

१. 'आङ्पूर्वत्वं प्रायिकम् । तेन 'नमोवाकं प्रशास्महे' इति सिद्धम्' इति सिद्धान्तकौमुदी ।

१०२३. वस – आच्छादने । सकर्म, सेट्, आत्मने । 'वस्यति स्तम्भने वस्ते छादने वसयेद्वसेत्' (श्लो.१८७) इति देवः । स्मृतौ इति वोपदेवः ।

१. लट् – वस्ते वसाते वसते । वस्से वसाथे वध्वे । वसे वस्वहे वस्महे । **२. लिट्** – ववसे[1] ववसाते ववसिरे । ववसिषे ववसाथे ववसिध्वे । ववसे ववसिवहे ववसिमहे । **३. लुट्** – वसिता वसितारौ वसितारः । वसितासे वसितासाथे वसिताध्वे । वसिताहे वसितास्वहे वसितास्महे । **४. लृट्** – वसिष्यते वसिष्येते वसिष्यन्ते । वसिष्यसे वसिष्येते वसिष्यध्वे । वसिष्ये वसिष्यावहे वसिष्यामहे । **५. लोट्** – वस्ताम् वसाताम् वसताम् । वस्स्व वसाथाम् वध्वम् । वसै वसावहै वसामहै । **६. लङ्** – अवस्त अवसाताम् अवसत । अवस्थाः अवसाथाम् अवध्वम् । अवसि अवस्वहि अवस्महि । **७. विधिलिङ्** – वसीत वसीयाताम् वसीरन् । वसीथाः वसीयाथाम् वसीध्वम् । वसीय वसीवहि वसीमहि । **८. आशीर्लिङ्** – वसिषीष्ट वसिषीयास्ताम् वसिषीरन् । वसिषीष्ठाः वसिषीयास्थाम् वसिषीध्वम्/ढ्वम् । वसिषीय वसिषीवहि वसिषीमहि । **९. लुङ्** – अवसिष्ट अवसिषाताम् अवसिषत । अवसिष्ठाः अवसिषाथाम् अवसिध्वम्-ढ्वम् । अवसिषि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवसिष्वहि अवसिष्महि । **१०. लृङ्** – अवसिष्यत अवसिष्येताम् अवसिष्यन्त । अवसिष्यथाः अवसिष्येथाम् अवसिष्यध्वम् । अवसिष्ये अवसिष्यावहि अवसिष्यामहि ।

णिचि – वासयति – ते, **सनि** – विवसिषते, **यकि** – वस्यते

१. 'न शसददवादिगुणानाम्' इति न एत्वाभ्यासलोपौ ।

१०२४. कसि – गतिशासनयोः । सकर्म, सेट्, आत्मने । 'गतिशासनयोः कंस्ते कंसतीति गतौ शपि' (श्लो. १९२) – देवः ।

१. लट् – कंस्ते[1] कंसाते कंसते । कंस्से कंसाथे कंध्वे । कंसे कंस्वहे कंस्महे । **२. लिट्** – चकंसे[1] चकंसाते चकंसिरे । चकंसिषे चकंसाथे चकंसिध्वे । चकंसे चकंसिवहे चकंसिमहे । **३. लुट्** – कंसिता कंसितारौ कंसितारः । कंसितासे कंसितासाथे कंसिताध्वे । कंसिताहे कंसितास्वहे कंसितास्महे । **४. लृट्** – कंसिष्यते कंसिष्येते कंसिष्यन्ते । कंसिष्यसे कंसिष्येते कंसिष्यध्वे । कंसिष्ये कंसिष्यावहे कंसिष्यामहे । **५. लोट्** – कंस्ताम् कंसाताम् कंसताम् । कंस्स्व कंसाथाम् कंध्वम् । कंसै कंसावहै कंसामहै । **६. लङ्** – अकंस्त अकंसाताम् अकंसत । अकंस्थाः अकंसाथाम् अकंध्वम् । अकंसि अकंस्वहि अकंस्महि । **७. विधिलिङ्** – कंसीत कंसीयाताम् कंसीरन् । कंसीथाः कंसीयाथाम् कंसीध्वम् । कंसीय कंसीवहि कंसीमहि । **८. आशीर्लिङ्** – कंसिषीष्ट कंसिषीयास्ताम् कंसिषीरन् । कंसिषीष्ठाः कंसिषीयास्थाम् कंसिषीध्वम्/ढ्वम् । कंसिषीय कंसिषीवहि कंसिषीमहि । **९. लुङ्** – अकंसिष्ट अकंसिषाताम् अकंसिषत । अकंसिष्ठाः अकंसिषाथाम् अकंसिध्वम्-ढ्वम् । अकंसिषि अकंसिष्वहि अकंसिष्महि । **१०. लृङ्** – अकंसिष्यत अकंसिष्येताम् अकंसिष्यन्त । अकंसिष्यथाः अकंसिष्येथाम् अकंसिष्यध्वम् । अकंसिष्ये अकंसिष्यावहि अकंसिष्यामहि ।

णिचि – कंसयति – ते, **सनि** – चिकंसिषते, **यकि** – कंस्यते

१. अयम् अनिदित् इति केचित् । तथा सति **'कस्ते कसाते कसते । कक्षे'** इत्यादीनि रूपाणि । तालव्यान्तोऽपि इति अन्ये । सोऽपि अनिदित् । **'कष्टे कशाते कशते । कक्षे । कड्ढ्वे'** इत्यादीनि रूपाणि ।

१०२५. णिसि – चुम्बने । सकर्म, सेट्, आत्मने । 'दन्त्यान्तोऽयम् । आभरणकारस्तु तालव्यान्तः इति बभ्राम' इति कौमुदी ।

१. लट् – निंस्ते निंसाते निंसते । निंस्से निंसाथे निन्ध्वे । निंहे निंवहे निंमहे । **२. लिट्** – निनिंसे निनिंसाते निनिंसिरे । निनिंसिषे निनिंसाथे निनिंसिध्वे । निनिंसे निनिंसिवहे निनिंसिमहे । **३. लुट्** – निंसिता निंसितारौ निंसितारः । निंसितासे निंसितासाथे निंसिताध्वे । निंसिताहे निंसितास्वहे निंसितास्महे । **४. लृट्** – निंसिष्यते निंसिष्येते निंसिष्यन्ते । निंसिष्यसे निंसिष्येते निंसिष्यध्वे । निंसिष्ये निंसिष्यावहे निंसिष्यामहे । **५. लोट्** – निंस्ताम् निंसाताम् निंसताम् । निंस्स्व निंसाथाम् निंध्वम् । निंसै निंसावहै निंसामहै । **६. लङ्** – अनिंस्त अनिंसाताम् अनिंसत । अनिंस्थाः अनिंसाथाम् अनिंध्वम् । अनिंसि अनिंस्वहि अनिंस्महि । **७. विधिलिङ्** – निंसीत निंसीयाताम् निंसीरन् । निंसीथाः निंसीयाथाम् निंसीध्वम् । निंसीय निंसीवहि निंसीमहि । **८. आशीर्लिङ्** – निंसिषीष्ट निंसिषीयास्ताम् निंसिषीरन् । निंसिषीष्ठाः निंसिषीयास्थाम् निंसिषीध्वम्/ढ्वम् । निंसिषीय निंसिषीवहि निंसिषीमहि । **९. लुङ्** – अनिंसिष्ट अनिंसिषाताम् अनिंसिषत । अनिंसिष्ठाः अनिंसिषाथाम् अनिंसिध्वम्-ढ्वम् । अनिंसिषि अनिंसिष्वहि अनिंसिष्महि । **१०. लृङ्** – अनिंसिष्यत अनिंसिष्येताम् अनिंसिष्यन्त । अनिंसिष्यथाः अनिंसिष्येथाम् अनिंसिष्यध्वम् । अनिंसिष्ये अनिंसिष्यावहि अनिंसिष्यामहि ।

णिचि – निंसयति – ते, **सनि** – निनिंसिषते, **यकि** – निंस्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०२६. **णिजि – शुद्धौ** । सकर्म, सेट्, आत्मने ।

१. लट् – निङ्क्ते निञ्जाते निञ्जते । निङ्क्षे निञ्जाथे निङ्ध्वे । निञ्जे निञ्ज्वहे निञ्ज्महे । **२. लिट्** – निनिञ्जे निनिञ्जाते निनिञ्जिरे । निनिञ्जिषे निनिञ्जाथे निनिञ्जिध्वे । निनिञ्जे निनिञ्जिवहे निनिञ्जिमहे । **३. लुट्** – निञ्जिता निञ्जितारौ निञ्जितारः । निञ्जितासे निञ्जितासाथे निञ्जिताध्वे । निञ्जिताहे निञ्जितास्वहे निञ्जितास्महे । **४. लृट्** – निञ्जिष्यते निञ्जिष्येते निञ्जिष्यन्ते । निञ्जिष्यसे निञ्जिष्येते निञ्जिष्यध्वे । निञ्जिष्ये निञ्जिष्यावहे निञ्जिष्यामहे । **५. लोट्** – निङ्क्ताम् निञ्जाताम् निञ्जताम् । निङ्क्ष्व निञ्जथाम् निङ्ध्वम् । निञ्जै निञ्जावहै निञ्जामहै । **६. लङ्** – अनिङ्क्त अनिञ्जाताम् अनिञ्जत । अनिङ्क्थाः अनिञ्जाथाम् अनिङ्ध्वम् । अनिञ्जि अनिञ्ज्वहि अनिञ्ज्महि । **७. विधिलिङ्** – निञ्जीत निञ्जीयाताम् निञ्जीरन् । निञ्जीथाः निञ्जीयाथाम् निञ्जीध्वम् । निञ्जीय निञ्जीवहि निञ्जीमहि । **८. आशीर्लिङ्** – निञ्जिषीष्ट निञ्जिषीयास्ताम् निञ्जिषीरन् । निञ्जिषीष्ठाः निञ्जिषीयास्थाम् निञ्जिषीध्वम्/ढ्वम् । निञ्जिषीय निञ्जिषीवहि निञ्जिषीमहि । **९. लुङ्** – अनिञ्जिष्ट अनिञ्जिषाताम् अनिञ्जिषत । अनिञ्जिष्ठाः अनिञ्जिषाथाम् अनिञ्जिध्वम्-ढ्वम् । अनिञ्जिषि अनिञ्जिष्वहि अनिञ्जिष्महि । **१०. लृङ्** – अनिञ्जिष्यत अनिञ्जिष्येताम् अनिञ्जिष्यन्त । अनिञ्जिष्यथाः अनिञ्जिष्येथाम् अनिञ्जिष्यध्वम् । अनिञ्जिष्ये अनिञ्जिष्यावहि अनिञ्जिष्यामहि ।

णिचि – निञ्जयति – ते, **सनि** – निनिञ्जिषते, **यकि** – निञ्ज्यते

१०२७. **शिजि – अव्यक्ते शब्दे** । अकर्म, सेट्, आत्मने,

१. लट् – शिङ्क्ते शिञ्जाते शिञ्जते । शिङ्क्षे शिञ्जाथे शिङ्ध्वे । शिञ्जे शिञ्ज्वहे शिञ्ज्महे । **२. लिट्** – शिशिञ्जे शिशिञ्जाते शिशिञ्जिरे । शिशिञ्जिषे शिशिञ्जाथे शिशिञ्जिध्वे । शिशिञ्जे शिशिञ्जिवहे शिशिञ्जिमहे । **३. लुट्** – शिञ्जिता शिञ्जितारौ । शिञ्जितासे शिञ्जितासाथे शिञ्जिताध्वे । शिञ्जिताहे शिञ्जितास्वहे शिञ्जितास्महे । **४. लृट्** – शिञ्जिष्यते शिञ्जिष्येते शिञ्जिष्यन्ते । शिञ्जिष्यसे शिञ्जिष्येते शिञ्जिष्यध्वे । शिञ्जिष्ये शिञ्जिष्यावहे शिञ्जिष्यामहे । **५. लोट्** – शिङ्क्ताम् शिञ्जाताम् शिञ्जताम् । शिङ्क्ष्व शिञ्जथाम् शिङ्ध्वम् । शिञ्जै शिञ्जावहै शिञ्जामहै । **६. लङ्** – अशिङ्क्त अशिञ्जाताम् अशिञ्जत । अशिङ्क्थाः अशिञ्जाथाम् अशिङ्ध्वम् । अशिञ्जि अशिञ्ज्वहि अशिञ्ज्महि । **७. विधिलिङ्** – शिञ्जीत शिञ्जीयाताम् शिञ्जीरन् । शिञ्जीथाः शिञ्जीयाथाम् शिञ्जीध्वम् । शिञ्जीय शिञ्जीवहि शिञ्जीमहि । **८. आशीर्लिङ्** – शिञ्जिषीष्ट शिञ्जिषीयास्ताम् शिञ्जिषीरन् । शिञ्जिषीष्ठाः शिञ्जिषीयास्थाम् शिञ्जिषीध्वम्/ढ्वम् । शिञ्जिषीय शिञ्जिषीवहि शिञ्जिषीमहि । **९. लुङ्** – अशिञ्जिष्ट अशिञ्जिषाताम् अशिञ्जिषत । अशिञ्जिष्ठाः अशिञ्जिषाथाम् अशिञ्जिध्वम्-ढ्वम् । अशिञ्जिषि अशिञ्जिष्वहि अशिञ्जिष्महि । **१०. लृङ्** – अशिञ्जिष्यत अशिञ्जिष्येताम् अशिञ्जिष्यन्त । अशिञ्जिष्यथाः अशिञ्जिष्येथाम् अशिञ्जि-ष्यध्वम् । अशिञ्जिष्ये अशिञ्जिष्यावहि अशिञ्जिष्यामहि ।

णिचि – शिञ्जयति – ते, **सनि** – शिशिञ्जिषते, **यकि** – शिञ्ज्यते

१०२८. **पिजि – वर्णे** । यथायथं सकर्मकः अकर्मकश्च, सेट्, आत्मने । 'सम्पचने इत्येके । अवयवे इत्यपरे । अव्यक्ते शब्दे इतीतरे' इति कौमुदी । 'वर्णे पिङ्क्ते भवेत् पिञ्जेर्भाषार्थे पिञ्जयेदिति' (श्लो ६०) इति देवः ।

१. लट् – पिङ्क्ते पिञ्जाते पिञ्जते । पिङ्क्षे पिञ्जाथे पिङ्ध्वे । पिञ्जे पिञ्ज्वहे पिञ्ज्महे । **२. लिट्** – पिपिञ्जे पिपिञ्जाते पिपिञ्जिरे । पिपिञ्जिषे पिपिञ्जाथे पिपिञ्जिध्वे । पिपिञ्जे पिपिञ्जिवहे पिपिञ्जिमहे । **३. लुट्** – पिञ्जिता पिञ्जितारौ पिञ्जितारः । पिञ्जितासे पिञ्जितासाथे पिञ्जिताध्वे । पिञ्जिताहे पिञ्जितास्वहे पिञ्जितास्महे । **४. लृट्** – पिञ्जिष्यते पिञ्जिष्येते पिञ्जिष्यन्ते । पिञ्जिष्यसे पिञ्जिष्येते पिञ्जिष्यध्वे । पिञ्जिष्ये पिञ्जिष्यावहे पिञ्जिष्यामहे । **५. लोट्** – पिङ्क्ताम् पिञ्जाताम् पिञ्जताम् । पिङ्क्ष्व पिञ्जथाम् पिङ्ध्वम् । पिञ्जै पिञ्जावहै

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पिञ्जामहै । **६. लङ्** – अपिङ्क्त अपिञ्जाताम् अपिञ्जत । अपिङ्क्थाः अपिञ्जाथाम् अपिङ्ग्ध्वम् । अपिञ्जि अपिञ्ज्वहि अपिञ्ज्महि । **७. विधिलिङ्** – पिञ्जीत पिञ्जीयाताम् पिञ्जीरन् । पिञ्जीथाः पिञ्जीयाथाम् पिञ्जीध्वम् । पिञ्जीय पिञ्जीवहि पिञ्जीमहि । **८. आशीर्लिङ्** – पिञ्जिषीष्ट पिञ्जिषीयास्ताम् पिञ्जिषीरन् । पिञ्जिषीष्ठाः पिञ्जिषीयास्थाम् पिञ्जिषीध्वम्/ढ्वम् । पिञ्जिषीय पिञ्जिषीवहि पिञ्जिषीमहि । **९. लुङ्** – अपिञ्जिष्ट अपिञ्जिषाताम् अपिञ्जिषत । अपिञ्जिष्ठाः अपिञ्जिषाथाम् अपिञ्जिध्वम्-ढ्वम् । अपिञ्जिषि अपिञ्जिष्वहि अपिञ्जिष्महि । **१०. लृङ्** – अपिञ्जिष्यत अपिञ्जिष्येताम् अपिञ्जिष्यन्त । अपिञ्जिष्यथाः अपिञ्जिष्येथाम् अपिञ्जिष्यध्वम् । अपिञ्जिष्ये अपिञ्जिष्यावहि अपिञ्जिष्यामहि ।

णिचि – पिञ्जयति – ते, **सनि** – पिपिञ्जिषते, **यकि** – पिञ्ज्यते

१. पृजि इति पाठान्तरम् । तदा तु 'पृङ्क्ते' इत्यादीनि रूपाणि ।

१०२९. वृजी – वर्जने । सकर्म, सेट्, आत्मने । दन्त्योष्ठ्यादिः । ईदित् । काशकृत्स्नोऽपि 'वृजी' इत्येव पपाठ । 'त्यागे वृत्तौ च' इति वोपदेवः । 'इदित्' इति आत्रेयमैत्रेयदुर्गादयः । 'वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति' (श्लो ५९) इति देवः ।

१. लट् – वृक्ते[1] वृजाते वृजते । वृक्षे वृजाथे वृग्ध्वे । वृजे वृज्वहे वृज्महे । **२. लिट्** – ववृजे ववृजाते ववृजिरे । ववृजिषे ववृजाथे ववृजिध्वे । ववृजे ववृजिवहे ववृजिमहे । **३. लुट्** – वर्जिता वर्जितारौ वर्जितारः । वर्जितासे वर्जितासाथे वर्जिताध्वे । वर्जिताहे वर्जितास्वहे वर्जितास्महे । **४. लृट्** – वर्जिष्यते वर्जिष्येते वर्जिष्यन्ते । वर्जिष्यसे वर्जिष्येते वर्जिष्यध्वे । वर्जिष्ये वर्जिष्यावहे वर्जिष्यामहे । **५. लोट्** – वृक्ताम् वृजाताम् वृजताम् । वृक्ष्व वृजाथाम् वृग्ध्वम् । वर्जै वर्जावहै वर्जामहै । **६. लङ्** – अवृक्त अवृजाताम् अवृजत । अवृक्थाः अवृजाथाम् अवृग्ध्वम् । अवृजि अवृज्वहि अवृज्महि । **७. विधिलिङ्** – वृजीत वृजीयाताम् वृजीरन् । वृजीथाः वृजीयाथाम् वृजीध्वम् । वृजीय वृजीवहि वृजीमहि । **८. आशीर्लिङ्** – वर्जिषीष्ट वर्जिषीयास्ताम् वर्जिषीरन् । वर्जिषीष्ठाः वर्जिषीयास्थाम् वर्जिषीध्वम्/ढ्वम् । वर्जिषीय वर्जिषीवहि वर्जिषीमहि । **९. लुङ्** – अवर्जिष्ट अवर्जिषाताम् अवर्जिषत । अवर्जिष्ठाः अवर्जिषाथाम् अवर्जिध्वम्-ढ्वम् । अवर्जिषि अवर्जिष्वहि अवर्जिष्महि । **१०. लृङ्** – अवर्जिष्यत अवर्जिष्येताम् अवर्जिष्यन्त । अवर्जिष्यथाः अवर्जिष्येथाम् अवर्जिष्यध्वम् । अवर्जिष्ये अवर्जिष्यावहि अवर्जिष्यामहि ।

णिचि – वर्जयति – ते, **सनि** – विवर्जिषते, **यकि** – वृज्यते

१. अयम् इदित् इत्यन्ये । तदा तु 'वृङ्क्ते वृञ्जाते वृञ्जते' इत्यादीनि रूपाणि ।

१०३०. पृची – सम्पर्चने । सकर्म, सेट्, आत्मने । सम्पर्चनम् = मिश्रीकरणम् । 'पृणक्ति पृक्ते (पृङ्क्ते) सम्पर्के, यौ पर्चयति पर्चति' (श्लो.५१) इति देवः ।

१. लट् – पृक्ते पृचाते पृचते । पृक्षे पृचाथे पृग्ध्वे । पृचे पृच्वहे पृच्महे । **२. लिट्** – पपृचे पपृचाते पपृचिरे । पपृचिषे पपृचाथे पपृचिध्वे । पपृचे पपृचिवहे पपृचिमहे । **३. लुट्** – पर्चिता पर्चितारौ पर्चितारः । पर्चितासे पर्चितासाथे पर्चिताध्वे । पर्चिताहे पर्चितास्वहे पर्चितास्महे । **४. लृट्** – पर्चिष्यते पर्चिष्येते पर्चिष्यन्ते । पर्चिष्यसे पर्चिष्येते पर्चिष्यध्वे । पर्चिष्ये पर्चिष्यावहे पर्चिष्यामहे । **५. लोट्** – पृक्ताम् पृचाताम् पृचताम् । पृक्ष्व पृचाथाम् पृग्ध्वम् । पर्चै पर्चावहै पर्चामहै । **६. लङ्** – अपृक्त अपृचाताम् अपृचत । अपृक्थाः अपृचाथाम् अपृग्ध्वम् । अपृचि अपृच्वहि अपृच्महि । **७. विधिलिङ्** – पृचीत पृचीयाताम् पृचीरन् । पृचीथाः पृचीयाथाम् पृचीध्वम् । पृचीय पृचीवहि पृचीमहि । **८. आशीर्लिङ्** – पर्चिषीष्ट पर्चिषीयास्ताम् पर्चिषीरन् । पर्चिषीष्ठाः पर्चिषीयास्थाम् पर्चिषीध्वम्/ढ्वम् । पर्चिषीय पर्चिषीवहि पर्चिषीमहि । **९. लुङ्** – अपर्चिष्ट अपर्चिषाताम् अपर्चिषत । अपर्चिष्ठाः अपर्चिषाथाम् अपर्चिध्वम्-ढ्वम् । अपर्चिषि अपर्चिष्वहि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपर्चिष्महि । **१०. लृङ्** – अपर्चिष्यत अपर्चिष्येताम् अपर्चिष्यन्त । अपर्चिष्यथाः अपर्चिष्येथाम् अपर्चिष्यध्वम् । अपर्चिष्ये अपर्चिष्यावहि अपर्चिष्यामहि ।

णिचि – पर्चयति - ते, **सनि** – पिपर्चिषते, **यकि** – पृच्यते

१०३१. षूङ् – प्राणिगर्भविमोचने । सकर्म, वेट्, आत्मने । 'प्राणिग्रहणमतन्त्रम् । अप्राणिप्रसवेऽपि वर्तते । प्रसूनं धान्यम्' इति मैत्रेयः ।

१. लट् – सूते सुवाते सुवते । सूषे सुवाथे सूध्वे । सुवे सूवहे सूमहे । **२. लिट्** – सुषुवे सुषुवाते सुषुविरे । सुषुविषे सुषुवाथे सुषुविध्वे/ढ्वे । सुषुवे सुषुविवहे सुषुविमहे । **३. लुट्** – (i) सविता सवितारौ सवितारः । सवितासे सवितासाथे सविताध्वे । सविताहे सवितास्वहे सवितास्महे । (ii) सोता[१] सोतारौ सोतारः । सोतासे सोतासाथे सोताध्वे । सोताहे सोतास्वहे सोतास्महे । **४. लृट्** – (i) सविष्यते सविष्येते सविष्यन्ते । सविष्यसे सविष्येते सविष्यध्वे । सविष्ये सविष्यावहे सविष्यामहे । (ii) सोष्यते सोष्येते सोष्यन्ते । सोष्यसे सोष्येते सोष्यध्वे । सोष्ये सोष्यावहे सोष्यामहे । **५. लोट्** – सूताम् सुवाताम् सुवताम् । सूष्व सुवाथाम् सूध्वम् । सुवै सुवावहै सुवामहै । **६. लङ्** – असूत असुवाताम् असुवत । असूथाः असुवाथाम् असूध्वम् । असुवि असूवहि असूमहि । **७. विधिलिङ्** – सुवीत सुवीयाताम् सुवीरन् । सुवीथाः सुवीयाथाम् सुवीध्वम् । सुवीय सुवीवहि सुवीमहि । **८. आशीर्लिङ्** – (i) सविषीष्ट सविषीयास्ताम् सविषीरन् । सविषीष्ठाः सविषीयास्थाम् सविषीध्वम्/ढ्वम् । सविषीय सविषीवहि सविषीमहि । (ii) सोषीष्ट सोषीयास्ताम् सोषीरन् । सोषीष्ठाः सोषीयास्थाम् सोषीध्वम्/ढ्वम् । सोषीय सोषीवहि सोषीमहि । **९. लुङ्** – (i) असविष्ट असविषाताम् असविषत । असविष्ठाः असविषाथाम् असविध्वम्-ढ्वम् । असविषि असविष्वहि असविष्महि । (ii) असोष्ट असोषाताम् असोषत । असोष्ठाः असोषाथाम् असोढ्वम् । असोषि असोष्वहि असोष्महि । **१०. लृङ्** – (i) असविष्यत असविष्येताम् असविष्यन्त । असविष्यथाः असविष्येथाम् असविष्यध्वम् । असविष्ये असविष्यावहि असविष्यामहि । (ii) असोष्यत असोष्येताम् असोष्यन्त । असोष्यथाः असोष्येथाम् असोष्यध्वम् । असोष्ये असोष्यावहि असोष्यामहि ।

णिचि – सावयति/ते, **सनि** – सुसूषते, **यकि** – सूयते

१. ऊदित्त्वात् 'स्वरतिसूति...' इति इड्विकल्पः ।

१०३२. शीङ् – स्वप्ने । अकर्म, सेट्, आत्मने ।

१. लट् – शेते शयाते शेरते । शेषे शयाथे शेध्वे । शये शेवहे शेमहे । **२. लिट्** – शिश्ये शिश्याते शिश्यिरे । शिश्यिषे शिश्याथे शिश्यिध्वे-ढ्वे । शिश्ये शिश्यिवहे शिश्यिमहे । **३. लुट्** – शयिता शयितारौ शयितारः । शयितासे शयितासाथे शयिताध्वे । शयिताहे शयितास्वहे शयितास्महे । **४. लृट्** – शयिष्यते शयिष्येते शयिष्यन्ते । शयिष्यसे शयिष्येते शयिष्यध्वे । शयिष्ये शयिष्यावहे शयिष्यामहे । **५. लोट्** – शेताम् शयाताम् शेरताम् । शेष्व शयाथाम् शेध्वम् । शयै शयावहै शयामहै । **६. लङ्** – अशेत अशयाताम् अशेरत । अशेथाः अशयाथाम् अशेध्वम् । अशयि अशेवहि अशेमहि । **७. विधिलिङ्** – शयीत शयीयाताम् शयीरन् । शयीथाः शयीयाथाम् शयीध्वम् । शयीय शयीवहि शयीमहि । **८. आशीर्लिङ्** – शयिषीष्ट शयिषीयास्ताम् शयिषीरन् । शयिषीष्ठाः शयिषीयास्थाम् शयिषीध्वम्/ढ्वम् । शयिषीय शयिषीवहि शयिषीमहि । **९. लुङ्** – अशयिष्ट अशयिषाताम् अशयिषत । अशयिष्ठाः अशयिषाथाम् अशयिध्वम्-ढ्वम् । अशयिषि अशयिष्वहि अशयिष्महि । **१०. लृङ्** – अशयिष्यत अशयिष्येताम् अशयिष्यन्त । अशयिष्यथाः अशयिष्येथाम् अशयिष्यध्वम् । अशयिष्ये अशयिष्यावहि अशयिष्यामहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि - शाययति[1]- ते, **सनि** - शिशयिषते, **यकि** - शय्यते[2]

१. 'अणावकर्मकात् चित्तवत्कर्तृकात्' इति परस्मैपदम् । अन्यदा तु उभयम् ।

२. 'अयङ् यि क्ङिति' - शीङोऽयङादेशः स्यात् यादौ ङिति परे ।

१०३३. यु - मिश्रणेऽमिश्रणे च । सकर्म सेट्, परस्मै । 'अमिश्रणे च' इत्यपि क्वचित् पाठः । 'यावयेत जुगुप्सायाम्, मिश्रणे यौति, बन्धने । युनाति, च युनीते च ...' (श्लो. २४) इति देवः ।

१. लट् - यौति[1] युतः युवन्ति । यौषि युथः युथ । यौमि युवः युमः । **२. लिट्** - युयाव युयुवतुः युयुवुः । युयविथ युयुवथुः युयुव । युयाव-युयव युयुविव युयुविम । **३. लुट्** - यविता यवितारौ यवितारः । यवितासि यवितास्थः यवितास्थ । यवितास्मि यवितास्वः यवितास्मः । **४. लृट्** - यविष्यति यविष्यतः यविष्यन्ति । यविष्यसि यविष्यथः यविष्यथ । यविष्यामि यविष्यावः यविष्यामः । **५. लोट्** - यौतु, युतात् युताम् युवन्तु । युहि, युतात् युतम् युत । यवानि यवाव यवाम । **६. लङ्** - अयौत् अयुताम् अयुवन् । अयौः अयुतम् अयुत । अयवम् अयुव अयुम । **७. विधिलिङ्** - युयात् युयाताम् युयुः । युयाः युयातम् युयात । युयाम् युयाव युयाम । **८. आशीर्लिङ्** - यूयात् यूयास्ताम् यूयासुः । यूयाः यूयास्तम् यूयास्त । यूयासम् यूयास्व यूयास्म । **९. लुङ्** - अयावीत् अयाविष्टाम् अयाविषुः । अयावीः अयाविष्टम् अयाविष्ट । अयाविषम् अयाविष्व अयाविष्म । **१०. लृङ्** - अयविष्यत् अयविष्यताम् अयविष्यन् । अयविष्यः अयविष्यतम् अयविष्यत । अयविष्यम् अयविष्याव अयविष्याम ।

णिचि - यावयति, **सनि** - यियविषति-युयूषति[2], **यकि** - यूयते ।

१. 'उतो वृद्धिर्लुकि हलि' - लुग्विषये उकारस्य वृद्धिः स्यात् पिति हलादौ सार्वधातुके, न त्वभ्यासस्य ।

२. 'सनीवन्त...' इत्यादिना सनः इडागमो वा ।

१०३४. रु - शब्दे । अकर्म, सेट्, परस्मै । 'रवते रौति शब्दने' (श्लो. २३) इति देवः ।

१. लट् - रौति[1]-रवीति[2] रुतः-रुवीतः रुवन्ति । रवीषि-रौषि रुवीथः-रुथः रुथ-रुवीथ । रवीमि-रौमि रुवः-रुवीवः रुमः-रुवीमः । **२. लिट्** - रुराव रुरुवतुः रुरुवुः । रुरविथ रुरुवथुः रुरुव । रुराव-रुरव रुरुविव रुरुविम । **३. लुट्** - रविता रवितारौ रवितारः । रवितासि रवितास्थः रवितास्थ । रवितास्मि रवितास्वः रवितास्मः । **४. लृट्** - रविष्यति रविष्यतः रविष्यन्ति । रविष्यसि रविष्यथः रविष्यथ । रविष्यामि रविष्यावः रविष्यामः । **५. लोट्** - रौतु-रवीतु, रुतात्-रुवीतात् रुताम्-रुवीताम् रुवन्तु । रुहि-रुवीहि, रुवीतात्-रुतात् रुतम्-रुवीतम् रुत-रुवीत । रवाणि रवाव रवाम । **६. लङ्** - अरौत्-अरवीत् अरुताम्-अरुवीताम् अरुवन् । अरौः-अरवीः अरुतम्-अरुवीतम् अरुत-अरुवीत । अरवम् अरुव-अरुवीव अरुम-अरुवीम । **७. विधिलिङ्** - रुयात्-रुवीयात् रुयाताम्-रुवीयाताम् रुयुः-रुवीयुः । रुयाः-रुवीयाः रुयातम्-रुवीयातम् रुयात-रुवीयात । रुयाम्-रुवीयाम् रुयाव-रुवीयाव रुयाम-रुवीयाम । **८. आशीर्लिङ्** - रूयात् रूयास्ताम् रूयासुः । रूयाः रूयास्तम् रूयास्त । रूयासम् रूयास्व रूयास्म । **९. लुङ्** - अरावीत् अराविष्टाम् अराविषुः । अरावीः अराविष्टम् अराविष्ट । अराविषम् अराविष्व अराविष्म । **१०. लृङ्** - अरविष्यत् अरविष्यताम् अरविष्यन् । अरविष्यः अरविष्यतम् अरविष्यत । अरविष्यम् अरविष्याव अरविष्याम ।

णिचि - रावयति ते, **सनि** - रुरूषति, **यकि** - रूयते

१. 'उतो वृद्धिर्लुकि हलि' - लुग्विषये उकारस्य वृद्धिः स्यात् पिति हलादौ सार्वधातुके, न त्वभ्यासस्य ।

२. 'तुरुस्तुशम्यमः सार्वधातुके' - एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङः ईट् वा स्यात् । ईडभावपक्षे वृद्धिः ।

('तु-रु-स्तु-शमि-अमः....' इति सूत्रे 'तु'इति सौत्रः धातुः गतिवृद्धिहिंसासु । 'अयं च लुग्विकरणः' इति स्मरन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तस्य **१. तवीति-तौति तुतः-तुवीतः ३. तोता ४. तोष्यति** इत्यादीनि रूपाणि इति सिद्धान्तकौमुदी)

१०३५. णु – स्तुतौ । सकर्म, सेट्, परस्मै । 'स्तुत्यां नुवति, नौति वा' (श्लो. २४) इति देवः ।

१. लट् – (i) नौति[1] नुतः नुवन्ति । नौषि नुथः नुथ । नौमि नुवः नुमः । (ii) आनुते[1] आनुवाते आनुवते । आनुषे आनुवाथे आनुध्वे । आनुवे आनुवहे आनुमहे । **२. लिट्** – (i) नुनाव नुनुवतुः नुनुवुः । नुनविथ नुनुवथुः नुनुव । नुनाव-नुनव नुनुविव नुनुविम । (ii) आनुवे आनुवाते आनुविरे । आनुविषे आनुवाथे आनुविध्वे । आनुवे आनुविवहे आनुविमहे । **३. लुट्** – (i) नविता नवितारौ नवितारः । नवितासि नवितास्थः नवितास्थ । नवितास्मि नवितास्वः नवितास्मः । (ii) आनविता आनवितारौ आनवितारः । आनवितासे आनवितासाथे आनविताध्वे । आनविताहे आनवितास्वहे आनवितास्महे । **४. लृट्** – (i) नविष्यति नविष्यतः नविष्यन्ति । नविष्यसि नविष्यथः नविष्यथ । नविष्यामि नविष्यावः नविष्यामः । (ii) आनविष्यते आनविष्येते आनविष्यन्ते । आनविष्यसे आनविष्येते आनविष्यध्वे । आनविष्ये आनविष्यावहे आनविष्यामहे । **५. लोट्** – (i) नौतु नुतात् नुताम् नुवन्तु । नुहि, नुतात् नुतम् नुत । नवानि नवाव नवाम । (ii) आनुताम् आनुवाताम् आनुवताम् । आनुष्व आनुवाथाम् आनुध्वम् । आनुवै आनवावहै आनवामहै । **६. लङ्** – (i) अनौत् अनुताम् अनुवन् । अनौः अनुतम् अनुत । अनवम् अनुव अनुम । (ii) आनुत आनुवाताम् आनुवात । आनुथाः आनुवाथाम् आनुध्वम् । आनुवि आनुवहि आनुमहि । **७. विधिलिङ्** – (i) नुयात् नुयाताम् नुयुः । नुयाः नुयातम् नुयात । नुयाम् नुयाव नुयाम । (ii) आनुवीत आनुवीयाताम् आनुवीरन् । आनुवीथाः आनुवीयाथाम् आनुवीध्वम् । आनुवीय आनुवीवहि आनुवीमहि । **८. आशीर्लिङ्** – (i) नूयात् नूयास्ताम् नूयासुः । नूयाः नूयास्तम् नूयास्त । नूयासम् नूयास्व नूयास्म । (ii) आनविषीष्ट आनविषीयास्ताम् आनविषीरन् । आनविषीष्ठाः आनविषीयास्थाम् आनविषीध्वम्/ढ्वम् । आनविषीय आनविषीवहि आनविषीमहि । **९. लुङ्** – (i) अनावीत् अनाविष्टाम् अनाविषुः । अनावीः अनाविष्टम् अनाविष्ट । अनाविषम् अनाविष्व अनाविष्म । (ii) आनविष्ट आनविषाताम् आनविषत । आनविष्ठाः आनविषाथाम् आनविध्वम्-ढ्वम् । आनविषि आनविष्वहि आनविष्महि । **१०. लृङ्** – (i) अनविष्यत् अनविष्यताम् अनविष्यन् । अनविष्यः अनविष्यतम् अनविष्यत । अनविष्यम् अनविष्याव अनविष्याम । (ii) आनविष्यत आनविष्येताम् आनविष्यन्त । आनविष्यथाः आनविष्येथाम् आनविष्यध्वम् । आनविष्ये आनविष्यवहि आनविष्यमहि ।

णिचि – नावयति – ते, **सनि** – नुनूषति, **यकि** – नूयते

१. 'आङि नुप्रच्छ्योरुपसङ्ख्यानम्' इति तङ् (आत्मनेपदित्वम्) ।

१०३६. टु क्षु – शब्दे । अकर्म, सेट्, परस्मै,

१. लट् – क्षौति क्षुतः क्षुवन्ति । क्षौषि क्षुथः क्षुथ । क्षौमि क्षुवः क्षुमः । **२. लिट्** – चुक्षाव चुक्षुवतुः चुक्षुवुः । चुक्षविथ चुक्षुवथुः चुक्षव । चुक्षाव-चुक्षव चुक्षुविव चुक्षुविम । **३. लुट्** – क्षविता क्षवितारौ क्षवितारः । क्षवितासि क्षवितास्थः क्षवितास्थ । क्षवितास्मि क्षवितास्वः क्षवितास्मः । **४. लृट्** – क्षविष्यति क्षविष्यतः क्षविष्यन्ति । क्षविष्यसि क्षविष्यथः क्षविष्यथ । क्षविष्यामि क्षविष्यावः क्षविष्यामः । **५. लोट्** – क्षौतु क्षुतात् क्षुताम् क्षुवन्तु । क्षौहि क्षुतात् क्षुतम् क्षुत । क्षवाणि क्षवाव क्षवाम । **६. लङ्** – अक्षौत् अक्षुताम् अक्षुवन् । अक्षौः अक्षुतम् अक्षुत । अक्षवम् अक्षुव अक्षुम । **७. विधिलिङ्** – क्षुयात् क्षुयाताम् क्षुयुः । क्षुयाः क्षुयातम् क्षुयात । क्षुयाम् क्षुयाव क्षुयाम । **८. आशीर्लिङ्** – क्षूयात् क्षूयास्ताम् क्षूयासुः । क्षूयाः क्षूयास्तम् क्षूयास्त । क्षूयासम् क्षूयास्व क्षूयास्म । **९. लुङ्** – अक्षावीत् अक्षाविष्टाम् अक्षाविषुः । अक्षावीः अक्षाविष्टम् अक्षाविष्ट । अक्षाविषम् अक्षाविष्व अक्षाविष्म । **१०. लृङ्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अक्षविष्यत् अक्षविष्यताम् अक्षविष्यन् । अक्षविष्यः अक्षविष्यतम् अक्षविष्यत । अक्षविष्यम् अक्षविष्याव अक्षविष्याम ।

णिचि - क्षावयति - ते, **सनि** - चुक्षूषति, **यकि** - क्षूयते

१०३७. क्ष्णु - तेजने । सकर्म, सेट्, परस्मै,

१. लट् - क्ष्णौति क्ष्णुतः क्ष्णुवन्ति । क्ष्णौषि क्ष्णुथः क्ष्णुथ । क्ष्णौमि क्ष्णुवः क्ष्णुमः । **२. लिट्** - चुक्ष्णाव चुक्ष्णुवतुः चुक्ष्णुवुः । चुक्ष्णविथ चुक्ष्णुवथुः चुक्ष्णुव । चुक्ष्णाव-चुक्ष्णव चुक्ष्णुविव चुक्ष्णुविम । **३. लुट्** - क्ष्णविता क्ष्णवितारौ क्ष्णवितारः । क्ष्णवितासि क्ष्णवितास्थः क्ष्णवितास्थ । क्ष्णवितास्मि क्ष्णवितास्वः क्ष्णवितास्मः । **४. लृट्** - क्ष्णविष्यति क्ष्णविष्यतः क्ष्णविष्यन्ति । क्ष्णविष्यसि क्ष्णविष्यथः क्ष्णविष्यथ । क्ष्णविष्यामि क्ष्णविष्यावः क्ष्णविष्यामः । **५. लोट्** - क्ष्णौतु क्ष्णुतात् क्ष्णुताम् क्ष्णुवन्तु । क्ष्णुहि क्ष्णुतात् क्ष्णुतम् क्ष्णुत । क्ष्णवानि क्ष्णवाव क्ष्णवाम । **६. लङ्** - अक्ष्णौत् अक्ष्णुताम् अक्ष्णुवन् । अक्ष्णौः अक्ष्णुतम् अक्ष्णुत । अक्ष्णवम् अक्ष्णुव अक्ष्णुम । **७. विधिलिङ्** - क्ष्णुयात् क्ष्णुयाताम् क्ष्णुयुः । क्ष्णुयाः क्ष्णुयातम् क्ष्णुयात । क्ष्णुयाम् क्ष्णुयाव क्ष्णुयाम । **८. आशीर्लिङ्** - क्ष्णूयात् क्ष्णूयास्ताम् क्ष्णूयासुः । क्ष्णूयाः क्ष्णूयास्तम् क्ष्णूयास्त । क्ष्णूयासम् क्ष्णूयास्व क्ष्णूयास्म । **९. लुङ्** - अक्ष्णावीत् अक्ष्णाविष्टाम् अक्ष्णाविषुः । अक्ष्णावीः अक्ष्णाविष्टम् अक्ष्णाविष्ट । अक्ष्णाविषम् । अक्ष्णाविष्व अक्ष्णाविष्म । **१०. लृङ्** - अक्ष्णविष्यत् अक्ष्णविष्यताम् अक्ष्णविष्यन् । अक्ष्णविष्यः अक्ष्णविष्यतम् अक्ष्णविष्यत । अक्ष्णविष्यम् अक्ष्णविष्याव अक्ष्णविष्याम ।

णिचि - क्ष्णावयति - ते, **सनि** - चुक्ष्णूषति, **यकि** - क्ष्णूयते

१०३८. ष्णु - प्रस्त्रवणे । अकर्म, सेट्, परस्मै,

१. लट् - स्नौति स्नुतः स्नुवन्ति । स्नौषि स्नुथः स्नुथ । स्नौमि स्नुवः स्नुमः । **२. लिट्** - सुष्णाव सुष्णुवतुः सुष्णुवुः । सुष्णविथ सुष्णुवथुः सुष्णुव । सुष्णाव-सुष्णव सुष्णुविव सुष्णुविम । **३. लुट्** - स्नविता स्नवितारौ स्नवितारः । स्नवितासि स्नवितास्थः स्नवितास्थ । स्नवितास्मि स्नवितास्वः स्नवितास्मः । **४. लृट्** - स्नविष्यति स्नविष्यतः स्नविष्यन्ति । स्नविष्यसि स्नविष्यथः स्नविष्यथ । स्नविष्यामि स्नविष्यावः स्नविष्यामः । **५. लोट्** - स्नौतु स्नुतात् स्नुताम् स्नुवन्तु । स्नौहि स्नुतात् स्नुतम् स्नुत । स्नवानि स्नवाव स्नवाम । **६. लङ्** - अस्नौत् अस्नुताम् अस्नुवन् । अस्नौः अस्नुतम् अस्नुत । अस्नवम् अस्नुव अस्नुम । **७. विधिलिङ्** - स्नुयात् स्नुयाताम् स्नुयुः । स्नुयाः स्नुयातम् स्नुयात । स्नुयाम् स्नुयाव स्नुयाम । **८. आशीर्लिङ्** - स्नूयात् स्नूयास्ताम् स्नूयासुः । स्नूयाः स्नूयास्तम् स्नूयास्त । स्नूयासम् स्नूयास्व स्नूयास्म । **९. लुङ्** - अस्नावीत् अस्नाविष्टाम् अस्नाविषुः । अस्नावीः अस्नाविष्टम् अस्नाविष्ट । अस्नाविषम् अस्नाविष्व अस्नाविष्म । **१०. लृङ्** - अस्नविष्यत् अस्नविष्यताम् अस्नविष्यन् । अस्नविष्यः अस्नविष्यतम् अस्नविष्यत । अस्नविष्यम् अस्नविष्याव अस्नविष्याम

णिचि - स्नावयति - ते, **सनि** - सुस्नूषति, **यकि** - स्नूयते ।

१०३९. ऊर्णुञ् - आच्छादने । सकर्म, सेट्, उभय,

१. लट् - (i) ऊर्णौति[1]-ऊर्णोति ऊर्णुतः ऊर्णुवन्ति । ऊर्णौषि-ऊर्णोषि ऊर्णुथः ऊर्णुथ । ऊर्णौमि-ऊर्णोमि ऊर्णुवः ऊर्णुमः । (ii) ऊर्णुते ऊर्णुवाते ऊर्णुवते । ऊर्णुषे ऊर्णुवाथे ऊर्णुध्वे । ऊर्णुवे ऊर्णुवहे ऊर्णुमहे । **२. लिट्** - (i) ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः । ऊर्णुनुविथ-ऊर्णुनविथ ऊर्णुनुवथुः ऊर्णुनुव । ऊर्णुनाव-ऊर्णुनव ऊर्णुनुविव, ऊर्णुनविव ऊर्णुनुविम, ऊर्णुनविम । (ii) ऊर्णुनुवे । ऊर्णुनुवाते ऊर्णुनुविरे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऊर्णुनुविषे ऊर्णुनुवाथे ऊर्णुनुविध्वे/ढ्वे । ऊर्णुनुवे ऊर्णुनुविवहे ऊर्णुनुविमहे । **३. लुट्** - (i) ऊर्णविता ऊर्णवितारौ ऊर्णवितारः । ऊर्णवितासि ऊर्णवितास्थः ऊर्णवितास्थ । ऊर्णवितास्मि ऊर्णवितास्वः ऊर्णवितास्मः । (ii) ऊर्णुविता ऊर्णुवितारौ ऊर्णुवितारः । ऊर्णुवितासि ऊर्णुवितास्थः ऊर्णुवितास्थ । ऊर्णुवितास्मि ऊर्णुवितास्वः ऊर्णुवितास्मः । (iii) ऊर्णविता ऊर्णवितारौ ऊर्णवितारः । ऊर्णवितासे ऊर्णवितासाथे ऊर्णविताध्वे । ऊर्णविताहे ऊर्णवितास्वहे ऊर्णवितास्महे । (iv) ऊर्णुविता ऊर्णुवितारौ ऊर्णुवितारः । ऊर्णुवितासे ऊर्णुवितासाथे ऊर्णुविताध्वे । ऊर्णुविताहे ऊर्णुवितास्वहे ऊर्णुवितास्महे । **४. लृट्** - (i) ऊर्णविष्यति ऊर्णविष्यतः ऊर्णविष्यन्ति । ऊर्णविष्यसि ऊर्णविष्यथः ऊर्णविष्यथ । ऊर्णविष्यामि ऊर्णविष्यावः ऊर्णविष्यामः । (ii) ऊर्णुविष्यति ऊर्णुविष्यतः ऊर्णुविष्यन्ति । ऊर्णुविष्यसि ऊर्णुविष्यथः ऊर्णुविष्यथ । ऊर्णुविष्यामि ऊर्णुविष्यावः ऊर्णुविष्यामः । (iii) ऊर्णविष्यते ऊर्णविष्येते ऊर्णविष्यन्ते । ऊर्णविष्यसे ऊर्णविष्येते ऊर्णविष्यध्वे । ऊर्णविष्ये ऊर्णविष्यावहे ऊर्णविष्यामहे । (iv) ऊर्णुविष्यते ऊर्णुविष्येते ऊर्णुविष्यन्ते । ऊर्णुविष्यसे ऊर्णुविष्येते ऊर्णुविष्यध्वे । ऊर्णुविष्ये ऊर्णुविष्यावहे ऊर्णुविष्यामहे । **५. लोट्** - (i) ऊर्णौतु-ऊर्णोतु, ऊर्णुतात् ऊर्णुताम् ऊर्णुवन्तु । ऊर्णुहि, ऊर्णुतात् ऊर्णुतम् ऊर्णुत । ऊर्णवानि ऊर्णवाव ऊर्णवाम । (ii) ऊर्णुताम् ऊर्णुवाताम् ऊर्णुवताम् । ऊर्णुष्व ऊर्णुवाथाम् ऊर्णुध्वम् । ऊर्णवै ऊर्णवावहै ऊर्णवामहै । **६. लङ्** - (i) और्णोत् और्णुताम् और्णुवन् । और्णोः और्णुतम् और्णुत । और्णवम् और्णुव और्णुम । (ii) और्णुत और्णुवाताम् और्णुवत । और्णुथाः और्णुवाथाम् और्णुध्वम् । और्णवि और्णुवहि और्णुमहि । **७. विधिलिङ्** - (i) ऊर्णुयात् ऊर्णुयाताम् ऊर्णुयुः । ऊर्णुयाः ऊर्णुयातम् ऊर्णुयात । ऊर्णुयाम् ऊर्णुयाव ऊर्णुयाम । (ii) ऊर्णुवीत ऊर्णुवीयाताम् ऊर्णुवीरन् । ऊर्णुवीथाः ऊर्णुवीयाथाम् ऊर्णुवीध्वम् । ऊर्णुवीय ऊर्णुवीवहि ऊर्णुवीमहि । **८. आशीर्लिङ्** - (i) ऊर्णूयात् ऊर्णूयास्ताम् ऊर्णूयासुः । ऊर्णूयाः ऊर्णूयास्तम् ऊर्णूयास्त । ऊर्णूयासम् ऊर्णूयास्व ऊर्णूयास्म । (ii) ऊर्णुविषीष्ट ऊर्णुविषीयास्ताम् ऊर्णुविषीरन् । ऊर्णुविषीष्ठाः ऊर्णुविषीयास्थाम् ऊर्णुविषीध्वम्/ढ्वम् । ऊर्णुविषीय ऊर्णुविषीवहि ऊर्णुविषीमहि । (iii) ऊर्णविषीष्ट ऊर्णविषीयास्ताम् ऊर्णविषीरन् । ऊर्णविषीष्ठाः ऊर्णविषीयास्थाम् ऊर्णविषीध्वम्/ढ्वम् । ऊर्णविषीय ऊर्णविषीवहि ऊर्णविषीमहि । **९. लुङ्** - (i) और्णावीत्[२] और्णाविष्टाम् और्णाविषुः । और्णावीः और्णाविष्टम् और्णाविष्ट । और्णाविषम् और्णाविष्व और्णाविष्म । (ii) और्णवीत् और्णविष्टाम् और्णविषुः । और्णवीः और्णविष्टम् और्णविष्ट । और्णविषम् और्णविष्व और्णविष्म । (iii) और्णुवीत्[३] और्णुविष्टाम् और्णुविषुः । और्णुवीः और्णुविष्टम् और्णुविष्ट । और्णुविषम् और्णुविष्व और्णुविष्म । (iv) और्णविष्ट और्णविषाताम् और्णविषत । और्णविष्ठाः और्णविषाथाम् और्णविध्वम्-ढ्वम् । और्णविषि और्णविष्वहि और्णविष्महि । (v) और्णुविष्ट और्णुविषाताम् और्णुविषत । और्णुविष्ठाः और्णुविषाथाम् और्णुविध्वम्-ढ्वम् । और्णुविषि और्णुविष्वहि और्णुविष्महि । **१०. लृङ्** - (i) और्णविष्यत् और्णविष्यताम् और्णविष्यन् । और्णविष्यः और्णविष्यतम् और्णविष्यत । और्णविष्यम् और्णविष्याव और्णविष्याम । (ii) और्णुविष्यत् और्णविष्यताम् और्णविष्यन् । और्णविष्यः और्णविष्यतम् और्णविष्यत । और्णविष्यम् और्णविष्याव और्णविष्याम । (iii) और्णविष्यत और्णविष्येताम् और्णविष्यन्त । और्णविष्यथाः और्णविष्येथाम् और्णविष्यध्वम् । और्णविष्ये और्णविष्यावहि और्णविष्यामहि । (iv) और्णुविष्यत और्णुविष्येताम् और्णुविष्यन्त । और्णुविष्यथाः और्णुविष्येथाम् और्णुविष्यध्वम् । और्णुविष्ये और्णुविष्यावहि और्णुविष्यामहि ।

णिचि - ऊर्णावयति - ते, **सनि** - ऊर्णुनूषति-ते, ऊर्णुनुविषति-ते, ऊर्णुनविषति-ते, **यकि** - ऊर्णूयते ।

१. 'ऊर्णोतेर्विभाषा' - वा वृद्धिः स्यात् हलादौ पिति सार्वधातुके ।

२. 'ऊर्णोतेविभाषा' - इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात् । पक्षे गुणः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. 'विभाषोर्णोः' इति ङित्त्वपक्षे उवङ् ।

१०४०. द्यु – अभिगमने । सकर्म, अनिट्[1], पर,

१. लट् – द्यौति द्युतः द्युवन्ति । द्यौषि द्युथः द्युथ । द्यौमि द्युवः द्युमः । **२. लिट्** – दुद्याव दुद्युवतुः दुद्युवुः । दुद्यविथ-दुद्योथ दुद्युवथुः दुद्युव । दुद्याव-दुद्यव दुद्युविव दुद्युविम । **३. लुट्** – द्योता द्योतारौ द्योतारः । द्योतासि द्योतास्थः द्योतास्थ । द्योतास्मि द्योतास्वः द्योतास्मः । **४. लृट्** – द्योष्यति द्योष्यतः द्योष्यन्ति । द्योष्यसि द्योष्यथः द्योष्यथ । द्योष्यामि द्योष्यावः द्योष्यामः । **५. लोट्** – द्यौतु द्युतात् द्युताम् द्युवन्तु । द्यौहि द्युतात् द्युतम् द्युत । द्यवानि द्यवाव द्यवाम । **६. लङ्** – अद्यौत् अद्युताम् अद्युवन् । अद्यौः अद्युतम् अद्युत । अद्यवम् अद्युव अद्युम । **७. विधिलिङ्** – द्युयात् द्युयाताम् द्युयुः । द्युयाः द्युयातम् द्युयात । द्युयाम् द्युयाव द्युयाम । **८. आशीर्लिङ्** – द्यूयात् द्यूयास्ताम् द्यूयासुः । द्यूयाः द्यूयास्तम् द्यूयास्त । द्यूयासम् द्यूयास्व द्यूयास्म । **९. लुङ्** – अद्यौषीत् अद्यौष्टाम् अद्यौषुः । अद्यौषीः अद्यौष्टम् अद्यौष्ट । अद्यौषम् अद्यौष्व अद्यौष्म । **१०. लृङ्** – अद्योष्यत् अद्योष्यताम् अद्योष्यन् । अद्योष्यः अद्योष्यतम् अद्योष्यत । अद्योष्यम् अद्योष्याव अद्योष्याम ।

णिचि – द्यावयति/ते, **सनि** – दुद्यूषति, **यकि** – द्यूयते ।

१. 'केचिदस्य सेट्त्वमिच्छन्ति' इति धातुपारायणे । तत् 'उतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्ष्णुवः' इति उकारान्तसेट्परिगणने पाठाभावात् इच्छामात्रम्' इति माधवीयधातुवृत्तिः ।

१०४१. षु – प्रसवैश्वर्ययोः । सकर्म. अनिट्, परस्मै । प्रसवोऽभ्यनुज्ञानम् । 'ओमिति ब्रह्मा प्रसौति' (तै.उप.२.१६) अभ्यनुज्ञां ब्रह्मा ददातीत्यर्थः । 'षुञः सुनोति सुनुते, प्रसवैश्वर्ययोरसौत् । गतौ तयोश्च सवति द्विरुक्त्या तस्य सो न षः' (श्लो २१) इति देवः ।

१. लट् – सौति सुतः सुवन्ति । सौषि सुथः सुथ । सौमि सुवः सुमः । **२. लिट्** – सुषाव सुषुवतुः सुषुवुः । सुषविथ-सुषोथ सुषुवथुः सुषुव । सुषाव-सुषव सुषुविव सुषुविम । **३. लुट्** – सोता सोतारौ सोतारः । सोतासि सोतास्थः सोतास्थ । सोतास्मि सोतास्वः सोतास्मः । **४. लृट्** – सोष्यति सोष्यतः सोष्यन्ति । सोष्यसि सोष्यथः सोष्यथ । सोष्यामि सोष्यावः सोष्यामः । **५. लोट्** – सौतु सुतात् सुताम् सुवन्तु । सौहि सुतात् सुतम् सुत । सवानि सवाव सवाम । **६. लङ्** – असौत् असुताम् असुवन् । असौः असुतम् असुत । असवम् असुव असुम । **७. विधिलिङ्** – सुयात् सुयाताम् सुयुः । सुयाः सुयातम् सुयात । सुयाम् सुयाव सुयाम । **८. आशीर्लिङ्** – सूयात् सूयास्ताम् सूयासुः । सूयाः सूयास्तम् सूयास्त । सूयासम् सूयास्व सूयास्म । **९. लुङ्** – असौषीत् असौष्टाम् असौषुः । असौषीः असौष्टम् असौष्ट । असौषम् असौष्व असौष्म । **१०. लृङ्** – असोष्यत् असोष्यताम् असोष्यन् । असोष्यः असोष्यतम् असोष्यत । असोष्यम् असोष्याव असोष्याम ।

णिचि – सावयति-ते, **सनि** – सुस्यूषति, **यकि** – सूयते

१०४२. कु – शब्दे । अकर्म, अनिट्, परस्मै । 'अव्यक्तशब्दे कवते कुवते त्वार्तशब्दने । कौतीति शब्दमात्रे स्यात्' (श्लो. २३) इति देवः ।

१. लट् – कौति कुतः कुवन्ति । कौषि कुथः कुथ । कौमि कुवः कुमः । **२. लिट्** – चुकाव चुकुवतुः चुकुवुः । चुकविथ-चुकोथ चुकुवथुः चुकुव । चुकाव-चुकव चुकुविव चुकुविम । **३. लुट्** – कोता कोतारौ कोतारः । कोतासि कोतास्थः कोतास्थ । कोतास्मि कोतास्वः कोतास्मः । **४. लृट्** – कोष्यति कोष्यतः कोष्यन्ति । कोष्यसि कोष्यथः कोष्यथ । कोष्यामि कोष्यावः कोष्यामः । **५. लोट्** – कौतु कुतात् कुताम् कुवन्तु । कौहि कुतात् कुतम् कुत । कवानि कवाव कवाम । **६. लङ्** – अकौत् अकुताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकुवन् । अकौः अकुतम् अकुत । अकवम् अकुव अकुम । **७. विधिलिङ्** – कुयात् कुयाताम् कुयुः । कुयाः कुयातम् कुयात । कुयाम् कुयाव कुयाम । **८. आशीर्लिङ्** – कूयात् कूयास्ताम् कूयासुः । कूयाः कूयास्तम् कूयास्त । कूयासम् कूयास्व कूयास्म । **९. लुङ्** – अकौषीत् अकौष्टाम् अकौषुः । अकौषीः अकौष्टम् अकौष्ट । अकौषम् अकौष्व अकौष्म । **१०. लृङ्** – अकोष्यत् अकोष्यताम् अकोष्यन् । अकोष्यः अकोष्यतम् अकोष्यत । अकोष्यम् अकोष्याव अकोष्याम ।

णिचि – कावयति/ते, **सनि** – चुकूषति, **यकि** – कूयते ।

१०४३. ष्टुञ् – स्तुतौ । सकर्म अनिट् उभय ।

१. लट् – (i) स्तौति[1]-स्तवीति स्तुतः-स्तुवीतः स्तुवन्ति । स्तौषि-स्तवीषि स्तुथः-स्तुवीथः स्तुवीथ-स्तुथ । स्तौमि-स्तवीमि स्तुवः-स्तुवीवः स्तुमः-स्तुवीमः । (ii) स्तुते-स्तुवीते स्तुवाते स्तुवते । स्तुषे-स्तुवीषे स्तुवाथे स्तुध्वे-स्तुवीध्वे । स्तुवे स्तुवहे-स्तुवीवहे स्तुमहे-स्तुवीमहे । **२. लिट्** – (i) तुष्टाव तुष्टुवतुः तुष्टुवुः । तुष्टोथ तुष्टुवथुः तुष्टुव । तुष्टाव-तुष्टव तुष्टुव तुष्टुम । (ii) तुष्टुवे तुष्टुवाते तुष्टुविरे । तुष्टुविषे तुष्टुवाथे तुष्टुविध्वे । तुष्टुवे तुष्टुविवहे तुष्टुविमहे । **३. लुट्** – (i) स्तोता स्तोतारौ स्तोतारः । स्तोतासि स्तोतास्थः स्तोतास्थ । स्तोतास्मि स्तोतास्वः स्तोतास्मः । (ii) स्तोता स्तोतारौ स्तोतारः । स्तोतासे स्तोतासाथे स्तोताध्वे । स्तोताहे स्तोतास्वहे स्तोतास्महे । **४. लृट्** – (i) स्तोष्यति स्तोष्यतः स्तोष्यन्ति । स्तोष्यसि स्तोष्यथः स्तोष्यथ । स्तोष्यामि स्तोष्यावः स्तोष्यामः । (ii) स्तोष्यते स्तोष्येते स्तोष्यन्ते । स्तोष्यसे स्तोष्येते स्तोष्यध्वे । स्तोष्ये स्तोष्यावहे स्तोष्यामहे । **५. लोट्** – (i) स्तौतु-स्तवीतु, स्तुतात्-स्तुवीतात् स्तुताम्-स्तुवीताम् स्तुवन्तु । स्तुवि-स्तुवीहि, स्तुतात्-स्तुवीतात् स्तुतम्-स्तुवीतम् स्तुत-स्तुवीत । स्तवानि स्तवाव स्तवाम । (ii) स्तुताम्-स्तुवीताम् स्तुवाताम् स्तुवताम् । स्तुष्व-स्तुवीष्व स्तुवाथाम् स्तुध्वम्-स्तुवीध्वम् । स्तवै स्तवावहै स्तवामहै । **६. लङ्** – (i) अस्तौत्-अस्तवीत् अस्तुताम्-अस्तुवीताम् अस्तुवन् । अस्तौः-अस्तवीः अस्तुतम्-अस्तुवीतम् अस्तुत-अस्तुवीत । अस्तवम् अस्तुव-अस्तुवीव अस्तुम-अस्तुवीम । (ii) अस्तुत-अस्तुवीत अस्तुवाताम् अस्तुवत । अस्तुथाः-अस्तुवीथाः अस्तुवाथाम् अस्तुध्वम्-अस्तुवीध्वम् । अस्तुवि अस्तुवहि-अस्तुवीवहि अस्तुमहि-अस्तुवीमहि । **७. विधिलिङ्** – (i) स्तुयात् स्तुयाताम् स्तुयुः । स्तुयाः स्तुयातम् स्तुयात । स्तुयाम् स्तुयाव स्तुयाम । (ii) स्तुवीयात् स्तुवीयाताम् स्तुवीयुः । स्तुवीयाः स्तुवीयातम् स्तुवीयात । स्तुवीयाम् स्तुवीयाव स्तुवीयाम । (iii) स्तुवीत स्तुवीयाताम् स्तुवीरन् । स्तुवीथाः स्तुवीयाथाम् स्तुवीध्वम् । स्तुवीय स्तुवीवहि स्तुवीमहि । **८. आशीर्लिङ्** – (i) स्तूयात् स्तूयास्ताम् स्तूयासुः । स्तूयाः स्तूयास्तम् स्तूयास्त । स्तूयासम् स्तूयास्व स्तूयास्म । (ii) स्तोषीष्ट स्तोषीयास्ताम् स्तोषीरन् । स्तोषीष्ठाः स्तोषीयास्थाम् स्तोषीध्वम्/ढ्वम् । स्तोषीय स्तोषीवहि स्तोषीमहि । **९. लुङ्** – (i) अस्तावीत् अस्ताविष्टाम् अस्ताविषुः । अस्तावीः अस्ताविष्टम् अस्ताविष्ट । अस्ताविषम् अस्ताविष्व अस्ताविष्म । (ii) अस्तोष्ट अस्तोषाताम् अस्तोषत । अस्तोष्ठाः अस्तोषाथाम् अस्तोध्वम्-ढ्वम् । अस्तोषि अस्तोष्वहि अस्तोष्महि । **१०. लृङ्** – (i) अस्तोष्यत् अस्तोष्यताम् अस्तोष्यन् । अस्तोष्यः अस्तोष्यतम् अस्तोष्यत । अस्तोष्यम् अस्तोष्याव अस्तोष्याम । (ii) अस्तोष्यत अस्तोष्येताम् अस्तोष्यन्त । अस्तोष्यथाः अस्तोष्येथाम् अस्तोष्यध्वम् । अस्तोष्ये अस्तोष्यावहि अस्तोष्यामहि ।

णिचि – स्तावयति – ते, **सनि** – तुष्टूषति – ते, **यकि** – स्तूयते

१. 'तुरुस्तुशम्यमः सार्वधातुके' इति ईड्विकल्पः । ईडभावपक्षे वृद्धिः ।

१०४४. ब्रूञ् – व्यक्तायां वाचि । द्विकर्म सेट्, वच्यादेशे त्वनिट् उभय ।

१. लट् – (i) आह[1] आहतुः आहुः । आत्थ आहथुः ब्रूथ । ब्रवीमि ब्रूवः ब्रूमः । (ii) ब्रवीति ब्रूतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ब्रुवन्ति । ब्रवीषि ब्रूथः ब्रूथ । ब्रवीमि ब्रूवः ब्रूमः । (iii) ब्रूते ब्रुवाते ब्रुवते । ब्रूषे ब्रुवाथे ब्रूध्वे । ब्रुवे ब्रूवहे ब्रूमहे । **२. लिट्** - (i) उवाच[2] ऊचतुः ऊचुः । उवचिथ-उवक्थ ऊचथुः ऊच । उवाच-उवच ऊचिव ऊचिम । (ii) ऊचे ऊचाते ऊचिरे । ऊचिषे ऊचाथे ऊचिध्वे । ऊचे ऊचिवहे ऊचिमहे । **३. लुट्** - (i) वक्ता वक्तारौ वक्तारः । वक्तासि वक्तास्थः वक्तास्थ । वक्तास्मि वक्तास्वः वक्तास्मः । (ii) वक्ता वक्तारौ वक्तारः । वक्तासे वक्तासाथे वक्ताध्वे । वक्ताहे वक्तास्वहे वक्तास्महे । **४. लृट्** - (i) वक्ष्यति वक्ष्यतः वक्ष्यन्ति । वक्ष्यसि वक्ष्यथः वक्ष्यथ । वक्ष्यामि वक्ष्यावः वक्ष्यामः । (ii) वक्ष्यते वक्ष्येते वक्ष्यन्ते । वक्ष्यसे वक्ष्येते वक्ष्यध्वे । वक्ष्ये वक्ष्यावहे वक्ष्यामहे । **५. लोट्** - (i) ब्रवीतु-ब्रूतात् ब्रूताम् ब्रुवन्तु । ब्रूहि-ब्रूतात् ब्रूतम् ब्रूत । ब्रवाणि ब्रवाव ब्रवाम । (ii) ब्रूताम् ब्रुवाताम् ब्रुवताम् । ब्रूष्व ब्रुवाथाम् ब्रूध्वम् । ब्रवै ब्रवावहै ब्रवामहै । **६. लङ्** - (i) अब्रवीत् अब्रूताम् अब्रुवन् । अब्रवीः अब्रूतम् अब्रूत । अब्रवम् अब्रूव अब्रूम । (ii) अब्रूत अब्रुवाताम् अब्रुवत । अब्रूथाः अब्रुवाथाम् अब्रूध्वम् । अब्रुवि अब्रूवहि अब्रूमहि । **७. विधिलिङ्** - (i) ब्रूयात् ब्रूयाताम् ब्रूयुः । ब्रूयाः ब्रूयातम् ब्रूयात । ब्रूयाम् ब्रूयाव ब्रूयाम । (ii) ब्रुवीत ब्रुवीयाताम् ब्रुरवीरन् । ब्रुवीथाः ब्रुवीयाथाम् ब्रुवीध्वम् । ब्रुवीय ब्रुवीवहि ब्रुवीमहि । **८. आशीर्लिङ्** - (i) उच्यात् उच्यास्ताम् उच्यासुः । उच्याः उच्यास्तम् उच्यास्त । उच्यासम् उच्यास्व उच्यास्म । (ii) वक्षीष्ट वक्षीयास्ताम् वक्षीरन् । वक्षीष्ठाः वक्षीयास्थाम् वक्षीध्वम्/ढ्वम् । वक्षीय वक्षीवहि वक्षीमहि । **९. लुङ्** - (i) अवोचत् अवोचताम् अवोचन् । अवोचः अवोचतम् अवोचत । अवोचम् अवोचाव अवोचाम । (ii) अवोचत अवोचेताम् अवोचन्त । अवोचथाः अवोचेथाम् अवोचध्वम् । अवोचे अवोचावहि अवोचामहि । **१०. लृङ्** - (i) अवक्ष्यत् अवक्ष्यताम् अवक्ष्यन् । अवक्ष्यः अवक्ष्यतम् अवक्ष्यत । अवक्ष्यम् अवक्ष्याव अवक्ष्याम । (ii) अवक्ष्यत अवक्ष्येताम् अवक्ष्यन्त । अवक्ष्यथाः अवक्ष्येथाम् अवक्ष्यध्वम् । अवक्ष्ये अवक्ष्यावहि अवक्ष्यामहि ।

णिचि - वाचयति - ते, **सनि** - विवक्षति ते, **यकि** - उच्यते ।

१. 'ब्रुवः पञ्चानामादित आहो ब्रुवः' - ब्रुवः लटः परस्मैपदानाम् आदितः पञ्चानां णलादयः पञ्च वा स्युः ब्रुवश्च आहादेशः ।

२. 'ब्रुवो वचिः' - आर्धधातुके ब्रुवः वचिरादेशः स्यात् । लिटि 'लिट्यभ्यासस्य' इति अभ्यासस्य सम्प्रसारणम् ।

१०४५. इण् - गतौ । सकर्म, अनिट्, परस्मै । 'अयत्येतीयते गत्याम्, अधीतेऽध्येति चेङिकोः' (श्लो. १४) इति देवः ।

१. लट् - एति इतः यन्ति । एषि इथः इथ । एमि इवः इमः । **२. लिट्** - इयाय ईयतुः ईयुः । इययिथ-इयेथ ईयथुः ईय । इयाय-इयय ईयिव ईयिम । **३. लुट्** - एता एतारौ एतारः । एतासि एतास्थः एतास्थ । एतास्मि एतास्वः एतास्मः । **४. लृट्** - एष्यति एष्यतः एष्यन्ति । एष्यसि एष्यथः एष्यथ । एष्यामि एष्यावः एष्यामः । **५. लोट्** - एतु, इतात् इताम् यन्तु । इहि, इतात् इतम् इत । अयानि अयाव अयाम । **६. लङ्** - ऐत् ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम । **७. विधिलिङ्** - इयात् इयाताम् इयुः । इयाः इयातम् इयात । इयाम् इयाव इयाम । **८. आशीर्लिङ्** - ईयात् ईयास्ताम् ईयासुः । ईयाः ईयास्तम् ईयास्त । ईयासम् ईयास्व ईयास्म । **९. लुङ्** - अगात्[1] अगाताम् अगुः । अगाः अगातम् अगात । अगाम् अगाव अगाम । **१०. लृङ्** - ऐष्यत् ऐष्यताम् ऐष्यन् । ऐष्यः ऐष्यतम् ऐष्यत । ऐष्यम् ऐष्याव ऐष्याम ।

णिचि - गमयति[2]- प्रत्याययति, **सनि** - जिगमिषति/प्रतीषिषति[3], **यकि** - ईयते ।

१. 'इणो गा लुङि' इति सूत्रेण 'गा' इति आदेशः लुङि ।

२. 'णौ गमिरबोधने' - इणो गमिः स्यात् बोधनभिन्नार्थे । बोधने तु - 'प्रत्याययति'

३. 'सनि च' इति अबोधनार्थस्य गम्यादेशः । बोधने तु - 'प्रतीषिषति' ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०४६. इङ् – अध्ययने । सकर्म, अनिट्, आत्मने । नित्यमधिपूर्वः । 'अयत्येतीयते गत्याम्, अधीतेऽध्येति चेङिकोः' (श्लो. १४) इति देवः ।

१. लट् – अधीते अधीयाते अधीयते । अधीषे अधीयाथे अधीध्वे । अधीये अधीवहे अधीमहे । **२. लिट्** – अधिजगे[1] अधिजगाते अधिजगिरे । अधिजगिषे अधिजगाथे अधिजगिध्वे । अधिजगे अधिजगिवहे अधिजगिमहे । **३. लुट्** – अध्येता अध्येतारौ । अध्येतासे अध्येतासाथे अध्येताध्वे । अध्येताहे अध्येतास्वहे अध्येतास्महे । **४. लृट्** – अध्येष्यते अध्येष्येते अध्येष्यन्ते । अध्येष्यसे अध्येष्येते अध्येष्यध्वे । अध्येष्ये अध्येष्यावहे अध्येष्यामहे । **५. लोट्** – अधीताम् अधीयाताम् अधीयताम् । अधीष्व अधीयाथाम् अधीध्वम् । अध्ययै अध्ययावहै अध्ययामहै । **६. लङ्** – अध्यैत अध्यैयाताम् अध्यैयत । अध्यैथाः अध्यैयाथाम् अध्यैध्वम् । अध्यैयि अध्यैवहि अध्यैमहि । **७. विधिलिङ्** – अधीयीत अधीयीयाताम् अधीयीरन् । अधीयीथाः अधीयीयाथाम् अधीयीध्वम् । अधीयीय अधीयीवहि अधीयीमहि । **८. आशीर्लिङ्** – अध्येषीष्ट अध्येषीयास्ताम् अध्येषीरन् । अध्येषीष्ठाः अध्येषीयास्थाम् अध्येषीध्वम्/ढ्वम् । अध्येषीय अध्येषीवहि अध्येषीमहि । **९. लुङ्** – (i) अध्यगीष्ट[2] अध्यगीषाताम् अध्यगीषत । अध्यगीष्ठाः अध्यगीषाथाम् अध्यगीड्ढ्वम् । अध्यगीषि अध्यगीष्वहि अध्यगीष्महि । (ii) अध्यैष्ट अध्यैषाताम् अध्यैषत । अध्यैष्ठाः अध्यैषाथाम् अध्यैड्ढ्वम् । अध्यैषि अध्यैष्वहि अध्यैष्महि । **१०. लृङ्** – (i) अध्यगीष्यत अध्यगीष्येताम् अध्यगीष्यन्त । अध्यगीष्यथाः अध्यगीष्येथाम् अध्यगीष्यध्वम् । अध्यगीष्ये अध्यगीष्वहि अध्यगीष्महि । (ii) अध्यैष्यत अध्यैष्येताम् अध्यैष्यन्त । अध्यैष्यथाः अध्यैष्येथाम् अध्यैष्यध्वम् । अध्यैष्ये अध्यैष्वहि अध्यैष्महि ।

णिचि – अध्यापयति[3], **सनि** – अधिजिगांसते[4], **यकि** – अधीयते

१. 'गाङ्लिटि' इङो गाङ् स्यात् लिटि ।
२. 'विभाषा लुङ्लृङोः' – इङो गाङ् वा स्यात् लुङ्लङोः ।
३. 'बुधयुध...' इत्यनेन परस्मैपदित्वम् । 'क्रीङ्जीनां णौ' इति आत्वं, ततः पुक् ।
४. 'इङश्च' – इङो गमिः स्यात् सनि । 'अज्झनगमाम् ...' इति दीर्घः ।

१०४७. इक् – स्मरणे । सकर्म, अनिट्, परस्मै । 'अयत्येतीयते गत्याम्, अधीतेऽध्येति चेङिकोः' (श्लो. १४) इति देवः । नित्यमधिपूर्वकः । 'अधीगर्थदयेषाम् ...' इति लिङ्गात् । अन्यथा हि 'इगर्थ...' इत्येव ब्रूयात्' इति कौमुदी ।

१. लट् – अध्येति अधीतः अधियन्ति-अधीयन्ति । अध्येषि अधीथः अधीथ । अध्येमि अधीवः अधीमः । **२. लिट्** – अधीयाय अधीयतुः अधीयुः । अधीययिथ-अधीयेथ अधीयथुः अधीय । अधीयाय-अधीयय अधीयिव अधीयिम । **३. लुट्** – अध्येता अध्येतारौ अध्येतारः । अध्येतासि अध्येतास्थः अध्येतास्थ । अध्येतास्मि अध्येतास्वः अध्येतास्मः । **४. लृट्** – अध्येष्यति अध्येष्यतः अध्येष्यन्ति । अध्येष्यसि अध्येष्यथः अध्येष्यथ । अध्येष्यामि अध्येष्यावः अध्येष्यामः । **५. लोट्** – अध्येतु, अधीतात् अधीताम् अधियन्तु-अधीयन्तु । अधीहि, अधीतात् अधीतम् अधीत । अध्ययानि अध्ययाव अध्ययाम । **६. लङ्** – अध्यैत् अध्यैताम् अध्यायन् । अध्यैः अध्यैतम् अध्यैत । अध्यायम् अध्यैव अध्यैम । **७. विधिलिङ्** – अधीयात् अधीयाताम् अधीयुः । अधीयाः अधीयातम् अधीयात । अधीयाम् अधीयाव अधीयाम । **८. आशीर्लिङ्** – अधीयात् अधीयास्ताम् अधीयासुः । अधीयाः अधीयास्तम् अधीयास्त । अधीयासम् अधीयास्व अधीयास्म । **९. लुङ्** – अध्यगात्[1] अध्यगाताम् अध्यगुः । अध्यगाः अध्यगातम् अध्यगात । अध्यगाम् अध्यगाव अध्यगाम । **१०. लृङ्** – अध्यैष्यत् अध्यैष्यताम् अध्यैष्यन् । अध्यैष्यः अध्यैष्यतम् अध्यैष्यत । अध्यैष्यम् अध्यैष्याव अध्यैष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – अधिगमयति-ते, **सनि** – अधिजिगमिषति, **यकि** – अधीयते

१. 'इण्वदिक इति वक्तव्यम्' इति इण्वत्त्वात् गाङादेशः ।

१०४८. वी – गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । सकर्म अनिट् परस्मै । (अर्थानुसारं सकर्मकता अकर्मकता च) अत्र व्याप्तिः इत्यर्थः धातुवृत्ति-क्षीरतरङ्गिणी-जै.का.कृ-द.उ.वृत्ति-कातन्त्रशाकटायनीयेषु न दृश्यते । 'प्रजनः = प्रथमगर्भग्रहणम्, असनं = क्षेपणम्, अशनं = व्याप्तिरित्येके' इति क्षीरस्वामी । 'प्रजनन-कान्त्यासनखादनेषु च' इति काशकृत्स्नधातुपाठे । 'कन्नडटीकायाम् आसनार्थस्य निर्देशात् काशकृत्स्ने 'आसन' इति पाठो द्रष्टव्यः । यद्वा मूलपाठे प्रमादपठितस्यैव टीकाकृता तथा व्याख्यानं कृतं स्यात्' इति का.कृ.टीका । 'अजेर्व्यघञपोः' (२.४.५६) इति सूत्रभाष्यरीत्या अस्य धातोः आर्धधातुके नास्ति प्रयोगः इति शब्देन्दुशेखरे स्थितम् । 'वी इत्यत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते' इति सिद्धान्तकौमुदी । 'कान्तिगतिव्याप्तिक्षेपप्रजनखादनेषु' इति वोपदेवः ।

१. लट् – वेति वीतः वियन्ति । वेषि वीथः वीथ । वेमि वीवः वीमः । **२. लिट्** – विवाय विव्यतुः विव्युः । विवयिथ-विवेथ विव्यथुः विव्य । विवाय-विवय विव्यिव विव्यिम । **३. लुट्** – वेता वेतारौ वेतारः । वेतासि वेतास्थः वेतास्थ । वेतास्मि वेतास्वः वेतास्मः । **४. लृट्** – वेष्यति वेष्यतः वेष्यन्ति । वेष्यसि वेष्यथः वेष्यथ । वेष्यामि वेष्यावः वेष्यामः । **५. लोट्** – वेतु-वीतात् वीताम् वियन्तु । वीहि-वीतात् वीतम् वीत । वयानि वयाम वयाम । **६. लङ्** – अवेत् अवीताम् अवियन्-अव्यन् । अवेः अवीतम् अवीत । अवयम् अवीव अवीम । **७. विधिलिङ्** – वीयात् वीयाताम् वीयुः । वीयाः वीयातम् वीयात । वीयाम् वीयाव वीयाम । **८. आशीर्लिङ्** – वीयात् वीयास्ताम् वीयासुः । वीयाः वीयास्तम् वीयास्त । वीयासम् वीयास्व वीयास्म । **९. लुङ्** – अवैषीत् अवैष्टाम् अवैषुः । अवैषीः अवैष्टम् अवैष्ट । अवैषम् अवैष्व अवैष्म । **१०. लृङ्** – अवेष्यत् अवेष्यताम् अवेष्यन् । अवेष्यः अवेष्यतम् अवेष्यत । अवेष्यम् अवेष्याव अवेष्याम ।

णिचि – वाययति[1], प्रजननार्थे तु – वाययति, वापयति-ते, **सनि** – विवीषति, **यकि** – वीयते

१. 'प्रजने वीयतेः' – अस्यैचः आत्वं वा स्यात् णौ प्रजनेऽर्थे । आत्वे पुक् ।

१०४८. (अ) ई – गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । सकर्म, अनिट्, परस्मै । 'वी इत्यत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते' इति मतम् अवलम्ब्य पृथक् धात्वन्तरम् इह निर्दिष्टम् । अर्थानुसारं सकर्मकता अकर्मकता च अस्य । अत्र अर्थादिविषये पूर्वतनः धातुः (**वी** – गतिव्याप्ति...) द्रष्टव्यः ।

१. लट् – ऐति ईतः इयन्ति । एषि ईथः ईथ । एमि ईवः ईमः । **२. लिट्** – (i) अयाञ्चकार अयाञ्चक्रतुः अयाञ्चक्रुः । अयाञ्चकर्थ अयाञ्चक्रथुः अयाञ्चक्र । अयाञ्चचकार, अयाचकर अयाञ्चकृव अयाञ्चकृम । (ii) अयाम्बभूव अयाम्बभूवतुः अयाम्बभूवुः । अयाम्बभूविथ अयाम्बभूवथुः अयाम्बभूव । अयाम्बभूव अयाम्बभूविव अयाम्बभूविम । (iii) अयामास अयामासतुः अयामासुः । अयामासिथ अयामासथुः अयामास । अयामास अयामासिव अयामासिम । **३. लुट्** – एता एतारौ एतारः । एतासि एतास्थः एतास्थ एतास्मि एतास्वः एतास्मः । **४. लृट्** – एष्यति एष्यतः एष्यन्ति । एष्यसि एष्यथः एष्यथ । एष्यामि एष्यावः एष्यामः । **५. लोट्** – एतु-ईतात् ईताम् इयन्तु । ईहि-ईतात् ईतम् ईत । अयानि अयाम अयाम । **६. लङ्** – ऐत् ऐताम् अयन् । ऐः ऐतम् ऐत । अयम् अयाव अयाम । **७. विधिलिङ्** – ईयात् ईयाताम् ईयुः । ईयाः ईयातम् ईयात । ईयाम् ईयाव ईयाम । **८. आशीर्लिङ्** – ईयात् ईयास्ताम् ईयासुः । ईयाः ईयास्तम् ईयास्त । ईयासम् ईयास्व ईयास्म । **९. लुङ्** – ऐषीत् ऐष्टाम् ऐषुः । ऐषीः ऐष्टम् ऐष्ट । ऐषम् ऐष्व ऐष्म । **१०. लृङ्** – ऐष्यत् ऐष्यताम् ऐष्यन् । ऐष्यः ऐष्यतम् ऐष्यत । ऐष्यम् ऐष्याव ऐष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – आययति-ते, **सनि** – ईषिषति, **यकि** – ईयते

१०४९. या – प्रापणे । सकर्म अनिट् परस्मै । 'ननु गच्छतीत्यर्थे यातीति कथमित्यतः आह – प्रापणम् इह गतिः इति । णिजर्थस्तु अविवक्षितः इति भावः' इति बालमनोरमा ।

१. लट् – याति यातः यान्ति । यासि याथः याथ । यामि यावः यामः । **२. लिट्** – ययौ ययतुः ययुः । ययिथ-ययाथ ययथुः यय । ययौ ययिव ययिम । **३. लुट्** – याता यातारौ यातारः । यातासि यातास्थः यातास्थ । यातास्मि यातास्वः यातास्मः । **४. लृट्** – यास्यति यास्यतः यास्यन्ति । यास्यसि यास्यथः यास्यथ । यास्यामि यास्यावः यास्यामः । **५. लोट्** – यातु-यातात् याताम् यन्तु । याहि-यातात् यातम् यात । यानि याम याम । **६. लङ्** – अयात् अयाताम् अयुः-अयान्[1] । अयाः अयातम् अयात । अयाम् अयाव अयाम । **७. विधिलिङ्** – यायात् यायाताम् यायुः[2] । यायाः यायातम् यायात । यायाम् यायाव यायाम । **८. आशीर्लिङ्** – यायात् यायास्ताम् यायासुः । यायाः यायास्तम् यायास्त । यायासम् यायास्व यायास्म । **९. लुङ्** – अयासीत् अयासिष्टाम् अयासिषुः । अयासीः अयासिष्टम् अयासिष्ट । अयासिषम् अयासिष्व अयासिष्म । **१०. लृङ्** – अयास्यत् अयास्यताम् अयास्यन् । अयास्यः अयास्यतम् अयास्यत । अयास्यम् अयास्याव अयास्याम ।

णिचि – यापयति-ते, **सनि** – यियासति, **यकि** – यायते ।

१. 'लङः शाकटायनस्यैव' – आदन्तात् परस्य लङः झेर्जुस् वा स्यात् ।

२. 'यायुरित्यस्यानभिधानादप्रयोगः इति केचित् इत्यात्रेयः' इति मा.धा.वृत्तिः ।

१०५०. वा – गतिगन्धनयोः । सकर्म अनिट् परस्मै । प्रापणम् = गतिः । गन्धनम् = सूचनम् । 'गतिगन्धनयोर्वाति वायतीति तु शोषणे । वयते वयतीत्येवं तन्तुसन्तान इष्यते' (श्लो. १०) इति देवः । ''हेमचन्द्राचार्यस्तु 'वा तण्' इति पठित्वा 'सुखसेवनयोः इत्येके' इति च उक्त्वा 'वेत्येके' इत्यप्याह'' इति पुरुषकारवचनम् अत्र अनुसन्धेयम् । 'अर्दनं हिंसनं च गन्धनम् इति लीलाशुकः' इति धातुकाव्ये । (२.४९) 'गन्धनं = सौरभ्यकरणम्' इति सहस्रनामभाष्ये । 'गमनहिंसनयोः' इति वोपदेवः । 'गतिगन्धनयोः, चलने च' इति काशकृत्स्नः ।

१. लट् – वाति वातः वान्ति । वासि वाथः वाथ । वामि वावः वामः । **२. लिट्** – ववौ ववतुः ववुः । वविथ-ववाथ ववथुः वव । ववौ वविव वविम । **३. लुट्** – वाता वातारौ वातारः । वातासि वातास्थः वातास्थ । वातास्मि वातास्वः वातास्मः । **४. लृट्** – वास्यति वास्यतः वास्यन्ति । वास्यसि वास्यथः वास्यथ । वास्यामि वास्यावः वास्यामः । **५. लोट्** – वातु-वातात् वाताम् वान्तु । वाहि-वातात् वातम् वात । वानि वाम वाम । **६. लङ्** – अवात् अवाताम् अवुः-अवान्[1] । अवाः अवातम् अवात । अवाम् अवाव अवाम । **७. विधिलिङ्** – वायात् वायाताम् वायुः । वायाः वायातम् वायात । वायाम् वायाव वायाम । **८. आशीर्लिङ्** – वायात् वायास्ताम् वायासुः । वायाः वायास्तम् वायास्त । वायासम् वायास्व वायास्म । **९. लुङ्** – अवासीत् अवासिष्टाम् अवासिषुः । अवासीः अवासिष्टम् अवासिष्ट । अवासिषम् अवासिष्व अवासिष्म । **१०. लृङ्** – अवास्यत् अवास्यताम् अवास्यन् । अवास्यः अवास्यतम् अवास्यत । अवास्यम् अवास्याव अवास्याम ।

णिचि – वाजयति[2]– वापयति – ते, **सनि** – विवासति, **यकि** – वायते

१. 'लङः शाकटायनस्यैव' – आदन्तात् परस्य लङः झेर्जुस् वा स्यात् ।

२. 'वो विधूनने जुक्' – वातेर्जुक् स्याण्णौ कम्पेऽर्थे । कम्पनादन्यत्र – वापयति केशान् । सुगन्धीकरोति इत्यर्थः ।

१०५१. भा – दीप्तौ । अकर्म अनिट् परस्मै ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – भाति भातः भान्ति । भासि भाथः भाथ । भामि भावः भामः । **२. लिट्** – बभौ बभतुः बभुः । बभिथ-बभाथ बभथुः बभ । बभौ बभिव बभिम । **३. लुट्** – भाता भातारौ भातारः । भातासि भातास्थः भातास्थ । भातास्मि भातास्वः भातास्मः । **४. लृट्** – भास्यति भास्यतः भास्यन्ति । भास्यसि भास्यथः भास्यथ । भास्यामि भास्यावः भास्यामः । **५. लोट्** – भातु-भातात् भाताम् भान्तु । भाहि-भातात् भातम् भात । भानि भाम भाम । **६. लङ्** – अभात् अभाताम् अभुः-अभान्[1] । अभाः अभातम् अभात । अभाम् अभाव अभाम । **७. विधिलिङ्** – भायात् भायाताम् भायुः । भायाः भायातम् भायात । भायाम् भायाव भायाम । **८. आशीर्लिङ्** – भायात् भायास्ताम् भायासुः । भायाः भायास्तम् भायास्त । भायासम् भायास्व भायास्म । **९. लुङ्** – अभासीत् अभासिष्टाम् अभासिषुः । अभासीः अभासिष्टम् अभासिष्ट । अभासिषम् अभासिष्व अभासिष्म । **१०. लृङ्** – अभास्यत् अभास्यताम् अभास्यन् । अभास्यः अभास्यतम् अभास्यत । अभास्यम् अभास्याव अभास्याम ।

णिचि – भाययति – ते, **सनि** – बिभासति, **यकि** – भायते

१. 'लङः शाकटायनस्यैव' – आदन्तात् परस्य लङः झेर्जुस् वा स्यात् ।

१०५२. ष्णा – शौचे । अकर्म अनिट् परस्मै । 'स्नातीति शौचे स्नस्स्नायेदिति चेच्छन्ति केचन' (श्लो. ११) इति देवः ।

१. लट् – स्नाति स्नातः स्नान्ति । स्नासि स्नाथः स्नाथ । स्नामि स्नावः स्नामः । **२. लिट्** – सस्नौ सस्नतुः सस्नुः । सस्निथ-सस्नाथ सस्नथुः सस्न । सस्नौ सस्निव सस्निम । **३. लुट्** – स्नाता स्नातारौ स्नातारः । स्नातासि स्नातास्थः स्नातास्थ । स्नातास्मि स्नातास्वः स्नातास्मः । **४. लृट्** – स्नास्यति स्नास्यतः स्नास्यन्ति । स्नास्यसि स्नास्यथः स्नास्यथ । स्नास्यामि स्नास्यावः स्नास्यामः । **५. लोट्** – स्नातु-स्नातात् स्नाताम् स्नान्तु । स्नाहि-स्नातात् स्नातम् स्नात । स्नानि स्नाम स्नाम । **६. लङ्** – अस्नात् अस्नाताम् अस्नुः-अस्नान् । अस्नाः अस्नातम् अस्नात । अस्नाम् अस्नाव अस्नाम । **७. विधिलिङ्** – स्नायात् स्नायाताम् स्नायुः । स्नायाः स्नायातम् स्नायात । स्नायाम् स्नायाव स्नायाम । **८. आशीर्लिङ्** – (i) स्नायात् स्नायास्ताम् स्नायासुः । स्नायाः स्नायास्तम् स्नायास्त । स्नायासम् स्नायास्व स्नायास्म । (ii) स्नेयात्[1] स्नेयास्ताम् स्नेयासुः । स्नेयाः स्नेयास्तम् स्नेयास्त । स्नेयासम् स्नेयास्व स्नेयास्म । **९. लुङ्** – अस्नासीत् अस्नासिष्टाम् अस्नासिषुः । अस्नासीः अस्नासिष्टम् अस्नासिष्ट । अस्नासिषम् अस्नासिष्व अस्नासिष्म । **१०. लृङ्** – अस्नास्यत् अस्नास्यताम् अस्नास्यन् । अस्नास्यः अस्नास्यतम् अस्नास्यत । अस्नास्यम् अस्नास्याव अस्नास्याम ।

णिचि – स्नापयति[2] स्नपयति, प्रस्नपयति – ते, **सनि** – सिष्णासति, **यकि** – स्नायते

१. 'वान्यस्य संयोगादेः' – घुमास्थादेरन्यस्य संयोगादेर्धातोः आतः एत्वं वा स्यात् आर्धधातुके किति लिङि ।

२. 'ग्लास्नावनुवमां च' इति अनुपसृष्टस्य वा मित्त्वम् । मित्त्वे ह्रस्वः ।

१०५३. श्रा – पाके । सकर्म अनिट् परस्मै । '.... श्राति श्रायति लुक्शपोः' (श्लो. ९) इति देवः ।

१. लट् – श्राति श्रातः श्रान्ति । श्रासि श्राथः श्राथ । श्रामि श्रावः श्रामः । **२. लिट्** – शश्रौ शश्रतुः शश्रुः । शश्रिथ-शश्राथ शश्रथुः शश्र । शश्रौ शश्रिव शश्रिम । **३. लुट्** – श्राता श्रातारौ श्रातारः । श्रातासि श्रातास्थः श्रातास्थ । श्रातास्मि श्रातास्वः श्रातास्मः । **४. लृट्** – श्रास्यति श्रास्यतः श्रास्यन्ति । श्रास्यसि श्रास्यथः श्रास्यथ । श्रास्यामि श्रास्यावः श्रास्यामः । **५. लोट्** – श्रातु-श्रातात् श्राताम् श्रान्तु । श्राहि-श्रातात् श्रातम् श्रात । श्राणि श्राम श्राम । **६. लङ्** – अश्रात् अश्राताम् अश्रान् अश्रुः । अश्राः अश्रातम् अश्रात । अश्राम् अश्राव अश्राम । **७. विधिलिङ्** – श्रायात् श्रायाताम् श्रायुः । श्रायाः श्रायातम् श्रायात । श्रायाम् श्रायाव श्रायाम । **८. आशीर्लिङ्** – (i) श्रायात् श्रायास्ताम् श्रायासुः । श्रायाः श्रायास्तम् श्रायास्त । श्रायासम् श्रायास्व श्रायास्म । (ii) श्रेयात्[1] श्रेयास्ताम् श्रेयासुः । श्रेयाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रेयास्तम् श्रेयास्त । श्रेयासम् श्रेयास्व श्रेयास्म । **९. लुङ्** - अश्रासीत् अश्रासिष्टाम् अश्रासिषुः । अश्रासीः अश्रासिष्टम् अश्रासिष्ट । अश्रासिषम् अश्रासिष्व अश्रासिष्म । **१०. लृङ्** - अश्रास्यत् अश्रास्यताम् अश्रास्यन् । अश्रास्यः अश्रास्यतम् अश्रास्यत । अश्रास्यम् अश्रास्याव अश्रास्याम ।

णिचि - श्रापयति-ते, श्रपयति-ते[२], **सनि** - सिश्रासति, **यकि** - श्रायते

१. 'वान्यस्य संयोगादेः' - घुमास्थादेरन्यस्य संयोगादेर्धातोः आतः एत्वं वा स्यात् आर्धधातुके किति लिङि ।

२. घटदित्वात् पाके मित्त्वम् । अन्यत्र - श्रापयति स्वेदयति इत्यर्थः ।

१०५४. द्रा - कुत्सायां गतौ । अकर्म अनिट् परस्मै । कुत्सितगतिः = पलायनम् । निन्दा च । स्वापे निपूर्वकोऽयम् । 'द्रै स्वप्ने द्रायति द्राति कुत्सिते गमने लुकि' (श्लो ६) इति देवः ।

१. लट् - द्राति द्रातः द्रान्ति । द्रासि द्राथः द्राथ । द्रामि द्रावः द्रामः । **२. लिट्** - दद्रौ दद्रतुः दद्रुः । दद्रिथ-दद्राथ दद्रथुः दद्र । दद्रौ दद्रिव दद्रिम । **३. लुट्** - द्राता द्रातारौ द्रातारः । द्रातासि द्रातास्थः द्रातास्थ । द्रातास्मि द्रातास्वः द्रातास्मः । **४. लृट्** - द्रास्यति द्रास्यतः द्रास्यन्ति । द्रास्यसि द्रास्यथः द्रास्यथ । द्रास्यामि द्रास्यावः द्रास्यामः । **५. लोट्** - द्रातु-द्रातात् द्राताम् द्रान्तु । द्राहि-द्रातात् द्रातम् द्रात । द्राणि द्राम द्राम । **६. लङ्** - अद्रात् अद्राताम् अद्रान्-अद्रुः । अद्राः अद्रातम् अद्रात । अद्राम् अद्राव अद्राम । **७. विधिलिङ्** - द्रायात् द्रायाताम् द्रायुः । द्रायाः द्रायातम् द्रायात । द्रायाम् द्रायाव द्रायाम । **८. आशीर्लिङ्** - (i) द्रायात् द्रायास्ताम् द्रायासुः । द्रायाः द्रायास्तम् द्रायास्त । द्रायासम् द्रायास्व द्रायास्म । (ii) द्रेयात्[१] द्रेयास्ताम् द्रेयासुः । द्रेयाः द्रेयास्तम् द्रेयास्त । द्रेयासम् द्रेयास्व द्रेयास्म । **९. लुङ्** - अद्रासीत् अद्रासिष्टाम् अद्रासिषुः । अद्रासीः अद्रासिष्टम् अद्रासिष्ट । अद्रासिषम् अद्रासिष्व अद्रासिष्म । **१०. लृङ्** - अद्रास्यत् अद्रास्यताम् अद्रास्यन् । अद्रास्यः अद्रास्यतम् अद्रास्यत । अद्रास्यम् अद्रास्याव अद्रास्याम ।

णिचि - द्रापयति-ते, **सनि** - दिद्रासति, **यकि** - द्रायते

१. 'वान्यस्य संयोगादेः' - घुमास्थादेरन्यस्य संयोगादेर्धातोः आतः एत्वं वा स्यात् आर्धधातुके किति लिङि ।

१०५५. प्सा - भक्षणे । सकर्म अनिट् परस्मै ।

१. लट् - प्साति प्सातः प्सान्ति । प्सासि प्साथः प्साथ । प्सामि प्सावः प्सामः । **२. लिट्** - पप्सौ पप्सतुः पप्सुः । पप्सिथ-पप्साथ पप्सथुः पप्स । पप्सौ पप्सिव पप्सिम । **३. लुट्** - प्साता प्सातारौ प्सातारः । प्सातासि प्सातास्थः प्सातास्थ । प्सातास्मि प्सातास्वः प्सातास्मः । **४. लृट्** - प्सास्यति प्सास्यतः प्सास्यन्ति । प्सास्यसि प्सास्यथः प्सास्यथ । प्सास्यामि प्सास्यावः प्सास्यामः । **५. लोट्** - प्सातु-प्सातात् प्साताम् प्सान्तु । प्साहि-प्सातात् प्सातम् प्सात । प्सानि प्साम प्साम । **६. लङ्** - अप्सात् अप्साताम् अप्सान्-अप्सुः । अप्साः अप्सातम् अप्सात । अप्साम् अप्साव अप्साम । **७. विधिलिङ्** - प्सायात् प्सायाताम् प्सायुः । प्सायाः प्सायातम् प्सायात । प्सायाम् प्सायाव प्सायाम । **८. आशीर्लिङ्** - (i) प्सायात् प्सायास्ताम् प्सायासुः । प्सायाः प्सायास्तम् प्सायास्त । प्सायासम् प्सायास्व प्सायास्म । (ii) प्सेयात्[१] प्सेयास्ताम् प्सेयासुः । प्सेयाः प्सेयास्तम् प्सेयास्त । प्सेयासम् प्सेयास्व प्सेयास्म । **९. लुङ्** - अप्सासीत् अप्सासिष्टाम् अप्सासिषुः । अप्सासीः अप्सासिष्टम् अप्सासिष्ट । अप्सासिषम् अप्सासिष्व अप्सासिष्म । **१०. लृङ्** - अप्सास्यत् अप्सास्यताम् अप्सास्यन् । अप्सास्यः अप्सास्यतम् अप्सास्यत । अप्सास्यम् अप्सास्याव अप्सास्याम ।

णिचि - प्सापयति-ते, **सनि** - पिप्सासति, **यकि** - प्सायते ।

१. 'वान्यस्य संयोगादेः' - घुमास्थादेरन्यस्य संयोगादेर्धातोः आतः एत्वं वा स्यात् आर्धधातुके किति लिङि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०५६. पा – रक्षणे । सकर्म अनिट् परस्मै । 'पाने पिबति, रक्षायां पाति, पायति शोषणे' (श्लो.५) इति देवः ।

१. लट् – पाति पातः पान्ति । पासि पाथः पाथ । पामि पावः पामः । **२. लिट्** – पपौ पपतुः पपुः । पपिथ-पपाथ पपथुः पप । पपौ पपिव पपिम । **३. लुट्** – पाता पातारौ पातारः । पातासि पातास्थः पातास्थ । पातास्मि पातास्वः पातास्मः । **४. लृट्** – पास्यति पास्यतः पास्यन्ति । पास्यसि पास्यथः पास्यथ । पास्यामि पास्यावः पास्यामः । **५. लोट्** – पातु-पातात् पाताम् पान्तु । पाहि-पातात् पातम् पात । पानि पाम पाम । **६. लङ्** – अपात् अपाताम् अपान्-अपुः । अपाः अपातम् अपात । अपाम् अपाव अपाम । **७. विधिलिङ्** – पायात् पायाताम् पायुः । पायाः पायातम् पायात । पायाम् पायाव पायाम । **८. आशीर्लिङ्** – पायात् पायास्ताम् पायासुः । पायाः पायास्तम् पायास्त । पायासम् पायास्व पायास्म । **९. लुङ्** – अपासीत् अपासिष्टाम् अपासिषुः । अपासीः अपासिष्टम् अपासिष्ट । अपासिषम् अपासिष्व अपासिष्म । **१०. लृङ्** – अपास्यत् अपास्यताम् अपास्यन् । अपास्यः अपास्यतम् अपास्यत । अपास्यम् अपास्याव अपास्याम ।

णिचि – पालयति[१]– ते, **सनि** – पिपासति, **यकि** – पायते ।

१. 'पातेर्णौ लुग्वक्तव्यः' इति णिचि लुगागमः ।

१०५७. रा – दाने । सकर्म, अनिट्, परस्मै । 'आदाने' इति केचित् । 'रैशब्दे रायतीतीष्टं, राऽदाने राति शब्लुकि' (श्लो. ११) इति देवः ।

१. लट् – राति रातः रान्ति । रासि राथः राथ । रामि रावः रामः । **२. लिट्** – ररौ ररतुः ररुः । ररिथ-रराथ ररथुः रर । ररौ ररिव ररिम । **३. लुट्** – राता रातारौ रातारः । रातासि रातास्थः रातास्थ । रातास्मि रातास्वः रातास्मः । **४. लृट्** – रास्यति रास्यतः रास्यन्ति । रास्यसि रास्यथः रास्यथ । रास्यामि रास्यावः रास्यामः । **५. लोट्** – रातु-रातात् राताम् रान्तु । राहि-रातात् रातम् रात । राणि राम राम । **६. लङ्** – अरात् अराताम् अरान्-अरुः । अराः अरातम् अरात । अराम् अराव अराम । **७. विधिलिङ्** – रायात् रायाताम् रायुः । रायाः रायातम् रायात । रायाम् रायाव रायाम । **८. आशीर्लिङ्** – रायात् रायास्ताम् रायासुः । रायाः रायास्तम् रायास्त । रायासम् रायास्व रायास्म । **९. लुङ्** – अरासीत् अरासिष्टाम् अरासिषुः । अरासीः अरासिष्टम् अरासिष्ट । अरासिषम् अरासिष्व अरासिष्म । **१०. लृङ्** – अरास्यत् अरास्यताम् अरास्यन् । अरास्यः अरास्यतम् अरास्यत । अरास्यम् अरास्याव अरास्याम ।

णिचि – रापयति – ते, **सनि** – रिरासति, **यकि** – रायते ।

१०५८. ला – आदाने । सकर्म, अनिट्, परस्मै । 'दाने' इति चन्द्रः ।

१. लट् – लाति लातः लान्ति । लासि लाथः लाथ । लामि लावः लामः । **२. लिट्** – ललौ ललतुः ललुः । ललिथ-ललाथ ललथुः लल । ललौ ललिव ललिम । **३. लुट्** – लाता लातारौ लातारः । लातासि लातास्थः लातास्थ । लातास्मि लातास्वः लातास्मः । **४. लृट्** – लास्यति लास्यतः लास्यन्ति । लास्यसि लास्यथः लास्यथ । लास्यामि लास्यावः लास्यामः । **५. लोट्** – लातु-लातात् लाताम् लान्तु । लाहि-लातात् लातम् लात । लानि लाम लाम । **६. लङ्** – अलात् अलाताम् अलान्-अलुः । अलाः अलातम् अलात । अलाम् अलाव अलाम । **७. विधिलिङ्** – लायात् लायाताम् लायुः । लायाः लायातम् लायात । लायाम् लायाव लायाम । **८. आशीर्लिङ्** – लायात् लायास्ताम् लायासुः । लायाः लायास्तम् लायास्त । लायासम् लायास्व लायास्म । **९. लुङ्** – अलासीत् अलासिष्टाम् अलासिषुः । अलासीः अलासिष्टम् अलासिष्ट । अलासिषम् अलासिष्व अलासिष्म । **१०. लृङ्** – अलास्यत् अलास्यताम् अलास्यन् । अलास्यः अलास्यतम् अलास्यत । अलास्यम् अलास्याव अलास्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि - विलालयति[1]- ते विलापयति - ते, **सनि** - लिलासति, **यकि** - लायते ।

१. 'लीलोर्नुग्लुकावन्यतरस्याम्..' - लीयतेर्लातिश्च क्रमात् लुग्लुकावागमौ वा स्तः णौ स्नेहद्रवे । विलालयति विलापयति वा धृतम् । स्नेहद्रवे किम् ? विलापयति लोहम् ।

१०५९. दाप् - लवने । सकर्म, अनिट्, परस्मै । 'दाञो दत्ते ददातीति, दाणो यच्छति दो द्यति । दाति दायति दाप्दैपोः, दयते रक्षणे ङितः' (श्लो. ४) इति देवः ।

१. लट् - दाति दातः दान्ति । दासि दाथः दाथ । दामि दावः दामः । **२. लिट्** - ददौ ददतुः ददुः । ददिथ-ददाथ ददथुः दद । ददौ ददिव ददिम । **३. लुट्** - दाता दातारौ दातारः । दातासि दातास्थः दातास्थ । दातास्मि दातास्वः दातास्मः । **४. लृट्** - दास्यति दास्यतः दास्यन्ति । दास्यसि दास्यथः दास्यथ । दास्यामि दास्यावः दास्यामः । **५. लोट्** - दातु-दातात् दाताम् दान्तु । दाहि-दातात् दातम् दात । दानि दाम दाम । **६. लङ्** - अदात् अदाताम् अदान्-अदुः । अदाः अदातम् अदात । अदाम् अदाव अदाम । **७. विधिलिङ्** - दायात् दायाताम् दायुः । दायाः दायातम् दायात । दायाम् दायाव दायाम । **८. आशीर्लिङ्** - दायात् दायास्ताम् दायासुः । दायाः दायास्तम् दायास्त । दायासम् दायास्व दायास्म । **९. लुङ्** - अदासीत् अदासिष्टाम् अदासिषुः । अदासीः अदासिष्टम् अदासिष्ट । अदासिषम् अदासिष्व अदासिष्म । **१०. लृङ्** - अदास्यत् अदास्यताम् अदास्यन् । अदास्यः अदास्यतम् अदास्यत । अदास्यम् अदास्याव अदास्याम ।

णिचि - दापयति - ते, **सनि** - दिदासति, **यकि** - दायते ।

१०६०. ख्या - प्रकथने । सकर्म, अनिट्, परस्मै ।

१. लट् - ख्याति[1] ख्यातः ख्यान्ति । ख्यासि ख्याथः ख्याथ । ख्यामि ख्यावः ख्यामः । **२. लिट्** - चख्यौ[2] चख्यतुः चख्युः । चख्यिथ-चख्याथ चख्यथुः चख्य । चख्यौ चख्यिव चख्यिम । **३. लुट्** - ख्याता[2] ख्यातारौ ख्यातारः । ख्यातासि ख्यातास्थः ख्यातास्थ । ख्यातास्मि ख्यातास्वः ख्यातास्मः । **४. लृट्** - ख्यास्यति[2] ख्यास्यतः ख्यास्यन्ति । ख्यास्यसि ख्यास्यथः ख्यास्यथ । ख्यास्यामि ख्यास्यावः ख्यास्यामः । **५. लोट्** - ख्यातु ख्यातात् ख्याताम् ख्यान्तु । ख्याहि-ख्यातात् ख्यातम् ख्यात । ख्यानि ख्याम ख्याम । **६. लङ्** - अख्यात् अख्याताम् अख्यान्-अख्युः । अख्याः अख्यातम् अख्यात । अख्याम् अख्याव अख्याम । **७. विधिलिङ्** - ख्यायात् ख्यायाताम् ख्यायुः । ख्यायाः ख्यायातम् ख्यायात । ख्यायाम् ख्यायाव ख्यायाम । **८. आशीर्लिङ्** - ख्यायात्[2] ख्यायास्ताम् ख्यायासुः । ख्यायाः ख्यायास्तम् ख्यायास्त । ख्यायासम् ख्यायास्व ख्यायास्म । **९. लुङ्** - अख्यासीत्[2] अख्यासिष्टाम् अख्यासिषुः । अख्यासीः अख्यासिष्टम् अख्यासिष्ट । अख्यासिषम् अख्यासिष्व अख्यासिष्म । **१०. लृङ्** - अख्यास्यत्[2] अख्यास्यताम् अख्यास्यन् । अख्यास्यः अख्यास्यतम् अख्यास्यत । अख्यास्यम् अख्यास्याव अख्यास्याम ।

णिचि - ख्यापयति - ते, **सनि** - चिख्यासति, **यकि** - ख्यायते

१. 'अस्यापि चक्षिङादेशवत् क्शादित्वं द्रष्टव्यम् । इदमार्धधातुकविषयमिति आत्रेयादयः । अन्ये तु सामान्येन मन्यन्ते' इति मा.धा.वृत्तिः ।

२. अस्य धातोः आर्धधातुकरूपाणि न सन्ति । 'अयं सार्वधातुकमात्रविषयः' इति कौमुदी । 'आर्धधातुकोऽपि प्रयोगः अभ्युपगन्तव्यः भवति' इति उक्त्वा युक्तिं चापि प्रदर्श्य कृदन्तरूपमालायाम् अन्ते उच्यते - 'तृजन्ते परमनभिधानं कल्प्यते' इति । तदनुरोधेन इह आर्धधातुकरूपाणि अपि दर्शितानि ।

१०६१. प्रा - पूरणे । सकर्म, अनिट्, परस्मै ।

१. लट् - प्राति प्रातः प्रान्ति । प्रासि प्राथः प्राथ । प्रामि प्रावः प्रामः । **२. लिट्** - पप्रौ पप्रतुः पप्रुः । पप्रिथ-पप्राथ पप्रथुः पप्र । पप्रौ पप्रिव पप्रिम । **३. लुट्** - प्राता प्रातारौ प्रातारः । प्रातासि प्रातास्थः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्राताख्थ । प्रातास्मि प्रातास्वः प्रातास्मः । **४. लृट्** – प्रास्यति प्रास्यतः प्रास्यन्ति । प्रास्यसि प्रास्यथः प्रास्यथ । प्रास्यामि प्रास्यावः प्रास्यामः । **५. लोट्** – प्रातु प्रातात् प्राताम् प्रान्तु । प्राहि-प्रातात् प्रातम् प्रात । प्राणि प्राम प्राम । **६. लङ्** – अप्रात् अप्राताम् अप्रान्-अप्रुः । अप्राः अप्रातम् अप्रात । अप्राम् अप्राव अप्राम । **७. विधिलिङ्** – प्रायात् प्रायाताम् प्रायुः । प्रायाः प्रायातम् प्रायात । प्रायाम् प्रायाव प्रायाम । **८. आशीर्लिङ्** – प्रायात् प्रायास्ताम् प्रायासुः । प्रायाः प्रायास्तम् प्रायास्त । प्रायासम् प्रायास्व प्रायास्म । **९. लुङ्** – अप्रासीत् अप्रासिष्टाम् अप्रासिषुः । अप्रासीः अप्रासिष्टम् अप्रासिष्ट । अप्रासिषम् अप्रासिष्व अप्रासिष्म । **१०. लृङ्** – अप्रास्यत् अप्रास्यताम् अप्रास्यन् । अप्रास्यः अप्रास्यतम् अप्रास्यत । अप्रास्यम् अप्रास्याव अप्रास्याम ।

णिचि – प्रापयति – ते, **सनि** – पिप्रासति, **यकि** – प्रायते

१०६२. मा – माने । अकर्म[1], अनिट्, परस्मै । 'मिमीते मायते माने माति तत्रैव शब्लुकि' (श्लो. ९) इति देवः । 'मानम् = वर्तनम्' इति क्षीरस्वामी । 'आधेयस्याधाराद् अनधिकपरिमाणता अत्र मानम्' इति पुरुषकारः ।

१. लट् – माति मातः मान्ति । मासि माथः माथ । मामि मावः मामः । **२. लिट्** – ममौ ममतुः ममुः । ममिथ-ममाथ ममथुः मम । ममौ ममिव ममिम । **३. लुट्** – माता मातारौ मातारः । मातासि मातास्थः मातास्थ । मातास्मि मातास्वः मातास्मः । **४. लृट्** – मास्यति मास्यतः मास्यन्ति । मास्यसि मास्यथः मास्यथ । मास्यामि मास्यावः मास्यामः । **५. लोट्** – मातु मातात् माताम् मान्तु । माहि-मातात् मातम् मात । मानि माम माम । **६. लङ्** – अमात् अमाताम् अमान्-अमुः । अमाः अमातम् अमात । अमाम् अमाव अमाम । **७. विधिलिङ्** – मायात् मायाताम् मायुः । मायाः मायातम् मायात । मायाम् मायाव मायाम । **८. आशीर्लिङ्** – मायात् मायास्ताम् मायासुः । मायाः मायास्तम् मायास्त । मायासम् मायास्व मायास्म । **९. लुङ्** – अमासीत् अमासिष्टाम् अमासिषुः । अमासीः अमासिष्टम् अमासिष्ट । अमासिषम् अमासिष्व अमासिष्म । **१०. लृङ्** – अमास्यत् अमास्यताम् अमास्यन् । अमास्यः अमास्यतम् अमास्यत । अमास्यम् अमास्याव अमास्याम ।

णिचि – मापयति – ते, **सनि** – मित्सति[2], **यकि** – मीयते[3] ।

१. 'मानमिह अन्तर्भावः । अत्रायम् अकर्मकः । गृहं निर्माति इत्यादौ सकर्मकत्वम् उपसर्गवशात् अर्थान्तरवृत्त्या वा' इति मा.धा.वृत्तिः । बालमनोरमायाम् उच्यते – अकर्मकः । माति घृतं पात्रेऽस्मिन् इति भावः । परिमितं भवति इत्यर्थः । सङ्गृहीतं भवति इति यावत् । 'तनौ ममुस्तत्र न कैटभद्विषः...' (माघकाव्ये) । अर्थान्तरे सकर्मकः । 'उदरं परिमाति मुष्टिना...' (नैषधकाव्ये)

२. 'सनि मीमा..' इति अचः इस् ।

३. 'घुमास्थागापाजहातिसां हलि' इति ईत् ।

१०६३. वच – परिभाषणे । द्विकर्म, अनिट्, परस्मै । 'वक्तीति भाषणे वा णौ वाचयेत् वचतीति वा' (श्लो. ५१) इति देवः । 'भाषणे' इति क्षीरस्वामि-मैत्रेय-चन्द्र-शाकटायन-हेमचन्द्रादयः । 'पारायणिकैर्नाधीतः अयम्' इति तरङ्गिण्याम् उक्तम् ।

१. लट् – वक्ति वक्तः[1] ..... [2], [3] । वक्षि वक्थः वक्थ । वच्मि वच्वः वच्मः । **२. लिट्** – उवाच ऊचतुः ऊचुः । उवचिथ-उवक्थ ऊचथुः ऊच । उवाच-उवच ऊचिव ऊचिम । **३. लुट्** – वक्ता वक्तारौ वक्तारः । वक्तासि वक्तास्थः वक्तास्थ । वक्तास्मि वक्तास्वः वक्तास्मः । **४. लृट्** – वक्ष्यति वक्ष्यतः [1]..... । वक्ष्यसि वक्ष्यथः वक्ष्यथ । वक्ष्यामि वक्ष्यावः वक्ष्यामः । **५. लोट्** – वक्तु, वक्तात् वक्ताम् [1]..... । वग्धि, वक्तात् वक्तम् वक्त । वचानि वचाव वचाम । **६. लङ्** – अवक्-ग् अवक्ताम् [1]..... । अवक्-ग् अवक्तम् अवक्त । अवचम् अवच्व अवच्म । **७. विधिलिङ्** – वच्यात् वच्याताम् वच्युः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वच्याः वच्यातम् वच्यात । वच्याम् वच्याव वच्याम । **८. आशीर्लिङ्** – उच्यात् उच्यास्ताम् उच्यासुः । उच्याः उच्यास्तम् उच्यास्त । उच्यासम् उच्यास्व उच्यास्म । **९. लुङ्** – अवोचत् अवोचताम् अवोचन् । अवोचः अवोचतम् अवोचत । अवोचम् अवोचाव अवोचाम । **१०. लृङ्** – अवक्ष्यत् अवक्ष्यताम्[1] ..... । अवक्ष्यः अवक्ष्यतम् अवक्ष्यत । अवक्ष्यम् अवक्ष्याव अवक्ष्याम ।

णिचि – वाचयति – ते, **सनि** – विवक्षति, **यकि** – उच्यते ।

१. अयम् अन्तिपरः न प्रयुज्यते इति कौमुदी । 'लटि प्रथमपुरुषबहुवचनं नास्तीत्यर्थः' इति बालमनोरमा । किन्तु तत्त्वबोधिनी वदति – 'तथा च वचन्ति, वक्ष्यन्ति, वचन्तु, अवचन्, अवोचन्, अवक्ष्यन् इत्येतेऽसाधवः' इति । अतः तानि रूपाणि अत्र न दत्तानि ।

२. बहुवचनपरः न प्रयुज्यते इत्यन्ये । 'अस्मिन् पक्षे पुरुषत्रये बहुवचनं नास्तीति भावः' इति बालमनोरमा । अयं पक्षः अत्र न आदृतः ।

३. झिपरः न प्रयुज्यते इति अपरे । 'अस्मिन् पक्षे लिडादिष्वपि बहुवचनं नास्ति इति भावः' इति बालमनोरमा । अयम् अपि पक्षः अत्र न आदृतः ।

१०६४. विद – ज्ञाने । सकर्म, सेट्, परस्मै । 'सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे' (श्लो.१११) इति देवः । 'मतौ' इति वोपदेवः ।

१. लट् – (i) वेत्ति वित्तः विदन्ति । वेत्सि वित्थः वित्थ । वेद्मि विद्वः विद्मः । (ii) वेद[1] विदतुः विदुः । वेत्थ विदथुः विद । वेद विद्व विद्म । **२. लिट्** – (i) विवेद विविदतुः विविदुः । विवेदिथ विविदथुः विविद । विवेद विविदिव विविदिम । (ii) विदाञ्चकार[2] विदाञ्चक्रतुः विदाञ्चक्रुः । विदाञ्चकर्थ विदाञ्चक्रथुः विदाञ्चक्र । विदाञ्चकार/विदाञ्चकर विदाञ्चकृव विदाञ्चकृम । (iii) विदाम्बभूव विदाम्बभूवतुः विदाम्बभूवुः । विदाम्बभूविथ विदाम्बभूवथुः विदाम्बभूव । विदाम्बभूव विदाम्बभूविव विदाम्बभूविम (iv) विदामास विदामासतुः विदामासुः । विदामासिथ विदामासथुः विदामास । विदामास विदामासिव विदामासिम । **३. लुट्** – वेदिता वेदितारौ वेदितारः । वेदितासि वेदितास्थः वेदितास्थ । वेदितास्मि वेदितास्वः वेदितास्मः । **४. लृट्** – वेदिष्यति वेदिष्यतः वेदिष्यन्ति । वेदिष्यसि वेदिष्यथः वेदिष्यथ । वेदिष्यामि वेदिष्यावः वेदिष्यामः । **५. लोट्** – (i) वेत्तु, वित्तात् वित्ताम् विदन्तु । विद्धि, वित्तात् वित्तम् वित्त । वेदानि वेदाव वेदाम । (ii) विदाङ्करोतु[3] विदाङ्कुरुतात् विदाङ्कुरुताम् विदाङ्कुर्वन्तु । विदाङ्कुरु, विदाङ्कुरुतात् विदाङ्कुरुतम् विदाङ्कुरुत । विदाङ्करवाणि विदाङ्करवाव विदाङ्करवाम । **६. लङ्** – अवेत्-द् अवित्ताम् अविदुः । अवेः[4] – अवेत् अवित्तम् अवित्त । अवेदम् अविद्व अविद्म । **७. विधिलिङ्** – विद्यात् विद्याताम् विद्युः । विद्याः विद्यातम् विद्यात । विद्याम् विद्याव विद्याम । **८. आशीर्लिङ्** – विद्यात् विद्यास्ताम् विद्यासुः । विद्याः विद्यास्तम् विद्यास्त । विद्यासम् विद्यास्व विद्यास्म । **९. लुङ्** – अवेदीत् अवेदिष्टाम् अवेदिषुः । अवेदीः अवेदिष्टम् अवेदिष्ट । अवेदिषम् अवेदिष्व अवेदिष्म । **१०. लृङ्** – अवेदिष्यत् अवेदिष्यताम् अवेदिष्यन् । अवेदिष्यः अवेदिष्यतम् अवेदिष्यत । अवेदिष्यम् अवेदिष्याव अवेदिष्याम ।

णिचि – वेदयति – ते, **सनि** – विविदिषति[5], **यकि** – विद्यते

१. 'विदो लटो वा' – वेत्तेः लटः परस्मैपदानां णलादयः वा स्युः ।

२. 'उषविदजागृभ्योऽन्यतरस्याम्' इति वा आम् ।

३. 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' – वेत्तेः लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते ।

४. 'दश्च' (धातोर्दान्तस्य पदस्य सिपि परे रुः स्याद्वा) इति दकारस्य रुत्वविकल्पः ।

५. 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' इति सनः कित्त्वात् लघूपधगुणाभावः ।

१०६५. अस – भुवि । अकर्म, सेट्, परस्मै । 'असतेऽसति गत्यादौ भुव्यस्ति, क्षेपणेऽस्यति' (१८४) इति देवः ।

१. लट् – अस्ति स्तः सन्ति । असि स्थः स्थ । अस्मि स्वः स्मः । **२. लिट्** – बभूव[1] बभूवतुः बभूवुः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बभूविथ बभूवथुः बभूव । बभूव बभूविव बभूविम । **३. लुट्** – भविता भवितारौ भवितारः । भवितासि भवितास्थः भवितास्थ । भवितास्मि भवितास्वः भवितास्मः । **४. लृट्** – भविष्यति भविष्यतः भविष्यन्ति । भविष्यसि भविष्यथः भविष्यथ । भविष्यामि भविष्यावः भविष्यामः । **५. लोट्** – अस्तु, स्तात् स्ताम् सन्तु । एधि[२], स्तात् स्तम् स्त । असानि असाव असाम । **६. लङ्** – आसीत् आस्ताम् आसन् । आसीः आस्तम् आस्त । आसम् आस्व आस्म । **७. विधिलिङ्** – स्यात् स्याताम् स्युः । स्याः स्यातम् स्यात । स्याम् स्याव स्याम । **८. आशीर्लिङ्** – भूयात् भूयास्ताम् भूयासुः । भूयाः भूयास्तम् भूयास्त । भूयासम् भूयास्व भूयास्म । **९. लुङ्** – अभूत् अभूताम् अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम । **१०. लृङ्** – अभविष्यत् अभविष्यताम् अभविष्यन् । अभविष्यः अभविष्यतम् अभविष्यत । अभविष्यम् अभविष्याव अभविष्याम ।

णिचि – भावयति – ते, **सनि** – बुभूषति, **यकि** – भूयते ।

१. 'अस्तेर्भूः' – अस्तेर्भूभावः स्यात् आर्धधातुके ।

२. 'घ्वसोरेद्धावभ्यासलोपश्च' इति एत्वम् ।

१०६६. मृजू[१] – शुद्धौ । सकर्म, वेट्, परस्मै । 'शौचालङ्कारयोर्वा णौ मृजेर्मार्जति मार्जयेत् । मार्ष्टि शुद्धौ तथा मार्जेः शब्दार्थन्मार्जयेण्णिचि' इति देवः ।

१. लट् – मार्ष्टि मृष्टः मृजन्ति-मार्जन्ति[२] । मार्क्षि मृष्ठः मृष्ठ । मार्ज्मि मृज्वः मृज्मः । **२. लिट्** – ममार्ज ममार्जतुः-ममृजतुः ममार्जुः-ममृजुः । ममार्जिथ- ममार्ष्ठ ममार्जथुः-ममृजथुः ममार्ज-ममृज । ममार्ज ममार्जिव-ममृजिव-ममृज्व ममार्जिम-ममृजिम-ममृज्म । **३. लुट्** – (i) मार्जिता[३] मार्जितारौ मार्जितारः । मार्जितासि मार्जितास्थः मार्जितास्थ । मार्जितास्मि मार्जितास्वः मार्जितास्मः । (ii) मार्ष्टा मार्ष्टारौ मार्ष्टारः । मार्ष्टासि मार्ष्टास्थः मार्ष्टास्थ । मार्ष्टास्मि मार्ष्टास्वः मार्ष्टास्मः । **४. लृट्** – (i) मार्जिष्यति मार्जिष्यतः मार्जिष्यन्ति । मार्जिष्यसि मार्जिष्यथः मार्जिष्यथ । मार्जिष्यामि मार्जिष्यावः मार्जिष्यामः । (ii) मार्क्ष्यति मार्क्ष्यतः मार्क्ष्यन्ति । मार्क्ष्यसि मार्क्ष्यथः मार्क्ष्यथ । मार्क्ष्यामि मार्क्ष्यावः मार्क्ष्यामः । **५. लोट्** – मार्ष्टु, मृष्टात् मृष्टाम् मृजन्तु-मार्जन्तु । मृड्ढि, मृष्टात् मृष्टम् मृष्ट । मार्जानि मार्जाव मार्जाम । **६. लङ्** – अमार्ट्-र्ड् अमृष्टाम् अमृजन्-अमार्जन् । अमार्ट्-र्ड् अमृष्टम् अमृष्ट । अमार्जम् अमृज्व अमृज्म । **७. विधिलिङ्** – मृज्यात् मृज्याताम् मृज्युः । मृज्याः मृज्यातम् मृज्यात । मृज्याम् मृज्याव मृज्याम । **८. आशीर्लिङ्** – मृज्यात् मृज्यास्ताम् मृज्यासुः । मृज्याः मृज्यास्तम् मृज्यास्त । मृज्यासम् मृज्यास्व मृज्यास्म । **९. लुङ्** – (i) अमार्जीत् अमार्जिष्टाम् अमार्जिषुः । अमार्जीः अमार्जिष्टम् अमार्जिष्ट । अमार्जिषम् अमार्जिष्व अमार्जिष्म । (ii) अमार्क्षीत् अमार्ष्टाम् अमार्क्षुः । अमार्क्षीः अमार्ष्टम् अमार्ष्ट । अमार्क्षम् अमार्क्ष्व अमार्क्ष्म । **१०. लृङ्** – (i) अमार्जिष्यत् अमार्जिष्यताम् अमार्जिष्यन् । अमार्जिष्यः अमार्जिष्यतम् अमार्जिष्यत । अमार्जिष्यम् अमार्जिष्याव अमार्जिष्याम । (ii) अमार्क्ष्यत् अमार्क्ष्यताम् अमार्क्ष्यन् । अमार्क्ष्यः अमार्क्ष्यतम् अमार्क्ष्यत । अमार्क्ष्यम् अमार्क्ष्याव अमार्क्ष्याम ।

णिचि – मार्जयति-ते, **सनि** – मिमृक्षति/मिमार्जिषति[४], **यकि** – मृज्यते

१. बालमनोरमायुक्तायां कौमुद्यां 'मृजूष्' इति षिद्घटितः पाठः दृश्यते । व्याख्याने लिख्यते – 'वस्तुतस्तु भिदादिगणे मृजाशब्दपाठादेव सिद्धेरिह षित्करणमनार्षमित्याहुः' इति । तत्त्वबोधिन्याम् अपि षित्करणं खण्ड्यते । पुरुषकारेणापि ।

२. मृजेर्वृद्धिः क्ङित्यजादौ वेश्यते ।

३. 'स्वरतिसूतिसूयतिधूञूदितो वा' इति इड्विकल्पः ।

४. 'रलो व्युपधात्....' इति विकल्पेन कित्त्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०६७. रुदिर् – अश्रुविमोचने । अकर्म, सेट्, परस्मै, (रुदादिः) ।

१. लट् – रोदिति[1] रुदितः रुदन्ति । रोदिषि रुदिथः रुदिथ । रोदिमि रुदिवः रुदिमः । **२. लिट्** – रुरोद रुरुदतुः रुरुदुः । रुरोदिथ रुरुदथुः रुरुद । रुरोद रुरुदिव रुरुदिम । **३. लुट्** – रोदिता रोदितारौ रोदितारः । रोदितासि रोदितास्थः रोदितास्थ । रोदितास्मि रोदितास्वः रोदितास्मः । **४. लृट्** – रोदिष्यति रोदिष्यतः रोदिष्यन्ति । रोदिष्यसि रोदिष्यथः रोदिष्यथ । रोदिष्यामि रोदिष्यावः रोदिष्यामः । **५. लोट्** – रोदितु, रुदितात् रुदिताम् रुदन्तु । रुदिहि, रुदितात् रुदितम् रुदित । रोदानि रोदाव रोदाम । **६. लङ्** – अरोदीत्-अरोदत्[2] अरुदिताम् अरुदन् । अरोदीः-अरोदः अरुदितम् अरुदित । अरोदम् अरुदिव अरुदिम । **७. विधिलिङ्** – रुद्यात् रुद्याताम् रुद्युः । रुद्याः रुद्यातम् रुद्यात । रुद्याम् रुद्याव रुद्याम ।

८. आशीर्लिङ् – रुद्यात् रुद्यास्ताम् रुद्यासुः । रुद्याः रुद्यास्तम् रुद्यास्त । रुद्यासम् रुद्यास्व रुद्यास्म ।

९. लुङ् – (i) अरुदत्[3] अरुदताम् अरुदन् । अरुदः अरुदतम् अरुदत । अरुदम् अरुदाव अरुदाम । (ii) अरोदीत् अरोदिष्टाम् अरोदिषुः । अरोदीः अरोदिष्टम् अरोदिष्ट । अरोदिषम् अरोदिष्व अरोदिष्म ।

१०. लृङ् – अरोदिष्यत् अरोदिष्यताम् अरोदिष्यन् । अरोदिष्यः अरोदिष्यतम् अरोदिष्यत । अरोदिष्यम् अरोदिष्याव अरोदिष्याम ।

णिचि – रोदयति – ते, **सनि** – रुरुदिषति, **यकि** – रुद्यते ।

१. 'रुदादिभ्यः सार्वधातुके' – रुद्, स्वप्, श्वस् अन्, जक्ष् – एभ्यो वलादेः सार्वधातुकस्य इट् स्यात् ।

२. 'रुदश्च पञ्चभ्यः' – हलादेः पितः सार्वधातुकस्य अपृक्तस्य ईट् स्यात् । 'अड् गार्ग्यगालवयोः' – अनयोः मते रुदादिभ्यः पञ्चभ्यः परस्य हलादेः पितः सार्वधातुकापृक्तस्य अडागमः स्यात् ।

३. इरित्त्वात् अङ्पक्षे इदं रूपम् । अङभावपक्षे सिच् ।

१०६८. ञि ष्वप[1] – शये । अकर्म, अनिट्, परस्मै, (रुदादिः) ।

१. लट् – स्वपिति[2] स्वपितः स्वपन्ति । स्वपिषि स्वपिथः स्वपिथ । स्वपिमि स्वपिवः स्वपिमः । **२. लिट्** – सुष्वाप सुषुपतुः सुषुपुः । सुष्वपिथ-सुष्वप्थ सुषुपथुः सुषुप । सुष्वाप-सुष्वप सुषुपिव सुषुपिम । **३. लुट्** – स्वप्ता स्वप्तारौ स्वप्तारः । स्वप्तासि स्वप्तास्थः स्वप्तास्थ । स्वप्तास्मि स्वप्तास्वः स्वप्तास्मः । **४. लृट्** – स्वप्स्यति स्वप्स्यतः स्वप्स्यन्ति । स्वप्स्यसि स्वप्स्यथः स्वप्स्यथ । स्वप्स्यामि स्वप्स्यावः स्वप्स्यामः ।

५. लोट् – स्वपितु, स्वपितात् स्वपिताम् स्वपन्तु । स्वपिहि, स्वपितात् स्वपितम् स्वपित । स्वपानि स्वपाव स्वपाम । **६. लङ्** – अस्वपत्[3] – अस्वपीत् अस्वपिताम् अस्वपन् । अस्वपीः-अस्वपः अस्वपितम् अस्वपित । अस्वपम् अस्वपिव अस्वपिम । **७. विधिलिङ्** – स्वप्यात् स्वप्याताम् स्वप्युः । स्वप्याः स्वप्यातम् स्वप्यात । स्वप्याम् स्वप्याव स्वप्याम । **८. आशीर्लिङ्** – सुप्यात्[4] सुप्यास्ताम् सुप्यासुः । सुप्याः सुप्यास्तम् सुप्यास्त । सुप्यासम् सुप्यास्व सुप्यास्म । **९. लुङ्** – अस्वाप्सीत् अस्वाप्ताम् अस्वाप्सुः । अस्वाप्सीः अस्वाप्तम् अस्वाप्त । अस्वाप्सम् अस्वाप्स्व अस्वाप्स्म । **१०. लृङ्** – अस्वप्स्यत् अस्वप्स्यताम् अस्वप्स्यन् । अस्वप्स्यः अस्वप्स्यतम् अस्वप्स्यत । अस्वप्स्यम् अस्वप्स्याव अस्वप्स्याम ।

णिचि – स्वापयति – ते, **सनि** – सुषुप्सति, **यकि** – सुप्यते

१. ''ञि ष्वप – शये । 'हलन्त्यम्' (१.३.३) इति ईत्वप्रसङ्गात् 'ञि ष्वप् शये' इति अपपाठः इति धातुकाव्यव्याख्यायाम् । (२.५१) युज्यते चैतत् । यतः सर्वेषु अपि धातुपाठेषु 'ञि ष्वप् शये । उदात्तेत् । अनुदात्तः' इति पठ्यते । 'उदात्तेत्' इत्यस्य उदात्तोपदेशः अकारः इत्संज्ञकः अत्र इत्येव खलु अर्थः ? अतश्च प्रामादिकः सार्वत्रिकः 'ष्वप्' इति हलन्त्यपाठः इत्येव न्याय्यम् । अतः एव अपपाठः शोधितः धातुकाव्यव्याख्यातृमहाशयेन'' इति कृदन्तरूपमाला ।

२. 'रुदादिभ्यः सार्वधातुके' इति इट् ।

३. 'रुदश्च पञ्चभ्यः' इति ईट् । 'अड् गार्ग्यगालवयोः' इति अडागमः ।

४. 'वचिस्वपियजादीनां किति' इति सम्प्रसारणम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०६९. श्वस – प्राणने । अकर्म, सेट्, परस्मै, (रुदादिः) ।

१. लट् – श्वसिति[1] श्वसितः श्वसन्ति । श्वसिषि श्वसिथः श्वसिथ । श्वसिमि श्वसिवः श्वसिमः । **२. लिट्** – शश्वास शश्वसतुः शश्वसुः । शश्वसिथ शश्वसथुः शश्वस । शश्वास-शश्वस शश्वसिव शश्वसिम । **३. लुट्** – श्वसिता श्वसितारौ श्वसितारः । श्वसितासि श्वसितास्थः श्वसितास्थ । श्वसितास्मि श्वसितास्वः श्वसितास्मः । **४. लृट्** – श्वसिष्यति श्वसिष्यतः श्वसिष्यन्ति । श्वसिष्यसि श्वसिष्यथः श्वसिष्यथ । श्वसिष्यामि श्वसिष्यावः श्वसिष्यामः । **५. लोट्** – श्वसितु, श्वसितात् श्वसिताम् श्वसन्तु । श्वसिहि, श्वसितात् श्वसितम् श्वसित । श्वसानि श्वसाव श्वसाम । **६. लङ्** – अश्वसीत्-अश्वसत् अश्वसिताम् अश्वसन् । अश्वसीः-अश्वसः अश्वसितम् अश्वसित । अश्वसम् अश्वसिव अश्वसिम । **७. विधिलिङ्** – श्वस्यात्[2] श्वस्याताम् श्वस्युः । श्वस्याः श्वस्यातम् श्वस्यात । श्वस्याम् श्वस्याव श्वस्याम । **८. आशीर्लिङ्** – श्वस्यात् श्वस्यास्ताम् श्वस्यासुः । श्वस्याः श्वस्यास्तम् श्वस्यास्त । श्वस्यासम् श्वस्यास्व श्वस्यास्म । **९. लुङ्** – अश्वसीत्[3] अश्वसिष्टाम् अश्वसिषुः । अश्वसीः अश्वसिष्टम् अश्वसिष्ट । अश्वसिम् अश्वसिष्व अश्वसिष्म । **१०. लृङ्** – अश्वसिष्यत् अश्वसिष्यताम् अश्वसिष्यन् । अश्वसिष्यः अश्वसिष्यतम् अश्वसिष्यत । अश्वसिष्यम् अश्वसिष्याव अश्वसिष्याम ।

णिचि – श्वासयति – ते, **सनि** – शिश्वसिषति, **यकि** – श्वस्यते

१. 'रुदादिभ्यः सार्वधातुके' इति इट् ।

२. मा.धा. वृत्तौ गणकार्यस्य अनित्यत्वम् अवलम्ब्य 'श्वसेत् श्वसेताम् श्वसेयुः' इति रूपाणि दर्शितानि । 'आश्वस्यात् इत्याद्यपि भवति' इत्यपि तत्र उच्यते ।

३. 'ह्म्यन्तक्षणश्वस....' इति वृद्धिनिषेधः ।

१०७०. अन – प्राणने । अकर्म, सेट्, परस्मै, प्रपूर्वकोऽयं प्रायेण । (रुदादिः)

१. लट् – अनिति[1] अनितः अनन्ति । अनिषि अनिथः अनिथ । अनिमि अनिवः अनिमः । **२. लिट्** – आन आनतुः आनुः । आनिथ आनथुः आन । आन आनिव आनिम । **३. लुट्** – अनिता अनितारौ अनितारः । अनितासि अनितास्थः अनितास्थ । अनितास्मि अनितास्वः अनितास्मः । **४. लृट्** – अनिष्यति अनिष्यतः अनिष्यन्ति । अनिष्यसि अनिष्यथः अनिष्यथ । अनिष्यामि अनिष्यावः अनिष्यामः । **५. लोट्** – अनितु, अनितात् अनिताम् अनन्तु । अनिहि; अनितात् अनितम् अनित । अनानि अनाव अनाम । **६. लङ्** – आनीत्-आनत् आनिताम् आनन् । आनीः-आनः आनितम् आनित । आनम् आनिव आनिम । **७. विधिलिङ्** – अन्यात् अन्याताम् अन्युः । अन्याः अन्यातम् अन्यात । अन्याम् अन्याव अन्याम । **८. आशीर्लिङ्** – अन्यात् अन्यास्ताम् अन्यासुः । अन्याः अन्यास्तम् अन्यास्त । अन्यासम् अन्यास्व अन्यास्म । **९. लुङ्** – आनीत् आनिष्टाम् आनिषुः । आनीः आनिष्टम् आनिष्ट । आनिषम् आनिष्व आनिष्म । **१०. लृङ्** – आनिष्यत् आनिष्यताम् आनिष्यन् । आनिष्यः आनिष्यतम् आनिष्यत । आनिष्यम् आनिष्याव आनिष्याम ।

णिचि – प्राणयति, **सनि** – प्राणिणिषति[2], **यकि** – अन्यते ।

१. 'रुदादिभ्यः सार्वधातुके' इति इट् ।

२. 'उभौ साभ्यासस्य' – उपसर्गस्थात् निमित्तात् परस्य साभ्यासस्य अनितेः उभौ नकारौ णत्वं प्राप्नुतः ।

१०७१. जक्ष – भक्षहसनयोः । सकर्म, भक्षणे सकर्मकः, अन्यत्र अकर्मकः । सेट्, परस्मै, (रुदादिः)

१. लट् – जक्षिति जक्षितः जक्षति[1] । जक्षिषि जक्षिथः जक्षिथ । जक्षिमि जक्षिवः जक्षिमः । **२. लिट्** – जजक्ष जजक्षतुः जजक्षुः । जजक्षिथ जजक्षथुः जजक्ष । जजक्ष जजक्षिव जजक्षिम । **३. लुट्** – जक्षिता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जक्षितारौ जक्षितारः । जक्षितासि जक्षितास्थः जक्षितास्थ । जक्षितास्मि जक्षितास्वः जक्षितास्मः । **४. लृट्** - जक्षिष्यति जक्षिष्यतः जक्षिष्यन्ति । जक्षिष्यसि जक्षिष्यथः जक्षिष्यथ । जक्षिष्यामि जक्षिष्यावः जक्षिष्यामः । **५. लोट्** - जक्षितु, जक्षितात् जक्षिताम् जक्षन्तु । जक्षिहि, जक्षितात् जक्षितम् जक्षित । जक्षाणि जक्षाव जक्षाम । **६. लङ्** - अजक्षीत्-अजक्षत् अजक्षिताम् अजक्षुः । अजक्षीः-अजक्षः अजक्षितम् अजक्षित । अजक्षम् अजक्षिव अजक्षिम । **७. विधिलिङ्** - जक्ष्यात् जक्ष्याताम् जक्ष्युः । जक्ष्याः जक्ष्यातम् जक्ष्यात । जक्ष्याम् जक्ष्याव जक्ष्याम । **८. आशीर्लिङ्** - जक्ष्यात् जक्ष्यास्ताम् जक्ष्यासुः । जक्ष्याः जक्ष्यास्तम् जक्ष्यास्त । जक्ष्यासम् जक्ष्यास्व जक्ष्यास्म । **९. लुङ्** - अजक्षीत् अजक्षिष्टाम् अजक्षिषुः । अजक्षीः अजक्षिष्टम् अजक्षिष्ट । अजक्षिषम् अजक्षिष्व अजक्षिष्म । **१०. लृङ्** - अजक्षिष्यत् अजक्षिष्यताम् अजक्षिष्यन् । अजक्षिष्यः अजक्षिष्यतम् अजक्षिष्यत । अजक्षिष्यम् अजक्षिष्याव अजक्षिष्याम ।

णिचि - जक्षयति[२], **सनि** - जिजक्षिषति, **यकि** - जक्ष्यते ।

१. 'जक्षित्यादयः षट्' - षड् धातवः, जक्षितिश्च सप्तमः एतेऽभ्यस्तसंज्ञाः स्युः । 'अदभ्यस्तात्' - अभ्यस्तात् परस्य झस्य अत् स्यात् ।

२. भक्षणार्थकत्वात् णौ 'निगरणचलनार्थेभ्यश्च' इति नित्यपरस्मैपदित्वम् ।

१०७२. जागृ - निद्राक्षये । अकर्म, सेट्, परस्मै,

१. लट् - जागर्ति जागृतः जाग्रति । जागर्षि जागृथः जागृथ । जागर्मि जागृवः जागृमः । **२. लिट्** - (i) जजागर जजागरतुः जजागरुः । जजागरिथ जजागरथुः जजागर । जजागर-जजगर जजागरिव जजागरिम । (ii) जागराञ्चकार[१] जागराञ्चक्रतुः जागराञ्चक्रुः । जागराञ्चकर्थ जागराञ्चक्रथुः जागराञ्चक्र । जागराञ्चकार/जागराञ्चकर जागराञ्चकृव जागराञ्चकृम । (iii) जागराम्बभूव जागराम्बभूवतुः जागराम्बभूवुः । जागराम्बभूविथ जागराम्बभूवथुः जागराम्बभूव । जागराम्बभूव जागराम्बभूविव जागराम्बभूविम । (iv) जागरामास जागरामासतुः जागरामासुः । जागरामासिथ जागरामासथुः जागरामास । जागरामास जागरामासिव जागरामासिम । **३. लुट्** - जागरिता जागरितारौ जागरितारः । जागरितासि जागरितास्थः जागरितास्थ । जागरितास्मि जागरितास्वः जागरितास्मः । **४. लृट्** - जागरिष्यति जागरिष्यतः जागरिष्यन्ति । जागरिष्यसि जागरिष्यथः जागरिष्यथ । जागरिष्यामि जागरिष्यावः जागरिष्यामः । **५. लोट्** - जागर्तु, जागृतात् जागृताम् जाग्रतु । जागृहि, जागृतात् जागृतम् जागृत । जागराणि जागराव जागराम । **६. लङ्** - अजागः अजागृताम् अजागरुः[२] । अजागः अजागृतम् अजागृत । अजागरम् अजागृव अजागृम । **७. विधिलिङ्** - जागृयात् जागृयाताम् जागृयुः । जागृयाः जागृयातम् जागृयात । जागृयाम् जागृयाव जागृयाम । **८. आशीर्लिङ्** - जागर्यात् जागर्यास्ताम् जागर्यासुः । जागर्याः जागर्यास्तम् जागर्यास्त । जागर्यासम् जागर्यास्व जागर्यास्म । **९. लुङ्** - अजागरीत् अजागरिष्टाम् अजागरिषुः । अजागरीः अजागरिष्टम् अजागरिष्ट । अजागरिषम् अजागरिष्व अजागरिष्म । **१०. लृङ्** - अजागरिष्यत् अजागरिष्यताम् अजागरिष्यन् । अजागरिष्यः अजागरिष्यतम् अजागरिष्यत । अजागरिष्यम् अजागरिष्याव अजागरिष्याम ।

णिचि - जागरयति - ते, **सनि** - जिजागरिषति, **यकि** - जागर्यते ।

१. 'उषविदजागृभ्योऽन्यतरस्याम्' इति वा आम् ।

२. 'जुसि च' - अजादौ जुसि इगन्तस्याङ्गस्य गुणः स्यात् ।

१०७३. दरिद्रा - दुर्गतौ । अकर्म, सेट्, परस्मै, जक्षित्यादिः । दुर्गतिः धनहीनीभवनम् ।

१. लट् - दरिद्राति दरिद्रितः[१] दरिद्रति । दरिद्रासि दरिद्रिथः दरिद्रिथ । दरिद्रामि दरिद्रिवः दरिद्रिमः । **२. लिट्** - (i) ददरिद्रौ ददरिद्रतुः ददरिद्रुः । ददरिद्रिथ ददरिद्रथुः ददरिद्र । ददरिद्रौ ददरिद्रिव ददरिद्रिम । (ii) दरिद्राञ्चकार[२] दरिद्राञ्चक्रतुः दरिद्राञ्चक्रुः । दरिद्राञ्चकर्थ दरिद्राञ्चक्रथुः दरिद्राञ्चक्र । दरिद्राञ्चकार/

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दरिद्राञ्चकर दरिद्राञ्चकृव दरिद्राञ्चकृम । (iii) दरिद्राम्बभूव दरिद्राम्बभूवतुः दरिद्राम्बभूवुः । दरिद्राम्बभूविथ दरिद्राम्बभूवथुः दरिद्राम्बभूव । दरिद्राम्बभूव दरिद्राम्बभूविव दरिद्राम्बभूविम । (iv) दरिद्रामास दरिद्रामासतुः दरिद्रामासुः । दरिद्रामासिथ दरिद्रामासथुः दरिद्रामास । दरिद्रामास दरिद्रामासिव दरिद्रामासिम । **३. लुट्** – दरिद्रिता दरिद्रितारौ दरिद्रितारः । दरिद्रितासि दरिद्रितास्थः दरिद्रितास्थ । दरिद्रितास्मि दरिद्रितास्वः दरिद्रितास्मः । **४. लृट्** – दरिद्रिष्यति दरिद्रिष्यतः दरिद्रिष्यन्ति । दरिद्रिष्यसि दरिद्रिष्यथः दरिद्रिष्यथ । दरिद्रिष्यामि दरिद्रिष्यावः दरिद्रिष्यामः । **५. लोट्** – दरिद्रातु, दरिद्रितात् दरिद्रिताम् दरिद्रतु । दरिद्रिहि, दरिद्रितात् दरिद्रितम् दरिद्रित । दरिद्राणि दरिद्राव दरिद्राम । **६. लङ्** – अदरिद्रात् अदरिद्रिताम् अदरिद्रुः । अदरिद्राः अदरिद्रितम् अदरिद्रित । अदरिद्राम् अदरिद्रिव अदरिद्रिम । **७. विधिलिङ्** – दरिद्रियात् दरिद्रियाताम् दरिद्रियुः । दरिद्रियाः दरिद्रियातम् दरिद्रियात । दरिद्रियाम् दरिद्रियाव दरिद्रियाम । **८. आशीर्लिङ्** – दरिद्र्यात् दरिद्र्यास्ताम् दरिद्र्यासुः । दरिद्र्याः दरिद्र्यास्तम् दरिद्र्यास्त । दरिद्र्यासम् दरिद्र्यास्व दरिद्र्यास्म । **९. लुङ्** – (i) अदरिद्रीत् अदरिद्रिष्टाम् अदरिद्रिषुः । अदरिद्रीः अदरिद्रिष्टम् अदरिद्रिष्ट । अदरिद्रिषम् अदरिद्रिष्व अदरिद्रिष्म । (ii) अदरिद्रासीत् अदरिद्रासिष्टाम् अदरिद्रासिषुः । अदरिद्रासीः अदरिद्रासिष्टम् अदरिद्रासिष्ट । अदरिद्रासिषम् अदरिद्रासिष्व अदरिद्रासिष्म । **१०. लृङ्** – अदरिद्रिष्यत् अदरिद्रिष्यताम् अदरिद्रिष्यन् । अदरिद्रिष्यः अदरिद्रिष्यतम् अदरिद्रिष्यत । अदरिद्रिष्यम् अदरिद्रिष्याव अदरिद्रिष्याम ।

णिचि – दरिद्रयति-ते, **सनि** – दिदरिद्रासति/दिदरिद्रिषति[३], **यकि** – दरिद्र्यते

१. 'इद्दरिद्रस्य' इति दरिद्रातेः इकारः हलादौ ङिति सार्वधातुके ।

२. अनेकाच्त्वात् आम् । आमभावपक्षे 'आत णौ णलः' इति औकारः ।

३. 'दिदरिद्रिषतीत्येके, दिदरिद्रासतीति वा' (भाष्येष्टिः – ६.४.११४) इति वचनात् अस्माद्धातोः सनि इड्विकल्पः भवति इति ज्ञायते ।

१०७४. चकासृ – दीप्तौ । अकर्म, सेट्, परस्मै ।

१. लट् – चकास्ति चकास्तः चकासति । चकास्सि चकास्थः चकास्थ । चकास्मि चकास्वः चकास्मः ।

२. लिट् – (i) चकासाञ्चकार चकासाञ्चक्रतुः चकासाञ्चक्रुः । चकासाञ्चकर्थ चकासाञ्चक्रथुः चकासाञ्चक्र । चकासाञ्चकार/चकासाञ्चकर चकासाञ्चकृव चकासाञ्चकृम । (ii) चकासाम्बभूव चकासाम्बभूवतुः चकासाम्बभूवुः । चकासाम्बभूविथ चकासाम्बभूवथुः चकासाम्बभूव । चकासाम्बभूव चकासाम्बभूविव चकासाम्बभूविम । (iii) चकासामास चकासामासतुः चकासामासुः । चकासामासिथ चकासामासथुः चकासामास । चकासामास चकासामासिव चकासामासिम । **३. लुट्** – चकासिता चकासितारौ चकासितारः । चकासितासि चकासितास्थः चकासितास्थ । चकासितास्मि चकासितास्वः चकासितास्मः । **४. लृट्** – चकासिष्यति चकासिष्यतः चकासिष्यन्ति । चकासिष्यसि चकासिष्यथः चकासिष्यथ । चकासिष्यामि चकासिष्यावः चकासिष्यामः । **५. लोट्** – चकास्तु, चकास्तात् चकास्ताम् चकासतु । चकाधि-चकाद्धि[१], चकास्तात् चकास्तम् चकास्त । चकासानि चकासाव चकासाम । **६. लङ्** – अचकात्-द् अचकास्ताम् अचकासुः । अचकाः[१]–अचकाद्-त् अचकास्तम् अचकास्त । अचकासम् अचकास्व अचकास्म । **७. विधिलिङ्** – चकास्यात् चकास्यायाम् चकास्युः । चकास्याः चकास्यातम् चकास्यात । चकास्याम् चकास्याव चकास्याम । **८. आशीर्लिङ्** – चकास्यात् चकास्यास्ताम् चकास्यासुः । चकास्याः चकास्यास्तम् चकास्यास्त । चकास्यासम् चकास्यास्व चकास्यास्म । **९. लुङ्** – अचकासीत् अचकासिष्टाम् अचकासिषुः । अचकासीः अचकासिष्टम् अचकासिष्ट । अचकासिषम् अचकासिष्व अचकासिष्म । **१०. लृङ्** – अचकासिष्यत् अचकासिष्यताम् अचकासिष्यन् । अचकासिष्यः अचकासिष्यतम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अचकासिष्यत । अचकासिष्यम् अचकासिष्याव अचकासिष्याम ।

णिचि – चकासयति – ते, **सनि** – चिचकासिषति, **यकि** – चकास्यते

१. ''केचित्सकारस्य दत्वमुदाहरन्ति । तत् 'यथा तु भाष्यं तथा चकाधीत्येव भवितव्यम्' इति वृत्तिकारेणैव प्रत्युक्तम्'' इति मा.धा.वृत्तिः ।

२. 'सिपि धातोः रुर्वा' इति सस्य वा रुः ।

१०७५. शासु – अनुशिष्टौ । द्विकर्म, सेट्, परस्मै । 'अनुशिष्टिः नियोगः' इति क्षीरस्वामी । 'आत्रेय-मैत्रेय-स्वामि-काश्यपाः अमुमुदितं पठन्ति । वर्धमान-सम्मताकार-हरदत्त-गर्गादयः अनुदितं पठन्ति' इति माधवः । 'इच्छायाम् आशास्ते, शास्ति शासने' (श्लो. १८४) इति देवः ।

१. लट् – शास्ति शिष्टः शासति । शास्सि शिष्ठः शिष्ठ । शास्मि शिष्वः शिष्मः । **२. लिट्** – शशास शशासतुः शशासुः । शशासिथ शशासथुः शशास । शशास शशासिव शशासिम । **३. लुट्** – शासिता शासितारौ शासितारः । शासितासि शासितास्थः शासितास्थ । शासितास्मि शासितास्वः शासितास्मः । **४. लृट्** – शासिष्यति शासिष्यतः शासिष्यन्ति । शासिष्यसि शासिष्यथः शासिष्यथ । शासिष्यामि शासिष्यावः शासिष्यामः । **५. लोट्** – शास्तु, शिष्टात् शिष्टाम् शासतु । शाधि, शिष्टात् शिष्टम् शिष्ट । शासानि शासाव शासाम । **६. लङ्** – अशात्-द् अशिष्टाम् अशासुः । अशात्-अशाः अशिष्टम् अशिष्ट । अशासम् अशिष्व अशिष्म । **७. विधिलिङ्** – शिष्यात् शिष्याताम् शिष्युः । शिष्याः शिष्यातम् शिष्यात । शिष्याम् शिष्याव शिष्याम । **८. आशीर्लिङ्** – शिष्यात् शिष्यास्ताम् शिष्यासुः । शिष्याः शिष्यास्तम् शिष्यास्त । शिष्यासम् शिष्यास्व शिष्यास्म । **९. लुङ्** – अशिषत्[1] अशिषताम् अशिषन् । अशिषः अशिषतम् अशिषत । अशिषम् अशिषाव अशिषाम । **१०. लृङ्** – अशासिष्यत् अशासिष्यताम् अशासिष्यन् । अशासिष्यः अशासिष्यतम् अशासिष्यत । अशासिष्यम् अशासिष्याव अशासिष्याम ।

णिचि – शासयति – ते, **सनि** – शिशासिषति, **यकि** – शिष्यते[2]

१. 'सर्तिशास्त्यार्तिभ्यश्च' – एभ्यः च्लेः अङ् स्यात् ।

२. 'शास इदङ्हलोः' (शास उपधायाः इत् स्यात् अङि हलादौ क्ङिति च) इति इत् ।

१०७६. दीधीङ् – दीप्तिदेवनयोः[1] । सकर्मकः, सेट्, आत्मने, धातुरयं छान्दसः । देवनम् – क्रीडाविजिगीषादिकम् ।

१. लट् – दीधीते दीध्याते दीध्यते । दीधीषे दीध्याते दीधीध्वे । दीध्ये दीधीवहे दीधीमहे । **२. लिट्** – (i) दीध्याञ्चक्रे दीध्याञ्चक्राते दीध्याञ्चक्रिरे । दीध्याञ्चकृषे दीध्याञ्चक्राथे दीध्याञ्चकृढ्वे । दीध्याञ्चक्रे दीध्याञ्चकृवहे दीध्याञ्चकृमहे । (ii) दीध्याम्बभूव दीध्याम्बभूवतुः दीध्याम्बभूवुः । दीध्याम्बभूविथ दीध्याम्बभूवथुः दीध्याम्बभूव । दीध्याम्बभूव दीध्याम्बभूविव दीध्याम्बभूविम । (iii) दीध्यामास दीध्यामासतुः दीध्यामासुः । दीध्यामासिथ दीध्यामासथुः दीध्यामास । दीध्यामास दीध्यामासिव दीध्यामासिम । **३. लुट्** – दीधिता दीधितारौ दीधितारः । दीधितासे दीधितासाथे दीधिताध्वे । दीधिताहे दीधितास्वहे दीधितास्महे । **४. लृट्** – दीधिष्यते दीधिष्येते दीधिष्यन्ते । दीधिष्यसे दीधिष्येथे दीधिष्यध्वे । दीधिष्ये दीधिष्यावहे दीधिष्यामहे । **५. लोट्** – दीधीताम् दीध्याताम् दीध्यताम् । दीधीष्व दीध्याथाम् दीधीध्वम् । दीध्यै दीध्यावहै दीध्यामहै । **६. लङ्** – अदीधीत अदीध्याताम् अदीध्यत । अदीधीथाः अदीध्याथाम् अदीधीध्वम् । अदीधि अदीधीवहि अदीधीमहि । **७. विधिलिङ्** – दीधीत दीधीयाताम् दीधीरन् । दीधीथाः दीधीयाथाम् दीधीध्वम् । दीधीय दीधीवहि दीधीमहि । **८. आशीर्लिङ्** – दीधिषीष्ट दीधिषीयास्ताम् दीधिषीरन् । दीधिषीष्ठाः दीधिषीयास्थाम् दीधिषीध्वम् । दीधिषीय दीधिषीवहि दीधिषीमहि । **९. लुङ्** – अदीधिष्ट अदीधिषाताम् अदीधिषत । अदीधिष्ठाः अदीधिषाथाम् अदीधिध्वम् । अदीधिषि अदीधिष्वहि अदीधिष्महि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०. लृङ् – अदीधिष्यत अदीधिष्येताम् अदीधिष्यन्त । अदीधिष्यथाः अदीधिष्येथाम् अदीधिष्यध्वम् । अदीधिष्ये अदीधिष्यावहि अदीधिष्यामहि ।

णिचि – दीधयति ते, **सनि** – दिदीधिषते, **यकि** – दीधीयते

१. वस्तुतस्तु छन्दसि दृष्टानुविधित्वादेषां पञ्चानां लोकानुसारेण रूपवर्णनमनुचितम्' इति बालमनोरमा । 'अस्माभिः तु कालापमतानुसारेण उदाहरणप्रदर्शनं कृतम्' इति माधवीयधातुवृत्तिः ।

१०७७. वेवीङ् – गतिव्याप्तिप्रजनकान्त्यसनस्वादनेषु । सकर्म/अकर्म, सेट्, आत्मने, धातुरयं छान्दसः ।

१. लट् – वेवीते वेव्याते वेव्यते । वेवीषे वेव्याते वेवीध्वे । वेव्ये वेवीवहे वेवीमहे । **२. लिट्** – (i) वेव्याञ्चक्रे वेव्याञ्चक्राते वेव्याञ्चक्रिरे । वेव्याञ्चकृषे वेव्याञ्चक्राथे वेव्याञ्चकृढ्वे । वेव्याञ्चक्रे वेव्याञ्चकृवहे वेव्याञ्चकृमहे । (ii) वेव्याम्बभूव वेव्याम्बभूवतुः वेव्याम्बभूवुः । वेव्याम्बभूविथ वेव्याम्बभूवथुः वेव्याम्बभूव । वेव्याम्बभूव वेव्याम्बभूविव वेव्याम्बभूविम । (iii) वेव्यामास वेव्यामासतुः वेव्यामासुः । वेव्यामासिथ वेव्यामासथुः वेव्यामास । वेव्यामास वेव्यामासिव वेव्यामासिम । **३. लुट्** – वेविता वेवितारौ वेवितारः । वेवितासे वेवितासाथे वेविताध्वे । वेविताहे वेवितास्वहे वेवितास्महे । **४. लृट्** – वेविष्यते वेविष्येते वेविष्यन्ते । वेविष्यसे वेविष्येथे वेविष्यध्वे । वेविष्ये वेविष्यावहे वेविष्यामहे । **५. लोट्** – वेवीताम् वेव्याताम् वेव्यताम् । वेवीष्व वेव्याथाम् वेवीध्वम् । वेव्यै वेव्यावहै वेव्यामहै । **६. लङ्** – अवेवीत अवेव्याताम् अवेव्यत । अवेवीथाः अवेव्याथाम् अवेवीध्वम् । अवेवि अवेवीवहि अवेवीमहि । **७. विधिलिङ्** – वेवीत वेवीयाताम् वेवीरन् । वेवीथाः वेवीयाथाम् वेवीध्वम् । वेवीय वेवीवहि वेवीमहि । **८. आशीर्लिङ्** – वेविषीष्ट वेविषीयास्ताम् वेविषीरन् । वेविषीष्ठाः वेविषीयास्थाम् वेविषीध्वम् । वेविषीय वेविषीवहि वेविषीमहि । **९. लुङ्** – अवेविष्ट अवेविषाताम् अवेविषत । अवेविष्ठाः अवेविषाथाम् अवेविध्वम् । अवेविषि अवेविष्वहि अवेविष्महि । **१०. लृङ्** – अवेविष्यत अवेविष्येताम् अवेविष्यन्त । अवेविष्यथाः अवेविष्येथाम् अवेविष्यध्वम् । अवेविष्ये अवेविष्यावहि अवेविष्यामहि ।

णिचि – वेवयति–ते, **सनि** – विवेविषते, **यकि** – वेवीयते

१०७८. षस – स्वप्ने । अकर्म, सेट्, परस्मै । 'षसने' इति सुधाकरक्षीरस्वामिनौ । धातुरयं छान्दसः ।

१. लट् – सस्ति सस्तः ससन्ति । सस्सि सस्थः सस्थ । सस्मि सस्वः सस्मः । **२. लिट्** – ससास सेसतुः सेसुः । सेसिथ सेसथुः सेस । ससास-ससस सेसिव सेसिम । **३. लुट्** – ससिता ससितारौ ससितारः । ससितासि ससितास्थः ससितास्थ । ससितास्मि ससितास्वः ससितास्मः । **४. लृट्** – ससिष्यति ससिष्यतः ससिष्यन्ति । ससिष्यसि ससिष्यथः ससिष्यथ । ससिष्यामि ससिष्यावः ससिष्यामः । **५. लोट्** – सस्तु, सस्तात् सस्ताम् ससन्तु । सधि सस्तात् सस्तम् सस्त । ससानि ससाव ससाम । **६. लङ्** – असत् असस्ताम् अससन् । असः असस्तम् असस्त । अससम् असस्व असस्म । **७. विधिलिङ्** – सस्यात् सस्याताम् सस्युः । सस्याः सस्यातम् सस्यात । सस्याम् सस्याव सस्याम । **८. आशीर्लिङ्** – सस्यात् सस्यास्ताम् सस्यासुः । सस्याः सस्यास्तम् सस्यास्त । सस्यासम् सस्यास्व सस्यास्म । **९. लुङ्** – (i) असासीत्[1] असासिष्टाम् असासिषुः । असासीः असासिष्टम् असासिष्ट । असासिषम् असासिष्व असासिष्म । (ii) अससीत् अससिष्टाम् अससिषुः । अससीः अससिष्टम् अससिष्ट । अससिषम् अससिष्व अससिष्म । **१०. लृङ्** – अससिष्यत् अससिष्यताम् अससिष्यन् । अससिष्यः अससिष्यतम् अससिष्यत । अससिष्यम् अससिष्याव अससिष्याम ।

णिचि – सासयति – ते, **सनि** – सिससिषति, **यकि** – सस्यते

१. 'अतो हलादेः.' इति वृद्धिविकल्पः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०७९. षस्ति - स्वप्ने । अकर्म, सेट्, परस्मै, धातुरयं छान्दसः[1] ।

१. लट् - सन्ति[2] सन्तः संस्तन्ति । सन्स्सि सन्थः सन्थ । संस्मि संस्वः संस्मः । **२. लिट्** - ससंस्त ससंस्ततुः ससंस्तुः । ससंस्तिथ ससंस्तथुः ससंस्थ । ससंस्त ससंस्तिव ससंस्तिम । **३. लुट्** - संस्तिता संस्तितारौ संस्तितारः । संस्तितासि संस्तितास्थः संस्तितास्थ । संस्तितास्मि संस्तितास्वः संस्तितास्मः । **४. लृट्** - संस्तिष्यति संस्तिष्यतः संस्तिष्यन्ति । संस्तिष्यसि संस्तिष्यथः संस्तिष्यथ । संस्तिष्यामि संस्तिष्यावः संस्तिष्यामः । **५. लोट्** - सन्तु, सन्तात् सन्ताम् संस्तन्तु । सन्धि-सन्द्धि, सन्तात् सन्तम् सन्त । संस्तानि संस्ताव संस्ताम । **६. लङ्** - असन् असन्ताम् असंस्तन् । असन् असन्तम् असन्त । असंस्तम् असंस्त्व असंस्त्म । **७. विधिलिङ्** - संस्त्यात् संस्त्याताम् संस्त्युः । संस्त्याः संस्त्यातम् संस्त्यात । संस्त्याम् संस्त्याव संस्त्याम । **८. आशीर्लिङ्** - संस्त्यात् संस्त्यास्ताम् संस्त्यासुः । संस्त्याः संस्त्यास्तम् संस्त्यास्त । संस्त्यासम् संस्त्यास्व संस्त्यास्म । **९. लुङ्** - असंस्तीत् असंस्तिष्टाम् असंस्तिषुः । असंस्तीः असंस्तिष्टम् असंस्तिष्ट । असंस्तिषम् असंस्तिष्व असंस्तिष्म । **१०. लृङ्** - असंस्तिष्यत् असंस्तिष्यताम् असंस्तिष्यन् । असंस्तिष्यः असंस्तिष्यतम् असंस्तिष्यत । असंस्तिष्यम् असंस्तिष्याव असंस्तिष्याम ।

णिचि - संस्तयति ते, **सनि** - सिसंस्तिषति, **यङि** - संस्त्यते

१. 'तदेवं देधीङ् वेवीङ् षस षस्ति वश एते पञ्च धातवः छान्दसाः एव इति माधवादयः । तत्र 'दीधीवेवीटाम्' इति सूत्रे दीधीवेव्योः छन्दोविषयत्वात् इति भाष्यम् । 'जक्षित्यादयः षट्' इति सूत्रे षसिवषी छान्दसाविति भाष्यम् । एतद्भाष्यादेव षस्तिधातोर्नात्र पाठ इति प्रतीयते' इति बालमनोरमा ।

२. 'बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः...' इति लोपाभावात् संस्ति संस्तः संस्तन्ति इत्येके ।

१०८०. वश - कान्तौ । सकर्म, सेट्, परस्मै, धातुरयं छान्दसः[1] । कान्तिः = इच्छा इति क्षीरस्वामी ।

१. लट् - वष्टि उष्टः उशन्ति । वक्षि उष्ठः उष्ठ । वश्मि उश्वः उश्मः । **२. लिट्** - उवाश ऊशतुः ऊशुः । उवशिथ ऊशथुः ऊश । उवाश-उवश ऊशिव ऊशिम । **३. लुट्** - वशिता वशितारौ वशितारः । वशितासि वशितास्थः वशितास्थ । वशितास्मि वशितास्वः वशितास्मः । **४. लृट्** - वशिष्यति वशिष्यतः वशिष्यन्ति । वशिष्यसि वशिष्यथः वशिष्यथ । वशिष्यामि वशिष्यावः वशिष्यामः । **५. लोट्** - वष्टु, उष्टात् उष्टाम् उशन्तु । उड्ढि, उष्टात् उष्टम् उष्ट । वशानि वशाव वशाम । **६. लङ्** - अवट्-ड् औष्टाम् औशन् । अवट् औष्टम् औष्ट । अवशम् औश्व औश्म । **७. विधिलिङ्** - उश्यात् उश्याताम् उश्युः । उश्याः उश्यातम् उश्यात । उश्याम् उश्याव उश्याम । **८. आशीर्लिङ्** - उश्यात् उश्यास्ताम् उश्यासुः । उश्याः उश्यास्तम् उश्यास्त । उश्यासम् उश्यास्व उश्यास्म । **९. लुङ्** - (i) अवाशीत् अवाषिष्टाम् अवाशिषुः । अवाशीः अवाषिष्टम् अवाशिष्ट । अवाशिषम् अवाशिष्व अवाशिष्म । (ii) अवशीत् अवषिष्टाम् अवशिषुः । अवशीः अवषिष्टम् अवशिष्ट । अवशिषम् अवशिष्व अवशिष्म । **१०. लृङ्** - अवशिष्यत् अवशिष्यताम् अवशिष्यन् । अवशिष्यः अवशिष्यतम् अवशिष्यत । अवशिष्यम् अवशिष्याव अवशिष्याम ।

णिचि - वाशयति - ते, **सनि** - विवशिषति, **यङि** - उश्यते ।

१. भाषायामपि अस्य प्रयोगो दृश्यते 'वष्टि भागुरिरल्लोपम्' 'जयाय सेनान्यमुशन्ति देवाः' (कुमार, ३.५) इति तत्त्वबोधिनी ।

१०८१. चर्करीतं च[1]

१. 'धातुपाठे गणसूत्रमिदम् । 'चर्करीतम्' इति यङ्लुगन्तस्य संज्ञा पूर्वाचार्यसिद्धा । 'यङ्लुगन्तम् अदादौ बोध्यम्' । तेन यङ्लुगन्तात् शबेव विकरणः, तस्य लुक्, न तु श्यनादिविकरणान्तरम् । परस्मैपदिनः इति उपक्रमात् यङ्लुगन्तस्य परस्मैपदमेव' इति बालमनोरमा । अतः एव अत्र धातुरूपाणि न दर्शितानि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०८२. ह्नुङ् – अपनयने । अकर्म, अनिट्, आत्मने ।

१. लट् – ह्नुते ह्नुवाते ह्नुवते । ह्नुषे ह्नुवाते ह्नुध्वे । ह्नुवे ह्नुवहे ह्नुमहे । **२. लिट्** – जुह्नुवे जुह्नुवाते जुह्नुविरे । जुह्नुविषे जुह्नुवाथे जुह्नुविध्वे । जुह्नुवे जुह्नुविवहे जुह्नुविमहे । **३. लुट्** – ह्नोता ह्नोतारौ ह्नोतारः । ह्नोतासे ह्नोतासाथे ह्नोताध्वे । ह्नोताहे ह्नोतास्वहे ह्नोतास्महे । **४. लृट्** – ह्नोष्यते ह्नोष्येते ह्नोष्यन्ते । ह्नोष्यसे ह्नोष्येथे ह्नोष्यध्वे । ह्नोष्ये ह्नोष्यावहे ह्नोष्यामहे । **५. लोट्** – ह्नुताम् ह्नुवाताम् ह्नुवताम् । ह्नुष्व ह्नुवाथाम् ह्नुध्वम् । ह्नवै ह्नवावहै ह्नवामहै । **६. लङ्** – अह्नुत अह्नुवाताम् अह्नुवत । अह्नुथाः अह्नुवाथाम् अह्नुध्वम् । अह्नुवि अह्नुवहि अह्नुमहि । **७. विधिलिङ्** – ह्नुवीत ह्नुवीयाताम् ह्नुवीरन् । ह्नुवीथाः ह्नुवीयाथाम् ह्नुवीध्वम् । ह्नुवीय ह्नुवीवहि ह्नुवीमहि । **८. आशीर्लिङ्** – ह्नोषीष्ट ह्नोषीयास्ताम् ह्नोषीरन् । ह्नोषीष्ठाः ह्नोषीयास्थाम् ह्नोषीध्वम् । ह्नोषीय ह्नोषीवहि ह्नोषीमहि । **९. लुङ्** – अह्नोष्ट अह्नोषाताम् अह्नोषत । अह्नोष्ठाः अह्नोषाथाम् अह्नोध्वम् । अह्नोषि अह्नोष्वहि अह्नोष्महि । **१०. लृङ्** – अह्नोष्यत अह्नोष्येताम् अह्नोष्यन्त । अह्नोष्यथाः अह्नोष्येथाम् अह्नोष्यध्वम् । अह्नोष्ये अह्नोष्यावहि अह्नोष्यामहि ।

णिचि – निह्नावयति-ते, **सनि** – निजुह्नुषते, **यकि** – निह्नूयते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ जुहोत्यादिः (३)

१०८३. हु - दानादनयोः । सकर्म, अनिट्, परस्मै । 'दानादानयोः' इत्येके । दानमत्र 'चोदित आधारे हविःप्रक्षेपः' इति माधवः । 'जीवधातौ प्राणस्येव अत्रापि दाने हविषो अन्तर्भावात् अकर्मकत्वं केचिदङ्गीचक्रुः । 'तृतीया च होश्छन्दसि' (२.३.३) इत्यत्र भाष्ये तु 'जुहोतिः प्रक्षेपे वर्तते' इत्युक्तम् । एवं च यवागूं जुहोति इत्यादयः सकर्मकाः प्रयोगाः उपपद्यन्ते । 'अग्निषु हूयमानेषु' इत्यादिषु प्रीणनार्थकत्वमपि भाष्यसम्मतम् ।

१. लट् - जुहोति[१] जुहुतः जुह्वति । जुहोषि जुहुथः जुहुथ । जुहोमि जुहुवः जुहुमः । **२. लिट्** - (i) जुहाव जुहुवतुः जुहुवुः । जुहविथ, जुहोथ जुहुवथुः जुहुव । जुहाव-जुहव जुहुविव जुहुविम । (ii) जुहवाञ्चकार[२] जुहवाञ्चक्रतुः जुहवाञ्चक्रुः । जुहवाञ्चकर्थ जुहवाञ्चक्रथुः जुहवाञ्चक्र । जुहवाञ्चकार/जुहवाञ्चकर जुहवाञ्चकृव जुहवाञ्चकृम । (iii) जुहवाम्बभूव जुहवाम्बभूवतुः जुहवाम्बभूवुः । जुहवाम्बभूविथ जुहवाम्बभूवथुः जुहवाम्बभूव । जुहवाम्बभूव जुहवाम्बभूविव जुहवाम्बभूविम । (iv) जुहवामास जुहवामासतुः जुहवामासुः । जुहवामासिथ जुहवामासथुः जुहवामास । जुहवामास जुहवामासिव जुहवामासिम । **३. लुट्** - होता होतारौ होतारः । होतासि होतास्थः होतास्थ । होतास्मि होतास्वः होतास्मः । **४. लृट्** - होष्यति होष्यतः होष्यन्ति । होष्यसि होष्यथः होष्यथ । होष्यामि होष्यावः होष्यामः । **५. लोट्** - जुहोतु, जुहुतात् जुहुताम् जुह्वतु । जुहुधि[३], जुहुतात् जुहुतम् जुहुत । जुहवानि जुहवाव जुहवाम । **६. लङ्** - अजुहोत् अजुहुताम् अजुहवुः । अजुहोः अजुहुतम् अजुहुत । अजुहवम् अजुहुव अजुहुम । **७. विधिलिङ्** - जुहुयात् जुहुयाताम् जुहुयुः । जुहुयाः जुहुयातम् जुहुयात । जुहुयाम् जुहुयाव जुहुयाम । **८. आशीर्लिङ्** - हूयात् हूयास्ताम् हूयासुः । हूयाः हूयास्तम् हूयास्त । हूयासम् हूयास्व हूयास्म । **९. लुङ्** - अहौषीत् अहौष्टाम् अहौषुः । अहौषीः अहौष्टम् अहौष्ट । अहौषम् अहौष्व अहौष्म । **१०. लृङ्** - अहोष्यत् अहोष्यताम् अहोष्यन् । अहोष्यः अहोष्यतम् अहोष्यत । अहोष्यम् अहोष्याव अहोष्याम ।

णिचि - हावयति - ते, **सनि** - जुहूषति, **यकि** - हूयते

१. 'जुहोत्यादिभ्यः श्लुः' - शपः श्लुः स्यात् । लोपः इत्यर्थः । 'श्लौ' - श्लौ धातोः द्वे स्तः । ततः चुत्वं गुणः च ।

२. 'भीह्रीभृहुवां श्लुवच्च वा' - एतेभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च ।

३. 'हुझल्भ्यो हेर्धिः' इति हेः धिः ।

१०८४. ञि भी - भये । अकर्म, अनिट्, परस्मै ।

१. लट् - बिभेति बिभितः-बिभीतः[१] बिभ्यति । बिभेषि बिभिथः-बिभीथः बिभीथ-बिभिथ । बिभेमि बिभिवः-बिभीवः बिभिमः-बिभीमः । **२. लिट्** - (i) बिभाय बिभ्यतुः बिभ्युः । बिभयिथ-बिभेथ बिभ्यथुः बिभ्य । बिभाय-बिभय बिभ्यिव बिभ्यिम । (ii) बिभयाञ्चकार[२] बिभयाञ्चक्रतुः बिभयाञ्चक्रुः । बिभयाञ्चकर्थ बिभयाञ्चक्रथुः बिभयाञ्चक्र । बिभयाञ्चकार/बिभयाञ्चकर बिभयाञ्चकृव बिभयाञ्चकृम । (iii) बिभयाम्बभूव बिभयाम्बभूवतुः बिभयाम्बभूवुः । बिभयाम्बभूविथ बिभयाम्बभूवथुः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बिभयाम्बभूव । बिभयाम्बभूव बिभयाम्बभूविव बिभयाम्बभूविम । (iv) बिभयामास बिभयामासतुः बिभयामासुः । बिभयामासिथ बिभयामासथुः बिभयामास । बिभयामास बिभयामासिव बिभयामासिम । **३. लुट्** – भेता भेतारौ भेतारः । भेतासि भेतास्थः भेतास्थ । भेतास्मि भेतास्वः भेतास्मः । **४. लृट्** – भेष्यति भेष्यतः भेष्यन्ति । भेष्यसि भेष्यथः भेष्यथ । भेष्यामि भेष्यावः भेष्यामः । **५. लोट्** – बिभेतु, बिभितात्-बिभीतात् बिभिताम्-बिभीताम् बिभ्यतु । बिभिहि-बिभीहि, बिभितात्-बिभीतात् बिभितम्-बिभीतम् बिभित-बिभीत । बिभयानि बिभयाव बिभयाम । **६. लङ्** – अबिभेत् अबिभिताम्-अबिभीताम् अबिभयुः । अबिभेः अबिभितम्-अबिभीतम् अबिभित-अबिभीत । अबिभयम् अबिभिव-अबिभीव अबिभिम-अबिभीम । **७. विधिलिङ्** – (i) बिभियात् बिभियाताम् बिभियुः । बिभियाः बिभियातम् बिभियात । बिभियाम् बिभियाव बिभियाम । (ii) बिभीयात् बिभीयाताम् बिभीयुः । बिभीयाः बिभीयातम् बिभीयात । बिभीयाम् बिभीयाव बिभीयाम । **८. आशीर्लिङ्** – भीयात् भीयास्ताम् भीयासुः । भीयाः भीयास्तम् भीयास्त । भीयासम् भीयास्व भीयास्म । **९. लुङ्** – अभैषीत् अभैष्टाम् अभैषुः । अभैषीः अभैष्टम् अभैष्ट । अभैषम् अभैष्व अभैष्म । **१०. लृङ्** – अभेष्यत् अभेष्यताम् अभेष्यन् । अभेष्यः अभेष्यतम् अभेष्यत । अभेष्यम् अभेष्याव अभेष्याम ।

णिचि – भापयते/भीषयते[3], भाययति-ते, भीषयति-ते, **सनि** – बिभीषति, **यकि** – भीयते ।

१. 'भियोऽन्यतरस्याम्' – इकारः स्याद्धलादौ क्ङिति सार्वधातुके ।

२. 'भीह्रीभृहुवां श्लुवच्च वा' – एतेभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च ।

३. 'बिभेतेर्हेतुभये' – प्रयोजकाद्भयं चेत् आत्वम् । पुकि 'भीस्म्योर्हेतुभये' इति आत्मनेपदम् । आत्वाभावे 'भियो हेतुभये षुक्' इति षुक् । अहेतुभये तु वृद्धिः अयादेशः च ।

१०८५. ह्री – लज्जायाम् । अकर्म, अनिट्, परस्मै । 'ह्रीष्' इति केचित् ।

१. लट् – जिह्रेति जिह्रीतः जिह्रियति[1] । जिह्रेषि जिह्रीथः जिह्रीथ । जिह्रेमि जिह्रीवः जिह्रीमः । **२. लिट्** – (i) जिह्राय जिह्रियतुः जिह्रियुः । जिह्रयिथ-जिह्रेथ जिह्रियथुः जिह्रिय । जिह्राय-जिह्रय जिह्रियिव जिह्रियिम । (ii) जिह्रयाञ्चकार[2] जिह्रयाञ्चक्रतुः जिह्रयाञ्चक्रुः । जिह्रयाञ्चकर्थ जिह्रयाञ्चक्रथुः जिह्रयाञ्चक्र । जिह्रयाञ्चकार/जिह्रयाञ्चकर जिह्रयाञ्चकृव जिह्रयाञ्चकृम । (iii) जिह्रयाम्बभूव जिह्रयाम्बभूवतुः जिह्रयाम्बभूवुः । जिह्रयाम्बभूविथ जिह्रयाम्बभूवथुः जिह्रयाम्बभूव । जिह्रयाम्बभूव जिह्रयाम्बभूविव जिह्रयाम्बभूविम । (iv) जिह्रयामास जिह्रयामासतुः जिह्रयामासुः । जिह्रयामासिथ जिह्रयामासथुः जिह्रयामास । जिह्रयामास जिह्रयामासिव जिह्रयामासिम । **३. लुट्** – ह्रेता ह्रेतारौ ह्रेतारः । ह्रेतासि ह्रेतास्थः ह्रेतास्थ । ह्रेतास्मि ह्रेतास्वः ह्रेतास्मः । **४. लृट्** – ह्रेष्यति ह्रेष्यतः ह्रेष्यन्ति । ह्रेष्यसि ह्रेष्यथः ह्रेष्यथ । ह्रेष्यामि ह्रेष्यावः ह्रेष्यामः । **५. लोट्** – जिह्रेतु-जिह्रीतात् जिह्रीताम् जिह्रियतु । जिह्रीहि-तात् जिह्रीतम् जिह्रीत । जिह्रयाणि जिह्रयाव जिह्रयाम । **६. लङ्** – अजिह्रेत् अजिह्रीताम् अजिह्रयुः । अजिह्रेः अजिह्रीतम् अजिह्रीत । अजिह्रयम् अजिह्रीव अजिह्रीम । **७. विधिलिङ्** – जिह्रीयात् जिह्रीयाताम् जिह्रीयुः । जिह्रीयाः जिह्रीयातम् जिह्रीयात । जिह्रीयाम् जिह्रीयाव जिह्रीयाम । **८. आशीर्लिङ्** – ह्रीयात् ह्रीयास्ताम् ह्रीयासुः । ह्रीयाः ह्रीयास्तम् ह्रीयास्त । ह्रीयासम् ह्रीयास्व ह्रीयास्म । **९. लुङ्** – अह्रैषीत् अह्रैष्टाम् अह्रैषुः । अह्रैषीः अह्रैष्टम् अह्रैष्ट । अह्रैषम् अह्रैष्व अह्रैष्म । **१०. लृङ्** – अह्रेष्यत् अह्रेष्यताम् अह्रेष्यन् । अह्रेष्यः अह्रेष्यतम् अह्रेष्यत । अह्रेष्यम् अह्रेष्याव अह्रेष्याम ।

णिचि – ह्रेपयति[3] – ते, **सनि** – जिह्रीषति, **यकि** – ह्रीयते ।

१. 'अचिश्नुधातु....' इति इयङ् ।

२. 'भीह्रीभृहुवां श्लुवच्च वा' – एतेभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. 'अर्तिह्री...' इति पुक् । 'पुगन्तलघूपधस्य च' इति गुणः ।

१०८६. पॄ – पालनपूरणयोः । सकर्म, सेट्, परस्मै । 'पृणाति पूरणे श्लौ तु पिपर्ति णिचि पारयेत्' (श्लो. ३६) इति देवः ।

१. लट् – पिपर्ति[1] पिपूर्तः पिपुरति । पिपर्षि पिपूर्थः पिपूर्थ । पिपर्मि पिपूर्वः पिपूर्मः । **२. लिट्** – पपार पप्रतुः-पपरतुः पप्रुः-पपरुः । पपरिथ पपरथुः-पप्रथुः पप्र-पपर । पपार-पपर पपरिव-पप्रिव पपरिम-पप्रिम । **३. लुट्** – (i) परिता[2] परितारौ परितारः । परितासि परितास्थः परितास्थ । परितास्मि परितास्वः परितास्मः । (ii) परीता परीतारौ परीतारः । परीतासि परीतास्थः परीतास्थ । परीतास्मि परीतास्वः परीतास्मः । **४. लृट्** – (i) परिष्यति परिष्यतः परिष्यन्ति । परिष्यसि परिष्यथः परिष्यथ । परिष्यामि परिष्यावः परिष्यामः । (ii) परीष्यति परीष्यतः परीष्यन्ति । परीष्यसि परीष्यथः परीष्यथ । परीष्यामि परीष्यावः परीष्यामः । **५. लोट्** – पिपर्तु, पिपूर्तात् पिपूर्ताम् पिपुरतु । पिपूर्हि, पिपूर्तात् पिपूर्तम् पिपूर्त । पिपराणि पिपराव पिपराम । **६. लङ्** – अपिपः अपिपूर्ताम् अपिपरुः । अपिपः अपिपूर्तम् अपिपूर्त । अपिपरम् अपिपूर्व अपिपूर्म । **७. विधिलिङ्** – पिपूर्यात् पिपूर्याताम् पिपूर्युः । पिपूर्याः पिपूर्यातम् पिपूर्यात । पिपूर्याम् पिपूर्याव पिपूर्याम । **८. आशीर्लिङ्** – पूर्यात् पूर्यास्ताम् पूर्यासुः । पूर्याः पूर्यास्तम् पूर्यास्त । पूर्यासम् पूर्यास्व पूर्यास्म । **९. लुङ्** – अपारीत् अपारिष्टाम् अपारिषुः । अपारीः अपारिष्टम् अपारिष्ट । अपारिषम् अपारिष्व अपारिष्म । **१०. लृङ्** – (i) अपरिष्यत् अपरिष्यताम् अपरिष्यन् । अपरिष्यः अपरिष्यतम् अपरिष्यत । अपरिष्यम् अपरिष्याव अपरिष्याम । (ii) अपरीष्यत् अपरीष्यताम् अपरीष्यन् । अपरीष्यः अपरीष्यतम् अपरीष्यत । अपरीष्यम् अपरीष्याव अपरीष्याम ।

णिचि – पारयति-ते, **सनि** – पिपरिषति[3]/पिपरीषति/पुपूर्षति, **यकि** – पूर्यते

१. 'अर्तिपिपर्त्योश्च' – अभ्यासस्येकारोऽन्तादेशः स्यात् श्लौ ।

२. 'वृतो वा' इति दीर्घविकल्पः ।

३. 'इट् सनि वा' इति सनि इड्विकल्पः । 'वृतो वा' इति अलिटि इटो वा दीर्घः । ('ह्रस्वान्तोऽयमिति केचित्'इति सिद्धान्तकौमुदी । तदा तु – **१. पिपर्ति पिपृतः पिप्रति ७. पिपृयात् ८. प्रियात् ९ अपार्षीत्** इत्यादीनि रूपाणि)

१०८७. डु भृञ् – धारणपोषणयोः । सकर्म, अनिट्, उभय । 'भृञो बिभर्ति बिभृते भरते भरतीत्यपि । ऋदन्तस्य भृणातीति भर्त्सने भ्रि तथा भरः' (श्लो. २८) इति देवः ।

१. लट् – (i) बिभर्ति[1] बिभृतः बिभ्रति । बिभर्षि बिभृथः बिभृथ । बिभर्मि बिभृवः बिभृमः । (ii) बिभृते बिभ्राते बिभ्रते । बिभृषे बिभ्राथे बिभृध्वे । बिभ्रे बिभृवहे बिभृमहे । **२. लिट्** – (i) बभार बभ्रतुः बभ्रुः । बभर्थ बभ्रथुः बभ्र । बभार-बभर बभृव बभृम । (ii) बभ्रे बभ्राते बभ्रिरे । बभृषे बभ्राथे बभृढ्वे । बभ्रे बभृवहे बभृमहे । (iii) बिभराञ्चकार[2] बिभराञ्चक्रतुः बिभराञ्चक्रुः । बिभराञ्चकर्थ बिभराञ्चक्रथुः बिभराञ्चक्र । बिभराञ्चकार/बिभराञ्चकर बिभराञ्चकृव बिभराञ्चकृम । (iv) बिभराञ्चक्रे बिभराञ्चक्राते बिभराञ्चक्रिरे । बिभराञ्चकृषे बिभराञ्चक्राथे बिभराञ्चकृढ्वे । बिभराञ्चक्रे बिभराञ्चकृवहे बिभराञ्चकृमहे । (v) बिभराम्बभूव बिभराम्बभूवतुः बिभराम्बभूवुः । बिभराम्बभूविथ बिभराम्बभूवथुः बिभराम्बभूव । बिभराम्बभूव बिभराम्बभूविव बिभराम्बभूविम । (vi) बिभरामास बिभरामासतुः बिभरामासुः । बिभरामासिथ बिभरामासथुः बिभरामास । बिभरामास बिभरामासिव बिभरामासिम । **३. लुट्** – (i) भर्ता भर्तारौ भर्तारः । भर्तासि भर्तास्थः भर्तास्थ । भर्तास्मि भर्तास्वः भर्तास्मः । (ii) भर्ता भर्तारौ भर्तारः । भर्तासे भर्तासाथे भर्ताध्वे । भतहि भर्तास्वहे भर्तास्महे । **४. लृट्** – (i) भरिष्यति भरिष्यतः भरिष्यन्ति । भरिष्यसि भरिष्यथः भरिष्यथ । भरिष्यामि भरिष्यावः भरिष्यामः । (ii) भरिष्यते भरिष्येते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भरिष्यन्ते । भरिष्यसे भरिष्येते भरिष्यध्वे । भरिष्ये भरिष्यावहे भरिष्यामहे । **५. लोट्** - (i) बिभर्तु, बिभृतात् बिभृताम् बिभ्रतु । बिभृहि, बिभृतात् बिभृतम् बिभृत । बिभराणि बिभराव बिभराम । (ii) बिभृताम् बिभ्राताम् बिभ्रताम् । बिभृष्व बिभ्राथाम् बिभृध्वम् । बिभरै बिभरावहै बिभरामहै । **६. लङ्** - (i) अबिभः अबिभृताम् अबिभरुः । अबिभः अबिभृतम् अबिभृत । अबिभरम् अबिभृव अबिभृम । (ii) अबिभृत अबिभ्राताम् अबिभ्रत । अबिभृथाः अभिभ्राथाम् अभिभृध्वम् । अबिभ्रि अबिभृवहि अबिभृमहि । **७. विधिलिङ्** - (i) बिभृयात् बिभृयाताम् बिभृयुः । । बिभृयाः बिभृयातम् बिभृयात । बिभृयाम् बिभृयाव बिभृयाम । (ii) बिभ्रीत बिभ्रीयाताम् बिभ्रीरन् । बिभ्रीथाः बिभ्रीयाथाम् बिभ्रीध्वम् । बिभ्रीय बिभ्रीवहि बिभ्रीमहि । **८. आशीर्लिङ्** - (i) भ्रियात् भ्रियास्ताम् भ्रियासुः । भ्रियाः भ्रियास्तम् भ्रियास्त । भ्रियासम् भ्रियास्व भ्रियास्म । (ii) भृषीष्ट भृषीयास्ताम् भृषीरन् । भृषीष्ठाः भृषीयास्थाम् भृषीध्वढ्वम् । भृषीय भृषीवहि भृषीमहि । **९. लुङ्** - (i) अभार्षीत् अभार्ष्टाम् अभार्षुः । अभार्षीः अभार्ष्टम् अभार्ष्ट । अभार्षम् अभार्ष्व अभार्ष्म । (ii) अभृत अभृषाताम् अभृषत । अभृथाः अभृषाथाम् अभृढ्वम् । अभृषि अभृष्वहि अभृष्महि । **१०. लृङ्** - (i) अभरिष्यत् अभरिष्यताम् अभरिष्यन् । अभरिष्यः अभरिष्यतम् अभरिष्यत । अभरिष्यम् अभरिष्याव अभरिष्याम । (ii) अभरिष्यत अभरिष्येताम् अभरिष्यन्त । अभरिष्यथाः अभरिष्येथाम् अभरिष्यध्वम् । अभरिष्ये अभरिष्यावहि अभरिष्यष्यामहि ।
णिचि - भारयति - ते, सनि - बुभूर्षति - ते, यकि - भ्रियते ।

१. 'भृञामित्' इति अभ्यासस्य इत् स्यात् श्लौ ।

२. 'भीहीभृहुवां श्लुवच्च वा' - एतेभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च ।

१०८८. माङ् - माने शब्दे च । सकर्मकः अकर्मकश्च, अनिट्, आत्मने । 'मिमीते मायते माने माति तत्रैव शब्लुकि । मयते प्रणिदानेऽर्थे' (श्लो. ९) इति देवः ।

१. लट् - मिमीते मिमाते मिमते । मिमीषे मिमाथे मिमीध्वे । मिमे मिमीवहे मिमीमहे । **२. लिट्** - ममे ममाते ममिरे । ममिषे ममाथे ममिध्वे । ममे ममिवहे ममिमहे । **३. लुट्** - माता मातारौ । मातासे मातासाथे माताध्वे । माताहे मातास्वहे मातास्महे । **४. लृट्** - मास्यते मास्येते मास्यन्ते । मास्यसे मास्येते मास्यध्वे । मास्ये मास्यावहे मास्यामहे । **५. लोट्** - मिमीताम् मिमाताम् मिमताम् । मिमीष्व मिमाथाम् मिमीध्वम् । मिमै मिमावहै मिमामहै । **६. लङ्** - अमिमीत अमिमाताम् अमिमत । अमिमीथाः अमिमाथाम् अमिमीध्वम् । अमिमि अमिमीवहि अमिमीमहि । **७. विधिलिङ्** - मिमीत मिमीयाताम् मिमीरन् । मिमीथाः मिमीयाथाम् मिमीध्वम् । मिमीय मिमीवहि मिमीमहि । **८. आशीर्लिङ्** - मासीष्ट मासीयास्ताम् मासीरन् । मासीष्ठाः मासीयास्थाम् मासीध्वढ्वम् । मासीय मासीवहि मासीमहि । **९. लुङ्** - अमास्त अमासाताम् अमासत । अमास्थाः अमासाथाम् अमाध्वम् । अमासि अमास्वहि अमास्महि । **१०. लृङ्** - अमास्यत अमास्येताम् अमास्यन्त । अमास्यथाः अमास्येथाम् अमास्यध्वम् । अमास्ये अमास्यावहि अमास्यामहि ।

णिचि - मापयति - ते, **सनि** - मित्सते[1], **यकि** - मीयते ।

१. 'सनिमीमा..' इति अचः इस् ।

१०८९. ओ हाङ् - गतौ । सकर्म, अनिट्, आत्मने । 'गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च' (श्लो. ११) इति देवः ।

१. लट् - जिहीते जिहाते जिहते । जिहीषे जिहाथे जिहीध्वे । जिहे जिहीवहे जिहीमहे । **२. लिट्** - जहे जहाते जहिरे । जहिषे जहाथे जहिध्वे-ढ्वे । जहे जहिवहे जहिमहे । **३. लुट्** - हाता हातारौ हातारः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हातासे हातासाथे हाताध्वे । हाताहे हातास्वहे हातास्महे । **४. लृट्** – हास्यते हास्येते हास्यन्ते । हास्यसे हास्येते हास्यध्वे । हास्ये हास्यावहे हास्यामहे । **५. लोट्** – जिहीताम् जिहाताम् जिहताम् । जिहीष्व जिहाथाम् जिहीध्वम् । जिहै जिहावहै जिहामहै । **६. लङ्** – अजिहीत अजिहाताम् अजिहत । अजिहीथाः अजिहाथाम् अजिहीध्वम् । अजिहि अजिहीवहि अजिहीमहि । **७. विधिलिङ्** – जिहीत जिहीयाताम् जिहीरन् । जिहीथाः जिहीयाथाम् जिहीध्वम् । जिहीय जिहीवहि जिहीमहि । **८. आशीर्लिङ्** – हासीष्ट हासीयास्ताम् हासीरन् । हासीष्ठाः हासीयास्थाम् हासीध्वम् । हासीय हासीवहि हासीमहि । **९. लुङ्** – अहास्त अहासाताम् अहासत । अहास्थाः अहासाथाम् अहाध्वम् । अहासि अहास्वहि अहास्महि । **१०. लृङ्** – अहास्यत अहास्येताम् अहास्यन्त । अहास्यथाः अहास्येथाम् अहास्यध्वम् । अहास्ये अहास्यावहि अहास्यामहि ।

णिचि – हापयति – ते, **सनि** – जिहासते, **यकि** – हायते ।

१०९०. ओ हाक् – त्यागे । सकर्म, अनिट्, परस्मै । 'गतौ त्यागे यथासङ्ख्यं जिहीते च जहाति च' (श्लो. ११) इति देवः ।

१. लट् – जहाति जहितः[१]–जहीतः जहति । जहासि जहिथः–जहीथः जहिथ–जहीथ । जहामि जहिवः–जहीवः जहिमः–जहीमः । **२. लिट्** – जहौ जहतुः जहुः । जहिथ–जहाथ जहथुः जह । जहौ जहिव जहिम । **३. लुट्** – हाता हातारौ हातारः । हातासि हातास्थः हातास्थ । हातास्मि हातास्वः हातास्मः । **४. लृट्** – हास्यति हास्यतः हास्यन्ति । हास्यसि हास्यथः हास्यथ । हास्यामि हास्यावः हास्यामः । **५. लोट्** – जहातु, जहितात्–जहीतात् जहितम्–जहीतम् जहतु । जहाहि[२]–जहिहि–जहीहि, जहितात्–जहीतात् जहितम्–जहीतम् जहित–जहीत । जहानि जहाव जहाम । **६. लङ्** – अजहात् अजहिताम्–अजहीताम् अजहुः । अजहाः अजहितम्–अजहीतम् अजहित–अजहीत । अजहाम् अजहिव–अजहीव अजहिम–अजहीम । **७. विधिलिङ्** – जह्यात् जह्याताम् जह्युः । जह्याः जह्यातम् जह्यात । जह्याम् जह्याव जह्याम । **८. आशीर्लिङ्** – हेयात् हेयास्ताम् हेयासुः । हेयाः हेयास्तम् हेयास्त । हेयासम् हेयास्व हेयास्म । **९. लुङ्** – अहासीत् अहासिष्टाम् अहासिषुः । अहासीः अहासिष्टम् अहासिष्ट । अहासिषम् अहासिष्व अहासिष्म । **१०. लृङ्** – अहास्यत् अहास्यताम् अहास्यन् । अहास्यः अहास्यतम् अहास्यत । अहास्यम् अहास्याव अहास्याम ।

णिचि – हापयति – ते, **सनि** – जिहासति, **यकि** – हीयते ।

१.'जहातेश्च' – इत् स्यात् वा हलादौ क्ङिति सार्वधातुके । पक्षे ईत्वम् ।

२. 'आ च हौ' जहातेः हौ परे आ स्यात्, चात् इदीतौ ।

१०९१. डु दाञ् – दाने । सकर्म, अनिट्, उभय । 'दाञो दत्ते ददातीति, दाणो यच्छति, दो द्यति । दाति दायति दाप्दैपोः, दयते रक्षणे ङितः' (श्लो. ४) इति देवः ।

१. लट् – (i) ददाति दत्तः ददति । ददासि दत्थः दत्थ । ददामि दद्वः दद्मः । (ii) दत्ते ददाते ददते । दत्से ददाते दद्ध्वे । ददे दद्वहे दद्महे । **२. लिट्** – (i) ददौ ददतुः ददुः । ददिथ–ददाथ ददथुः दद । ददौ ददिव ददिम । (ii) ददे ददाते ददिरे । ददिषे ददाथे ददिध्वे । ददे ददिवहे ददिमहे । **३. लुट्** – (i) दाता दातारौ दातारः । दातासि दातास्थः दातास्थ । दातास्मि दातास्वः दातास्मः । (ii) दाता दातारौ दातारः । दातासे दातासाथे दाताध्वे । दाताहे दातास्वहे दातास्महे । **४. लृट्** – (i) दास्यति दास्यतः दास्यन्ति । दास्यसि दास्यथः दास्यथ । दास्यामि दास्यावः दास्यामः । (ii) दास्यते दास्येते दास्यन्ते । दास्यसे दास्येते दास्यध्वे । दास्ये दास्यावहे दास्यामहे । **५. लोट्** – (i) ददातु, दत्तात् दत्ताम् ददतु । देहि, दत्तात् दत्तम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दत्त । ददानि ददाव ददाम । (ii) दत्ताम् ददाताम् ददताम् । दत्स्व ददाथाम् दद्ध्वम् । ददै ददावहै ददामहै । **६. लङ्** – (i) अददात् अदत्ताम् अददुः । अददाः अदत्तम् अदत्त । अददाम् अदद्व अदद्म । (ii) अदत्त अददाताम् अददत । अदत्थाः अददाथाम् अदद्ध्वम् । अददि अदद्वहि अदद्महि । **७. विधिलिङ्** – (i) दद्यात् दद्याताम् दद्युः । दद्याः दद्यातम् दद्यात । दद्याम् दद्याव दद्याम । (ii) ददीत ददीयाताम् ददीरन् । ददीथाः ददीयाथाम् ददीध्वम् । ददीय ददीवहि ददीमहि । **८. आशीर्लिङ्** – (i) देयात् देयास्ताम् देयासुः । देयाः देयास्तम् देयास्त । देयासम् देयास्व देयास्म । (ii) दासीष्ट दासीयास्ताम् दासीरन् । दासीष्ठाः दासीयास्थाम् दासीध्वम् । दासीय दासीवहि दासीमहि । **९. लुङ्** – (i) अदात् अदाताम् अदुः । अदाः अदातम् अदात । अदाम् अदाव अदाम । (ii) अदित अदिषाताम् अदिषत । अदिथाः अदिषाथाम् अदिध्वम् । अदिषि अदिष्वहि अदिष्महि । **१०. लृङ्** – (i) अदास्यत् अदास्यताम् अदास्यन् । अदास्यः अदास्यतम् अदास्यत । अदास्यम् अदास्याव अदास्याम । (ii) अदास्यत अदास्येताम् अदास्यन्त । अदास्यथाः अदास्येथाम् अदास्यध्वम् । अदास्ये अदास्यावहि अदास्यामहि ।

णिचि – दापयति – ते, **सनि** – दित्सति – ते, **यकि** – दीयते ।

१०९२. डु धाञ् – धारणपोषणयोः । सकर्म, अनिट्, उभय । 'दानेऽप्येके' इति कौमुदी । 'डु धाञ् – दानपोषणयोः' इति क्षीरस्वामी । निरुक्तकारोऽपि (७.१५) 'रत्नधातमम् – रमणीयानां रत्नानां दातृतमम्' इत्याह । मैत्रेयरक्षितप्रभृतिभिः अस्य धातोः दानार्थकत्वमपि अङ्गीकृतम् । 'धेटो धयति पानार्थे धाञो धत्ते दधात्यपि' (श्लो. ६) इति देवः ।

१. लट् – (i) दधाति धत्तः दधति । दधासि धत्थः धत्थ । दधामि दध्वः दध्मः । (ii) धत्ते दधाते दधते । धत्से दधाथे धद्ध्वे । दधे दध्वहे दध्महे । **२. लिट्** – (i) दधौ दधतुः दधुः । दधिथ-दधाथ दधथुः दध । दधौ दधिव दधिम । (ii) दधे दधाते दधिरे । दधिषे दधाथे दधिध्वे । दधे दधिवहे दधिमहे । **३. लुट्** – (i) धाता धातारौ धातारः । धातासि धातास्थः धातास्थ । धातास्मि धातास्वः धातास्मः । (ii) धाता धातारौ धातारः । धातासे धातासाथे धाताध्वे । धाताहे धातास्वहे धातास्महे । **४. लृट्** – (i) धास्यति धास्यतः धास्यन्ति । धास्यसि धास्यथः धास्यथ । धास्यामि धास्यावः धास्यामः । (ii) धास्यते धास्येते धास्यन्ते । धास्यसे धास्येते धास्यध्वे । धास्ये धास्यावहे धास्यामहे । **५. लोट्** – (i) दधातु, धत्तात् धत्ताम् दधतु । धेहि, धत्तात् धत्तम् धत्त । दधानि दधाव दधाम । (ii) धत्ताम् दधाताम् दधताम् । धत्स्व दधाथाम् धद्ध्वम् । दधै दधावहै दधामहै । **६. लङ्** – (i) अदधात् अधत्ताम् अदधुः । अदधाः अधत्तम् अधत्त । अदधाम् अदध्व अदध्म । (ii) अधत्त अदधाताम् अदधत । अधत्थाः अदधाथाम् अदध्वम् । अदधि अदध्वहि अदध्महि । **७. विधिलिङ्** – (i) दध्यात् दध्याताम् दध्युः । दध्याः दध्यातम् दध्यात । दध्याम् दध्याव दध्याम । (ii) दधीत दधीयाताम् दधीरन् । दधीथाः दधीयाथाम् दधीध्वम् । दधीय दधीवहि दधीमहि । **८. आशीर्लिङ्** – (i) धेयात् धेयास्ताम् धेयासुः । धेयाः धेयास्तम् धेयास्त । धेयासम् धेयास्व धेयास्म । (ii) धासीष्ट धासीयास्ताम् धासीरन् । धासीष्ठाः धासीयास्थाम् धासीध्वम् । धासीय धासीवहि धासीमहि । **९. लुङ्** – (i) अधात् अधाताम् अधुः । अधाः अधातम् अधात । अधाम् अधाव अधाम । (ii) अधित अधिषाताम् अधिषत । अधिथाः अधिषाथाम् अधिध्वम् । अधिषि अधिष्वहि अधिष्महि । **१०. लृङ्** – (i) अधास्यत् अधास्यताम् अधास्यन् । अधास्यः अधास्यतम् अधास्यत । अधास्यम् अधास्याव अधास्याम । (ii) अधास्यत अधास्येताम् अधास्यन्त । अधास्यथाः अधास्येथाम् अधास्यध्वम् । अधास्ये अधास्यावहि अधास्यामहि ।

णिचि – धापयति – ते, **सनि** – धित्सति – ते, **यकि** – धीयते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०९३. णिजिर् - शौचपोषणयोः । सकर्म, अनिट्, उभय । 'निङ्क्ते नेनेक्ति नेनिक्ते शोचेऽर्थे पोषणे तथा' (श्लो ६३) इति देवः ।

१. लट् - (i) नेनेक्ति[1] नेनिक्तः नेनिजति । नेनेक्षि नेनिक्थः नेनिक्थ । नेनेज्मि नेनिज्वः नेनिज्मः । (ii) नेनिक्ते नेनिजाते नेनिजते । नेनिक्षे नेनिजाथे नेनिग्ध्वे । नेनिजे नेनिज्वहे नेनिज्महे । **२. लिट् -** (i) निनेज निनिजथुः निनिजुः । निनेजिथ-निनेक्थ निनिजथुः निनिज । निनेज निनिजिव निनिजिम । (ii) निनिजे निनिजाते निनिजिरे । निनिजिषे निनिजाथे निनिजिध्वे । निनिजे निनिजिवहे निनिजिमहे । **३. लुट् -** (i) नेक्ता नेक्तारौ नेक्तारः । नेक्तासि नेक्तास्थः नेक्तास्थ । नेक्तास्मि नेक्तास्वः नेक्तास्मः । (ii) नेक्ता नेक्तारौ नेक्तारः । नेक्तासे नेक्तासाथे नेक्ताध्वे । नेक्ताहे नेक्तास्वहे नेक्तास्महे । **४. लृट् -** (i) नेक्ष्यति नेक्ष्यतः नेक्ष्यन्ति । नेक्ष्यसि नेक्ष्यथः नेक्ष्यथ । नेक्ष्यामि नेक्ष्यावः नेक्ष्यामः । (ii) नेक्ष्यते नेक्ष्येते नेक्ष्यन्ते । नेक्ष्यसे नेक्ष्येते नेक्ष्यध्वे । नेक्ष्ये नेक्ष्यावहे नेक्ष्यामहे । **५. लोट् -** (i) नेनेक्तु, नेनिक्तात् नेनिक्ताम् नेनिजतु । नेनिग्धि, नेनिक्तात् नेनिक्तम् नेनिक्त । नेनिजानि नेनिजाव नेनिजाम । (ii) नेनिक्ताम् नेनिजाताम् नेनिजताम् । नेनिक्ष्व नेनिजाथाम् नेनिग्ध्वम् । नेनिजै नेनिजावहै नेनिजामहै । **६. लङ् -** (i) अनेनेक्-ग् अनेनिक्ताम् अनेनिजुः । अनेनेक् अनेनिक्तम् अनेनिक्त । अनेनिजम् अनेनिज्व अनेनिज्म । (ii) अनेनिक्त अनेनिजाताम् अनेनिजत । अनेनिक्थाः अनेनिजाथाम् अनेनिग्ध्वम् । अनेनिजि अनेनिज्वहि अनेनिज्महि । **७. विधिलिङ् -** (i) नेनिज्यात् नेनिज्याताम् नेनिज्युः । नेनिज्याः नेनिज्यातम् नेनिज्यात । नेनिज्याम् नेनिज्याव नेनिज्याम । (ii) नेनिजीत नेनिजीयाताम् नेनिजीरन् । नेनिजीथाः नेनिजीयाथाम् नेनिजीध्वम् । नेनिजीय नेनिजीवहि नेनिजीमहि ।

८. आशीर्लिङ् - (i) निज्यात् निज्यास्ताम् निज्यासुः । निज्याः निज्यास्तम् निज्यास्त । निज्यासम् निज्यास्व निज्यास्म । (ii) निक्षीष्ट निक्षीयास्ताम् निक्षीरन् । निक्षीष्ठाः निक्षीयास्थाम् निक्षीध्वम् । निक्षीय निक्षीवहि निक्षीमहि । **९. लुङ् -** (i) अनिजत्[2] अनिजताम् अनिजन् । अनिजः अनिजतम् अनिजत । अनिजम् अनिजाव अनिजाम । (ii) अनैक्षीत् अनैक्ताम् अनैक्षुः । अनैक्षीः अनैक्तम् अनैक्त । अनैक्षम् अनैष्व अनैष्म । (iii) अनिक्त अनिक्षाताम् अनिक्षत । अनिक्थाः अनिक्षाथाम् अनिकाध्वम् । अनिक्षि अनिक्ष्वहि अनिक्ष्महि । **१०. लृङ् -** अनेक्ष्यत् अनेक्ष्यताम् अनेक्ष्यन् । अनेक्ष्यः अनेक्ष्यतम् अनेक्ष्यत । अनेक्ष्यम् अनेक्ष्याव अनेक्ष्याम । (ii) अनेक्ष्यत अनेक्ष्येताम् अनेक्ष्यन्त । अनेक्ष्यथाः अनेक्ष्येथाम् अनेक्ष्यध्वम् । अनेक्ष्ये अनेक्ष्यावहि अनेक्ष्यामहि ।

णिचि - नेजयति - ते, **सनि -** निनिक्षति - ते, **यकि -** निज्यते

१. 'निजां त्रयाणां गुणः श्लौ' - णिजिर् विजिर् विष् एषाम् अभ्यासस्य गुणः स्यात् श्लौ ।

२. इरित्वात् अङ् वा ।

१०९४. विजिर् - पृथग्भावे । अकर्म, अनिट्, उभय । 'वेवेक्तीति पृथग्भावे विविक्ते च भये पुनः' (श्लो. ६१) इति देवः ।

१. लट् - (i) वेवेक्ति[1] वेविक्तः वेविजति । वेवेक्षि वेविक्थः वेविक्थ । वेवेज्मि वेविज्वः वेविज्मः । (ii) वेविक्ते वेविजाते वेविजते । वेविक्षे वेविजाथे वेविग्ध्वे । वेविजे वेविज्वहे वेविज्महे । **२. लिट् -** (i) विवेज विविजथुः विविजुः । विवेजिथ विविजथुः विविज । विवेज विविजिव विविजिम । (ii) विविजे विविजाते विविजिरे । विविजिषे विविजाथे विविजिध्वे । विविजे विविजिवहे विविजिमहे । **३. लुट् -** (i) वेक्ता वेक्तारौ वेक्तारः । वेक्तासि वेक्तास्थः वेक्तास्थ । वेक्तास्मि वेक्तास्वः वेक्तास्मः । (ii) वेक्ता वेक्तारौ वेक्तारः । वेक्तासे वेक्तासाथे वेक्ताध्वे । वेक्ताहे वेक्तास्वहे वेक्तास्महे । **४. लृट् -** (i) वेक्ष्यति वेक्ष्यतः वेक्ष्यन्ति । वेक्ष्यसि वेक्ष्यथः वेक्ष्यथ । वेक्ष्यामि वेक्ष्यावः वेक्ष्यामः । (ii) वेक्ष्यते वेक्ष्येते वेक्ष्यन्ते । वेक्ष्यसे वेक्ष्येते वेक्ष्यध्वे । वेक्ष्ये वेक्ष्यावहे वेक्ष्यामहे । **५. लोट् -** (i) वेवेक्तु, वेविक्तात् वेविक्ताम् वेविजतु ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वेविग्धि, वेविक्तात् वेविक्तम् वेविक्त । वेविजानि वेविजाव वेविजाम । (ii) वेविक्ताम् वेविजाताम् वेविजताम् । वेविक्ष्व वेविजाथाम् वेविग्ध्वम् । वेविजै वेविजावहै वेविजामहै । **६. लङ्** - (i) अवेवेक्-ग् अवेविक्ताम् अवेविजुः । अवेवेक् अवेविक्तम् अवेविक्त । अवेविजम् अवेविज्व अवेविज्म । (ii) अवेविक्त अवेविजाताम् अवेविजत । अवेविक्थाः अवेविजाथाम् अवेविग्ध्वम् । अवेविजि अवेविज्वहि अवेविज्महि । **७. विधिलिङ्** - (i) वेविज्यात् वेविज्याताम् वेविज्युः । वेविज्याः वेविज्यातम् वेविज्यात । वेविज्याम् वेविज्याव वेविज्याम । (ii) वेविजीत वेविजीयाताम् वेविजीरन् । वेविजीथाः वेविजीयाथाम् वेविजीध्वम् । वेविजीय वेविजीवहि वेविजीमहि । **८. आशीर्लिङ्** - (i) विज्यात् विज्यास्ताम् विज्यासुः । विज्याः विज्यास्तम् विज्यास्त । विज्यासम् विज्यास्व विज्यास्म । (ii) विक्षीष्ट विक्षीयास्ताम् विक्षीरन् । विक्षीष्ठाः विक्षीयास्थाम् विक्षीध्वम् । विक्षीय विक्षीवहि विक्षीमहि । **९. लुङ्** - (i) अविजत्[२] अविजताम् अविजन् । अविजः अविजतम् अविजत । अविजम् अविजाव अविजाम । (ii) अवैक्षीत् अवैक्ताम् अवैक्षुः । अवैक्षीः अवैक्तम् अवैक्त । अवैक्षम् अवैष्व अवैष्म । (iii) अविक्त अविक्षाताम् अविक्षत । अविक्थाः अविक्षाथाम् अविकग्ध्वम् । अविक्षि अविक्ष्वहि अविक्ष्महि । **१०. लृङ्** - (i) अवेक्ष्यत् अवेक्ष्यताम् अवेक्ष्यन् । अवेक्ष्यः अवेक्ष्यतम् अवेक्ष्यत । अवेक्ष्यम् अवेक्ष्याव अवेक्ष्याम । (ii) अवेक्ष्यत अवेक्ष्येताम् अवेक्ष्यन्त । अवेक्ष्यथाः अवेक्ष्येथाम् अवेक्ष्यध्वम् । अवेक्ष्ये अवेक्ष्यावहि अवेक्ष्यामहि ।

णिचि - वेजयति - ते, **सनि** - विविक्षति - ते, **यकि** - विज्यते

१. 'निजां त्रयाणां गुणः श्लौ' - णिजिर् विजिर् विष् एषाम् अभ्यासस्य गुणः स्यात् श्लौ ।

२. इरित्वात् अङ् वा ।

१०९५. विष्लृ - व्याप्तौ । सकर्म, अनिट्, उभय । 'व्याप्तौ वेवेष्टि वेविष्टे .....' (श्लो. १७४) इति देवः । 'विषृ' इति काशकृत्स्नः । 'विष्लृ इति कातन्त्रे पाठः' इति च तत्र उक्तम् । 'उदिदित्येके । इरिदिति द्रुमे' इति धा.का.व्याख्या (२.५५) ।

१. लट् - (i) वेवेष्टि[१] वेविष्टः वेविषति । वेवेक्षि वेविष्ठः वेविष्ठ । वेवेष्मि वेविष्वः वेविष्वः । (ii) वेविष्टे वेविषाते वेविषते । वेविक्षे वेविषाथे वेविड्ढ्वे । वेविषे वेविष्वहे वेविष्वहे । **२. लिट्** - (i) विवेष विविषतुः विविषुः । । विवेषिथ विविषथुः विविष । विवेष विविषिव विविषिम । (ii) विविषे विविषाते विविषिरे । विविषिषे विविषाथे विविषिध्वे । विविषे विविषिवहे विविषिमहे । **३. लुट्** - (i) वेष्टा वेष्टारौ वेष्टारः । वेष्टासि वेष्टास्थः वेष्टास्थ । वेष्टास्मि वेष्टास्वः वेष्टास्मः । (ii) वेष्टा वेष्टारौ वेष्टारः । वेष्टासे वेष्टासाथे वेष्टाध्वे । वेष्टाहे वेष्टास्वहे वेष्टास्महे । **४. लृट्** - (i) वेक्ष्यति वेक्ष्यतः वेक्ष्यन्ति । वेक्ष्यसि वेक्ष्यथः वेक्ष्यथ । वेक्ष्यामि वेक्ष्यावः वेक्ष्यामः । (ii) वेक्ष्यते वेक्ष्येते वेक्ष्यन्ते । वेक्ष्यसे वेक्ष्येते वेक्ष्यध्वे । वेक्ष्ये वेक्ष्यावहे वेक्ष्यामहे । **५. लोट्** - (i) वेवेष्टु, वेविष्टात् वेविष्टाम् वेविषतु । वेविड्ढि, वेविष्टात् वेविष्टम् वेविष्ट । वेविषाणि वेविषाव वेविषाम । (ii) वेविष्टाम् वेविषाताम् वेविषताम् । वेविक्ष्व वेविषाथाम् वेविड्ढ्वम् । वेविषै वेविशावहै वेविषामहै । **६. लङ्** - (i) अवेवेट्-ड् अवेविष्टाम् अवेविषुः । अवेवेट्-ड् अवेविष्टम् अवेविष्ट । अवेविषम् अवेविष्व अवेविष्म । (ii) अवेविष्ट अवेविषाताम् अवेविषत । अवेविष्ठाः अवेविषाथाम् अवेविढ्वम् । अवेविषि अवेविष्वहि अवेविष्महि । **७. विधिलिङ्** - (i) वेविष्यात् वेविष्याताम् वेविष्युः । वेविष्याः वेविष्यातम् वेविष्यात । वेविष्याम् वेविष्याव वेविष्याम । (ii) वेविषीत वेविषीयाताम् वेविषीरन् । वेविषीथाः वेविषीयाथाम् वेविषीध्वम् । वेविषीय वेविषीवहि वेविषीमहि । **८. आशीर्लिङ्** - (i) विष्यात् विष्यास्ताम् विष्यासुः । विष्याः विष्यास्तम् विष्यास्त । विष्यासम् विष्यास्व विष्यास्म । (ii) विक्षीष्ट विक्षीयास्ताम् विक्षीरन् । विक्षीष्ठाः विक्षीयास्थाम् विक्षीध्वम् । विक्षीय

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विक्षीवहि विक्षीमहि । **९. लुङ्** - (i) अविषत्[२] अविषताम् अविषन् । अविषः अविषतम् अविषत । अविषम् अविषाव अविषाम । (ii) अवैषीत् अवैष्टाम् अवैषुः । अवैषीः अवैष्टम् अवैष्ट । अवैषम् अवैष्व अवैष्म । (iii) अविक्षत[३] अविक्षाताम् अविक्षत । अविक्षथाः अविक्षाथाम् अविक्षध्वम् । अविक्षि अविक्षावहि अविक्षामहि । **१०. लृङ्** - (i) अवेक्ष्यत् अवेक्ष्यताम् अवेक्ष्यन् । अवेक्ष्यः अवेक्ष्यतम् अवेक्ष्यत । अवेक्ष्यम् अवेक्ष्याव अवेक्ष्याम । (ii) अवेक्ष्यत अवेक्ष्येताम् अवेक्ष्यन्त । अवेक्ष्यथाः अवेक्ष्येथाम् अवेक्ष्यध्वम् । अवेक्ष्ये अवेक्ष्यावहि अवेक्ष्यामहि ।

णिचि - वेषयति - ते, **सनि** - विविक्षति - ते, **यकि** - विष्यते ।

१. 'निजां त्रयाणां गुणः श्लौ' - णिजिर् विजिर् विष् एषाम् अभ्यासस्य गुणः स्यात् श्लौ ।

२. इरित्त्वादङ् ।

३. 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशः ।

१०९६. घृ - क्षरणदीप्त्योः । सकर्म, अनिट्, परस्मै, (छान्दसः[१]) । 'यद्दीप्तौ क्षरणे जिघर्ति तदिदं केचिद्विदुश्छान्दसम्' (श्लो.३३) इति देवः । क्षरणं = स्रवणम् इति क्षीरस्वामी ।

१. लट् - (i) जघर्ति जघृतः जघ्रति । जघर्षि जघृथः जघृथ । जघर्मि जघृवः जघृमः । (ii) जिघर्ति[२] जिघृतः जिघ्रति । जिघर्षि जिघृथः जिघृथ । जिघर्मि जिघृवः जिघृमः । **२. लिट्** - जघार जघ्रतुः जघ्रुः । जघर्थ जघ्रथुः जघ्र । जघार, जघर जघ्रिव जघ्रिम । **३. लुट्** - घर्ता घर्तारौ घर्तारः । घर्तासि घर्तास्थः घर्तास्थ । घर्तास्मि घर्तास्वः घर्तास्मः । **४. लृट्** - घरिष्यति घरिष्यतः घरिष्यन्ति । घरिष्यसि घरिष्यथः घरिष्यथ । घरिष्यामि घरिष्यावः घरिष्यामः । **५. लोट्** - (i) जघर्तु, जघृतात् जघृताम् जघ्रतु । जघृहि जघृतात् जघृतम् जघृत । जघ्राणि जघ्राव जघ्राम । (ii) जिघर्तु, जिघृतात् जिघृताम् जिघ्रतु । जिघृहि जिघृतात् जिघृतम् जिघृत । जिघ्राणि जिघ्राव जिघ्राम । **६. लङ्** - (i) अजघः अजघृताम् अजघरुः । अजघरम् अजघृतम् अजघृत । अजघरम् अजघृव अजघृम । (ii) अजिघः अजिघृताम् अजिघरुः । अजिघरम् अजिघृतम् अजिघृत । अजिघरम् अजिघृव अजिघृम । **७. विधिलिङ्** - (i) जघृयात् जघृयाताम् जघृयुः । जघृयाः जघृयातम् जघृयात । जघृयाम् जघृयाव जघृयाम । (ii) जिघृयात् जिघृयाताम् जिघृयुः । जिघृयाः जिघृयातम् जिघृयात । जिघृयाम् जिघृयाव जिघृयाम । **८. आशीर्लिङ्** - घ्रियात् घ्रियास्ताम् घ्रियासुः । घ्रियाः घ्रियास्तम् घ्रियास्त । घ्रियासम् घ्रियास्व घ्रियास्म । **९. लुङ्** - अघार्षीत् अघार्ष्टाम् अघार्षुः । अघार्षीः अघार्ष्टम् अघार्ष्ट । अघार्षम् अघार्ष्व अघार्ष्म । **१०. लृङ्** - अघरिष्यत् अघरिष्यताम् अघरिष्यन् । अघरिष्यः अघरिष्यतम् अघरिष्यत । अघरिष्यम् अघरिष्याव अघरिष्याम ।

णिचि - घारयति - ते, **सनि** - जिघीर्षति, **यकि** - घ्रियते ।

१. 'आ गणान्तात् परस्मैपदिनः छान्दसाश्च' इति कौमुदी ।

२. बहुलं छन्दसि इति इत्वे जिघर्ति इत्यादि अपि । मा.धा.वृत्तौ इत्वोपेतमेव रूपं दर्शितम् ।

१०९७. हृ - प्रसह्यहरणे । सकर्म, अनिट्, परस्मै, (छान्दसः) । 'प्रसह्यहृत्यां हरणे जिहर्ति हरते हरेत्' (श्लो. २७) इति देवः ।

१. लट् - (i) जहर्ति जहृतः जह्रति । जहर्षि जहृथः जहृथ । जहर्मि जहृवः जहृमः । (ii) जिहर्ति[१] जिहृतः जिह्रति । जिहर्षि जिहृथः जिहृथ । जिहर्मि जिहृवः जिहृमः । **२. लिट्** - जहार जह्रतुः जह्रुः । जहर्थ जह्रथुः जह्र । जहार, जहर जह्रिव जह्रिम । **३. लुट्** - हर्ता हर्तारौ हर्तारः । हर्तासि हर्तास्थः हर्तास्थ । हर्तास्मि हर्तास्वः हर्तास्मः । **४. लृट्** - हरिष्यति हरिष्यतः हरिष्यन्ति । हरिष्यसि हरिष्यथः हरिष्यथ । हरिष्यामि हरिष्यावः हरिष्यामः । **५. लोट्** - (i) जहर्तु, जहृतात् जहृताम् जह्रतु । जहृहि जहृतात् जहृतम् जहृत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जहाणि जहाव जहाम । (ii) जिहर्तु, जिहृतात् जिहृताम् जिहृतु । जिहृहि जिहृतात् जिहृतम् जिहृत । जिहाणि जिहाव जिहाम । **६. लङ्** - (i) अजहः अजहृताम् अजहरुः । अजहरम् अजहृतम् अजहृत । अजहरम् अजहृव अजहृम । (ii) अजिहः अजिहृताम् अजिहरुः । अजिहरम् अजिहृतम् अजिहृत । अजिहरम् अजिहृव अजिहृम । **७. विधिलिङ्** - (i) जहृयात् जहृयाताम् जहृयुः । जहृयाः जहृयातम् जहृयात । जहृयाम् जहृयाव जहृयाम । (ii) जिहृयात् जिहृयाताम् जिहृयुः । जिहृयाः जिहृयातम् जिहृयात । जिहृयाम् जिहृयाव जिहृयाम । **८. आशीर्लिङ्** - ह्रियात् ह्रियास्ताम् ह्रियासुः । ह्रियाः ह्रियास्तम् ह्रियास्त । ह्रियासम् ह्रियास्व ह्रियास्म । **९. लुङ्** - अहार्षीत् अहार्ष्टाम् अहार्षुः । अहार्षीः अहार्ष्टम् अहार्ष्ट । अहार्षम् अहार्ष्व अहार्ष्म । **१०. लृङ्** - अहरिष्यत् अहरिष्यताम् अहरिष्यन् । अहरिष्यः अहरिष्यतम् अहरिष्यत । अहरिष्यम् अहरिष्याव अहरिष्याम ।

णिचि - हारयति - ते, **सनि** - जिहीर्षति, **यकि** - ह्रियते ।

१. अत्रापि अभ्यासस्य छान्दसम् इत्त्वं भवति इति कौमुदी ।

१०९८. ऋ[1] **- गतौ ।** सकर्म, अनिट्, परस्मै, (छान्दसः) । 'तत्रेयत्यृच्छतीत्यर्तेः श्रि गतौ स्याद् ऋणाति तु' (श्लो.३०) इति देवः ।

१. लट् - इयर्ति इयृतः इय्रति । इयर्षि इयृथः इयृथ । इयर्मि इयृवः इयृमः । **२. लिट्** - आर आरतुः आरुः । आरिथ आरथुः आर । आर आरिव आरिम । **३. लुट्** - अर्ता अर्तारौ अर्तारः । अर्तासि अर्तास्थः अर्तास्थ । अर्तास्मि अर्तास्वः अर्तास्मः । **४. लृट्** - अरिष्यति अरिष्यतः अरिष्यन्ति । अरिष्यसि अरिष्यथः अरिष्यथ । अरिष्यामि अरिष्यावः अरिष्यामः । **५. लोट्** - इयर्तु, इयृतात् इयृताम् इय्रतु । इयृहि, इयृतात् इयृतम् इयृत । इयराणि इयराव इयराम । **६. लङ्** - ऐयः ऐयृताम् ऐयरुः । ऐयः ऐयृतम् ऐयृत । ऐयरम् ऐयृव ऐयृम । **७. विधिलिङ्** - इयृयात् इयृयाताम् इयृयुः । इयृयाः इयृयातम् इयृयात । इयृयाम् इयृयाव इयृयाम । **८. आशीर्लिङ्** - अर्यात् अर्यास्ताम् अर्यासुः । अर्याः अर्यास्तम् अर्यास्त । अर्यासम् अर्यास्व अर्यास्म । **९. लुङ्** - आरत्[2] आरताम् आरन् । आरः आरतम् आर । आरम् आराव आराम । **१०. लृङ्** - आरिष्यत् आरिष्यताम् आरिष्यन् । आरिष्यः आरिष्यतम् आरिष्यत । आरिष्यम् आरिष्याव आरिष्याम ।

णिचि - आरयति - ते, **सनि** - अरिरिषति, **यकि** - अर्यते ।

१. ''अस्य च अर्तेः घृप्रभृतित्वेऽपि भाषायामपि प्रयोगः दृश्यते । तच्च 'बहुलं छन्दसि' (७.४.७८) इत्येव इत्त्वे सिद्धे अर्तेः पृथग् इत्वविधानसामर्थ्यात् अवसीयते' इति 'अर्तिपिपर्त्योश्च' (७.४.७७) इत्यत्र भाष्ये स्थितम्'' इति पुरुषकारे लीलाशुकः । बालमनोरमायां मा.धा.वृत्तौ चापि अयमंशः विवृतः ।

२. 'सर्तिशास्त्यर्तिभ्यश्च' इति अङि ऋदृशोऽङि गुणः ।

१०९९. सृ - गतौ । सकर्म, अनिट्, परस्मै, (छान्दसः) ।

१. लट् - ससर्ति ससृतः सस्रति । ससर्षि ससृथः ससृथ । ससर्मि ससृवः ससृमः । **२. लिट्** - ससार सस्रतुः सस्रुः । ससर्थ सस्रथुः सस्र । ससार, ससर ससृव ससृम । **३. लुट्** - सर्ता सर्तारौ सर्तारः । सर्तासि सर्तास्थः सर्तास्थ । सर्तास्मि सर्तास्वः सर्तास्मः । **४. लृट्** - सरिष्यति सरिष्यतः सरिष्यन्ति । सरिष्यसि सरिष्यथः सरिष्यथ । सरिष्यामि सरिष्यावः सरिष्यामः । **५. लोट्** - ससर्तु-ससृतात् ससृताम् सस्रतु । ससृहि, ससृतात् ससृतम् ससृत । ससराणि ससराव ससराम । **६. लङ्** - अससः अससृताम् अससरुः । अससः अससृतम् अससृत । अससरम् अससृव अससृम । **७. विधिलिङ्** - ससृयात् ससृयाताम् ससृयुः । ससृयाः ससृयातम् ससृयात । ससृयाम् ससृयाव ससृयाम । **८. आशीर्लिङ्** - स्त्रियात् स्त्रियास्ताम् स्त्रियासुः । स्त्रियाः स्त्रियास्तम् स्त्रियास्त । स्त्रियासम् स्त्रियास्व स्त्रियास्म । **९. लुङ्** -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

असरत् असरताम् असरन् । असरः असरतम् असर । असरम् असराव असराम । **१०. लृङ्** - असरिष्यत् असरिष्यताम् असरिष्यन् । असरिष्यः असरिष्यतम् असरिष्यत । असरिष्यम् असरिष्याव असरिष्याम ।

णिचि - सारयति - ते, **सनि** - सिसीर्षति, **यकि** - सर्यते ।

११००. भस - भर्त्सनदीप्त्योः । अकर्म, सेट्, परस्मै, (छान्दसः) । 'भक्षणदीप्त्योः इति प्रामाणिकः इति, भर्त्सनभक्षणशब्दयोः तुल्यश्रुत्या पाठभेदः इति वा प्रतिभाति' इति कृदन्तरूपमाला ।

१. लट् - बभस्ति बब्धः[१] बप्सति । बभस्सि बब्धः बब्ध । बभस्मि बप्स्वः बप्स्मः । **२. लिट्** - बभास बप्सतुः बप्सुः । बभसिथ बप्सथुः बप्स । बभास-बभस बप्सिव बप्सिम । **३. लुट्** - भसिता भसितारौ भसितारः । भसितासि भसितास्थः भसितास्थ । भसितास्मि भसितास्वः भसितास्मः । **४. लृट्** - भसिष्यति भसिष्यतः भसिष्यन्ति । भसिष्यसि भसिष्यथः भसिष्यथ । भसिष्यामि भसिष्यावः भसिष्यामः । **५. लोट्** - बभस्तु, बब्धात् बब्धाम् बप्सतु । बब्धि, बब्धात् बब्धम् बब्ध । बभसानि बभसाव बभसाम । **६. लङ्** - अबभः अबब्धाम् अबप्सुः । अबभः अबब्धम् अबब्ध । अबप्सम् अबप्स्व अबप्स्म । **७. विधिलिङ्** - बप्स्यात् बप्स्याताम् बप्स्युः । बप्स्याः बप्स्यातम् बप्स्यात । बप्स्याम् बप्स्याव बप्स्याम । **८. आशीर्लिङ्** - भस्यात् भस्यास्ताम् भस्यासुः । भस्याः भस्यास्तम् भस्यास्त । भस्यासम् भस्यास्व भस्यास्म । **९. लुङ्** - (i) अभसीत् अभसिष्टाम् अभसिषुः । अभसीः अभसिष्टम् अभसिष्ट । अभसिषम् अभसिष्व अभसिष्म । (ii) अभासीत् अभासिष्टाम् अभासिषुः । अभासीः अभासिष्टम् अभासिष्ट । अभासिषम् अभासिष्व अभासिष्म । **१०. लृङ्** - अभसिष्यत् अभसिष्यताम् अभसिष्यन् । अभसिष्यः अभसिष्यतम् अभसिष्यत । अभसिष्यम् अभसिष्याव अभसिष्याम ।

णिचि - भासयति - ते, **सनि** - बिभासिषति, **यकि** - भस्यते ।

१. 'घसिभसोर्हलि च' इति उपधालोपः ।

११०१. कि - ज्ञाने । सकर्म, अनिट्, परस्मै, (छान्दसः) ।

१. लट् - चिकेति चिकितः चिक्यति । चिकेषि चिकिथः चिकिथ । चिकेमि चिकिवः चिकिमः । **२. लिट्** - चिकाय चिक्यतुः चिक्युः । चिकयिथ-चिकेथ चिक्यथुः चिक्य । चिकाय, चिकय चिक्यिव चिक्यिम । **३. लुट्** - केता केतारौ केतारः । केतासि केतास्थः केतास्थ । केतास्मि केतास्वः केतास्मः । **४. लृट्** - केष्यति केष्यतः केष्यन्ति । केष्यसि केष्यथः केष्यथ । केष्यामि केष्यावः केष्यामः । **५. लोट्** - चिकेतु, चिकितात् चिकिताम् चिक्यतु । चिकिहि चिकितात् चिकितम् चिक्यत । चिकयानि चिकयाव चिकयाम । **६. लङ्** - अचिकेत् अचिकिताम् अचिकयुः । अचिकेः अचिकितम् अचिकित । अचिकयम् अचिकिव अचिकिम । **७. विधिलिङ्** - चिकियात् चिकियाताम् चिकियुः । चिकियाः चिकियातम् चिकियात । चिकियाम् चिकियाव चिकियाम । **८. आशीर्लिङ्** - कीयात् कीयास्ताम् कीयासुः । कीयाः कीयास्तम् कीयास्त । कीयासम् कीयास्व कीयास्म । **९. लुङ्** - अकैषीत् अकैष्टाम् अकैषुः । अकैषीः अकैष्टम् अकैष्ट । अकैषम् अकैष्व अकैष्म । **१०. लृङ्** - अकेष्यत् अकेष्यताम् अकेष्यन् । अकेष्यः अकेष्यतम् अकेष्यत । अकेष्यम् अकेष्याव अकेष्याम ।

णिचि - काययति - ते, **सनि** - चिकीषति, **यकि** - कीयते ।

११०२. तुर - त्वरणे । अकर्म, सेट्, परस्मै, (छान्दसः)

१. लट् - तुतोर्ति तुतूर्तः तुतुरति । तुतोर्षि तुतूर्थः तुतूर्थ । तुतोर्मि तुतूर्वः तुतूर्मः । **२. लिट्** - तुतोर

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तुतुरतुः तुतुरुः । तुतोरिथ तुतुरथुः तुतुर । तुतोर तुतुरिव तुतुरिम । **३. लुट्** - तोरिता तोरितारौ तोरितारः । तोरितासि तोरितास्थः तोरितास्थ । तोरितास्मि तोरितास्वः तोरितास्मः । **४. लृट्** - तोरिष्यति तोरिष्यतः तोरिष्यन्ति । तोरिष्यसि तोरिष्यथः तोरिष्यथ । तोरिष्यामि तोरिष्यावः तोरिष्यामः । **५. लोट्** - तुतोर्तु, तुतूर्तात् तुतूर्ताम् तुतुरतु । तुतूर्हि तुतूर्तात् तुतूर्तम् तुतुरत । तुतोराणि तुतोराव तुतोराम । **६. लङ्** - अतुतोः अतुतूर्ताम् अतुतुरुः । अतुतोः अतुतूर्तम् अतुतूर्त । अतुतोरम् अतुतूर्व अतुतूर्म । **७. विधिलिङ्** - तुतूर्यात् तुतूर्याताम् तुतूर्युः । तुतूर्याः तुतूर्यातम् तुतूर्यात । तुतूर्याम् तुतूर्याव तुतूर्याम । **८. आशीर्लिङ्** - तूर्यात् तूर्यास्ताम् तूर्यासुः । तूर्याः तूर्यास्तम् तूर्यास्त । तूर्यासम् तूर्यास्व तूर्यास्म । **९. लुङ्** - अतोरीत् अतोरिष्टाम् अतोरिषुः । अतोरीः अतोरिष्टम् अतोरिष्ट । अतोरिषम् अतोरिष्व अतोरिष्म । **१०. लृङ्** - अतोरिष्यत् अतोरिष्यताम् अतोरिष्यन् । अतोरिष्यः अतोरिष्यतम् अतोरिष्यत । अतोरिष्यम् अतोरिष्याव अतोरिष्याम ।

णिचि - तोरयति - ते, **सनि** - तुतुरिषति/तुतोरिषति - ते, **यकि** - तुर्यते

११०३. धिष - शब्दे । अकर्म, सेट्, परस्मै, (छान्दसः) ।

१. लट् - दिधेष्टि दिधिष्टः दिधिषति । दिधेक्षि दिधिष्ठः दिधिष्ठ । दिधेष्मि दिधिष्वः दिधिष्मः । **२. लिट्** - दिधेष दिधिषतुः दिधिषुः । दिधेषिथ दिधिषथुः दिधिष । दिधेष दिधिषिव दिधिषिम । **३. लुट्** - धेषिता धेषितारौ धेषितारः । धेषितासि धेषितास्थः धेषितास्थ । धेषितास्मि धेषितास्वः धेषितास्मः । **४. लृट्** - धेषिष्यति धेषिष्यतः धेषिष्यन्ति । धेषिष्यसि धेषिष्यथः धेषिष्यथ । धेषिष्यामि धेषिष्यावः धेषिष्यामः । **५. लोट्** - दिधेष्टु, दिधिष्टात् दिधिष्टाम् दिधिषतु । दिधिड्ढि दिधिष्टात् दिधिष्टम् दिधिष्ट । दिधिषाणि दिधिषाव दिधिषाम । **६. लङ्** - अदिधेट् अदिधिष्टाम् अदिधिषुः । अदिधेट् अदिधिष्टम् अदिधिष्ट । अदिधेषम् अदिधिष्व अदिधिष्म । **७. विधिलिङ्** - दिधिष्यात् दिधिष्याताम् दिधिष्युः । दिधिष्याः दिधिष्यातम् दिधिष्यात । दिधिष्याम् दिधिष्याव दिधिष्याम । **८. आशीर्लिङ्** - धिष्यात् धिष्यास्ताम् धिष्यासुः । धिष्याः धिष्यास्तम् धिष्यास्त । धिष्यासम् धिष्यास्व धिष्यास्म । **९. लुङ्** - अधेषीत् अधेषिष्टाम् अधेषिषुः । अधेषीः अधेषिष्टम् अधेषिष्ट । अधेषिषम् अधेषिष्व अधेषिष्म । **१०. लृङ्** - अधेषिष्यत् अधेषिष्यताम् अधेषिष्यन् । अधेषिष्यः अधेषिष्यतम् अधेषिष्यत । अधेषिष्यम् अधेषिष्याव अधेषिष्याम ।

णिचि - धेषयति - ते, **सनि** - दिधिषिषति/दिधेषिषति, **यकि** - धिष्यते

११०४. धन - धान्ये । अकर्म, सेट्, परस्मै, (छान्दसः) । 'धान्ये = धान्यार्जने इत्यर्थः' इति सि. कौमुदी ।

१. लट् - दधन्मः दधन्तः दधनति । दधंसि दधन्थः दधन्थ । दधन्मि दधन्वः दधन्मः । **२. लिट्** - दधान दधनतुः दधनुः । दधनिथ दधनथुः दधन । दधान, दधन दधनिव दधनिम । **३. लुट्** - धनिता धनितारौ धनितारः । धनितासि धनितास्थः धनितास्थ । धनितास्मि धनितास्वः धनितास्मः । **४. लृट्** - धनिष्यति धनिष्यतः धनिष्यन्ति । धनिष्यसि धनिष्यथः धनिष्यथ । धनिष्यामि धनिष्यावः धनिष्यामः । **५. लोट्** - दधन्तु, दधन्तात् दधन्ताम् दधनतु । दधन्हि दधन्तात् दधन्तम् दधनत । दधनानि दधनाव दधनाम । **६. लङ्** - अदधन् अदधन्ताम् अदधनुः । अदधन् अदधन्तम् अदधन्त । अदधनम् अदधन्व अदधन्म । **७. विधिलिङ्** - दधन्यात् दधन्याताम् दधन्युः । दधन्याः दधन्यातम् दधन्यात । दधन्याम् दधन्याव दधन्याम । **८. आशीर्लिङ्** - धन्यात् धन्यास्ताम् धन्यासुः । धन्याः धन्यास्तम् धन्यास्त । धन्यासम् धन्यास्व धन्यास्म । **९. लुङ्** - (i) अधनीत् अधनिष्टाम् अधनिषुः । अधनीः अधनिष्टम् अधनिष्ट । अधनिषम् अधनिष्व अधनिष्म । (ii) अधानीत् अधानिष्टाम् अधानिषुः । अधानीः अधानिष्टम् अधानिष्ट । अधानिषम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अधानिष्व अधानिष्म । **१०. लृङ्** – अधनिष्यत् अधनिष्यताम् अधनिष्यन् । अधनिष्यः अधनिष्यतम् अधनिष्यत । अधनिष्यम् अधनिष्याव अधनिष्याम ।

णिचि – धानयति ते, **सनि** – दिधनिषति, **यकि** – धन्यते ।

११०५. जन – जनने । उत्पत्तौ अकर्मकः, उत्पादने सकर्मकः, सेट्, परस्मै, (छान्दसः) ।

१. लट् – जजन्ति जजातः जज्ञति । जजंसि जजाथः जजाथ । जजन्मि जजन्वः जजन्मः । **२. लिट्** – जजान जज्ञतुः जज्ञुः । जजनिथ जज्ञथुः जज्ञ । जजान, जजन जज्ञिव जज्ञिम । **३. लुट्** – जनिता जनितारौ जनितारः । जनितासि जनितास्थः जनितास्थ । जनितास्मि जनितास्वः जनितास्मः । **४. लृट्** – जनिष्यति जनिष्यतः जनिष्यन्ति । जनिष्यसि जनिष्यथः जनिष्यथ । जनिष्यामि जनिष्यावः जनिष्यामः । **५. लोट्** – जजन्तु, जजातात् जजाताम् जज्ञतु । जजाहि जजातात् जजातम् जजात । जजनानि जजनाव जजनाम । **६. लङ्** – अजजन् अजजाताम् अजज्ञुः । अजजन् अजजातम् अजज्ञत । अजजनम् । अजजन्व अजजन्म । **७. विधिलिङ्** – (i) जजन्यात् जजन्याताम् जजन्युः । जजन्याः जजन्यातम् जजन्यात । जजन्याम् जजन्याव जजन्याम । (ii) जजायात् जजायाताम् जजयुः । जजायाः जजायातम् जजायात । जजायाम् जजायाव जजायाम । **८. आशीर्लिङ्** – (i)[1] जन्यात् जन्यास्ताम् जन्यासुः । जन्याः जन्यास्तम् जन्यास्त । जन्यासम् जन्यास्व जन्यास्म । (ii) जायात् जायास्ताम् जायासुः । जायाः जायास्तम् जायास्त । जायासम् जायास्व जायास्म । **९. लुङ्** – (i) अजनीत् अजनिष्टाम् अजनिषुः । अजनीः अजनिष्टम् अजनिष्ट । अजनिषम् अजनिष्व अजनिष्म । (ii) अजानीत् अजानिष्टाम् अजानिषुः । अजानीः अजानिष्टम् अजानिष्ट । अजानिषम् अजानिष्व अजानिष्म । **१०. लृङ्** – अजनिष्यत् अजनिष्यताम् अजनिष्यन् । अजनिष्यः अजनिष्यतम् अजनिष्यत । अजनिष्यम् अजनिष्याव अजनिष्याम ।

णिचि – जानयति – ते, **सनि** – जिजनिषति, **यकि** – जन्यते ।

१. 'ये विभाषा' इति वा आत्वम् ।

११०६. गा – स्तुतौ । सकर्म, अनिट्, परस्मै, (छान्दसः) 'जनेन च' इति क्षीरस्वामी ।

१. लट् – जिगाति जिगीतः जिगति । जिगासि जिगीथः जिगीथ । जिगामि जिगीवः जिगीमः । **२. लिट्** – जगौ जगतुः जगुः । जगिथ-जगाथ जगथुः जग । जगौ जगिव जगिम । **३. लुट्** – गाता गातारौ गातारः । गातासि गातास्थः गातास्थ । गातास्मि गातास्वः गातास्मः । **४. लृट्** – गास्यति गास्यतः गास्यन्ति । गास्यसि गास्यथः गास्यथ । गास्यामि गास्यावः गास्यामः । **५. लोट्** – जिगातु, जिगीतात् जिगीताम् जिगतु । जिगीहि जिगीतात् जिगीतम् जिगत । जिगानि जिगाव जिगाम । **६. लङ्** – अजिगात् अजिगीताम् अजिगुः । अजिगाः अजिगीतम् अजिगीत । अजिगाम् अजिगीव अजिगीम । **७. विधिलिङ्** – जिगीयात् जिगीयाताम् जिगीयुः । जिगीयाः जिगीयातम् जिगीयात । जिगीयाम् जिगीयाव जिगीयाम । **८. आशीर्लिङ्** – गायात् गायास्ताम् गायासुः । गायाः गायास्तम् गायास्त । गायासम् गायास्व गायास्म । **९. लुङ्** – अगासीत् अगासिष्टाम् अगासिषुः । अगासीः अगासिष्टम् अगासिष्ट । अगासिषम् अगासिष्व अगासिष्म । **१०. लृङ्** – अगास्यत् अगास्यताम् अगास्यन् । अगास्यः अगास्यतम् अगास्यत । अगास्यम् अगास्याव अगास्याम ।

णिचि – गापयति – ते, **सनि** – जिगासति, **यकि** – गीयते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ दिवादिः (४)

११०७. दिवु - क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु । सकर्म, सेट्, परस्मै । व्यवहारः = क्रयविक्रयादिः । यथासम्भवं सकर्मकत्वाकर्मकत्वे बोध्ये । 'अर्दने देवयेत्, दीव्येत् क्रीडादौ, परिकूजने । देवयेत, इदितो दिन्वेत्, देवेर्देवेत देवने' (श्लो.१६०-१६१) इति देवः ।

१. लट् - दीव्यति[1] दीव्यतः दीव्यन्ति । दीव्यसि दीव्यथः दीव्यथ । दीव्यामि दीव्यावः दीव्यामः । **२. लिट्** - दिदेव दिदिवतुः दिदिवुः । दिदेविथ दिदिवथुः दिदिव । दिदेव दिदिविव दिदिविम । **३. लुट्** - देविता देवितारौ देवितारः । देवितासि देवितास्थः देवितास्थ । देवितास्मि देवितास्वः देवितास्मः । **४. लृट्** - देविष्यति देविष्यतः देविष्यन्ति । देविष्यसि देविष्यथः देविष्यथ । देविष्यामि देविष्यावः देविष्यामः । **५. लोट्** - दीव्यतु, दीव्यतात् दीव्यताम् दीव्यन्तु । दीव्य दीव्यतात् दीव्यतम् दीव्यत । दीव्यानि दीव्याव दीव्याम । **६. लङ्** - अदीव्यत् अदीव्यताम् अदीव्यन् । अदीव्यः अदीव्यतम् अदीव्यत । अदीव्यम् अदीव्याव अदीव्याम । **७. विधिलिङ्** - दीव्येत् दीव्येताम् दीव्येयुः । दीव्येः दीव्येतम् दीव्येत । दीव्येयम् दीव्येव दीव्येम । **८. आशीर्लिङ्** - दीव्यात् दीव्यास्ताम् दीव्यासुः । दीव्याः दीव्यास्तम् दीव्यास्त । दीव्यासम् दीव्यास्व दीव्यास्म । **९. लुङ्** - अदेवीत् अदेविष्टाम् अदेविषुः । अदेवीः अदेविष्टम् अदेविष्ट । अदेविषम् अदेविष्व अदेविष्म । **१०. लृङ्** - अदेविष्यत् अदेविष्यताम् अदेविष्यन् । अदेविष्यः अदेविष्यतम् अदेविष्यत । अदेविष्यम् अदेविष्याव अदेविष्याम ।

णिचि - देवयति-ते, **सनि** - दिदेविषति/दिद्यूषति[2], **यकि** - दीव्यते ।

१. 'दिवादिभ्यः श्यन्' इति श्यन् । शपः अपवादः । 'हलि च' इति दीर्घः ।

२. 'सनीवन्त...' इति वेट् । इडभावपक्षे 'च्छ्वोः शूडनुनासिके च' इति ऊठ् ।

११०८. षिवु - तन्तुसन्ताने । सकर्म, सेट्, परस्मै,

१. लट् - सीव्यति सीव्यतः सीव्यन्ति । सीव्यसि सीव्यथः सीव्यथ । सीव्यामि सीव्यावः सीव्यामः । **२. लिट्** - सिषेव सिषिवतुः सिषिवुः । सिषेविथ सिषिवथुः सिषिव । सिषेव सिषिविव सिषिविम । **३. लुट्** - सेविता सेवितारौ सेवितारः । सेवितासि सेवितास्थः सेवितास्थ । सेवितास्मि सेवितास्वः सेवितास्मः । **४. लृट्** - सेविष्यति सेविष्यतः सेविष्यन्ति । सेविष्यसि सेविष्यथः सेविष्यथ । सेविष्यामि सेविष्यावः सेविष्यामः । **५. लोट्** - सीव्यतु, सीव्यतात् सीव्यताम् सीव्यन्तु । सीव्य सीव्यतात् सीव्यतम् सीव्यत । सीव्यानि सीव्याव सीव्याम । **६. लङ्** - असीव्यत् असीव्यताम् असीव्यन् । असीव्यः असीव्यतम् असीव्यत । असीव्यम् असीव्याव असीव्याम । **७. विधिलिङ्** - सीव्येत् सीव्येताम् सीव्येयुः । सीव्येः सीव्येतम् सीव्येत । सीव्येयम् सीव्येव सीव्येम । **८. आशीर्लिङ्** - सीव्यात् सीव्यास्ताम् सीव्यासुः । सीव्याः सीव्यास्तम् सीव्यास्त । सीव्यासम् सीव्यास्व सीव्यास्म । **९. लुङ्** - असेवीत् असेविष्टाम् असेविषुः । असेवीः असेविष्टम् असेविष्ट । असेविषम् असेविष्व असेविष्म । **१०. लृङ्** - असेविष्यत् असेविष्यताम् असेविष्यन् । असेविष्यः असेविष्यतम् असेविष्यत । असेविष्यम् असेविष्याव असेविष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – सेवयति-ते, **सनि** – सिसेविषति/सुस्यूषति[1], **यकि** – सीव्यते ।

१. 'सनीवन्त...' इति वेट् । इडभावपक्षे 'च्छ्वोः शूडनुनासिके च' इति ऊठ् ।

११०९. स्त्रिवु – गतिशोषणयोः । सकर्म, सेट्, परस्मै ।

१. लट् – स्त्रीव्यति स्त्रीव्यतः स्त्रीव्यन्ति । स्त्रीव्यसि स्त्रीव्यथः स्त्रीव्यथ । स्त्रीव्यामि स्त्रीव्यावः स्त्रीव्यामः । **२. लिट्** – सिस्त्रेव सिस्त्रिवतुः सिस्त्रिवुः । सिस्त्रेविथ सिस्त्रिवथुः सिस्त्रिव । सिस्त्रेव सिस्त्रिविव सिस्त्रिविम । **३. लुट्** – स्त्रेविता स्त्रेवितारौ स्त्रेवितारः । स्त्रेवितासि स्त्रेवितास्थः स्त्रेवितास्थ । स्त्रेवितास्मि स्त्रेवितास्वः स्त्रेवितास्मः । **४. लृट्** – स्त्रेविष्यति स्त्रेविष्यतः स्त्रेविष्यन्ति । स्त्रेविष्यसि स्त्रेविष्यथः स्त्रेविष्यथ । स्त्रेविष्यामि स्त्रेविष्यावः स्त्रेविष्यामः । **५. लोट्** – स्त्रीव्यतु, स्त्रीव्यतात् स्त्रीव्यताम् स्त्रीव्यन्तु । स्त्रीव्य स्त्रीव्यतात् स्त्रीव्यतम् स्त्रीव्यत । स्त्रीव्याणि स्त्रीव्याव स्त्रीव्याम । **६. लङ्** – अस्त्रीव्यत् अस्त्रीव्यताम् अस्त्रीव्यन् । अस्त्रीव्यः अस्त्रीव्यतम् अस्त्रीव्यत । अस्त्रीव्यम् अस्त्रीव्याव अस्त्रीव्याम । **७. विधिलिङ्** – स्त्रीव्येत् स्त्रीव्येताम् स्त्रीव्येयुः । स्त्रीव्येः स्त्रीव्येतम् स्त्रीव्येत । स्त्रीव्येयम् स्त्रीव्येव स्त्रीव्येम । **८. आशीर्लिङ्** – स्त्रीव्यात् स्त्रीव्यास्ताम् स्त्रीव्यासुः । स्त्रीव्याः स्त्रीव्यास्तम् स्त्रीव्यास्त । स्त्रीव्यासम् स्त्रीव्यास्व स्त्रीव्यास्म । **९. लुङ्** – अस्त्रेवीत् अस्त्रेविष्टाम् अस्त्रेविषुः । अस्त्रेवीः अस्त्रेविष्टम् अस्त्रेविष्ट । अस्त्रेविषम् अस्त्रेविष्व अस्त्रेविष्म । **१०. लृङ्** – अस्त्रेविष्यत् अस्त्रेविष्यताम् अस्त्रेविष्यन् । अस्त्रेविष्यः अस्त्रेविष्यतम् अस्त्रेविष्यत । अस्त्रेविष्यम् अस्त्रेविष्याव अस्त्रेविष्याम ।

णिचि – स्त्रेवयति – ते, **सनि** – सिस्त्रेविषति/सुस्त्रूषति[1], **यकि** – स्त्रीव्यते ।

१. इवन्तत्वात् 'सनीवन्त...' इति वेट् । इडभावपक्षे 'ज्वरत्वर...' इति ऊठ् ।

१११०. ष्ठिवु – निरसने । सकर्म, सेट्, परस्मै । 'केचिदिहामुं न पठन्ति' इति कौमुदी ।

१. लट् – ष्ठीव्यति ष्ठीव्यतः ष्ठीव्यन्ति । ष्ठीव्यसि ष्ठीव्यथः ष्ठीव्यथ । ष्ठीव्यामि ष्ठीव्यावः ष्ठीव्यामः । **२. लिट्** – टिष्ठेव[1] टिष्ठिवतुः टिष्ठिवुः । टिष्ठेविथ टिष्ठिवथुः टिष्ठिव । टिष्ठेव टिष्ठिविव टिष्ठिविम । **३. लुट्** – ष्ठेविता ष्ठेवितारौ ष्ठेवितारः । ष्ठेवितासि ष्ठेवितास्थः ष्ठेवितास्थ । ष्ठेवितास्मि ष्ठेवितास्वः ष्ठेवितास्मः । **४. लृट्** – ष्ठेविष्यति ष्ठेविष्यतः ष्ठेविष्यन्ति । ष्ठेविष्यसि ष्ठेविष्यथः ष्ठेविष्यथ । ष्ठेविष्यामि ष्ठेविष्यावः ष्ठेविष्यामः । **५. लोट्** – ष्ठीव्यतु, ष्ठीव्यतात् ष्ठीव्यताम् ष्ठीव्यन्तु । ष्ठीव्य ष्ठीव्यतात् ष्ठीव्यतम् ष्ठीव्यत । ष्ठीव्यानि ष्ठीव्याव ष्ठीव्याम । **६. लङ्** – अष्ठीव्यत् अष्ठीव्यताम् अष्ठीव्यन् । अष्ठीव्यः अष्ठीव्यतम् अष्ठीव्यत । अष्ठीव्यम् अष्ठीव्याव अष्ठीव्याम । **७. विधिलिङ्** – ष्ठीव्येत् ष्ठीव्येताम् ष्ठीव्येयुः । ष्ठीव्येः ष्ठीव्येतम् ष्ठीव्येत । ष्ठीव्येयम् ष्ठीव्येव ष्ठीव्येम । **८. आशीर्लिङ्** – ष्ठीव्यात् ष्ठीव्यास्ताम् ष्ठीव्यासुः । ष्ठीव्याः ष्ठीव्यास्तम् ष्ठीव्यास्त । ष्ठीव्यासम् ष्ठीव्यास्व ष्ठीव्यास्म । **९. लुङ्** – अष्ठेवीत् अष्ठेविष्टाम् अष्ठेविषुः । अष्ठेवीः अष्ठेविष्टम् अष्ठेविष्ट । अष्ठेविषम् अष्ठेविष्व अष्ठेविष्म । **१०. लृङ्** – अष्ठेविष्यत् अष्ठेविष्यताम् अष्ठेविष्यन् । अष्ठेविष्यः अष्ठेविष्यतम् अष्ठेविष्यत । अष्ठेविष्यम् अष्ठेविष्याव अष्ठेविष्याम ।

णिचि – ष्ठेवयति – ते, **सनि** – टिष्ठेविषति/टिष्ठ्यूषति[2], **यकि** – ष्ठीव्यते ।

१. केचित् द्वितीयं वर्णं थकारं पठन्ति । तथा सति तु – **तिष्ठेव तिष्ठिवतुः** इत्यादीनि रूपाणि ।

२. इवन्तत्वात् 'सनीवन्त...' इति वेट् । इडभावपक्षे 'ज्वरत्वर...' इति ऊठ् ।

११११. ष्णुसु – अदने । सकर्म, सेट्, परस्मै । आदाने इत्येके । अदर्शनि इत्यपरे ।

१. लट् – स्नुस्यति स्नुस्यतः स्नुस्यन्ति । स्नुस्यसि स्नुस्यथः स्नुस्यथ । स्नुस्यामि स्नुस्यावः स्नुस्यामः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. लिट् – सुष्णोस सुष्णुसतुः सुष्णुसुः । सुष्णोसिथ सुष्णुसथुः सुष्णुस । सुष्णोस, सुष्णुस सुष्णुसिव सुष्णुसिम । **३. लुट्** – स्नोसिता स्नोसितारौ स्नोसितारः । स्नोसितासि स्नोसितास्थः स्नोसितास्थ । स्नोसितास्मि स्नोसितास्वः स्नोसितास्मः । **४. लृट्** – स्नोसिष्यति स्नोसिष्यतः स्नोसिष्यन्ति । स्नोसिष्यसि स्नोसिष्यथः स्नोसिष्यथ । स्नोसिष्यामि स्नोसिष्यावः स्नोसिष्यामः । **५. लोट्** – स्नुस्यतु, स्नुस्यतात् स्नुस्यताम् स्नुस्यन्तु । स्नुस्य स्नुस्यतात् स्नुस्यतम् स्नुस्यत । स्नुस्यानि स्नुस्याव स्नुस्याम । **६. लङ्** – अस्नुस्यत् अस्नुस्यताम् अस्नुस्यन् । अस्नुस्यः अस्नुस्यतम् अस्नुस्यत । अस्नुस्यम् अस्नुस्याव अस्नुस्याम । **७. विधिलिङ्** – स्नुस्येत् स्नुस्येताम् स्नुस्येयुः । स्नुस्येः स्नुस्येतम् स्नुस्येत । स्नुस्येयम् स्नुस्येव स्नुस्येम । **८. आशीर्लिङ्** – स्नुस्यात् स्नुस्यास्ताम् स्नुस्यासुः । स्नुस्याः स्नुस्यास्तम् स्नुस्यास्त । स्नुस्यासम् स्नुस्यास्व स्नुस्यास्म । **९. लुङ्** – अस्नोसीत् अस्नोसिष्टाम् अस्नोसिषुः । अस्नोषीः अस्नोसिष्टम् अस्नोसिष्ट । अस्नोसिषम् अस्नोसिष्व अस्नोसिष्म । **१०. लृङ्** – अस्नोसिष्यत् अस्नोसिष्यताम् अस्नोसिष्यन् । अस्नोसिष्यः अस्नोसिष्यतम् अस्नोसिष्यत । अस्नोसिष्यम् अस्नोसिष्याव अस्नोसिष्याम ।

णिचि – स्नोसयति-ते, **सनि** – सुस्नुसिषति/सुस्नोसिषति[१], **यकि** – स्नुस्यते ।

१. इवन्तत्वात् 'सनीवन्त...' इति वेट् । इडभावपक्षे 'ज्वरत्वर...' इति ऊठ् ।

१११२. ष्णसु – निरसने । सकर्म सेट् परस्मै । आदाने इत्येके । अदर्शने इति द्रमिडाः इति धातुवृत्तिः । स्वामिकाश्यपादिमतानुसारेण अयं धातुः माधवीयादिषु पठितः ।

१. लट् – स्नस्यति स्नस्यतः स्नस्यन्ति । स्नस्यसि स्नस्यथः स्नस्यथ । स्नस्यामि स्नस्यावः स्नस्यामः ।

२. लिट् – सस्नास सस्नसतुः सस्नसुः । सस्नसिथ सस्नसथुः सस्नस । सस्नास, सस्नस सस्नसिव सस्नसिम । **३. लुट्** – स्नसिता स्नसितारौ स्नसितारः । स्नसितासि स्नसितास्थः स्नसितास्थ । स्नसितास्मि स्नसितास्वः स्नसितास्मः । **४. लृट्** – स्नसिष्यति स्नसिष्यतः स्नसिष्यन्ति । स्नसिष्यसि स्नसिष्यथः स्नसिष्यथ । स्नसिष्यामि स्नसिष्यावः स्नसिष्यामः । **५. लोट्** – स्नस्यतु, स्नस्यतात् स्नस्यताम् स्नस्यन्तु । स्नस्य स्नस्यतात् स्नस्यतम् स्नस्यत । स्नस्यानि स्नस्याव स्नस्याम । **६. लङ्** – अस्नस्यत् अस्नस्यताम् अस्नस्यन् । अस्नस्यः अस्नस्यतम् अस्नस्यत । अस्नस्यम् अस्नस्याव अस्नस्याम । **७. विधिलिङ्** – स्नस्येत् स्नस्येताम् स्नस्येयुः । स्नस्येः स्नस्येतम् स्नस्येत । स्नस्येयम् स्नस्येव स्नस्येम । **८. आशीर्लिङ्** – स्नस्यात् स्नस्यास्ताम् स्नस्यासुः । स्नस्याः स्नस्यास्तम् स्नस्यास्त । स्नस्यासम् स्नस्यास्व स्नस्यास्म । **९. लुङ्** – (i) अस्नसीत् अस्नसिष्टाम् अस्नसिषुः । अस्नसीः अस्नसिष्टम् अस्नसिष्ट । अस्नसिषम् अस्नसिष्व अस्नसिष्म । (ii) अस्नासीत् अस्नासिष्टाम् अस्नासिषुः । अस्नासीः अस्नासिष्टम् अस्नासिष्ट । अस्नासिषम् अस्नासिष्व अस्नासिष्म । **१०. लृङ्** – अस्नसिष्यत् अस्नसिष्यताम् अस्नसिष्यन् । अस्नसिष्यः अस्नसिष्यतम् अस्नसिष्यत । अस्नसिष्यम् अस्नसिष्याव अस्नसिष्याम ।

णिचि – स्नासयति-ते, **सनि** – सिस्नसिषति, **यकि** – स्नस्यते

१११३. क्नसु – ह्वरणदीप्त्योः । अकर्म, सेट्, परस्मै । ह्वरणम् = कौटिल्यम् ।

१. लट् – क्नस्यति क्नस्यतः क्नस्यन्ति । क्नस्यसि क्नस्यथः क्नस्यथ । क्नस्यामि क्नस्यावः क्नस्यामः ।

२. लिट् – चक्नास चक्नसतुः चक्नसुः । चक्नसिथ चक्नसथुः चक्नस । चक्नास, चक्नस चक्नसिव चक्नसिम ।

३. लुट् – क्नसिता क्नसितारौ क्नसितारः । क्नसितासि क्नसितास्थः क्नसितास्थ । क्नसितास्मि क्नसितास्वः क्नसितास्मः । **४. लृट्** – क्नसिष्यति क्नसिष्यतः क्नसिष्यन्ति । क्नसिष्यसि क्नसिष्यथः क्नसिष्यथ । क्नसिष्यामि क्नसिष्यावः क्नसिष्यामः । **५. लोट्** – क्नस्यतु, क्नस्यतात् क्नस्यताम् क्नस्यन्तु । क्नस्य क्नस्यतात् क्नस्यतम् क्नस्यत । क्नस्यानि क्नस्याव क्नस्याम । **६. लङ्** – अक्नस्यत् अक्नस्यताम् अक्नस्यन् । अक्नस्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अक्रस्यतम् अक्रस्यत । अक्रस्यम् अक्रस्याव अक्रस्याम । **७. विधिलिङ्** – क्रस्येत् क्रस्येताम् क्रस्येयुः । क्रस्येः क्रस्येतम् क्रस्येत । क्रस्येयम् क्रस्येव क्रस्येम । **८. आशीर्लिङ्** – क्रस्यात् क्रस्यास्ताम् क्रस्यासुः । क्रस्याः क्रस्यास्तम् क्रस्यास्त । क्रस्यासम् क्रस्यास्व क्रस्यास्म । **९. लुङ्** – (i) अक्रसीत् अक्रसिष्टाम् अक्रसिषुः । अक्रसीः अक्रसिष्टम् अक्रसिष्ट । अक्रसिषम् अक्रसिष्व अक्रसिष्म । (ii) अक्रासीत् अक्रासिष्टाम् अक्रासिषुः । अक्रासीः अक्रासिष्टम् अक्रासिष्ट । अक्रासिषम् अक्रासिष्व अक्रासिष्म । **१०. लृङ्** – अक्रसिष्यत् अक्रसिष्यताम् अक्रसिष्यन् । अक्रसिष्यः अक्रसिष्यतम् अक्रसिष्यत । अक्रसिष्यम् अक्रसिष्याव अक्रसिष्याम ।

णिचि – क्रासयति-ते, **सनि** – चिक्रसिषति, **यकि** – क्रस्यते

१११४. व्युष – दाहे । सकर्म, सेट्, परस्मै ।

१. लट् – व्युष्यति व्युष्यतः व्युष्यन्ति । व्युष्यसि व्युष्यथः व्युष्यथ । व्युष्यामि व्युष्यावः व्युष्यामः ।

२. लिट् – वुव्योष वुव्युषतुः वुव्युषुः । वुव्योषिथ वुव्युषथुः वुव्युष । वुव्योष वुव्युषिव वुव्युषिम । **३. लुट्** – व्योषिता व्योषितारौ व्योषितारः । व्योषितासि व्योषितास्थः व्योषितास्थ । व्योषितास्मि व्योषितास्वः व्योषितास्मः । **४. लृट्** – व्योषिष्यति व्योषिष्यतः व्योषिष्यन्ति । व्योषिष्यसि व्योषिष्यथः व्योषिष्यथ । व्योषिष्यामि व्योषिष्यावः व्योषिष्यामः । **५. लोट्** – व्युष्यतु, व्युष्यतात् व्युष्यताम् व्युष्यन्तु । व्युष्य व्युष्यतात् व्युष्यतम् व्युष्यत । व्युष्याणि व्युष्याव व्युष्याम । **६. लङ्** – अव्युष्यत् अव्युष्यताम् अव्युष्यन् । अव्युष्यः अव्युष्यतम् अव्युष्यत । अव्युष्यम् अव्युष्याव अव्युष्याम । **७. विधिलिङ्** – व्युष्येत् व्युष्येताम् व्युष्येयुः । व्युष्येः व्युष्येतम् व्युष्येत । व्युष्येयम् व्युष्येव व्युष्येम । **८. आशीर्लिङ्** – व्युष्यात् व्युष्यास्ताम् व्युष्यासुः । व्युष्याः व्युष्यास्तम् व्युष्यास्त । व्युष्यासम् व्युष्यास्व व्युष्यास्म । **९. लुङ्** – (i) अव्योषीत्[1] अव्योषिष्टाम् अव्योषिषुः । अव्योषीः अव्योषिष्टम् अव्योषिष्ट । अव्योषिषम् अव्योषिष्व अव्योषिष्म । (ii) अव्युषत् अव्युषताम् अव्युषन् । अव्युषः अव्युषतम् अव्युषत । अव्युषम् अव्युषाव अव्युषाम । **१०. लृङ्** – अव्योषिष्यत् अव्योषिष्यताम् अव्योषिष्यन् । अव्योषिष्यः अव्योषिष्यतम् अव्योषिष्यत । अव्योषिष्यम् अव्योषिष्याव अव्योषिष्याम ।

णिचि – व्योषयति-ते, **सनि** – वुव्युषिषति/ वुव्योसिषति[2], **यकि** – व्युष्यते

१. 'अव्योषीत्' इति दाहार्थे । विभागार्थे पुषादित्वात् 'अव्युषत्' इति रूपम् ।

२. 'रलो व्युपधात्....' इति वा कित्त्वम् । कित्त्वे गुणनिषेधः ।

१११५. प्लुष – दाहे । सकर्म. सेट्. परस्मै ।

१. लट् – प्लुष्यति प्लुष्यतः प्लुष्यन्ति । प्लुष्यसि प्लुष्यथः प्लुष्यथ । प्लुष्यामि प्लुष्यावः प्लुष्यामः ।

२. लिट् – पुप्लोष पुप्लुषतुः पुप्लुषुः । पुप्लोषिथ पुप्लुषथुः पुप्लुष । पुप्लोष पुप्लुषिव पुप्लुषिम । **३. लुट्** – प्लोषिता प्लोषितारौ प्लोषितारः । प्लोषितासि प्लोषितास्थः प्लोषितास्थ । प्लोषितास्मि प्लोषितास्वः प्लोषितास्मः । **४. लृट्** – प्लोषिष्यति प्लोषिष्यतः प्लोषिष्यन्ति । प्लोषिष्यसि प्लोषिष्यथः प्लोषिष्यथ । प्लोषिष्यामि प्लोषिष्यावः प्लोषिष्यामः । **५. लोट्** – प्लुष्यतु, प्लुष्यतात् प्लुष्यताम् प्लुष्यन्तु । प्लुष्य प्लुष्यतात् प्लुष्यतम् प्लुष्यत । प्लुष्याणि प्लुष्याव प्लुष्याम । **६. लङ्** – अप्लुष्यत् अप्लुष्यताम् अप्लुष्यन् । अप्लुष्यः अप्लुष्यतम् अप्लुष्यत । अप्लुष्यम् अप्लुष्याव अप्लुष्याम । **७. विधिलिङ्** – प्लुष्येत् प्लुष्येताम् प्लुष्येयुः । प्लुष्येः प्लुष्येतम् प्लुष्येत । प्लुष्येयम् प्लुष्येव प्लुष्येम । **८. आशीर्लिङ्** – प्लुष्यात् प्लुष्यास्ताम् प्लुष्यासुः । प्लुष्याः प्लुष्यास्तम् प्लुष्यास्त । प्लुष्यासम् प्लुष्यास्व प्लुष्यास्म । **९. लुङ्** – अप्लोषीत् अप्लोषिष्टाम् अप्लोषिषुः । अप्लोषीः अप्लोषिष्टम् अप्लोषिष्ट । अप्लोषिषम् अप्लोषिष्व

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अप्लोषिष्म । **१०. लृङ्** - अप्लोषिष्यत् अप्लोषिष्यताम् अप्लोषिष्यन् । अप्लोषिष्यः अप्लोषिष्यतम् अप्लोषिष्यत । अप्लोषिष्यम् अप्लोषिष्याव अप्लोषिष्याम ।

णिचि - प्लोषयति-ते, **सनि** - पुप्लुषिषति/ पुप्लोषिषति[1], **यकि** - प्लुष्यते

१. 'रलो व्युपधात्....' इति वा कित्त्वम् । कित्त्वे गुणनिषेधः ।

१११६. नृती - गात्रविक्षेपे । अकर्म, सेट्, परस्मै ।

१. लट् - नृत्यति नृत्यतः नृत्यन्ति । नृत्यसि नृत्यथः नृत्यथ । नृत्यामि नृत्यावः नृत्यामः । **२. लिट्** - ननर्त ननृततुः ननृतुः । ननर्तिथ ननृतथुः ननृत । ननर्त ननृतिव ननृतिम । **३. लुट्** - नर्तिता नर्तितारौ नर्तितारः । नर्तितासि नर्तितास्थः नर्तितास्थ । नर्तितास्मि नर्तितास्वः नर्तितास्मः । **४. लृट्** - (i) नर्तिष्यति नर्तिष्यतः नर्तिष्यन्ति । नर्तिष्यसि नर्तिष्यथः नर्तिष्यथ । नर्तिष्यामि नर्तिष्यावः नर्तिष्यामः । (ii) नर्त्स्यति[1] नर्त्स्यतः नर्त्स्यन्ति । नर्त्स्यसि नर्त्स्यथः नर्त्स्यथ । नर्त्स्यामि नर्त्स्यावः नर्त्स्यामः । **५. लोट्** - नृत्यतु, नृत्यतात् नृत्यताम् नृत्यन्तु । नृत्य, नृत्यतात् नृत्यतम् नृत्यत । नृत्यानि नृत्याव नृत्याम । **६. लङ्** - अनृत्यत् अनृत्यताम् अनृत्यन् । अनृत्यः अनृत्यतम् अनृत्यत । अनृत्यम् अनृत्याव अनृत्याम । **७. विधिलिङ्** - नृत्येत् नृत्येताम् नृत्येयुः । नृत्येः नृत्येतम् नृत्येत । नृत्येयम् नृत्येव नृत्येम । **८. आशीर्लिङ्** - नृत्यात् नृत्यास्ताम् नृत्यासुः । नृत्याः नृत्यास्तम् नृत्यास्त । नृत्यासम् नृत्यास्व नृत्यास्म । **९. लुङ्** - अनर्तीत् अनर्तिष्टाम् अनर्तिषुः । अनर्तीः अनर्तिष्टम् अनर्तिष्ट । अनर्तिषम् अनर्तिष्व अनर्तिष्म । **१०. लृङ्** - (i) अनर्तिष्यत् अनर्तिष्यताम् अनर्तिष्यन् । अनर्तिष्यः अनर्तिष्यतम् अनर्तिष्यत । अनर्तिष्यम् अनर्तिष्याव अनर्तिष्याम । (ii) अनर्त्स्यत् अनर्त्स्यताम् अनर्त्स्यन् । अनर्त्स्यः अनर्त्स्यतम् अनर्त्स्यत । अनर्त्स्यम् अनर्त्स्याव अनर्त्स्याम ।

णिचि - नर्तयति[2]-ते, **सनि** - निनर्तिषति/निनृत्सति, **यकि** - नृत्यते

१. 'सेऽसिचि कृतचृतच्छृदतृदनृतः' - एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्य इड् वा स्यात् ।

२. अस्य चलनार्थकत्वात् अकर्मकत्वात् च 'निगरणचलनार्थेभ्यश्च' इति, 'अणौ अकर्मकात्..' इति च सूत्रद्वयेन कर्त्रभिप्राये क्रियाफले यत् परस्मैपदं प्राप्तं तत् 'न पादम्याङ्..' इत्यादिना निषिध्यते । अकर्त्रभिप्राये परस्मैपदं स्यात् एव ।

१११७. त्रसी - उद्वेगे । अकर्म, सेट्, परस्मै । उद्वेगः = भयम् इति क्षीरस्वामी । 'त्रसति त्रस्यतीत्येवमुद्वेगार्थे तु वा श्यनि' (श्लो. १९१) इति देवः ।

१. लट् - (i) त्रस्यति त्रस्यतः त्रस्यन्ति । त्रस्यसि त्रस्यथः त्रस्यथ । त्रस्यामि त्रस्यावः त्रस्यामः । (ii) त्रसति[1] त्रसतः त्रसन्ति । त्रससि त्रसथः त्रसथ । त्रसामि त्रसावः त्रसामः । **२. लिट्** - तत्रास तत्रसतुः[2]-त्रेसतुः तत्रसुः-त्रेसुः । तत्रसिथ-त्रेसिथ तत्रसथुः-त्रेसथुः तत्रस-त्रेस । तत्रास, तत्रस तत्रसिव-त्रेसिव तत्रसिम त्रेसिम । **३. लुट्** - त्रसिता त्रसितारौ त्रसितारः । त्रसितासि त्रसितास्थः त्रसितास्थ । त्रसितास्मि त्रसितास्वः त्रसितास्मः । **४. लृट्** - त्रसिष्यति त्रसिष्यतः त्रसिष्यन्ति । त्रसिष्यसि त्रसिष्यथः त्रसिष्यथ । त्रसिष्यामि त्रसिष्यावः त्रसिष्यामः । **५. लोट्** - (i) त्रस्यतु, त्रस्यतात् त्रस्यताम् त्रस्यन्तु । त्रस्य, त्रस्यतात् त्रस्यतम् त्रस्यत । त्रस्यानि त्रस्याव त्रस्याम । (ii) त्रसतु, त्रसतात् त्रसताम् त्रसन्तु । त्रस, त्रसतात् त्रसतम् त्रसत । त्रसानि त्रसाव त्रसाम । **६. लङ्** - (i) अत्रस्यत् अत्रस्यताम् अत्रस्यन् । अत्रस्यः अत्रस्यतम् अत्रस्यत । अत्रस्यम् अत्रसाव अत्रसाम । (ii) अत्रसत् अत्रसताम् अत्रसन् । अत्रसः अत्रसतम् अत्रसत । अत्रसम् अत्रसाव अत्रसाम । **७. विधिलिङ्** - (i) त्रस्येत् त्रस्येताम् त्रस्येयुः । त्रस्येः त्रस्येतम् त्रस्येत । त्रस्येयम् त्रस्येव त्रस्येम । (ii) त्रसेत् त्रसेताम् त्रसेयुः । त्रसेः त्रसेतम् त्रसेत । त्रसेयम् त्रसेव त्रसेम । **८. आशीर्लिङ्** - त्रस्यात् त्रस्यास्ताम् त्रस्यासुः । त्रस्याः त्रस्यास्तम् त्रस्यास्त । त्रस्यासम् त्रस्यास्व त्रस्यास्म । **९. लुङ्** - (i) अत्रसीत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्रसिष्टाम् अत्रसिषुः । अत्रसीः अत्रसिष्टम् अत्रसिष्ट । अत्रसिषम् अत्रसिष्व अत्रसिष्म । (ii) अत्रासीत् अत्रासिष्टाम् अत्रासिषुः । अत्रासीः अत्रासिष्टम् अत्रासिष्ट । अत्रासिषम् अत्रासिष्व अत्रासिष्म । **१०. लृङ्** – अत्रसिष्यत् अत्रसिष्यताम् अत्रसिष्यन् । अत्रसिष्यः अत्रसिष्यतम् अत्रसिष्यत । अत्रसिष्यम् अत्रसिष्याव अत्रसिष्याम ।

णिचि – त्रासयति – ते, **सनि** – तित्रसिषति, **यकि** – त्रस्यते

१. 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति श्यन् वा । श्यनः अभावपक्षे शः ।

२. 'वा जृभ्रमुत्रसाम्' इति एत्वाभ्यासविकल्पः ।

१११८. कुथ – पूतीभावे । अकर्म, सेट्, परस्मै । पूतीभावः = दौर्गन्ध्यम् इति सिद्धान्तकौमुदी । पवित्रीकरणमिति तत्त्वबोधिनी । 'कुथ्नाति कुन्थेत् संक्लेशे, पूतीभावे तु कुथ्यति' (श्लो ३८) इति देवः ।

१. लट् – कुथ्यति कुथ्यतः कुथ्यन्ति । कुथ्यसि कुथ्यथः कुथ्यथ । कुथ्यामि कुथ्यावः कुथ्यामः । **२. लिट्** – चुकोथ चुकुथतुः चुकुथुः । चुकोथिथ चुकुथथुः चुकुथ । चुकोथ चुकुथिव चुकुथिम । **३. लुट्** – कोथिता कोथितारौ कोथितारः । कोथितासि कोथितास्थः कोथितास्थ । कोथितास्मि कोथितास्वः कोथितास्मः । **४. लृट्** – कोथिष्यति कोथिष्यतः कोथिष्यन्ति । कोथिष्यसि कोथिष्यथः कोथिष्यथ । कोथिष्यामि कोथिष्यावः कोथिष्यामः । **५. लोट्** – कुथ्यतु, कुथ्यतात् कुथ्यताम् कुथ्यन्तु । कुथ्य, कुथ्यतात् कुथ्यतम् कुथ्यत । कुथ्यानि कुथ्याव कुथ्याम । **६. लङ्** – अकुथ्यत् अकुथ्यताम् अकुथ्यन् । अकुथ्यः अकुथ्यतम् अकुथ्यत । अकुथ्यम् अकुथ्याव अकुथ्याम । **७. विधिलिङ्** – कुथ्येत् कुथ्येताम् कुथ्येयुः । कुथ्येः कुथ्येतम् कुथ्येत । कुथ्येयम् कुथ्येव कुथ्येम । **८. आशीर्लिङ्** – कुथ्यात् कुथ्यास्ताम् कुथ्यासुः । कुथ्याः कुथ्यास्तम् कुथ्यास्त । कुथ्यासम् कुथ्यास्व कुथ्यास्म । **९. लुङ्** – अकोथीत् अकोथिष्टाम् अकोथिषुः । अकोथीः अकोथिष्टम् अकोथिष्ट । अकोथिषम् अकोथिष्व अकोथिष्म । **१०. लृङ्** – अकोथिष्यत् अकोथिष्यताम् अकोथिष्यन् । अकोथिष्यः अकोथिष्यतम् अकोथिष्यत । अकोथिष्यम् अकोथिष्याव अकोथिष्याम ।

णिचि – कोथयति – ते, **सनि** – चुकुथिषति/चुकोथिषति, **यकि** – कुथ्यते

१११९. पुथ – हिंसायाम् । सकर्म, सेट्, परस्मै । 'पुथ्येत्पुन्थति हिंसार्थे भाषार्थे पोथयेदिति' (श्लो. १००) इति देवः ।

१. लट् – पुथ्यति पुथ्यतः पुथ्यन्ति । पुथ्यसि पुथ्यथः पुथ्यथ । पुथ्यामि पुथ्यावः पुथ्यामः । **२. लिट्** – पुपोथ पुपुथतुः पुपुथुः । पुपोथिथ पुपुथथुः पुपुथ । पुपोथ पुपुथिव पुपुथिम । **३. लुट्** – पोथिता पोथितारौ पोथितारः । पोथितासि पोथितास्थः पोथितास्थ । पोथितास्मि पोथितास्वः पोथितास्मः । **४. लृट्** – पोथिष्यति पोथिष्यतः पोथिष्यन्ति । पोथिष्यसि पोथिष्यथः पोथिष्यथ । पोथिष्यामि पोथिष्यावः पोथिष्यामः । **५. लोट्** – पुथ्यतु, पुथ्यतात् पुथ्यताम् पुथ्यन्तु । पुथ्य, पुथ्यतात् पुथ्यतम् पुथ्यत । पुथ्यानि पुथ्याव पुथ्याम । **६. लङ्** – अपुथ्यत् अपुथ्यताम् अपुथ्यन् । अपुथ्यः अपुथ्यतम् अपुथ्यत । अपुथ्यम् अपुथ्याव अपुथ्याम । **७. विधिलिङ्** – पुथ्येत् पुथ्येताम् पुथ्येयुः । पुथ्येः पुथ्येतम् पुथ्येत । पुथ्येयम् पुथ्येव पुथ्येम । **८. आशीर्लिङ्** – पुथ्यात् पुथ्यास्ताम् पुथ्यासुः । पुथ्याः पुथ्यास्तम् पुथ्यास्त । पुथ्यासम् पुथ्यास्व पुथ्यास्म । **९. लुङ्** – अपोथीत् अपोथिष्टाम् अपोथिषुः । अपोथीः अपोथिष्टम् अपोथिष्ट । अपोथिषम् अपोथिष्व अपोथिष्म । **१०. लृङ्** – अपोथिष्यत् अपोथिष्यताम् अपोथिष्यन् । अपोथिष्यः अपोथिष्यतम् अपोथिष्यत । अपोथिष्यम् अपोथिष्याव अपोथिष्याम ।

णिचि – पोथयति – ते, **सनि** – पुपुथिषति/पुपोथिषति, **यकि** – पुथ्यते

११२०. गुध – परिवेष्टने । सकर्म, सेट्, परस्मै । 'गुधेर्गुध्नाति रोषेऽर्थे गुध्येत् तु परिवेष्टने' (श्लो. १२१) इति देवः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – गुध्यति गुध्यतः गुध्यन्ति । गुध्यसि गुध्यथः गुध्यथ । गुध्यामि गुध्यावः गुध्यामः । **२. लिट्** – जुगोध जुगुधतुः जुगुधुः । जुगोधिथ जुगुधथुः जुगुध । जुगोध जुगुधिव जुगुधिम । **३. लुट्** – गोधिता गोधितारौ गोधितारः । गोधितासि गोधितास्थः गोधितास्थ । गोधितास्मि गोधितास्वः गोधितास्मः । **४. लृट्** – गोधिष्यति गोधिष्यतः गोधिष्यन्ति । गोधिष्यसि गोधिष्यथः गोधिष्यथ । गोधिष्यामि गोधिष्यावः गोधिष्यामः । **५. लोट्** – गुध्यतु, गुध्यतात् गुध्यताम् गुध्यन्तु । गुध्य, गुध्यतात् गुध्यतम् गुध्यत । गुध्यानि गुध्याव गुध्याम । **६. लङ्** – अगुध्यत् अगुध्यताम् अगुध्यन् । अगुध्यः अगुध्यतम् अगुध्यत । अगुध्यम् अगुध्याव अगुध्याम । **७. विधिलिङ्** – गुध्येत् गुध्येताम् गुध्येयुः । गुध्येः गुध्येतम् गुध्येत । गुध्येयम् गुध्येव गुध्येम । **८. आशीर्लिङ्** – गुध्यात् गुध्यास्ताम् गुध्यासुः । गुध्याः गुध्यास्तम् गुध्यास्त । गुध्यासम् गुध्यास्व गुध्यास्म । **९. लुङ्** – अगोधीत् अगोधिष्टाम् अगोधिषुः । अगोधीः अगोधिष्टम् अगोधिष्ट । अगोधिषम् अगोधिष्व अगोधिष्म । **१०. लृङ्** – अगोधिष्यत् अगोधिष्यताम् अगोधिष्यन् । अगोधिष्यः अगोधिष्यतम् अगोधिष्यत । अगोधिष्यम् अगोधिष्याव अगोधिष्याम ।

णिचि – गोधयति – ते, **सनि** – जुगुधिषति/जुगोधिषति, **यकि** – गुध्यते

११२१. क्षिप – प्रेरणे । सकर्म, अनिट्, परस्मै । प्रेरणम् = निरसनम् इति धातुकाव्यव्याख्या । 'क्षिप्यति प्रेरणे, शे तु क्षिपति क्षिपते पदे' (श्लो. १३०) इति देवः ।

१. लट् – क्षिप्यति क्षिप्यतः क्षिप्यन्ति । क्षिप्यसि क्षिप्यथः क्षिप्यथ । क्षिप्यामि क्षिप्यावः क्षिप्यामः । **२. लिट्** – चिक्षेप चिक्षिपतुः चिक्षिपुः । चिक्षेपिथ चिक्षिपथुः चिक्षिप । चिक्षेप चिक्षिपव चिक्षिपम । **३. लुट्** – क्षेप्ता क्षेप्तारौ क्षेप्तारः । क्षेप्तासि क्षेप्तास्थः क्षेप्तास्थ । क्षेप्तास्मि क्षेप्तास्वः क्षेप्तास्मः । **४. लृट्** – क्षेप्स्यति क्षेप्स्यतः क्षेप्स्यन्ति । क्षेप्स्यसि क्षेप्स्यथः क्षेप्स्यथ । क्षेप्स्यामि क्षेप्स्यावः क्षेप्स्यामः । **५. लोट्** – क्षिप्यतु, क्षिप्यतात् क्षिप्यताम् क्षिप्यन्तु । क्षिप्य, क्षिप्यतात् क्षिप्यतम् क्षिप्यत । क्षिप्याणि क्षिप्याव क्षिप्याम । **६. लङ्** – अक्षिप्यत् अक्षिप्यताम् अक्षिप्यन् । अक्षिप्यः अक्षिप्यतम् अक्षिप्यत । अक्षिप्यम् अक्षिप्याव अक्षिप्याम । **७. विधिलिङ्** – क्षिप्येत् क्षिप्येताम् क्षिप्येयुः । क्षिप्येः क्षिप्येतम् क्षिप्येत । क्षिप्येयम् क्षिप्येव क्षिप्येम । **८. आशीर्लिङ्** – क्षिप्यात् क्षिप्यास्ताम् क्षिप्यासुः । क्षिप्याः क्षिप्यास्तम् क्षिप्यास्त । क्षिप्यासम् क्षिप्यास्व क्षिप्यास्म । **९. लुङ्** – अक्षैप्सीत् अक्षैप्ताम् अक्षैप्सुः । अक्षैप्सीः अक्षैप्तम् अक्षैप्त । अक्षैप्सम् अक्षैप्स्व अक्षैप्स्म । **१०. लृङ्** – अक्षेप्स्यत् अक्षेप्स्यताम् अक्षेप्स्यन् । अक्षेप्स्यः अक्षेप्स्यतम् अक्षेप्स्यत । अक्षेप्स्यम् अक्षेप्स्याव अक्षेप्स्याम ।

णिचि – क्षेपयति – ते, **सनि** – चिक्षिप्सति, **यकि** – क्षिप्यते

११२२. पुष्प – विकसने । अकर्म, सेट्, परस्मै ।

१. लट् – पुष्प्यति पुष्प्यतः पुष्प्यन्ति । पुष्प्यसि पुष्प्यथः पुष्प्यथ । पुष्प्यामि पुष्प्यावः पुष्प्यामः । **२. लिट्** – पुपुष्प पुपुष्पतुः पुपुष्पुः । पुपुष्पिथ पुपुष्पथुः पुपुष्प । पुपुष्प पुपुष्पिव पुपुष्पिम । **३. लुट्** – पुष्पिता पुष्पितारौ पुष्पितारः । पुष्पितासि पुष्पितास्थः पुष्पितास्थ । पुष्पितास्मि पुष्पितास्वः पुष्पितास्मः । **४. लृट्** – पुष्पिष्यति पुष्पिष्यतः पुष्पिष्यन्ति । पुष्पिष्यसि पुष्पिष्यथः पुष्पिष्यथ । पुष्पिष्यामि पुष्पिष्यावः पुष्पिष्यामः । **५. लोट्** – पुष्प्यतु, पुष्प्यतात् पुष्प्यताम् पुष्प्यन्तु । पुष्प्य, पुष्प्यतात् पुष्प्यतम् पुष्प्यत । पुष्प्याणि पुष्प्याव पुष्प्याम । **६. लङ्** – अपुष्प्यत् अपुष्प्यताम् अपुष्प्यन् । अपुष्प्यः अपुष्प्यतम् अपुष्प्यत । अपुष्प्यम् अपुष्प्याव अपुष्प्याम । **७. विधिलिङ्** – पुष्प्येत् पुष्प्येताम् पुष्प्येयुः । पुष्प्येः पुष्प्येतम् पुष्प्येत । पुष्प्येयम् पुष्प्येव पुष्प्येम । **८. आशीर्लिङ्** – पुष्प्यात् पुष्प्यास्ताम् पुष्प्यासुः । पुष्प्याः पुष्प्यास्तम् पुष्प्यास्त । पुष्प्यासम् पुष्प्यास्व पुष्प्यास्म । **९. लुङ्** – अपुष्पीत् अपुष्पिष्टाम् अपुष्पिषुः । अपुष्पीः अपुष्पिष्टम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपुष्पिष्ट । अपुष्पिषम् अपुष्पिष्व अपुष्पिष्म । **१०. लृङ्** - अपुष्पिष्यत् अपुष्पिष्यताम् अपुष्पिष्यन् । अपुष्पिष्यः अपुष्पिष्यतम् अपुष्पिष्यत । अपुष्पिष्यम् अपुष्पिष्याव अपुष्पिष्याम ।

णिचि - पुष्पयति - ते, **सनि** - पुपुष्पिषति, **यकि** - पुष्प्यते

११२३. तिम - आर्द्रीभावे । अकर्म, सेट्, परस्मै ।

१. लट् - तिम्यति तिम्यतः तिम्यन्ति । तिम्यसि तिम्यथः तिम्यथ । तिम्यामि तिम्यावः तिम्यामः । **२. लिट्** - तितेम तितिमतुः तितिमुः । तितेमिथ तितिमथुः तितिम । तितेम तितिमिव तितिमिम । **३. लुट्** - तेमिता तेमितारौ तेमितारः । तेमितासि तेमितास्थः तेमितास्थ । तेमितास्मि तेमितास्वः तेमितास्मः । **४. लृट्** - तेमिष्यति तेमिष्यतः तेमिष्यन्ति । तेमिष्यसि तेमिष्यथः तेमिष्यथ । तेमिष्यामि तेमिष्यावः तेमिष्यामः । **५. लोट्** - तिम्यतु, तिम्यतात् तिम्यताम् तिम्यन्तु । तिम्य, तिम्यतात् तिम्यतम् तिम्यत । तिम्यानि तिम्याव तिम्याम । **६. लङ्** - अतिम्यत् अतिम्यताम् अतिम्यन् । अतिम्यः अतिम्यतम् अतिम्यत । अतिम्यम् अतिम्याव अतिम्याम । **७. विधिलिङ्** - तिम्येत् तिम्येताम् तिम्येयुः । तिम्येः तिम्येतम् तिम्येत । तिम्येयम् तिम्येव तिम्येम । **८. आशीर्लिङ्** - तिम्यात् तिम्यास्ताम् तिम्यासुः । तिम्याः तिम्यास्तम् तिम्यास्त । तिम्यासम् तिम्यास्व तिम्यास्म । **९. लुङ्** - अतेमीत् अतेमिष्टाम् अतेमिषुः । अतेमीः अतेमिष्टम् अतेमिष्ट । अतेमिषम् अतेमिष्व अतेमिष्म । **१०. लृङ्** - अतेमिष्यत् अतेमिष्यताम् अतेमिष्यन् । अतेमिष्यः अतेमिष्यतम् अतेमिष्यत । अतेमिष्यम् अतेमिष्याव अतेमिष्याम ।

णिचि - तेमयति - ते, **सनि** - तितिमिषति/तितेमिषति, **यकि** - तिम्यते

११२४. ष्टिम - आर्द्रीभावे । अकर्म, सेट्, परस्मै । 'स्तिम' इति माधवादयः । 'निश्चलीभावे' इति च केचित् । 'क्लेदे' इति परे ।

१. लट् - स्तिम्यति स्तिम्यतः स्तिम्यन्ति । स्तिम्यसि स्तिम्यथः स्तिम्यथ । स्तिम्यामि स्तिम्यावः स्तिम्यामः । **२. लिट्** - तिष्टेम तिष्टिमतुः तिष्टिमुः । तिष्टेमिथ तिष्टिमथुः तिष्टिम । तिष्टेम तिष्टिमिव तिष्टिमिम । **३. लुट्** - स्तेमिता स्तेमितारौ स्तेमितारः । स्तेमितासि स्तेमितास्थः स्तेमितास्थ । स्तेमितास्मि स्तेमितास्वः स्तेमितास्मः । **४. लृट्** - स्तेमिष्यति स्तेमिष्यतः स्तेमिष्यन्ति । स्तेमिष्यसि स्तेमिष्यथः स्तेमिष्यथ । स्तेमिष्यामि स्तेमिष्यावः स्तेमिष्यामः । **५. लोट्** - स्तिम्यतु, स्तिम्यतात् स्तिम्यताम् स्तिम्यन्तु । स्तिम्य, स्तिम्यतात् स्तिम्यतम् स्तिम्यत । स्तिम्यानि स्तिम्याव स्तिम्याम । **६. लङ्** - अस्तिम्यत् अस्तिम्यताम् अस्तिम्यन् । अस्तिम्यः अस्तिम्यतम् अस्तिम्यत । अस्तिम्यम् अस्तिम्याव अस्तिम्याम । **७. विधिलिङ्** - स्तिम्येत् स्तिम्येताम् स्तिम्येयुः । स्तिम्येः स्तिम्येतम् स्तिम्येत । स्तिम्येयम् स्तिम्येव स्तिम्येम । **८. आशीर्लिङ्** - स्तिम्यात् स्तिम्यास्ताम् स्तिम्यासुः । स्तिम्याः स्तिम्यास्तम् स्तिम्यास्त । स्तिम्यासम् स्तिम्यास्व स्तिम्यास्म । **९. लुङ्** - अस्तेमीत् अस्तेमिष्टाम् अस्तेमिषुः । अस्तेमीः अस्तेमिष्टम् अस्तेमिष्ट । अस्तेमिषम् अस्तेमिष्व अस्तेमिष्म । **१०. लृङ्** - अस्तेमिष्यत् अस्तेमिष्यताम् अस्तेमिष्यन् । अस्तेमिष्यः अस्तेमिष्यतम् अस्तेमिष्यत । अस्तेमिष्यम् अस्तेमिष्याव अस्तेमिष्याम ।

णिचि - स्तेमयति - ते, **सनि** - तिस्तिमिषति/तिस्तेमिषति, **यकि** - स्तिम्यते

११२५. ष्टीम - आर्द्रीभावे । अकर्म, सेट्, परस्मै । 'तीम' इति केचित् पठन्ति इति धातुवृत्तिः ।

१. लट् - स्तीम्यति स्तीम्यतः स्तीम्यन्ति । स्तीम्यसि स्तीम्यथः स्तीम्यथ । स्तीम्यामि स्तीम्यावः स्तीम्यामः । **२. लिट्** - तिष्टीम तिष्टीमतुः तिष्टीमुः । तिष्टीमिथ तिष्टीमथुः तिष्टीम । तिष्टीम तिष्टीमिव तिष्टीमिम । **३. लुट्** - स्तीमिता स्तीमितारौ स्तीमितारः । स्तीमितासि स्तीमितास्थः स्तीमितास्थ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तीमितास्मि स्तीमितास्वः स्तीमितास्मः । **४. लृट्** – स्तीमिष्यति स्तीमिष्यतः स्तीमिष्यन्ति । स्तीमिष्यसि स्तीमिष्यथः स्तीमिष्यथ । स्तीमिष्यामि स्तीमिष्यावः स्तीमिष्यामः । **५. लोट्** – स्तीम्यतु, स्तीम्यतात् स्तीम्यताम् स्तीम्यन्तु । स्तीम्य, स्तीम्यतात् स्तीम्यतम् स्तीम्यत । स्तीम्यानि स्तीम्याव स्तीम्याम । **६. लङ्** – अस्तीम्यत् अस्तीम्यताम् अस्तीम्यन् । अस्तीम्यः अस्तीम्यतम् अस्तीम्यत । अस्तीम्यम् अस्तीम्याव अस्तीम्याम । **७. विधिलिङ्** – स्तीम्येत् स्तीम्येताम् स्तीम्येयुः । स्तीम्येः स्तीम्येतम् स्तीम्येत । स्तीम्येयम् स्तीम्येव स्तीम्येम । **८. आशीर्लिङ्** – स्तीम्यात् स्तीम्यास्ताम् स्तीम्यासुः । स्तीम्याः स्तीम्यास्तम् स्तीम्यास्त । स्तीम्यासम् स्तीम्यास्व स्तीम्यास्म । **९. लुङ्** – अस्तीमीत् अस्तीमिष्टाम् अस्तीमिषुः । अस्तीमीः अस्तीमिष्टम् अस्तीमिष्ट । अस्तीमिषम् अस्तीमिष्व अस्तीमिष्म । **१०. लृङ्** – अस्तीमिष्यत् अस्तीमिष्यताम् अस्तीमिष्यन् । अस्तीमिष्यः अस्तीमिष्यतम् अस्तीमिष्यत । अस्तीमिष्यम् अस्तीमिष्याव अस्तीमिष्याम ।

णिचि – स्तीमयति – ते, **सनि** – तिस्तीमिषति, **यकि** – स्तीम्यते

११२६. व्रीड – चोदने लज्जायाञ्च । सकर्म, सेट्, परस्मै । धातुवृत्तौ तु 'चोदने' इत्येव । तरङ्गिण्यां 'चोदने' इति पठित्वा 'चोदनं – लज्जा' इति दृश्यते । 'लज्जायामप्यधीयते' इति मैत्रेयः । दीक्षितकाशकृत्स्नात्रेयादयस्तु 'चोदने लज्जायां च' इत्येव पठन्ति । 'प्रेरणे च इति द्रुमे' इति धातुकाव्यव्याख्यायाम् । (१.५७)

१. लट् – व्रीड्यति व्रीड्यतः व्रीड्यन्ति । व्रीड्यसि व्रीड्यथः व्रीड्यथ । व्रीड्यामि व्रीड्यावः व्रीड्यामः ।
२. लिट् – विव्रीड विव्रीडतुः विव्रीडुः । विव्रीडिथ विव्रीडथुः विव्रीड । विव्रीड विव्रीडिव विव्रीडिम ।
३. लुट् – व्रीडिता व्रीडितारौ व्रीडितारः । व्रीडितासि व्रीडितास्थः व्रीडितास्थ । व्रीडितास्मि व्रीडितास्वः व्रीडितास्मः । **४. लृट्** – व्रीडिष्यति व्रीडिष्यतः व्रीडिष्यन्ति । व्रीडिष्यसि व्रीडिष्यथः व्रीडिष्यथ । व्रीडिष्यामि व्रीडिष्यावः व्रीडिष्यामः । **५. लोट्** – व्रीड्यतु, व्रीड्यतात् व्रीड्यताम् व्रीड्यन्तु । व्रीड्य, व्रीड्यतात् व्रीड्यतम् व्रीड्यत । व्रीड्यानि व्रीड्याव व्रीड्याम । **६. लङ्** – अव्रीड्यत् अव्रीड्यताम् अव्रीड्यन् । अव्रीड्यः अव्रीड्यतम् अव्रीड्यत । अव्रीड्यम् अव्रीड्यात्र अव्रीड्याम । **७. विधिलिङ्** – व्रीड्येत् व्रीड्येताम् व्रीड्येयुः । व्रीड्येः व्रीड्येतम् व्रीड्येत । व्रीड्येयम् व्रीड्येव व्रीड्येम । **८. आशीर्लिङ्** – व्रीड्यात् व्रीड्यास्ताम् व्रीड्यासुः । व्रीड्याः व्रीड्यास्तम् व्रीड्यास्त । व्रीड्यासम् व्रीड्यास्व व्रीड्यास्म । **९. लुङ्** – अव्रीडीत् अव्रीडिष्टाम् अव्रीडिषुः । अव्रीडीः अव्रीडिष्टम् अव्रीडिष्ट । अव्रीडिषम् अव्रीडिष्व अव्रीडिष्म । **१०. लृङ्** – अव्रीडिष्यत् अव्रीडिष्यताम् अव्रीडिष्यन् । अव्रीडिष्यः अव्रीडिष्यतम् अव्रीडिष्यत । अव्रीडिष्यम् अव्रीडिष्याव अव्रीडिष्याम ।

णिचि – व्रीडयति – ते, **सनि** – विव्रीडिषति, **यकि** – व्रीड्यते ।

११२७. इष – गतौ । सकर्म, सेट्, परस्मै । 'इष्णात्याभीक्ष्ण्ये, इच्छायामिच्छेद्गत्यर्थ इष्यति' (श्लो.१६८) इति देवः ।

१. लट् – इष्यति इष्यतः इष्यन्ति । इष्यसि इष्यथः इष्यथ । इष्यामि इष्यावः इष्यामः । **२. लिट्** – इयेष ईषतुः ईषुः । इयेषिथ ईषथुः ईष । इयेष ईषिव ईषिम । **३. लुट्** – एषिता एषितारौ एषितारः । एषितासि एषितास्थः एषितास्थ । एषितास्मि एषितास्वः एषितास्मः । **४. लृट्** – एषिष्यति एषिष्यतः एषिष्यन्ति । एषिष्यसि एषिष्यथः एषिष्यथ । एषिष्यामि एषिष्यावः एषिष्यामः । **५. लोट्** – इष्यतु, इष्यतात् इष्यताम् इष्यन्तु । इष्य, इष्यतात् इष्यतम् इष्यत । इष्याणि इष्याव इष्याम । **६. लङ्** – ऐष्यत् ऐष्यताम् ऐष्यन् । ऐष्यः ऐष्यतम् ऐष्यत । ऐष्यम् ऐष्याव ऐष्याम । **७. विधिलिङ्** – इष्येत् इष्येताम् इष्येयुः । इष्येः इष्येतम् इष्येत । इष्येयम् इष्येव इष्येम । **८. आशीर्लिङ्** – इष्यात् इष्यास्ताम् इष्यासुः । इष्याः इष्यास्तम् इष्यास्त । इष्यासम् इष्यास्व इष्यास्म । **९. लुङ्** – ऐषीत् ऐषिष्टाम् ऐषिषुः । ऐषीः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऐषिष्टम् ऐषिष्ट । ऐषिषम् ऐषिष्व ऐषिष्म । **१०. लृङ्** – ऐषिष्यत् ऐषिष्यताम् ऐषिष्यन् । ऐषिष्यः ऐषिष्यतम् ऐषिष्यत । ऐषिष्यम् ऐषिष्याव ऐषिष्याम ।

णिचि – एषयति – ते, **सनि** – एषिषिषति[1], **यकि** – इष्यते

१. उपधाकार्यस्य प्रबलत्वात् पूर्वं गुणे पश्चात् द्वित्वम् । 'यद्यपि चक तृप्तौ प्रतिघाते च इत्युक्तम्, तथापि तृप्तिरेवेह विवक्षिता, व्याख्यानात्' इति बालमनोरमा ।

११२८. षह – चक्यर्थे । अकर्म, सेट्, परस्मै, । चक्यर्थः = तृप्तिः ।

१. लट् – सह्यति सह्यतः सह्यन्ति । सह्यसि सह्यथः सह्यथ । सह्यामि सह्यावः सह्यामः । **२. लिट्** – ससाह सेहतुः सेहुः । सेहिथ सेहथुः सेह । ससाह, ससह सेहिव सेहिम । **३. लुट्** – सहिता सहितारौ सहितारः । सहितासि सहितास्थः सहितास्थ । सहितास्मि सहितास्वः सहितास्मः । **४. लृट्** – सहिष्यति सहिष्यतः सहिष्यन्ति । सहिष्यसि सहिष्यथः सहिष्यथ । सहिष्यामि सहिष्यावः सहिष्यामः । **५. लोट्** – सह्यतु, सह्यतात् सह्यताम् सह्यन्तु । सह्य, सह्यतात् सह्यतम् सह्यत । सह्यानि सह्याव सह्याम । **६. लङ्** – असह्यत् असह्यताम् असह्यन् । असह्यः असह्यतम् असह्यत । असह्यम् असह्याव असह्याम । **७. विधिलिङ्** – सह्येत् सह्येताम् सह्येयुः । सह्येः सह्येतम् सह्येत । सह्येयम् सह्येव सह्येम । **८. आशीर्लिङ्** – सह्यात् सह्यास्ताम् सह्यासुः । सह्याः सह्यास्तम् सह्यास्त । सह्यासम् सह्यास्व सह्यास्म । **९. लुङ्** – असहीत् असहिष्टाम् असहिषुः । असहीः असहिष्टम् असहिष्ट । असहिषम् असहिष्व असहिष्म । **१०. लृङ्** – असहिष्यत् असहिष्यताम् असहिष्यन् । असहिष्यः असहिष्यतम् असहिष्यत । असहिष्यम् असहिष्याव असहिष्याम ।

णिचि – साहयति – ते, **सनि** – सिसहिषति, **यकि** – सह्यते ।

११२९. षुह – चक्यर्थे । अकर्म, सेट्, परस्मै । 'फलानां सुहितः । सुहितार्थाः तृप्त्यर्थाः इति वैयाकरणाः' इति कौमुदी । 'चक्यर्थः = तृप्तिः' इति स्वामिकाश्यपधनपालशाकटायनाः ।

१. लट् – सुह्यति सुह्यतः सुह्यन्ति । सुह्यसि सुह्यथः सुह्यथ । सुह्यामि सुह्यावः सुह्यामः । **२. लिट्** – सुषोह सुषुहतुः सुषुहुः । सुषोहिथ सुषुहथुः सुषोह । सुषोह सुषुहिव सुषुहिम । **३. लुट्** – सोहिता सोहितारौ सोहितारः । सोहितासि सोहितास्थः सोहितास्थ । सोहितास्मि सोहितास्वः सोहितास्मः । **४. लृट्** – सोहिष्यति सोहिष्यतः सोहिष्यन्ति । सोहिष्यसि सोहिष्यथः सोहिष्यथ । सोहिष्यामि सोहिष्यावः सोहिष्यामः । **५. लोट्** – सुह्यतु, सुह्यतात् सुह्यताम् सुह्यन्तु । सुह्य, सुह्यतात् सुह्यतम् सुह्यत । सुह्यानि सुह्याव सुह्याम । **६. लङ्** – असुह्यत् असुह्यताम् असुह्यन् । असुह्यः असुह्यतम् असुह्यत । असुह्यम् असुह्याव असुह्याम । **७. विधिलिङ्** – सुह्येत् सुह्येताम् सुह्येयुः । सुह्येः सुह्येतम् सुह्येत । सुह्येयम् सुह्येव सुह्येम । **८. आशीर्लिङ्** – सुह्यात् सुह्यास्ताम् सुह्यासुः । सुह्याः सुह्यास्तम् सुह्यास्त । सुह्यासम् सुह्यास्व सुह्यास्म । **९. लुङ्** – असौहीत् असौहिष्टाम् असौहिषुः । असौहीः असौहिष्टम् असौहिष्ट । असौहिषम् असौहिष्व असौहिष्म । **१०. लृङ्** – असोहिष्यत् असोहिष्यताम् असोहिष्यन् । असोहिष्यः असोहिष्यतम् असोहिष्यत । असोहिष्यम् असोहिष्याव असोहिष्याम ।

णिचि – सोहयति – ते, **सनि** – सुसुहिषति/सुसोहिषति, **यकि** – सुह्यते

११३०. जृष – वयोहानौ । अकर्म, सेट्, परस्मै । 'जृणाति, जीर्यति, जरत्येकार्थे जारयत्यपि' (श्लो. ३९) इति देवः ।

१. लट् – जीर्यति[1] जीर्यतः जीर्यन्ति । जीर्यसि जीर्यथः जीर्यथ । जीर्यामि जीर्यावः जीर्यामः । **२. लिट्** – जजार जजरतुः-जेरतुः[2] जजरुः-जेरुः । जजरिथ-जेरिथ जजरथुः-जेरथुः जेर-जजर । जजार-जजर जेरिव-जजरिव जेरिम-जजरिम । **३. लुट्** – (i) जरिता जरितारौ जरितारः । जरितासि जरितास्थः जरितास्थ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जरितास्मि जरितास्वः जरितास्मः । (ii) जरीता[३] जरीतारौ जरीतारः । जरीतासि जरीतास्थः जरीतास्थ । जरीतास्मि जरीतास्वः जरीतास्मः । **४. लृट्** – (i) जरिष्यति जरिष्यतः जरिष्यन्ति । जरिष्यसि जरिष्यथः जरिष्यथ । जरिष्यामि जरिष्यावः जरिष्यामः । (ii) जरीष्यति जरीष्यतः जरीष्यन्ति । जरीष्यसि जरीष्यथः जरीष्यथ । जरीष्यामि जरीष्यावः जरीष्यामः । **५. लोट्** – जीर्यतु, जीर्यतात् जीर्यताम् जीर्यन्तु । जीर्य, जीर्यतात् जीर्यतम् जीर्यत । जीर्याणि जीर्याव जीर्याम । **६. लङ्** – अजीर्यत् अजीर्यताम् अजीर्यन् । अजीर्यः अजीर्यतम् अजीर्यत । अजीर्यम् अजीर्याव अजीर्याम । **७. विधिलिङ्** – जीर्येत् जीर्येताम् जीर्येयुः । जीर्येः जीर्येतम् जीर्येत । जीर्येयम् जीर्येव जीर्येम । **८. आशीर्लिङ्** – जीर्यात् जीर्यास्ताम् जीर्यासुः । जीर्याः जीर्यास्तम् जीर्यास्त । जीर्यासम् जीर्यास्व जीर्यास्म । **९. लुङ्** – (i) अजारीत् अजारिष्टाम् अजारिषुः । अजारीः अजारिष्टम् अजारिष्ट । अजारिषम् अजारिष्व अजारिष्म । (ii) अजरत्[४] अजरताम् अजरन् । अजरः अजरतम् अजरत । अजरम् अजराव अजराम । **१०. लृङ्** – (i) अजरिष्यत् अजरिष्यताम् अजरिष्यन् । अजरिष्यः अजरिष्यतम् अजरिष्यत । अजरिष्यम् अजरिष्याव अजरिष्याम । (ii) अजरीष्यत् अजरीष्यताम् अजरीष्यन् । अजरीष्यः अजरीष्यतम् अजरीष्यत । अजरीष्यम् अजरीष्याव अजरीष्याम

णिचि – जरयति-ते, **सनि** – जिजीर्षति/जिजरिषति[५]/जिजरीषति, **यकि** – जीर्यते ।

१. 'ऋत इद्धातोः' इति इत् रपरत्वं च । 'हलि च' इति दीर्घः ।

२. 'वा जॄभ्रमुत्रसाम्' वा एत्वाभ्यासलोपौ ।

३. 'वॄतो वा' इति अलिटि दीर्घः विकल्पेन ।

४. 'जॄस्तम्भुम्रुचु...' इति अङ् वा ।

५. 'इट् सनि वा' इति सनि वेट् । 'वॄतो वा' इति वा दीर्घः ।

११३१. झॄष – वयोहानौ । अकर्म, सेट्, परस्मै । 'जॄ वयोहानौ' इत्यस्य पाठभेदोऽयम् ।

१. लट् – झीर्यति[१] झीर्यतः झीर्यन्ति । झीर्यसि झीर्यथः झीर्यथ । झीर्यामि झीर्यावः झीर्यामः । **२. लिट्** – जझार जझरतुः जझरुः । जझरिथ जझरथुः जझर । जझार-जझर जझरिव जझरिम । **३. लुट्** – (i) झरिता झरितारौ झरितारः । झरितासि झरितास्थः झरितास्थ । झरितास्मि झरितास्वः झरितास्मः । (ii) झरीता[२] झरीतारौ झरीतारः । झरीतासि झरीतास्थः झरीतास्थ । झरीतास्मि झरीतास्वः झरीतास्मः । **४. लृट्** – (i) झरिष्यति झरिष्यतः झरिष्यन्ति । झरिष्यसि झरिष्यथः झरिष्यथ । झरिष्यामि झरिष्यावः झरिष्यामः । (ii) झरीष्यति झरीष्यतः झरीष्यन्ति । झरीष्यसि झरीष्यथः झरीष्यथ । झरीष्यामि झरीष्यावः झरीष्यामः । **५. लोट्** – झीर्यतु, झीर्यतात् झीर्यताम् झीर्यन्तु । झीर्य, झीर्यतात् झीर्यतम् झीर्यत । झीर्याणि झीर्याव झीर्याम । **६. लङ्** – अझीर्यत् अझीर्यताम् अझीर्यन् । अझीर्यः अझीर्यतम् अझीर्यत । अझीर्यम् अझीर्याव अझीर्याम । **७. विधिलिङ्** – झीर्येत् झीर्येताम् झीर्येयुः । झीर्येः झीर्येतम् झीर्येत । झीर्येयम् झीर्येव झीर्येम । **८. आशीर्लिङ्** – झीर्यात् झीर्यास्ताम् झीर्यासुः । झीर्याः झीर्यास्तम् झीर्यास्त । झीर्यासम् झीर्यास्व झीर्यास्म । **९. लुङ्** – अझारीत् अझारिष्टाम् अझारिषुः । अझारीः अझारिष्टम् अझारिष्ट । अझारिषम् अझारिष्व अझारिष्म । **१०. लृङ्** – (i) अझरिष्यत् अझरिष्यताम् अझरिष्यन् । अझरिष्यः अझरिष्यतम् अझरिष्यत । अझरिष्यम् अझरिष्याव अझरिष्याम । (ii) अझरीष्यत् अझरीष्यताम् अझरीष्यन् । अझरीष्यः अझरीष्यतम् अझरीष्यत । अझरीष्यम् अझरीष्याव अझरीष्याम ।

णिचि – झरयति-ते, **सनि** – जिझीर्षति/जिझरिषति[३]/जिझरीषति, **यकि** – झीर्यते

१. 'ऋत इद्धातोः' इति इत् रपरत्वं च । 'हलि च' इति दीर्घः ।

२. 'वॄतो वा' इति अलिटि दीर्घः विकल्पेन ।

३.. 'इट् सनि वा' इति सनि वेट् । 'वॄतो वा' इति वा दीर्घः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११३२. षूङ् – प्राणिप्रसवे । सकर्म, वेट्, आत्मने । अत्र प्राणिग्रहणमतन्त्रम् । तेन 'प्रसूनास्तरवः इति भवति' इति माधवः ।

१. लट् – सूयते सूयेते सूयन्ते । सूयसे सूयेथे सूयध्वे । सूये सूयावहे सूयामहे । **२. लिट्** – सुषुवे सुषुवाते सुषुविरे । सुषुविषे सुषुवाथे सुषुविध्वे । सुषुवे सुषुविवहे सुषुविमहे । **३. लुट्** – (i) सविता सवितारौ सवितारः । सवितासे सवितासाथे सविताध्वे । सविताहे सवितास्वहे सवितास्महे । (ii) सोता[1] सोतारौ सोतारः । सोतासे सोतासाथे सोताध्वे । सोताहे सोतास्वहे सोतास्महे । **४. लृट्** – (i) सविष्यते सविष्येते सविष्यन्ते । सविष्यसे सविष्येते सविष्यध्वे । सविष्ये सविष्यावहे सविष्यामहे । (ii) सोष्यते सोष्येते सोष्यन्ते । सोष्यसे सोष्येते सोष्यध्वे । सोष्ये सोष्यावहे सोष्यामहे । **५. लोट्** – सूयताम् सूयेताम् सूयन्ताम् । सूयस्व सूयेथाम् सूयध्वम् । सूयै सूयावहै सूयामहै । **६. लङ्** – असूयत असूयेताम् असूयन्त । असूयथाः असूयेथाम् असूयध्वम् । असूये असूयावहि असूयामहि । **७. विधिलिङ्** – सूयेत सूयेयाताम् सूयेरन् । सूयेथाः सूयेयाथाम् सूयेध्वम् । सूयेय सूयेवहि सूयेमहि । **८. आशीर्लिङ्** – (i) सविषीष्ट सविषीयास्ताम् सविषीरन् । सविषीष्ठाः सविषीयास्थाम् सविषीध्वम्/ढ्वम् । सविषीय सविषीवहि सविषीमहि । (ii) सोषीष्ट सोषीयास्ताम् सोषीरन् । सोषीष्ठाः सोषीयास्थाम् सोषीध्वम्/ढ्वम् । सोषीय सोषीवहि सोषीमहि । **९. लुङ्** – (i) असविष्ट असविषाताम् असविषत । असविष्ठाः असविषाथाम् असविढ्वम् । असविषि असविष्वहि असविष्महि । (ii) असोष्ट असोषाताम् असोषत । असोष्ठाः असोषाथाम् असोढ्वम् । असोषि असोष्वहि असोष्महि । **१०. लृङ्** – (i) असविष्यत असविष्येताम् असविष्यन्त । असविष्यथाः असविष्येथाम् असविष्यध्वम् । असविष्ये असविष्यावहि असविष्यामहि । (ii) असोष्यत असोष्येताम् असोष्यन्त । असोष्यथाः असोष्येथाम् असोष्यध्वम् । असोष्ये असोष्यावहि असोष्यामहि ।

णिचि – सावयति – ते, **सनि** – सुसूषते[2], **यकि** – सूयते

१. ऊदित्त्वात् 'स्वरतिसूति..' इत्यादिना वलाद्यार्धधातुकेषु इड्विकल्पः ।

२. 'सनि ग्रहगुहोश्च' इति नेट् ।

११३३. दूङ् – परितापे । अकर्म, सेट्, आत्मने । परितापः = खेदः । 'दुनोति दूयते तापे, दवतीति गतौ पदम्' (श्लो. २२) इति देवः ।

१. लट् – दूयते दूयेते दूयन्ते । दूयसे दूयेथे दूयध्वे । दूये दूयावहे दूयामहे । **२. लिट्** – दुदुवे दुदुवाते दुदुविरे । दुदुविषे दुदुवाथे दुदुविध्वे । दुदुवे दुदुविवहे दुदुविमहे । **३. लुट्** – दविता दवितारौ दवितारः । दवितासे दवितासाथे दविताध्वे । दविताहे दवितास्वहे दवितास्महे । **४. लृट्** – दविष्यते दविष्येते दविष्यन्ते । दविष्यसे दविष्येते दविष्यध्वे । दविष्ये दविष्यावहे दविष्यामहे । **५. लोट्** – दूयताम् दूयेताम् दूयन्ताम् । दूयस्व दूयेथाम् दूयध्वम् । दूयै दूयावहै दूयामहै । **६. लङ्** – अदूयत अदूयेताम् अदूयन्त । अदूयथाः अदूयेथाम् अदूयध्वम् । अदूये अदूयावहि अदूयामहि । **७. विधिलिङ्** – दूयेत दूयेयाताम् दूयेरन् । दूयेथाः दूयेयाथाम् दूयेध्वम् । दूयेय दूयेवहि दूयेमहि । **८. आशीर्लिङ्** – दासीष्ट दासीयास्ताम् दासीरन् । दासीष्ठाः दासीयास्थाम् दासीध्वम् । दासीय दासीवहि दासीमहि । **९. लुङ्** – अदास्त अदास्ताम् अदासत । अदास्थाः अदासाथाम् अदाध्वम् । अदासि अदास्वहि अदास्महि । **१०. लृङ्** – अदविष्यत अदविष्येताम् अदविष्यन्त । अदविष्यथाः अदविष्येथाम् अदविष्यध्वम् । अदविष्ये अदविष्यावहि अदविष्यामहि ।

णिचि – दावयति – ते, **सनि** – दुदूषते, **यकि** – दूयते

११३४. दीङ् – क्षये । अकर्म, अनिट्, आत्मने ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – दीयते दीयेते दीयन्ते । दीयसे दीयेथे दीयध्वे । दीये दीयावहे दीयामहे । **२. लिट्** – दिदीये दिदीयाते दिदीयिरे । दिदीयिषे दिदीयाथे दिदीयिध्वे/ढ्वे । दिदीये दिदीयिवहे दिदीयिमहे । **३. लुट्** – दाता दातारौ दातारः । दातासे दातासाथे दाताध्वे । दाताहे दातास्वहे दातास्महे । **४. लृट्** – दास्यते दास्येते दास्यन्ते । दास्यसे दास्येते दास्यध्वे । दास्ये दास्यावहे दास्यामहे । **५. लोट्** – दीयताम् दीयेताम् दीयन्ताम् । दीयस्व दीयेथाम् दीयध्वम् । दीयै दीयावहै दीयामहै । **६. लङ्** – अदीयत अदीयेताम् अदीयन्त । अदीयथाः अदीयेथाम् अदीयध्वम् । अदीये अदीयावहि अदीयामहि । **७. विधिलिङ्** – दीयेत दीयेयाताम् दीयेरन् । दीयेथाः दीयेयाथाम् दीयेध्वम् । दीयेय दीयेवहि दीयेमहि । **८. आशीर्लिङ्** – दासीष्ट दासीयास्ताम् दासीरन् । दासीष्ठाः दासीस्थाम् दासीध्वम्/ढ्वम् । दासीय दासीवहि दासीमहि ।
९. लुङ् – अदास्त अदासाताम् अदासत । अदास्थाः अदासाथाम् अदाध्वम् । अदासि अदास्वहि अदास्महि । **१०. लृङ्** – अदास्यत अदास्येताम् अदास्यन्त । अदास्यथाः अदास्येथाम् अदास्यध्वम् । अदास्ये अदास्यावहि अदास्यामहि ।

णिचि – दीवयति – ते, **सनि** – दिदीषते, **यकि** – दीयते

११३५. डीङ् – विहायसा गतौ । अकर्म, सेट्, आत्मने । 'विहायसा गतौ डीङो डयते डीयते पदे' (श्लो. २०) इति देवः ।

१. लट् – डीयते डीयेते डीयन्ते । डीयसे डीयेथे डीयध्वे । डीये डीयावहे डीयामहे । **२. लिट्** – डिड्ये डिड्याते डिड्यिरे । डिड्यिषे डिड्याथे डिड्यिध्वे-ढ्वे । डिड्ये डिड्यिवहे डिड्यिमहे । **३. लुट्** – डयिता डयितारौ डयितारः । डयितासे डयितासाथे डयिताध्वे । डयिताहे डयितास्वहे डयितास्महे । **४. लृट्** – डयिष्यते डयिष्येते डयिष्यन्ते । डयिष्यसे डयिष्येते डयिष्यध्वे । डयिष्ये डयिष्यावहे डयिष्यामहे । **५. लोट्** – डीयताम् डीयेताम् डीयन्ताम् । डीयस्व डीयेथाम् डीयध्वम् । डीयै डीयावहै डीयामहै । **६. लङ्** – अडीयत अडीयेताम् अडीयन्त । अडीयथाः अडीयेथाम् अडीयध्वम् । अडीये अडीयावहि अडीयामहि ।
७. विधिलिङ् – डीयेत डीयेयाताम् डीयेरन् । डीयेथाः डीयेयाथाम् डीयेध्वम् । डीयेय डीयेवहि डीयेमहि ।
८. आशीर्लिङ् – डयिषीष्ट डयिषीयास्ताम् डयिषीरन् । डयिषीष्ठाः डयिषीयास्थाम् डयिषीध्वम्/ढ्वम् । डयिषीय डयिषीवहि डयिषीमहि । **९. लुङ्** – अडयिष्ट अडयिषाताम् अडयिषत । अडयिष्ठाः अडयिषाथाम् अडयिध्वम् । अडयिषि अडयिष्वहि अडयिष्महि । **१०. लृङ्** – अडयिष्यत अडयिष्येताम् अडयिष्यन्त । अडयिष्यथाः अडयिष्येथाम् अडयिष्यध्वम् । अडयिष्ये अडयिष्यावहि अडयिष्यामहि ।

णिचि – डाययति – ते, **सनि** – डिडयिषते, **यकि** – डीयते

११३६. धीङ् – आधारे । सकर्म, अनिट्, आत्मने । 'आधारे' इति क्षीरस्वामी । 'अनादरे' इति मैत्रेयः । 'आदाने' इति मा.धा.वृत्तिः । 'आधारः आधरणम् । स्थापनम् इति यावत्' इति बालमनोरमा ।

१. लट् – धीयते धीयेते धीयन्ते । धीयसे धीयेथे धीयध्वे । धीये धीयावहे धीयामहे । **२. लिट्** – दिध्ये दिध्याते दिध्यिरे । दिध्यिषे दिध्याथे दिध्यिध्वे/ढ्वे । दिध्ये दिध्यिवहे दिध्यिमहे । **३. लुट्** – धेता धेतारौ धेतारः । धेतासे धेतासाथे धेताध्वे । धेताहे धेतास्वहे धेतास्महे । **४. लृट्** – धेष्यते धेष्येते धेष्यन्ते । धेष्यसे धेष्येते धेष्यध्वे । धेष्ये धेष्यावहे धेष्यामहे । **५. लोट्** – धीयताम् धीयेताम् धीयन्ताम् । धीयस्व धीयेथाम् धीयध्वम् । धीयै धीयावहै धीयामहै । **६. लङ्** – अधीयत अधीयेताम् अधीयन्त । अधीयथाः अधीयेथाम् अधीयध्वम् । अधीये अधीयावहि अधीयामहि । **७. विधिलिङ्** – धीयेत धीयेयाताम् धीयेरन् । धीयेथाः धीयेयाथाम् धीयेध्वम् । धीयेय धीयेवहि धीयेमहि । **८. आशीर्लिङ्** – धेषीष्ट धेषीयास्ताम् धेषीरन् । धेषीष्ठाः धेषीयास्थाम् धेषीध्वम्/ढ्वम् । धेषीय धेषीवहि धेषीमहि । **९. लुङ्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अधेष्ट अधेषाताम् अधेषत । अधेष्ठाः अधेषाथाम् अधेध्वम् । अधेषि अधेष्वहि अधेष्महि । **१०. लृङ्** - अधेष्यत अधेष्येताम् अधेष्यन्त । अधेष्यथाः अधेष्येथाम् अधेष्यध्वम् । अधेष्ये अधेष्यावहि अधेष्यामहि ।

णिचि - धाययति - ते, **सनि** - दिधीषते[1], **यकि** - धीयते

१. 'इको झल्' इति सनः कित्त्वम् । कित्त्वात् न गुणः ।

११३७. मीङ् - हिंसायाम् । अकर्म, अनिट्, आत्मने । 'मीञो मीनाति मीनीते, हिंसायां मीयते ङितः' (श्लो. १६) इति देवः । 'हिंसात्र मृतिः' इति धा.का. व्याख्यायाम् (२.५८) ।

१. लट् - मीयते मीयेते मीयन्ते । मीयसे मीयेथे मीयध्वे । मीये मीयावहे मीयामहे । **२. लिट्** - मिम्ये मिम्याते मिम्यिरे । मिम्यिषे मिम्याथे मिम्यिध्वे/ढ्वे । मिम्ये मिम्यिवहे मिम्यिमहे । **३. लुट्** - मेता मेतारौ मेतारः । मेतासे मेतासाथे मेताध्वे । मेताहे मेतास्वहे मेतास्महे । **४. लृट्** - मेष्यते मेष्येते मेष्यन्ते । मेष्यसे मेष्येते मेष्यध्वे । मेष्ये मेष्यावहे मेष्यामहे । **५. लोट्** - मीयताम् मीयेताम् मीयन्ताम् । मीयस्व मीयेथाम् मीयध्वम् । मीयै मीयावहै मीयामहै । **६. लङ्** - अमीयत अमीयेताम् अमीयन्त । अमीयथाः अमीयेथाम् अमीयध्वम् । अमीये अमीयावहि अमीयामहि । **७. विधिलिङ्** - मीयेत मीयेयाताम् मीयेरन् । मीयेथाः मीयेयाथाम् मीयेध्वम् । मीयेय मीयेवहि मीयेमहि । **८. आशीर्लिङ्** - मेषीष्ट मेषीयास्ताम् मेषीरन् । मेषीष्ठाः मेषीयास्थाम् मेषीध्वम्/ढ्वम् । मेषीय मेषीवहि मेषीमहि । **९. लुङ्** - अमेष्ट अमेषाताम् अमेषत । अमेष्ठाः अमेषाथाम् अमेध्वम् । अमेषि अमेष्वहि अमेष्महि । **१०. लृङ्** - अमेष्यत अमेष्येताम् अमेष्यन्त । अमेष्यथाः अमेष्येथाम् अमेष्यध्वम् । अमेष्ये अमेष्यावहि अमेष्यामहि ।

णिचि - माययति - ते, **सनि** - मिमीषते, **यकि** - मीयते ।

११३८. रीङ् - स्रवणे । सकर्म, अनिट्, आत्मने । 'स्रवणे रीयते रीङो रिणाति गतिरेषयोः' (श्लो. १८) इति देवः । 'श्रवणेऽपि' इति क्वचित् पाठः ।

१. लट् - रीयते रीयेते रीयन्ते । रीयसे रीयेथे रीयध्वे । रीये रीयावहे रीयामहे । **२. लिट्** - रिर्ये रिर्याते रिर्यिरे । रिर्यिषे रिर्याथे रिर्यिध्वे/ढ्वे । रिर्ये रिर्यिवहे रिर्यिमहे । **३. लुट्** - रेता रेतारौ रेतारः । रेतासे रेतासाथे रेताध्वे । रेताहे रेतास्वहे रेतास्महे । **४. लृट्** - रेष्यते रेष्येते रेष्यन्ते । रेष्यसे रेष्येते रेष्यध्वे । रेष्ये रेष्यावहे रेष्यामहे । **५. लोट्** - रीयताम् रीयेताम् रीयन्ताम् । रीयस्व रीयेथाम् रीयध्वम् । रीयै रीयावहै रीयामहै । **६. लङ्** - अरीयत अरीयेताम् अरीयन्त । अरीयथाः अरीयेथाम् अरीयध्वम् । अरीये अरीयावहि अरीयामहि । **७. विधिलिङ्** - रीयेत रीयेयाताम् रीयेरन् । रीयेथाः रीयेयाथाम् रीयेध्वम् । रीयेय रीयेवहि रीयेमहि । **८. आशीर्लिङ्** - रेषीष्ट रेषीयास्ताम् रेषीरन् । रेषीष्ठाः रेषीयास्थाम् रेषीध्वम्/ढ्वम् । रेषीय रेषीवहि रेषीमहि । **९. लुङ्** - अरेष्ट अरेषाताम् अरेषत । अरेष्ठाः अरेषाथाम् अरेध्वम् । अरेषि अरेष्वहि अरेष्महि । **१०. लृङ्** - अरेष्यत अरेष्येताम् अरेष्यन्त । अरेष्यथाः अरेष्येथाम् अरेष्यध्वम् । अरेष्ये अरेष्यावहि अरेष्यामहि ।

णिचि - राययति - ते, **सनि** - रिरीषते, **यकि** - रीयते ।

११३९. लीङ् - श्लेषणे । अकर्म, अनिट्, आत्मने । 'लापयेल्लालयेदात्वे श्लेषणे लीयतेऽलिनात्' (श्लो. १८) इति देवः ।

१. लट् - लीयते लीयेते लीयन्ते । लीयसे लीयेथे लीयध्वे । लीये लीयावहे लीयामहे । **२. लिट्** - लिल्ये लिल्याते लिल्यिरे । लिल्यिषे लिल्याथे लिल्यिध्वे/ढ्वे । लिल्ये लिल्यिवहे लिल्यिमहे । **३. लुट्** - (i) लेता लेतारौ लेतारः । लेतासे लेतासाथे लेताध्वे । लेताहे लेतास्वहे लेतास्महे । (ii) लाता लातारौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लातारः । लातासे लातासाथे लाताध्वे । लाताहे लातास्वहे लातास्महे । **४. लृट्** - (i) लेष्यते लेष्येते लेष्यन्ते । लेष्यसे लेष्येते लेष्यध्वे । लेष्ये लेष्यावहे लेष्यामहे । (ii) लास्यते लास्येते लास्यन्ते । लास्यसे लास्येते लास्यध्वे । लास्ये लास्यावहे लास्यामहे । **५. लोट्** - लीयताम् लीयेताम् लीयन्ताम् । लीयस्व लीयेथाम् लीयध्वम् । लीयै लीयावहै लीयामहै । **६. लङ्** - अलीयत अलीयेताम् अलीयन्त । अलीयथाः अलीयेथाम् अलीयध्वम् । अलीये अलीयावहि अलीयामहि । **७. विधिलिङ्** - लीयेत लीयेयाताम् लीयेरन् । लीयेथाः लीयेयाथाम् लीयेध्वम् । लीयेय लीयेवहि लीयेमहि । **८. आशीर्लिङ्** - (i) लेषीष्ट लेषीयास्ताम् लेषीरन् । लेषीष्ठाः लेषीयास्थाम् लेषीध्वम्/ढ्वम् । लेषीय लेषीवहि लेषीमहि । (ii) लासीष्ट लासीयास्ताम् लासीरन् । लासीष्ठाः लासीयास्थाम् लासीध्वम्/ढ्वम् । लासीय लासीवहि लासीमहि ।
९. लुङ् - (i) अलेष्ट अलेषाताम् अलेषत । अलेष्ठाः अलेषाथाम् अलेढ्वम् । अलेषि अलेष्वहि अलेष्महि । (ii) अलास्त अलासाताम् अलासत । अलास्थाः अलासाथाम् अलाध्वम् । अलासि अलास्वहि अलास्महि ।
१०. लृङ् - (i) अलेष्यत अलेष्येताम् अलेष्यन्त । अलेष्यथाः अलेष्येथाम् अलेष्यध्वम् । अलेष्ये अलेष्यावहि अलेष्यामहि । (ii) अलास्यत अलास्येताम् अलास्यन्त । अलास्यथाः अलास्येथाम् अलास्यध्वम् । अलास्ये अलास्यावहि अलास्यामहि ।

णिचि - विलीनयति/विलापयति[2]/विलालयति/विलाययति-ते, **सनि** - लिलीषते, **यकि** - लीयते

१. 'विभाषा लीयतेः' - लीलीङोरात्वं वा स्यात् एज्विषये ल्यपि च ।

२. 'लीलोनुग्लुकावन्यतरस्यां स्नेहनिपातने' इति लुक् । तदभावे नुक् । नुगभावे 'अर्तिह्री...' इति पुक् । पुकः अपि अभावे वृद्ध्यायौ ।

११४०. व्रीङ् - वृणोत्यर्थे । सकर्म, अनिट्, आत्मने । 'वरणे - आवरणे सामीप्ये' इति काशकृत्स्नः । 'व्रीणाति वरणे तत्र व्रीङो व्रीयेत तु श्यनि' (श्लो. १९) इति देवः । 'छादनं परिग्रहो वा तत्' इति धा.का. व्याख्यायाम् । (१.५८)

१. लट् - व्रीयते व्रीयेते व्रीयन्ते । व्रीयसे व्रीयेथे व्रीयध्वे । व्रीये व्रीयावहे व्रीयामहे । **२. लिट्** - विव्रिये विव्रियाते विव्रियिरे । विव्रियिषे विव्रियाथे विव्रियिध्वे/ढ्वे । विव्रिये विव्रियिवहे विव्रियिमहे । **३. लुट्** - व्रेता व्रेतारौ व्रेतारः । व्रेतासे व्रेतासाथे व्रेताध्वे । व्रेताहे व्रेतास्वहे व्रेतास्महे । **४. लृट्** - व्रेष्यते व्रेष्येते व्रेष्यन्ते । व्रेष्यसे व्रेष्येते व्रेष्यध्वे । व्रेष्ये व्रेष्यावहे व्रेष्यामहे । **५. लोट्** - व्रीयताम् व्रीयेताम् व्रीयन्ताम् । व्रीयस्व व्रीयेथाम् व्रीयध्वम् । व्रीयै व्रीयावहै व्रीयामहै । **६. लङ्** - अव्रीयत अव्रीयेताम् अव्रीयन्त । अव्रीयथाः अव्रीयेथाम् अव्रीयध्वम् । अव्रीये अव्रीयावहि अव्रीयामहि । **७. विधिलिङ्** - व्रीयेत व्रीयेयाताम् व्रीयेरन् । व्रीयेथाः व्रीयेयाथाम् व्रीयेध्वम् । व्रीयेय व्रीयेवहि व्रीयेमहि । **८. आशीर्लिङ्** - व्रेषीष्ट व्रेषीयास्ताम् व्रेषीरन् । व्रेषीष्ठाः व्रेषीयास्थाम् व्रेषीध्वम्/ढ्वम् । व्रेषीय व्रेषीवहि व्रेषीमहि । **९. लुङ्** - अव्रेष्ट अव्रेषाताम् अव्रेषत । अव्रेष्ठाः अव्रेषाथाम् अव्रेढ्वम् । अव्रेषि अव्रेष्वहि अव्रेष्महि । **१०. लृङ्** - अव्रेष्यत अव्रेष्येताम् अव्रेष्यन्त । अव्रेष्यथाः अव्रेष्येथाम् अव्रेष्यध्वम् । अव्रेष्ये अव्रेष्यावहि अव्रेष्यामहि ।

णिचि - व्राययति - ते, **सनि** - विव्रीषते, **यकि** - व्रीयते

११४१. पीङ् - पाने । सकर्म, अनिट्, आत्मने ।

१. लट् - पीयते पीयेते पीयन्ते । पीयसे पीयेथे पीयध्वे । पीये पीयावहे पीयामहे । **२. लिट्** - पिप्ये पिप्याते पिप्यिरे । पिप्यिषे पिप्याथे पिप्यिध्वे । पिप्ये पिप्यिवहे पिप्यिमहे । **३. लुट्** - पेता पेतारौ पेतारः । पेतासे पेतासाथे पेताध्वे । पेताहे पेतास्वहे पेतास्महे । **४. लृट्** - पेष्यते पेष्येते पेष्यन्ते । पेष्यसे पेष्येते पेष्यध्वे । पेष्ये पेष्यावहे पेष्यामहे । **५. लोट्** - पीयताम् पीयेताम् पीयन्ताम् । पीयस्व पीयेथाम् पीयध्वम् । पीयै पीयावहै पीयामहै । **६. लङ्** - अपीयत अपीयेताम् अपीयन्त । अपीयथाः अपीयेथाम् अपीयध्वम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपीये अपीयावहि अपीयामहि । **७. विधिलिङ्** - पीयेत पीयेयाताम् पीयेरन् । पीयेथाः पीयेयाथाम् पीयेध्वम् । पीयेय पीयेवहि पीयेमहि । **८. आशीर्लिङ्** - पेषीष्ट पेषीयास्ताम् पेषीरन् । पेषीष्ठाः पेषीयास्थाम् पेषीध्वम् । पेषीय पेषीवहि पेषीमहि । **९. लुङ्** - अपेष्ट अपेषाताम् अपेषत । अपेष्ठाः अपेषाथाम् अपेध्वम् । अपेषि अपेष्वहि अपेष्महि । **१०. लृङ्** - अपेष्यत अपेष्येताम् अपेष्यन्त । अपेष्यथाः अपेष्येथाम् अपेष्यध्वम् । अपेष्ये अपेष्यावहि अपेष्यामहि ।

णिचि - पाययति[१], **सनि** - पिपीषते, **यकि** - पीयते

१. निगरणार्थकत्वात् 'निगरणचलनार्थेभ्यश्च' इति नित्यं परस्मैपदित्वम् ।

११४२. माङ् - माने । सकर्म, अनिट्, आत्मने । 'मिमीते मायते माने माति तत्रैव शब्लुकि' (श्लो. ९) इति देवः । दुर्गादयः केचिदेवामुं धातुं पठन्ति । क्षीरस्वामिप्रभृतयस्तु न पठन्ति ।

१. लट् - मायते[१] मायेते मायन्ते । मायसे मायेथे मायध्वे । माये मायावहे मायामहे । **२. लिट्** - ममे ममाते ममिरे । ममिषे ममाथे ममिध्वे । ममे ममिवहे ममिमहे । **३. लुट्** - माता मातारौ मातारः । मातासे मातासाथे माताध्वे । माताहे मातास्वहे मातास्महे । **४. लृट्** - मास्यते मास्येते मास्यन्ते । मास्यसे मास्येते मास्यध्वे । मास्ये मास्यावहे मास्यामहे । **५. लोट्** - मायताम् मायेताम् मायन्ताम् । मायस्व मायेथाम् मायध्वम् । मायै मायावहै मायामहै । **६. लङ्** - अमायत अमायेताम् अमायन्त । अमायथाः अमायेथाम् अमायध्वम् । अमाये अमायावहि अमायामहि । **७. विधिलिङ्** - मायेत मायेयाताम् मायेरन् । मायेथाः मायेयाथाम् मायेध्वम् । मायेय मायेवहि मायेमहि । **८. आशीर्लिङ्** - मासीष्ट मासीयास्ताम् मासीरन् । मासीष्ठाः मासीयास्थाम् मासीध्वम् । मासीय मासीवहि मासीमहि । **९. लुङ्** - अमासिष्ट अमासिषाताम् अमासिषत । अमासिष्ठाः अमासिषाथाम् अमासिध्वम् । अमासिषि अमासिष्वहि अमासिष्महि । **१०. लृङ्** - अमास्यत अमास्येताम् अमास्यन्त । अमास्यथाः अमास्येथाम् अमास्यध्वम् । अमास्ये अमास्यावहि अमास्यामहि ।

णिचि - मापयति - ते, **सनि** - मित्सति, **यकि** - मीयते[२]

१. 'घुमास्था...' इति ईत्वं तु न, तत्र आर्धधातुके इत्यधिकारात्' इति तत्त्वबोधिनी ।

२. 'घुमास्थागापाजहातिसां हलि' इति अतः ईत् स्यात् ।

११४३. ईङ् - गतौ । सकर्म, अनिट्, आत्मने । 'अयत्येतीयते गत्याम् अधीतेऽध्येति चेङिकोः' (श्लो. १४) इति देवः ।

१. लट् - ईयते ईयेते ईयन्ते । ईयसे ईयेथे ईयध्वे । ईये ईयावहे ईयामहे । **२. लिट्** - (i) अयाञ्चक्रे अयाञ्चक्राते अयाञ्चक्रिरे । अयाञ्चकृषे अयाञ्चक्राथे अयाञ्चकृढ्वे । अयाञ्चक्रे अयाञ्चकृवहे अयाञ्चकृमहे । (ii) अयाम्बभूव अयाम्बभूवतुः अयाम्बभूवुः । अयाम्बभूविथ अयाम्बभूवथुः अयाम्बभूव । अयाम्बभूव अयाम्बभूविव अयाम्बभूविम । (iii) अयामास अयामासतुः अयामासुः । अयामासिथ अयामासथुः अयामास । अयामास अयामासिव अयामासिम । **३. लुट्** - एता एतारौ एतारः । एतासे एतासाथे एताध्वे । एताहे एतास्वहे एतास्महे । **४. लृट्** - एष्यते एष्येते एष्यन्ते । एष्यसे एष्येते एष्यध्वे । एष्ये एष्यावहे एष्यामहे । **५. लोट्** - ईयताम् ईयेताम् ईयन्ताम् । ईयस्व ईयेथाम् ईयध्वम् । ईयै ईयावहै ईयामहै । **६. लङ्** - ऐयत ऐयेताम् ऐयन्त । ऐयथाः ऐयेथाम् ऐयध्वम् । ऐये ऐयावहि ऐयामहि । **७. विधिलिङ्** - ईयेत ईयेयाताम् ईयेरन् । ईयेथाः ईयेयाथाम् ईयेध्वम् । ईयेय ईयेवहि ईयेमहि । **८. आशीर्लिङ्** - एषीष्ट एषीयास्ताम् एषीरन् । एषीष्ठाः एषीयास्थाम् एषीध्वम् । एषीय एषीवहि एषीमहि । **९. लुङ्** - ऐष्ट ऐषाताम् ऐषत । ऐष्ठाः ऐषाथाम् ऐढ्वम् । ऐषि ऐष्वहि ऐष्महि । **१०. लृङ्** - ऐष्यत ऐष्येताम् ऐष्यन्त । ऐष्यस्यथाः ऐष्येथाम् ऐष्यध्वम् । ऐष्ये ऐष्यवहि ऐष्यमहि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – आययति – ते, **सनि** – ईषिषते, **यकि** – ईयते ।

११४४. प्रीङ् – प्रीतौ । सकर्मकः[1] अनिट्, परस्मै । 'प्रीङ् प्रीतौ प्रीयतेऽप्रीणात् प्रीणीते तर्पणे ञितः । अणौ यौ ञित्त्वसाफल्यात् प्रीणयेत् प्रयते प्रयेत्' (श्लो. १९-२०) इति देवः ।

१. लट् – प्रीयते प्रीयेते प्रीयन्ते । प्रीयसे प्रीयेथे प्रीयध्वे । प्रीये प्रीयावहे प्रीयामहे । **२. लिट्** – पिप्रिये पिप्रियाते पिप्रियिरे । पिप्रियिषे पिप्रियाथे पिप्रियिध्वे । पिप्रिये पिप्रियिवहे पिप्रियिमहे । **३. लुट्** – प्रेता प्रेतारौ प्रेतारः । प्रेतासे प्रेतासाथे प्रेताध्वे । प्रेताहे प्रेतास्वहे प्रेतास्महे । **४. लृट्** – प्रेष्यते प्रेष्येते प्रेष्यन्ते । प्रेष्यसे प्रेष्येते प्रेष्यध्वे । प्रेष्ये प्रेष्यावहे प्रेष्यामहे । **५. लोट्** – प्रीयताम् प्रीयेताम् प्रीयन्ताम् । प्रीयस्व प्रीयेथाम् प्रीयध्वम् । प्रीयै प्रीयावहै प्रीयामहै । **६. लङ्** – अप्रीयत अप्रीयेताम् अप्रीयन्त । अप्रीयथाः अप्रीयेथाम् अप्रीयध्वम् । अप्रीये अप्रीयावहि अप्रीयामहि । **७. विधिलिङ्** – प्रीयेत प्रीयेयाताम् प्रीयेरन् । प्रीयेथाः प्रीयेयाथाम् प्रीयेध्वम् । प्रीयेय प्रीयेवहि प्रीयेमहि । **८. आशीर्लिङ्** – प्रेषीष्ट प्रेषीयास्ताम् प्रेषीरन् । प्रेषीष्ठाः प्रेषीयास्थाम् प्रेषीध्वम् । प्रेषीय प्रेषीवहि प्रेषीमहि । **९. लुङ्** – अप्रेष्ट अप्रेषाताम् अप्रेषत । अप्रेष्ठाः अप्रेषाथाम् अप्रेध्वम् । अप्रेषि अप्रेष्वहि अप्रेष्महि । **१०. लृङ्** – अप्रेष्यत अप्रेष्येताम् अप्रेष्यन्त । अप्रेष्यथाः अप्रेष्येथाम् अप्रेष्यध्वम् । अप्रेष्ये अप्रेष्यावहि अप्रेष्यामहि ।

णिचि – प्राययति – ते, **सनि** – पिप्रीषते, **यकि** – प्रीयते ।

१. 'प्रीतिः तुष्टिः । 'मुत्प्रीतिः प्रमदो हर्षः' इति अमरः । एवं सति अकर्मकः । यथा – फलमूलादिना हरिः प्रीयते । हृष्यति इत्यर्थः । यदा तु प्रीतिः तर्पणं, प्रीञ् तर्पणे इति क्रैयादिकात् क्तिनि प्रीतिशब्दनिष्पत्तिः, तदा तु सकर्मकः । प्रीयते = तर्पयति इत्यर्थः ।

११४५. शो – तनूकरणे । सकर्म, अनिट्, परस्मै । 'तक्षणे' इति हेमचन्द्रः । 'निशाने' इति वोपदेवः । अन्ये सर्वेऽपि 'तनूकरणे' इत्येव पठन्ति ।

१. लट् – श्यति[1] श्यतः श्यन्ति । श्यसि श्यथः श्यथ । श्यामि श्यावः श्यामः । **२. लिट्** – शशौ शशतुः शशुः । शशिथ-शशाथ शशथुः शश । शशौ शशिव शशिम । **३. लुट्** – शाता शातारौ शातारः । शातासि शातास्थः शातास्थ । शातास्मि शातास्वः शातास्मः । **४. लृट्** – शास्यति शास्यतः शास्यन्ति । शास्यसि शास्यथः शास्यथ । शास्यामि शास्यावः शास्यामः । **५. लोट्** – श्यतु, श्यतात् श्यताम् श्यन्तु । श्य, श्यतात् श्यतम् श्यत । श्यानि श्याव श्याम । **६. लङ्** – अश्यत् अश्यताम् अश्यन् । अश्यः अश्यतम् अश्यत । अश्यम् अश्याव अश्याम । **७. विधिलिङ्** – श्येत् श्येताम् श्येयुः । श्येः श्येतम् श्येत । श्येयम् श्येव श्येम । **८. आशीर्लिङ्** – शायात् शायास्ताम् शायासुः । शायाः शायास्तम् शायास्त । शायासम् शायास्व शायास्म । **९. लुङ्** – (i) अशात्[2] अशाताम् अशुः । अशाः अशातम् अशात । अशाम् अशाव अशाम । (ii) अशासीत्[3] अशासिष्टाम् अशासिषुः । अशासीः अशासिष्टम् अशासिष्ट । अशासिषम् अशासिष्व अशासिष्म । **१०. लृङ्** – अशास्यत् अशास्यताम् अशास्यन् । अशास्यः अशास्यतम् अशास्यत । अशास्यम् अशास्याव अशास्याम ।

णिचि – शाययति – ते, **सनि** – शिशासति, **यकि** – शायते ।

१. 'ओतः श्यनि' इति श्यनि परतः ओकारस्य लोपः ।

२. 'विभाषा धाधेट्शाच्छासः' इति सिचः वा लुक् ।

३. 'यमरमनमाताम्...' इति इट्सकौ ।

११४६. छो – छेदने । सकर्म, अनिट्, परस्मै ।

१. लट् – छ्यति[1] छ्यतः छ्यन्ति । छ्यसि छ्यथः छ्यथ । छ्यामि छ्यावः छ्यामः । **२. लिट्** – चच्छौ चच्छतुः चच्छुः । चच्छिथ चच्छथुः चच्छ । चच्छौ चच्छिव चच्छिम । **३. लुट्** – छाता छातारौ छातारः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

छातासि छातास्थः छातास्थ । छातास्मि छातास्वः छातास्मः । **४. लृट्** – छास्यति छास्यतः छास्यन्ति । छास्यसि छास्यथः छास्यथ । छास्यामि छास्यावः छास्यामः । **५. लोट्** – छ्यतु, छ्यतात् छ्यताम् छ्यन्तु । छ्य, छ्यतात् छ्यतम् छ्यत । छ्यानि छ्याव छ्याम । **६. लङ्** – अच्छ्यत् अच्छ्यताम् अच्छ्यन् । अच्छ्यः अच्छ्यतम् अच्छ्यत । अच्छ्यम् अच्छ्याव अच्छ्याम । **७. विधिलिङ्** – छ्येत् छ्येताम् छ्येयुः । छ्येः छ्येतम छ्येत । छ्येयम छ्येव छ्येम । **८. आशीर्लिङ्** – छायात् छायास्ताम् छायासुः । छायाः छायास्तम् छायास्त । छायासम् छायास्व छायास्म । **९. लुङ्** – (i) अच्छात्[२] अच्छाताम् अच्छुः । अच्छाः अच्छातम् अच्छात । अच्छाम् अच्छाव अच्छाम । (ii) अच्छासीत्[३] अच्छासिष्टाम् अच्छासिषुः । अच्छासीः अच्छासिष्टम् अच्छासिष्ट । अच्छासिषम् अच्छासिष्व अच्छासिष्म । **१०. लृङ्** – अच्छास्यत् अच्छास्यताम् अच्छास्यन् । अच्छास्यः अच्छास्यतम् अच्छास्यत । अच्छास्यम् अच्छास्याव अच्छास्याम ।

णिचि – छाययति – ते, सनि – चिच्छासति, **यकि** – छायते ।

१. 'ओतः श्यनि' इति श्यनि परतः ओकारस्य लोपः ।

२. 'विभाषा धाधेट्शाच्छासः' इति सिचः वा लुक् ।

३. 'यमरमनमाताम्...' इति इट्सकौ ।

११४७. षो – अन्तकर्मणि । सकर्म. अनिट्. परस्मै । समापने विनाशने वा इत्यर्थः । 'षै क्षये सायतीतीष्टम् अन्तकर्मणि तु स्यति' (श्लो ७) इति देवः ।

१. लट् – स्यति[१] स्यतः स्यन्ति । स्यसि स्यथः स्यथ । स्यामि स्यावः स्यामः । **२. लिट्** – ससौ ससतुः ससुः । ससिथ-ससाथ ससथुः सस । ससौ ससिव ससिम । **३. लुट्** – साता सातारौ सातारः । सातासि सातास्थः सातास्थ । सातास्मि सातास्वः सातास्मः । **४. लृट्** – सास्यति सास्यतः सास्यन्ति । सास्यसि सास्यथः सास्यथ । सास्यामि सास्यावः सास्यामः । **५. लोट्** – स्यतु, स्यतात् स्यताम् स्यन्तु । स्य, स्यतात् स्यतम् स्यत । स्यानि स्याव स्याम । **६. लङ्** – अस्यत् अस्यताम् अस्यन् । अस्यः अस्यतम् अस्यत । अस्यम् अस्याव अस्याम । **७. विधिलिङ्** – स्येत् स्येताम् स्येयुः । स्येः स्येतम् स्येत । स्येयम् स्येव स्येम । **८. आशीर्लिङ्** – सेयात् सेयास्ताम् सेयासुः । सेयाः सेयास्तम् सेयास्त । सेयासम् सेयास्व सेयास्म । **९. लुङ्** – (i) असात्[२] असाताम् असुः । असाः असातम् असात । असाम् असाव असाम । (ii) असासीत्[३] असासिष्टाम् असासिषुः । असासीः असासिष्टम् असासिष्ट । असासिषम् असासिष्व असासिष्म । **१०. लृङ्** – असास्यत् असास्यताम् असास्यन् । असास्यः असास्यतम् असास्यत । असास्यम् असास्याव असास्याम ।

णिचि – साययति – ते, **सनि** – सिषासति, **यकि** – सायते ।

१. 'ओतः श्यनि' इति श्यनि परतः ओकारस्य लोपः ।

२. 'विभाषा धाधेट्शाच्छासः' इति सिचः वा लुक् ।

३. 'यमरमनमाताम्...' इति इट्सकौ ।

११४८. दो – अवखण्डने । सकर्म, अनिट्, परस्मै ।

१. लट् – द्यति[१] द्यतः द्यन्ति । द्यसि द्यथः द्यथ । द्यामि द्यावः द्यामः । **२. लिट्** – ददौ ददतुः ददुः । ददिथ ददथुः दद । ददौ ददिव ददिम । **३. लुट्** – दाता दातारौ दातारः । दातासि दातास्थः दातास्थ । दातास्मि दातास्वः दातास्मः । **४. लृट्** – दास्यति दास्यतः दास्यन्ति । दास्यसि दास्यथः दास्यथ । दास्यामि दास्यावः दास्यामः । **५. लोट्** – द्यतु, द्यतात् द्यताम् द्यन्तु । द्य, द्यतात् द्यतम् द्यत । द्यानि द्याव द्याम । **६. लङ्** – अद्यत् अद्यताम् अद्यन् । अद्यः अद्यतम् अद्यत । अद्यम् अद्याव अद्याम । **७. विधिलिङ्**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

– द्येत् द्येताम् द्येयुः । द्येः द्येतम् द्येत । द्येयम् द्येव द्येम । **८. आशीर्लिङ्** – देयात् देयास्ताम् देयासुः । देयाः देयास्तम् देयास्त । देयासम् देयास्व देयास्म । **९. लुङ्** – अदात्[२] अदाताम् अदुः । अदाः अदातम् अदात । अदाम् अदाव अदाम । **१०. लृङ्** – अदास्यत् अदास्यताम् अदास्यन् । अदास्यः अदास्यतम् अदास्यत । अदास्यम् अदास्याव अदास्याम

णिचि – दाययति – ते **सनि** दित्सति[३] **यकि** – दीयते[४]

१. 'ओतः श्यनि' इति श्यनि परतः ओकारस्य लोपः ।

२. 'गातिस्थागुपाभूभ्यः सिचः...' इति सिचो लुक् ।

३. 'सनिमीमाघुर....' इति अचः इस् ।

४. 'घुमास्थागापाजहातिसां हलि' इति अतः ईत् स्यात् ।

११४९. जनी – प्रादुर्भावे । अकर्म, सेट्, आत्मने । प्रादुर्भावः उत्पत्तिरभिव्यक्तिर्वा । यदा त्वन्तर्भावितण्यर्थम् उत्पादनायाम् अभिव्यञ्जनायां वा वर्तते तदा अनुपूर्वकोऽपि अयं धातुः सकर्मकः ।

१. लट् – जायते[१] जायेते जायन्ते । जायसे जायेथे जायध्वे । जाये जायावहे जायामहे । **२. लिट्** – जज्ञे जज्ञाते जज्ञिरे । जज्ञिषे जज्ञाथे जज्ञिध्वे । जज्ञे जज्ञिवहे जज्ञिमहे । **३. लुट्** – जनिता जनितारौ जनितारः । जनितासे जनितासाथे जनिताध्वे । जनिताहे जनितास्वहे जनितास्महे । **४. लृट्** – जनिष्यते जनिष्येते जनिष्यन्ते । जनिष्यसे जनिष्येते जनिष्यध्वे । जनिष्ये जनिष्यावहे जनिष्यामहे । **५. लोट्** – जायताम् जायेताम् जायन्ताम् । जायस्व जायेथाम् जायध्वम् । जायै जायावहै जायामहै । **६. लङ्** – अजायत अजायेताम् अजायन्त । अजायथाः अजायेथाम् अजायध्वम् । अजाये अजायावहि अजायामहि । **७. विधिलिङ्** – जायेत जायेयाताम् जायेरन् । जायेथाः जायेयाथाम् जायेध्वम् । जायेय जायेवहि जायेमहि । **८. आशीर्लिङ्** – जनिषीष्ट जनिषीयास्ताम् जनिषीरन् । जनिषीष्ठाः जनिषीयास्थाम् जनिषीध्वम् । जनिषीय जनिषीवहि जनिषीमहि । **९. लुङ्** – अजनि[२] अजनिष्ट अजनिषाताम् अजनिषत । अजनिष्ठाः अजनिषाथाम् अजनिध्वम् । अजनिषि अजनिष्वहि अजनिष्महि । **१०. लृङ्** – अजनिष्यत अजनिष्येताम् अजनिष्यन्त । अजनिष्यथाः अजनिष्येथाम् अजनिष्यध्वम् । अजनिष्ये अजनिष्यावहि अजनिष्यामहि ।

णिचि – जनयति[३], **सनि** – जिजनिषते, **यकि** – जन्यते/जायते[४] ।

१. 'ज्ञाजनोर्जा' इति जादेशः स्यात् शिति प्रत्यये परतः ।

२. 'दीपजन...' इति वा चिण् । चिणो लुक् ।

३. 'बुधयुधजनेङ्....' इति परस्मैपदमेव । 'जनीजॄष्...' इति मित्त्वात् ह्रस्वः ।

४. 'ये विभाषा' – जनसनखनामात्वं वा स्यात् यादौ क्ङिति इति विकल्पेन आत्वम् ।

११५०. दीपी – दीप्तौ । अकर्म, सेट्, आत्मने । 'दीपि' इति क्षीरतरङ्गिणीपाठः ।

१. लट् – दीप्यते दीप्येते दीप्यन्ते । दीप्यसे दीप्येथे दीप्यध्वे । दीप्ये दीप्यावहे दीप्यामहे । **२. लिट्** – दिदीपे दिदीपाते दिदीपिरे । दिदीपिषे दिदीपाथे दिदीपिध्वे । दिदीपे दिदीपिवहे दिदीपिमहे । **३. लुट्** – दीपिता दीपितारौ दीपितारः । दीपितासे दीपितासाथे दीपिताध्वे । दीपिताहे दीपितास्वहे दीपितास्महे । **४. लृट्** – दीपिष्यते दीपिष्येते दीपिष्यन्ते । दीपिष्यसे दीपिष्येते दीपिष्यध्वे । दीपिष्ये दीपिष्यावहे दीपिष्यामहे । **५. लोट्** – दीप्यताम् दीप्येताम् दीप्यन्ताम् । दीप्यस्व दीप्येथाम् दीप्यध्वम् । दीप्यै दीप्यावहै दीप्यामहै । **६. लङ्** – अदीप्यत अदीप्येताम् अदीप्यन्त । अदीप्यथाः अदीप्येथाम् अदीप्यध्वम् । अदीप्ये अदीप्यावहि अदीप्यामहि । **७. विधिलिङ्** – दीप्येत दीप्येयाताम् दीप्येरन् । दीप्येथाः दीप्येयाथाम् दीप्येध्वम् । दीप्येय दीप्येवहि दीप्येमहि । **८. आशीर्लिङ्** – दीपिषीष्ट दीपिषीयास्ताम् दीपिषीरन् । दीपिषीष्ठाः दीपिषीयास्थाम् दीपिषीध्वम् । दीपिषीय दीपिषीवहि दीपिषीमहि । **९. लुङ्** – अदीपि[१] अदीपिष्ट अदीपिषाताम् अदीपिषत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अदीपिष्ठाः अदीपिषाथाम् अदीपिध्वम् । अदीपिषि अदीपिष्वहि अदीपिष्महि । **१०. लृङ्** – अदीपिष्यत अदीपिष्येताम् अदीपिष्यन्त । अदीपिष्यथाः अदीपिष्येथाम् अदीपिष्यध्वम् । अदीपिष्ये अदीपिष्यावहि अदीपिष्यामहि ।

णिचि – दीपयति – ते, **सनि** – दिदीपिषते, **यकि** – दीप्यते

१. 'दीपजन...' इति वा चिण् । चिणो लुक् ।

११५१. पूरी – आप्यायने । सकर्म, सेट्, आत्मने । 'आप्यायनं वृद्धिः' इति क्षीरस्वामी । 'पूरेराप्यायनेऽर्थे स्यात् पूर्यते पूरयेदपि' (श्लो. १५०) इति देवः ।

१. लट् – पूर्यते पूर्येते पूर्यन्ते । पूर्यसे पूर्येथे पूर्यध्वे । पूर्ये पूर्यावहे पूर्यामहे । **२. लिट्** – पुपूरे पुपूराते पुपूरिरे । पुपूरिषे पुपूराथे पुपूरिध्वे । पुपूरे पुपूरिवहे पुपूरिमहे । **३. लुट्** – पूरिता पूरितारौ पूरितारः । पूरितासे पूरितासाथे पूरिताध्वे । पूरिताहे पूरितास्वहे पूरितास्महे । **४. लृट्** – पूरिष्यते पूरिष्येते पूरिष्यन्ते । पूरिष्यसे पूरिष्येते पूरिष्यध्वे । पूरिष्ये पूरिष्यावहे पूरिष्यामहे । **५. लोट्** – पूर्यताम् पूर्येताम् पूर्यन्ताम् । पूर्यस्व पूर्येथाम् पूर्यध्वम् । पूर्यै पूर्यावहै पूर्यामहै । **६. लङ्** – अपूर्यत अपूर्येताम् अपूर्यन्त । अपूर्यथाः अपूर्येथाम् अपूर्यध्वम् । अपूर्ये अपूर्यावहि अपूर्यामहि । **७. विधिलिङ्** – पूर्येत पूर्येयाताम् पूर्येरन् । पूर्येथाः पूर्येयाथाम् पूर्येध्वम् । पूर्येय पूर्येवहि पूर्येमहि । **८. आशीर्लिङ्** – पूरिषीष्ट पूरिषीयास्ताम् पूरिषीरन् । पूरिषीष्ठाः पूरिषीयास्थाम् पूरिषीध्वम् । पूरिषीय पूरिषीवहि पूरिषीमहि । **९. लुङ्** – अपूरि[1] अपूरिष्ट अपूरिषाताम् अपूरिषत । अपूरिष्ठाः अपूरिषाथाम् अपूरिध्वम् । अपूरिषि अपूरिष्वहि अपूरिष्महि । **१०. लृङ्** – अपूरिष्यत अपूरिष्येताम् अपूरिष्यन्त । अपूरिष्यथाः अपूरिष्येथाम् अपूरिष्यध्वम् । अपूरिष्ये अपूरिष्यावहि अपूरिष्यामहि ।

णिचि – पूरयति – ते, **सनि** – पुपूरिषते, **यकि** – पूर्यते

१. 'दीपजन...' इति वा चिण् । चिणो लुक् ।

११५२. तूरी – गतित्वरणहिंसनयोः । सकर्म, सेट्, आत्मने । 'गतेः त्वरणे हिंसने च' इति क्षीरस्वामी । 'तूर' इति दुर्गः । 'त्वरणहिंसनयोः' इति मैत्रेयः । 'त्वरणमात्रे च द्रुमे' इति धा.का. व्याख्यायाम् । (२.५९)

१. लट् – तूर्यते तूर्येते तूर्यन्ते । तूर्यसे तूर्येथे तूर्यध्वे । तूर्ये तूर्यावहे तूर्यामहे । **२. लिट्** – तुतूरे तुतूराते तुतूरिरे । तुतूरिषे तुतूराथे तुतूरिध्वे । तुतूरे तुतूरिवहे तुतूरिमहे । **३. लुट्** – तूरिता तूरितारौ तूरितारः । तूरितासे तूरितासाथे तूरिताध्वे । तूरिताहे तूरितास्वहे तूरितास्महे । **४. लृट्** – तूरिष्यते तूरिष्येते तूरिष्यन्ते । तूरिष्यसे तूरिष्येते तूरिष्यध्वे । तूरिष्ये तूरिष्यावहे तूरिष्यामहे । **५. लोट्** – तूर्यताम् तूर्येताम् तूर्यन्ताम् । तूर्यस्व तूर्येथाम् तूर्यध्वम् । तूर्यै तूर्यावहै तूर्यामहै । **६. लङ्** – अतूर्यत अतूर्येताम् अतूर्यन्त । अतूर्यथाः अतूर्येथाम् अतूर्यध्वम् । अतूर्ये अतूर्यावहि अतूर्यामहि । **७. विधिलिङ्** – तूर्येत तूर्येयाताम् तूर्येरन् । तूर्येथाः तूर्येयाथाम् तूर्येध्वम् । तूर्येय तूर्येवहि तूर्येमहि । **८. आशीर्लिङ्** – तूरिषीष्ट तूरिषीयास्ताम् तूरिषीरन् । तूरिषीष्ठाः तूरिषीयास्थाम् तूरिषीध्वम् । तूरिषीय तूरिषीवहि तूरिषीमहि । **९. लुङ्** – अतूरिष्ट अतूरिषाताम् अतूरिषत । अतूरिष्ठाः अतूरिषाथाम् अतूरिध्वम् । अतूरिषि अतूरिष्वहि अतूरिष्महि । **१०. लृङ्** – अतूरिष्यत अतूरिष्येताम् अतूरिष्यन्त । अतूरिष्यथाः अतूरिष्येथाम् अतूरिष्यध्वम् । अतूरिष्ये अतूरिष्यावहि अतूरिष्यामहि ।

णिचि – तूरयति – ते, **सनि** – तुतूरिषते, **यकि** – तूर्यते ।

११५३. धूरी – हिंसागत्योः । सकर्म, सेट्, आत्मने ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् - धूर्यते धूर्येते धूर्यन्ते । धूर्यसे धूर्येथे धूर्यध्वे । धूर्ये धूर्यावहे धूर्यामहे । **२. लिट्** - दुधूरे दुधूराते दुधूरिरे । दुधूरिषे दुधूराथे दुधूरिध्वे । दुधूरे दुधूरिवहे दुधूरिमहे । **३. लुट्** - धूरिता धूरितारौ धूरितारः । धूरितासे धूरितासाथे धूरिताध्वे । धूरिताहे धूरितास्वहे धूरितास्महे । **४. लृट्** - धूरिष्यते धूरिष्येते धूरिष्यन्ते । धूरिष्यसे धूरिष्येते धूरिष्यध्वे । धूरिष्ये धूरिष्यावहे धूरिष्यामहे । **५. लोट्** - धूर्यताम् धूर्येताम् धूर्यन्ताम् । धूर्यस्व धूर्येथाम् धूर्यध्वम् । धूर्यै धूर्यावहै धूर्यामहै । **६. लङ्** - अधूर्यत अधूर्येताम् अधूर्यन्त । अधूर्यथाः अधूर्येथाम् अधूर्यध्वम् । अधूर्ये अधूर्यावहि अधूर्यामहि । **७. विधिलिङ्** - धूर्येत धूर्येयाताम् धूर्येरन् । धूर्येथाः धूर्येयाथाम् धूर्येध्वम् । धूर्येय धूर्येवहि धूर्येमहि । **८. आशीर्लिङ्** - धूरिषीष्ट धूरिषीयास्ताम् धूरिषीरन् । धूरिषीष्ठाः धूरिषीयास्थाम् धूरिषीध्वम् । धूरिषीय धूरिषीवहि धूरिषीमहि । **९. लुङ्** - अधूरिष्ट अधूरिषाताम् अधूरिषत । अधूरिष्ठाः अधूरिषाथाम् अधूरिध्वम् । अधूरिषि अधूरिष्वहि अधूरिष्महि । **१०. लृङ्** - अधूरिष्यत अधूरिष्येताम् अधूरिष्यन्त । अधूरिष्यथाः अधूरिष्येथाम् अधूरिष्यध्वम् । अधूरिष्ये अधूरिष्यावहि अधूरिष्यामहि ।

णिचि - धूरयति - ते, **सनि** - दुधूरिषते, **यकि** - धूर्यते

११५४. गूरी - हिंसागत्योः । सकर्म, सेट्, आत्मने । 'गुरते गूर(गुर)येतेति शे णावुद्यमने तङि । श्यनि गूर्यत इत्येवं गतिहिंसनयोस्तुङि' (श्लो. १५२) इति देवः । 'हिंसावयोहान्योः' इति क्वचित् पाठः ।

१. लट् - गूर्यते गूर्येते गूर्यन्ते । गूर्यसे गूर्येथे गूर्यध्वे । गूर्ये गूर्यावहे गूर्यामहे । **२. लिट्** - जुगूरे जुगूराते जुगूरिरे । जुगूरिषे जुगूराथे जुगूरिध्वे । जुगूरे जुगूरिवहे जुगूरिमहे । **३. लुट्** - गूरिता गूरितारौ गूरितारः । गूरितासे गूरितासाथे गूरिताध्वे । गूरिताहे गूरितास्वहे गूरितास्महे । **४. लृट्** - गूरिष्यते गूरिष्येते गूरिष्यन्ते । गूरिष्यसे गूरिष्येते गूरिष्यध्वे । गूरिष्ये गूरिष्यावहे गूरिष्यामहे । **५. लोट्** - गूर्यताम् गूर्येताम् गूर्यन्ताम् । गूर्यस्व गूर्येथाम् गूर्यध्वम् । गूर्यै गूर्यावहै गूर्यामहै । **६. लङ्** - अगूर्यत अगूर्येताम् अगूर्यन्त । अगूर्यथाः अगूर्येथाम् अगूर्यध्वम् । अगूर्ये अगूर्यावहि अगूर्यामहि । **७. विधिलिङ्** - गूर्येत गूर्येयाताम् गूर्येरन् । गूर्येथाः गूर्येयाथाम् गूर्येध्वम् । गूर्येय गूर्येवहि गूर्येमहि । **८. आशीर्लिङ्** - गूरिषीष्ट गूरिषीयास्ताम् गूरिषीरन् । गूरिषीष्ठाः गूरिषीयास्थाम् गूरिषीध्वम् । गूरिषीय गूरिषीवहि गूरिषीमहि । **९. लुङ्** - अगूरिष्ट अगूरिषाताम् अगूरिषत । अगूरिष्ठाः अगूरिषाथाम् अगूरिध्वम् । अगूरिषि अगूरिष्वहि अगूरिष्महि । **१०. लृङ्** - अगूरिष्यत अगूरिष्येताम् अगूरिष्यन्त । अगूरिष्यथाः अगूरिष्येथाम् अगूरिष्यध्वम् । अगूरिष्ये अगूरिष्यावहि अगूरिष्यामहि ।

णिचि - गूरयति - ते, **सनि** - जुगूरिषते, **यकि** - गूर्यते

११५५. घूरी - हिंसावयोहान्योः । सकर्म, सेट्, आत्मने ।

१. लट् - घूर्यते घूर्येते घूर्यन्ते । घूर्यसे घूर्येथे घूर्यध्वे । घूर्ये घूर्यावहे घूर्यामहे । **२. लिट्** - जुघूरे जुघूराते जुघूरिरे । जुघूरिषे जुघूराथे जुघूरिध्वे । जुघूरे जुघूरिवहे जुघूरिमहे । **३. लुट्** - घूरिता घूरितारौ घूरितारः । घूरितासे घूरितासाथे घूरिताध्वे । घूरिताहे घूरितास्वहे घूरितास्महे । **४. लृट्** - घूरिष्यते घूरिष्येते घूरिष्यन्ते । घूरिष्यसे घूरिष्येते घूरिष्यध्वे । घूरिष्ये घूरिष्यावहे घूरिष्यामहे । **५. लोट्** - घूर्यताम् घूर्येताम् घूर्यन्ताम् । घूर्यस्व घूर्येथाम् घूर्यध्वम् । घूर्यै घूर्यावहै घूर्यामहै । **६. लङ्** - अघूर्यत अघूर्येताम् अघूर्यन्त । अघूर्यथाः अघूर्येथाम् अघूर्यध्वम् । अघूर्ये अघूर्यावहि अघूर्यामहि । **७. विधिलिङ्** - घूर्येत घूर्येयाताम् घूर्येरन् । घूर्येथाः घूर्येयाथाम् घूर्येध्वम् । घूर्येय घूर्येवहि घूर्येमहि । **८. आशीर्लिङ्** - घूरिषीष्ट घूरिषीयास्ताम् घूरिषीरन् । घूरिषीष्ठाः घूरिषीयास्थाम् घूरिषीध्वम् । घूरिषीय घूरिषीवहि घूरिषीमहि । **९. लुङ्** - अघूरिष्ट अघूरिषाताम् अघूरिषत । अघूरिष्ठाः अघूरिषाथाम् अघूरिध्वम् । अघूरिषि अघूरिष्वहि अघूरिष्महि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०. लृङ् – अघूरिष्यत अघूरिष्येताम् अघूरिष्यन्त । अघूरिष्यथाः अघूरिष्येथाम् अघूरिष्यध्वम् । अघूरिष्ये अघूरिष्यावहि अघूरिष्यामहि ।

णिचि – घूरयति – ते, **सनि** – जुघूरिषते, **यकि** – घूर्यते

११५६. जूरी – हिंसावयोहान्योः । सकर्म, सेट्, आत्मने,

१. लट् – जूर्यते जूर्येते जूर्यन्ते । जूर्यसे जूर्येथे जूर्यध्वे । जूर्ये जूर्यावहे जूर्यामहे । **२. लिट्** – जुजूरे जुजूराते जुजूरिरे । जुजूरिषे जुजूराथे जुजूरिध्वे । जुजूरे जुजूरिवहे जुजूरिमहे । **३. लुट्** – जूरिता जूरितारौ जूरितारः । जूरितासे जूरितासाथे जूरिताध्वे । जूरिताहे जूरितास्वहे जूरितास्महे । **४. लृट्** – जूरिष्यते जूरिष्येते जूरिष्यन्ते । जूरिष्यसे जूरिष्येते जूरिष्यध्वे । जूरिष्ये जूरिष्यावहे जूरिष्यामहे । **५. लोट्** – जूर्यताम् जूर्येताम् जूर्यन्ताम् । जूर्यस्व जूर्येथाम् जूर्यध्वम् । जूर्यै जूर्यावहै जूर्यामहै । **६. लङ्** – अजूर्यत अजूर्येताम् अजूर्यन्त । अजूर्यथाः अजूर्येथाम् अजूर्यध्वम् । अजूर्ये अजूर्यावहि अजूर्यामहि । **७. विधिलिङ्** – जूर्येत जूर्येयाताम् जूर्येरन् । जूर्येथाः जूर्येयाथाम् जूर्येध्वम् । जूर्येय जूर्येवहि जूर्येमहि । **८. आशीर्लिङ्** – जूरिषीष्ट जूरिषीयास्ताम् जूरिषीरन् । जूरिषीष्ठाः जूरिषीयास्थाम् जूरिषीध्वम् । जूरिषीय जूरिषीवहि जूरिषीमहि । **९. लुङ्** – अजूरिष्ट अजूरिषाताम् अजूरिषत । अजूरिष्ठाः अजूरिषाथाम् अजूरिध्वम् । अजूरिषि अजूरिष्वहि अजूरिष्महि । **१०. लृङ्** – अजूरिष्यत अजूरिष्येताम् अजूरिष्यन्त । अजूरिष्यथाः अजूरिष्येथाम् अजूरिष्यध्वम् । अजूरिष्ये अजूरिष्यावहि अजूरिष्यामहि ।

णिचि – जूरयति – ते, **सनि** – जुजूरिषते, **यकि** – जूर्यते

११५७. शूरी – हिंसास्तम्भनयोः । सकर्म, सेट्, आत्मने । 'शूरयेतेति विक्रान्तौ शूर्यते स्तम्भहिंसयोः' (श्लो. १५१) इति देवः ।

१. लट् – शूर्यते शूर्येते शूर्यन्ते । शूर्यसे शूर्येथे शूर्यध्वे । शूर्ये शूर्यावहे शूर्यामहे । **२. लिट्** – शुशूरे शुशूराते शुशूरिरे । शुशूरिषे शुशूराथे शुशूरिध्वे । शुशूरे शुशूरिवहे शुशूरिमहे । **३. लुट्** – शूरिता शूरितारौ शूरितारः । शूरितासे शूरितासाथे शूरिताध्वे । शूरिताहे शूरितास्वहे शूरितास्महे । **४. लृट्** – शूरिष्यते शूरिष्येते शूरिष्यन्ते । शूरिष्यसे शूरिष्येते शूरिष्यध्वे । शूरिष्ये शूरिष्यावहे शूरिष्यामहे । **५. लोट्** – शूर्यताम् शूर्येताम् शूर्यन्ताम् । शूर्यस्व शूर्येथाम् शूर्यध्वम् । शूर्यै शूर्यावहै शूर्यामहै । **६. लङ्** – अशूर्यत अशूर्येताम् अशूर्यन्त । अशूर्यथाः अशूर्येथाम् अशूर्यध्वम् । अशूर्ये अशूर्यावहि अशूर्यामहि । **७. विधिलिङ्** – शूर्येत शूर्येयाताम् शूर्येरन् । शूर्येथाः शूर्येयाथाम् शूर्येध्वम् । शूर्येय शूर्येवहि शूर्येमहि । **८. आशीर्लिङ्** – शूरिषीष्ट शूरिषीयास्ताम् शूरिषीरन् । शूरिषीष्ठाः शूरिषीयास्थाम् शूरिषीध्वम् । शूरिषीय शूरिषीवहि शूरिषीमहि । **९. लुङ्** – अशूरिष्ट अशूरिषाताम् अशूरिषत । अशूरिष्ठाः अशूरिषाथाम् अशूरिध्वम् । अशूरिषि अशूरिष्वहि अशूरिष्महि । **१०. लृङ्** – अशूरिष्यत अशूरिष्येताम् अशूरिष्यन्त । अशूरिष्यथाः अशूरिष्येथाम् अशूरिष्यध्वम् । अशूरिष्ये अशूरिष्यावहि अशूरिष्यामहि ।

णिचि – शूरयति – ते, **सनि** – शुशूरिषते, **यकि** – शूर्यते

११५८. चूरी – दाहे । सकर्म, सेट्, आत्मने ।

१. लट् – चूर्यते चूर्येते चूर्यन्ते । चूर्यसे चूर्येथे चूर्यध्वे । चूर्ये चूर्यावहे चूर्यामहे । **२. लिट्** – चुचूरे चुचूराते चुचूरिरे । चुचूरिषे चुचूराथे चुचूरिध्वे । चुचूरे चुचूरिवहे चुचूरिमहे । **३. लुट्** – चूरिता चूरितारौ चूरितारः । चूरितासे चूरितासाथे चूरिताध्वे । चूरिताहे चूरितास्वहे चूरितास्महे । **४. लृट्** – चूरिष्यते चूरिष्येते चूरिष्यन्ते । चूरिष्यसे चूरिष्येते चूरिष्यध्वे । चूरिष्ये चूरिष्यावहे चूरिष्यामहे । **५. लोट्** – चूर्यताम् चूर्येताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चूर्यन्ताम् । चूर्यस्व चूर्येथाम् चूर्यध्वम् । चूर्यै चूर्यावहै चूर्यामहै । **६. लङ्** – अचूर्यत अचूर्येताम् अचूर्यन्त । अचूर्यथाः अचूर्येथाम् अचूर्यध्वम् । अचूर्ये अचूर्यावहि अचूर्यामहि । **७. विधिलिङ्** – चूर्येत चूर्येयाताम् चूर्येरन् । चूर्येथाः चूर्येयाथाम् चूर्येध्वम् । चूर्येय चूर्येवहि चूर्येमहि । **८. आशीर्लिङ्** – चूरिषीष्ट चूरिषीयास्ताम् चूरिषीरन् । चूरिषीष्ठाः चूरिषीयास्थाम् चूरिषीध्वम् । चूरिषीय चूरिषीवहि चूरिषीमहि । **९. लुङ्** – अचूरिष्ट अचूरिषाताम् अचूरिषत । अचूरिष्ठाः अचूरिषाथाम् अचूरिध्वम् । अचूरिषि अचूरिष्वहि अचूरिष्महि । **१०. लृङ्** – अचूरिष्यत अचूरिष्येताम् अचूरिष्यन्त । अचूरिष्यथाः अचूरिष्येथाम् अचूरिष्यध्वम् । अचूरिष्ये अचूरिष्यावहि अचूरिष्यामहि ।

णिचि – चूरयति – ते, **सनि** – चुचूरिषते, **यकि** – चूर्यते

११५९. तप[१] – ऐश्वर्ये वा[२] । अकर्म, अनिट्, आत्मने । 'सन्तापेऽर्थे तपेद् दाहे तापयेत् तपते तपेत् । ऐश्वर्ये वा दिवादित्वात् तप्यते तपतीति वा' (श्लो. १३१) इति देवः ।

१. लट् – (i) तप्यते तप्येते तप्यन्ते । तप्यसे तप्येथे तप्यध्वे । तप्ये तप्यावहे तप्यामहे । (ii) तपति तपतः तपन्ति । तपसि तपथः तपथ । तपामि तपावः तपामः । **२. लिट्** – तेपे तेपाते तेपिरे । तेपिषे तेपाथे तेपिध्वे । तेपे तेपिवहे तेपिमहे । **३. लुट्** – तप्ता तप्तारौ तप्तारः । तप्तासे तप्तासाथे तप्ताध्वे । तप्ताहे तप्तास्वहे तप्तास्महे । **४. लृट्** – तप्स्यते तप्स्येते तप्स्यन्ते । तप्स्यसे तप्स्येते तप्स्यध्वे । तप्स्ये तप्स्यावहे तप्स्यामहे । **५. लोट्** – (i) तप्यताम् तप्येताम् तप्यन्ताम् । तप्यस्व तप्येथाम् तप्यध्वम् । तप्यै तप्यावहै तप्यामहै । (ii) तपतु, तपतात् तपताम् तपन्तु । तप, तपतात् तपतम् तपत । तपानि तपाव तपाम ।

६. लङ् – (i) अतप्यत अतप्येताम् अतप्यन्त । अतप्यथाः अतप्येथाम् अतप्यध्वम् । अतप्ये अतप्यावहि अतप्यामहि । (ii) अतपत् अतपताम् अतपन् । अतपः अतपतम् अतपत । अतपम् अतपाव अतपाम ।

७. विधिलिङ् – (i) तप्येत तप्येयाताम् तप्येरन् । तप्येथाः तप्येयाथाम् तप्येध्वम् । तप्येय तप्येवहि तप्येमहि । (ii) तपेत् तपेताम् तपेयुः । तपेः तपेतम् तपेत । तपेयम् तपेव तपेम । **८. आशीर्लिङ्** – तप्सीष्ट तप्सीयास्ताम् तप्सीरन् । तप्सीष्ठाः तप्सीयास्थाम् तप्सीध्वम् । तप्सीय तप्सीवहि तप्सीमहि ।

९. लुङ् – अतप्त अतप्साताम् अतप्सत । अतप्थाः अतप्साथाम् अतब्ध्वम् । अतप्सि अतप्स्वहि अतप्स्महि ।

१०. लृङ् – अतप्स्यत अतप्स्येताम् अतप्स्यन्त । अतप्स्यथाः अतप्स्येथाम् अतप्स्यध्वम् । अतप्स्ये अतप्स्यावहि अतप्स्यामहि ।

णिचि – तापयति – ते, **सनि** – तितप्सते, **यकि** – तप्यते

१. 'पत इति व्यत्ययेन पाठान्तरम् । 'द्युत धाम नियुतः पत्यमानः' (६.४९.४) इति कौमुदी । 'अस्माकं तु उभयमपि प्रमाणम् । आचार्येण उभयथा शिष्याणां प्रतिपादनात्' इति मा.धा.वृत्तिः ।

२. 'अयं धातुरैश्वर्ये वा श्यनं तङं च लभते । अन्यदा तु शब्विकरणः परस्मैपदी च' इति सिद्धान्तकौमुदी । केचित् 'वा' इति पदं 'वृतु वरणे' इति अनन्तरं पठिष्यमाणस्य धातोः आद्यावयवम् इच्छन्ति । तन्मते ऐश्वर्येऽर्थे अस्मात् धातोः तङ्श्यनौ नित्यमेव भवतः ।

११६०. वृतु[१] – वरणे । सकर्म, सेट्, आत्मने । 'केचित् पूर्वत्र वाग्रहणमस्यादिं पठित्वा (कृत्वा) 'वावृतु वरणे' इत्याहुः' इति धा.का. व्याख्या (२.६०) । विषयेऽस्मिन् कृदन्तरूपमालायां 'वावृतु वरणे' इत्यत्र (१५९०) बहवः विषयाः निरूपिताः ।

१. लट् – वृत्यते[२] वावृत्यते वृत्येते वृत्यन्ते । वृत्यसे वृत्येथे वृत्यध्वे । वृत्ये वृत्यावहे वृत्यामहे । **२. लिट्** – ववृते ववृताते ववृतिरे । ववृतिषे ववृताथे ववृतिध्वे । ववृते ववृतिवहे ववृतिमहे । **३. लुट्** – वर्तिता वर्तितारौ वर्तितारः । वर्तितासे वर्तितासाथे वर्तिताध्वे । वर्तिताहे वर्तितास्वहे वर्तितास्महे । **४. लृट्** – वर्त्तिष्यते वर्त्तिष्येते वर्त्तिष्यन्ते । वर्त्तिष्यसे वर्त्तिष्येते वर्त्तिष्यध्वे । वर्त्तिष्ये वर्त्तिष्यावहे वर्त्तिष्यामहे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५. लोट् – वृत्यताम् वृत्येताम् वृत्यन्ताम् । वृत्यस्व वृत्येथाम् वृत्यध्वम् । वृत्यै वृत्यावहै वृत्यामहै । **६. लङ्** – अवृत्यत अवृत्येताम् अवृत्यन्त । अवृत्यथाः अवृत्येथाम् अवृत्यध्वम् । अवृत्ये अवृत्यावहि अवृत्यामहि । **७. विधिलिङ्** – वृत्येत वृत्येयाताम् वृत्येरन् । वृत्येथाः वृत्येयाथाम् वृत्येध्वम् । वृत्येय वृत्येवहि वृत्येमहि । **८. आशीर्लिङ्** – वर्तिषीष्ट वर्तिषीयास्ताम् वर्तिषीरन् । वर्तिषीष्ठाः वर्तिषीयास्थाम् वर्तिषीध्वम् । वर्तिषीय वर्तिषीवहि वर्तिषीमहि । **९. लुङ्** – अवर्ति अवर्तिषाताम् अवर्तिषत । अवर्तिष्ठाः अवर्तिषाथाम् अवर्तिढ्वम् । अवर्तिषि अवर्तिष्वहि अवर्तिष्महि । **१०. लृङ्** – अवर्त्तिष्यत अवर्त्तिष्येताम् अवर्त्तिष्यन्त । अवर्त्तिष्यथाः अवर्त्तिष्येथाम् अवर्त्तिष्यध्वम् । अवर्त्तिष्ये अवर्त्तिष्यावहि अवर्त्तिष्यामहि ।

णिचि – वर्तयति – ते, सनि – विवर्तिषते, यकि – वृत्यते

१. 'केचित् पूर्वत्र वाग्रहणमस्यादिं पठित्वा (कृत्वा) 'वावृतु वरणे' इत्याहुः' इति धा.का. व्याख्या (२.६०) । विषयेऽस्मिन् कृदन्त-रूपमालायां 'वावृतु वरणे' इत्यत्र (१५९०) बहवः विषयाः निरूपिताः ।

२. पक्षान्तरे वावृत्यते । 'ततो वावृत्यमाना सा रामशाखां न्यविक्षत' (भट्टि.४.२८) इति सिद्धान्तकौमुदी । तथा सति 'वावृत्यते' इत्यादीनि रूपाणि सम्भवन्ति । दशसु अपि लकारेषु तादृशानि रूपाणि स्वयम् ऊह्यानि ।

११६१. क्लिश – उपतापे । अकर्म, सेट्, आत्मने । 'व्यक्तोक्तौ क्लेशते क्लेशेः, क्लिश्नाति तु विबाधने । दिवादेरुपतापेऽर्थे तङि स्यात् क्लिश्यते पदम्' (श्लो. १६३-४) इति देवः ।

१. लट् – क्लिश्यते क्लिश्येते क्लिश्यन्ते । क्लिश्यसे क्लिश्येथे क्लिश्यध्वे । क्लिश्ये क्लिश्यावहे क्लिश्यामहे । **२. लिट्** – चिक्लिशे चिक्लिशाते चिक्लिशिरे । चिक्लिशिषे चिक्लिशाथे चिक्लिशिध्वे । चिक्लिशे चिक्लिशिवहे चिक्लिशिमहे । **३. लुट्** – क्लेशिता क्लेशितारौ क्लेशितारः । क्लेशितासे क्लेशितासाथे क्लेशिताध्वे । क्लेशिताहे क्लेशितास्वहे क्लेशितास्महे । **४. लृट्** – क्लेशिष्यते क्लेशिष्येते क्लेशिष्यन्ते । क्लेशिष्यसे क्लेशिष्येते क्लेशिष्यध्वे । क्लेशिष्ये क्लेशिष्यावहे क्लेशिष्यामहे । **५. लोट्** – क्लिश्यताम् क्लिश्येताम् क्लिश्यन्ताम् । क्लिश्यस्व क्लिश्येथाम् क्लिश्यध्वम् । क्लिश्यै क्लिश्यावहै क्लिश्यामहै । **६. लङ्** – अक्लिश्यत अक्लिश्येताम् अक्लिश्यन्त । अक्लिश्यथाः अक्लिश्येथाम् अक्लिश्यध्वम् । अक्लिश्ये अक्लिश्यावहि अक्लिश्यामहि । **७. विधिलिङ्** – क्लिश्येत क्लिश्येयाताम् क्लिश्येरन् । क्लिश्येथाः क्लिश्येयाथाम् क्लिश्येध्वम् । क्लिश्येय क्लिश्येवहि क्लिश्येमहि । **८. आशीर्लिङ्** – क्लेशिषीष्ट क्लेशिषीयास्ताम् क्लेशिषीरन् । क्लेशिषीष्ठाः क्लेशिषीयास्थाम् क्लेशिषीध्वम् । क्लेशिषीय क्लेशिषीवहि क्लेशिषीमहि । **९. लुङ्** – अक्लेशिष्ट अक्लेशिषाताम् अक्लेशिषत । अक्लेशिष्ठाः अक्लेशिषाथाम् अक्लेशिढ्वम् । अक्लेशिषि अअक्लेशिष्वहि अक्लेशिष्महि । **१०. लृङ्** – अक्लेशिष्यत अक्लेशिष्येताम् अक्लेशिष्यन्त । अक्लेशिष्यथाः अक्लेशिष्येथाम् अक्लेशिष्यध्वम् । अक्लेशिष्ये अक्लेशिष्यावहि अक्लेशिष्यामहि ।

णिचि – क्लेशयति – ते, **सनि** – चिक्लिशिषते/चिक्लेशिषते[१], यकि – क्लिश्यते

१. 'रलो व्युपधात्....' इति विकल्पेन कित्त्वम् ।

११६२. काशृ – दीप्तौ । अकर्म, सेट्, आत्मने । 'काशेः दीप्तौ काश्येत काशते' (श्लो. १६५) इति देवः ।

१. लट् – काश्यते काश्येते काश्यन्ते । काश्यसे काश्येथे काश्यध्वे । काश्ये काश्यावहे काश्यामहे । **२. लिट्** – चकाशे चकाशाते चकाशिरे । चकाशिषे चकाशाथे चकाशिध्वे । चकाशे चकाशिवहे चकाशि-महे । **३. लुट्** – काशिता काशितारौ काशितारः । काशितासे काशितासाथे काशिताध्वे । काशिताहे काशितास्वहे काशितास्महे । **४. लृट्** – काशिष्यते काशिष्येते काशिष्यन्ते । काशिष्यसे काशिष्येते काशिष्यध्वे । काशिष्ये काशिष्यावहे काशिष्यामहे । **५. लोट्** – काश्यताम् काश्येताम् काश्यन्ताम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

काश्यस्व काश्येथाम् काश्यध्वम् । काश्यै काश्यावहै काश्यामहै । **६. लङ्** – अकाश्यत अकाश्येताम् अकाश्यन्त । अकाश्यथाः अकाश्येथाम् अकाश्यध्वम् । अकाश्ये अकाश्यावहि अकाश्यामहि **७. विधिलिङ्** – काश्येत काश्येयाताम् काश्येरन् । काश्येथाः काश्येयाथाम् काश्येध्वम् । काश्येय काश्येवहि काश्येमहि । **८. आशीर्लिङ्** – काशिषीष्ट काशिषीयास्ताम् काशिषीरन् । काशिषीष्ठाः काशिषीयास्थाम् काशिषीध्वम् । काशिषीय काशिषीवहि काशिषीमहि । **९. लुङ्** – अकाशिष्ट अकाशिषाताम् अकाशिषत । अकाशिष्ठाः अकाशिषाथाम् अकाशिड्ध्वम् । अकाशिषि अअकाशिष्वहि अकाशिष्महि । **१०. लृङ्** – अकाशिष्यत अकाशिष्येताम् अकाशिष्यन्त । अकाशिष्यथाः अकाशिष्येथाम् अकाशिष्यध्वम् । अकाशिष्ये अकाशिष्यावहि अकाशिष्यामहि ।

णिचि – काशयति – ते, **सनि** – चिकाशिषते, **यकि** – काश्यते ।

११६३. वाशृ – शब्दे । अकर्म, सेट्, आत्मने । 'वासृ' इति काशकृत्स्नः । 'वाश्ृ' इति कातन्त्राः अन्ये वैयाकरणाश्च ।

१. लट् – वाश्यते वाश्येते वाश्यन्ते । वाश्यसे वाश्येथे वाश्यध्वे । वाश्ये वाश्यावहे वाश्यामहे ।
२. लिट् – ववाशे ववाशाते ववाशिरे । ववाशिषे ववाशाथे ववाशिध्वे । ववाशे ववाशिवहे ववाशिमहे ।
३. लुट् – वाशिता वाशितारौ वाशितारः । वाशितासे वाशितासाथे वाशिताध्वे । वाशिताहे वाशितास्वहे वाशितास्महे । **४. लृट्** – वाशिष्यते वाशिष्येते वाशिष्यन्ते । वाशिष्यसे वाशिष्येते वाशिष्यध्वे । वाशिष्ये वाशिष्यावहे वाशिष्यामहे । **५. लोट्** – वाश्यताम् वाश्येताम् वाश्यन्ताम् । वाश्यस्व वाश्येथाम् वाश्यध्वम् । वाश्यै वाश्यावहै वाश्यामहै । **६. लङ्** – अवाश्यत अवाश्येताम् अवाश्यन्त । अवाश्यथाः अवाश्येथाम् अवाश्यध्वम् । अवाश्ये अवाश्यावहि अवाश्यामहि । **७. विधिलिङ्** – वाश्येत वाश्येयाताम् वाश्येरन् । वाश्येथाः वाश्येयाथाम् वाश्येध्वम् । वाश्येय वाश्येवहि वाश्येमहि । **८. आशीर्लिङ्** – वाशिषीष्ट वाशिषीयास्ताम् वाशिषीरन् । वाशिषीष्ठाः वाशिषीयास्थाम् वाशिषीध्वम् । वाशिषीय वाशिषीवहि वाशिषीमहि । **९. लुङ्** – अवाशिष्ट अवाशिषाताम् अवाशिषत । अवाशिष्ठाः अवाशिषाथाम् अवाशिढ्वम् । अवाशिषि अवाशिष्वहि अवाशिष्महि । **१०. लृङ्** – अवाशिष्यत अवाशिष्येताम् अवाशिष्यन्त । अवाशिष्यथाः अवाशिष्येथाम् अवाशिध्वम् । अवाशिष्ये अवाशिष्यावहि अवाशिष्यामहि ।

णिचि – वाशयति – ते, **सनि** – विवाशिषते, **यकि** – वाश्यते ।

११६४. मृष – तितिक्षायाम् । सकर्म, सेट्, उभय ।

१. लट् – (i) मृष्यति मृष्यतः मृष्यन्ति । मृष्यसि मृष्यथः मृष्यथ । मृष्यामि मृष्यावः मृष्यामः । (ii) मृष्यते मृष्येते मृष्यन्ते । मृष्यसे मृष्येथे मृष्यध्वे । मृष्ये मृष्यावहे मृष्यामहे । **२. लिट्** – (i) ममर्ष ममृषतुः ममृषुः । ममर्षिथ ममृषथुः ममृष । ममर्ष ममृषिव ममृषिम । (ii) ममृषे ममृषाते ममृषिरे । ममृषिषे ममृषाथे ममृषिध्वे । ममृषे ममृषिवहे ममृषिमहे । **३. लुट्** – (i) मर्षिता मर्षितारौ मर्षितारः । मर्षितासि मर्षितास्थः मर्षितास्थ । मर्षितास्मि मर्षितास्वः मर्षितास्मः । (ii) मर्षिता मर्षितारौ मर्षितारः । मर्षितासे मर्षितासाथे मर्षिताध्वे । मर्षिताहे मर्षितास्वहे मर्षितास्महे । **४. लृट्** – (i) मर्षिष्यति मर्षिष्यतः मर्षिष्यन्ति । मर्षिष्यसि मर्षिष्यथः मर्षिष्यथ । मर्षिष्यामि मर्षिष्यावः मर्षिष्यामः । (ii) मर्षिष्यते मर्षिष्येते मर्षिष्यन्ते । मर्षिष्यसे मर्षिष्येथे मर्षिष्यध्वे । मर्षिष्ये मर्षिष्यावहे मर्षिष्यामहे । **५. लोट्** – (i) मृष्यतु, मृष्यतात् मृष्यताम् मृष्यन्तु । मृष्य, मृष्यतात् मृष्यतम् मृष्यत । मृष्याणि मृष्याव मृष्याम । (ii) मृष्यताम् मृष्येताम् मृष्यन्ताम् । मृष्यस्व मृष्येथाम् मृष्यध्वम् । मृष्यै मृष्यावहै मृष्यामहै । **६. लङ्** – (i) अमृष्यत् अमृष्यताम् अमृष्यन् । अमृष्यः अमृष्यतम् अमृष्यत । अमृष्यम् अमृष्याव अमृष्याम । (ii) अमृष्यत अमृष्येताम् अमृष्यन्त । अमृष्यथाः अमृष्येथाम् अमृष्यध्वम् । अमृष्ये अमृष्यावहि अमृष्यामहि । **७. विधिलिङ्** – (i) मृष्येत् मृष्येताम् मृष्येयुः । मृष्येः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मृष्येतम् मृष्येत । मृष्येयम् मृष्येव मृष्येम । (ii) मृष्येत मृष्येयाताम् मृष्येरन् । मृष्येथाः मृष्येयाथाम् मृष्येध्वम् । मृष्येय मृष्येवहि मृष्येमहि । **८. आशीर्लिङ्** – (i) मृष्यात् मृष्यास्ताम् मृष्यासुः । मृष्याः मृष्यास्तम् मृष्यास्त । मृष्यासम् मृष्यास्व मृष्यास्म । (ii) मर्षिषीष्ट मर्षिषीयास्ताम् मर्षिषीरन् । मर्षिषीष्ठाः मर्षिषीयास्थाम् मर्षिषीध्वम्/ढ्वम् । मर्षिषीय मर्षिषीवहि मर्षिषीमहि । **९. लुङ्** – (i) अमर्षीत् अमर्षिष्टाम् अमर्षिषुः । अमर्षीः अमर्षिष्टम् अमर्षिष्ट । अमर्षिषम् अमर्षिष्व अमर्षिष्म । (ii) अमर्षिष्ट अमर्षिषाताम् अमर्षिषत । अमर्षिष्ठाः अमर्षिषाथाम् अमर्षिध्वम्/ढ्वम् । अमर्षिषि अमर्षिष्वहि अमर्षिष्महि । **१०. लृङ्** – (i) अमर्षिष्यत् अमर्षिष्यताम् अमर्षिष्यन् । अमर्षिष्यः अमर्षिष्यतम् अमर्षिष्यत । अमर्षिष्यम् अमर्षिष्याव अमर्षिष्याम । (ii) अमर्षिष्यत अमर्षिष्येताम् अमर्षिष्यन्त । अमर्षिष्यथाः अमर्षिष्येथाम् अमर्षिष्यध्वम् । अमर्षिष्ये अमर्षिष्यावहि अमर्षिष्यामहि ।

णिचि – मर्षयति – ते, **सनि** – मिमर्षिषति – ते, **यकि** – मृष्यते ।

११६५. ई शुचिर् – पूतीभावे । अकर्म, सेट्, उभय । पूतीभावः = क्लेदः ।

१. लट् – (i) शुच्यति शुच्यतः शुच्यन्ति । शुच्यसि शुच्यथः शुच्यथ । शुच्यामि शुच्यावः शुच्यामः । (ii) शुच्यते शुच्येते शुच्यन्ते । शुच्यसे शुच्येथे शुच्यध्वे । शुच्ये शुच्यावहे शुच्यामहे । **२. लिट्** – (i) शुशोच शुशुचतुः शुशुचुः । शुशोचिथ शुशुचथुः शुशुच । शुशोच शुशुचिव शुशुचिम । (ii) शुशुचे शुशुचाते शुशुचिरे । शुशुचिषे शुशुचाथे शुशुचिध्वे । शुशुचे शुशुचिवहे शुशुचिमहे । **३. लुट्** – (i) शोचिता शोचितारौ शोचितारः । शोचितासि शोचितास्थः शोचितास्थ । शोचितास्मि शोचितास्वः शोचितास्मः । (ii) शोचिता शोचितारौ शोचितारः । शोचितासे शोचितासाथे शोचिताध्वे । शोचिताहे शोचितास्वहे शोचितास्महे । **४. लृट्** – (i) शोचिष्यति शोचिष्यतः शोचिष्यन्ति । शोचिष्यसि शोचिष्यथः शोचिष्यथ । शोचिष्यामि शोचिष्यावः शोचिष्यामः । (ii) शोचिष्यते शोचिष्येते शोचिष्यन्ते । शोचिष्यसे शोचिष्येथे शोचिष्यध्वे । शोचिष्ये शोचिष्यावहे शोचिष्यामहे । **५. लोट्** – (i) शुच्यतु, शुच्यतात् शुच्यताम् शुच्यन्तु । शुच्य, शुच्यतात् शुच्यतम् शुच्यत । शुच्यानि शुच्याव शुच्याम । (ii) शुच्यताम् शुच्येताम् शुच्यन्ताम् । शुच्यस्व शुच्येथाम् शुच्यध्वम् । शुच्यै शुच्यावहै शुच्यामहै । **६. लङ्** – (i) अशुच्यत् अशुच्यताम् अशुच्यन् । अशुच्यः अशुच्यतम् अशुच्यत । अशुच्यम् अशुच्याव अशुच्याम । (ii) अशुच्यत अशुच्येताम् अशुच्यन्त । अशुच्यथाः अशुच्येथाम् अशुच्यध्वम् । अशुच्ये अशुच्यावहि अशुच्यामहि । **७. विधिलिङ्** – (i) शुच्येत् शुच्येताम् शुच्येयुः । शुच्येः शुच्येतम् शुच्येत । शुच्येयम् शुच्येव शुच्येम । (ii) शुच्येत शुच्येयाताम् शुच्येरन् । शुच्येथाः शुच्येयाथाम् शुच्येध्वम् । शुच्येय शुच्येवहि शुच्येमहि । **८. आशीर्लिङ्** – (i) शुच्यात् शुच्यास्ताम् शुच्यासुः । शुच्याः शुच्यास्तम् शुच्यास्त । शुच्यासम् शुच्यास्व शुच्यास्म । (ii) शोचिषीष्ट शोचिषीयास्ताम् शोचिषीरन् । शोचिषीष्ठाः शोचिषीयास्थाम् शोचिषीध्वम्/ढ्वम् । शोचिषीय शोचिषीवहि शोचिषीमहि । **९. लुङ्** – (i) अशोचीत् अशोचिष्टाम् अशोचिषुः । अशोचीः अशोचिष्टम् अशोचिष्ट । अशोचिषम् अशोचिष्व अशोचिष्म । (ii) अशुचत्[१] अशुचताम् अशुचन् । अशुचः अशुचतम् अशुचत । अशुचम् अशुचाव अशुचाम । (ii) अशोचिष्ट अशोचिषाताम् अशोचिषत । अशोचिष्ठाः अशोचिषाथाम् अशोचिध्वम्/ढ्वम् । अशोचिषि अशोचिष्वहि अशोचिष्महि । **१०. लृङ्** – (i) अशोचिष्यत् अशोचिष्यताम् अशोचिष्यन् । अशोचिष्यः अशोचिष्यतम् अशोचिष्यत । अशोचिष्यम् अशोचिष्याव अशोचिष्याम । (ii) अशोचिष्यत अशोचिष्येताम् अशोचिष्यन्त । अशोचिष्यथाः अशोचिष्येथाम् अशोचिष्यध्वम् । अशोचिष्ये अशोचिष्यावहि अशोचिष्यामहि ।

णिचि – शोचयति – ते, **सनि** – शुशुचिषति[२]/शुशोचिषति – ते, **यकि** – शुच्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. 'इरितो वा' इति अङ् ।
२. 'रलो व्युपधात्....' इति विकल्पेन कित्त्वम् ।

११६६. णह - बन्धने । सकर्म, अनिट्, उभय ।

१. लट् - (i) नह्यति नह्यतः नह्यन्ति । नह्यसि नह्यथः नह्यथ । नह्यामि नह्यावः नह्यामः । (ii) नह्यते नह्येते नह्यन्ते । नह्यसे नह्येथे नह्यध्वे । नह्ये नह्यावहे नह्यामहे । **२. लिट् -** (i) ननाह नेहतुः नेहुः । नेहिथ-ननद्ध नेहथुः नेह । ननाह-ननह नेहिव नेहिम । (ii) नेहे नेहाते नेहिरे । नेहिषे नेहाथे नेहिध्वे । नेहे नेहिवहे नेहिमहे । **३. लुट् -** (i) नद्धा नद्धारौ नद्धारः । नद्धासि नद्धास्थः नद्धास्थ । नद्धास्मि नद्धास्वः नद्धास्मः । (ii) नद्धा नद्धारौ नद्धारः । नद्धासे नद्धासाथे नद्धाध्वे । नद्धाहे नद्धास्वहे नद्धास्महे । **४. लृट् -** (i) नत्स्यति नत्स्यतः नत्स्यन्ति । नत्स्यसि नत्स्यथः नत्स्यथ । नत्स्यामि नत्स्यावः नत्स्यामः । (ii) नत्स्यते नत्स्येते नत्स्यन्ते । नत्स्यसे नत्स्येथे नत्स्यध्वे । नत्स्ये नत्स्यावहे नत्स्यामहे । **५. लोट् -** (i) नह्यतु, नह्यतात् नह्यताम् नह्यन्तु । नह्य, नह्यतात् नह्यतम् नह्यत । नह्यानि नह्याव नह्याम । (ii) नह्यताम् नह्येताम् नह्यन्ताम् । नह्यस्व नह्येथाम् नह्यध्वम् । नह्यै नह्यावहै नह्यामहै । **६. लङ् -** (i) अनह्यत् अनह्यताम् अनह्यन् । अनह्यः अनह्यतम् अनह्यत । अनह्यम् अनह्याव अनह्याम । (ii) अनह्यत अनह्येताम् अनह्यन्त । अनह्यथाः अनह्येथाम् अनह्यध्वम् । अनह्ये अनह्यावहि अनह्यामहि । **७. विधिलिङ् -** (i) नह्येत् नह्येताम् नह्येयुः । नह्येः नह्येतम् नह्येत । नह्येयम् नह्येव नह्येम । (ii) नह्येत नह्येयाताम् नह्येरन् । नह्येथाः नह्येयाथाम् नह्येध्वम् । नह्येय नह्येवहि नह्येमहि । **८. आशीर्लिङ् -** (i) नह्यात् नह्यास्ताम् नह्यासुः । नह्याः नह्यास्तम् नह्यास्त । नह्यासम् नह्यास्व नह्यास्म । (ii) नत्सीष्ट नत्सीयास्ताम् नत्सीरन् । नत्सीष्ठाः नत्सीयास्थाम् नत्सीध्वम्/ढ्वम् । नत्सीय नत्सीवहि नत्सीमहि । **९. लुङ् -** (i) अनात्सीत् अनाद्धाम् अनात्सुः । अनात्सीः अनाद्धम् अनाद्ध । अनात्सम् अनात्स्व अनात्स्म । (ii) अनद्ध अनत्साताम् अनत्सत । अनद्धाः अनत्साथाम् अनग्ध्वम् । अनत्सि अनत्स्वहि अनत्स्महि । **१०. लृङ् -** (i) अनत्स्यत् अनत्स्यताम् अनत्स्यन् । अनत्स्यः अनत्स्यतम् अनत्स्यत । अनत्स्यम् अनत्स्याव अनत्स्याम । (ii) अनत्स्यत अनत्स्येताम् अनत्स्यन्त । अनत्स्यथाः अनत्स्येथाम् अनत्स्यध्वम् । अनत्स्ये अनत्स्यावहि अनत्स्यामहि ।

णिचि - नाहयति - ते, **सनि -** निनहिषति - ते, **यकि -** नह्यते

११६७. रञ्ज - रागे । अकर्म, अनिट्, उभय । 'रजते रजतीत्येव रज्यते रज्यतीत्यपि । रागार्थे शप्श्यनोर्द्वे द्वे ..' (श्लो. ५७-५८) इति देवः ।

१. लट् - (i) रज्यति[1] रज्यतः रज्यन्ति । रज्यसि रज्यथः रज्यथ । रज्यामि रज्यावः रज्यामः । (ii) रज्यते रज्येते रज्यन्ते । रज्यसे रज्येथे रज्यध्वे । रज्ये रज्यावहे रज्यामहे । **२. लिट् -** (i) ररञ्ज ररञ्जतुः ररञ्जुः । ररञ्जिथ-ररङ्क्थ ररञ्जथुः ररञ्ज । ररञ्ज ररञ्जिव ररञ्जिम । (ii) ररञ्जे ररञ्जाते ररञ्जिरे । ररञ्जिषे ररञ्जाथे ररञ्जिध्वे । ररञ्जे ररञ्जिवहे ररञ्जिमहे । **३. लुट् -** (i) रङ्क्ता रङ्क्तारौ रङ्क्तारः । रङ्क्तासि रङ्क्तास्थः रङ्क्तास्थ । रङ्क्तास्मि रङ्क्तास्वः रङ्क्तास्मः । (ii) रङ्क्ता रङ्क्तारौ रङ्क्तारः । रङ्क्तासे रङ्क्तासाथे रङ्क्ताध्वे । रङ्क्ताहे रङ्क्तास्वहे रङ्क्तास्महे । **४. लृट् -** (i) रङ्क्ष्यति रङ्क्ष्यतः रङ्क्ष्यन्ति । रङ्क्ष्यसि रङ्क्ष्यथः रङ्क्ष्यथ । रङ्क्ष्यामि रङ्क्ष्यावः रङ्क्ष्यामः । (ii) रङ्क्ष्यते रङ्क्ष्येते रङ्क्ष्यन्ते । रङ्क्ष्यसे रङ्क्ष्येथे रङ्क्ष्यध्वे । रङ्क्ष्ये रङ्क्ष्यावहे रङ्क्ष्यामहे । **५. लोट् -** (i) रज्यतु, रज्यतात् रज्यताम् रज्यन्तु । रज्य, रज्यतात् रज्यतम् रज्यत । रज्यानि रज्याव रज्याम । (ii) रज्यताम् रज्येताम् रज्यन्ताम् । रज्यस्व रज्येथाम् रज्यध्वम् । रज्यै रज्यावहै रज्यामहै । **६. लङ् -** (i) अरज्यत् अरज्यताम् अरज्यन् । अरज्यः अरज्यतम् अरज्यत । अरज्यम् अरज्याव अरज्याम । (ii) अरज्यत अरज्येताम् अरज्यन्त । अरज्यथाः अरज्येथाम् अरज्यध्वम् । अरज्ये अरज्यावहि अरज्यामहि । **७. विधिलिङ्**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

– (i) रज्येत् रज्येताम् रज्येयुः । रज्येः रज्येतम् रज्येत । रज्येयम् रज्येव रज्येम । (ii) रज्येत रज्येयाताम् रज्येरन् । रज्येथाः रज्येयाथाम् रज्येध्वम् । रज्येय रज्येवहि रज्येमहि । **८. आशीर्लिङ्** – (i) रज्यात् रज्यास्ताम् रज्यासुः । रज्याः रज्यास्तम् रज्यास्त । रज्यासम् रज्यास्व रज्यास्म । (ii) रङ्क्षीष्ट रङ्क्षीयास्ताम् रङ्क्षीरन् । रङ्क्षीष्ठाः रङ्क्षीयास्थाम् रङ्क्षीध्वम्/ढ्वम् । रङ्क्षीय रङ्क्षीवहि रङ्क्षीमहि । **९. लुङ्** – (i) अराङ्क्षीत् अराङ्क्ताम् अराङ्क्षुः । अराङ्क्षीः अराङ्क्तम् अराङ्क्त । अराङ्क्षम् अराङ्क्ष्व अराङ्क्ष्म । (ii) अरङ्क्त अरङ्क्षाताम् अरङ्क्षत । अरङ्क्थाः अरङ्क्षाथाम् अरङ्ग्ध्वम् । अरङ्क्षि अरङ्क्ष्वहि अरङ्क्ष्महि । **१०. लृङ्** – (i) अरङ्क्ष्यत् अरङ्क्ष्यताम् अरङ्क्ष्यन् । अरङ्क्ष्यः अरङ्क्ष्यतम् अरङ्क्ष्यत । अरङ्क्ष्यम् अरङ्क्ष्याव अरङ्क्ष्याम । (ii) अरङ्क्ष्यत अरङ्क्ष्येताम् अरङ्क्ष्यन्त । अरङ्क्ष्यथाः अरङ्क्ष्येथाम् अरङ्क्ष्यध्वम् । अरङ्क्ष्ये अरङ्क्ष्यावहि अरङ्क्ष्यामहि ।

णिचि – रञ्जयति-रजयति[2] – ते, **सनि** – रिरङ्क्षति – ते, **यकि** – रज्यते

१. 'अनिदिताम्.....' इति नलोपः ।

२. 'रञ्जेर्णौ मृगरमणे' इति नलोपः । मृगरमणम् आखेटनम् । रजयति मृगान् ।

११६८. शप – आक्रोशे । सकर्म, अनिट्, उभय । 'आक्रोशे शप्यते शप्येत् शपते शपतीति च । उपालम्भे शपेर्वाक्यात्तङि, स्याच्छपते पदम्' (श्लो. १३२) इति देवः ।

१. लट् – (i) शप्यति शप्यतः शप्यन्ति । शप्यसि शप्यथः शप्यथ । शप्यामि शप्यावः शप्यामः । (ii) शप्यते शप्येते शप्यन्ते । शप्यसे शप्येथे शप्यध्वे । शप्ये शप्यावहे शप्यामहे । **२. लिट्** – (i) शशाप शेपतुः शेपुः । शेपिथ शेपथुः शेप । शशाप, शशप शेपिव शेपिम । (ii) शेपे शेपाते शेपिरे । शेपिषे शेपाथे शेपिध्वे । शेपे शेपिवहे शेपिमहे । **३. लुट्** – (i) शप्ता शप्तारौ शप्तारः । शप्तासि शप्तास्थः शप्तास्थ । शप्तास्मि शप्तास्वः शप्तास्मः । (ii) शप्ता शप्तारौ शप्तारः । शप्तासे शप्तासाथे शप्ताध्वे । शप्ताहे शप्तास्वहे शप्तास्महे । **४. लृट्** – (i) शप्स्यति शप्स्यतः शप्स्यन्ति । शप्स्यसि शप्स्यथः शप्स्यथ । शप्स्यामि शप्स्यावः शप्स्यामः । (ii) शप्स्यते शप्स्येते शप्स्यन्ते । शप्स्यसे शप्स्येथे शप्स्यध्वे । शप्स्ये शप्स्यावहे शप्स्यामहे । **५. लोट्** – (i) शप्यतु, शप्यतात् शप्यताम् शप्यन्तु । शप्य, शप्यतात् शप्यतम् शप्यत । शप्यानि शप्याव शप्याम । (ii) शप्यताम् शप्येताम् शप्यन्ताम् । शप्यस्व शप्येथाम् शप्यध्वम् । शप्यै शप्यावहै शप्यामहै । **६. लङ्** – (i) अशप्यत् अशप्यताम् अशप्यन् । अशप्यः अशप्यतम् अशप्यत । अशप्यम् अशप्याव अशप्याम । (ii) अशप्यत अशप्येताम् अशप्यन्त । अशप्यथाः अशप्येथाम् अशप्यध्वम् । अशप्ये अशप्यावहि अशप्यामहि । **७. विधिलिङ्** – (i) शप्येत् शप्येताम् शप्येयुः । शप्येः शप्येतम् शप्येत । शप्येयम् शप्येव शप्येम । (ii) शप्येत शप्येयाताम् शप्येरन् । शप्येथाः शप्येयाथाम् शप्येध्वम् । शप्येय शप्येवहि शप्येमहि । **८. आशीर्लिङ्** – (i) शप्यात् शप्यास्ताम् शप्यासुः । शप्याः शप्यास्तम् शप्यास्त । शप्यासम् शप्यास्व शप्यास्म । (ii) शप्सीष्ट शप्सीयास्ताम् शप्सीरन् । शप्सीष्ठाः शप्सीयास्थाम् शप्सीध्वम् । शप्सीय शप्सीवहि शप्सीमहि । **९. लुङ्** – (i) अशाप्सीत् अशाप्ताम् अशाप्सुः । अशाप्सीः अशाप्तम् अशाप्त । अशाप्सम् अशाप्स्व अशाप्स्म । (ii) अशप्त अशप्साताम् अशप्सत । अशप्थाः अशप्साथाम् अशब्ध्वम् । अशप्सि अशप्स्वहि अशप्स्महि । **१०. लृङ्** – (i) अशप्स्यत् अशप्स्यताम् अशप्स्यन् । अशप्स्यः अशप्स्यतम् अशप्स्यत । अशप्स्यम् अशप्स्याव अशप्स्याम । (ii) अशप्स्यत अशप्स्येताम् अशप्स्यन्त । अशप्स्यथाः अशप्स्येथाम् अशप्स्यध्वम् । अशप्स्ये अशप्स्यावहि अशप्स्यामहि ।

णिचि – शापयति – ते, **सनि** – शिशप्सति – ते, **यकि** – शप्यते

११६९. पद – गतौ । सकर्म, अनिट्, आत्मने । 'पद्लृ' इति पुरुषकारसम्मतः पाठः । 'श्यनि गत्यर्थे पद्यते पदयेत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णौ' (श्लो.१०९) इति देवः ।

१. लट् – पद्यते पद्येते पद्यन्ते । पद्यसे पद्येथे पद्यध्वे । पद्ये पद्यावहे पद्यामहे । **२. लिट्** – पेदे पेदाते पेदिरे । पेदिषे पेदाथे पेदिध्वे । पेदे पेदिवहे पेदिमहे । **३. लुट्** – पत्ता पत्तारौ पत्तारः । पत्तासे पत्तासाथे पत्ताध्वे । पत्ताहे पत्तास्वहे पत्तास्महे । **४. लृट्** – पत्स्यते पत्स्येते पत्स्यन्ते । पत्स्यसे पत्स्येथे पत्स्यध्वे । पत्स्ये पत्स्यावहे पत्स्यामहे । **५. लोट्** – पद्यताम् पद्येताम् पद्यन्ताम् । पद्यस्व पद्येथाम् पद्यध्वम् । पद्यै पद्यावहै पद्यामहै । **६. लङ्** – अपद्यत अपद्येताम् अपद्यन्त । अपद्यथाः अपद्येथाम् अपद्यध्वम् । अपद्ये अपद्यावहि अपद्यामहि । **७. विधिलिङ्** – पद्येत पद्येयाताम् पद्येरन् । पद्येथाः पद्येयाथाम् पद्येध्वम् । पद्येय पद्येवहि पद्येमहि । **८. आशीर्लिङ्** – पत्सीष्ट पत्सीयास्ताम् पत्सीरन् । पत्सीष्ठाः पत्सीयास्थाम् पत्सीध्वम् । पत्सीय पत्सीवहि पत्सीमहि । **९. लुङ्** – अपादि[1] अपत्साताम् अपत्सत । अपत्थाः अपत्साथाम् अपद्ध्वम् । अपत्सि अपत्स्वहि अपत्स्महि । **१०. लृङ्** – अपत्स्यत अपत्स्येताम् अपत्स्यन्त । अपत्स्यथाः अपत्स्येथाम् अपत्स्यध्वम् । अपत्स्ये अपत्स्यावहि अपत्स्यामहि ।

णिचि – पादयति, **सनि** – पित्सते[2], **यकि** – पद्यते ।

१. 'चिण् ते पदः' – पदः च्लेः चिण् स्यात् तशब्दे परे ।

२. 'सनिमीमा.....' इति इसादेशः ।

११७०. खिद – दैन्ये । अकर्म, अनिट्, आत्मने । 'दैन्येऽर्थे खिद्यते खिन्ते, परिघाते (तपे) तु खिन्दति' (श्लो. ११२) इति देवः ।

१. लट् – खिद्यते खिद्येते खिद्यन्ते । खिद्यसे खिद्येथे खिद्यध्वे । खिद्ये खिद्यावहे खिद्यामहे । **२. लिट्** – चिखिदे चिखिदाते चिखिदिरे । चिखिदिषे चिखिदाथे चिखिदिध्वे । चिखिदे चिखिदिवहे चिखिदिमहे । **३. लुट्** – खेत्ता खेत्तारौ खेत्तारः । खेत्तासे खेत्तासाथे खेत्ताध्वे । खेत्ताहे खेत्तास्वहे खेत्तास्महे । **४. लृट्** – खेत्स्यते खेत्स्येते खेत्स्यन्ते । खेत्स्यसे खेत्स्येथे खेत्स्यध्वे । खेत्स्ये खेत्स्यावहे खेत्स्यामहे । **५. लोट्** – खिद्यताम् खिद्येताम् खिद्यन्ताम् । खिद्यस्व खिद्येथाम् खिद्यध्वम् । खिद्यै खिद्यावहै खिद्यामहै । **६. लङ्** – अखिद्यत अखिद्येताम् अखिद्यन्त । अखिद्यथाः अखिद्येथाम् अखिद्यध्वम् । अखिद्ये अखिद्यावहि अखिद्यामहि । **७. विधिलिङ्** – खिद्येत खिद्येयाताम् खिद्येरन् । खिद्येथाः खिद्येयाथाम् खिद्येध्वम् । खिद्येय खिद्येवहि खिद्येमहि । **८. आशीर्लिङ्** – खित्सीष्ट खित्सीयास्ताम् खित्सीरन् । खित्सीष्ठाः खित्सीयास्थाम् खित्सीध्वम् । खित्सीय खित्सीवहि खित्सीमहि । **९. लुङ्** – अखित्त[1] अखित्साताम् अखित्सत । अखित्थाः अखित्साथाम् अखिद्ध्वम् । अखित्सि अखित्स्वहि अखित्स्महि । **१०. लृङ्** – अखित्स्यत अखित्स्येताम् अखित्स्यन्त । अखित्स्यथाः अखित्स्येथाम् अखित्स्यध्वम् । अखित्स्ये अखित्स्यावहि अखित्स्यामहि ।

णिचि – खेदयति – ते, **सनि** – चिखित्सते, **यकि** – खिद्यते

१. 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः ।

११७१. विद – सत्तयाम् । अकर्म, अनिट्, आत्मने । 'सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे' (श्लो. १११) इति देवः ।

१. लट् – विद्यते विद्येते विद्यन्ते । विद्यसे विद्येथे विद्यध्वे । विद्ये विद्यावहे विद्यामहे । **२. लिट्** – विविदे विविदाते विविदिरे । विविदिषे विविदाथे विविदिध्वे । विविदे विविदिवहे विविदिमहे । **३. लुट्** – वेत्ता वेत्तारौ वेत्तारः । वेत्तासे वेत्तासाथे वेत्ताध्वे । वेत्ताहे वेत्तास्वहे वेत्तास्महे । **४. लृट्** – वेत्स्यते वेत्स्येते वेत्स्यन्ते । वेत्स्यसे वेत्स्येथे वेत्स्यध्वे । वेत्स्ये वेत्स्यावहे वेत्स्यामहे । **५. लोट्** – विद्यताम् विद्येताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विद्यन्ताम् । विद्यस्व विद्येथाम् विद्यध्वम् । विद्यै विद्यावहै विद्यामहै । **६. लङ्** – अविद्यत अविद्येताम् अविद्यन्त । अविद्यथाः अविद्येथाम् अविद्यध्वम् । अविद्ये अविद्यावहि अविद्यामहि । **७. विधिलिङ्** – विद्येत विद्येयाताम् विद्येरन् । विद्येथाः विद्येयाथाम् विद्येध्वम् । विद्येय विद्येवहि विद्येमहि । **८. आशीर्लिङ्** – वित्सीष्ट वित्सीयास्ताम् वित्सीरन् । वित्सीष्ठाः वित्सीयास्थाम् वित्सीध्वम् । वित्सीय वित्सीवहि वित्सीमहि । **९. लुङ्** – अवित्त[1] अवित्साताम् अवित्सत । अवित्थाः अवित्साथाम् अविद्ध्वम् । अवित्सि अवित्स्वहि अवित्स्महि । **१०. लृङ्** – अवित्स्यत अवित्स्येताम् अवित्स्यन्त । अवित्स्यथाः अवित्स्येथाम् अवित्स्यध्वम् । अवित्स्ये अवित्स्यावहि अवित्स्यामहि ।

णिचि – वेदयति – ते, **सनि** – विवित्सते, **यकि** – विद्यते ।

१. 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः ।

११७२. बुध – अवगमने । सकर्म, अनिट्, आत्मने । 'बुध्यते बोधतीत्येवं बुधेरवगमे द्वयम्' (श्लो. ११९) इति देवः ।

१. लट् – बुध्यते बुध्येते बुध्यन्ते । बुध्यसे बुध्येथे बुध्यध्वे । बुध्ये बुध्यावहे बुध्यामहे । **२. लिट्** – बुबुधे बुबुधाते बुबुधिरे । बुबुधिषे बुबुधाथे बुबुधिध्वे । बुबुधे बुबुधिवहे बुबुधिमहे । **३. लुट्** – बोद्धा बोद्धारौ बोद्धारः । बोद्धासे बोद्धासाथे बोद्धाध्वे । बोद्धाहे बोद्धास्वहे बोद्धास्महे । **४. लृट्** – भोत्स्यते[1] भोत्स्येते भोत्स्यन्ते । भोत्स्यसे भोत्स्येथे भोत्स्यध्वे । भोत्स्ये भोत्स्यावहे भोत्स्यामहे । **५. लोट्** – बुध्यताम् बुध्येताम् बुध्यन्ताम् । बुध्यस्व बुध्येथाम् बुध्यध्वम् । बुध्यै बुध्यावहै बुध्यामहै । **६. लङ्** – अबुध्यत अबुध्येताम् अबुध्यन्त । अबुध्यथाः अबुध्येथाम् अबुध्यध्वम् । अबुध्ये अबुध्यावहि अबुध्यामहि । **७. विधिलिङ्** – बुध्येत बुध्येयाताम् बुध्येरन् । बुध्येथाः बुध्येयाथाम् बुध्येध्वम् । बुध्येय बुध्येवहि बुध्येमहि । **८. आशीर्लिङ्** – भुत्सीष्ट भुत्सीयास्ताम् भुत्सीरन् । भुत्सीष्ठाः भुत्सीयास्थाम् भुत्सीध्वम् । भुत्सीय भुत्सीवहि भुत्सीमहि । **९. लुङ्** – अबोधि[2]–अबुद्ध अभुत्साताम् अभुत्सत । अबुद्धाः अभुत्साथाम् अभुद्ध्वम् । अभुत्सि अभुत्स्वहि अभुत्स्महि । **१०. लृङ्** – अभोत्स्यत अभोत्स्येताम् अभोत्स्यन्त । अभोत्स्यथाः अभोत्स्येथाम् अभोत्स्यध्वम् । अभोत्स्ये अभोत्स्यावहि अभोत्स्यामहि ।

णिचि – बोधयति[3], **सनि** – बुभुत्सते, **यकि** – बुध्यते

१. 'एकाचो बशो भष्...' इति भष्भावः ।

२. 'दीपजनबुध...' इति चिण्विकल्पः ।

३. 'बुधयुधणशजनेङ् ....' इति क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदम् ।

११७३. युध – सम्प्रहारे । अकर्म, अनिट्, आत्मने । 'सम्प्रहारः = हननम्' इति क्षीरस्वामी ।

१. लट् – युध्यते[1] युध्येते युध्यन्ते । युध्यसे युध्येथे युध्यध्वे । युध्ये युध्यावहे युध्यामहे । **२. लिट्** – युयुधे युयुधाते युयुधिरे । युयुधिषे युयुधाथे युयुधिध्वे । युयुधे युयुधिवहे युयुधिमहे । **३. लुट्** – योद्धा योद्धारौ योद्धारः । योद्धासे योद्धासाथे योद्धाध्वे । योद्धाहे योद्धास्वहे योद्धास्महे । **४. लृट्** – योत्स्यते योत्स्येते योत्स्यन्ते । योत्स्यसे योत्स्येथे योत्स्यध्वे । योत्स्ये योत्स्यावहे योत्स्यामहे । **५. लोट्** – युध्यताम् युध्येताम् युध्यन्ताम् । युध्यस्व युध्येथाम् युध्यध्वम् । युध्यै युध्यावहै युध्यामहै । **६. लङ्** – अयुध्यत अयुध्येताम् अयुध्यन्त । अयुध्यथाः अयुध्येथाम् अयुध्यध्वम् । अयुध्ये अयुध्यावहि अयुध्यामहि । **७. विधिलिङ्** – युध्येत युध्येयाताम् युध्येरन् । युध्येथाः युध्येयाथाम् युध्येध्वम् । युध्येय युध्येवहि युध्येमहि । **८. आशीर्लिङ्** – युत्सीष्ट युत्सीयास्ताम् युत्सीरन् । युत्सीष्ठाः युत्सीयास्थाम् युत्सीध्वम् । युत्सीय युत्सीवहि युत्सीमहि । **९. लुङ्** – अयुद्ध अयुत्साताम् अयुत्सत । अयुद्धाः अयुत्साथाम् अयुद्ध्वम् । अयुत्सि अयुत्स्वहि अयुत्स्महि । **१०. लृङ्** – अयोत्स्यत अयोत्स्येताम् अयोत्स्यन्त । अयोत्स्यथाः अयोत्स्येथाम् अयोत्स्यध्वम् । अयोत्स्ये

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अयोत्स्यावहि अयोत्स्यामहि ।

णिचि - योधयति[२], **सनि** - युयुत्सते, **यकि** - युध्यते ।

१. युध्यति इत्यत्र युधमिच्छति इति क्यच् । 'अनुदात्तेत्त्वलक्षणम् आत्मनेपदम् अनित्यम्' इति वा इति कौमुदी ।

२. 'बुधयुधणशजनेङ् ....' इति क्रियाफलस्य कर्तृगामित्वेऽपि परस्मैपदम् ।

११७४. अनो रुध - कामे । अकर्म, अनिट्, आत्मने । 'अनुपूर्वो रुधिः कामेऽर्थे तङ्श्यनौ भजते' इति धा.का. व्याख्यायां (२.६२) विवृतम् । 'रुन्धे रुणद्ध्यावरणे, कामेऽनावनुरुध्यते' (श्लो. १२१) इति देवः ।

१. लट् - अनुरुध्यते अनुरुध्येते अनुरुध्यन्ते । अनुरुध्यसे अनुरुध्येथे अनुरुध्यध्वे । अनुरुध्ये अनुरुध्यावहे अनुरुध्यामहे । **२. लिट्** - अनुरुरुधे अनुरुरुधाते अनुरुरुधिरे । अनुरुरुधिषे अनुरुरुधाथे अनुरुरुधिध्वे । अनुरुरुधे अनुरुरुधिवहे अनुरुरुधिमहे । **३. लुट्** - अनुरोद्धा अनुरोद्धारौ अनुरोद्धारः । अनुरोद्धासे अनुरोद्धासाथे अनुरोद्धाध्वे । अनुरोद्धाहे अनुरोद्धास्वहे अनुरोद्धास्महे । **४. लृट्** - अनुरोत्स्यते अनुरोत्स्येते अनुरोत्स्यन्ते । अनुरोत्स्यसे अनुरोत्स्येथे अनुरोत्स्यध्वे । अनुरोत्स्ये अनुरोत्स्यावहे अनुरोत्स्यामहे । **५. लोट्** - अनुरुध्यताम् अनुरुध्येताम् अनुरुध्यन्ताम् । अनुरुध्यस्व अनुरुध्येथाम् अनुरुध्यध्वम् । अनुरुध्यै अनुरुध्यावहै अनुरुध्यामहै । **६. लङ्** - अन्वरुध्यत अन्वरुध्येताम् अन्वरुध्यन्त । अन्वरुध्यथाः अन्वरुध्येथाम् अन्वरुध्यध्वम् । अन्वरुध्ये अन्वरुध्यावहि अन्वरुध्यामहि । **७. विधिलिङ्** - अनुरुध्येत अनुरुध्येयाताम् अनुरुध्येरन् । अनुरुध्येथाः अनुरुध्येयाथाम् अनुरुध्येध्वम् । अनुरुध्येय अनुरुध्येवहि अनुरुध्येमहि । **८. आशीर्लिङ्** - अनुरुत्सीष्ट अनुरुत्सीयास्ताम् अनुरुत्सीरन् । अनुरुत्सीष्ठाः अनुरुत्सीयास्थाम् अनुरुत्सीध्वम् । अनुरुत्सीय अनुरुत्सीवहि अनुरुत्सीमहि । **९. लुङ्** - अन्वरुद्ध अन्वरुत्साताम् अन्वरुत्सत । अन्वरुद्धाः अन्वरुत्साथाम् अन्वरुद्ध्वम् । अन्वरुत्सि अन्वरुत्स्वहि अन्वरुत्स्महि । **१०. लृङ्** - अन्वरोत्स्यत अन्वरोत्स्येताम् अन्वरोत्स्यन्त । अन्वरोत्स्यथाः अन्वरोत्स्येथाम् अन्वरोत्स्यध्वम् । अन्वरोत्स्ये अन्वरोत्स्यावहि अन्वरोत्स्यामहि ।

णिचि - अनुरोधयति - ते, **सनि** - अनुरुरुत्सते, **यकि** - अनुरुध्यते ।

११७५. अण - प्राणने । अकर्म, सेट्, आत्मने । 'अन' इति दन्त्यान्तोऽयमित्येके' इति कौमुदी । 'अणेरणति शब्दार्थे प्राणते त्वण्यते श्यनि' (श्लो. ९२) इति देवः ।

१. लट् - अण्यते अण्येते अण्यन्ते । अण्यसे अण्येथे अण्यध्वे । अण्ये अण्यावहे अण्यामहे । **२. लिट्** - आणे आणाते आणिरे । आणिषे आणाथे आणिध्वे । आणे आणिवहे आणिमहे । **३. लुट्** - अणिता अणितारौ अणितारः । अणितासे अणितासाथे अणिताध्वे । अणिताहे अणितास्वहे अणितास्महे । **४. लृट्** - अणिष्यते अणिष्येते अणिष्यन्ते । अणिष्यसे अणिष्येथे अणिष्यध्वे । अणिष्ये अणिष्यावहे अणिष्यामहे । **५. लोट्** - अण्यताम् अण्येताम् अण्यन्ताम् । अण्यस्व अण्येथाम् अण्यध्वम् । अण्यै अण्यावहै अण्यामहै । **६. लङ्** - आण्यत आण्येताम् आण्यन्त । आण्यथाः आण्येथाम् आण्यध्वम् । आण्ये आण्यवहि आण्यमहि । **७. विधिलिङ्** - अण्येत अण्येयाताम् अण्येरन् । अण्येथाः अण्येयाथाम् अण्येध्वम् । अण्येय अण्येवहि अण्येमहि । **८. आशीर्लिङ्** - अणिषीष्ट अणिषीयास्ताम् अणिषीरन् । अणिषीष्ठाः अणिषीयास्थाम् अणिषीध्वम् । अणिषीय अणिषीवहि अणिषीमहि । **९. लुङ्** - आणिष्ट आणिषाताम् आणिषत । आणिष्ठाः आणिषाथाताम् आणिढ्वम् । आणिषि आणिष्वहि आणिष्महि । **१०. लृङ्** - आणिष्यत आणिष्येताम् आणिष्यन्त । आणिष्यथाः आणिष्येथाम् आणिष्यध्वम् । आणिष्ये आणिष्यावहि आणिष्यामहि ।

णिचि - आणयति - ते, **सनि** - अणिणिषते, **यकि** - अण्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११७६. मन - ज्ञाने । सक, अनिट्, आत्मने । 'स्तम्भे मानयते, ज्ञाने मन्यते मनुते पदम् । पूजायां मानयेन्मानेत्, यौ मीमांसेत तङ्सनोः' (श्लो. १२५-१२६) इति देवः ।

१. लट् - मन्यते मन्येते मन्यन्ते । मन्यसे मन्येथे मन्यध्वे । मन्ये मन्यावहे मन्यामहे । **२. लिट्** - मेने मेनाते मेनिरे । मेनिषे मेनाथे मेनिध्वे । मेने मेनिवहे मेनिमहे । **३. लुट्** - मन्ता मन्तारौ मन्तारः । मन्तासे मन्तासाथे मन्ताध्वे । मन्ताहे मन्तास्वहे मन्तास्महे । **४. लृट्** - मंस्यते मंस्येते मंस्यन्ते । मंस्यसे मंस्येथे मंस्यध्वे । मंस्ये मंस्यावहे मंस्यामहे । **५. लोट्** - मन्यताम् मन्येताम् मन्यन्ताम् । मन्यस्व मन्येथाम् मन्यध्वम् । मन्यै मन्यावहै मन्यामहै । **६. लङ्** - अमन्यत अमन्येताम् अमन्यन्त । अमन्यथाः अमन्येथाम् अमन्यध्वम् । अमन्ये अमन्यावहि अमन्यामहि । **७. विधिलिङ्** - मन्येत मन्येयाताम् मन्येरन् । मन्येथाः मन्येयाथाम् मन्येध्वम् । मन्येय मन्येवहि मन्येमहि । **८. आशीर्लिङ्** - मंसीष्ट मंसीयास्ताम् मंसीरन् । मंसीष्ठाः मंसीयास्थाम् मंसीध्वम् । मंसीय मंसीवहि मंसीमहि । **९. लुङ्** - अमंस्त अमंसाताम् अमंसत । अमंस्थाः अमंसाथाम् अमन्ध्वम् । अमंसि अमंस्वहि अमंस्महि । **१०. लृङ्** - अमंस्यत अमंस्येताम् अमंस्यन्त । अमंस्यथाः अमंस्येथाम् अमंस्यध्वम् । अमंस्ये अमंस्यावहि अमंस्यामहि ।

णिचि - मानयति - ते, **सनि** - मिमंसते, **यकि** - मन्यते ।

११७७. युज - समाधौ । अकर्म[1], अनिट्, आत्मने । समाधिः = चित्तवृत्तिनिरोधः । 'युनक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि । युजेः संयमनार्थे वा णौ योजयति योजति' (श्लो. ६४) इति देवः ।

१. लट् - युज्यते युज्येते युज्यन्ते । युज्यसे युज्येथे युज्यध्वे । युज्ये युज्यावहे युज्यामहे । **२. लिट्** - युयुजे युयुजाते युयुजिरे । युयुजिषे युयुजाथे युयुजिध्वे । युयुजे युयुजिवहे युयुजिमहे । **३. लुट्** - योक्ता योक्तारौ योक्तारः । योक्तासे योक्तासाथे योक्ताध्वे । योक्ताहे योक्तास्वहे योक्तास्महे । **४. लृट्** - योक्ष्यते योक्ष्येते योक्ष्यन्ते । योक्ष्यसे योक्ष्येथे योक्ष्यध्वे । योक्ष्ये योक्ष्यावहे योक्ष्यामहे । **५. लोट्** - युज्यताम् युज्येताम् युज्यन्ताम् । युज्यस्व युज्येथाम् युज्यध्वम् । युज्यै युज्यावहै युज्यामहै । **६. लङ्** - अयुज्यत अयुज्येताम् अयुज्यन्त । अयुज्यथाः अयुज्येथाम् अयुज्यध्वम् । अयुज्ये अयुज्यावहि अयुज्यामहि । **७. विधिलिङ्** - युज्येत युज्येयाताम् युज्येरन् । युज्येथाः युज्येयाथाम् युज्येध्वम् । युज्येय युज्येवहि युज्येमहि । **८. आशीर्लिङ्** - युक्षीष्ट युक्षीयास्ताम् युक्षीरन् । युक्षीष्ठाः युक्षीयास्थाम् युक्षीध्वम् । युक्षीय युक्षीवहि युक्षीमहि । **९. लुङ्** - अयुक्त अयुक्षाताम् अयुक्षत । अयुक्थाः अयुक्षाथाम् अयुग्ध्वम् । अयुक्षि अयुक्ष्वहि अयुक्ष्महि । **१०. लृङ्** - अयोक्ष्यत अयोक्ष्येताम् अयोक्ष्यन्त । अयोक्ष्यथाः अयोक्ष्येथाम् अयोक्ष्यध्वम् । अयोक्ष्ये अयोक्ष्यावहि अयोक्ष्यामहि ।

णिचि - योजयति - ते, **सनि** - युयुक्षते, **यकि** - युज्यते ।

१. ''चित्तवृत्तेः धात्वर्थान्तर्भावात् अकर्मकत्वम् । अर्थान्तरे तु सकर्मकोऽपि 'सृजयुज्योः सकर्मकयोः कर्मवद्भावः' इति कर्मवत्सूत्रवार्तिकात्'' इति बालमनोरमा ।

११७८. सृज - विसर्गे । अकर्म, अनिट्, आत्मने । विसर्गः = सम्बन्धः । 'अस्मिन् अर्थे अकर्मकता । अर्थान्तरे तु सकर्मकः' इति बालमनोरमा । 'सर्गे सृज्यते सृजतीति च' (श्लो. ६२) इति देवः ।

१. लट् - सृज्यते सृज्येते सृज्यन्ते । सृज्यसे सृज्येथे सृज्यध्वे । सृज्ये सृज्यावहे सृज्यामहे । **२. लिट्** - ससृजे ससृजाते ससृजिरे । ससृजिषे ससृजाथे ससृजिध्वे । ससृजे ससृजिवहे ससृजिमहे । **३. लुट्** - स्रष्टा स्रष्टारौ स्रष्टारः । स्रष्टासे स्रष्टासाथे स्रष्टाध्वे । स्रष्टाहे स्रष्टास्वहे स्रष्टास्महे । **४. लृट्** - स्रक्ष्यते स्रक्ष्येते स्रक्ष्यन्ते । स्रक्ष्यसे स्रक्ष्येथे स्रक्ष्यध्वे । स्रक्ष्ये स्रक्ष्यावहे स्रक्ष्यामहे । **५. लोट्** - सृज्यताम् सृज्येताम् सृज्यन्ताम् । सृज्यस्व सृज्येथाम् सृज्यध्वम् । सृज्यै सृज्यावहै सृज्यामहै । **६. लङ्** - असृज्यत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

असृज्येताम् असृज्यन्त । असृज्यथाः असृज्येथाम् असृज्यध्वम् । असृज्ये असृज्यावहि असृज्यामहि । **७. विधिलिङ्** – सृज्येत सृज्येयाताम् सृज्येरन् । सृज्येथाः सृज्येयाथाम् सृज्येध्वम् । सृज्येय सृज्येवहि सृज्येमहि । **८. आशीर्लिङ्** – सृक्षीष्ट[1] सृक्षीयास्ताम् सृक्षीरन् । सृक्षीष्ठाः सृक्षीयास्थाम् सृक्षीध्वम् । सृक्षीय सृक्षीवहि सृक्षीमहि । **९. लुङ्** – असृष्ट असृक्षाताम् असृक्षत । असृष्ठाः असृक्षाथाम् असृड्ढ्वम् । असृक्षि असृक्ष्वहि असृक्ष्महि । **१०. लृङ्** – अस्रक्ष्यत अस्रक्ष्येताम् अस्रक्ष्यन्त । अस्रक्ष्यथाः अस्रक्ष्येथाम् अस्रक्ष्यध्वम् । अस्रक्ष्ये अस्रक्ष्यावहि अस्रक्ष्यामहि ।

णिचि – सर्जयति – ते, **सनि** – सिसृक्षते, **यकि** – सृज्यते ।

१. 'लिङ्सिचौ....' इति कित्त्वात् न गुणः ।

११७९. लिश – अल्पीभावे । अकर्म, अनिट्, आत्मने । 'लिश्यते लिशतीत्येवमल्पीभावे गतौ क्रमात्' (श्लो.१६५) इति देवः । 'क्षीरस्वामिधनपालौ अस्य तुदादित्वं मन्येते' इति वदति पुरुषकारः ।

१. लट् – लिश्यते लिश्येते लिश्यन्ते । लिश्यसे लिश्येथे लिश्यध्वे । लिश्ये लिश्यावहे लिश्यामहे । **२. लिट्** – लिलिशे लिलिशाते लिलिशिरे । लिलिशिषे लिलिशाथे लिलिशिध्वे । लिलिशे लिलिशिवहे लिलिशिमहे । **३. लुट्** – लेष्टा लेष्टारौ लेष्टारः । लेष्टासे लेष्टासाथे लेष्टाध्वे । लेष्टाहे लेष्टास्वहे लेष्टास्महे । **४. लृट्** – लेक्ष्यते लेक्ष्येते लेक्ष्यन्ते । लेक्ष्यसे लेक्ष्येथे लेक्ष्यध्वे । लेक्ष्ये लेक्ष्यावहे लेक्ष्यामहे । **५. लोट्** – लिश्यताम् लिश्येताम् लिश्यन्ताम् । लिश्यस्व लिश्येथाम् लिश्यध्वम् । लिश्यै लिश्यावहै लिश्यामहै । **६. लङ्** – अलिश्यत अलिश्येताम् अलिश्यन्त । अलिश्यथाः अलिश्येथाम् अलिश्यध्वम् । अलिश्ये अलिश्यावहि अलिश्यामहि । **७. विधिलिङ्** – लिश्येत लिश्येयाताम् लिश्येरन् । लिश्येथाः लिश्येयाथाम् लिश्येध्वम् । लिश्येय लिश्येवहि लिश्येमहि । **८. आशीर्लिङ्** – लिक्षीष्ट लिक्षीयास्ताम् लिक्षीरन् । लिक्षीष्ठाः लिक्षीयास्थाम् लिक्षीध्वम् । लिक्षीय लिक्षीवहि लिक्षीमहि । **९. लुङ्** – अलिक्षत अलिक्षाताम् अलिक्षन्त । अलिक्षथाः अलिक्षाथाम् अलिक्षध्वम् । अलिक्षि अलिक्षावहि अलिक्षामहि । **१०. लृङ्** – अलेक्ष्यत अलेक्ष्येताम् अलेक्ष्यन्त । अलेक्ष्यथाः अलेक्ष्येथाम् अलेक्ष्यध्वम् । अलेक्ष्ये अलेक्ष्यावहि अलेक्ष्यामहि ।

णिचि – लेशयति – ते, **सनि** – लिलिक्षते, **यकि** – लिश्यते

११८०. राध[1] – वृद्धौ । अकर्म, अनिट्, परस्मै । ''राधोऽकर्मकाद् वृद्धावेव । (ग.सू. दिवादौ) एवकारः भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह वृद्धाविति । यन्मह्यमपराध्यति । द्रुह्यति इत्यर्थः । विराध्यन्तं क्षमेत कः । द्रुह्यताम् इत्यर्थः । राध्यत्योदनः । सिद्ध्यतीत्यर्थः । कृष्णाय राध्यति । दैवं पर्यालोचयतीत्यर्थः । दैवस्य धात्वर्थेऽन्तर्भावात् जीवत्यादिवत् अकर्मकत्वम्'' इति सिद्धान्तकौमुदी । 'राध्नोति संसिद्ध्यर्थे श्नौ, राध्येद् वृद्धावकर्मकात्' (श्लो. १२२) इति देवः । अत्र प्रयुक्तस्य एवकारस्य विविधाः अर्थाः कृदन्तरूपमालायां दर्शिताः । 'अस्य तु सिद्धिद्रोहदैवपर्यालोचनादयोऽर्थाः' इति धा.का. व्याख्या (२.६३) ।

१. लट् – राध्यति राध्यतः राध्यन्ति । राध्यसि राध्यथः राध्यथ । राध्यामि राध्यावः राध्यामः । **२. लिट्** – रराध रराधतुः रराधुः । रराधिथ रराधथुः रराध । रराध रराधिव रराधिम । **३. लुट्** – राद्धा राद्धारौ राद्धारः । राद्धासि राद्धास्थः राद्धास्थ । राद्धास्मि राद्धास्वः राद्धास्मः । **४. लृट्** – रात्स्यति रात्स्यतः रात्स्यन्ति । रात्स्यसि रात्स्यथः रात्स्यथ । रात्स्यामि रात्स्यावः रात्स्यामः । **५. लोट्** – राध्यतु, राध्यतात् राध्यताम् राध्यन्तु । राध्य, राध्यतात् राध्यतम् राध्यत । राध्यानि राध्याव राध्याम । **६. लङ्** – अराध्यत् अराध्यताम् अराध्यन् । अराध्यः अराध्यतम् अराध्यत । अराध्यम् अराध्याव अराध्याम । **७. विधिलिङ्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राध्येत् राध्येताम् राध्येयुः । राध्येः राध्येतम् राध्येत । राध्येयम् राध्येव राध्येम । **८. आशीर्लिङ्** - राध्यात् राध्यास्ताम् राध्यासुः । राध्याः राध्यास्तम् राध्यास्त । राध्यासम् राध्यास्व राध्यास्म । **९. लुङ्** - अरात्सीत् अराद्धाम् अरात्सुः । अरात्सीः अराद्धम् अराद्ध । अरात्सम् अरात्स्व अरात्स्म । **१०. लृङ्** - अरात्स्यत् अरात्स्यताम् अरात्स्यन् । अरात्स्यः अरात्स्यतम् अरात्स्यत । अरात्स्यम् अरात्स्याव अरात्स्याम ।

णिचि - राधयति - ते, **सनि** - रिरात्सति, **यकि** - राध्यते ।

१. राधृधातोः अकर्मकात् वृद्धौ एव श्यन् ।

११८१. व्यध - ताडने । सकर्मकः, अनिट्, परस्मै । 'ताडनं प्रायेण विदारणपर्यन्तम्' इति धा.का. व्याख्या । (२.६३)

१. लट् - विध्यति[1] विध्यतः विध्यन्ति । विध्यसि विध्यथः विध्यथ । विध्यामि विध्यावः विध्यामः । **२. लिट्** - विव्याध विविधतुः विविधुः । विव्याधिथ-विव्यद्ध विविधथुः विविध । विव्याध-विव्यध विविधिव विविधिम । **३. लुट्** - व्यद्धा व्यद्धारौ व्यद्धारः । व्यद्धासि व्यद्धास्थः व्यद्धास्थ । व्यद्धास्मि व्यद्धास्वः व्यद्धास्मः । **४. लृट्** - व्यत्स्यति व्यत्स्यतः व्यत्स्यन्ति । व्यत्स्यसि व्यत्स्यथः व्यत्स्यथ । व्यत्स्यामि व्यत्स्यावः व्यत्स्यामः । **५. लोट्** - विध्यतु, विध्यतात् विध्यताम् विध्यन्तु । विध्य, विध्यतात् विध्यतम् विध्यत । विध्यानि विध्याव विध्याम । **६. लङ्** - अविध्यत् अविध्यताम् अविध्यन् । अविध्यः अविध्यतम् अविध्यत । अविध्यम् अविध्याव अविध्याम । **७. विधिलिङ्** - विध्येत् विध्येताम् विध्येयुः । विध्येः विध्येतम् विध्येत । विध्येयम् विध्येव विध्येम । **८. आशीर्लिङ्** - विध्यात् विध्यास्ताम् विध्यासुः । विध्याः विध्यास्तम् विध्यास्त । विध्यासम् विध्यास्व विध्यास्म । **९. लुङ्** - अव्यात्सीत् अव्याद्धाम् अव्यात्सुः । अव्यात्सीः अव्याद्धम् अव्याद्ध । अव्यात्सम् अव्यात्स्व अव्यात्स्म । **१०. लृङ्** - अव्यत्स्यत् अव्यत्स्यताम् अव्यत्स्यन् । अव्यत्स्यः अव्यत्स्यतम् अव्यत्स्यत । अव्यत्स्यम् अव्यत्स्याव अव्यत्स्याम ।

णिचि - व्याधयति - ते, **सनि** - विव्यत्सति, **यकि** - विध्यते ।

१. 'ग्रहिज्यावयिव्यधि...' (६.१.१६) इति सम्प्रसारणम् ।

११८२. पुष - पुष्टौ । सकर्म, अनिट्, परस्मै, (पुषादिः) । 'धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति' (श्लो.१७१) - देवः ।

१. लट् - पुष्यति पुष्यतः पुष्यन्ति । पुष्यसि पुष्यथः पुष्यथ । पुष्यामि पुष्यावः पुष्यामः । **२. लिट्** - पुपोष पुपुषतुः पुपुषुः । पुपोषिथ पुपुषथुः पुपुष । पुपोष पुपुषिव पुपुषिम । **३. लुट्** - पोष्टा पोष्टारौ पोष्टारः । पोष्टासि पोष्टास्थः पोष्टास्थ । पोष्टास्मि पोष्टास्वः पोष्टास्मः । **४. लृट्** - पोक्ष्यति पोक्ष्यतः पोक्ष्यन्ति । पोक्ष्यसि पोक्ष्यथः पोक्ष्यथ । पोक्ष्यामि पोक्ष्यावः पोक्ष्यामः । **५. लोट्** - पुष्यतु, पुष्यतात् पुष्यताम् पुष्यन्तु । पुष्य, पुष्यतात् पुष्यतम् पुष्यत । पुष्याणि पुष्याव पुष्याम । **६. लङ्** - अपुष्यत् अपुष्यताम् अपुष्यन् । अपुष्यः अपुष्यतम् अपुष्यत । अपुष्यम् अपुष्याव अपुष्याम । **७. विधिलिङ्** - पुष्येत् पुष्येताम् पुष्येयुः । पुष्येः पुष्येतम् पुष्येत । पुष्येयम् पुष्येव पुष्येम । **८. आशीर्लिङ्** - पुष्यात् पुष्यास्ताम् पुष्यासुः । पुष्याः पुष्यास्तम् पुष्यास्त । पुष्यासम् पुष्यास्व पुष्यास्म । **९. लुङ्** - अपुषत्[1] अपुषताम् अपुषन् । अपुषः अपुषतम् अपुषत । अपुषम् अपुषाव अपुषाम । **१०. लृङ्** - अपोक्ष्यत् अपोक्ष्यताम् अपोक्ष्यन् । अपोक्ष्यः अपोक्ष्यतम् अपोक्ष्यत । अपोक्ष्यम् अपोक्ष्याव अपोक्ष्याम ।

णिचि - पोषयति - ते, **सनि** - पुपुक्षति, **यकि** - पुष्यते ।

१. 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (श्यन्विकरणपुषादेः द्युतादेः लृदितश्च परस्य च्लेः अङ् स्यात् परस्मैपदेषु ।) एवमेव पुषादौ सर्वत्र ऊह्यम् ।

११८३. शुष - शोषणे । अकर्म, अनिट्, परस्मै, (पुषादिः) ।

१. लट् - शुष्यति शुष्यतः शुष्यन्ति । शुष्यसि शुष्यथः शुष्यथ । शुष्यामि शुष्यावः शुष्यामः । **२. लिट्**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

– शुशोष शुशुषतुः शुशुषुः । शुशोषिथ शुशुषथुः शुशुष । शुशोष शुशुषिव शुशुषिम । **३. लुट्** – शोष्टा शोष्टारौ शोष्टारः । शोष्टासि शोष्टास्थः शोष्टास्थ । शोष्टास्मि शोष्टास्वः शोष्टास्मः । **४. लृट्** – शोक्ष्यति शोक्ष्यतः शोक्ष्यन्ति । शोक्ष्यसि शोक्ष्यथः शोक्ष्यथ । शोक्ष्यामि शोक्ष्यावः शोक्ष्यामः । **५. लोट्** – शुष्यतु, शुष्यतात् शुष्यताम् शुष्यन्तु । शुष्य, शुष्यतात् शुष्यतम् शुष्यत । शुष्याणि शुष्याव शुष्याम । **६. लङ्** – अशुष्यत् अशुष्यताम् अशुष्यन् । अशुष्यः अशुष्यतम् अशुष्यत । अशुष्यम् अशुष्याव अशुष्याम । **७. विधिलिङ्** – शुष्येत् शुष्येताम् शुष्येयुः । शुष्येः शुष्येतम् शुष्येत । शुष्येयम् शुष्येव शुष्येम । **८. आशीर्लिङ्** – शुष्यात् शुष्यास्ताम् शुष्यासुः । शुष्याः शुष्यास्तम् शुष्यास्त । शुष्यासम् शुष्यास्व शुष्यास्म । **९. लुङ्** – अशुषत्[1] अशुषताम् अशुषन् । अशुषः अशुषतम् अशुषत । अशुषम् अशुषाव अपुषाम । **१०. लृङ्** – अशोक्ष्यत् अशोक्ष्यताम् अशोक्ष्यन् । अशोक्ष्यः अशोक्ष्यतम् अशोक्ष्यत । अशोक्ष्यम् अशोक्ष्याव अशोक्ष्याम ।

णिचि – शोषयति – ते, **सनि** – शुशुक्षति, **यकि** – शुष्यते ।

१. 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' – श्यन्विकरणपुषादेः द्युतादेः लृदितश्च परस्य च्लेः अङ् स्यात् परस्मैपदेषु ।

११८४. तुष – प्रीतौ । अकर्म, अनिट्, परस्मै । प्रीतिः = तृप्तिः ।

१. लट् – तुष्यति तुष्यतः तुष्यन्ति । तुष्यसि तुष्यथः तुष्यथ । तुष्यामि तुष्यावः तुष्यामः । **२. लिट्** – तुतोष तुतुषतुः तुतुषुः । तुतोषिथ तुतुषथुः तुतुष । तुतोष तुतुषिव तुतुषिम । **३. लुट्** – तोष्टा तोष्टारौ तोष्टारः । तोष्टासि तोष्टास्थः तोष्टास्थ । तोष्टास्मि तोष्टास्वः तोष्टास्मः । **४. लृट्** – तोक्ष्यति तोक्ष्यतः तोक्ष्यन्ति । तोक्ष्यसि तोक्ष्यथः तोक्ष्यथ । तोक्ष्यामि तोक्ष्यावः तोक्ष्यामः । **५. लोट्** – तुष्यतु, तुष्यतात् तुष्यताम् तुष्यन्तु । तुष्य, तुष्यतात् तुष्यतम् तुष्यत । तुष्याणि तुष्याव तुष्याम । **६. लङ्** – अतुष्यत् अतुष्यताम् अतुष्यन् । अतुष्यः अतुष्यतम् अतुष्यत । अतुष्यम् अतुष्याव अतुष्याम । **७. विधिलिङ्** – तुष्येत् तुष्येताम् तुष्येयुः । तुष्येः तुष्येतम् तुष्येत । तुष्येयम् तुष्येव तुष्येम । **८. आशीर्लिङ्** – तुष्यात् तुष्यास्ताम् तुष्यासुः । तुष्याः तुष्यास्तम् तुष्यास्त । तुष्यासम् तुष्यास्व तुष्यास्म । **९. लुङ्** – अतुषत्[1] अतुषताम् अतुषन् । अतुषः अतुषतम् अतुषत । अतुषम् अतुषाव अपुषाम । **१०. लृङ्** – अतोक्ष्यत् अतोक्ष्यताम् अतोक्ष्यन् । अतोक्ष्यः अतोक्ष्यतम् अतोक्ष्यत । अतोक्ष्यम् अतोक्ष्याव अतोक्ष्याम ।

णिचि – तोषयति – ते, **सनि** – तुतुक्षति, **यकि** – तुष्यते ।

१. 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' – श्यन्विकरणपुषादेः द्युतादेः लृदितश्च परस्य च्लेः अङ् स्यात् परस्मैपदेषु ।

११८५. दुष – वैकृत्ये । अकर्म, अनिट्, परस्मै, (पुषादिः) । 'वैकृत्यं रूपभङ्गः' इति क्षीरस्वामी ।

१. लट् – दुष्यति दुष्यतः दुष्यन्ति । दुष्यसि दुष्यथः दुष्यथ । दुष्यामि दुष्यावः दुष्यामः । **२. लिट्** – दुदोष दुदुषतुः दुदुषुः । दुदोषिथ दुदुषथुः दुदुष । दुदोष दुदुषिव दुदुषिम । **३. लुट्** – दोष्टा दोष्टारौ दोष्टारः । दोष्टासि दोष्टास्थः दोष्टास्थ । दोष्टास्मि दोष्टास्वः दोष्टास्मः । **४. लृट्** – दोक्ष्यति दोक्ष्यतः दोक्ष्यन्ति । दोक्ष्यसि दोक्ष्यथः दोक्ष्यथ । दोक्ष्यामि दोक्ष्यावः दोक्ष्यामः । **५. लोट्** – दुष्यतु, दुष्यतात् दुष्यताम् दुष्यन्तु । दुष्य, दुष्यतात् दुष्यतम् दुष्यत । दुष्याणि दुष्याव दुष्याम । **६. लङ्** – अदुष्यत् अदुष्यताम् अदुष्यन् । अदुष्यः अदुष्यतम् अदुष्यत । अदुष्यम् अदुष्याव अदुष्याम । **७. विधिलिङ्** – दुष्येत् दुष्येताम् दुष्येयुः । दुष्येः दुष्येतम् दुष्येत । दुष्येयम् दुष्येव दुष्येम । **८. आशीर्लिङ्** – दुष्यात् दुष्यास्ताम् दुष्यासुः । दुष्याः दुष्यास्तम् दुष्यास्त । दुष्यासम् दुष्यास्व दुष्यास्म । **९. लुङ्** – अदुषत्[1] अदुषताम् अदुषन् । अदुषः अदुषतम् अदुषत । अदुषम् अदुषाव अदुषाम । **१०. लृङ्** – अदोक्ष्यत् अदोक्ष्यताम् अदोक्ष्यन् । अदोक्ष्यः अदोक्ष्यतम् अदोक्ष्यत । अदोक्ष्यम् अदोक्ष्याव अदोक्ष्याम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

णिचि – दूषयति[२], दोषयति/ते, **सनि** – दुदुक्षति, **यकि** – दुष्यते ।

१. 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' – श्यन्विकरणपुषादेः द्युतादेः लृदितश्च परस्य च्लेः अङ् स्यात् परस्मैपदेषु ।

२. 'दोषो णौ वा चित्तविरागे' – दुष्यतेरुपधायाः ऊत् वा स्याण्णौ चित्तविरागेऽर्थे । दूषयति दोषयति वा चित्तं कामः । तदन्यत्र दूषयति ।

११८६. श्लिष – आलिङ्गने । सकर्म, अनिट्, परस्मै, (पुषादिः) । 'श्लिष्यत्यालिङ्गने दाहे श्लेषते णिचि श्लेषयेत्' (श्लो. १७५) इति देवः ।

१. लट् – श्लिष्यति श्लिष्यतः श्लिष्यन्ति । श्लिष्यसि श्लिष्यथः श्लिष्यथ । श्लिष्यामि श्लिष्यावः श्लिष्यामः । **२. लिट्** – शिश्लेष शिश्लिषतुः शिश्लिषुः । शिश्लेषिथ शिश्लिषथुः शिश्लिष । शिश्लेष शिश्लिषिव शिश्लिषिम । **३. लुट्** – श्लेष्टा श्लेष्टारौ श्लेष्टारः । श्लेष्टासि श्लेष्टास्थः श्लेष्टास्थ । श्लेष्टास्मि श्लेष्टास्वः श्लेष्टास्मः । **४. लृट्** – श्लेक्ष्यति श्लेक्ष्यतः श्लेक्ष्यन्ति । श्लेक्ष्यसि श्लेक्ष्यथः श्लेक्ष्यथ । श्लेक्ष्यामि श्लेक्ष्यावः श्लेक्ष्यामः । **५. लोट्** – श्लिष्यतु, श्लिष्यतात् श्लिष्यताम् श्लिष्यन्तु । श्लिष्य, श्लिष्यतात् श्लिष्यतम् श्लिष्यत । श्लिष्याणि श्लिष्याव श्लिष्याम । **६. लङ्** – अश्लिष्यत् अश्लिष्यताम् अश्लिष्यन् । अश्लिष्यः अश्लिष्यतम् अश्लिष्यत । अश्लिष्यम् अश्लिष्याव अश्लिष्याम । **७. विधिलिङ्** – श्लिष्येत् श्लिष्येताम् श्लिष्येयुः । श्लिष्येः श्लिष्येतम् श्लिष्येत । श्लिष्येयम् श्लिष्येव श्लिष्येम । **८. आशीर्लिङ्** – श्लिष्यात् श्लिष्यास्ताम् श्लिष्यासुः । श्लिष्याः श्लिष्यास्तम् श्लिष्यास्त । श्लिष्यासम् श्लिष्यास्व श्लिष्यास्म । **९. लुङ्** – (i) अश्लिषत्[१] अश्लिषताम् अश्लिषन् । अश्लिषः अश्लिषतम् अश्लिषत । अश्लिषम् अश्लिषाव अश्लिषाम । (ii) अश्लिक्षत्[२] अश्लिक्षताम् अश्लिक्षन् । अश्लिक्षः अश्लिक्षतम् अश्लिक्षत । अश्लिक्षम् अश्लिक्षाव अश्लिक्षाम । **१०. लृङ्** – अश्लेक्ष्यत् अश्लेक्ष्यताम् अश्लेक्ष्यन् । अश्लेक्ष्यः अश्लेक्ष्यतम् अश्लेक्ष्यत । अश्लेक्ष्यम् अश्लेक्ष्याव अश्लेक्ष्याम । णिचि – श्लेषयति – ते, सनि – शिश्लिक्षति, यकि – श्लिष्यते ।

१. 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' – श्यन्विकरणपुषादेः द्युतादेः लृदितश्च परस्य च्लेः अङ् स्यात् परस्मैपदेषु ।

२. 'श्लिष आलिङ्गने' इति आलिङ्गनार्थेऽङपवादः क्सः ।

११८७. शक – विभाषितो मर्षणे[१] । अकर्म, सेट्, उभय, (पुषादिः) । 'विभाषितः इत्युभयपदीत्यर्थः' इति कौमुदी । 'क्षमायाम्' इति कातन्त्रकाशकृत्स्नौ । 'शक्तौ' इति वोपदेवः । 'शक्यते शक्यतीत्येवं शपि श्रौ श्यनि च क्रमात्' (श्लो. ४३) इति देवः ।

८. आशीर्लिङ् – (i) शीयात् शीयास्ताम् शीयासुः । शीयाः शीयास्तम् शीयास्त । शीयासम् शीयास्व शीयास्म । (ii) शेषीष्ट शेषीयास्ताम् शेषीरन् । शेषीष्ठाः शेषीयास्थाम् शेषीध्वम् । शेषीय शेषीवहि शेषीमहि । **९. लुङ्** – (i) अशैषीत् अशैष्टाम् अशैषुः । अशैषीः अशैष्टम् अशैष्ट । अशैषम् अशैष्व अशैष्म । (ii) अशेष्ट अशेषाताम् अशेषत । अशेष्ठाः अशेषाथाम् अशेढ्वम् । अशेषि अशेष्वहि अशेष्महि । **१०. लृङ्** – (i) अशेष्यत् अशेष्यताम् अशेष्यन् । अशेष्यः अशेष्यतम् अशेष्यत । अशेष्यम् अशेष्याव अशेष्याम । (ii) अशेष्यत अशेष्येताम् अशेष्यन्त । अशेष्यथाः अशेष्येथाम् अशेष्यध्वम् । अशेष्ये अशेष्यावहि अशेष्यामहि ।

णिचि – शाययति – ते, **सनि** – शिशीषति – ते, **यकि** – शीयते ।

१२५०. डु मिञ् – प्रक्षेपणे । सकर्म, अनिट्, उभय । 'मिनोति मिनुते स्वादेः गतौ मयति माययेत्' (श्लो.१७) इति देवः ।

१. लट् – (i) मिनोति मिनुतः मिन्वन्ति । मिनोषि मिनुथः मिनुथ । मिनोमि मिन्वः-मिनुवः मिन्मः-मिनुमः । (ii) मिनुते मिन्वाते मिन्वते । मिनुषे मिन्वाथे मिनुध्वे । मिन्वे मिन्वहे-मिनुवहे मिन्महे-मिनुमहे । **२. लिट्** – (i) ममौ[1] मिम्यतुः मिम्युः । ममिथ-ममाथ मिम्यथुः मिम्य । ममौ मिम्यिव मिम्यिम । (ii) मिम्ये मिम्याते मिम्यिरे । मिम्यिषे मिम्याथे मिम्यिध्वे-ढ्वे । मिम्ये मिम्यिवहे मिम्यिमहे । **३. लुट्** – (i) माता मातारौ मातारः । मातासि मातास्थः मातास्थ । मातास्मि मातास्वः मातास्मः । (ii) माता मातारौ मातारः । मातासे मातासाथे माताध्वे । माताहे मातास्वहे मातास्महे । **४. लृट्** – (i) मास्यति मास्यतः मास्यन्ति । मास्यसि मास्यथः मास्यथ । मास्यामि मास्यावः मास्यामः । (ii) मास्यते मात्स्येते मास्यन्ते । मास्यसे मात्स्येथे मास्यध्वे । मात्स्ये मास्यावहे मास्यामहे । **५. लोट्** – (i) मिनोतु, मिनुतात् मिनुताम् मिन्वन्तु । मिनु, मिनुतात् मिनुतम् मिनुत । मिनवानि मिनवाव मिनवाम । (ii) मिनुताम् मिन्वाताम् मिन्वताम् । मिनुष्व मिन्वाथाम् मिनुध्वम् । मिनवै मिनवावहै मिनवामहै । **६. लङ्** – (i) अमिनोत् अमिनुताम् अमिन्वन् । अमिनोः अमिनुतम् अमिनुत । अमिनवम् अमिन्व-अमिनुव अमिन्म-अमिनुम । (ii) अमिनुत अमिन्वाताम् अमिन्वत । अमिनुथाः अमिन्वाथाम् अमिनुध्वम् । अमिन्वि अमिन्वहि-अमिनुवहि अमिन्महि-अमिनुमहि । **७. विधिलिङ्** – (i) मिनुयात् मिनुयाताम् मिनुयुः । मिनुयाः मिनुयातम् मिनुयात । मिनुयाम् मिनुयाव मिनुयाम । (ii) मिन्वीत मिन्वीयाताम् मिन्वीरन् । मिन्वीथाः मिन्वीयाथाम् मिन्वीध्वम् । मिन्वीय मिन्वीवहि मिन्वीमहि । **८. आशीर्लिङ्** – (i) मीयात् मीयास्ताम् मीयासुः । मीयाः मीयास्तम् मीयास्त । मीयासम् मीयास्व मीयास्म । (ii) मासीष्ट मासीयास्ताम् मासीरन् । मासीष्ठाः मासीयास्थाम् मासीध्वम् । मासीय मासीवहि मासीमहि । **९. लुङ्** – (i) अमासीत् अमासिष्टाम् अमासिषुः । अमासीः अमासिष्टम् अमासिष्ट । अमासिषम् अमासिष्व अमासिष्म । (ii) अमास्त अमासाताम् अमासत । अमास्थाः अमासाथाम् अमाध्वम् । अमासि अमास्वहि अमास्महि । **१०. लृङ्** – (i) अमास्यत् अमास्यताम् अमास्यन् । अमास्यः अमास्यतम् अमास्यत । अमास्यम् अमास्याव अमास्याम । (ii) अमास्यत अमास्येताम् अमास्यन्त । अमास्यथाः अमास्येथाम् अमास्यध्वम् । अमास्ये अमास्यावहि अमास्यामहि ।

णिचि – माययति – ते, **सनि** – मित्सति[2]–ते, **यकि** – मीयते ।

१. 'मीनातिमिनोतिदीङां ल्यपि च' – एषामात्वं स्यात् ल्यपि अशिति एज्निमित्ते च । आत्वे कृते णलः औत्वम् ।

२. 'इको झल्' इति सनः कित्त्वम् । 'सनि मीमा...' इति इस् ।

१२५१. चिञ् – चयने । सकर्म, अनिट्, उभय । चयनं = रचना ।

१. लट् – (i) चिनोति चिनुतः चिन्वन्ति । चिनोषि चिनुथः चिनुथ । चिनोमि चिन्वः-चिनुवः चिन्मः-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिनुमः । (ii) चिनुते चिन्वाते चिन्वते । चिनुषे चिन्वाथे चिनुध्वे । चिन्वे चिन्वहे-चिनुवहे चिन्महे-चिनुमहे । **२. लिट्** - (i) चिकाय[१] चिक्यतुः चिक्युः । चिकयिथ-चिकेथ चिक्यथुः चिक्य । चिकाय-चिकय चिक्यिव चिक्यिम । (ii) चिचाय चिच्यतुः चिच्युः । चिचयिथ-चिचेथ चिच्यथुः चिच्य । चिचाय-चिचय चिच्यिव चिच्यिम । (iii) चिक्ये चिक्याते चिक्यिरे । चिक्यिषे चिक्याथे चिक्यिध्वे-ढ्वे । चिक्ये चिक्यिवहे चिक्यिमहे । (iv) चिच्ये चिच्याते चिच्यिरे । चिच्यिषे चिच्याथे चिच्यिध्वे-ढ्वे । चिच्ये चिच्यिवहे चिच्यिमहे । **३. लुट्** - (i) चेता चेतारौ चेतारः । चेतासि चेतास्थः चेतास्थ । चेतास्मि चेतास्वः चेतास्मः । (ii) चेता चेतारौ चेतारः । चेतासे चेतासाथे चेताध्वे । चेताहे चेतास्वहे चेतास्महे । **४. लृट्** - (i) चेष्यति चेष्यतः चेष्यन्ति । चेष्यसि चेष्यथः चेष्यथ । चेष्यामि चेष्यावः चेष्यामः । (ii) चेष्यते चेष्येते चेष्यन्ते । चेष्यसे चेष्येथे चेष्यध्वे । चेष्ये चेष्यावहे चेष्यामहे । **५. लोट्** - (i) चिनोतु, चिनुतात् चिनुताम् चिन्वन्तु । चिनु, चिनुतात् चिनुतम् चिनुत । चिनवानि चिनवाव चिनवाम । (ii) चिनुताम् चिन्वाताम् चिन्वताम् । चिनुष्व चिन्वाथाम् चिनुध्वम् । चिनवै चिनवावहै चिनवामहै । **६. लङ्** - (i) अचिनोत् अचिनुताम् अचिन्वन् । अचिनोः अचिनुतम् अचिनुत । अचिनवम् अचिन्व-अचिनुव अचिन्म-अचिनुम । (ii) अचिनुत अचिन्वाताम् अचिन्वत । अचिनुथाः अचिन्वाथाम् अचिनुध्वम् । अचिन्वि अचिन्वहि-अचिनुवहि अचिन्महि-अचिनुमहि ।

७. विधिलिङ् - (i) चिनुयात् चिनुयाताम् चिनुयुः । चिनुयाः चिनुयातम् चिनुयात । चिनुयाम् चिनुयाव चिनुयाम । (ii) चिन्वीत चिन्वीयाताम् चिन्वीरन् । चिन्वीथाः चिन्वीयाथाम् चिन्वीध्वम् । चिन्वीय चिन्वीवहि चिन्वीमहि । **८. आशीर्लिङ्** - (i) चीयात् चीयास्ताम् चीयासुः । चीयाः चीयास्तम् चीयास्त । चीयासम् चीयास्व चीयास्म । (ii) चेषीष्ट चेषीयास्ताम् चेषीरन् । चेषीष्ठाः चेषीयास्थाम् चेषीध्वम् । चेषीय चेषीवहि चेषीमहि । **९. लुङ्** - (i) अचैषीत् अचैष्टाम् अचैषुः । अचैषीः अचैष्टम् अचैष्ट । अचैषम् अचैष्व अचैष्म । (ii) अचेष्ट अचेषाताम् अचेषत । अचेष्ठाः अचेषाथाम् अचेढ्वम् । अचेषि अचेष्वहि अचेष्महि । **१०. लृङ्** - (i) अचेष्यत् अचेष्यताम् अचेष्यन् । अचेष्यः अचेष्यतम् अचेष्यत । अचेष्यम् अचेष्याव अचेष्याम । (ii) अचेष्यत अचेष्येताम् अचेष्यन्त । अचेष्यथाः अचेष्येथाम् अचेष्यध्वम् । अचेष्ये अचेष्यावहि अचेष्यामहि ।

णिचि - चाययति[२]/चापयति - ते, **सनि** - चिचीषति/चिकीषति - ते, **यकि** - चीयते

१. 'विभाषा चेः' - अभ्यासात् परस्य चिञः कुत्वं वा स्यात् सनि लिटि च ।

२. 'चिस्फुरोर्णौ' इति आत्वं विकल्पेन । आत्वे पुक् । तदभावे वृद्धिः ।

१२५२. स्तृञ् - आच्छादने । सकर्म, अनिट्, उभय । 'लक्षणया वीक्षणे' इति धा.का. व्याख्या । (२.६८) 'तृञः श्रि च्छादने प्यादेः स्तृणीते च स्तृणाति च । श्रावृदन्तस्य तत्रैव स्तृणोति स्तृणुते स्तृञः' (श्लो. ३५) इति देवः ।

१. लट् - (i) स्तृणोति स्तृणुतः स्तृण्वन्ति । स्तृणोषि स्तृणुथः स्तृणुथ । स्तृणोमि स्तृण्वः-स्तृणुवः स्तृण्मः-स्तृणुमः । (ii) स्तृणुते स्तृण्वाते स्तृण्वते । स्तृणुषे स्तृण्वाथे स्तृणुध्वे । स्तृण्वे स्तृण्वहे-स्तृणुवहे स्तृण्महे-स्तृणुमहे । **२. लिट्** - (i) तस्तार तस्तरतुः तस्तरुः । तस्तर्थ तस्तरथुः तस्तर । तस्तार-तस्तर तस्तरिव तस्तरिम । (ii) तस्तरे तस्तराते तस्तरिरे । तस्तरिषे तस्तराथे तस्तरिध्वे । तस्तरे तस्तरिवहे तस्तरिमहे । **३. लुट्** - (i) स्तर्ता स्तर्तारौ स्तर्तारः । स्तर्तासि स्तर्तास्थः स्तर्तास्थ । स्तर्तास्मि स्तर्तास्वः स्तर्तास्मः । (ii) स्तर्ता स्तर्तारौ स्तर्तारः । स्तर्तासे स्तर्तासाथे स्तर्ताध्वे । स्तर्ताहे स्तर्तास्वहे स्तर्तास्महे ।

४. लृट् - (i) स्तरिष्यति स्तरिष्यतः स्तरिष्यन्ति । स्तरिष्यसि स्तरिष्यथः स्तरिष्यथ । स्तरिष्यामि स्तरिष्यावः स्तरिष्यामः । (ii) स्तरिष्यते स्तरिष्येते स्तरिष्यन्ते । स्तरिष्यसे स्तरिष्येथे स्तरिष्यध्वे । स्तरिष्ये स्तरिष्यावहे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्तरिष्यामहे । **५. लोट्** - (i) स्तृणोतु, स्तृणुतात् स्तृणुताम् स्तृण्वन्तु । स्तृणु, स्तृणुतात् स्तृणुतम् स्तृणुत । स्तृणवानि स्तृणवाव स्तृणवाम । (ii) स्तृणुताम् स्तृण्वाताम् स्तृण्वताम् । स्तृणुष्व स्तृण्वाथाम् स्तृणुध्वम् । स्तृणवै स्तृणवावहै स्तृणवामहै । **६. लङ्** - (i) अस्तृणोत् अस्तृणुताम् अस्तृण्वन् । अस्तृणोः अस्तृणुतम् अस्तृणुत । अस्तृणवम् अस्तृण्व-अस्तृणुव अस्तृण्म-अस्तृणुम । (ii) अस्तृणुत अस्तृण्वाताम् अस्तृण्वत । अस्तृणुथाः अस्तृण्वाथाम् अस्तृणुध्वम् । अस्तृण्वि अस्तृण्वहि-अस्तृणुवहि अस्तृण्महि-अस्तृणुमहि । **७. विधिलिङ्** - (i) स्तृणुयात् स्तृणुयाताम् स्तृणुयुः । स्तृणुयाः स्तृणुयातम् स्तृणुयात । स्तृणुयाम् स्तृणुयाव स्तृणुयाम । (ii) स्तृण्वीत स्तृण्वीयाताम् स्तृण्वीरन् । स्तृण्वीथाः स्तृण्वीयाथाम् स्तृण्वीध्वम् । स्तृण्वीय स्तृण्वीवहि स्तृण्वीमहि । **८. आशीर्लिङ्** - (i) स्तर्यात् स्तर्यास्ताम् स्तर्यासुः । स्तर्याः स्तर्यास्तम् स्तर्यास्त । स्तर्यासम् स्तर्यास्व स्तर्यास्म । (ii) स्तरिषीष्ट[1] स्तरिषीयास्ताम् स्तरिषीरन् । स्तरिषीष्ठाः स्तरिषीयास्थाम् स्तरिषीध्वम् । स्तरिषीय स्तरिषीवहि स्तरिषीमहि । (iii) स्तृषीष्ट स्तृषीयास्ताम् स्तृषीरन् । स्तृषीष्ठाः स्तृषीयास्थाम् स्तृषीध्वम् । स्तृषीय स्तृषीवहि स्तृषीमहि । **९. लुङ्** - (i) अस्तार्षीत् अस्तार्ष्टाम् अस्तार्षुः । अस्तार्षीः अस्तार्ष्टम् अस्तार्ष्ट । अस्तार्षम् अस्तार्ष्व अस्तार्ष्म । (ii) अस्तरिष्ट अस्तरिषाताम् अस्तरिषत । अस्तरिष्ठाः अस्तरिषाथाम् अस्तरिढ्वम् । अस्तरिषि अस्तरिष्वहि अस्तरिष्महि । (iii) अस्तृत अस्तृषाताम् अस्तृषत । अस्तृष्ठाः अस्तृषाथाम् अस्तृढ्वम् । अस्तृषि अस्तृष्वहि अस्तृष्महि । **१०. लृङ्** - (i) अस्तरिष्यत् अस्तरिष्यताम् अस्तरिष्यन् । अस्तरिष्यः अस्तरिष्यतम् अस्तरिष्यत । अस्तरिष्यम् अस्तरिष्याव अस्तरिष्याम । (ii) अस्तरिष्यत अस्तरिष्येताम् अस्तरिष्यन्त । अस्तरिष्यथाः अस्तरिष्येथाम् अस्तरिष्यध्वम् । अस्तरिष्ये अस्तरिष्यावहि अस्तरिष्यामहि ।

णिचि - स्तारयति - ते, **सनि** - तिस्तीर्षति - ते, **यकि** - स्त्रियते ।

१. 'ऋतश्च संयोगादेः' - ऋदन्तात् संयोगादेः परयोः लिङ्सिचोः इट् वा स्यात् तङि ।

१२५३. कृञ् - हिंसायाम् । सकर्म, अनिट्, उभय । 'हिंसाकरणयोः श्नावौ कृणोति कृणुते कृञः । करोति कुरुते द्वे द्वे सम्पद्येते पदे क्रमात्' (श्लो. ३१) इति देवः ।

१. लट् - (i) कृणोति कृणुतः कृण्वन्ति । कृणोषि कृणुथः कृणुथ । कृणोमि कृण्वः-कृणुवः कृण्मः-कृणुमः । (ii) कृणुते कृण्वाते कृण्वते । कृणुषे कृण्वाथे कृणुध्वे । कृण्वे कृण्वहे-कृणुवहे कृण्महे-कृणुमहे । **२. लिट्** - (i) चकार चक्रतुः चक्रुः । चकर्थ चक्रथुः चक्र । चकार-चकर चकृव चकृम । (ii) चक्रे चक्राते चक्रिरे । चकृषे चक्राथे चकृढ्वे । चक्रे चकृवहे चकृमहे । **३. लुट्** - (i) कर्ता कर्तारौ कर्तारः । कर्तासि कर्तास्थः कर्तास्थ । कर्तास्मि कर्तास्वः कर्तास्मः । (ii) कर्ता कर्तारौ कर्तारः । कर्तासे कर्तासाथे कर्ताध्वे । कर्ताहे कर्तास्वहे कर्तास्महे । **४. लृट्** - (i) करिष्यति करिष्यतः करिष्यन्ति । करिष्यसि करिष्यथः करिष्यथ । करिष्यामि करिष्यावः करिष्यामः । (ii) करिष्यते करिष्येते करिष्यन्ते । करिष्यसे करिष्येथे करिष्यध्वे । करिष्ये करिष्यावहे करिष्यामहे । **५. लोट्** - (i) कृणोतु, कृणुतात् कृणुताम् कृण्वन्तु । कृणु, कृणुतात् कृणुतम् कृणुत । कृणवानि कृणवाव कृणवाम । (ii) कृणुताम् कृण्वाताम् कृण्वताम् । कृणुष्व कृण्वाथाम् कृणुध्वम् । कृणवै कृणवावहै कृणवामहै । **६. लङ्** - (i) अकृणोत् अकृणुताम् अकृण्वन् । अकृणोः अकृणुतम् अकृणुत । अकृणवम् अकृण्व-अकृणुव अकृण्म-अकृणुम । (ii) अकृणुत अकृण्वाताम् अकृण्वत । अकृणुथाः अकृण्वाथाम् अकृणुध्वम् । अकृण्वि अकृण्वहि-अकृणुवहि अकृण्महि-अकृणुमहि । **७. विधिलिङ्** - (i) कृणुयात् कृणुयाताम् कृणुयुः । कृणुयाः कृणुयातम् कृणुयात । कृणुयाम् कृणुयाव कृणुयाम । (ii) कृण्वीत कृण्वीयाताम् कृण्वीरन् । कृण्वीथाः कृण्वीयाथाम् कृण्वीध्वम् । कृण्वीय कृण्वीवहि कृण्वीमहि । **८. आशीर्लिङ्** - (i) क्रियात् क्रियास्ताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्रियासुः । क्रियाः क्रियास्तम् क्रियास्त । क्रियासम् क्रियास्व क्रियास्म । (ii) कृषीष्ट कृषीयास्ताम् कृषीरन् । कृषीष्ठाः कृषीयास्थाम् कृषीध्वम् । कृषीय कृषीवहि कृषीमहि । **९. लुङ्** - (i) अकार्षीत् अकार्ष्टाम् अकार्षुः । अकार्षीः अकार्ष्टम् अकार्ष्ट । अकार्षम् अकार्ष्व अकार्ष्म । (ii) अकृत अकृषाताम् अकृषत । अकृष्ठाः अकृषाथाम् अकृढ्वम् । अकृषि अकृष्वहि अकृष्महि । **१०. लृङ्** - (i) अकरिष्यत् अकरिष्यताम् अकरिष्यन् । अकरिष्यः अकरिष्यतम् अकरिष्यत । अकरिष्यम् अकरिष्याव अकरिष्याम । (ii) अकरिष्यत अकरिष्येताम् अकरिष्यन्त । अकरिष्यथाः अकरिष्येथाम् अकरिष्यध्वम् । अकरिष्ये अकरिष्यावहि अकरिष्यामहि ।

णिचि - कारयति - ते, **सनि** - चिकीर्षति - ते, **यकि** - क्रियते

१२५४. वृञ् - वरणे । सकर्म, सेट्, उभय । वरणे - आवरणे इति काशकृत्स्नः । वरणं - स्वीकारः छादनं वा इति धा.का.व्याख्या । (२.६८) 'भक्तौ वृणीते वरणे वृणोति वृणुते वृञः । वृञ आवरणे वा णौ वारयेद् वरते वरेत्' (श्लो. ३२) इति देवः ।

१. लट् - (i) वृणोति वृणुतः वृण्वन्ति । वृणोषि वृणुथः वृणुथ । वृणोमि वृण्वः-वृणुवः वृण्मः-वृणुमः । (ii) वृणुते वृण्वाते वृण्वते । वृणुषे वृण्वाथे वृणुध्वे । वृणवे वृण्वहे-वृणुवहे वृण्महे-वृणुमहे । **२. लिट्** - (i) ववार वव्रतुः वव्रुः । ववरिथ वव्रथुः वव्र । ववार-ववर ववृव ववृम । (ii) वव्रे वव्राते वव्रिरे । ववृषे वव्राथे ववृढ्वे । वव्रे ववृवहे ववृमहे । **३. लुट्** - (i) वरिता[1] वरितारौ वरितारः । वरितासि वरितास्थः वरितास्थ । वरितास्मि वरितास्वः वरितास्मः । (ii) वरीता वरीतारौ वरीतारः । वरीतासि वरीतास्थः वरीतास्थ । वरीतास्मि वरीतास्वः वरीतास्मः । (iii) वरिता वरितारौ वरितारः । वरितासे वरितासाथे वरिताध्वे । वरिताहे वरितास्वहे वरिस्महे । (iv) वरीता वरीतारौ वरीतारः । वरीतासे वरीतासाथे वरीताध्वे । वरीताहे वरीतास्वहे वरीस्महे । **४. लृट्** - (i) वरिष्यति वरिष्यतः वरिष्यन्ति । वरिष्यसि वरिष्यथः वरिष्यथ । वरिष्यामि वरिष्यावः वरिष्यामः । (ii) वरीष्यति वरीष्यतः वरीष्यन्ति । वरीष्यसि वरीष्यथः वरीष्यथ । वरीष्यामि वरीष्यावः वरीष्यामः । (iii) वरिष्यते वरिष्येते वरिष्यन्ते । वरिष्यसे वरिष्येथे वरिष्यध्वे । वरिष्ये वरिष्यावहे वरिष्यामहे । (iv) वरीष्यते वरीष्येते वरीष्यन्ते । वरीष्यसे वरीष्येथे वरीष्यध्वे । वरीष्ये वरीष्यावहे वरीष्यामहे । **५. लोट्** - (i) वृणोतु, वृणुतात् वृणुताम् वृण्वन्तु । वृणु, वृणुतात् वृणुतम् वृणुत । वृणवानि वृणवाव वृणवाम । (ii) वृणुताम् वृण्वाताम् वृण्वताम् । वृणुष्व वृण्वाथाम् वृणुध्वम् । वृणवै वृणवावहै वृणवामहै । **६. लङ्** - (i) अवृणोत् अवृणुताम् अवृण्वन् । अवृणोः अवृणुतम् अवृणुत । अवृणवम् अवृण्व-अवृणुव अवृण्म-अवृणुम । (ii) अवृणुत अवृण्वाताम् अवृण्वत । अवृणुथाः अवृण्वाथाम् अवृणुध्वम् । अवृण्वि अवृण्वहि-अवृणुवहि अवृण्महि-अवृणुमहि । **७. विधिलिङ्** - (i) वृणुयात् वृणुयाताम् वृणुयुः । वृणुयाः वृणुयातम् वृणुयात । वृणुयाम् वृणुयाव वृणुयाम । (ii) वृण्वीत वृण्वीयाताम् वृण्वीरन् । वृण्वीथाः वृण्वीयाथाम् वृण्वीध्वम् । वृण्वीय वृण्वीवहि वृण्वीमहि । **८. आशीर्लिङ्** - (i) व्रियात् व्रियास्ताम् व्रियासुः । व्रियाः व्रियास्तम् व्रियास्त । व्रियासम् व्रियास्व व्रियास्म । (ii) वृषीष्ट[2] वृषीयास्ताम् वृषीरन् । वृषीष्ठाः वृषीयास्थाम् वृषीध्वम् । वृषीय वृषीवहि वृषीमहि । (iii) वरिषीष्ट वरिषीयास्ताम् वरिषीरन् । वरिषीष्ठाः वरिषीयास्थाम् वरिषीध्वम् । वरिषीय वरिषीवहि वरिषीमहि । **९. लुङ्** - (i) अवारीत् अवारिष्टाम् अवारिषुः । अवारीः अवारिष्टम् अवारिष्ट । अवारिषम् अवारिष्व अवारिष्म । (ii) अवृत अवृषाताम् अवृषत । अवृष्ठाः अवृषाथाम् अवृढ्वम् । अवृषि अवृष्वहि अवृष्महि । (iii) अवरिष्ट अवरिषाताम् अवरिषत । अवरिष्ठाः अवरिषाथाम् अवरिढ्वम् । अवरिषि अवरिष्वहि अवरिष्महि । (iv) अवरीष्ट अवरीषाताम् अवरीषत । अवरीष्ठाः अवरीषाथाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवरीढ्वम् । अवरीषि अवरीष्वहि अवरीष्महि । **१०. लृङ्** - (i) अवरिष्यत् अवरिष्यताम् अवरिष्यन् । अवरिष्यः अवरिष्यतम् अवरिष्यत । अवरिष्यम् अवरिष्याव अवरिष्याम । (ii) अवरीष्यत् अवरीष्यताम् अवरीष्यन् । अवरीष्यः अवरीष्यतम् अवरीष्यत । अवरीष्यम् अवरीष्याव अवरीष्याम । (iii) अवरिष्यत अवरिष्येताम् अवरिष्यन्त । अवरिष्यथाः अवरिष्येथाम् अवरिष्यध्वम् । अवरिष्ये अवरिष्यावहि अवरिष्यामहि । (iv) अवरीष्यत अवरीष्येताम् अवरीष्यन्त । अवरीष्यथाः अवरीष्येथाम् अवरीष्यध्वम् । अवरीष्ये अवरीष्यावहि अवरीष्यामहि ।

णिचि - वारयति - ते, **सनि** - विवरिषति[४]/विवरीषति/ वुवूर्षति - ते, **यकि** - व्रियते ।

१. 'वृतो वा' इति इटः वा दीर्घः ।

२. 'लिङ्सिचोरात्मनेपदेषु' - वृङ्वृञ्भ्याम् ऋदन्तात् परयोः लिङ्सिचोः इड् वा स्यात् तङि ।

३. 'न लिङि' - वृतः लिङ इटः दीर्घः न स्यात् ।

४. 'इट् सनि वा' इति वेट् । 'वृतो वा' इति दीर्घे विवरीषति । अनिट्पक्षे 'इको झल्' इति सनः कित्त्वम्, 'अज्झन...' इति दीर्घः ।

१२५५. धुञ् - कम्पने । सकर्म, अनिट्, उभय । 'धूनयति धवति धवते, धुनोति धुनुते, धुनाति च धुनीते । धूनोति धूनुते स्युः पदानि कम्पे, विधूनने धुवति' (श्लो. २६) इति देवः ।

१. लट् - (i) धुनोति धुनुतः धुन्वन्ति । धुनोषि धुनुथः धुनुथ । धुनोमि धुन्वः-धुनुवः धुन्मः-धुनुमः । (ii) धुनुते धुन्वाते धुन्वते । धुनुषे धुन्वाथे धुनुध्वे । धुन्वे धुन्वहे-धुनुवहे धुन्महे-धुनुमहे । (iii) धूनोति[१] धूनुतः धूनवन्ति । धूनोषि धूनुथः धूनुथ । धूनोमि धून्वः-धूनुवः धून्मः-धूनुमः । (iv) धूनुते धून्वाते धून्वते । धूनुषे धून्वाथे धूनुध्वे । धून्वे धून्वहे-धूनुवहे धून्महे-धूनुमहे । **२. लिट्** - (i) दुधाव दुधुवतुः दुधुवुः । दुधविथ-दुधोथ दुधुवथुः दुधुव । दुधाव-दुधव दुधुविव दुधुविम । (ii) दुधुवे दुधुवाते दुधुविरे । दुधुविषे दुधुवाथे दुधुविध्वे-ढ्वे । दुधुवे दुधुविवहे दुधुविमहे । (iii) दुधाव दुधुवतुः दुधुवुः । दुधविथ-दुधोथ दुधुवथुः दुधुव । दुधाव-दुधव दुधुविव दुधुविम । (iv) दुधुवे दुधुवाते दुधुविरे । दुधुविषे दुधुवाथे दुधुविध्वे-ढ्वे । दुधुवे दुधुविवहे दुधुविमहे । **३. लुट्** - (i) धोता धोतारौ धोतारः । धोतासि धोतास्थः धोतास्थ । धोतास्मि धोतास्वः धोतास्मः । (ii) धोता[२] धोतारौ धोतारः । धोतासे धोतासाथे धोताध्वे । धोताहे धोतास्वहे धोतास्महे । (iii) धोता धोतारौ धोतारः । धोतासि धोतास्थः धोतास्थ । धोतास्मि धोतास्वः धोतास्मः । (iv) धविता धवितारौ धवितारः । धवितासि धवितास्थः धवितास्थ । धवितास्मि धवितास्वः धवितास्मः । **४. लृट्** - (i) धोष्यति धोष्यतः धोष्यन्ति । धोष्यसि धोष्यथः धोष्यथ । धोष्यामि धोष्यावः धोष्यामः । (ii) धोष्यते धोष्येते धोष्यन्ते । धोष्यसे धोष्येथे धोष्यध्वे । धोष्ये धोष्यावहे धोष्यामहे । (iii) धविष्यति धविष्यतः धविष्यन्ति । धविष्यसि धविष्यथः धविष्यथ । धविष्यामि धविष्यावः धविष्यामः । (iv) धविष्यते धविष्येते धविष्यन्ते । धविष्यसे धविष्येथे धविष्यध्वे । धविष्ये धविष्यावहे धविष्यामहे । **५. लोट्** - (i) धुनोतु, धुनुतात् धुनुताम् धुन्वन्तु । धुनु, धुनुतात् धुनुतम् धुनुत । धुनवानि धुनवाव धुनवाम । (ii) धुनुताम् धुन्वाताम् धुन्वताम् । धुनुष्व धुन्वाथाम् धुनुध्वम् । धुनवै धुनवावहै धुनवामहै । (iii) धूनोतु, धूनुतात् धूनुताम् धून्वन्तु । धूनु, धूनुतात् धूनुतम् धूनुत । धूनवानि धूनवाव धूनवाम । (iv) धूनुताम् धून्वाताम् धून्वताम् । धूनुष्व धून्वाथाम् धूनुध्वम् । धूनवै धूनवावहै धूनवामहै । **६. लङ्** - (i) अधुनोत् अधुनुताम् अधुन्वन् । अधुनोः अधुनुतम् अधुनुत । अधुनवम् अधुन्व-अधुनुव अधुन्म-अधुनुम । (ii) अधुनुत अधुन्वाताम् अधुन्वत । अधुनुथाः अधुन्वाथाम् अधुनुध्वम् । अधुन्वि अधुन्वहि-अधुनुवहि अधुन्महि-अधुनुमहि । (iii) अधूनोत् अधूनुताम् अधून्वन् । अधूनोः अधूनुतम् अधूनुत । अधूनवम् अधून्व-अधूनुव अधून्म-अधूनुम । (iv) अधूनुत अधून्वाताम् अधून्वत । अधूनुथाः अधून्वाथाम् अधूनुध्वम् । अधून्वि अधून्वहि-अधूनुवहि अधून्महि-अधूनुमहि । **७. विधिलिङ्** - (i) धुनुयात् धुनुयाताम् धुनुयुः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धुनुयाः धुनुयातम् धुनुयात । धुनुयाम् धुनुयाव धुनुयाम । (ii) धुन्वीत धुन्वीयाताम् धुन्वीरन् । धुन्वीथाः धुन्वीयाथाम् धुन्वीध्वम् । धुन्वीय धुन्वीवहि धुन्वीमहि । (iii) धूनुयात् धूनुयाताम् धूनुयुः । धूनुयाः धूनुयातम् धूनुयात । धूनुयाम् धूनुयाव धूनुयाम । (iv) धून्वीत धून्वीयाताम् धून्वीरन् । धून्वीथाः धून्वीयाथाम् धून्वीध्वम् । धून्वीय धून्वीवहि धून्वीमहि । **८. आशीर्लिङ्** - (i) धूयात् धूयास्ताम् धूयासुः । धूयाः धूयास्तम् धूयास्त । धूयासम् धूयास्व धूयास्म । (ii) धोषीष्ट धोषीयास्ताम् धोषीरन् । धोषीष्ठाः धोषीयास्थाम् धोषीध्वम् । धोषीय धोषीवहि धोषीमहि । (iii) धूयात् धूयास्ताम् धूयासुः । धूयाः धूयास्तम् धूयास्त । धूयासम् धूयास्व धूयास्म । (iv) धविषीष्ट धविषीयास्ताम् धविषीरन् । धविषीष्ठाः धविषीयास्थाम् धविषीध्वम् । धविषीय धविषीवहि धविषीमहि । **९. लुङ्** - (i) अधौषीत् अधौष्टाम् अधौषुः । अधौषीः अधौष्टम् अधौष्ट । अधौषम् अधौष्व अधौष्म । (ii) अधोष्ट अधोषाताम् अधोषत । अधोष्ठाः अधोषाथाम् अधोढ्वम् । अधोषि अधोष्वहि अधोष्महि । (iii) अधावीत् अधाविष्टाम् अधाविषुः । अधावीः अधाविष्टम् अधाविष्ट । अधाविषम् अधाविष्व अधाविष्म । (iv) अधविष्ट अधविषाताम् अधविषत । अधविष्ठाः अधविषाथाम् अधविढ्वम् । अधविषि अधविष्वहि अधविष्महि । **१०. लृङ्** - (i) अधोष्यत् अधोष्यताम् अधोष्यन् । अधोष्यः अधोष्यतम् अधोष्यत । अधोष्यम् अधोष्याव अधोष्याम । (ii) अधोष्यत अधोष्येताम् अधोष्यन्त । अधोष्यथाः अधोष्येथाम् अधोष्यध्वम् । अधोष्ये अधोष्यावहि अधोष्यामहि । (iii) अधविष्यत् अधविष्यताम् अधविष्यन् । अधविष्यः अधविष्यतम् अधविष्यत । अधविष्यम् अधविष्याव अधविष्याम । (iv) अधविष्यत अधविष्येताम् अधविष्यन्त । अधविष्यथाः अधविष्येथाम् अधविष्यध्वम् । अधविष्ये अधविष्यावहि अधविष्यामहि ।

णिचि - धूनयति[३] - ते, **सनि** - दुधूषति - ते, **यकि** - धूयते

१. 'दीर्घान्तोऽप्ययम्' इति सिद्धान्तकोमुदी । तदा दीर्घघटितरूपम् अपि ।

२. 'स्वरतिसूतिसूयतिधूञूदितो वा' इति विकल्पेन इट् ।

३. 'धूञ्प्रीञोर्नुग्वक्तव्यः' (वा. ७.३.३७) इति ण्यन्ते नुगागमः ।

१२५६. टु दु - उपतापे । सकर्म, अनिट्, परस्मै । 'दुनोति दूयते तापे दवतीति गतौ पदम्' (श्लो. २२) इति देवः ।

१. लट् - दुनोति दुनुतः दुन्वन्ति । दुनोषि दुनुथः दुनुथ । दुनोमि दुन्वः-दुनुवः दुन्मः-दुनुमः । **२. लिट्** - दुदाव दुदुवतुः दुदुवुः । दुदविथ-दुदोथ दुदुवथुः दुदुव । दुदाव-दुदव दुदुविव दुदुविम । **३. लुट्** - दोता दोतारौ दोतारः । दोतासि दोतास्थः दोतास्थ । दोतास्मि दोतास्वः दोतास्मः । **४. लृट्** - दोष्यति दोष्यतः दोष्यन्ति । दोष्यसि दोष्यथः दोष्यथ । दोष्यामि दोष्यावः दोष्यामः । **५. लोट्** - दुनोतु, दुनुतात् दुनुताम् दुन्वन्तु । दुनु, दुनुतात् दुनुतम् दुनुत । दुनवानि दुनवाव दुनवाम । **६. लङ्** - अदुनोत् अदुनुताम् अदुन्वन् । अदुनोः अदुनुतम् अदुनुत । अदुनवम् अदुन्व-अदुनुव अदुन्म-अदुनुम । **७. विधिलिङ्** - दुनुयात् दुनुयाताम् दुनुयुः । दुनुयाः दुनुयातम् दुनुयात । दुनुयाम् दुनुयाव दुनुयाम । **८. आशीर्लिङ्** - दूयात् दूयास्ताम् दूयासुः । दूयाः दूयास्तम् दूयास्त । दूयासम् दूयास्व दूयास्म । **९. लुङ्** - अदौषीत् अदौष्टाम् अदौषुः । अदौषीः अदौष्टम् अदौष्ट । अदौषम् अदौष्व अदौष्म । **१०. लृङ्** - अदोष्यत् अदोष्यताम् अदोष्यन् । अदोष्यः अदोष्यतम् अदोष्यत । अदोष्यम् अदोष्याव अदोष्याम ।

णिचि - दावयति - ते, **सनि** - दुदूषति, **यकि** - दूयते

१२५७. हि - गतौ वृद्धौ च । सकर्म, अनिट् परस्मै ।

१. लट् - हिनोति हिनुतः हिन्वन्ति । हिनोषि हिनुथः हिनुथ । हिनोमि हिन्वः-हिनुवः हिन्मः-हिनुमः ।
२. लिट् - जिघाय जिघ्यतुः जिघ्युः । जिघयिथ-जिघेथ जिघ्यथुः जिघ्य । जिघाय-जिघय जिघ्यिव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जिघ्यिम । **३. लुट्** – हेता हेतारौ हेतारः । हेतासि हेतास्थः हेतास्थ । हेतास्मि हेतास्वः हेतास्मः । **४. लृट्** – हेष्यति हेष्यतः हेष्यन्ति । हेष्यसि हेष्यथः हेष्यथ । हेष्यामि हेष्यावः हेष्यामः । **५. लोट्** – हिनोतु, हिनुतात् हिनुताम् हिन्वन्तु । हिनु, हिनुतात् हिनुतम् हिनुत । हिनवानि हिनवाव हिनवाम । **६. लङ्** – अहिनोत् अहिनुताम् अहिन्वन् । अहिनोः अहिनुतम् अहिनुत । अहिनवम् अहिन्व-अहिनुव अहिन्म-अहिनुम । **७. विधिलिङ्** – हिनुयात् हिनुयाताम् हिनुयुः । हिनुयाः हिनुयातम् हिनुयात । हिनुयाम् हिनुयाव हिनुयाम । **८. आशीर्लिङ्** – हीयात् हीयास्ताम् हीयासुः । हीयाः हीयास्तम् हीयास्त । हीयासम् हीयास्व हीयास्म । **९. लुङ्** – अहैषीत् अहैष्टाम् अहैषुः । अहैषीः अहैष्टम् अहैष्ट । अहैषम् अहैष्व अहैष्म । **१०. लृङ्** – अहेष्यत् अहेष्यताम् अहेष्यन् । अहेष्यः अहेष्यतम् अहेष्यत । अहेष्यम् अहेष्याव अहेष्याम ।

णिचि – हाययति – ते, **सनि** – जिघीषति, **यकि** – हीयते

१२५८. पृ – प्रीतौ । सकर्म, अनिट्, परस्मै । 'प्रीतौ पृणोत्यृदन्तस्य व्यायामे प्रियते पृङः' (श्लो.३४) इति देवः ।

१. लट् – पृणोति पृणुतः पृण्वन्ति । पृणोषि पृणुथः पृणुथ । पृणोमि पृण्वः-पृणुवः पृण्मः-पृणुमः । **२. लिट्** – पपार पप्रतुः पप्रुः । पपर्थ पप्रथुः पप्र । पपार-पपर पपृव पपृम । **३. लुट्** – पर्ता पर्तारौ पर्तारः । पर्तासि पर्तास्थः पर्तास्थ । पर्तास्मि पर्तास्वः पर्तास्मः । **४. लृट्** – परिष्यति[1] परिष्यतः परिष्यन्ति । परिष्यसि परिष्यथः परिष्यथ । परिष्यामि परिष्यावः परिष्यामः । **५. लोट्** – पृणोतु, पृणुतात् पृणुताम् पृण्वन्तु । पृणु, पृणुतात् पृणुतम् पृणुत । पृणवानि पृणवाव पृणवाम । **६. लङ्** – अपृणोत् अपृणुताम् अपृण्वन् । अपृणोः अपृणुतम् अपृणुत । अपृणवम् अपृण्व-अपृणुव अपृण्म-अपृणुम । **७. विधिलिङ्** – पृणुयात् पृणुयाताम् पृणुयुः । पृणुयाः पृणुयातम् पृणुयात । पृणुयाम् पृणुयाव पृणुयाम । **८. आशीर्लिङ्** – प्रियात्[2] प्रियास्ताम् प्रियासुः । प्रियाः प्रियास्तम् प्रियास्त । प्रियासम् प्रियास्व प्रियास्म । **९. लुङ्** – अपार्षीत् अपार्ष्टाम् अपार्षुः । अपार्षीः अपार्ष्टम् अपार्ष्ट । अपार्षम् अपार्ष्व अपार्ष्म । **१०. लृङ्** – अपरिष्यत् अपरिष्यताम् अपरिष्यन् । अपरिष्यः अपरिष्यतम् अपरिष्यत । अपरिष्यम् अपरिष्याव अपरिष्याम ।

णिचि – पारयति – ते, **सनि** – पुपूर्षति, **यकि** – प्रियते[2] ।

१. 'ऋद्धनोः स्ये...' इति इट् ।

२. 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशः ।

१२५९. स्पृ – प्रीतिपालनयोः । सकर्म, अनिट्, परस्मै । प्रीतिचलनयोः इत्येके । 'प्रीतिर्बलम्, पालनं – जीवनम् इति स्वामी' इति माधवः । 'स्पृ प्रीतिबलनयोः' बलनं जीवनम् । 'स्पृ इत्येके' इति क्षीरतरङ्गिण्याम् ।

१. लट् – स्पृणोति स्पृणुतः स्पृण्वन्ति । स्पृणोषि स्पृणुथः स्पृणुथ । स्पृणोमि स्पृण्वः-स्पृणुवः स्पृण्मः-स्पृणुमः । **२. लिट्** – पस्पार पस्परतुः पस्परुः । पस्पर्थ पस्परथुः पस्पर । पस्पार-पस्पर पस्परिव पस्परिम । **३. लुट्** – स्पर्ता स्पर्तारौ स्पर्तारः । स्पर्तासि स्पर्तास्थः स्पर्तास्थ । स्पर्तास्मि स्पर्तास्वः स्पर्तास्मः । **४. लृट्** – स्परिष्यति[1] स्परिष्यतः स्परिष्यन्ति । स्परिष्यसि स्परिष्यथः स्परिष्यथ । स्परिष्यामि स्परिष्यावः स्परिष्यामः । **५. लोट्** – स्पृणोतु, स्पृणुतात् स्पृणुताम् स्पृण्वन्तु । स्पृणु, स्पृणुतात् स्पृणुतम् स्पृणुत । स्पृणवानि स्पृणवाव स्पृणवाम । **६. लङ्** – अस्पृणोत् अस्पृणुताम् अस्पृण्वन् । अस्पृणोः अस्पृणुतम् अस्पृणुत । अस्पृणवम् अस्पृण्व-अस्पृणुव अस्पृण्म-अस्पृणुम । **७. विधिलिङ्** – स्पृणुयात् स्पृणुयाताम् स्पृणुयुः । स्पृणुयाः स्पृणुयातम् स्पृणुयात । स्पृणुयाम् स्पृणुयाव स्पृणुयाम । **८. आशीर्लिङ्** – स्प्रियात्[2] स्प्रियास्ताम् स्प्रियासुः । स्प्रियाः स्प्रियास्तम् स्प्रियास्त । स्प्रियासम् स्प्रियास्व स्प्रियास्म । **९. लुङ्** – अस्पार्षीत् अस्पार्ष्टाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्पार्षुः । अस्पार्षीः अस्पार्ष्टम् अस्पार्ष्ट । अस्पार्षम् अस्पार्ष्व अस्पार्ष्म । **१०. लृङ्** - अस्परिष्यत् अस्परिष्यताम् अस्परिष्यन् । अस्परिष्यः अस्परिष्यतम् अस्परिष्यत । अस्परिष्यम् अस्परिष्याव अस्परिष्याम । **णिचि** - स्पारयति - ते, **सनि** - पुस्पूर्षति, **यकि** - स्प्रियते[२]

१. 'ऋद्धनोः स्ये...' इति इट् ।

२. 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशः ।

१२६०. आप्लृ - व्याप्तौ । सकर्म, अनिट्, परस्मै । 'आपयत्यापतीत्यापेर्यौ वा णौ लम्भने पदे । व्याप्त्यर्थस्यास्य तु स्वादेराप्नोतीति पदं भवेत्' (श्लो. १३७) इति देवः ।

१. लट् - आप्नोति आप्नुतः आप्नुवन्ति । आप्नोषि आप्नुथः आप्नुथ । आप्नोमि आप्नुवः आप्नुमः । **२. लिट्** - आप आपतुः आपुः । आपिथ आपथुः आप । आप आपिव आपिम । **३. लुट्** - आप्ता आप्तारौ आप्तारः । आप्तासि आप्तास्थः आप्तास्थ । आप्तास्मि आप्तास्वः आप्तास्मः । **४. लृट्** - आप्स्यति आप्स्यतः आप्स्यन्ति । आप्स्यसि आप्स्यथः आप्स्यथ । आप्स्यामि आप्स्यावः आप्स्यामः । **५. लोट्** - आप्नोतु, आप्नुतात् आप्नुताम् आप्नुवन्तु । आप्नुहि, आप्नुतात् आप्नुतम् आप्नुत । आप्नवानि आप्नवाव आप्नवाम । **६. लङ्** - आप्नोत् आप्नुताम् आप्नुवन् । आप्नोः आप्नुतम् आप्नुत । आप्नवम् आप्नुव आप्नुम । **७. विधिलिङ्** - आप्नुयात् आप्नुयाताम् आप्नुयुः । आप्नुयाः आप्नुयातम् आप्नुयात । आप्नुयाम् आप्नुयाव आप्नुयाम । **८. आशीर्लिङ्** - आप्यात् आप्यास्ताम् आप्यासुः । आप्याः आप्यास्तम् आप्यास्त । आप्यासम् आप्यास्व आप्यास्म । **९. लुङ्** - आपत्[१] आपताम् आपन् । आपः आपतम् आपत । आपम् आपाव आपाम । **१०. लृङ्** - आप्स्यत् आप्स्यताम् आप्स्यन् । आप्स्यः आप्स्यतम् आप्स्यत । आप्स्यम् आप्स्याव आप्स्याम ।

णिचि - आपयति - ते, **सनि** - ईप्सति[२], **यकि** - आप्यते ।

१. 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति अङ् ।

२. 'आप्ज्ञप्यृधामीत्' - एषामचः ईत् स्यात् सादौ सनि ।

१२६१. शक्लृ - शक्तौ । अकर्म, अनिट्, परस्मै । 'शङ्कते शकि शङ्कायां शक्तौ शक्नोति मर्षणे' (श्लो. ४३) इति देवः ।

१. लट् - शक्नोति शक्नुतः शक्नुवन्ति । शक्नोषि शक्नुथः शक्नुथ । शक्नोमि शक्नुवः शक्नुमः । **२. लिट्** - शशाक शेकतुः शेकुः । शेकिथ-शशक्थ शेकथुः शेक । शशाक-शशक शेकिव शेकिम । **३. लुट्** - शक्ता शक्तारौ शक्तारः । शक्तासि शक्तास्थः शक्तास्थ । शक्तास्मि शक्तास्वः शक्तास्मः । **४. लृट्** - शक्ष्यति शक्ष्यतः शक्ष्यन्ति । शक्ष्यसि शक्ष्यथः शक्ष्यथ । शक्ष्यामि शक्ष्यावः शक्ष्यामः । **५. लोट्** - शक्नोतु, शक्नुतात् शक्नुताम् शक्नुवन्तु । शक्नुहि, शक्नुतात् शक्नुतम् शक्नुत । शक्नवानि शक्नवाव शक्नवाम । **६. लङ्** - अशक्नोत् अशक्नुताम् अशक्नुवन् । अशक्नोः अशक्नुतम् अशक्नुत । अशक्नवम् अशक्नुव अशक्नुम । **७. विधिलिङ्** - शक्नुयात् शक्नुयाताम् शक्नुयुः । शक्नुयाः शक्नुयातम् शक्नुयात । शक्नुयाम् शक्नुयाव शक्नुयाम । **८. आशीर्लिङ्** शक्यात् शक्यास्ताम् शक्यासुः । शक्याः शक्यास्तम् शक्यास्त । शक्यासम् शक्यास्व शक्यास्म । **९. लुङ्** - अशकत्[१] अशकताम् अशकन् । अशकः अशकतम् अशकत । अशकम् अशकाव अशकाम । **१०. लृङ्** - अशक्ष्यत् अशक्ष्यताम् अशक्ष्यन् । अशक्ष्यः अशक्ष्यतम् अशक्ष्यत । अशक्ष्यम् अशक्ष्याव अशक्ष्याम ।

णिचि - शाकयति - ते, **सनि** - शिक्षति, **यकि** - शक्यते ।

१. 'लृदित्वादङ् 'पुषादि...' इति सूत्रेण ।

१२६२. राध - संसिद्धौ । अकर्म, अनिट्, परस्मै । 'राध्नोति संसिद्ध्यर्थे श्नौ राध्येद् वृद्धावकर्मकात्' (श्लो. १२२)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इति देवः ।

१. लट् – राध्नोति राध्नुतः राध्नुवन्ति । राध्नोषि राध्नुथः राध्नुथ । राध्नोमि राध्नुवः राध्नुमः । **२. लिट्** – रराध रेधतुः रेधुः । रेधिथ रेधथुः रेध । रराध रेधिव रेधिम । **३. लुट्** – राद्धा राद्धारौ राद्धारः । राद्धासि राद्धास्थः राद्धास्थ । राद्धास्मि राद्धास्वः राद्धास्मः । **४. लृट्** – रात्स्यति रात्स्यतः रात्स्यन्ति । रात्स्यसि रात्स्यथः रात्स्यथ । रात्स्यामि रात्स्यावः रात्स्यामः । **५. लोट्** – राध्नोतु, राध्नुतात् राध्नुताम् राध्नुवन्तु । राध्नुहि, राध्नुतात् राध्नुतम् राध्नुत । राध्नवानि राध्नवाव राध्नवाम । **६. लङ्** – अराध्नोत् अराध्नुताम् अराध्नुवन् । अराध्नोः अराध्नुतम् अराध्नुत । अराध्नवम् अराध्नुव अराध्नुम । **७. विधिलिङ्** – राध्नुयात् राध्नुयाताम् राध्नुयुः । राध्नुयाः राध्नुयातम् राध्नुयात । राध्नुयाम् राध्नुयाव राध्नुयाम । **८. आशीर्लिङ्** – राध्यात् राध्यास्ताम् राध्यासुः । राध्याः राध्यास्तम् राध्यास्त । राध्यासम् राध्यास्व राध्यास्म । **९. लुङ्** – अरात्सीत् अराद्धाम् अरात्सुः । अरात्सीः अराद्धम् अराद्ध । अरात्सम् अरात्स्व अरात्स्म । **१०. लृङ्** – अरात्स्यत् अरात्स्यताम् अरात्स्यन् । अरात्स्यः अरात्स्यतम् अरात्स्यत । अरात्स्यम् अरात्स्याव अरात्स्याम ।

णिचि – राधयति – ते, **सनि** – रित्सति[२], **यकि** – राध्यते

१. 'राधो हिंसायाम्' – एत्वाभ्यासलोपौ स्तः । उपसर्गवशात् इह हिंसायां वृत्तिः ।

२. 'राधो हिंसायां सन्यच इस् वक्तव्यः ।' हिंसायां किम् ? आरिरात्सति ।

१२६३. साध – संसिद्धौ । सकर्म, अनिट्, परस्मै ।

१. लट् – साध्नोति साध्नुतः साध्नुवन्ति । साध्नोषि साध्नुथः साध्नुथ । साध्नोमि साध्नुवः साध्नुमः । **२. लिट्** – ससाध ससाधतुः ससाधुः । ससाधिथ/ससाद्ध ससाधथुः ससाध । ससाध ससाधिव ससाधिम । **३. लुट्** – साद्धा साद्धारौ साद्धारः । साद्धासि साद्धास्थः साद्धास्थ । साद्धास्मि साद्धास्वः साद्धास्मः । **४. लृट्** – सात्स्यति सात्स्यतः सात्स्यन्ति । सात्स्यसि सात्स्यथः सात्स्यथ । सात्स्यामि सात्स्यावः सात्स्यामः । **५. लोट्** – साध्नोतु, साध्नुतात् साध्नुताम् साध्नुवन्तु । साध्नुहि, साध्नुतात् साध्नुतम् साध्नुत । साध्नवानि साध्नवाव साध्नवाम । **६. लङ्** – असाध्नोत् असाध्नुताम् असाध्नुवन् । असाध्नोः असाध्नुतम् असाध्नुत । असाध्नवम् असाध्नुव असाध्नुम । **७. विधिलिङ्** – साध्नुयात् साध्नुयाताम् साध्नुयुः । साध्नुयाः साध्नुयातम् साध्नुयात । साध्नुयाम् साध्नुयाव साध्नुयाम । **८. आशीर्लिङ्** – साध्यात् साध्यास्ताम् साध्यासुः । साध्याः साध्यास्तम् साध्यास्त । साध्यासम् साध्यास्व साध्यास्म । **९. लुङ्** – असात्सीत् असाद्धाम् असात्सुः । असात्सीः असाद्धम् असाद्ध । असात्सम् असात्स्व असात्स्म । **१०. लृङ्** – असात्स्यत् असात्स्यताम् असात्स्यन् । असात्स्यः असात्स्यतम् असात्स्यत । असात्स्यम् असात्स्याव असात्स्याम ।

णिचि – साधयति – ते, **सनि** – सिषात्सति, **यकि** – साध्यते

१२६४. अशू – व्याप्तौ सङ्घाते च । सकर्म, वेट्, आत्मने । 'व्याप्तावश्नुत इत्याहुरश्नातीति तु भोजने' इति देवः । (१६६)

१. लट् – अश्नुते अश्नुवाते अश्नुवते । अश्नुषे अश्नुवाथे अश्नुध्वे । अश्नुवे अश्नुवहे अश्नुमहे । **२. लिट्** – आनशे आनशाते आनशिरे । आनशिषे-आनक्षे आनशाथे आनशिध्वे/ड्ढ्वे । आनशे आनशिवहे-आनश्वहे आनशिमहे-आनश्महे । **३. लुट्** – (i) अष्टा[१] अष्टारौ अष्टारः । अष्टासे अष्टासाथे अष्टाध्वे । अष्टाहे अष्टास्वहे अष्टास्महे । (ii) अशिता अशितारौ अशितारः । अशितासे अशितासाथे अशिताध्वे । अशिताहे अशितास्वहे अशितास्महे । **४. लृट्** – (i) अक्ष्यते अक्ष्येते अक्ष्यन्ते । अक्ष्यसे अक्ष्येथे अक्ष्यध्वे । अक्ष्ये अक्ष्यावहे अक्ष्यामहे । (ii) अशिष्यते अशिष्येते अशिष्यन्ते । अशिष्यसे अशिष्येथे अशिष्यध्वे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अशिष्ये अशिष्यावहे अशिष्यामहे । **५. लोट्** – अश्नुताम् अश्नुवाताम् अश्नुवताम् । अश्नुष्व अश्नुवाथाम् अश्नुध्वम् । अश्नवै अश्नवावहै अश्नवामहै । **६. लङ्** – आश्नुत आश्नुवाताम् आश्नुवत । आश्नुथाः आश्नुवाथाम् आश्नुध्वम् । अश्नुवि आश्नुवहि अश्नुमहि । **७. विधिलिङ्** – अश्नुवीत अश्नुवीयाताम् अश्नुवीरन् । अश्नुवीथाः अश्नुवीयाथाम् अश्नुवीध्वम् । अश्नुवीय अश्नुवीवहि अश्नुवीमहि । **८. आशीर्लिङ्** – (i) अक्षीष्ट अक्षीयास्ताम् अक्षीरन् । अक्षीष्ठाः अक्षीयास्थाम् अक्षीध्वम् । अक्षीय अक्षीवहि अक्षीमहि । (ii) अशिषीष्ट अशिषीयास्ताम् अशिषीरन् । अशिषीष्ठाः अशिषीयास्थाम् अशिषीध्वम् । अशिषीय अशिषीवहि अशिषीमहि । **९. लुङ्** – (i) आष्ट आक्षाताम् आक्षत । आष्ठाः आक्षाथाम् आड्ढ्वम् । आक्षि आक्ष्वहि आक्ष्महि । (ii) आशिष्ट आशिषाताम् आशिषत । आशिष्ठाः आशिषाथाम् आशिध्वम् । आशिषि आशिष्वहि आशिष्महि । **१०. लृङ्** – (i) आक्ष्यत आक्ष्येताम् आक्ष्यन्त । आक्ष्यथाः आक्ष्येथाम् आक्ष्यध्वम् । आक्ष्ये आक्ष्यावहि आक्ष्यामहि । (ii) आशिष्यत आशिष्येताम् आशिष्यन्त । आशिष्यथाः आशिष्येथाम् आशिष्यध्वम् । आशिष्ये आशिष्यावहि आशिष्यामहि ।

णिचि – आशयति – ते, **सनि** – अशिशिषते, **यकि** – अश्यते ।

१. ऊदित्त्वात् 'स्वरति... ऊदितो वा' इति वेट् ।

१२६५. ष्टिघ – आस्कन्दने । सकर्म, सेट्, आत्मने । षोपदेशः ।

१. लट् – स्तिघ्नुते स्तिघ्नुवाते स्तिघ्नुवते । स्तिघ्नुषे स्तिघ्नुवाथे स्तिघ्नुध्वे । स्तिघ्नुवे स्तिघ्नुवहे स्तिघ्नुमहे । **२. लिट्** – तिष्टिघे तिष्टिघाते तिष्टिघिरे । तिष्टिघिषे तिष्टिघाथे तिष्टिघिध्वे । तिष्टिघे तिष्टिघिवहे तिष्टिघिमहे । **३. लुट्** – स्तेघिता स्तेघितारौ स्तेघितारः । स्तेघितासे स्तेघितासाथे स्तेघिताध्वे । स्तेघिताहे स्तेघितास्वहे स्तेघितास्महे । **४. लृट्** – स्तेघिष्यते स्तेघिष्येते स्तेघिष्यन्ते । स्तेघिष्यसे स्तेघिष्येथे स्तेघिष्यध्वे । स्तेघिष्ये स्तेघिष्यावहे स्तेघिष्यामहे । **५. लोट्** – स्तिघ्नुताम् स्तिघ्नुवाताम् स्तिघ्नुवताम् । स्तिघ्नुष्व स्तिघ्नुवाथाम् स्तिघ्नुध्वम् । स्तिघ्नवै स्तिघ्नवावहै स्तिघ्नवामहै । **६. लङ्** – अस्तिघ्नुत अस्तिघ्नुवाताम् अस्तिघ्नुवत । अस्तिघ्नुथाः अस्तिघ्नुवाथाम् अस्तिघ्नुध्वम् । अस्तिघ्नुवि अस्तिघ्नुवहि अस्तिघ्नुमहि । **७. विधिलिङ्** – स्तिघ्नुवीत स्तिघ्नुवीयाताम् स्तिघ्नुवीरन् । स्तिघ्नुवीथाः स्तिघ्नुवीयाथाम् स्तिघ्नुवीध्वम् । स्तिघ्नुवीय स्तिघ्नुवीवहि स्तिघ्नुवीमहि । **८. आशीर्लिङ्** – स्तेघिषीष्ट स्तेघिषीयास्ताम् स्तेघिषीरन् । स्तेघिषीष्ठाः स्तेघिषीयास्थाम् स्तेघिषीध्वम् । स्तेघिषीय स्तेघिषीवहि स्तेघिषीमहि । **९. लुङ्** – अस्तेघिष्ट अस्तेघिषाताम् अस्तेघिषत । अस्तेघिष्ठाः अस्तेघिषाथाम् अस्तेघिध्वम् । अस्तेघिषि अस्तेघिष्वहि अस्तेघिष्महि । **१०. लृङ्** – अस्तेघिष्यत अस्तेघिष्येताम् अस्तेघिष्यन्त । अस्तेघिष्यथाः अस्तेघिष्येथाम् अस्तेघिष्यध्वम् । अस्तेघिष्ये अस्तेघिष्यावहि अस्तेघिष्यामहि ।

णिचि – स्तेघयति – ते, **सनि** – तिस्तिघिषते/तिस्तेघिषते, **यकि** – स्तिघ्यते

१२६६. तिक – आस्कन्दे गतौ च । सकर्म, सेट्, परस्मै । (चकारात् 'आस्कन्दने' इति सम्बध्यते)

१. लट् – तिक्नोति तिक्नुतः तिक्नुवन्ति । तिक्नोषि तिक्नुथः तिक्नुथ । तिक्नोमि तिक्नुवः तिक्नुमः । **२. लिट्** – तितेक तितिकतुः तितिकुः । तितेकिथ तितिकथुः तितिक । तितेक तितिकिव तितिकिम । **३. लुट्** – तेकिता तेकितारौ तेकितारः । तेकितासि तेकितास्थः तेकितास्थ । तेकितास्मि तेकितास्वः तेकितास्मः । **४. लृट्** – तेकिष्यति तेकिष्यतः तेकिष्यन्ति । तेकिष्यसि तेकिष्यथः तेकिष्यथ । तेकिष्यामि तेकिष्यावः तेकिष्यामः । **५. लोट्** – तिक्नोतु, तिक्नुतात् तिक्नुताम् तिक्नुवन्तु । तिक्नुहि, तिक्नुतात् तिक्नुतम् तिक्नुत । तिक्नवानि तिक्नवाव तिक्नवाम । **६. लङ्** – अतिक्नोत् अतिक्नुताम् अतिक्नुवन् । अतिक्नोः अतिक्नुतम् अतिक्नुत । अतिक्नवम् अतिक्नुव अतिक्नुम । **७. विधिलिङ्** – तिक्नुयात् तिक्नुयाताम् तिक्नुयुः । तिक्नुयाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तिक्नुयातम् तिक्नुयात । तिक्नुयाम् तिक्नुयाव तिक्नुयाम । **८. आशीर्लिङ्** – तिक्यात् तिक्यास्ताम् तिक्यासुः । तिक्याः तिक्यास्तम् तिक्यास्त । तिक्यासम् तिक्यास्व तिक्यास्म । **९. लुङ्** – अतेकीत् अतेकिष्टाम् अतेकिषुः । अतेकीः अतेकिष्टम् अतेकिष्ट । अतेकिषम् अतेकिष्व अतेकिष्म । **१०. लृङ्** – अतेकिष्यत् अतेकिष्यताम् अतेकिष्यन् । अतेकिष्यः अतेकिष्यतम् अतेकिष्यत । अतेकिष्यम् अतेकिष्याव अतेकिष्याम ।

णिचि – तेकयति – ते, **सनि** – तितिकिषति/तितेकिषति, **यकि** – तिक्यते

१२६७. तिग – आस्कन्दे गतौ च । सकर्म, सेट्, परस्मै । चकारात् 'आस्कन्दने' इति सम्बध्यते ।

१. लट् – तिग्नोति तिग्नुतः तिग्नुवन्ति । तिग्नोषि तिग्नुथः तिग्नुथ । तिग्नोमि तिग्नुवः तिग्नुमः । **२. लिट्** – तितेग तितिगतुः तितिगुः । तितेगिथ तितिगथुः तितिग । तितेग तितिगिव तितिगिम । **३. लुट्** – तेगिता तेगितारौ तेगितारः । तेगितासि तेगितास्थः तेगितास्थ । तेगितास्मि तेगितास्वः तेगितास्मः । **४. लृट्** – तेगिष्यति तेगिष्यतः तेगिष्यन्ति । तेगिष्यसि तेगिष्यथः तेगिष्यथ । तेगिष्यामि तेगिष्यावः तेगिष्यामः । **५. लोट्** – तिग्नोतु, तिग्नुतात् तिग्नुताम् तिग्नुवन्तु । तिग्नुहि, तिग्नुतात् तिग्नुतम् तिग्नुत । तिग्नवानि तिग्नवाव तिग्नवाम । **६. लङ्** – अतिग्नोत् अतिग्नुताम् अतिग्नुवन् । अतिग्नोः अतिग्नुतम् अतिग्नुत । अतिग्नवम् अतिग्नुव अतिग्नुम । **७. विधिलिङ्** – तिग्नुयात् तिग्नुयाताम् तिग्नुयुः । तिग्नुयाः तिग्नुयातम् तिग्नुयात । तिग्नुयाम् तिग्नुयाव तिग्नुयाम । **८. आशीर्लिङ्** – तिग्यात् तिग्यास्ताम् तिग्यासुः । तिग्याः तिग्यास्तम् तिग्यास्त । तिग्यासम् तिग्यास्व तिग्यास्म । **९. लुङ्** – अतेगीत् अतेगिष्टाम् अतेगिषुः । अतेगीः अतेगिष्टम् अतेगिष्ट । अतेगिषम् अतेगिष्व अतेगिष्म । **१०. लृङ्** – अतेगिष्यत् अतेगिष्यताम् अतेगिष्यन् । अतेगिष्यः अतेगिष्यतम् अतेगिष्यत । अतेगिष्यम् अतेगिष्याव अतेगिष्याम ।

णिचि – तेगयति – ते, **सनि** – तितिगिषति/तितेगिषति, **यकि** – तिग्यते

१२६८. षघ – हिंसायाम् । सकर्म, सेट्, परस्मै ।

१. लट् – सघ्नोति सघ्नुतः सघ्नुवन्ति । सघ्नोषि सघ्नुथः सघ्नुथ । सघ्नोमि सघ्नुवः सघ्नुमः । **२. लिट्** – ससाघ सेघतुः सेघुः । सेघिथ सेघथुः सेघ । ससाघ, ससघ सेघिव सेघिम । **३. लुट्** – सघिता सघितारौ सघितारः । सघितासि सघितास्थः सघितास्थ । सघितास्मि सघितास्वः सघितास्मः । **४. लृट्** – सघिष्यति सघिष्यतः सघिष्यन्ति । सघिष्यसि सघिष्यथः सघिष्यथ । सघिष्यामि सघिष्यावः सघिष्यामः । **५. लोट्** – सघ्नोतु, सघ्नुतात् सघ्नुताम् सघ्नुवन्तु । सघ्नुहि, सघ्नुतात् सघ्नुतम् सघ्नुत । सघ्नवानि सघ्नवाव सघ्नवाम । **६. लङ्** – असघ्नोत् असघ्नुताम् असघ्नुवन् । असघ्नोः असघ्नुतम् असघ्नुत । असघ्नवम् असघ्नुव असघ्नुम । **७. विधिलिङ्** – सघ्नुयात् सघ्नुयाताम् सघ्नुयुः । सघ्नुयाः सघ्नुयातम् सघ्नुयात । सघ्नुयाम् सघ्नुयाव सघ्नुयाम । **८. आशीर्लिङ्** – सघ्यात् सघ्यास्ताम् सघ्यासुः । सघ्याः सघ्यास्तम् सघ्यास्त । सघ्यासम् सघ्यास्व सघ्यास्म । **९. लुङ्** – (i) असघीत् असघिष्टाम् असघिषुः । असघीः असघिष्टम् असघिष्ट । असघिषम् असघिष्व असघिष्म । (ii) असाघीत् असाघिष्टाम् असाघिषुः । असाघीः असाघिष्टम् असाघिष्ट । असाघिषम् असाघिष्व असाघिष्म । **१०. लृङ्** – असघिष्यत् असघिष्यताम् असघिष्यन् । असघिष्यः असघिष्यतम् असघिष्यत । असघिष्यम् असघिष्याव असघिष्याम ।

णिचि – सघयति – ते, **सनि** – सिसघिषति, **यकि** – सघ्यते

१२६९. ञि धृषा – प्रागल्भ्ये । अकर्म, सेट्, परस्मै ।

१. लट् – धृष्णोति धृष्णुतः धृष्णुवन्ति । धृष्णोषि धृष्णुथः धृष्णुथ । धृष्णोमि धृष्णुवः धृष्णुमः । **२. लिट्** – दधर्ष दधृषतुः दधृषुः । दधर्षिथ दधृषथुः दधृष । दधर्ष दधृषिव दधृषिम । **३. लुट्** – धर्षिता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धर्षितारौ धर्षितारः । धर्षितासि धर्षितास्थः धर्षितास्थ । धर्षितास्मि धर्षितास्वः धर्षितास्मः । **४. लृट्** - धर्षिष्यति धर्षिष्यतः धर्षिष्यन्ति । धर्षिष्यसि धर्षिष्यथः धर्षिष्यथ । धर्षिष्यामि धर्षिष्यावः धर्षिष्यामः । **५. लोट्** - धृष्णोतु, धृष्णुतात् धृष्णुताम् धृष्णुवन्तु । धृष्णु, धृष्णुतात् धृष्णुतम् धृष्णुत । धृष्णवानि धृष्णवाव धृष्णवाम । **६. लङ्** - अधृष्णोत् अधृष्णुताम् अधृष्णुवन् । अधृष्णोः अधृष्णुतम् अधृष्णुत । अधृष्णवम् अधृष्णुव अधृष्णुम । **७. विधिलिङ्** - धृष्णुयात् धृष्णुयाताम् धृष्णुयुः । धृष्णुयाः धृष्णुयातम् धृष्णुयात । धृष्णुयाम् धृष्णुयाव धृष्णुयाम । **८. आशीर्लिङ्** - धृष्यात् धृष्यास्ताम् धृष्यासुः । धृष्याः धृष्यास्तम् धृष्यास्त । धृष्यासम् धृष्यास्व धृष्यास्म । **९. लुङ्** - अधर्षीत् अधर्षिष्टाम् अधर्षिषुः । अधर्षीः अधर्षिष्टम् अधर्षिष्ट । अधर्षिषम् अधर्षिष्व अधर्षिष्म । **१०. लृङ्** - अधर्षिष्यत् अधर्षिष्यताम् अधर्षिष्यन् । अधर्षिष्यः अधर्षिष्यतम् अधर्षिष्यत । अधर्षिष्यम् अधर्षिष्याव अधर्षिष्याम ।

णिचि - धर्षयति - ते, **सनि** - दिधर्षिषति, **यकि** - धृष्यते

१२७०. दन्भु - दम्भने । सकर्म, सेट्, परस्मै । दम्भनं = लोकरञ्जनार्थं विहितकर्मानुष्ठानम् ।

१. लट् - दभ्नोति दभ्नुतः दभ्नुवन्ति । दभ्नोषि दभ्नुथः दभ्नुथ । दभ्नोमि दभ्नुवः दभ्नुमः । **२. लिट्** - ददम्भ देभतुः-ददम्भतुः[1] देभुः-ददम्भुः । ददम्भिथ देभथुः-ददम्भथुः देभ-ददम्भ । ददम्भ देभिव-ददम्भिव देभिम-ददम्भिम । **३. लुट्** - दम्भिता दम्भितारौ दम्भितारः । दम्भितासि दम्भितास्थः दम्भितास्थ । दम्भितास्मि दम्भितास्वः दम्भितास्मः । **४. लृट्** - दम्भिष्यति दम्भिष्यतः दम्भिष्यन्ति । दम्भिष्यसि दम्भिष्यथः दम्भिष्यथ । दम्भिष्यामि दम्भिष्यावः दम्भिष्यामः । **५. लोट्** - दभ्नोतु, दभ्नुतात् दभ्नुताम् दभ्नुवन्तु । दभ्नु, दभ्नुतात् दभ्नुतम् दभ्नुत । दभ्नवानि दभ्नवाव दभ्नवाम । **६. लङ्** - अदभ्नोत् अदभ्नुताम् अदभ्नुवन् । अदभ्नोः अदभ्नुतम् अदभ्नुत । अदभ्नवम् अदभ्नुव अदभ्नुम । **७. विधिलिङ्** - दभ्नुयात् दभ्नुयाताम् दभ्नुयुः । दभ्नुयाः दभ्नुयातम् दभ्नुयात । दभ्नुयाम् दभ्नुयाव दभ्नुयाम । **८. आशीर्लिङ्** - दभ्यात् दभ्यास्ताम् दभ्यासुः । दभ्याः दभ्यास्तम् दभ्यास्त । दभ्यासम् दभ्यास्व दभ्यास्म । **९. लुङ्** - अदम्भीत् अदम्भिष्टाम् अदम्भिषुः । अदम्भीः अदम्भिष्टम् अदम्भिष्ट । अदम्भिषम् अदम्भिष्व अदम्भिष्म । **१०. लृङ्** - अदम्भिष्यत् अदम्भिष्यताम् अदम्भिष्यन् । अदम्भिष्यः अदम्भिष्यतम् अदम्भिष्यत । अदम्भिष्यम् अदम्भिष्याव अदम्भिष्याम ।

णिचि - दम्भयति - ते, **सनि** - दिदम्भिषति/धिप्सति/धीप्सति[2], **यकि** - दभ्यते

१. 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तराश्रयणात् कित्त्वम् । इदं कित्त्वं पिदपिद्विषयमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु 'देभ देभिथ देभ' इति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु 'ददम्भ ददम्भिथ ददम्भ' इत्येव'' इति कौमुदी ।

२. 'सनीवन्त...' इति इड्विकल्पः । इडभावे 'दम्भ इच्च' इति इकारस्य इकारः ईकारश्च ।

१२७१. ऋधु - वृद्धौ । अकर्म[1], सेट्, परस्मै । 'तृप प्रीणने इत्येके' इति सिद्धान्तकौमुदी । देवोऽपि स्वादिषु पाठम् अनुमेने । वृत्तिकारन्यासादयः एतं पाठं न इच्छन्ति । विस्तरस्तु कृदन्तरूपमालायां द्रष्टव्यः । 'ऋध्नोतीति भवेद् वृद्धावृध्यतीत्यत्र तु श्यनि' (श्लो.१२२) इति देवः ।

१. लट् - ऋध्नोति ऋध्नुतः ऋध्नुवन्ति । ऋध्नोषि ऋध्नुथः ऋध्नुथ । ऋध्नोमि ऋध्नुवः ऋध्नुमः । **२. लिट्** - आनर्ध आनृधतुः आनृधुः । आनर्धिथ आनृधथुः आनृध । आनर्ध आनृधिव आनृधिम । **३. लुट्** - अर्धिता अर्धितारौ अर्धितारः । अर्धितासि अर्धितास्थः अर्धितास्थ । अर्धितास्मि अर्धितास्वः अर्धितास्मः । **४. लृट्** - अर्धिष्यति अर्धिष्यतः अर्धिष्यन्ति । अर्धिष्यसि अर्धिष्यथः अर्धिष्यथ । अर्धिष्यामि अर्धिष्यावः अर्धिष्यामः । **५. लोट्** - ऋध्नोतु, ऋध्नुतात् ऋध्नुताम् ऋध्नुवन्तु । ऋध्नुहि,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋध्नुतात् ऋध्नुतम् ऋध्नुत । ऋध्नवानि ऋध्नवाव ऋध्नवाम । **६. लङ्** – आर्ध्नोत् आर्ध्नुताम् आर्ध्नुवन् । आर्ध्नोः आर्ध्नुतम् आर्ध्नुत । आर्ध्नवम् आर्ध्नुव आर्ध्नुम । **७. विधिलिङ्** – ऋध्नुयात् ऋध्नुयाताम् ऋध्नुयुः । ऋध्नुयाः ऋध्नुयातम् ऋध्नुयात । ऋध्नुयाम् ऋध्नुयाव ऋध्नुयाम । **८. आशीर्लिङ्** – ऋध्यात् ऋध्यास्ताम् ऋध्यासुः । ऋध्याः ऋध्यास्तम् ऋध्यास्त । ऋध्यासम् ऋध्यास्व ऋध्यास्म । **९. लुङ्** – आर्धीत् आर्धिष्टाम् आर्धिषुः । आर्धीः आर्धिष्टम् आर्धिष्ट । आर्धिषम् आर्धिष्व आर्धिष्म । **१०. लृङ्** – आर्धिष्यत् आर्धिष्यताम् आर्धिष्यन् । आर्धिष्यः आर्धिष्यतम् आर्धिष्यत । आर्धिष्यम् आर्धिष्याव आर्धिष्याम ।

णिचि – अर्धयति – ते, **सनि** – अर्दिधिषति/ईर्त्सति[2], **यकि** – ऋध्यते

१. 'अयमकर्मकः सकर्मकश्च' इति मा.धा.वृत्तिः ।

२. 'सवीवन्तर्ध..' इत्यादिना इड्विकल्पः ।

१२७२. अह – व्याप्तौ । सकर्म, सेट्, परस्मै, (छान्दसः)

१. लट् – अह्नोति अह्नुतः अह्नुवन्ति । अह्नोषि अह्नुथः अह्नुथ । अह्नोमि अह्नुवः अह्नुमः । **२. लिट्** – आह आहतुः आहुः । आहिथ आहथुः आह । आह आहिव आहिम । **३. लुट्** – अहिता अहितारौ अहितारः । अहितासि अहितास्थः अहितास्थ । अहितास्मि अहितास्वः अहितास्मः । **४. लृट्** – अहिष्यति अहिष्यतः अहिष्यन्ति । अहिष्यसि अहिष्यथः अहिष्यथ । अहिष्यामि अहिष्यावः अहिष्यामः । **५. लोट्** – अह्नोतु, अह्नुतात् अह्नुताम् अह्नुवन्तु । अह्नुहि, अह्नुतात् अह्नुतम् अह्नुत । अह्नवानि अह्नवाव अह्नवाम । **६. लङ्** – आह्नोत् आह्नुताम् आह्नुवन् । आह्नोः आह्नुतम् आह्नुत । आह्नवम् आह्नुव आह्नुम । **७. विधिलिङ्** – अह्नुयात् अह्नुयाताम् अह्नुयुः । अह्नुयाः अह्नुयातम् अह्नुयात । अह्नुयाम् अह्नुयाव अह्नुयाम । **८. आशीर्लिङ्** – अह्यात् अह्यास्ताम् अह्यासुः । अह्याः अह्यास्तम् अह्यास्त । अह्यासम् अह्यास्व अह्यास्म । **९. लुङ्** – आहीत् आहिष्टाम् आहिषुः । आहीः आहिष्टम् आहिष्ट । आहिषम् आहिष्व आहिष्म । **१०. लृङ्** – आहिष्यत् आहिष्यताम् आहिष्यन् । आहिष्यः आहिष्यतम् आहिष्यत । आहिष्यम् आहिष्याव आहिष्याम ।

णिचि – आहयति – ते, **सनि** – अजिहिषति, **यकि** – अह्यते

१२७३. दघ – घातने पालने च । सकर्म, सेट्, परस्मै, (छान्दसः) ।

१. लट् – दघ्नोति दघ्नुतः दघ्नुवन्ति । दघ्नोषि दघ्नुथः दघ्नुथ । दघ्नोमि दघ्नुवः दघ्नुमः । **२. लिट्** – ददाघ देघतुः देघुः । देघिथ देघथुः देघ । ददाघ, ददघ देघिव देघिम । **३. लुट्** – दघिता दघितारौ दघितारः । दघितासि दघितास्थः दघितास्थ । दघितास्मि दघितास्वः दघितास्मः । **४. लृट्** – दघिष्यति दघिष्यतः दघिष्यन्ति । दघिष्यसि दघिष्यथः दघिष्यथ । दघिष्यामि दघिष्यावः दघिष्यामः । **५. लोट्** – दघ्नोतु, दघ्नुतात् दघ्नुताम् दघ्नुवन्तु । दघ्नुहि, दघ्नुतात् दघ्नुतम् दघ्नुत । दघ्नवानि दघ्नवाव दघ्नवाम । **६. लङ्** – अदघ्नोत् अदघ्नुताम् अदघ्नुवन् । अदघ्नोः अदघ्नुतम् अदघ्नुत । अदघ्नवम् अदघ्नुव अदघ्नुम । **७. विधिलिङ्** – दघ्नुयात् दघ्नुयाताम् दघ्नुयुः । दघ्नुयाः दघ्नुयातम् दघ्नुयात । दघ्नुयाम् दघ्नुयाव दघ्नुयाम । **८. आशीर्लिङ्** – दघ्यात् दघ्यास्ताम् दघ्यासुः । दघ्याः दघ्यास्तम् दघ्यास्त । दघ्यासम् दघ्यास्व दघ्यास्म । **९. लुङ्** – (i) अदघीत् अदघिष्टाम् अदघिषुः । अदघीः अदघिष्टम् अदघिष्ट । अदघिषम् अदघिष्व अदघिष्म । (ii) अदाघीत् अदाघिष्टाम् अदाघिषुः । अदाघीः अदाघिष्टम् अदाघिष्ट । अदाघिषम् अदाघिष्व अदाघिष्म । **१०. लृङ्** – अदघिष्यत् अदघिष्यताम् अदघिष्यन् । अदघिष्यः अदघिष्यतम् अदघिष्यत । अदघिष्यम् अदघिष्याव अदघिष्याम ।

णिचि – दाघयति – ते, **सनि** – दिदघिषति, **यकि** – दघ्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१२७४. चमु – भक्षणे । सकर्म, सेट्, परस्मै, (छान्दसः) ।

१. लट् – चम्नोति चम्नुतः चम्नुवन्ति । चम्नोषि चम्नुथः चम्नुथ । चम्नोमि चम्नुवः चम्नुमः । **२. लिट्** – चचाम चेमतुः चेमुः । चेमिथ चेमथुः चेम । चचाम, चचम चेमिव चेमिम । **३. लुट्** – चमिता चमितारौ चमितारः । चमितासि चमितास्थः चमितास्थ । चमितास्मि चमितास्वः चमितास्मः । **४. लृट्** – चमिष्यति चमिष्यतः चमिष्यन्ति । चमिष्यसि चमिष्यथः चमिष्यथ । चमिष्यामि चमिष्यावः चमिष्यामः । **५. लोट्** – चम्नोतु, चम्नुतात् चम्नुताम् चम्नुवन्तु । चम्नुहि, चम्नुतात् चम्नुतम् चम्नुत । चम्नवानि चम्नवाव चम्नवाम । **६. लङ्** – अचम्नोत् अचम्नुताम् अचम्नुवन् । अचम्नोः अचम्नुतम् अचम्नुत । अचम्नवम् अचम्नुव अचम्नुम । **७. विधिलिङ्** – चम्नुयात् चम्नुयाताम् चम्नुयुः । चम्नुयाः चम्नुयातम् चम्नुयात । चम्नुयाम् चम्नुयाव चम्नुयाम । **८. आशीर्लिङ्** – चम्यात् चम्यास्ताम् चम्यासुः । चम्याः चम्यास्तम् चम्यास्त । चम्यासम् चम्यास्व चम्यास्म । **९. लुङ्** – अचमीत्[१] अचमिष्टाम् अचमिषुः । अचमीः अचमिष्टम् अचमिष्ट । अचमिषम् अचमिष्व अचमिष्म । **१०. लृङ्** – अचमिष्यत् अचमिष्यताम् अचमिष्यन् । अचमिष्यः अचमिष्यतम् अचमिष्यत । अचमिष्यम् अचमिष्याव अचमिष्याम ।

णिचि – चामयति[२] – ते, **सनि** – चिचमिषति, **यकि** – चम्यते

१. 'ह्म्यन्तक्षणश्वसजागृ...' इति वृद्धिनिषेधः ।

२. अमन्तत्वेन प्राप्तस्य मित्त्वस्य 'न कम्यमिचमाम्' (ग.सू) इति निषेधात् उपधाह्रस्वः न ।

१२७५. रि – हिंसायाम् । सकर्म, अनिट्, परस्मै, (छान्दसः) ।

१. लट् – रिणोति रिणुतः रिण्वन्ति । रिणोषि रिणुथः रिणुथ । रिणोमि रिण्वः-रिणुवः रिण्मः रिणुमः । **२. लिट्** – रिराय रिर्यतुः रिर्युः । रिरयिथ-रिरेथ रिर्यथुः रिर्य । रिराय-रिरय रिर्यिव रिर्यिम । **३. लुट्** – रेता रेतारौ रेतारः । रेतासि रेतास्थः रेतास्थ । रेतास्मि रेतास्वः रेतास्मः । **४. लृट्** – रेष्यति रेष्यतः रेष्यन्ति । रेष्यसि रेष्यथः रेष्यथ । रेष्यामि रेष्यावः रेष्यामः । **५. लोट्** – रिणोतु, रिणुतात् रिणुताम् रिण्वन्तु । रिणु, रिणुतात् रिणुतम् रिणुत । रिणवानि रिणवाव रिणवाम । **६. लङ्** – अरिणोत् अरिणुताम् अरिण्वन् । अरिणोः अरिणुतम् अरिणुत । अरिणवम् अरिण्व-अरिणुव अरिण्म-अरिणुम । **७. विधिलिङ्** – रियात् रियाताम् रियुः । रियाः रियातम् रियात । रियाम् रियाव रियाम । **८. आशीर्लिङ्** – रीयात् रीयास्ताम् रीयासुः । रीयाः रीयास्तम् रीयास्त । रीयासम् रीयास्व रीयास्म । **९. लुङ्** – अरैषीत् अरैष्टाम् अरैषुः । अरैषीः अरैष्टम् अरैष्ट । अरैषम् अरैष्व अरैष्म । **१०. लृङ्** – अरेष्यत् अरेष्यताम् अरेष्यन् । अरेष्यः अरेष्यतम् अरेष्यत । अरेष्यम् अरेष्याव अरेष्याम ।

णिचि – राययति – ते, **सनि** – रिरीषति, **यकि** – रीयते ।

१२७६. क्षि – हिंसायाम् । सकर्म, अनिट्, परस्मै, (छान्दसः[१]) । अयं भाषायामपि इति आत्रेयमैत्रेयादयः । अतः एव 'न तद्यशः शस्त्रभृतां क्षिणोति' (रघु.) 'पञ्चबाणः क्षिणोति' (शाकु.) इत्यादयः प्रयोगाः सङ्गच्छन्ते । शाकटायनादयः तु छान्दसत्वमेवाहुः । तत्र 'चिरिणोति रिणोत्येवं क्षिणोति जिरिणोति च । दाश्नोति च दृणोत्याहुः पदानि च्छान्दसानि षट्' इति भट्टमल्लवचनम् (आख्यातचन्द्रिका – १.७७) प्रमाणम् । 'क्षये क्षयति, हिंसायां क्षिणातीति षितो भवेत् । निवासगत्योः क्षियति, क्षिणोत्यावगुणे क्षिणोः' (श्लो. १२-१३) इति देवः । 'रि'धातुं किञ्चित् परिवर्त्य 'क्षि'धातुं संयोज्य 'ऋक्षि' इति अजादिमिदितं केचन पठन्ति । 'ऋक्षीत्येक एव अजादिरित्यन्ये' इति सिद्धान्तकौमुदी । तदा ऋक्षिणोति ।

१. लट् – क्षिणोति क्षिणुतः क्षिण्वन्ति । क्षिणोषि क्षिणुथः क्षिणुथ । क्षिणोमि क्षिण्वः-क्षिणुवः क्षिण्मः-क्षिणुमः । **२. लिट्** – चिक्षाय चिक्षियतुः चिक्षियुः । चिक्षयिथ-चिक्षेथ चिक्षियथुः चिक्षिय । चिक्षाय-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चिक्षय चिक्षियिव चिक्षियिम । **३. लुट्** – क्षेता क्षेतारौ क्षेतारः । क्षेतासि क्षेतास्थः क्षेतास्थ । क्षेतास्मि क्षेतास्वः क्षेतास्मः । **४. लृट्** – क्षेष्यति क्षेष्यतः क्षेष्यन्ति । क्षेष्यसि क्षेष्यथः क्षेष्यथ । क्षेष्यामि क्षेष्यावः क्षेष्यामः । **५. लोट्** – क्षिणोतु, क्षिणुतात् क्षिणुताम् क्षिण्वन्तु । क्षिणु, क्षिणुतात् क्षिणुतम् क्षिणुत । क्षिणवानि क्षिणवाव क्षिणवाम । **६. लङ्** – अक्षिणोत् अक्षिणुताम् अक्षिण्वन् । अक्षिणोः अक्षिणुतम् अक्षिणुत । अक्षिणवम् अक्षिण्व-अक्षिणुव अक्षिण्म-अक्षिणुम । **७. विधिलिङ्** – क्षियात् क्षियाताम् क्षियुः । क्षियाः क्षियातम् क्षियात । क्षियाम् क्षियाव क्षियाम । **८. आशीर्लिङ्** – क्षीयात् क्षीयास्ताम् क्षीयासुः । क्षीयाः क्षीयास्तम् क्षीयास्त । क्षीयासम् क्षीयास्व क्षीयास्म । **९. लुङ्** – अक्षैषीत् अक्षैष्टाम् अक्षैषुः । अक्षैषीः अक्षैष्टम् अक्षैष्ट । अक्षैषम् अक्षैष्व अक्षैष्म । **१०. लृङ्** – अक्षेष्यत् अक्षेष्यताम् अक्षेष्यन् । अक्षेष्यः अक्षेष्यतम् अक्षेष्यत । अक्षेष्यम् अक्षेष्याव अक्षेष्याम ।

णिचि – क्षाययति – ते, **सनि** – चिक्षीषति, **यकि** – क्षीयते

१२७७. **चिरि – हिंसायाम् ।** सकर्म, सेट्, परस्मै, । अयं धातुश्छान्दसः । भाषायामपीत्येके । द्व्यच्कोऽयं धातुः । इकारः न इत्संज्ञकः । अत एव, 'दरिद्राजागृदीधीङामनेकाच्त्वं चिरेर्जिरेः । अदन्तोर्णोतिवेवीङां स्मर्यते णेस्तथोलडेः' इत्यभियुक्तोक्तिः सङ्गच्छते ।

१. लट् – चिरिणोति चिरिणुतः चिरिण्वन्ति । चिरिणोषि चिरिणुथः चिरिणुथ । चिरिणोमि चिरिण्वः-चिरिणुवः चिरिण्मः-चिरिणुमः । **२. लिट्** – (i) चिचराञ्चकार चिचराञ्चक्रतुः चिचराञ्चक्रुः । चिचराञ्चकर्थ चिचराञ्चक्रथुः चिचराञ्चक्र । चिचराञ्चकार/चिचराञ्चकर चिचराञ्चकृव चिचराञ्चकृम । (ii) चिचराम्बभूव चिचराम्बभूवतुः चिचराम्बभूवुः । चिचराम्बभूविथ चिचराम्बभूवथुः चिचराम्बभूव । चिचराम्बभूव चिचराम्बभूविव चिचराम्बभूविम । (iii) चिचरामास चिचरामासतुः चिचरामासुः । चिचरामासिथ चिचरामासथुः चिचरामास । चिचरामास चिचरामासिव चिचरामासिम । **३. लुट्** – चिरयिता चिरयितारौ चिरयितारः । चिरयितासि चिरयितास्थः चिरयितास्थ । चिरयितास्मि चिरयितास्वः चिरयितास्मः । **४. लृट्** – चिरयिष्यति चिरयिष्यतः चिरयिष्यन्ति । चिरयिष्यसि चिरयिष्यथः चिरयिष्यथ । चिरयिष्यामि चिरयिष्यावः चिरयिष्यामः । **५. लोट्** – चिरिणोतु, चिरिणुतात् चिरिणुताम् चिरिण्वन्तु । चिरिणु, चिरिणुतात् चिरिणुतम् चिरिणुत । चिरिणवानि चिरिणवाव चिरिणवाम । **६. लङ्** – अचिरिणोत् अचिरिणुताम् अचिरिण्वन् । अचिरिणोः अचिरिणुतम् अचिरिणुत । अचिरिणवम् अचिरिण्व-अचिरिणुव अचिरिण्म-अचिरिणुम । **७. विधिलिङ्** – चिरिणुयात् चिरिणुयाताम् चिरिणुयुः । चिरिणुयाः चिरिणुयातम् चिरिणुयात । चिरिणुयाम् चिरिणुयाव चिरिणुयाम । **८. आशीर्लिङ्** – चिरीयात् चिरीयास्ताम् चिरीयासुः । चिरीयाः चिरीयास्तम् चिरीयास्त । चिरीयासम् चिरीयास्व चिरीयास्म । **९. लुङ्** – अचिरायीत् अचिरायिष्टाम् अचिरायिषुः । अचिरायीः अचिरायिष्टम् अचिरायिष्ट । अचिरायिषम् अचिरायिष्व अचिरायिष्म । **१०. लृङ्** – अचिरयिष्यत् अचिरयिष्यताम् अचिरयिष्यन् । अचिरयिष्यः अचिरयिष्यतम् अचिरयिष्यत । अचिरयिष्यम् अचिरयिष्याव अचिरयिष्याम ।

णिचि – रेफयति-ते, **सनि** – रिरिफिषति/रिरेफिषति, **यकि** – रिफ्यते

१३०७. तृप – तृप्तौ । सकर्म, सेट्, परस्मै । अयमपि प्रथमान्तः इति केचित् ।

१. लट् – तृपति तृपतः तृपन्ति । तृपसि तृपथः तृपथ । तृपामि तृपावः तृपामः । **२. लिट्** – ततर्प ततृपतुः ततृपुः । ततर्पिथ ततृपथुः ततृप । ततर्प ततृपिव ततृपिम । **३. लुट्** – तर्पिता तर्पितारौ तर्पितारः । तर्पितासि तर्पितास्थः तर्पितास्थ । तर्पितास्मि तर्पितास्वः तर्पितास्मः । **४. लृट्** – तर्पिष्यति तर्पिष्यतः तर्पिष्यन्ति । तर्पिष्यसि तर्पिष्यथः तर्पिष्यथ । तर्पिष्यामि तर्पिष्यावः तर्पिष्यामः । **५. लोट्** – तृपतु, तृपतात् तृपताम् तृपन्तु । तृप, तृपतात् तृपतम् तृपत । तृपाणि तृपाव तृपाम । **६. लङ्** – अतृपत् अतृपताम् अतृपन् । अतृपः अतृपतम् अतृपत । अतृपम् अतृपाव अतृपाम । **७. विधिलिङ्** – तृपेत् तृपेताम् तृपेयुः । तृपेः तृपेतम् तृपेत । तृपेयम् तृपेव तृपेम । **८. आशीर्लिङ्** – तृप्यात् तृप्यास्ताम् तृप्यासुः । तृप्याः तृप्यास्तम् तृप्यास्त । तृप्यासम् तृप्यास्व तृप्यास्म । **९. लुङ्** – अतर्पीत् अतर्पिष्टाम् अतर्पिषुः । अतर्पीः अतर्पिष्टम् अतर्पिष्ट । अतर्पिषम् अतर्पिष्व अतर्पिष्म । **१०. लृङ्** – अतर्पिष्यत् अतर्पिष्यताम् अतर्पिष्यन् । अतर्पिष्यः अतर्पिष्यतम् अतर्पिष्यत । अतर्पिष्यम् अतर्पिष्याव अतर्पिष्याम ।

णिचि – तर्पयति-ते, **सनि** – तितर्पिषति, **यकि** – तृप्यते ।

१३०८. तृम्फ – तृप्तौ । अकर्म, सेट्, परस्मै । (तृम्फादिः[1]) 'प्रीणने इति द्रुमे' इति धा.का. व्याख्यायाम् । (२.२७)

१. लट् – तृम्फति[2] तृम्फतः तृम्फन्ति । तृम्फसि तृम्फथः तृम्फथ । तृम्फामि तृम्फावः तृम्फामः । **२. लिट्** – ततृम्फ ततृम्फतुः ततृम्फुः । ततृम्फिथ ततृम्फथुः ततृम्फ । ततृम्फ, ततृम्फिव ततृम्फिम । **३. लुट्** – तृम्फिता तृम्फितारौ तृम्फितारः । तृम्फितासि तृम्फितास्थः तृम्फितास्थ । तृम्फितास्मि तृम्फितास्वः तृम्फितास्मः । **४. लृट्** – तृम्फिष्यति तृम्फिष्यतः तृम्फिष्यन्ति । तृम्फिष्यसि तृम्फिष्यथः तृम्फिष्यथ । तृम्फिष्यामि तृम्फिष्यावः तृम्फिष्यामः । **५. लोट्** – तृम्फतु, तृम्फतात् तृम्फताम् तृम्फन्तु । तृम्फ, तृम्फतात् तृम्फतम् तृम्फत । तृम्फाणि तृम्फाव तृम्फाम । **६. लङ्** – अतृम्फत् अतृम्फताम् अतृम्फन् । अतृम्फः अतृम्फतम् अतृम्फत । अतृम्फम् अतृम्फाव अतृम्फाम । **७. विधिलिङ्** – तृम्फेत् तृम्फेताम् तृम्फेयुः । तृम्फेः तृम्फेतम् तृम्फेत । तृम्फेयम् तृम्फेव तृम्फेम । **८. आशीर्लिङ्** – तृफ्यात्[3] तृफ्यास्ताम् तृफ्यासुः । तृफ्याः तृफ्यास्तम् तृफ्यास्त । तृफ्यासम् तृफ्यास्व तृफ्यास्म । **९. लुङ्** – अतृम्फीत् अतृम्फिष्टाम् अतृम्फिषुः । अतृम्फीः अतृम्फिष्टम् अतृम्फिष्ट । अतृम्फिषम् अतृम्फिष्व अतृम्फिष्म । **१०. लृङ्** – अतृम्फिष्यत् अतृम्फिष्यताम् अतृम्फिष्यन् । अतृम्फिष्यः अतृम्फिष्यतम् अतृम्फिष्यत । अतृम्फिष्यम् अतृम्फिष्याव अतृम्फिष्याम ।

णिचि – तृम्फयति-ते, **सनि** – तितृम्फिषति, **यकि** – तृफ्यते

१. 'तृम्फादिः इत्यत्र आदिशब्दः प्रकारे । तेन येऽत्र नकारानुषक्ताः ते तृम्फादयः' इति सिद्धान्तकौमुदी ।

२. शस्य कित्त्वात् 'अनिदिताम्...' (६.४.२४) इति धातोः उपधाभूतस्य नकारस्य लोपे 'शे तृम्फादीनां नुम्वाच्यः' (वा. ७.१.५९) इति नुम् । एवं तृम्फादौ सर्वत्र ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३. यासुटः कित्त्वात् नस्य लोपः ।

१३०९. तुप – हिंसायाम् । सकर्म, सेट्, परस्मै । 'शपि तोपति हिंसायां तत्रैव तुपतीति शे' (श्लो. १३८) इति देवः ।

१. लट् – तुपति तुपतः तुपन्ति । तुपसि तुपथः तुपथ । तुपामि तुपावः तुपामः । **२. लिट्** – तुतोप तुतुपतुः तुतुपुः । तुतोपिथ तुतुपथुः तुतुप । तुतोप तुतुपिव तुतुपिम । **३. लुट्** – तोपिता तोपितारौ तोपितारः । तोपितासि तोपितास्थः तोपितास्थ । तोपितास्मि तोपितास्वः तोपितास्मः । **४. लृट्** – तोपिष्यति तोपिष्यतः तोपिष्यन्ति । तोपिष्यसि तोपिष्यथः तोपिष्यथ । तोपिष्यामि तोपिष्यावः तोपिष्यामः । **५. लोट्** – तुपतु, तुपतात् तुपताम् तुपन्तु । तुप, तुपतात् तुपतम् तुपत । तुपानि तुपाव तुपाम । **६. लङ्** – अतुपत् अतुपताम् अतुपन् । अतुपः अतुपतम् अतुपत । अतुपम् अतुपाव अतुपाम । **७. विधिलिङ्** – तुपेत् तुपेताम् तुपेयुः । तुपेः तुपेतम् तुपेत । तुपेयम् तुपेव तुपेम । **८. आशीर्लिङ्** – तुप्यात् तुप्यास्ताम् तुप्यासुः । तुप्याः तुप्यास्तम् तुप्यास्त । तुप्यासम् तुप्यास्व तुप्यास्म । **९. लुङ्** – अतोपीत् अतोपिष्टाम् अतोपिषुः । अतोपीः अतोपिष्टम् अतोपिष्ट । अतोपिषम् अतोपिष्व अतोपिष्म । **१०. लृङ्** – अतोपिष्यत् अतोपिष्यताम् अतोपिष्यन् । अतोपिष्यः अतोपिष्यतम् अतोपिष्यत । अतोपिष्यम् अतोपिष्याव अतोपिष्याम ।

णिचि – तोपयति-ते, **सनि** – तुतुपिषति/तुतोपिषति, **यकि** – तुप्यते ।

१३१०. तुम्प – हिंसायाम् । सकर्म, सेट्, परस्मै, (तृम्फादिः) । 'शपि तोपति हिंसायां तत्रैव तुपतीति शे । तत्रैव शशपोस्तुम्पेद् अर्दने तुम्पयेण्णिचि' (श्लो. १३८-९) इति देवः ।

१. लट् – तुम्पति तुम्पतः तुम्पन्ति । तुम्पसि तुम्पथः तुम्पथ । तुम्पामि तुम्पावः तुम्पामः । **२. लिट्** – तुतुम्प तुतुम्पतुः तुतुम्पुः । तुतुम्पिथ तुतुम्पथुः तुतुम्प । तुतुम्प, तुतुम्पिव तुतुम्पिम । **३. लुट्** – तुम्पिता तुम्पितारौ तुम्पितारः । तुम्पितासि तुम्पितास्थः तुम्पितास्थ । तुम्पितास्मि तुम्पितास्वः तुम्पितास्मः । **४. लृट्** – तुम्पिष्यति तुम्पिष्यतः तुम्पिष्यन्ति । तुम्पिष्यसि तुम्पिष्यथः तुम्पिष्यथ । तुम्पिष्यामि तुम्पिष्यावः तुम्पिष्यामः । **५. लोट्** – तुम्पतु, तुम्पतात् तुम्पताम् तुम्पन्तु । तुम्प, तुम्पतात् तुम्पतम् तुम्पत । तुम्पानि तुम्पाव तुम्पाम । **६. लङ्** – अतुम्पत् अतुम्पताम् अतुम्पन् । अतुम्पः अतुम्पतम् अतुम्पत । अतुम्पम् अतुम्पाव अतुम्पाम । **७. विधिलिङ्** – तुम्पेत् तुम्पेताम् तुम्पेयुः । तुम्पेः तुम्पेतम् तुम्पेत । तुम्पेयम् तुम्पेव तुम्पेम । **८. आशीर्लिङ्** – तुप्यात् तुप्यास्ताम् तुप्यासुः । तुप्याः तुप्यास्तम् तुप्यास्त । तुप्यासम् तुप्यास्व तुप्यास्म । **९. लुङ्** – अतुम्पीत् अतुम्पिष्टाम् अतुम्पिषुः । अतुम्पीः अतुम्पिष्टम् अतुम्पिष्ट । अतुम्पिषम् अतुम्पिष्व अतुम्पिष्म । **१०. लृङ्** – अतुम्पिष्यत् अतुम्पिष्यताम् अतुम्पिष्यन् । अतुम्पिष्यः अतुम्पिष्यतम् अतुम्पिष्यंत । अतुम्पिष्यम् अतुम्पिष्याव अतुम्पिष्याम ।

णिचि – तुम्पयति – ते, **सनि** – तुतुम्पिषति, **यकि** – तुप्यते ।

१३११. तुफ – हिंसायाम् । सकर्म, सेट्, परस्मै ।

१. लट् – तुफति तुफतः तुफन्ति । तुफसि तुफथः तुफथ । तुफामि तुफावः तुफामः । **२. लिट्** – तुतोफ तुतुफतुः तुतुफुः । तुतोफिथ तुतुफथुः तुतुफ । तुतोफ तुतुफिव तुतुफिम । **३. लुट्** – तोफिता तोफितारौ तोफितारः । तोफितासि तोफितास्थः तोफितास्थ । तोफितास्मि तोफितास्वः तोफितास्मः । **४. लृट्** – तोफिष्यति तोफिष्यतः तोफिष्यन्ति । तोफिष्यसि तोफिष्यथः तोफिष्यथ । तोफिष्यामि तोफिष्यावः तोफिष्यामः । **५. लोट्** – तुफतु, तुफतात् तुफताम् तुफन्तु । तुफ, तुफतात् तुफतम् तुफत । तुफानि तुफाव तुफाम । **६. लङ्** – अतुफत् अतुफताम् अतुफन् । अतुफः अतुफतम् अतुफत । अतुफम् अतुफाव अतुफाम । **७. विधिलिङ्** – तुफेत् तुफेताम् तुफेयुः । तुफेः तुफेतम् तुफेत । तुफेयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तुफेव तुफेम । **८. आशीर्लिङ्** – तुफ्यात् तुफ्यास्ताम् तुफ्यासुः । तुफ्याः तुफ्यास्तम् तुफ्यास्त । तुफ्यासम् तुफ्यास्व तुफ्यास्म । **९. लुङ्** – अतोफीत् अतोफिष्टाम् अतोफिषुः । अतोफीः अतोफिष्टम् अतोफिष्ट । अतोफिषम् अतोफिष्व अतोफिष्म । **१०. लृङ्** – अतोफिष्यत् अतोफिष्यताम् अतोफिष्यन् । अतोफिष्यः अतोफिष्यतम् अतोफिष्यत । अतोफिष्यम् अतोफिष्याव अतोफिष्याम ।

णिचि – तोफयति-ते, सनि तुतुफिषति/तुतोफिषति, यकि – तुफ्यते ।

१३१२. तुम्फ – हिंसायाम् । सकर्म, सेट्, परस्मै, (तृम्फादिः)

१. लट् – तुम्फति तुम्फतः तुम्फन्ति । तुम्फसि तुम्फथः तुम्फथ । तुम्फामि तुम्फावः तुम्फामः । **२. लिट्** – तुतुम्फ तुतुम्फतुः तुतुम्फुः । तुतुम्फिथ तुतुम्फथुः तुतुम्फ । तुतुम्फ, तुतुम्फिव तुतुम्फिम । **३. लुट्** – तुम्फिता तुम्फितारौ तुम्फितारः । तुम्फितासि तुम्फितास्थः तुम्फितास्थ । तुम्फितास्मि तुम्फितास्वः तुम्फितास्मः । **४. लृट्** – तुम्फिष्यति तुम्फिष्यतः तुम्फिष्यन्ति । तुम्फिष्यसि तुम्फिष्यथः तुम्फिष्यथ । तुम्फिष्यामि तुम्फिष्यावः तुम्फिष्यामः । **५. लोट्** – तुम्फतु, तुम्फतात् तुम्फताम् तुम्फन्तु । तुम्फ, तुम्फतात् तुम्फतम् तुम्फत । तुम्फानि तुम्फाव तुम्फाम । **६. लङ्** – अतुम्फत् अतुम्फताम् अतुम्फन् । अतुम्फः अतुम्फतम् अतुम्फत । अतुम्फम् अतुम्फाव अतुम्फाम । **७. विधिलिङ्** – तुम्फेत् तुम्फेताम् तुम्फेयुः । तुम्फेः तुम्फेतम् तुम्फेत । तुम्फेयम् तुम्फेव तुम्फेम । **८. आशीर्लिङ्** – तुफ्यात्[1] तुफ्यास्ताम् तुफ्यासुः । तुफ्याः तुफ्यास्तम् तुफ्यास्त । तुफ्यासम् तुफ्यास्व तुफ्यास्म । **९. लुङ्** – अतुम्फीत् अतुम्फिष्टाम् अतुम्फिषुः । अतुम्फीः अतुम्फिष्टम् अतुम्फिष्ट । अतुम्फिषम् अतुम्फिष्व अतुम्फिष्म । **१०. लृङ्** – अतुम्फिष्यत् अतुम्फिष्यताम् अतुम्फिष्यन् । अतुम्फिष्यः अतुम्फिष्यतम् अतुम्फिष्यत । अतुम्फिष्यम् अतुम्फिष्याव अतुम्फिष्याम ।

णिचि – तुम्फयति-ते, **सनि** – तुतुम्फिषति, **यकि** – तुफ्यते ।

१. यासुटः कित्त्वात् नस्य लोपः ।

१३१३. दृप – उत्क्लेशे । अकर्म, सेट्, परस्मै । 'दृफ' इति द्वितीयान्तोऽयमित्येके ।

१. लट् – दृपति दृपतः दृपन्ति । दृपसि दृपथः दृपथ । दृपामि दृपावः दृपामः । **२. लिट्** – ददर्प ददृपतुः ददृपुः । ददर्पिथ ददृपथुः ददृप । ददर्प ददृपिव ददृपिम । **३. लुट्** – दर्पिता दर्पितारौ दर्पितारः । दर्पितासि दर्पितास्थः दर्पितास्थ । दर्पितास्मि दर्पितास्वः दर्पितास्मः । **४. लृट्** – दर्पिष्यति दर्पिष्यतः दर्पिष्यन्ति । दर्पिष्यसि दर्पिष्यथः दर्पिष्यथ । दर्पिष्यामि दर्पिष्यावः दर्पिष्यामः । **५. लोट्** – दृपतु, दृपतात् दृपताम् दृपन्तु । दृप, दृपतात् दृपतम् दृपत । दृपाणि दृपाव दृपाम । **६. लङ्** – अदृपत् अदृपताम् अदृपन् । अदृपः अदृपतम् अदृपत । अदृपम् अदृपाव अदृपाम । **७. विधिलिङ्** – दृपेत् दृपेताम् दृपेयुः । दृपेः दृपेतम् दृपेत । दृपेयम् दृपेव दृपेम । **८. आशीर्लिङ्** – दृप्यात् दृप्यास्ताम् दृप्यासुः । दृप्याः दृप्यास्तम् दृप्यास्त । दृप्यासम् दृप्यास्व दृप्यास्म । **९. लुङ्** – अदर्पीत् अदर्पिष्टाम् अदर्पिषुः । अदर्पीः अदर्पिष्टम् अदर्पिष्ट । अदर्पिषम् अदर्पिष्व अदर्पिष्म । **१०. लृङ्** – अदर्पिष्यत् अदर्पिष्यताम् अदर्पिष्यन् । अदर्पिष्यः अदर्पिष्यतम् अदर्पिष्यत । अदर्पिष्यम् अदर्पिष्याव अदर्पिष्याम ।

णिचि – दर्पयति-ते, **सनि** – दिदृपिषति, **यकि** – दृप्यते

१३१४. दृम्फ – उत्क्लेशे । अकर्म, सेट्, परस्मै । (तृम्फादिः) ।

१. लट् – दृम्फति दृम्फतः दृम्फन्ति । दृम्फसि दृम्फथः दृम्फथ । दृम्फामि दृम्फावः दृम्फामः । **२. लिट्** – ददृम्फ ददृम्फतुः ददृम्फुः । ददृम्फिथ ददृम्फथुः ददृम्फ । ददृम्फ, ददृम्फिव ददृम्फिम । **३. लुट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृम्फिता दृम्फितारौ दृम्फितारः । दृम्फितासि दृम्फितास्थः दृम्फितास्थ । दृम्फितास्मि दृम्फितास्वः दृम्फितास्मः । **४. लृट्** – दृम्फिष्यति दृम्फिष्यतः दृम्फिष्यन्ति । दृम्फिष्यसि दृम्फिष्यथः दृम्फिष्यथ । दृम्फिष्यामि दृम्फिष्यावः दृम्फिष्यामः । **५. लोट्** – दृम्फतु, दृम्फतात् दृम्फताम् दृम्फन्तु । दृम्फ, दृम्फतात् दृम्फतम् दृम्फत । दृम्फानि दृम्फाव दृम्फाम । **६. लङ्** – अदृम्फत् अदृम्फताम् अदृम्फन् । अदृम्फः अदृम्फतम् अदृम्फत । अदृम्फम् अदृम्फाव अदृम्फाम । **७. विधिलिङ्** – दृम्फेत् दृम्फेताम् दृम्फेयुः । दृम्फेः दृम्फेतम् दृम्फेत । दृम्फेयम् दृम्फेव दृम्फेम । **८. आशीर्लिङ्** – दृफ्यात्[1] दृफ्यास्ताम् दृफ्यासुः । दृफ्याः दृफ्यास्तम् दृफ्यास्त । दृफ्यासम् दृफ्यास्व दृफ्यास्म । **९. लुङ्** – अदृम्फीत् अदृम्फिष्टाम् अदृम्फिषुः । अदृम्फीः अदृम्फिष्टम् अदृम्फिष्ट । अदृम्फिषम् अदृम्फिष्व अदृम्फिष्म । **१०. लृङ्** – अदृम्फिष्यत् अदृम्फिष्यताम् अदृम्फिष्यन् । अदृम्फिष्यः अदृम्फिष्यतम् अदृम्फिष्यत । अदृम्फिष्यम् अदृम्फिष्याव अदृम्फिष्याम ।

णिचि – दृम्फयति-ते, **सनि** – दिदृम्फिषति, **यकि** – दृफ्यते ।

१. यासुटः कित्त्वात् नस्य लोपः ।

१३१५. ऋफ – हिंसायाम् । सकर्म, सेट्, परस्मै ।

१. लट् – ऋफति ऋफतः ऋफन्ति । ऋफसि ऋफथः ऋफथ । ऋफामि ऋफावः ऋफामः । **२. लिट्** – आनर्फ आनृफतुः आनृफुः । आनर्फिथ आनृफथुः आनृफ । आनर्फ आनृफिव आनृफिम । **३. लुट्** – अर्फिता अर्फितारौ अर्फितारः । अर्फितासि अर्फितास्थः अर्फितास्थ । अर्फितास्मि अर्फितास्वः अर्फितास्मः । **४. लृट्** – अर्फिष्यति अर्फिष्यतः अर्फिष्यन्ति । अर्फिष्यसि अर्फिष्यथः अर्फिष्यथ । अर्फिष्यामि अर्फिष्यावः अर्फिष्यामः । **५. लोट्** – ऋफतु, ऋफतात् ऋफताम् ऋफन्तु । ऋफ, ऋफतात् ऋफतम् ऋफत । ऋफाणि ऋफाव ऋफाम । **६. लङ्** – आर्फत् आर्फताम् आर्फन् । आर्फः आर्फतम् आर्फत । आर्फम् आर्फाव आर्फाम । **७. विधिलिङ्** – ऋफेत् ऋफेताम् ऋफेयुः । ऋफेः ऋफेतम् ऋफेत । ऋफेयम् ऋफेव ऋफेम । **८. आशीर्लिङ्** – ऋफ्यात् ऋफ्यास्ताम् ऋफ्यासुः । ऋफ्याः ऋफ्यास्तम् ऋफ्यास्त । ऋफ्यासम् ऋफ्यास्व ऋफ्यास्म । **९. लुङ्** – आर्फीत् आर्फिष्टाम् आर्फिषुः । आर्फीः आर्फिष्टम् आर्फिष्ट । आर्फिषम् आर्फिष्व आर्फिष्म । **१०. लृङ्** – आर्फिष्यत् आर्फिष्यताम् आर्फिष्यन् । आर्फिष्यः आर्फिष्यतम् आर्फिष्यत । आर्फिष्यम् आर्फिष्याव आर्फिष्याम ।

णिचि – आर्फयति-ते, **सनि** – अर्पिफिषति, **यकि** – ऋफ्यते

१३१६. ऋम्फ – हिंसायाम् । सकर्म, सेट्, परस्मै । (तृम्फादिः) ।

१. लट् – ऋम्फति ऋम्फतः ऋम्फन्ति । ऋम्फसि ऋम्फथः ऋम्फथ । ऋम्फामि ऋम्फावः ऋम्फामः ।

२. लिट् – (i) ऋम्फाञ्चकार ऋम्फाञ्चक्रतुः ऋम्फाञ्चक्रुः । ऋम्फाञ्चकर्थ ऋम्फाञ्चक्रथुः ऋम्फाञ्चक्र । ऋम्फाञ्चकार/ऋम्फाञ्चकर ऋम्फाञ्चकृव ऋम्फाञ्चकृम । (ii) ऋम्फाम्बभूव ऋम्फाम्बभूवतुः ऋम्फाम्बभूवुः । ऋम्फाम्बभूविथ ऋम्फाम्बभूवथुः ऋम्फाम्बभूव । ऋम्फाम्बभूव ऋम्फाम्बभूविव ऋम्फाम्बभूविम । (iii) ऋम्फामास ऋम्फामासतुः ऋम्फामासुः । ऋम्फामासिथ ऋम्फामासथुः ऋम्फामास । ऋम्फामास ऋम्फामासिव ऋम्फामासिम । **३. लुट्** – ऋम्फिता ऋम्फितारौ ऋम्फितारः । ऋम्फितासि ऋम्फितास्थः ऋम्फितास्थ । ऋम्फितास्मि ऋम्फितास्वः ऋम्फितास्मः । **४. लृट्** – ऋम्फिष्यति ऋम्फिष्यतः ऋम्फिष्यन्ति । ऋम्फिष्यसि ऋम्फिष्यथः ऋम्फिष्यथ । ऋम्फिष्यामि ऋम्फिष्यावः ऋम्फिष्यामः । **५. लोट्** – ऋम्फतु, ऋम्फतात् ऋम्फताम् ऋम्फन्तु । ऋम्फ, ऋम्फतात् ऋम्फतम् ऋम्फत । ऋम्फाणि ऋम्फाव ऋम्फाम । **६. लङ्** – आर्म्फत् आर्म्फताम् आर्म्फन् । आर्म्फः आर्म्फतम् आर्म्फत । आर्म्फम् आर्म्फाव आर्म्फाम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

७. विधिलिङ् – ऋम्फेत् ऋम्फेताम् ऋम्फेयुः । ऋम्फेः ऋम्फेतम् ऋम्फेत । ऋम्फेयम् ऋम्फेव ऋम्फेम ।
८. आशीर्लिङ् – ऋफ्यात् ऋफ्यास्ताम् ऋफ्यासुः । ऋफ्याः ऋफ्यास्तम् ऋफ्यास्त । ऋफ्यासम् ऋफ्यास्व ऋफ्यास्म । **९. लुङ्** – आर्म्फीत् आर्म्फिष्टाम् आर्म्फिषुः । आर्म्फीः आर्म्फिष्टम् आर्म्फिष्ट । आर्म्फिषम् आर्म्फिष्व आर्म्फिष्म । **१०. लृङ्** – आर्म्फिष्यत् आर्म्फिष्यताम् आर्म्फिष्यन् । आर्म्फिष्यः आर्म्फिष्यतम् आर्म्फिष्यत । आर्म्फिष्यम् आर्म्फिष्याव आर्म्फिष्याम ।

णिचि – ऋम्फयति-ते, **सनि** – ऋम्पिफिषति, **यकि** – ऋफ्यते ।

१३१७. गुफ – ग्रन्थे । सकर्म, सेट्, परस्मै,

१. लट् – गुफति गुफतः गुफन्ति । गुफसि गुफथः गुफथ । गुम्फामि गुम्फावः गुम्फामः । **२. लिट्** – जुगोफ जुगुफतुः जुगुफुः । जुगोफिथ जुगुफथुः जुगुफ । जुगोफ जुगुफिव जुगुफिम । **३. लुट्** – गोफिता गोफितारौ गोफितारः । गोफितासि गोफितास्थः गोफितास्थ । गोफितास्मि गोफितास्वः गोफितास्मः । **४. लृट्** – गोफिष्यति गोफिष्यतः गोफिष्यन्ति । गोफिष्यसि गोफिष्यथः गोफिष्यथ । गोफिष्यामि गोफिष्यावः गोफिष्यामः । **५. लोट्** – गुफतु, गुफतात् गुफताम् गुफन्तु । गुफ, गुफतात् गुफतम् गुफत । गुफानि गुफाव गुफाम । **६. लङ्** – अगुफत् अगुफताम् अगुफन् । अगुफः अगुफतम् अगुफत । अगुफम् अगुफाव अगुफाम । **७. विधिलिङ्** – गुफेत् गुफेताम् गुफेयुः । गुफेः गुफेतम् गुफेत । गुफेयम् गुफेव गुफेम । **८. आशीर्लिङ्** – गुफ्यात् गुफ्यास्ताम् गुफ्यासुः । गुफ्याः गुफ्यास्तम् गुफ्यास्त । गुफ्यासम् गुफ्यास्व गुफ्यास्म । **९. लुङ्** – अगोफीत् अगोफिष्टाम् अगोफिषुः । अगोफीः अगोफिष्टम् अगोफिष्ट । अगोफिषम् अगोफिष्व अगोफिष्म । **१०. लृङ्** – अगोफिष्यत् अगोफिष्यताम् अगोफिष्यन् । अगोफिष्यः अगोफिष्यतम् अगोफिष्यत । अगोफिष्यम् अगोफिष्याव अगोफिष्याम ।

णिचि – गोफयति-ते, **सनि** – जुगुपिषति/जुगोफिषति, **यकि** – गुफ्यते ।

१३१८. गुम्फ – ग्रन्थे । सकर्म, सेट्, परस्मै । (तृम्फादिः)

१. लट् – गुम्फति गुम्फतः गुम्फन्ति । गुम्फसि गुम्फथः गुम्फथ । गुम्फामि गुम्फावः गुम्फामः ।
२. लिट् – जुगुम्फ जुगुम्फतुः जुगुम्फुः । जुगुम्फिथ जुगुम्फथुः जुगुम्फ । जुगुम्फ, जुगुम्फिव जुगुम्फिम ।
३. लुट् – गुम्फिता गुम्फितारौ गुम्फितारः । गुम्फितासि गुम्फितास्थः गुम्फितास्थ । गुम्फितास्मि गुम्फितास्वः गुम्फितास्मः । **४. लृट्** – गुम्फिष्यति गुम्फिष्यतः गुम्फिष्यन्ति । गुम्फिष्यसि गुम्फिष्यथः गुम्फिष्यथ । गुम्फिष्यामि गुम्फिष्यावः गुम्फिष्यामः । **५. लोट्** – गुम्फतु, गुम्फतात् गुम्फताम् गुम्फन्तु । गुम्फ, गुम्फतात् गुम्फतम् गुम्फत । गुम्फानि गुम्फाव गुम्फाम । **६. लङ्** – अगुम्फत् अगुम्फताम् अगुम्फन् । अगुम्फः अगुम्फतम् अगुम्फत । अगुम्फम् अगुम्फाव अगुम्फाम । **७. विधिलिङ्** – गुम्फेत् गुम्फेताम् गुम्फेयुः । गुम्फेः गुम्फेतम् गुम्फेत । गुम्फेयम् गुम्फेव गुम्फेम । **८. आशीर्लिङ्** – गुफ्यात् गुफ्यास्ताम् गुफ्यासुः । गुफ्याः गुफ्यास्तम् गुफ्यास्त । गुफ्यासम् गुफ्यास्व गुफ्यास्म । **९. लुङ्** – अगुम्फीत् अगुम्फिष्टाम् अगुम्फिषुः । अगुम्फीः अगुम्फिष्टम् अगुम्फिष्ट । अगुम्फिषम् अगुम्फिष्व अगुम्फिष्म । **१०. लृङ्** – अगुम्फिष्यत् अगुम्फिष्यताम् अगुम्फिष्यन् । अगुम्फिष्यः अगुम्फिष्यतम् अगुम्फिष्यत । अगुम्फिष्यम् अगुम्फिष्याव अगुम्फिष्याम ।

णिचि – गुम्फयति-ते, **सनि** – जुगुम्फिषति, **यकि** – गुफ्यते

१३१९. उभ – पूरणे । सकर्म, सेट्, परस्मै ।

१. लट् – उभति उभतः उभन्ति । उभसि उभथः उभथ । उभामि उभावः उभामः । **२. लिट्** – उवोभ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऊभतुः ऊभुः । उवोभिथ ऊभथुः ऊभ । उवोभ ऊभिव ऊभिम । **३. लुट्** – ओभिता ओभितारौ ओभितारः । ओभितासि ओभितास्थः ओभितास्थ । ओभितास्मि ओभितास्वः ओभितास्मः । **४. लृट्** – ओभिष्यति ओभिष्यतः ओभिष्यन्ति । ओभिष्यसि ओभिष्यथः ओभिष्यथ । ओभिष्यामि ओभिष्यावः ओभिष्यामः । **५. लोट्** – उभतु, उभतात् उभताम् उभन्तु । उभ, उभतात् उभतम् उभत् । उभानि उभाव उभाम । **६. लङ्** – औभत् औभताम् औभन् । औभः औभतम् औभत । औभम् औभाव औभाम । **७. विधिलिङ्** – उभेत् उभेताम् उभेयुः । उभेः उभेतम् उभेत । उभेयम् उभेव उभेम । **८. आशीर्लिङ्** – उभ्यात् उभ्यास्ताम् उभ्यासुः । उभ्याः उभ्यास्तम् उभ्यास्त । उभ्यासम् उभ्यास्व उभ्यास्म । **९. लुङ्** – औभीत् औभिष्टाम् औभिषुः । औभीः औभिष्टम् औभिष्ट । औभिषम् औभिष्व औभिष्म । **१०. लृङ्** – औभिष्यत् औभिष्यताम् औभिष्यन् । औभिष्यः औभिष्यतम् औभिष्यत । औभिष्यम् औभिष्याव औभिष्याम । **णिचि** – ओभयति-ते, **सनि** – ओबिभिषति, **यकि** – उभ्यते ।

१३२०. उम्भ – पूरणे । सकर्म, सेट्, परस्मै । (तृम्फादिः)

१. लट् – उम्भति उम्भतः उम्भन्ति । उम्भसि उम्भथः उम्भथ । उम्भामि उम्भावः उम्भामः । **२. लिट्** – (i) उम्भाञ्चकार उम्भाञ्चक्रतुः उम्भाञ्चक्रुः । उम्भाञ्चकर्थ उम्भाञ्चक्रथुः उम्भाञ्चक्र । उम्भाञ्चकार/उम्भाञ्चकर उम्भाञ्चकृव उम्भाञ्चकृम । (ii) उम्भाम्बभूव उम्भाम्बभूवतुः उम्भाम्बभूवुः । उम्भाम्बभूविथ उम्भाम्बभूवथुः उम्भाम्बभूव । उम्भाम्बभूव उम्भाम्बभूविव उम्भाम्बभूविम । (iii) उम्भामास उम्भामासतुः उम्भामासुः । उम्भामासिथ उम्भामासथुः उम्भामास । उम्भामास उम्भामासिव उम्भामासिम । **३. लुट्** – उम्भिता उम्भितारौ उम्भितारः । उम्भितासि उम्भितास्थः उम्भितास्थ । उम्भितास्मि उम्भितास्वः उम्भितास्मः । **४. लृट्** – उम्भिष्यति उम्भिष्यतः उम्भिष्यन्ति । उम्भिष्यसि उम्भिष्यथः उम्भिष्यथ । उम्भिष्यामि उम्भिष्यावः उम्भिष्यामः । **५. लोट्** – उम्भतु, उम्भतात् उम्भताम् उम्भन्तु । उम्भ, उम्भतात् उम्भतम् उम्भत । उम्भानि उम्भाव उम्भाम । **६. लङ्** – औम्भत् औम्भताम् औम्भन् । औम्भः औम्भतम् औम्भत । औम्भम् औम्भाव औम्भाम । **७. विधिलिङ्** – उम्भेत् उम्भेताम् उम्भेयुः । उम्भेः उम्भेतम् उम्भेत । उम्भेयम् उम्भेव उम्भेम । **८. आशीर्लिङ्** – उभ्यात् उभ्यास्ताम् उभ्यासुः । उभ्याः उभ्यास्तम् उभ्यास्त । उभ्यासम् उभ्यास्व उभ्यास्म ।**९. लुङ्** – औम्भीत् औम्भिष्टाम् औम्भिषुः । औम्भीः औम्भिष्टम् औम्भिष्ट । औम्भिषम् औम्भिष्व औम्भिष्म । **१०. लृङ्** – औम्भिष्यत् औम्भिष्यताम् औम्भिष्यन् । औम्भिष्यः औम्भिष्यतम् औम्भिष्यत । औम्भिष्यम् औम्भिष्याव औम्भिष्याम । **णिचि** – उम्भयति – ते, **सनि** – उम्बिभिषति, **यकि** – उभ्यते

१३२१. शुभ – शोभायाम् । अकर्म, सेट्, परस्मै, 'हिंसाभाषणयोः शोभेच्छोभार्थे शुभतीति शे' (१४३) इति देवः ।

१. लट् – शुभति शुभतः शुभन्ति । शुभसि शुभथः शुभथ । शुभामि शुभावः शुभामः । **२. लिट्** – शुशोभ शुशुभतुः शुशुभुः । शुशोभिथ शुशुभथुः शुशुभ । शुशोभ शुशुभिव शुशुभिम । **३. लुट्** – शोभिता शोभितारौ शोभितारः । शोभितासि शोभितास्थः शोभितास्थ । शोभितास्मि शोभितास्वः शोभितास्मः । **४. लृट्** – शोभिष्यति शोभिष्यतः शोभिष्यन्ति । शोभिष्यसि शोभिष्यथः शोभिष्यथ । शोभिष्यामि शोभिष्यावः शोभिष्यामः । **५. लोट्** – शुभतु, शुभतात् शुभताम् शुभन्तु । शुभ, शुभतात् शुभतम् शुभत । शुभानि शुभाव शुभाम । **६. लङ्** – अशुभत् अशुभताम् अशुभन् । अशुभः अशुभतम् अशुभत । अशुभम् अशुभाव अशुभाम । **७. विधिलिङ्** – शुभेत् शुभेताम् शुभेयुः । शुभेः शुभेतम् शुभेत । शुभेयम् शुभेव शुभेम । **८. आशीर्लिङ्** – शुभ्यात् शुभ्यास्ताम् शुभ्यासुः । शुभ्याः शुभ्यास्तम् शुभ्यास्त । शुभ्यासम् शुभ्यास्व शुभ्यास्म । **९. लुङ्** – अशोभीत् अशोभिष्टाम् अशोभिषुः । अशोभीः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अशोभिष्टम् अशोभिष्ट । अशोभिषम् अशोभिष्व अशोभिष्म । **१०. लृङ्** – अशोभिष्यत् अशोभिष्यताम् अशोभिष्यन् । अशोभिष्यः अशोभिष्यतम् अशोभिष्यत । अशोभिष्यम् अशोभिष्याव अशोभिष्याम ।

णिचि – शोभयति-ते, **सनि** – शुशुभिषति/शुशोभिषति, **यकि** – शुभ्यते

१३२२. शुम्भ – शोभायाम् । अकर्म, सेट्, परस्मै (तृम्फादिः) । 'हिंसायां च द्रुमे' इति धा.का. व्याख्या (२-७५) । 'दीप्तौ हिंसने च' इति वोपदेवः ।

१. लट् – शुम्भति शुम्भतः शुम्भन्ति । शुम्भसि शुम्भथः शुम्भथ । शुम्भामि शुम्भावः शुम्भामः । **२. लिट्** – शुशुम्भ शुशुम्भतुः शुशुम्भुः । शुशुम्भिथ शुशुम्भथुः शुशुम्भ । शुशुम्भ शुशुम्भिव शुशुम्भिम । **३. लुट्** – शुम्भिता शुम्भितारौ शुम्भितारः । शुम्भितासि शुम्भितास्थः शुम्भितास्थ । शुम्भितास्मि शुम्भितास्वः शुम्भितास्मः । **४. लृट्** – शुम्भिष्यति शुम्भिष्यतः शुम्भिष्यन्ति । शुम्भिष्यसि शुम्भिष्यथः शुम्भिष्यथ । शुम्भिष्यामि शुम्भिष्यावः शुम्भिष्यामः । **५. लोट्** – शुम्भतु, शुम्भतात् शुम्भताम् शुम्भन्तु । शुम्भ, शुम्भतात् शुम्भतम् शुम्भत । शुम्भानि शुम्भाव शुम्भाम । **६. लङ्** – अशुम्भत् अशुम्भताम् अशुम्भन् । अशुम्भः अशुम्भतम् अशुम्भत । अशुम्भम् अशुम्भाव अशुम्भाम । **७. विधिलिङ्** – शुम्भेत् शुम्भेताम् शुम्भेयुः । शुम्भेः शुम्भेतम् शुम्भेत । शुम्भेयम् शुम्भेव शुम्भेम । **८. आशीर्लिङ्** – शुभ्यात् शुभ्यास्ताम् शुभ्यासुः । शुभ्याः शुभ्यास्तम् शुभ्यास्त । शुभ्यासम् शुभ्यास्व शुभ्यास्म । **९. लुङ्** – अशुम्भीत् अशुम्भिष्टाम् अशुम्भिषुः । अशुम्भीः अशुम्भिष्टम् अशुम्भिष्ट । अशुम्भिषम् अशुम्भिष्व अशुम्भिष्म । **१०. लृङ्** – अशुम्भिष्यत् अशुम्भिष्यताम् अशुम्भिष्यन् । अशुम्भिष्यः अशुम्भिष्यतम् अशुम्भिष्यत । अशुम्भिष्यम् अशुम्भिष्याव अशुम्भिष्याम ।

णिचि – शुम्भयति-ते, **सनि** – शुशुम्भिषति, **यकि** – शुभ्यते

१३२३. दृभी – ग्रन्थे । सकर्म, सेट्, परस्मै । 'अनीदितश्च सन्दर्भे दृभति ग्रन्थ ईदितः' (श्लो. १४२) इति देवः ।

१. लट् – दृभति दृभतः दृभन्ति । दृभसि दृभथः दृभथ । दृभामि दृभावः दृभामः । **२. लिट्** – ददर्भ ददृभतुः ददृभुः । ददर्भिथ ददृभथुः ददृभ । ददर्भ ददृभिव ददृभिम । **३. लुट्** – दर्भिता दर्भितारौ दर्भितारः । दर्भितासि दर्भितास्थः दर्भितास्थ । दर्भितास्मि दर्भितास्वः दर्भितास्मः । **४. लृट्** – दर्भिष्यति दर्भिष्यतः दर्भिष्यन्ति । दर्भिष्यसि दर्भिष्यथः दर्भिष्यथ । दर्भिष्यामि दर्भिष्यावः दर्भिष्यामः । **५. लोट्** – दृभतु, दृभतात् दृभताम् दृभन्तु । दृभ, दृभतात् दृभतम् दृभत । दृभाणि दृभाव दृभाम । **६. लङ्** – अदृभत् अदृभताम् अदृभन् । अदृभः अदृभतम् अदृभत । अदृभम् अदृभाव अदृभाम । **७. विधिलिङ्** – दृभेत् दृभेताम् दृभेयुः । दृभेः दृभेतम् दृभेत । दृभेयम् दृभेव दृभेम । **८. आशीर्लिङ्** – दृभ्यात् दृभ्यास्ताम् दृभ्यासुः । दृभ्याः दृभ्यास्तम् दृभ्यास्त । दृभ्यासम् दृभ्यास्व दृभ्यास्म । **९. लुङ्** – अदर्भीत् अदर्भिष्टाम् अदर्भिषुः । अदर्भीः अदर्भिष्टम् अदर्भिष्ट । अदर्भिषम् अदर्भिष्व अदर्भिष्म । **१०. लृङ्** – अदर्भिष्यत् अदर्भिष्यताम् अदर्भिष्यन् । अदर्भिष्यः अदर्भिष्यतम् अदर्भिष्यत । अदर्भिष्यम् अदर्भिष्याव अदर्भिष्याम ।

णिचि – दर्भयति/ते, **सनि** – दिदर्भिषति, **यकि** – दृभ्यते

१३२४. चृती – हिंसाश्रन्थनयोः । सकर्म, सेट्, परस्मै । 'ग्रन्थनयोः' इति कृदन्तरूपमाला । श्रन्थनम् = विस्रंसनम् ।

१. लट् – चृतति चृततः चृतन्ति । चृतसि चृतथः चृतथ । चृतामि चृतावः चृतामः । **२. लिट्** – चचर्त चचृततुः चचृतुः । चचर्तिथ चचृतथुः चचृत । चचर्त चचृतिव चचृतिम । **३. लुट्** – चर्तिता चर्तितारौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चर्तितारः । चर्तितासि चर्तितास्थः चर्तितास्थ । चर्तितास्मि चर्तितास्वः चर्तितास्मः । **४. लृट्** - (i) चर्तिष्यति चर्तिष्यतः चर्तिष्यन्ति । चर्तिष्यसि चर्तिष्यथः चर्तिष्यथ । चर्तिष्यामि चर्तिष्यावः चर्तिष्यामः । (ii) चर्त्स्यति[1] चर्त्स्यतः चर्त्स्यन्ति । चर्त्स्यसि चर्त्स्यथः चर्त्स्यथ । चर्त्स्यामि चर्त्स्यावः चर्त्स्यामः । **५. लोट्** - चृततु, चृततात् चृतताम् चृतन्तु । चृत, चृततात् चृततम् चृतत । चृतानि चृताव चृताम । **६. लङ्** - अचृतत् अचृतताम् अचृतन् । अचृतः अचृततम् अचृतत । अचृतम् अचृताव अचृताम । **७. विधिलिङ्** - चृतेत् चृतेताम् चृतेयुः । चृतेः चृतेतम् चृतेत । चृतेयम् चृतेव चृतेम । **८. आशीर्लिङ्** - चृत्यात् चृत्यास्ताम् चृत्यासुः । चृत्याः चृत्यास्तम् चृत्यास्त । चृत्यासम् चृत्यास्व चृत्यास्म । **९. लुङ्** - अचर्तीत् अचर्तिष्टाम् अचर्तिषुः । अचर्तीः अचर्तिष्टम् अचर्तिष्ट । अचर्तिषम् अचर्तिष्व अचर्तिष्म । **१०. लृङ्** - (i) अचर्तिष्यत् अचर्तिष्यताम् अचर्तिष्यन् । अचर्तिष्यः अचर्तिष्यतम् अचर्तिष्यत । अचर्तिष्यम् अचर्तिष्याव अचर्तिष्याम । (ii) अचर्त्स्यत् अचर्त्स्यताम् अचर्त्स्यन् । अचर्त्स्यः अचर्त्स्यतम् अचर्त्स्यत । अचर्त्स्यम् अचर्त्स्याव अचर्त्स्याम ।

णिचि - चर्तयति-ते, **सनि** - चिचर्तिषति/चिचृत्सति[1], **यकि** - चृत्यते ।

१. 'सेऽसिचि कृतचृतछृदतृदनृतः' इत्यादिना सिचोऽन्यस्य सादेः इड्विकल्पः ।

१३२५. विध - विधाने । सकर्म, सेट्, परस्मै ।

१. लट् - विधति विधतः विधन्ति । विधसि विधथः विधथ । विधामि विधावः विधामः । **२. लिट्** - विवेध विविधतुः विविधुः । विवेधिथ विविधथुः विविध । विवेध विविधिव विविधिम । **३. लुट्** - वेधिता वेधितारौ वेधितारः । वेधितासि वेधितास्थः वेधितास्थ । वेधितास्मि वेधितास्वः वेधितास्मः । **४. लृट्** - वेधिष्यति वेधिष्यतः वेधिष्यन्ति । वेधिष्यसि वेधिष्यथः वेधिष्यथ । वेधिष्यामि वेधिष्यावः वेधिष्यामः । **५. लोट्** - विधतु, विधतात् विधताम् विधन्तु । विध, विधतात् विधतम् विधत । विधानि विधाव विधाम । **६. लङ्** - अविधत् अविधताम् अविधन् । अविधः अविधतम् अविधत । अविधम् अविधाव अविधाम । **७. विधिलिङ्** - विधेत् विधेताम् विधेयुः । विधेः विधेतम् विधेत । विधेयम् विधेव विधेम । **८. आशीर्लिङ्** - विध्यात् विध्यास्ताम् विध्यासुः । विध्याः विध्यास्तम् विध्यास्त । विध्यासम् विध्यास्व विध्यास्म । **९. लुङ्** - अवेधीत् अवेधिष्टाम् अवेधिषुः । अवेधीः अवेधिष्टम् अवेधिष्ट । अवेधिषम् अवेधिष्व अवेधिष्म । **१०. लृङ्** - अवेधिष्यत् अवेधिष्यताम् अवेधिष्यन् । अवेधिष्यः अवेधिष्यतम् अवेधिष्यत । अवेधिष्यम् अवेधिष्याव अवेधिष्याम ।

णिचि - वेधयति-ते, **सनि** - विविधिषति/विवेधिषति, **यकि** - विध्यते ।

१३२६. जुड - गतौ । सकर्म, सेट्, परस्मै । 'तवर्गपञ्चमान्तमेके पठन्ति ।'...मरुतो जुनन्ति' इति सिद्धान्तकौमुदी । मा.धा.वृत्तौ अपि एवमेव उच्यते । 'जुन' इति क्षीरस्वामिसम्मतः पाठः । 'जुड' इति दुर्गः ।

१. लट् - जुडति जुडतः जुडन्ति । जुडसि जुडथः जुडथ । जुडामि जुडावः जुडामः । **२. लिट्** - जुजोड जुजुडतुः जुजुडुः । जुजोडिथ जुजुडथुः जुजुड । जुजोड जुजुडिव जुजुडिम । **३. लुट्** - जोडिता जोडितारौ जोडितारः । जोडितासि जोडितास्थः जोडितास्थ । जोडितास्मि जोडितास्वः जोडितास्मः । **४. लृट्** - जोडिष्यति जोडिष्यतः जोडिष्यन्ति । जोडिष्यसि जोडिष्यथः जोडिष्यथ । जोडिष्यामि जोडिष्यावः जोडिष्यामः । **५. लोट्** - जुडतु, जुडतात् जुडताम् जुडन्तु । जुड, जुडतात् जुडतम् जुडत । जुडानि जुडाव जुडाम । **६. लङ्** - अजुडत् अजुडताम् अजुडन् । अजुडः अजुडतम् अजुडत । अजुडम् अजुडाव अजुडाम । **७. विधिलिङ्** - जुडेत् जुडेताम् जुडेयुः । जुडेः जुडेतम् जुडेत । जुडेयम् जुडेव जुडेम । **८. आशीर्लिङ्** - जुड्यात् जुड्यास्ताम् जुड्यासुः । जुड्याः जुड्यास्तम् जुड्यास्त । जुड्यासम् जुड्यास्व

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जुड्यास्म । **९. लुङ्** – अजोडीत् अजोडिष्टाम् अजोडिषुः । अजोडीः अजोडिष्टम् अजोडिष्ट । अजोडिषम् अजोडिष्व अजोडिष्म । **१०. लृङ्** – अजोडिष्यत् अजोडिष्यताम् अजोडिष्यन् । अजोडिष्यः अजोडिष्यतम् अजोडिष्यत । अजोडिष्यम् अजोडिष्याव अजोडिष्याम ।

णिचि – जोडयति-ते, **सनि** – जुजुडिषति/जुजोडिषति, **यकि** – जुड्यते ।

१३२७. मृड – सुखने । सकर्म, सेट्, परस्मै । 'मृडेर्मृड्णाति सुखने तत्रैव मृडतीति शे' (श्लो. ८७) इति देवः ।

१. लट् – मृडति मृडतः मृडन्ति । मृडसि मृडथः मृडथ । मृडामि मृडावः मृडामः । **२. लिट्** – ममर्ड ममृडतुः ममृडुः । ममर्डिथ ममृडथुः ममृड । ममर्ड ममृडिव ममृडिम । **३. लुट्** – मर्डिता मर्डितारौ मर्डितारः । मर्डितासि मर्डितास्थः मर्डितास्थ । मर्डितास्मि मर्डितास्वः मर्डितास्मः । **४. लृट्** – मर्डिष्यति मर्डिष्यतः मर्डिष्यन्ति । मर्डिष्यसि मर्डिष्यथः मर्डिष्यथ । मर्डिष्यामि मर्डिष्यावः मर्डिष्यामः । **५. लोट्** – मृडतु, मृडतात् मृडताम् मृडन्तु । मृड, मृडतात् मृडतम् मृडत । मृडानि मृडाव मृडाम । **६. लङ्** – अमृडत् अमृडताम् अमृडन् । अमृडः अमृडतम् अमृडत । अमृडम् अमृडाव अमृडाम । **७. विधिलिङ्** – मृडेत् मृडेताम् मृडेयुः । मृडेः मृडेतम् मृडेत । मृडेयम् मृडेव मृडेम । **८. आशीर्लिङ्** – मृड्यात् मृड्यास्ताम् मृड्यासुः । मृड्याः मृड्यास्तम् मृड्यास्त । मृड्यासम् मृड्यास्व मृड्यास्म । **९. लुङ्** – अमर्डीत् अमर्डिष्टाम् अमर्डिषुः । अमर्डीः अमर्डिष्टम् अमर्डिष्ट । अमर्डिषम् अमर्डिष्व अमर्डिष्म । **१०. लृङ्** – अमर्डिष्यत् अमर्डिष्यताम् अमर्डिष्यन् । अमर्डिष्यः अमर्डिष्यतम् अमर्डिष्यत । अमर्डिष्यम् अमर्डिष्याव अमर्डिष्याम ।

णिचि – मर्डयति/ते, **सनि** – मिमर्डिषति, **यकि** – मृड्यते ।

१३२८. पृड – सुखने । सकर्म, सेट्, परस्मै ।

१. लट् – पृडति पृडतः पृडन्ति । पृडसि पृडथः पृडथ । पृडामि पृडावः पृडामः । **२. लिट्** – पपर्ड पपृडतुः पपृडुः । पपर्डिथ पपृडथुः पपृड । पपर्ड पपृडिव पपृडिम । **३. लुट्** – पर्डिता पर्डितारौ पर्डितारः । पर्डितासि पर्डितास्थः पर्डितास्थ । पर्डितास्मि पर्डितास्वः पर्डितास्मः । **४. लृट्** – पर्डिष्यति पर्डिष्यतः पर्डिष्यन्ति । पर्डिष्यसि पर्डिष्यथः पर्डिष्यथ । पर्डिष्यामि पर्डिष्यावः पर्डिष्यामः । **५. लोट्** – पृडतु, पृडतात् पृडताम् पृडन्तु । पृड, पृडतात् पृडतम् पृडत । पृडानि पृडाव पृडाम । **६. लङ्** – अपृडत् अपृडताम् अपृडन् । अपृडः अपृडतम् अपृडत । अपृडम् अपृडाव अपृडाम । **७. विधिलिङ्** – पृडेत् पृडेताम् पृडेयुः । पृडेः पृडेतम् पृडेत । पृडेयम् पृडेव पृडेम । **८. आशीर्लिङ्** – पृड्यात् पृड्यास्ताम् पृड्यासुः । पृड्याः पृड्यास्तम् पृड्यास्त । पृड्यासम् पृड्यास्व पृड्यास्म । **९. लुङ्** – अपर्डीत् अपर्डिष्टाम् अपर्डिषुः । अपर्डीः अपर्डिष्टम् अपर्डिष्ट । अपर्डिषम् अपर्डिष्व अपर्डिष्म । **१०. लृङ्** – अपर्डिष्यत् अपर्डिष्यताम् अपर्डिष्यन् । अपर्डिष्यः अपर्डिष्यतम् अपर्डिष्यत । अपर्डिष्यम् अपर्डिष्याव अपर्डिष्याम ।

णिचि – पर्डयति/ते, **सनि** – पिपर्डिषति, **यकि** – पृड्यते ।

१३२९. पृण – प्रीणने । सकर्म, सेट्, परस्मै ।

१. लट् – पृणति पृणतः पृणन्ति । पृणसि पृणथः पृणथ । पृणामि पृणावः पृणामः । **२. लिट्** – पपर्ण पपृणतुः पपृणुः । पपर्णिथ पपृणथुः पपृण । पपर्ण पपृणिव पपृणिम । **३. लुट्** – पर्णिता पर्णितारौ पर्णितारः । पर्णितासि पर्णितास्थः पर्णितास्थ । पर्णितास्मि पर्णितास्वः पर्णितास्मः । **४. लृट्** – पर्णिष्यति पर्णिष्यतः पर्णिष्यन्ति । पर्णिष्यसि पर्णिष्यथः पर्णिष्यथ । पर्णिष्यामि पर्णिष्यावः पर्णिष्यामः । **५. लोट्** – पृणतु, पृणतात् पृणताम् पृणन्तु । पृण, पृणतात् पृणतम् पृणत । पृणानि पृणाव पृणाम । **६. लङ्** – अपृणत् अपृणताम् अपृणन् । अपृणः अपृणतम् अपृणत । अपृणम् अपृणाव अपृणाम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

७. विधिलिङ् – पृणेत् पृणेताम् पृणेयुः । पृणेः पृणेतम् पृणेत । पृणेयम् पृणेव पृणेम । **८. आशीर्लिङ्** – पृण्यात् पृण्यास्ताम् पृण्यासुः । पृण्याः पृण्यास्तम् पृण्यास्त । पृण्यासम् पृण्यास्व पृण्यास्म । **९. लुङ्** – अपर्णीत् अपर्णिष्टाम् अपर्णिषुः । अपर्णीः अपर्णिष्टम् अपर्णिष्ट । अपर्णिषम् अपर्णिष्व अपर्णिष्म । **१०. लृङ्** – अपर्णिष्यत् अपर्णिष्यताम् अपर्णिष्यन् । अपर्णिष्यः अपर्णिष्यतम् अपर्णिष्यत । अपर्णिष्यम् अपर्णिष्याव अपर्णिष्याम ।

णिचि – पर्णयति – ते, **सनि** – पिपर्णिषति, **यकि** – पर्ण्यते ।

१३३०. वृण – प्रीणने । सकर्म, सेट्, परस्मै,

१. लट् – वृणति वृणतः वृणन्ति । वृणसि वृणथः वृणथ । वृणामि वृणावः वृणामः । **२. लिट्** – ववर्ण ववृणतुः ववृणुः । ववर्णिथ ववृणथुः ववृण । ववर्ण ववृणिव ववृणिम । **३. लुट्** – वर्णिता वर्णितारौ वर्णितारः । वर्णितासि वर्णितास्थः वर्णितास्थ । वर्णितास्मि वर्णितास्वः वर्णितास्मः । **४. लृट्** – वर्णिष्यति वर्णिष्यतः वर्णिष्यन्ति । वर्णिष्यसि वर्णिष्यथः वर्णिष्यथ । वर्णिष्यामि वर्णिष्यावः वर्णिष्यामः । **५. लोट्** – वृणतु, वृणतात् वृणताम् वृणन्तु । वृण, वृणतात् वृणतम् वृणत । वृणानि वृणाव वृणाम । **६. लङ्** – अवृणत् अवृणताम् अवृणन् । अवृणः अवृणतम् अवृणत । अवृणम् अवृणाव अवृणाम । **७. विधिलिङ्** – वृणेत् वृणेताम् वृणेयुः । वृणेः वृणेतम् वृणेत । वृणेयम् वृणेव वृणेम । **८. आशीर्लिङ्** – वृण्यात् वृण्यास्ताम् वृण्यासुः । वृण्याः वृण्यास्तम् वृण्यास्त । वृण्यासम् वृण्यास्व वृण्यास्म । **९. लुङ्** – अवर्णीत् अवर्णिष्टाम् अवर्णिषुः । अवर्णीः अवर्णिष्टम् अवर्णिष्ट । अवर्णिषम् अवर्णिष्व अवर्णिष्म । **१०. लृङ्** – अवर्णिष्यत् अवर्णिष्यताम् अवर्णिष्यन् । अवर्णिष्यः अवर्णिष्यतम् अवर्णिष्यत । अवर्णिष्यम् अवर्णिष्याव अवर्णिष्याम ।

णिचि – वर्णयति – ते, **सनि** – विवर्णिषति, **यकि** – वर्ण्यते ।

१३३१. मृण – हिंसायाम् । सकर्म. सेट्. परस्मै ।

१. लट् – मृणति मृणतः मृणन्ति । मृणसि मृणथः मृणथ । मृणामि मृणावः मृणामः । **२. लिट्** – ममर्ण ममृणतुः ममृणुः । ममर्णिथ ममृणथुः ममृण । ममर्ण ममृणिव ममृणिम । **३. लुट्** – मर्णिता मर्णितारौ मर्णितारः । मर्णितासि मर्णितास्थः मर्णितास्थ । मर्णितास्मि मर्णितास्वः मर्णितास्मः । **४. लृट्** – मर्णिष्यति मर्णिष्यतः मर्णिष्यन्ति । मर्णिष्यसि मर्णिष्यथः मर्णिष्यथ । मर्णिष्यामि मर्णिष्यावः मर्णिष्यामः । **५. लोट्** – मृणतु, मृणतात् मृणताम् मृणन्तु । मृण, मृणतात् मृणतम् मृणत । मृणानि मृणाव मृणाम । **६. लङ्** – अमृणत् अमृणताम् अमृणन् । अमृणः अमृणतम् अमृणत । अमृणम् अमृणाव अमृणाम । **७. विधिलिङ्** – मृणेत् मृणेताम् मृणेयुः । मृणेः मृणेतम् मृणेत । मृणेयम् मृणेव मृणेम । **८. आशीर्लिङ्** – मृण्यात् मृण्यास्ताम् मृण्यासुः । मृण्याः मृण्यास्तम् मृण्यास्त । मृण्यासम् मृण्यास्व मृण्यास्म । **९. लुङ्** – अमर्णीत् अमर्णिष्टाम् अमर्णिषुः । अमर्णीः अमर्णिष्टम् अमर्णिष्ट । अमर्णिषम् अमर्णिष्व अमर्णिष्म । **१०. लृङ्** – अमर्णिष्यत् अमर्णिष्यताम् अमर्णिष्यन् । अमर्णिष्यः अमर्णिष्यतम् अमर्णिष्यत । अमर्णिष्यम् अमर्णिष्याव अमर्णिष्याम ।

णिचि – मर्णयति – ते, **सनि** – मिमर्णिषति, **यकि** – मर्ण्यते ।

१३३२. तुण – कौटिल्ये । अकर्म, सेट्, परस्मै ।

१. लट् – तुणति तुणतः तुणन्ति । तुणसि तुणथः तुणथ । तुणामि तुणावः तुणामः । **२. लिट्** – तुतोण तुतुणतुः तुतुणुः । तुतोणिथ तुतुणथुः तुतुण । तुतोण तुतुणिव तुतुणिम । **३. लुट्** – तोणिता

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तोणितारौ तोणितारः । तोणितासि तोणितास्थः तोणितास्थ । तोणितास्मि तोणितास्वः तोणितास्मः । **४. लृट्** – तोणिष्यति तोणिष्यतः तोणिष्यन्ति । तोणिष्यसि तोणिष्यथः तोणिष्यथ । तोणिष्यामि तोणिष्यावः तोणिष्यामः । **५. लोट्** – तुणतु, तुणतात् तुणताम् तुणन्तु । तुण, तुणतात् तुणतम् तुणत । तुणानि तुणाव तुणाम । **६. लङ्** – अतुणत् अतुणताम् अतुणन् । अतुणः अतुणतम् अतुणत । अतुणम् अतुणाव अतुणाम । **७. विधिलिङ्** – तुणेत् तुणेताम् तुणेयुः । तुणेः तुणेतम् तुणेत । तुणेयम् तुणेव तुणेम । **८. आशीर्लिङ्** – तुण्यात् तुण्यास्ताम् तुण्यासुः । तुण्याः तुण्यास्तम् तुण्यास्त । तुण्यासम् तुण्यास्व तुण्यास्म । **९. लुङ्** – अतोणीत् अतोणिष्टाम् अतोणिषुः । अतोणीः अतोणिष्टम् अतोणिष्ट । अतोणिषम् अतोणिष्व अतोणिष्म । **१०. लृङ्** – अतोणिष्यत् अतोणिष्यताम् अतोणिष्यन् । अतोणिष्यः अतोणिष्यतम् अतोणिष्यत । अतोणिष्यम् अतोणिष्याव अतोणिष्याम ।

णिचि – तोणयति – ते, **सनि** – तुतुणिषति/तुतोणिषति, **यकि** – तुण्यते ।

१३३३. पुण – कर्मणि शुभे । अकर्म, सेट्, परस्मै ।

१. लट् – पुणति पुणतः पुणन्ति । पुणसि पुणथः पुणथ । पुणामि पुणावः पुणामः । **२. लिट्** – पुपोण पुपुणतुः पुपुणुः । पुपोणिथ पुपुणथुः पुपुण । पुपोण पुपुणिव पुपुणिम । **३. लुट्** – पोणिता पोणितारौ पोणितारः । पोणितासि पोणितास्थः पोणितास्थ । पोणितास्मि पोणितास्वः पोणितास्मः । **४. लृट्** – पोणिष्यति पोणिष्यतः पोणिष्यन्ति । पोणिष्यसि पोणिष्यथः पोणिष्यथ । पोणिष्यामि पोणिष्यावः पोणिष्यामः । **५. लोट्** – पुणतु, पुणतात् पुणताम् पुणन्तु । पुण, पुणतात् पुणतम् पुणत । पुणानि पुणाव पुणाम । **६. लङ्** – अपुणत् अपुणताम् अपुणन् । अपुणः अपुणतम् अपुणत । अपुणम् अपुणाव अपुणाम । **७. विधिलिङ्** – पुणेत् पुणेताम् पुणेयुः । पुणेः पुणेतम् पुणेत । पुणेयम् पुणेव पुणेम । **८. आशीर्लिङ्** – पुण्यात् पुण्यास्ताम् पुण्यासुः । पुण्याः पुण्यास्तम् पुण्यास्त । पुण्यासम् पुण्यास्व पुण्यास्म । **९. लुङ्** – अपोणीत् अपोणिष्टाम् अपोणिषुः । अपोणीः अपोणिष्टम् अपोणिष्ट । अपोणिषम् अपोणिष्व अपोणिष्म । **१०. लृङ्** – अपोणिष्यत् अपोणिष्यताम् अपोणिष्यन् । अपोणिष्यः अपोणिष्यतम् अपोणिष्यत । अपोणिष्यम् अपोणिष्याव अपोणिष्याम ।

णिचि – पोणयति – ते, **सनि** – पुपुणिषति/पुपोणिषति, **यकि** – पुण्यते ।

१३३४. मुण – प्रतिज्ञाने । सकर्म, सेट्, परस्मै ।

१. लट् – मुणति मुणतः मुणन्ति । मुणसि मुणथः मुणथ । मुणामि मुणावः मुणामः । **२. लिट्** – मुमोण मुमुणतुः मुमुणुः । मुमोणिथ मुमुणथुः मुमुण । मुमोण मुमुणिव मुमुणिम । **३. लुट्** – मोणिता मोणितारौ मोणितारः । मोणितासि मोणितास्थः मोणितास्थ । मोणितास्मि मोणितास्वः मोणितास्मः । **४. लृट्** – मोणिष्यति मोणिष्यतः मोणिष्यन्ति । मोणिष्यसि मोणिष्यथः मोणिष्यथ । मोणिष्यामि मोणिष्यावः मोणिष्यामः । **५. लोट्** – मुणतु, मुणतात् मुणताम् मुणन्तु । मुण, मुणतात् मुणतम् मुणत । मुणानि मुणाव मुणाम । **६. लङ्** – अमुणत् अमुणताम् अमुणन् । अमुणः अमुणतम् अमुणत । अमुणम् अमुणाव अमुणाम । **७. विधिलिङ्** – मुणेत् मुणेताम् मुणेयुः । मुणेः मुणेतम् मुणेत । मुणेयम् मुणेव मुणेम । **८. आशीर्लिङ्** – मुण्यात् मुण्यास्ताम् मुण्यासुः । मुण्याः मुण्यास्तम् मुण्यास्त । मुण्यासम् मुण्यास्व मुण्यास्म । **९. लुङ्** – अमोणीत् अमोणिष्टाम् अमोणिषुः । अमोणीः अमोणिष्टम् अमोणिष्ट । अमोणिषम् अमोणिष्व अमोणिष्म । **१०. लृङ्** – अमोणिष्यत् अमोणिष्यताम् अमोणिष्यन् । अमोणिष्यः अमोणिष्यतम् अमोणिष्यत । अमोणिष्यम् अमोणिष्याव अमोणिष्याम ।

णिचि – मोणयति – ते, **सनि** – मुमुणिषति/मुमोणिषति, **यकि** – मुण्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१३३५. कुण - शब्दोपकरणयोः । अकर्म, सेट्, परस्मै ।

१. लट् - कुणति कुणतः कुणन्ति । कुणसि कुणथः कुणथ । कुणामि कुणावः कुणामः । **२. लिट्** - चुकोण चुकुणतुः चुकुणुः । चुकोणिथ चुकुणथुः चुकुण । चुकोण चुकुणिव चुकुणिम । **३. लुट्** - कोणिता कोणितारौ कोणितारः । कोणितासि कोणितास्थः कोणितास्थ । कोणितास्मि कोणितास्वः कोणितास्मः । **४. लृट्** - कोणिष्यति कोणिष्यतः कोणिष्यन्ति । कोणिष्यसि कोणिष्यथः कोणिष्यथ । कोणिष्यामि कोणिष्यावः कोणिष्यामः । **५. लोट्** - कुणतु, कुणतात् कुणताम् कुणन्तु । कुण, कुणतात् कुणतम् कुणत । कुणानि कुणाव कुणाम । **६. लङ्** - अकुणत् अकुणताम् अकुणन् । अकुणः अकुणतम् अकुणत । अकुणम् अकुणाव अकुणाम । **७. विधिलिङ्** - कुणेत् कुणेताम् कुणेयुः । कुणेः कुणेतम् कुणेत । कुणेयम् कुणेव कुणेम । **८. आशीर्लिङ्** - कुण्यात् कुण्यास्ताम् कुण्यासुः । कुण्याः कुण्यास्तम् कुण्यास्त । कुण्यासम् कुण्यास्व कुण्यास्म । **९. लुङ्** - अकोणीत् अकोणिष्टाम् अकोणिषुः । अकोणीः अकोणिष्टम् अकोणिष्ट । अकोणिषम् अकोणिष्व अकोणिष्म । **१०. लृङ्** - अकोणिष्यत् अकोणिष्यताम् अकोणिष्यन् । अकोणिष्यः अकोणिष्यतम् अकोणिष्यत । अकोणिष्यम् अकोणिष्याव अकोणिष्याम ।

णिचि - कोणयति - ते, **सनि** - चुकुणिषति/चुकोणिषति, **यकि** - कुण्यते ।

१३३६. शुन - गतौ । सकर्म, सेट्, परस्मै ।

१. लट् - शुनति शुनतः शुनन्ति । शुनसि शुनथः शुनथ । शुनामि शुनावः शुनामः । **२. लिट्** - शुशोन शुशुनतुः शुशुनुः । शुशोनिथ शुशुथुः शुशुन । शुशोन शुशुनिव शुशुनिम । **३. लुट्** - शोनिता शोनितारौ शोनितारः । शोनितासि शोनितास्थः शोनितास्थ । शोनितास्मि शोनितास्वः शोनितास्मः । **४. लृट्** - शोनिष्यति शोनिष्यतः शोनिष्यन्ति । शोनिष्यसि शोनिष्यथः शोनिष्यथ । शोनिष्यामि शोनिष्यावः शोनिष्यामः । **५. लोट्** - शुनतु, शुनतात् शुनताम् शुनन्तु । शुन, शुनतात् शुनतम् शुनत । शुनानि शुनाव शुनाम । **६. लङ्** - अशुनत् अशुनताम् अशुनन् । अशुनः अशुनतम् अशुनत । अशुनम् अशुनाव अशुनाम । **७. विधिलिङ्** - शुनेत् शुनेताम् शुनेयुः । शुनेः शुनेतम् शुनेत । शुनेयम् शुनेव शुनेम । **८. आशीर्लिङ्** - शुन्यात् शुन्यास्ताम् शुन्यासुः । शुन्याः शुन्यास्तम् शुन्यास्त । शुन्यासम् शुन्यास्व शुन्यास्म । **९. लुङ्** - अशोनीत् अशोनिष्टाम् अशोनिषुः । अशोनीः अशोनिष्टम् अशोनिष्ट । अशोनिषम् अशोनिष्व अशोनिष्म । **१०. लृङ्** - अशोनिष्यत् अशोनिष्यताम् अशोनिष्यन् । अशोनिष्यः अशोनिष्यतम् अशोनिष्यत । अशोनिष्यम् अशोनिष्याव अशोनिष्याम ।

णिचि - शोनयति/ते, **सनि** - शुशुनिषति/शुशोनिषति, **यकि** - शुन्यते

१३३७. द्रुण - हिंसागतिकौटिल्येषु । सकर्म, सेट्, परस्मै ।

१. लट् - द्रुणति द्रुणतः द्रुणन्ति । द्रुणसि द्रुणथः द्रुणथ । द्रुणामि द्रुणावः द्रुणामः । **२. लिट्** - दुद्रोण दुद्रुणतुः दुद्रुणुः । दुद्रोणिथ दुद्रुणथुः दुद्रुण । दुद्रोण दुद्रुणिव दुद्रुणिम । **३. लुट्** - द्रोणिता द्रोणितारौ द्रोणितारः । द्रोणितासि द्रोणितास्थः द्रोणितास्थ । द्रोणितास्मि द्रोणितास्वः द्रोणितास्मः । **४. लृट्** - द्रोणिष्यति द्रोणिष्यतः द्रोणिष्यन्ति । द्रोणिष्यसि द्रोणिष्यथः द्रोणिष्यथ । द्रोणिष्यामि द्रोणिष्यावः द्रोणिष्यामः । **५. लोट्** - द्रुणतु, द्रुणतात् द्रुणताम् द्रुणन्तु । द्रुण, द्रुणतात् द्रुणतम् द्रुणत । द्रुणानि द्रुणाव द्रुणाम । **६. लङ्** - अद्रुणत् अद्रुणताम् अद्रुणन् । अद्रुणः अद्रुणतम् अद्रुणत । अद्रुणम् अद्रुणाव अद्रुणाम । **७. विधिलिङ्** - द्रुणेत् द्रुणेताम् द्रुणेयुः । द्रुणेः द्रुणेतम् द्रुणेत । द्रुणेयम् द्रुणेव द्रुणेम । **८. आशीर्लिङ्** - द्रुण्यात् द्रुण्यास्ताम् द्रुण्यासुः । द्रुण्याः द्रुण्यास्तम् द्रुण्यास्त । द्रुण्यासम् द्रुण्यास्व

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्रुण्यास्म । **९. लुङ्** – अद्रोणीत् अद्रोणिष्टाम् अद्रोणिषुः । अद्रोणीः अद्रोणिष्टम् अद्रोणिष्ट । अद्रोणिषम् अद्रोणिष्व अद्रोणिष्म । **१०. लृङ्** – अद्रोणिष्यत् अद्रोणिष्यताम् अद्रोणिष्यन् । अद्रोणिष्यः अद्रोणिष्यतम् अद्रोणिष्यत । अद्रोणिष्यम् अद्रोणिष्याव अद्रोणिष्याम ।

णिचि – द्रोणयति – ते, **सनि** – दुद्रुणिषति/दुद्रोणिषति, **यकि** – द्रुण्यते ।

१३३८. घुण – भ्रमणे । अकर्म, सेट्, परस्मै,

१. लट् – घुणति घुणतः घुणन्ति । घुणसि घुणथः घुणथ । घुणामि घुणावः घुणामः । **२. लिट्** – जुघोण जुघुणतुः जुघुणुः । जुघोणिथ जुघुणथुः जुघुण । जुघोण जुघुणिव जुघुणिम । **३. लुट्** – घोणिता घोणितारौ घोणितारः । घोणितासि घोणितास्थः घोणितास्थ । घोणितास्मि घोणितास्वः घोणितास्मः । **४. लृट्** – घोणिष्यति घोणिष्यतः घोणिष्यन्ति । घोणिष्यसि घोणिष्यथः घोणिष्यथ । घोणिष्यामि घोणिष्यावः घोणिष्यामः । **५. लोट्** – घुणतु, घुणतात् घुणताम् घुणन्तु । घुण, घुणतात् घुणतम् घुणत । घुणानि घुणाव घुणाम । **६. लङ्** – अघुणत् अघुणताम् अघुणन् । अघुणः अघुणतम् अघुणत । अघुणम् अघुणाव अघुणाम । **७. विधिलिङ्** – घुणेत् घुणेताम् घुणेयुः । घुणेः घुणेतम् घुणेत । घुणेयम् घुणेव घुणेम । **८. आशीर्लिङ्** – घुण्यात् घुण्यास्ताम् घुण्यासुः । घुण्याः घुण्यास्तम् घुण्यास्त । घुण्यासम् घुण्यास्व घुण्यास्म । **९. लुङ्** – अघोणीत् अघोणिष्टाम् अघोणिषुः । अघोणीः अघोणिष्टम् अघोणिष्ट । अघोणिषम् अघोणिष्व अघोणिष्म । **१०. लृङ्** – अघोणिष्यत् अघोणिष्यताम् अघोणिष्यन् । अघोणिष्यः अघोणिष्यतम् अघोणिष्यत । अघोणिष्यम् अघोणिष्याव अघोणिष्याम ।

णिचि – घोणयति – ते, **सनि** – जुघुणिषति/जुघोणिषति, **यकि** – घुण्यते ।

१३३९. घूर्ण – भ्रमणे । अकर्म, सेट्, परस्मै । 'भूवाद्योः घुणिघूर्ण्योः स्तां घोणते घूर्णते शपि । भ्रमणेऽत्र तुदाद्योः शे स्यातां घुणति घूर्णति' (श्लो. १९) इति देवः ।

१. लट् – घूर्णति घूर्णतः घूर्णन्ति । घूर्णसि घूर्णथः घूर्णथ । घूर्णामि घूर्णावः घूर्णामः । **२. लिट्** – जुघूर्ण जुघूर्णतुः जुघूर्णुः । जुघूर्णिथ जुघूर्णथुः जुघूर्ण । जुघूर्ण जुघूर्णिव जुघूर्णिम । **३. लुट्** – घूर्णिता घूर्णितारौ घूर्णितारः । घूर्णितासि घूर्णितास्थः घूर्णितास्थ । घूर्णितास्मि घूर्णितास्वः घूर्णितास्मः । **४. लृट्** – घूर्णिष्यति घूर्णिष्यतः घूर्णिष्यन्ति । घूर्णिष्यसि घूर्णिष्यथः घूर्णिष्यथ । घूर्णिष्यामि घूर्णिष्यावः घूर्णिष्यामः । **५. लोट्** – घूर्णतु, घूर्णतात् घूर्णताम् घूर्णन्तु । घूर्ण, घूर्णतात् घूर्णतम् घूर्णत । घूर्णानि घूर्णाव घूर्णाम । **६. लङ्** – अघूर्णत् अघूर्णताम् अघूर्णन् । अघूर्णः अघूर्णतम् अघूर्णत । अघूर्णम् अघूर्णाव अघूर्णाम । **७. विधिलिङ्** – घूर्णेत् घूर्णेताम् घूर्णेयुः । घूर्णेः घूर्णेतम् घूर्णेत । घूर्णेयम् घूर्णेव घूर्णेम । **८. आशीर्लिङ्** – घूर्ण्यात् घूर्ण्यास्ताम् घूर्ण्यासुः । घूर्ण्याः घूर्ण्यास्तम् घूर्ण्यास्त । घूर्ण्यासम् घूर्ण्यास्व घूर्ण्यास्म । **९. लुङ्** – अघूर्णीत् अघूर्णिष्टाम् अघूर्णिषुः । अघूर्णीः अघूर्णिष्टम् अघूर्णिष्ट । अघूर्णिषम् अघूर्णिष्व अघूर्णिष्म । **१०. लृङ्** – अघूर्णिष्यत् अघूर्णिष्यताम् अघूर्णिष्यन् । अघूर्णिष्यः अघूर्णिष्यतम् अघूर्णिष्यत । अघूर्णिष्यम् अघूर्णिष्याव अघूर्णिष्याम ।

णिचि – घूर्णयति/ते, **सनि** – जुघूर्णिषति, **यकि** – घूर्ण्यते ।

१३४०. षुर – ऐश्वर्यदीप्त्योः । अकर्म, सेट्, परस्मै ।

१. लट् – सुरति सुरतः सुरन्ति । सुरसि सुरथः सुरथ । सुरामि सुरावः सुरामः । **२. लिट्** – सुषोर सुषुरतुः सुषुरुः । सुषोरिथ सुषुरथुः सुषुर । सुषोर सुषुरिव सुषुरिम । **३. लुट्** – सोरिता सोरितारौ सोरितारः । सोरितासि सोरितास्थः सोरितास्थ । सोरितास्मि सोरितास्वः सोरितास्मः । **४. लृट्** –

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सोरिष्यति सोरिष्यतः सोरिष्यन्ति । सोरिष्यसि सोरिष्यथः सोरिष्यथ । सोरिष्यामि सोरिष्यावः सोरिष्यामः । **५. लोट्** – सुरतु, सुरतात् सुरताम् सुरन्तु । सुर, सुरतात् सुरतम् सुरत । सुराणि सुराव सुराम । **६. लङ्** – असुरत् असुरताम् असुरन् । असुरः असुरतम् असुरत । असुरम् असुराव असुराम । **७. विधिलिङ्** – सुरेत् सुरेताम् सुरेयुः । सुरेः सुरेतम् सुरेत । सुरेयम् सुरेव सुरेम । **८. आशीर्लिङ्** – सूर्यात् सूर्यास्ताम् सूर्यासुः । सूर्याः सूर्यास्तम् सूर्यास्त । सूर्यासम् सूर्यास्व सूर्यास्म । **९. लुङ्** – असोरीत् असोरिष्टाम् असोरिषुः । असोरीः असोरिष्टम् असोरिष्ट । असोरिषम् असोरिष्व असोरिष्म । **१०. लृङ्** – असोरिष्यत् असोरिष्यताम् असोरिष्यन् । असोरिष्यः असोरिष्यतम् असोरिष्यत । असोरिष्यम् असोरिष्याव असोरिष्याम ।

णिचि – सोरयति – ते, **सनि** – सुसुरिषति/सुसोरिषति, **यकि** – सूर्यते ।

१३४१. कुर – शब्दे । अकर्म, सेट्, परस्मै ।

१. लट् – कुरति कुरतः कुरन्ति । कुरसि कुरथः कुरथ । कुरामि कुरावः कुरामः । **२. लिट्** – चुकोर चुकुरतुः चुकुरुः । चुकोरिथ चुकुरथुः चुकुर । चुकोर चुकुरिव चुकुरिम । **३. लुट्** – कोरिता कोरितारौ कोरितारः । कोरितासि कोरितास्थः कोरितास्थ । कोरितास्मि कोरितास्वः कोरितास्मः । **४. लृट्** – कोरिष्यति कोरिष्यतः कोरिष्यन्ति । कोरिष्यसि कोरिष्यथः कोरिष्यथ । कोरिष्यामि कोरिष्यावः कोरिष्यामः । **५. लोट्** – कुरतु, कुरतात् कुरताम् कुरन्तु । कुर, कुरतात् कुरतम् कुरत । कुराणि कुराव कुराम । **६. लङ्** – अकुरत् अकुरताम् अकुरन् । अकुरः अकुरतम् अकुरत । अकुरम् अकुराव अकुराम । **७. विधिलिङ्** – कुरेत् कुरेताम् कुरेयुः । कुरेः कुरेतम् कुरेत । कुरेयम् कुरेव कुरेम । **८. आशीर्लिङ्** – कूर्यात् कूर्यास्ताम् कूर्यासुः । कूर्याः कूर्यास्तम् कूर्यास्त । कूर्यासम् कूर्यास्व कूर्यास्म । **९. लुङ्** – अकोरीत् अकोरिष्टाम् अकोरिषुः । अकोरीः अकोरिष्टम् अकोरिष्ट । अकोरिषम् अकोरिष्व अकोरिष्म । **१०. लृङ्** – अकोरिष्यत् अकोरिष्यताम् अकोरिष्यन् । अकोरिष्यः अकोरिष्यतम् अकोरिष्यत । अकोरिष्यम् अकोरिष्याव अकोरिष्याम ।

णिचि – कोरयति – ते, **सनि** – चुकुरिषति/चुकोरिषति, **यकि** – कूर्यते ।

१३४२. खुर – छेदने । सकर्म, सेट्, परस्मै । 'खण्डने इति मैत्रेयः ।

१. लट् – खुरति खुरतः खुरन्ति । खुरसि खुरथः खुरथ । खुरामि खुरावः खुरामः । **२. लिट्** – चुखोर चुखुरतुः चुखुरुः । चुखोरिथ चुखुरथुः चुखुर । चुखोर चुखुरिव चुखुरिम । **३. लुट्** – खोरिता खोरितारौ खोरितारः । खोरितासि खोरितास्थः खोरितास्थ । खोरितास्मि खोरितास्वः खोरितास्मः । **४. लृट्** – खोरिष्यति खोरिष्यतः खोरिष्यन्ति । खोरिष्यसि खोरिष्यथः खोरिष्यथ । खोरिष्यामि खोरिष्यावः खोरिष्यामः । **५. लोट्** – खुरतु, खुरतात् खुरताम् खुरन्तु । खुर, खुरतात् खुरतम् खुरत । खुराणि खुराव खुराम । **६. लङ्** – अखुरत् अखुरताम् अखुरन् । अखुरः अखुरतम् अखुरत । अखुरम् अखुराव अखुराम । **७. विधिलिङ्** – खुरेत् खुरेताम् खुरेयुः । खुरेः खुरेतम् खुरेत । खुरेयम् खुरेव खुरेम । **८. आशीर्लिङ्** – खूर्यात् खूर्यास्ताम् खूर्यासुः । खूर्याः खूर्यास्तम् खूर्यास्त । खूर्यासम् खूर्यास्व खूर्यास्म । **९. लुङ्** – अखोरीत् अखोरिष्टाम् अखोरिषुः । अखोरीः अखोरिष्टम् अखोरिष्ट । अखोरिषम् अखोरिष्व अखोरिष्म । **१०. लृङ्** – अखोरिष्यत् अखोरिष्यताम् अखोरिष्यन् । अखोरिष्यः अखोरिष्यतम् अखोरिष्यत । अखोरिष्यम् अखोरिष्याव अखोरिष्याम ।

णिचि – खोरयति – ते, **सनि** – चुखुरिषति/चुखोरिषति, **यकि** – खूर्यते ।

१३४३. मुर – संवेष्टने । सकर्म, सेट्, परस्मै । 'परिवेष्टने' इति मा.धा.वृतौ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् – मुरति मुरतः मुरन्ति । मुरसि मुरथः मुरथ । मुरामि मुरावः मुरामः । **२. लिट्** – मुमोर मुमुरतुः मुमुरुः । मुमोरिथ मुमुरथुः मुमुर । मुमोर मुमुरिव मुमुरिम । **३. लुट्** – मोरिता मोरितारौ मोरितारः । मोरितासि मोरितास्थः मोरितास्थ । मोरितास्मि मोरितास्वः मोरितास्मः । **४. लृट्** – मोरिष्यति मोरिष्यतः मोरिष्यन्ति । मोरिष्यसि मोरिष्यथः मोरिष्यथ । मोरिष्यामि मोरिष्यावः मोरिष्यामः । **५. लोट्** – मुरतु, मुरतात् मुरताम् मुरन्तु । मुर, मुरतात् मुरतम् मुरत । मुराणि मुराव मुराम । **६. लङ्** – अमुरत् अमुरताम् अमुरन् । अमुरः अमुरतम् अमुरत । अमुरम् अमुराव अमुराम । **७. विधिलिङ्** – मुरेत् मुरेताम् मुरेयुः । मुरेः मुरेतम् मुरेत । मुरेयम् मुरेव मुरेम । **८. आशीर्लिङ्** – मूर्यात् मूर्यास्ताम् मूर्यासुः । मूर्याः मूर्यास्तम् मूर्यास्त । मूर्यासम् मूर्यास्व मूर्यास्म । **९. लुङ्** – अमोरीत् अमोरिष्टाम् अमोरिषुः । अमोरीः अमोरिष्टम् अमोरिष्ट । अमोरिषम् अमोरिष्व अमोरिष्म । **१०. लृङ्** – अमोरिष्यत् अमोरिष्यताम् अमोरिष्यन् । अमोरिष्यः अमोरिष्यतम् अमोरिष्यत । अमोरिष्यम् अमोरिष्याव अमोरिष्याम ।

णिचि – मोरयति – ते, **सनि** – मुमुरिषति/मुमोरिषति, **यकि** – मूर्यते ।

१३४४. क्षुर – विलेखने । सकर्म, सेट्, परस्मै । विलेखनम् = छेदः ।

१. लट् – क्षुरति क्षुरतः क्षुरन्ति । क्षुरसि क्षुरथः क्षुरथ । क्षुरामि क्षुरावः क्षुरामः । **२. लिट्** – चुक्षोर चुक्षुरतुः चुक्षुरुः । चुक्षोरिथ चुक्षुरथुः चुक्षुर । चुक्षोर चुक्षुरिव चुक्षुरिम । **३. लुट्** – क्षोरिता क्षोरितारौ क्षोरितारः । क्षोरितासि क्षोरितास्थः क्षोरितास्थ । क्षोरितास्मि क्षोरितास्वः क्षोरितास्मः । **४. लृट्** – क्षोरिष्यति क्षोरिष्यतः क्षोरिष्यन्ति । क्षोरिष्यसि क्षोरिष्यथः क्षोरिष्यथ । क्षोरिष्यामि क्षोरिष्यावः क्षोरिष्यामः । **५. लोट्** – क्षुरतु, क्षुरतात् क्षुरताम् क्षुरन्तु । क्षुर, क्षुरतात् क्षुरतम् क्षुरत । क्षुराणि क्षुराव क्षुराम । **६. लङ्** – अक्षुरत् अक्षुरताम् अक्षुरन् । अक्षुरः अक्षुरतम् अक्षुरत । अक्षुरम् अक्षुराव अक्षुराम । **७. विधिलिङ्** – क्षुरेत् क्षुरेताम् क्षुरेयुः । क्षुरेः क्षुरेतम् क्षुरेत । क्षुरेयम् क्षुरेव क्षुरेम । **८. आशीर्लिङ्** – क्षूर्यात् क्षूर्यास्ताम् क्षूर्यासुः । क्षूर्याः क्षूर्यास्तम् क्षूर्यास्त । क्षूर्यासम् क्षूर्यास्व क्षूर्यास्म । **९. लुङ्** – अक्षोरीत् अक्षोरिष्टाम् अक्षोरिषुः । अक्षोरीः अक्षोरिष्टम् अक्षोरिष्ट । अक्षोरिषम् अक्षोरिष्व अक्षोरिष्म । **१०. लृङ्** – अक्षोरिष्यत् अक्षोरिष्यताम् अक्षोरिष्यन् । अक्षोरिष्यः अक्षोरिष्यतम् अक्षोरिष्यत । अक्षोरिष्यम् अक्षोरिष्याव अक्षोरिष्याम ।

णिचि – क्षोरयति – ते, **सनि** – चुक्षुरिषति/चुक्षोरिषति, **यकि** – क्षूर्यते ।

१३४५. घुर – भीमार्थशब्दयोः । अकर्म, सेट्, परस्मै ।

१. लट् – घुरति घुरतः घुरन्ति । घुरसि घुरथः घुरथ । घुरामि घुरावः घुरामः । **२. लिट्** – जुघोर जुघुरतुः जुघुरुः । जुघोरिथ जुघुरथुः जुघुर । जुघोर जुघुरिव जुघुरिम । **३. लुट्** – घोरिता घोरितारौ घोरितारः । घोरितासि घोरितास्थः घोरितास्थ । घोरितास्मि घोरितास्वः घोरितास्मः । **४. लृट्** – घोरिष्यति घोरिष्यतः घोरिष्यन्ति । घोरिष्यसि घोरिष्यथः घोरिष्यथ । घोरिष्यामि घोरिष्यावः घोरिष्यामः । **५. लोट्** – घुरतु, घुरतात् घुरताम् घुरन्तु । घुर, घुरतात् घुरतम् घुरत । घुराणि घुराव घुराम । **६. लङ्** – अघुरत् अघुरताम् अघुरन् । अघुरः अघुरतम् अघुरत । अघुरम् अघुराव अघुराम । **७. विधिलिङ्** – घुरेत् घुरेताम् घुरेयुः । घुरेः घुरेतम् घुरेत । घुरेयम् घुरेव घुरेम । **८. आशीर्लिङ्** – घूर्यात् घूर्यास्ताम् घूर्यासुः । घूर्याः घूर्यास्तम् घूर्यास्त । घूर्यासम् घूर्यास्व घूर्यास्म । **९. लुङ्** – अघोरीत् अघोरिष्टाम् अघोरिषुः । अघोरीः अघोरिष्टम् अघोरिष्ट । अघोरिषम् अघोरिष्व अघोरिष्म । **१०. लृङ्** – अघोरिष्यत् अघोरिष्यताम् अघोरिष्यन् । अघोरिष्यः अघोरिष्यतम् अघोरिष्यत । अघोरिष्यम् अघोरिष्याव अघोरिष्याम ।

णिचि – घोरयति – ते, **सनि** – जुघुरिषति/जुघोरिषति, **यकि** – घूर्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१३४६. पुर – अग्रगमने । अकर्म, सेट्, परस्मै ।

१. लट् – पुरति पुरतः पुरन्ति । पुरसि पुरथः पुरथ । पुरामि पुरावः पुरामः । **२. लिट्** – पुपोर पुपुरतुः पुपुरुः । पुपोरिथ पुपुरथुः पुपुर । पुपोर पुपुरिव पुपुरिम । **३. लुट्** – पोरिता पोरितारौ पोरितारः । पोरितासि पोरितास्थः पोरितास्थ । पोरितास्मि पोरितास्वः पोरितास्मः । **४. लृट्** – पोरिष्यति पोरिष्यतः पोरिष्यन्ति । पोरिष्यसि पोरिष्यथः पोरिष्यथ । पोरिष्यामि पोरिष्यावः पोरिष्यामः । **५. लोट्** – पुरतु, पुरतात् पुरताम् पुरन्तु । पुर, पुरतात् पुरतम् पुरत । पुराणि पुराव पुराम । **६. लङ्** – अपुरत् अपुरताम् अपुरन् । अपुरः अपुरतम् अपुरत । अपुरम् अपुराव अपुराम । **७. विधिलिङ्** – पुरेत् पुरेताम् पुरेयुः । पुरेः पुरेतम् पुरेत । पुरेयम् पुरेव पुरेम । **८. आशीर्लिङ्** – पूर्यात् पूर्यास्ताम् पूर्यासुः । पूर्याः पूर्यास्तम् पूर्यास्त । पूर्यासम् पूर्यास्व पूर्यास्म । **९. लुङ्** – अपोरीत् अपोरिष्टाम् अपोरिषुः । अपोरीः अपोरिष्टम् अपोरिष्ट । अपोरिषम् अपोरिष्व अपोरिष्म । **१०. लृङ्** – अपोरिष्यत् अपोरिष्यताम् अपोरिष्यन् । अपोरिष्यः अपोरिष्यतम् अपोरिष्यत । अपोरिष्यम् अपोरिष्याव अपोरिष्याम ।

णिचि – पोरयति-ते, **सनि** – पुपुरिषति/पुपोरिषति, **यकि** – पूर्यते ।

१३४७. वृहू – उद्यमने । सकर्म, वेट्, परस्मै । 'उद्यमः = उद्धरणम्' इति क्षीरस्वामी । दन्त्योष्ठ्यादिः इति सर्वे । केचित् 'बृहू पवर्गादिः' इति । क्षीरतरङ्गिण्यामपि 'बृहू' इत्येव दृश्यते ।

१. लट् - (i) विनक्ति विङ्क्तः विञ्चन्ति । विनक्षि विङ्क्थः विङ्क्थ । विनच्मि विञ्च्वः विञ्च्मः । (ii) विङ्क्ते विञ्चाते विञ्चते । विङ्क्षे विञ्चाथे विङ्ग्ध्वे । विञ्चे विञ्च्वहे विञ्च्महे । **२. लिट्** - (i) विवेच विविचतुः विविचुः । विवेचिथ विविचथुः विविच । विवेच विविचिव विविचिम । (ii) विविचे विविचाते विविचिरे । विविचिषे विविचाथे विविचिध्वे । विविचे विविचिवहे विविचिमहे । **३. लुट्** - (i) वेक्ता वेक्तारौ वेक्तारः । वेक्तासि वेक्तास्थः वेक्तास्थ । वेक्तास्मि वेक्तास्वः वेक्तास्मः । (ii) वेक्ता वेक्तारौ वेक्तारः । वेक्तासे वेक्तासाथे वेक्ताध्वे । वेक्ताहे वेक्तास्वहे वेक्तास्महे । **४. लृट्** - (i) वेक्ष्यति वेक्ष्यतः वेक्ष्यन्ति । वेक्ष्यसि वेक्ष्यथः वेक्ष्यथ । वेक्ष्यामि वेक्ष्यावः वेक्ष्यामः । (ii) वेक्ष्यते वेक्ष्येते वेक्ष्यन्ते । वेक्ष्यसे वेक्ष्येथे वेक्ष्यध्वे । वेक्ष्ये वेक्ष्यावहे वेक्ष्यामहे । **५. लोट्** - (i) विनक्तु, विङ्क्तात् विङ्क्ताम् विञ्चन्तु । विङ्ग्धि, विङ्क्तात् विङ्क्तम् विङ्क्त । विनचानि विनचाव विनचाम । (ii) विङ्क्ताम् विञ्चाताम् विञ्चताम् । विङ्क्ष्व विञ्चाथाम् विङ्ग्ध्वम् । विनचै विनचावहै विनचामहै । **६. लङ्** - (i) अविनग्-क् अविङ्क्ताम् अविञ्चन् । अविनग्-क् अविङ्क्तम् अविङ्क्त । अविनचम् अविञ्च्व अविञ्च्म । (ii) अविङ्क्त अविञ्चाताम् अविञ्चत । अविङ्क्था अविञ्चाथाम् अविङ्ग्ध्वम् । अविञ्चि अविञ्च्वहि अविञ्च्महि । **७. विधिलिङ्** - (i) विञ्च्यात् विञ्च्याताम् विञ्च्युः । विञ्च्याः विञ्च्यातम् विञ्च्यात । विञ्च्याम् विञ्च्याव विञ्च्याम । (ii) विञ्चीत विञ्चीयाताम् विञ्चीरन् । विञ्चीथाः विञ्चीयाथाम् विञ्चीध्वम् । विञ्चीय विञ्चीवहि विञ्चीमहि । **८. आशीर्लिङ्** - (i) विच्यात् विच्यास्ताम् विच्यासुः । विच्याः विच्यास्तम् विच्यास्त । विच्यासम् विच्यास्व विच्यास्म । (ii) विक्षीष्ट विक्षीयास्ताम् विक्षीरन् । विक्षीष्ठाः विक्षीयास्थाम् विक्षीध्वम् । विक्षीय विक्षीवहि विक्षीमहि । **९. लुङ्** - (i) अविचत् अविचताम् अविचन् । अविचः अविचतम् अविचत । अविचम् अविचाव अविचाम । (ii) अवैक्षीत् अवैक्ताम् अवैक्षुः । अवैक्षीः अवैक्तम् अवैक्त । अवैक्षम् अवैक्ष्व अवैक्ष्म । (iii) अविक्त अविक्षाताम् अविक्षत । अविक्थाः अविक्षाथाम् अविग्ध्वम् । अविक्षि अविक्ष्वहि अविक्ष्महि । **१०. लृङ्** - (i) अवेक्ष्यत् अवेक्ष्यताम् अवेक्ष्यन् । अवेक्ष्यः अवेक्ष्यतम् अवेक्ष्यत । अवेक्ष्यम् अवेक्ष्याव अवेक्ष्याम । (ii) अवेक्ष्यत अवेक्ष्येताम् अवेक्ष्यन्त । अवेक्ष्यथाः अवेक्ष्येथाम् अवेक्ष्यध्वम् । अवेक्ष्ये अवेक्ष्यावहि अवेक्ष्यामहि ।

णिचि - वेचयति-ते, **सनि** - विविक्षति-ते, **यकि** - विच्यते ।

१४४३. क्षुदिर् - सम्पेषणे । सकर्म, अनिट्, उभय ।

१. लट् - (i) क्षुणत्ति क्षुन्तः क्षुन्दन्ति । क्षुणत्सि क्षुन्थः क्षुन्थ । क्षुणद्मि क्षुन्द्वः क्षुन्द्मः । (ii) क्षुन्ते क्षुन्दाते क्षुन्दते । क्षुन्त्से क्षुन्दाथे क्षुन्ध्वे । क्षुन्दे क्षुन्द्वहे क्षुन्द्महे । **२. लिट्** - (i) चुक्षोद चुक्षुदतुः चुक्षुदुः । चुक्षोदिथ चुक्षुदथुः चुक्षुद । चुक्षोद चुक्षुदिव चुक्षुदिम । (ii) चुक्षुदे चुक्षुदाते चुक्षुदिरे । चुक्षुदिषे चुक्षुदाथे चुक्षुदिध्वे । चुक्षुदे चुक्षुदिवहे चुक्षुदिमहे । **३. लुट्** - (i) क्षोत्ता क्षोत्तारौ क्षोत्तारः । क्षोत्तासि क्षोत्तास्थः क्षोत्तास्थ । क्षोत्तास्मि क्षोत्तास्वः क्षोत्तास्मः । (ii) क्षोत्ता क्षोत्तारौ क्षोत्तारः । क्षोत्तासे क्षोत्तासाथे क्षोत्ताध्वे । क्षोत्ताहे क्षोत्तास्वहे क्षोत्तास्महे । **४. लृट्** - (i) क्षोत्स्यति क्षोत्स्यतः क्षोत्स्यन्ति । क्षोत्स्यसि क्षोत्स्यथः क्षोत्स्यथ । क्षोत्स्यामि क्षोत्स्यावः क्षोत्स्यामः । (ii) क्षोत्स्यते क्षोत्स्येते क्षोत्स्यन्ते । क्षोत्स्यसे क्षोत्स्येथे क्षोत्स्यध्वे । क्षोत्स्ये क्षोत्स्यावहे क्षोत्स्यामहे । **५. लोट्** - (i) क्षुणत्तु, क्षुन्तात् क्षुन्ताम् क्षुन्दन्तु । क्षुन्धि, क्षुन्तात् क्षुन्तम् क्षुन्त । क्षुणदानि क्षुणदाव क्षुणदाम । (ii) क्षुन्ताम् क्षुन्दाताम् क्षुन्दताम् । क्षुन्त्स्व क्षुन्दाथाम् क्षुन्ध्वम् । क्षुणदै क्षुणदावहै क्षुणदामहै । **६. लङ्** - (i) अक्षुणत् अक्षुन्ताम् अक्षुन्दन् । अक्षुणत्-द् अक्षुन्तम् अक्षुन्त । अक्षुणदम् अक्षुन्द्व अक्षुन्द्म । (ii) अक्षुन्त अक्षुन्दाताम् अक्षुन्दत । अक्षुन्थाः अक्षुन्दाथाम् अक्षुन्ध्वम् । अक्षुन्दि अक्षुन्द्वहि अक्षुन्द्महि । **७. विधिलिङ्** - (i) क्षुन्द्यात् क्षुन्द्याताम् क्षुन्द्युः । क्षुन्द्याः क्षुन्द्यातम् क्षुन्द्यात ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षुन्द्याम् क्षुन्द्याव क्षुन्द्याम । (ii) क्षुन्दीत क्षुन्दीयाताम् क्षुन्दीरन् । क्षुन्दीथाः क्षुन्दीयाथाम् क्षुन्दीध्वम् । क्षुन्दीय क्षुन्दीवहि क्षुन्दीमहि । **८. आशीर्लिङ्** - (i) क्षुद्यात् क्षुद्यास्ताम् क्षुद्यासुः । क्षुद्याः क्षुद्यास्तम् क्षुद्यास्त । क्षुद्यासम् क्षुद्यास्व क्षुद्यास्म । (ii) क्षुत्सीष्ट क्षुत्सीयास्ताम् क्षुत्सीरन् । क्षुत्सीष्ठाः क्षुत्सीयास्थाम् क्षुत्सीध्वम् । क्षुत्सीय क्षुत्सीवहि क्षुत्सीमहि । **९. लुङ्** - (i) अक्षुदत् अक्षुदताम् अक्षुदन् । अक्षुदः अक्षुदतम् अक्षुदत । अक्षुदम् अक्षुदाव अक्षुदाम । (ii) अक्षौत्सीत् अक्षौत्ताम् अक्षौत्सुः । अक्षौत्सीः अक्षौत्तम् अक्षौत्त । अक्षौत्सम् अक्षौत्स्व अक्षौत्स्म । (iii) अक्षुत्त अक्षुत्साताम् अक्षुत्सत । अक्षुत्थाः अक्षुत्साथाम् अक्षुद्ध्वम् । अक्षुत्सि अक्षुत्स्वहि अक्षुत्स्महि । **१०. लृङ्** - (i) अक्षोत्स्यत् अक्षोत्स्यताम् अक्षोत्स्यन् । अक्षोत्स्यः अक्षोत्स्यतम् अक्षोत्स्यत । अक्षोत्स्यम् अक्षोत्स्याव अक्षोत्स्याम । (ii) अक्षोत्स्यत अक्षोत्स्येताम् अक्षोत्स्यन्त । अक्षोत्स्यथाः अक्षोत्स्येथाम् अक्षोत्स्यध्वम् । अक्षोत्स्ये अक्षोत्स्यावहि अक्षोत्स्यामहि । **णिचि** - क्षोदयति-ते, **सनि** - चुक्षुत्सति-ते, **यकि** - क्षुद्यते ।

१४४४. युजिर् - योगे । सकर्म, अनिट्, उभय । 'युनक्ति युङ्क्ते योगार्थे समाधौ युज्यते श्यनि' (श्लो.६४) इति देवः । **१. लट्** - (i) युनक्ति युङ्क्तः युञ्जन्ति । युनक्षि युङ्क्थः युङ्क्थ । युनज्मि युञ्ज्वः युञ्ज्मः । (ii) युङ्क्ते युञ्जाते युञ्जते । युङ्क्षे युञ्जाथे युङ्ग्ध्वे । युञ्जे युञ्ज्वहे युञ्ज्महे । **२. लिट्** - (i) युयोज युयुजतुः युयुजुः । युयोजिथ युयुजथुः युयुज । युयोज युयुजिव युयुजिम । (ii) युयुजे युयुजाते युयुजिरे । युयुजिषे युयुजाथे युयुजिध्वे । युयुजे युयुजिवहे युयुजिमहे । **३. लुट्** - (i) योक्ता योक्तारौ योक्तारः । योक्तासि योक्तास्थः योक्तास्थ । योक्तास्मि योक्तास्वः योक्तास्मः । (ii) योक्ता योक्तारौ योक्तारः । योक्तासे योक्तासाथे योक्ताध्वे । योक्ताहे योक्तास्वहे योक्तास्महे । **४. लृट्** - (i) योक्ष्यति योक्ष्यतः योक्ष्यन्ति । योक्ष्यसि योक्ष्यथः योक्ष्यथ । योक्ष्यामि योक्ष्यावः योक्ष्यामः । (ii) योक्ष्यते योक्ष्येते योक्ष्यन्ते । योक्ष्यसे योक्ष्येथे योक्ष्यध्वे । योक्ष्ये योक्ष्यावहे योक्ष्यामहे । **५. लोट्** - (i) युनक्तु युङ्क्तात् युङ्क्ताम् युञ्जन्तु । युङ्ग्धि, युङ्क्तात् युङ्क्तम् युङ्क्त । युनजानि युनजाव युनजाम । (ii) युङ्क्ताम् युञ्जाताम् युञ्जताम् । युङ्क्ष्व युञ्जाथाम् युङ्ग्ध्वम् । युनजै युनजावहै युनजामहै । **६. लङ्** - (i) अयुनक् अयुङ्क्ताम् अयुञ्जन् । अयुनक् अयुङ्क्तम् अयुङ्क्त । अयुनजम् अयुञ्ज्व अयुञ्ज्म । (ii) अयुङ्क्त अयुञ्जाताम् अयुञ्जत । अयुङ्क्थाः अयुञ्जाथाम् अयुङ्ग्ध्वम् । अयुञ्जि अयुञ्ज्वहि अयुञ्ज्महि । **७. विधिलिङ्** - (i) युञ्ज्यात् युञ्ज्याताम् युञ्ज्युः । युञ्ज्याः युञ्ज्यातम् युञ्ज्यात । युञ्ज्याम् युञ्ज्याव युञ्ज्याम । (ii) युञ्जीत युञ्जीयाताम् युञ्जीरन् । युञ्जीथाः युञ्जीयाथाम् युञ्जीध्वम् । युञ्जीय युञ्जीवहि युञ्जीमहि । **८. आशीर्लिङ्** - (i) युज्यात् युज्यास्ताम् युज्यासुः । युज्याः युज्यास्तम् युज्यास्त । युज्यासम् युज्यास्व युज्यास्म । (ii) युक्षीष्ट युक्षीयास्ताम् युक्षीरन् । युक्षीष्ठाः युक्षीयास्थाम् युक्षीध्वम् । युक्षीय युक्षीवहि युक्षीमहि । **९. लुङ्** - (i) अयुजत् अयुजताम् अयुजन् । अयुजः अयुजतम् अयुजत । अयुजम् अयुजाव अयुजाम । (ii) अयौक्षीत् अयौक्ताम् अयौक्षुः । अयौक्षीः अयौक्तम् अयौक्त । अयौक्षम् अयौक्ष्व अयौक्ष्म । (iii) अयुक्त अयुक्षाताम् अयुक्षत । अयुक्थाः अयुक्षाथाम् अयुग्ध्वम् । अयुक्षि अयुक्ष्वहि अयुक्ष्महि । **१०. लृङ्** - (i) अयोक्ष्यत् अयोक्ष्यताम् अयोक्ष्यन् । अयोक्ष्यः अयोक्ष्यतम् अयोक्ष्यत । अयोक्ष्यम् अयोक्ष्याव अयोक्ष्याम । (ii) अयोक्ष्यत अयोक्ष्येताम् अयोक्ष्यन्त । अयोक्ष्यथाः अयोक्ष्येथाम् अयोक्ष्यध्वम् । अयोक्ष्ये अयोक्ष्यावहि अयोक्ष्यामहि । **णिचि** - योजयति-ते, **सनि** - युयुक्षति-ते, **यकि** - युज्यते ।

१४४५. उ छृदिर् - दीप्तिदेवनयोः । दीप्तौ अकः, देवने सकर्मकः, सेट्, उभय । 'छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे । छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्नमि' (श्लो.११५) इति देवः । देवनम् - क्रीडा-विजिगीषादिः । 'दीप्तिवमनयोः इत्येके' इति धातुकाव्यव्याख्या । (३.२)
१. लट् - (i) छृणत्ति छृन्तः छृन्दन्ति । छृणत्सि छृन्थः छृन्थ । छृणद्मि छृन्द्वः छृन्द्मः । (ii) छृन्ते छृन्दाते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

छृन्दते । छृन्त्से छृन्दाथे छृन्ध्वे । छृन्दे छृन्द्वहे छृन्द्महे । **२. लिट्** – (i) चच्छर्द चच्छृदतुः चच्छृदुः । चच्छर्दिथ चच्छृदथुः चच्छृद । चच्छर्द चच्छृदिव चच्छृदिम । (ii) चच्छृदे चच्छृदाते चच्छृदिरे । चच्छृदिषे-चच्छृत्से चच्छृदाथे चच्छृदिध्वे । चच्छृदे चच्छृदिवहे चच्छृदिमहे । **३. लुट्** – (i) छर्दिता छर्दितारौ छर्दितारः । छर्दितासि छर्दितास्थः छर्दितास्थ । छर्दितास्मि छर्दितास्वः छर्दितास्मः । (ii) छर्दिता छर्दितारौ छर्दितारः । छर्दितासे छर्दितासाथे छर्दिताध्वे । छर्दिताहे छर्दितास्वहे छर्दितास्महे । **४. लृट्** – (i) छर्दिष्यति छर्दिष्यतः छर्दिष्यन्ति । छर्दिष्यसि छर्दिष्यथः छर्दिष्यथ । छर्दिष्यामि छर्दिष्यावः छर्दिष्यामः । (ii) छर्त्स्यति[1] छर्त्स्यतः छर्त्स्यन्ति । छर्त्स्यसि छर्त्स्यथः छर्त्स्यथ । छर्त्स्यामि छर्त्स्यावः छर्त्स्यामः । (iii) छर्दिष्यते छर्दिष्येते छर्दिष्यन्ते । छर्दिष्यसे छर्दिष्येथे छर्दिष्यध्वे । छर्दिष्ये छर्दिष्यावहे छर्दिष्यामहे । (iv) छर्त्स्यते छर्त्स्येते छर्त्स्यन्ते । छर्त्स्यसे छर्त्स्येथे छर्त्स्यध्वे । छर्त्स्ये छर्त्स्यावहे छर्त्स्यामहे । **५. लोट्** – (i) छृणत्तु, छृन्तात् छृन्ताम् छृन्दन्तु । छृन्धि, छृन्तात् छृन्तम् छृन्त । छृणदानि छृणदाव छृणदाम । (ii) छृन्ताम् छृन्दाताम् छृन्दताम् । छृन्त्स्व छृन्दाथाम् छृन्ध्वम् । छृणदै छृणदावहै छृणदामहै । **६. लङ्** – (i) अच्छृणत् अच्छृन्ताम् अच्छृन्दन् । अच्छृणद्-त्-अच्छृणः अच्छृन्तम् अच्छृन्त । अच्छृणदम् अच्छृन्द्व अच्छृन्द्म । (ii) अच्छृन्त अच्छृन्दाताम् अच्छृन्दत । अच्छृन्थाः अच्छृन्दाथाम् अच्छृन्ध्वम् । अच्छृन्दि अच्छृन्द्वहि अच्छृन्द्महि ।
७. विधिलिङ् – (i) छृन्द्यात् छृन्द्याताम् छृन्द्युः । छृन्द्याः छृन्द्यातम् छृन्द्यात । छृन्द्याम् छृन्द्याव छृन्द्याम । (ii) छृन्दीत छृन्दीयाताम् छृन्दीरन् । छृन्दीथाः छृन्दीयाथाम् छृन्दीध्वम् । छृन्दीय छृन्दीवहि छृन्दीमहि ।
८. आशीर्लिङ् – (i) छृद्यात् छृद्यास्ताम् छृद्यासुः । छृद्याः छृद्यास्तम् छृद्यास्त । छृद्यासम् छृद्यास्व छृद्यास्म । (ii) छृत्सीष्ट छृत्सीयास्ताम् छृत्सीरन् । छृत्सीष्ठाः छृत्सीयास्थाम् छृत्सीध्वम् । छृत्सीय छृत्सीवहि छृत्सीमहि । (iii) छर्दिषीष्ट छर्दिषीयास्ताम् छर्दिषीरन् । छर्दिषीष्ठाः छर्दिषीयास्थाम् छर्दिषीध्वम् । छर्दिषीय छर्दिषीवहि छर्दिषीमहि । **९. लुङ्** – (i) अच्छृदत् अच्छृदताम् अच्छृदन् । अच्छृदः अच्छृदतम् अच्छृदत । अच्छृदम् अच्छृदाव अच्छृदाम । (ii) अच्छर्दीत् अच्छर्दिष्टाम् अच्छर्दिषुः । अच्छर्दीः अच्छर्दिष्टम् अच्छर्दिष्ट । अच्छर्दिम् अच्छर्दिष्व अच्छर्दिष्म । (iii) अच्छृत्त अच्छृत्साताम् अच्छृत्सत । अच्छृत्थाः अच्छृत्साथाम् अच्छृद्ध्वम् । अच्छृत्सि अच्छृत्स्वहि अच्छृत्स्महि । (iv) अच्छर्दिष्ट अच्छर्दिषाताम् अच्छर्दिषत । अच्छर्दिष्ठाः अच्छर्दिषाथाम् अच्छर्दिध्वम् । अच्छर्दिषि अच्छर्दिष्वहि अच्छर्दिष्महि । **१०. लृङ्** – (i) अच्छर्दिष्यत् अच्छर्दिष्यताम् अच्छर्दिष्यन् । अच्छर्दिष्यः अच्छर्दिष्यतम् अच्छर्दिष्यत । अच्छर्दिष्यम् अच्छर्दिष्याव अच्छर्दिष्याम । (ii) अच्छर्त्स्यत् अच्छर्त्स्यताम् अच्छर्त्स्यन् । अच्छर्त्स्यः अच्छर्त्स्यतम् अच्छर्त्स्यत । अच्छर्त्स्यम् अच्छर्त्स्याव अच्छर्त्स्याम । (iii) अच्छर्दिष्यत अच्छर्दिष्येताम् अच्छर्दिष्यन्त । अच्छर्दिष्यथाः अच्छर्दिष्येथाम् अच्छर्दिष्यध्वम् । अच्छर्दिष्ये अच्छर्दिष्यावहि अच्छर्दिष्यामहि । (iv) अच्छर्त्स्यत अच्छर्त्स्येताम् अच्छर्त्स्यन्त । अच्छर्त्स्यथाः अच्छर्त्स्येथाम् अच्छर्त्स्यध्वम् । अच्छर्त्स्ये अच्छर्त्स्यावहि अच्छर्त्स्यामहि ।
णिचि – छर्दयति-ते, **सनि** – चिच्छर्दिषति/चिछृत्सति/ते, **यकि** – छृद्यते ।

१. 'सेऽसिचि कृतचृतच्छृततृदनुतः' इति वेट् ।

१४४६. उ तृदिर् – हिंसानादरयोः । सकर्म, सेट्, उभय ।

१. लट् – (i) तृणत्ति तृन्तः तृन्दन्ति । तृणत्सि तृन्थः तृन्थ । तृणद्मि तृन्द्वः तृन्द्मः । (ii) तृन्ते तृन्दाते तृन्दते । तृन्त्से तृन्दाथे तृन्ध्वे । तृन्दे तृन्द्वहे तृन्द्महे । **२. लिट्** – (i) ततर्द ततृदतुः ततृदुः । ततर्दिथ ततृदथुः ततृद । ततर्द ततृदिव ततृदिम । (ii) ततृदे ततृदाते ततृदिरे । ततृदिषे ततृदाथे ततृदिध्वे । ततृदे ततृदिवहे ततृदिमहे । **३. लुट्** – (i) तर्दिता तर्दितारौ तर्दितारः । तर्दितासि तर्दितास्थः तर्दितास्थ । तर्दितास्मि तर्दितास्वः तर्दितास्म । (ii) तर्दिता तर्दितारौ तर्दितारः । तर्दितासे तर्दितासाथे तर्दिताध्वे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तर्दिताहे तर्दितास्वहे तर्दितास्महे । **४. लृट्** - (i) तर्दिष्यति तर्दिष्यतः तर्दिष्यन्ति । तर्दिष्यसि तर्दिष्यथः तर्दिष्यथ । तर्दिष्यामि तर्दिष्यावः तर्दिष्यामः । (ii) तर्त्स्यति[1], तर्त्स्यतः तर्त्स्यन्ति । तर्त्स्यसि तर्त्स्यथः तर्त्स्यथ । तर्त्स्यामि तर्त्स्यावः तर्त्स्यामः । (iii) तर्दिष्यते तर्दिष्येते तर्दिष्यन्ते । तर्दिष्यसे तर्दिष्येथे तर्दिष्यध्वे । तर्दिष्ये तर्त्स्यावहे तर्त्स्यामहे । (iv) तर्त्स्यते तर्त्स्येते तर्त्स्यन्ते । तर्त्स्यसे तर्त्स्येथे तर्त्स्यध्वे । तर्त्स्ये तर्त्स्यावहे तर्त्स्यामहे । **५. लोट्** - (i) तृणत्तु, तृन्तात् तृन्ताम् तृन्दन्तु । तृन्धि, तृन्तात् तृन्तम् तृन्त । तृणदानि तृणदाव तृणदाम । (ii) तृन्ताम् तृन्दाताम् तृन्दताम् । तृन्त्स्व तृन्दाथाम् तृन्ध्वम् । तृणदै तृणदावहै तृणदामहै । **६. लङ्** - (i) अतृणत् अतृन्ताम् अतृन्दन् । अतृणद्-त्-अतृणः अतृन्तम् अतृन्त । अतृणदम् अतृन्द्व अतृन्द्म । (ii) अतृन्त अतृन्दाताम् अतृन्दत । अतृन्थाः अतृन्दाथाम् अतृन्ध्वम् । अतृन्दि अतृन्द्वहि अतृन्द्महि । **७. विधिलिङ्** - (i) तृन्द्यात् तृन्द्याताम् तृन्द्युः । तृन्द्याः तृन्द्यातम् तृन्द्यात । तृन्द्याम् तृन्द्याव तृन्द्याम । (ii) तृन्दीत तृन्दीयाताम् तृन्दीरन् । तृन्दीथाः तृन्दीयाथाम् तृन्दीध्वम् । तृन्दीय तृन्दीवहि तृन्दीमहि । **८. आशीर्लिङ्** - (i) तृद्यात् तृद्यास्ताम् तृद्यासुः । तृद्याः तृद्यास्तम् तृद्यास्त । तृद्यासम् तृद्यास्व तृद्यास्म । (ii) तृत्सीष्ट तृत्सीयास्ताम् तृत्सीरन् । तृत्सीष्ठाः तृत्सीयास्थाम् तृत्सीध्वम् । तृत्सीय तृत्सीवहि तृत्सीमहि । (iii) तर्दिषीष्ट तर्दिषीयास्ताम् तर्दिषीरन् । तर्दिषीष्ठाः तर्दिषीयास्थाम् तर्दिषीध्वम् । तर्दिषीय तर्दिषीवहि तर्दिषीमहि । **९. लुङ्** - (i) अतृदत् अतृदताम् अतृदन् । अतृदः अतृदतम् अतृदत । अतृदम् अतृदाव अतृदाम । (ii) अतर्दीत् अतर्दिष्टाम् अतर्दिषुः । अतर्दीः अतर्दिष्टम् अतर्दिष्ट । अतर्दिम् अतर्दिष्व अतर्दिष्म । (iii) अतृत्त अतृत्साताम् अतृत्सत । अतृत्थाः अतृत्साथाम् अतृद्ध्वम् । अतृत्सि अतृत्स्वहि अतृत्स्महि । (iv) अतर्दिष्ट अतर्दिषाताम् अतर्दिषत । अतर्दिष्ठाः अतर्दिषाथाम् अतर्दिध्वम् । अतर्दिषि अतर्दिष्वहि अतर्दिष्महि । **१०. लृङ्** - (i) अतर्दिष्यत् अतर्दिष्यताम् अतर्दिष्यन् । अतर्दिष्यः अतर्दिष्यतम् अतर्दिष्यत । अतर्दिष्यम् अतर्दिष्याव अतर्दिष्याम । (ii) अतर्त्स्यत् अतर्त्स्यताम् अतर्त्स्यन् । अतर्त्स्यः अतर्त्स्यतम् अतर्त्स्यत । अतर्त्स्यम् अतर्त्स्याव अतर्त्स्याम । (iii) अतर्दिष्यत अतर्दिष्येताम् अतर्दिष्यन्त । अतर्दिष्यथाः अतर्दिष्येथाम् अतर्दिष्यध्वम् । अतर्दिष्ये अतर्दिष्यावहि अतर्दिष्यामहि । (iv) अतर्त्स्यत अतर्त्स्येताम् अतर्त्स्यन्त । अतर्त्स्यथाः अतर्त्स्येथाम् अतर्त्स्यध्वम् । अतर्त्स्ये अतर्त्स्यावहि अतर्त्स्यामहि ।

णिचि - तर्दयति-ते, **सनि** - तितर्दिषति/तितृत्सति, **यकि** - तृद्यते ।

१. 'सेऽसिचि कृतचृतच्छृततृदनृतः' इति वेट् ।

१४४७. कृती - वेष्टने । सकर्म, सेट्, परस्मै । 'कृणत्ति कृन्ततीत्येते वेष्टने च्छेदने क्रमात् । कीर्तयेदिति संशब्दे' (श्लो. ९५) इति देवः ।

१. लट् - कृणत्ति कृन्तः कृन्तन्ति । कृणत्सि कृन्थः कृन्थ । कृणत्मि कृन्त्व कृन्त्मः । **२. लिट्** - चकर्त चकृततुः चकृतुः । चकर्तिथ चकृतथुः चकृत । चकर्त चकृतिव चकृतिम । **३. लुट्** - कर्तिता कर्तितारौ कर्तितारः । कर्तितासि कर्तितास्थः कर्तितास्थ । कर्तितास्मि कर्तितास्वः कर्तितास्मः । **४. लृट्** - (i) कर्तिष्यति कर्तिष्यतः कर्तिष्यन्ति । कर्तिष्यसि कर्तिष्यथः कर्तिष्यथ । कर्तिष्यामि कर्तिष्यावः कर्तिष्यामः । (ii) कर्त्स्यति[1] कर्त्स्यतः कर्त्स्यन्ति । कर्त्स्यसि कर्त्स्यथः कर्त्स्यथ । कर्त्स्यामि कर्त्स्यावः कर्त्स्यामः । **५. लोट्** - कृणत्तु, कृन्तात् कृन्ताम् कृन्तन्तु । कृन्धि, कृन्तात् कृन्तम् कृन्त । कृणतानि कृणताव कृणताम । **६. लङ्** - अकृणत् अकृन्ताम् अकृन्तन् । अकृणद्-त्-अकृणः अकृन्तम् अकृन्त । अकृणतम् अकृन्त्व अकृन्त्म । **७. विधिलिङ्** - कृन्त्यात् कृन्त्याताम् कृन्त्युः । कृन्त्याः कृन्त्यातम् कृन्त्यात । कृन्त्याम् कृन्त्याव कृन्त्याम । **८. आशीर्लिङ्** - कृत्यात् कृत्यास्ताम् कृत्यासुः । कृत्याः कृत्यास्तम् कृत्यास्त । कृत्यासम् कृत्यास्व कृत्यास्म । **९. लुङ्** - अकर्तीत् अकर्तिष्टाम् अकर्तिषुः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकर्तीः अकर्तिष्टम् अकर्तिष्ट । अकर्तिम् अकर्तिष्व अकर्तिष्म । **१०. लृङ्** - (i) अकर्तिष्यत् अकर्तिष्यताम् अकर्तिष्यन् । अकर्तिष्यः अकर्तिष्यतम् अकर्तिष्यत । अकर्तिष्यम् अकर्तिष्याव अकर्तिष्याम । (ii) अकर्त्स्यत् अकर्त्स्यताम् अकर्त्स्यन् । अकर्त्स्यः अकर्त्स्यतम् अकर्त्स्यत । अकर्त्स्यम् अकर्त्स्याव अकर्त्स्याम ।

णिचि - कर्तयति-ते, **सनि** - चिकर्तिषति/चिकृत्सति, **यकि** - कृत्यते ।

१. 'सेऽसिचि कृतचृतछृदतृदनृतः' इति इड् वा ।

१४४८. ञि इन्धी - दीप्तौ । अकर्म, सेट्, आत्मने । दीपनायामपि प्रयुज्यते ।

१. लट् - इन्धे इन्धाते इन्धते । इन्त्से इन्धाथे इन्ध्वे । इन्धे इन्ध्वहे इन्ध्महे । **२. लिट्** - (i) इन्धाञ्चक्रे इन्धाञ्चक्राते इन्धाञ्चक्रिरे । इन्धाञ्चकृषे इन्धाञ्चक्राथे इन्धाञ्चकृढ्वे । इन्धाञ्चक्रे इन्धाञ्चकृवहे इन्धाञ्चकृमहे । (ii) इन्धाम्बभूव इन्धाम्बभूवतुः इन्धाम्बभूवुः । इन्धाम्बभूविथ इन्धाम्बभूवथुः इन्धाम्बभूव । इन्धाम्बभूव इन्धाम्बभूविव इन्धाम्बभूविम । (iii) इन्धामास इन्धामासतुः इन्धामासुः । इन्धामासिथ इन्धामासथुः इन्धामास । इन्धामास इन्धामासिव इन्धामासिम । **३. लुट्** - इन्धिता इन्धितारौ इन्धितारः । इन्धितासे इन्धितासाथे इन्धिताध्वे । इन्धिताहे इन्धितास्वहे इन्धितास्महे । **४. लृट्** - इन्धिष्यते इन्धिष्येते इन्धिष्यन्ते । इन्धिष्यसे इन्धिष्येथे इन्धिष्यध्वे । इन्धिष्ये इन्धिष्यावहे इन्धिष्यामहे । **५. लोट्** - इन्धाम् इन्धाताम् इन्धताम् । इन्त्स्व इन्धाथाम् इन्ध्वम् । इनधै इनधावहै इनधामहै । **६. लङ्** - ऐन्द्ध ऐन्धाताम् ऐन्धत । ऐन्द्धाः ऐन्धाथाम् ऐन्ध्वम् । ऐन्धि ऐन्ध्वहि ऐन्ध्महि । **७. विधिलिङ्** - इन्धीत इन्धीयाताम् इन्धीरन् । इन्धीथाः इन्धीयाथाम् इन्धीध्वम् । इन्धीय इन्धीवहि इन्धीमहि । **८. आशीर्लिङ्** - इन्धिषीष्ट इन्धिषीयास्ताम् इन्धिषीरन् । इन्धिषीष्ठाः इन्धिषीयास्थाम् इन्धिषीध्वम् । इन्धिषीय इन्धिषीवहि इन्धिषीमहि । **९. लुङ्** - ऐन्धिष्ट ऐन्धिषाताम् ऐन्धिषत । ऐन्धिष्ठाः ऐन्धिषाथाम् ऐन्धिध्वम् । ऐन्धिषि ऐन्धिष्वहि ऐन्धिष्महि । **१०. लृङ्** - ऐन्धिष्यत ऐन्धिष्येताम् ऐन्धिष्यन्त । ऐन्धिष्यथाः ऐन्धिष्येथाम् ऐन्धिष्यध्वम् । ऐन्धिष्ये ऐन्धिष्यावहि ऐन्धिष्यामहि ।

णिचि - इन्धयति-ते, **सनि** - इन्दिधिषते, **यकि** - इध्यते ।

१४४९. खिद - दैन्ये । अकर्म, अनिट्, आत्मने । 'दैन्येऽर्थे खिद्यते खिन्ते परितापे (घाते) तु खिन्दति' (श्लो. ११२) इति देवः ।

१. लट् - खिन्ते खिन्दाते खिन्दते । खिन्त्से खिन्दाथे खिन्ध्वे । खिन्दे खिन्द्वहे खिन्द्महे । **२. लिट्** - चिखिदे चिखिदाते चिखिदिरे । चिखिदिषे चिखिदाथे चिखिदिध्वे । चिखिदे चिखिदिवहे चिखिदिमहे । **३. लुट्** - खेत्ता खेत्तारौ खेत्तारः । खेत्तासे खेत्तासाथे खेत्ताध्वे । खेत्ताहे खेत्तास्वहे खेत्तास्महे । **४. लृट्** - खेत्स्यते खेत्स्येते खेत्स्यन्ते । खेत्स्यसे खेत्स्येथे खेत्स्यध्वे । खेत्स्ये खेत्स्यावहे खेत्स्यामहे । **५. लोट्** - खिन्ताम् खिन्दाताम् खिन्दताम् । खिन्त्स्व खिन्दाथाम् खिन्ध्वम् । खिनदै खिनदावहै खिनदामहै । **६. लङ्** - अखिन्त अखिन्दाताम् अखिन्दत । अखिन्थाः अखिन्दाथाम् अखिन्ध्वम् । अखिन्दि अखिन्द्वहि अखिन्द्महि । **७. विधिलिङ्** - खिन्दीत खिन्दीयाताम् खिन्दीरन् । खिन्दीथाः खिन्दीयाथाम् खिन्दीध्वम् । खिन्दीय खिन्दीवहि खिन्दीमहि । **८. आशीर्लिङ्** - खित्सीष्ट खित्सीयास्ताम् खित्सीरन् । खित्सीष्ठाः खित्सीयास्थाम् खित्सीध्वम् । खित्सीय खित्सीवहि खित्सीमहि । **९. लुङ्** - अखित्त अखित्साताम् अखित्सत । अखित्थाः अखित्साथाम् अखिद्ध्वम् । अखित्सि अखित्स्वहि अखित्स्महि । **१०. लृङ्** - अखेत्स्यत अखेत्स्येताम् अखेत्स्यन्त । अखेत्स्यथाः अखेत्स्येथाम् अखेत्स्यध्वम् । अखेत्स्ये अखेत्स्यावहि अखेत्स्यामहि ।

णिचि - खेदयति-ते, **सनि** - चिखित्सते, **यकि** - खिद्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१४५०. विद - विचारणे । सकर्म, अनिट्, आत्मने । 'मीमांसे' इति वोपदेवः । 'सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे' (श्लो. १११) इति देवः ।

१. लट् - विन्ते विन्दाते विन्दते । विन्त्से विन्दाथे विन्ध्वे । । विन्दे विन्द्वहे विन्द्महे । **२. लिट्** - विविदे विविदाते विविदिरे । विविदिषे विविदाथे विविदिध्वे । विविदे विविदिवहे विविदिमहे । **३. लुट्** - वेत्ता वेत्तारौ वेत्तारः । वेत्तासे वेत्तासाथे वेत्ताध्वे । वेत्ताहे वेत्तास्वहे वेत्तास्महे । **४. लृट्** - वेत्स्यते वेत्स्येते वेत्स्यन्ते । वेत्स्यसे वेत्स्येथे वेत्स्यध्वे । वेत्स्ये वेत्स्यावहे वेत्स्यामहे । **५. लोट्** - विन्ताम् विन्दाताम् विन्दताम् । विन्त्स्व विन्दाथाम् विन्ध्वम् । विनदै विनदावहै विनदामहै । **६. लङ्** - अविन्त अविन्दाताम् अविन्दत । अविन्थाः अविन्दाथाम् अविन्ध्वम् । अविन्दि अविन्द्वहि अविन्द्महि । **७. विधिलिङ्** - विन्दीत विन्दीयाताम् विन्दीरन् । विन्दीथाः विन्दीयाथाम् विन्दीध्वम् । विन्दीय विन्दीवहि विन्दीमहि । **८. आशीर्लिङ्** - वित्सीष्ट वित्सीयास्ताम् वित्सीरन् । वित्सीष्ठाः वित्सीयास्थाम् वित्सीध्वम् । वित्सीय वित्सीवहि वित्सीमहि । **९. लुङ्** - अवित्त अवित्साताम् अवित्सत । अवित्थाः अवित्साथाम् अविद्ध्वम् । अवित्सि अवित्स्वहि अवित्स्महि । **१०. लृङ्** - अवेत्स्यत अवेत्स्येताम् अवेत्स्यन्त । अवेत्स्यथाः अवेत्स्येथाम् अवेत्स्यध्वम् । अवेत्स्ये अवेत्स्यावहि अवेत्स्यामहि ।

णिचि - वेदयति-ते, **सनि** - विवित्सते, **यकि** - विद्यते ।

१४५१. शिष्लृ - विशेषणे । सकर्म, अनिट्, परस्मै । 'विशेषणम् = उपरञ्जनम्' इति दुर्गादासः ।

१. लट् - शिनष्टि शिंष्टः शिंषन्ति । शिनक्षि शिंष्ठः शिंष्ठ । शिनष्मि शिंष्वः शिंष्मः । **२. लिट्** - शिशेष शिशिषतुः शिशिषुः । शिशेषिथ शिशिषथुः शिशिष । शिशेष शिशिषिव शिशिषिम । **३. लुट्** - शेष्टा शेष्टारौ शेष्टारः । शेष्टासि शेष्टास्थः शेष्टास्थ । शेष्टास्मि शेष्टास्वः शेष्टास्मः । **४. लृट्** - शेक्ष्यति शेक्ष्यतः शेक्ष्यन्ति । शेक्ष्यसि शेक्ष्यथः शेक्ष्यथ । शेक्ष्यामि शेक्ष्यावः शेक्ष्यामः । **५. लोट्** - शिनष्टु, शिंष्टात् शिंष्टाम् शिंषन्तु । शिण्ढि-शिण्ड्ढि, शिंष्टात् शिंष्टम् शिंष्ट । शिनषाणि शिनषाव शिनषाम । **६. लङ्** - अशिनट्-ड् अशिंष्टाम् अशिंषन् । अशिनट् अशिंष्टम् अशिंष्ट । अशिनषम् अशिंष्व अशिंष्म । **७. विधिलिङ्** - शिंष्यात् शिंष्याताम् शिंष्युः । शिंष्याः शिंष्यातम् शिंष्यात । शिंष्याम् शिंष्याव शिंष्याम । **८. आशीर्लिङ्** - शिष्यात् शिष्यास्ताम् शिष्यासुः । शिष्याः शिष्यास्तम् शिष्यास्त । शिष्यासम् शिष्यास्व शिष्यास्म । **९. लुङ्** - अशिषत् अशिषताम् अशिषन् । अशिषः अशिषतम् अशिषत । अशिषम् अशिषाव अशिषाम । **१०. लृङ्** - अशेक्ष्यत् अशेक्ष्यताम् अशेक्ष्यन् । अशेक्ष्यः अशेक्ष्यतम् अशेक्ष्यत । अशेक्ष्यम् अशेक्ष्याव अशेक्ष्याम ।

णिचि - शेषयति-ते, **सनि** - शिशिक्षति, **यकि** - शिष्यते

१४५२. पिष्लृ - सञ्चूर्णने हिंसायां च । सकर्म, अनिट्, परस्मै । सञ्चूर्णनं धान्यादीनां चूर्णीकरणं, हिंसा च ।

१. लट् - पिनष्टि पिंष्टः पिंषन्ति । पिनक्षि पिंष्ठः पिंष्ठ । पिनष्मि पिंष्वः पिंष्मः । **२. लिट्** - पिपेष पिपिषतुः पिपिषुः । पिपेषिथ पिपिषथुः पिपिष । पिपेष पिपिषिव पिपिषिम । **३. लुट्** - पेष्टा पेष्टारौ पेष्टारः । पेष्टासि पेष्टास्थः पेष्टास्थ । पेष्टास्मि पेष्टास्वः पेष्टास्मः । **४. लृट्** - पेक्ष्यति पेक्ष्यतः पेक्ष्यन्ति । पेक्ष्यसि पेक्ष्यथः पेक्ष्यथ । पेक्ष्यामि पेक्ष्यावः पेक्ष्यामः । **५. लोट्** - पिनष्टु, पिंष्टात् पिंष्टाम् पिंषन्तु । पिण्ढि-पिण्ड्ढि, पिंष्टात् पिंष्टम् पिंष्ट । पिनषाणि पिनषाव पिनषाम । **६. लङ्** - अपिनट्-ड् अपिंष्टाम् अपिंषन् । अपिनट् अपिंष्टम् अशिंष्ट । अपिनषम् अपिंष्व अपिंष्म । **७. विधिलिङ्** - पिंष्यात् पिंष्याताम् पिंष्युः । पिंष्याः पिंष्यातम् पिंष्यात । पिंष्याम् पिंष्याव पिंष्याम । **८. आशीर्लिङ्** - पिष्यात् पिष्यास्ताम् पिष्यासुः । पिष्याः पिष्यास्तम् पिष्यास्त । पिष्यासम् पिष्यास्व पिष्यास्म । **९. लुङ्** - अपिषत् अपिषताम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपिषन् । अपिषः अपिषतम् अपिषत । अपिषम् अपिषाव अपिषाम । **१०. लृङ्** – अपेक्ष्यत् अपेक्ष्यताम् अपेक्ष्यन् । अपेक्ष्यः अपेक्ष्यतम् अपेक्ष्यत । अपेक्ष्यम् अपेक्ष्याव अपेक्ष्याम ।
णिचि – पेषयति-ते, **सनि** – पिपिक्षति, **यकि** – पिष्यते ।

१४५३. भञ्जो – आमर्दने । सकर्म, अनिट्, परस्मै । 'आमर्दे तु भनक्ति ...' (श्लो. ६५) इति देवः ।
१. लट् – भनक्ति भङ्क्तः भञ्जन्ति । भनक्षि भङ्क्थः भङ्क्थ । भनज्मि भञ्ज्वः भञ्ज्मः । **२. लिट्** – बभञ्ज बभञ्जतुः बभञ्जुः । बभञ्जिथ-बभङ्क्थ बभञ्जथुः बभञ्ज । बभञ्ज बभञ्जिव बभञ्जिम । **३. लुट्** – भङ्क्ता भङ्क्तारौ भङ्क्तारः । भङ्क्तासि भङ्क्तास्थः भङ्क्तास्थ । भङ्क्तास्मि भङ्क्तास्वः भङ्क्तास्मः । **४. लृट्** – भङ्क्ष्यति भङ्क्ष्यतः भङ्क्ष्यन्ति । भङ्क्ष्यसि भङ्क्ष्यथः भङ्क्ष्यथ । भङ्क्ष्यामि भङ्क्ष्यावः भङ्क्ष्यामः । **५. लोट्** – भनक्तु भङ्क्तात् भङ्क्ताम् भञ्जन्तु । भङ्ग्धि, भङ्क्तात् भङ्क्तम् भङ्क्त । भनजानि भनजाव भनजाम । **६. लङ्** – अभनक् अभङ्क्ताम् अभञ्जन् । अभनक् अभङ्क्तम् अभङ्क्त । अभनजम् अभञ्ज्व अभञ्ज्म । **७. विधिलिङ्** – भञ्ज्यात् भञ्ज्याताम् भञ्ज्युः । भञ्ज्याः भञ्ज्यातम् भञ्ज्यात । भञ्ज्याम् भञ्ज्याव भञ्ज्याम । **८. आशीर्लिङ्** – भज्यात् भज्यास्ताम् भज्यासुः । भज्याः भज्यास्तम् भज्यास्त । भज्यासम् भज्यास्व भज्यास्म । **९. लुङ्** – अभाङ्क्षीत् अभाङ्क्ताम् अभाङ्क्षुः । अभाङ्क्षीः अभाङ्क्तम् अभाङ्क्त । अभाङ्क्षम् अभाङ्क्ष्व अभाङ्क्ष्म । **१०. लृङ्** – अभङ्क्ष्यत् अभङ्क्ष्यताम् अभङ्क्ष्यन् । अभङ्क्ष्यः अभङ्क्ष्यतम् अभङ्क्ष्यत । अभङ्क्ष्यम् अभङ्क्ष्याव अभङ्क्ष्याम ।
णिचि – भञ्जयति-ते, **सनि** – बिभङ्क्षति, **यकि** – भज्यते ।

१४५४. भुज – पालनाभ्यवहारयोः । सकर्म, अनिट्, पालने परस्मै, पालनभिन्नेऽर्थे[1] आत्मनेपदी । अभ्यवहारः = भोजनम् । 'भुजेद् भुनक्ति भुङ्क्ते स्युः कौटिल्ये पालनेऽदने' (श्लो. ६५) इति देवः ।
१. लट् – (i) भुनक्ति भुङ्क्तः भुञ्जन्ति । भुनक्षि भुङ्क्थः भुङ्क्थ । भुनज्मि भुञ्ज्वः भुञ्ज्मः । (ii) भुङ्क्ते भुञ्जाते भुञ्जते । भुङ्क्षे भुञ्जाथे भुङ्ग्ध्वे । भुञ्जे भुञ्ज्वहे भुञ्ज्महे । **२. लिट्** – (i) बुभोज बुभुजतुः बुभुजुः । बुभोजिथ बुभुजथुः बुभुज । बुभोज बुभुजिव बुभुजिम । (ii) बुभुजे बुभुजाते बुभुजिरे । बुभुजिषे बुभुजाथे बुभुजिध्वे । बुभुजे बुभुजिवहे बुभुजिमहे । **३. लुट्** – (i) भोक्ता भोक्तारौ भोक्तारः । भोक्तासि भोक्तास्थः भोक्तास्थ । भोक्तास्मि भोक्तास्वः भोक्तास्मः । (ii) भोक्ता भोक्तारौ भोक्तारः । भोक्तासे भोक्तासाथे भोक्ताध्वे । भोक्ताहे भोक्तास्वहे भोक्तास्महे । **४. लृट्** – (i) भोक्ष्यति भोक्ष्यतः भोक्ष्यन्ति । भोक्ष्यसि भोक्ष्यथः भोक्ष्यथ । भोक्ष्यामि भोक्ष्यावः भोक्ष्यामः । (ii) भोक्ष्यते भोक्ष्येते भोक्ष्यन्ते । भोक्ष्यसे भोक्ष्येथे भोक्ष्यध्वे । भोक्ष्ये भोक्ष्यावहे भोक्ष्यामहे । **५. लोट्** – (i) भुनक्तु, भुङ्क्तात् भुङ्क्ताम् भुञ्जन्तु । भुङ्ग्धि, भुङ्क्तात् भुङ्क्तम् भुङ्क्त । भुनजानि भुनजाव भुनजाम । (ii) भुङ्क्ताम् भुञ्जाताम् भुञ्जताम् । भुङ्क्ष्व भुञ्जाथाम् भुङ्ग्ध्वम् । भुनजै भुनजावहै भुनजामहै । **६. लङ्** – (i) अभुनक्-ग् अभुङ्क्ताम् अभुञ्जन् । अभुनक् अभुङ्क्तम् अभुङ्क्त । अभुनजम् अभुञ्ज्व अभुञ्ज्म । (ii) अभुङ्क्त अभुञ्जाताम् अभुञ्जत । अभुङ्क्थाः अभुञ्जाथाम् अभुङ्ग्ध्वम् । अभुञ्जि अभुञ्ज्वहि अभुञ्ज्महि । **७. विधिलिङ्** – (i) भुञ्ज्यात् भुञ्ज्याताम् भुञ्ज्युः । भुञ्ज्याः भुञ्ज्यातम् भुञ्ज्यात । भुञ्ज्याम् भुञ्ज्याव भुञ्ज्याम । (ii) भुञ्जीत भुञ्जीयाताम् भुञ्जीरन् । भुञ्जीथाः भुञ्जीयाथाम् भुञ्जीध्वम् । भुञ्जीय भुञ्जीवहि भुञ्जीमहि । **८. आशीर्लिङ्** – (i) भुज्यात् भुज्यास्ताम् भुज्यासुः । भुज्याः भुज्यास्तम् भुज्यास्त । भुज्यासम् भुज्यास्व भुज्यास्म । (ii) भुक्षीष्ट भुक्षीयास्ताम् भुक्षीरन् । भुक्षीष्ठाः भुक्षीयास्थाम् भुक्षीध्वम् । भुक्षीय भुक्षीवहि भुक्षीमहि । **९. लुङ्** – (i) अभौक्षीत् अभौक्ताम् अभौक्षुः । अभौक्षीः अभौक्तम् अभौक्त । अभौक्षम् अभौक्ष्व अभौक्ष्म । (ii) अभुक्त अभुक्षाताम् अभुक्षत । अभुक्थाः अभुक्षाथाम् अभुग्ध्वम् । अभुक्षि अभुक्ष्वहि अभुक्ष्महि । **१०. लृङ्** – (i) अभोक्ष्यत् अभोक्ष्यताम् अभोक्ष्यन् । अभोक्ष्यः अभोक्ष्यतम् अभोक्ष्यत । अभोक्ष्यम् अभोक्ष्याव अभोक्ष्याम । (ii) अभोक्ष्यत

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभोक्ष्येताम् अभोक्ष्यन्त । अभोक्ष्यथाः अभोक्ष्येथाम् अभोक्ष्यध्वम् । अभोक्ष्ये अवेभोक्ष्यावहि अभोक्ष्यामहि ।
णिचि – भोजयति[२]–ते, **सनि** – बुभुक्षति–ते, **यकि** – भुज्यते ।

१.'भुजोऽनवने' इति पालनभिन्नार्थे आत्मनेपदित्वम् ।
२.'निगरणचलनार्थेभ्यश्च' इति परस्मैपदमेव, भोजनार्थे । तद्भिन्नार्थे तु आत्मनेपदम् अपि ।

१४५५. तृह – हिंसायाम् । सकर्म, सेट्, परस्मै । 'श्रे तृणेढीति हिंसायां तृहतीत्यूदितस्तृहेः' (श्लो. १९५) इति देवः ।
१. लट् – तृणेढि[१] तृण्ढः तृंहन्ति । तृणेक्षि तृण्ढः तृण्ढ । तृणेह्मि तृंह्वः तृंह्मः । **२. लिट्** – ततर्ह ततृहतुः ततृहुः । ततर्हिथ ततृहथुः ततृह । ततर्ह ततृहिव ततृहिम । **३. लुट्** – तर्हिता तर्हितारौ तर्हितारः । तर्हितासि तर्हितास्थः तर्हितास्थ । तर्हितास्मि तर्हितास्वः तर्हितास्मः । **४. लृट्** – तर्हिष्यति तर्हिष्यतः तर्हिष्यन्ति । तर्हिष्यसि तर्हिष्यथः तर्हिष्यथ । तर्हिष्यामि तर्हिष्यावः तर्हिष्यामः । **५. लोट्** – तृणेढु, तृण्ढात् तृण्ढाम् तृंहन्तु । तृण्ढि/तृण्ड्ढि, तृण्ढात् तृण्ढम् तृण्ढ । तृणहानि तृणहाव तृणहाम । **६. लङ्** – अतृणेट्–ड् अतृण्ढाम् अतृंहन् । अतृणेड्–ट् अतृण्ढम् अतृण्ढ । अतृणहम् अतृंह्व अतृंह्म । **७. विधिलिङ्** – तृंह्यात् तृंह्याताम् तृंह्युः । तृंह्याः तृंह्यातम् तृंह्यात । तृंह्याम् तृंह्याव तृंह्याम । **८. आशीर्लिङ्** – तृह्यात् तृह्यास्ताम् तृह्यासुः । तृह्याः तृह्यास्तम् तृह्यास्त । तृह्यासम् तृह्यास्व तृह्यास्म । **९. लुङ्** – अतर्हीत् अतर्हिष्टाम् अतर्हिषुः । अतर्हीः अतर्हिष्टम् अतर्हिष्ट । अतर्हिम् अतर्हिष्व अतर्हिष्म । **१०. लृङ्** – अतर्हिष्यत् अतर्हिष्यताम् अतर्हिष्यन् । अतर्हिष्यः अतर्हिष्यतम् अतर्हिष्यत । अतर्हिष्यम् अतर्हिष्याव अतर्हिष्याम ।
णिचि – तर्हयति–ते, **सनि** – तितर्हिषति, **यकि** – तृह्यते ।

१. 'तृणह इम्' – तृहः श्नमि कृते इमागमः स्यात् हलादौ पिति ।

१४५६. हिसि – हिंसायाम् । सकर्म, सेट्, परस्मै ।
१. लट् – हिनस्ति[१] हिंस्तः हिंसन्ति । हिनस्सि हिंस्थः हिंस्थ । हिनस्मि हिंस्वः हिंस्मः । **२. लिट्** – जिहिंस जिहिंसतुः जिहिंसुः । जिहिंसिथ जिहिंसथुः जिहिंस । जिहिंस जिहिंसिव जिहिंसिम । **३. लुट्** – हिंसिता हिंसितारौ हिंसितारः । हिंसितासि हिंसितास्थः हिंसितास्थ । हिंसितास्मि हिंसितास्वः हिंसितास्मः । **४. लृट्** – हिंसिष्यति हिंसिष्यतः हिंसिष्यन्ति । हिंसिष्यसि हिंसिष्यथः हिंसिष्यथ । हिंसिष्यामि हिंसिष्यावः हिंसिष्यामः । **५. लोट्** – हिनस्तु, हिंस्तात् हिंस्ताम् हिंसन्तु । हिन्धि, हिंस्तात् हिंस्तम् हिंस्त । हिनसानि हिनसाव हिनसाम । **६. लङ्** – अहिनत्–द् अहिंस्ताम् अहिंसन् । अहिनत्–द्–अहिनः[२] अहिंस्तम् अहिंस्त । अहिनसम् अहिंस्व अहिंस्म । **७. विधिलिङ्** – हिंस्यात् हिंस्याताम् हिंस्युः । हिंस्याः हिंस्यातम् हिंस्यात । हिंस्याम् हिंस्याव हिंस्याम । **८. आशीर्लिङ्** – हिंस्यात्[३] हिंस्यास्ताम् हिंस्यासुः । हिंस्याः हिंस्यास्तम् हिंस्यास्त । हिंस्यासम् हिंस्यास्व हिंस्यास्म । **९. लुङ्** – अहिंसीत् अहिंसिष्टाम् अहिंसिषुः । अहिंसीः अहिंसिष्टम् अहिंसिष्ट । अहिंसिम् अहिंसिष्व अहिंसिष्म । **१०. लृङ्** – अहिंसिष्यत् अहिंसिष्यताम् अहिंसिष्यन् । अहिंसिष्यः अहिंसिष्यतम् अहिंसिष्यत । अहिंसिष्यम् अहिंसिष्याव अहिंसिष्याम ।
णिचि – हिंसयति–ते, **सनि** – जिहिंसिषति, **यकि** – हिंस्यते ।

१. इदित्वान्नुमि 'श्नान्नलोपः' इति नलोपः ।
२. 'सिचि धातोरुर्वा' इति वा रुः ।
३. आशीर्लिङि श्नमभावान्नुमेव । इदित्त्वान्नलोपो न । अतः 'हिंस्यात्' इत्येव रूपम् ।

१४५७. उन्दी – क्लेदने । सकर्म, सेट्, परस्मै ।
१. लट् – उनत्ति उन्तः उन्दन्ति । उनत्सि उन्त्थः उन्त्थ । उनद्मि उन्द्वः उन्द्मः । **२. लिट्** – (i) उन्दाञ्चकार उन्दाञ्चक्रतुः उन्दाञ्चक्रुः । उन्दाञ्चकर्थ उन्दाञ्चक्रथुः उन्दाञ्चक्र । उन्दाञ्चकार/उन्दाञ्चकर उन्दाञ्चकृव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उन्दाञ्चकृम । (ii) उन्दाम्बभूव उन्दाम्बभूवतुः उन्दाम्बभूवुः । उन्दाम्बभूविथ उन्दाम्बभूवथुः उन्दाम्बभूव । उन्दाम्बभूव उन्दाम्बभूविव उन्दाम्बभूविम । (iii) उन्दामास उन्दामासतुः उन्दामासुः । उन्दामासिथ उन्दामासथुः उन्दामास । उन्दामास उन्दामासिव उन्दामासिम । **३. लुट्** – उन्दिता उन्दितारौ उन्दितारः । उन्दितासि उन्दितास्थः उन्दितास्थ । उन्दितास्मि उन्दितास्वः उन्दितास्मः । **४. लृट्** – उन्दिष्यति उन्दिष्यतः उन्दिष्यन्ति । उन्दिष्यसि उन्दिष्यथः उन्दिष्यथ । उन्दिष्यामि उन्दिष्यावः उन्दिष्यामः । **५. लोट्** – उनत्तु उन्तात् उन्ताम् उन्दन्तु । उन्द्धि उन्तात् उन्तम् उन्त । उनदानि उनदाव उनदाम । **६. लङ्** – औनत्-द् औन्ताम् औन्दन् । औनः-औनत्-द् औन्तम् औन्त । औनदम् औन्द्व औन्द्म । **७. विधिलिङ्** – उन्द्यात् उन्द्याताम् उन्द्युः । उन्द्याः उन्द्यातम् उन्द्यात । उन्द्याम् उन्द्याव उन्द्याम । **८. आशीर्लिङ्** – उद्यात् उद्यास्ताम् उद्यासुः । उद्याः उद्यास्तम् उद्यास्त । उद्यासम् उद्यास्व उद्यास्म । **९. लुङ्** – औन्दीत् औन्दिष्टाम् औन्दिषुः । औन्दीः औन्दिष्टम् औन्दिष्ट । औन्दिषम् औन्दिष्व औन्दिष्म । **१०. लृङ्** – औन्दिष्यत् औन्दिष्यताम् औन्दिष्यन् । औन्दिष्यः औन्दिष्यतम् औन्दिष्यत । औन्दिष्यम् औन्दिष्याव औन्दिष्याम ।

णिचि – उन्दयति-ते, **सनि** – उन्दिदिषति, **यकि** – उद्यते ।

१४५८. अञ्जू – व्यक्तिम्रक्षणकान्तिगतिषु । सकर्म, वेट्, परस्मै । व्यक्तिः = प्रकटता । म्रक्षणम् = घृतादिसेकः ।

१. लट् – अनक्ति अङ्क्तः अञ्जन्ति । अनक्षि अङ्क्थः अङ्क्थ । अनज्मि अञ्ज्वः अञ्ज्मः । **२. लिट्** – आनञ्ज आनञ्जतुः आनञ्जुः । आनञ्जिथ-आनङ्क्थ आनञ्जथुः आनञ्ज । आनञ्ज आनञ्जिव-आनञ्ज्व आनञ्जिम-आनञ्ज्म । **३. लुट्** – (i) अञ्जिता अञ्जितारौ अञ्जितारः । अञ्जितासि अञ्जितास्थः अञ्जितास्थ । अञ्जितास्मि अञ्जितास्वः अञ्जितास्मः । (ii) अङ्क्ता[1] अङ्क्तारौ अङ्क्तारः । अङ्क्तासि अङ्क्तास्थः अङ्क्तास्थ । अङ्क्तास्मि अङ्क्तास्वः अङ्क्तास्मः । **४. लृट्** – (i) अञ्जिष्यति अञ्जिष्यतः अञ्जिष्यन्ति । अञ्जिष्यसि अञ्जिष्यथः अञ्जिष्यथ । अञ्जिष्यामि अञ्जिष्यावः अञ्जिष्यामः । (ii) अंक्ष्यति अंक्ष्यतः अंक्ष्यन्ति । अंक्ष्यसि अंक्ष्यथः अंक्ष्यथ । अंक्ष्यामि अंक्ष्यावः अंक्ष्यामः । **५. लोट्** – अनक्तु, अङ्क्तात् अङ्क्ताम् अञ्जन्तु । अङ्ग्धि, अङ्क्तात् अङ्क्तम् अङ्क्त । अनजानि अनजाव अनजाम । **६. लङ्** – आनक् आङ्क्ताम् आञ्जन् । आनक् आङ्क्तम् आङ्क्त । आनजम् आञ्ज्व आञ्ज्म । **७. विधिलिङ्** – अञ्ज्यात् अञ्ज्याताम् अञ्ज्युः । अञ्ज्याः अञ्ज्यातम् अञ्ज्यात । अञ्ज्याम् अञ्ज्याव अञ्ज्याम । **८. आशीर्लिङ्** – अज्यात् अज्यास्ताम् अज्यासुः । अज्याः अज्यास्तम् अज्यास्त । अज्यासम् अज्यास्व अज्यास्म । **९. लुङ्** – आञ्जीत् आञ्जिष्टाम् आञ्जिषुः । आञ्जीः आञ्जिष्टम् आञ्जिष्ट । आञ्जिषम् आञ्जिष्व आञ्जिष्म । **१०. लृङ्** – (i) आञ्जिष्यत् आञ्जिष्यताम् आञ्जिष्यन् । आञ्जिष्यः आञ्जिष्यतम् आञ्जिष्यत । आञ्जिष्यम् आञ्जिष्याव आञ्जिष्याम । (ii) आंक्ष्यत् आंक्ष्यताम् आंक्ष्यन् । आंक्ष्यः आंक्ष्यतम् आंक्ष्यत । आंक्ष्यम् आंक्ष्याव आंक्ष्याम ।

णिचि – अञ्जयति – ते, **सनि** – अञ्जिजिषति, **यकि** – अज्यते ।

१. ऊदित्त्वात् 'स्वरतिसूति... ऊदितो वा' इति वलाद्यार्धधतुके इड्विकल्पः ।

१४५९. तञ्चू – सङ्कोचने । सकर्म, वेट्, परस्मै । नोपधः । कृतपरसवर्णनिर्देशः । 'तञ्जू' इति क्षीरस्वामिसम्मतः पाठः । जकारान्तमध्ये पाठात् एवमेव न्याय्यम् इति तदाशयः ।

१. लट् – तनक्ति तङ्क्तः तञ्चन्ति । । तनक्षि तङ्क्थः तङ्क्थ । तनज्मि तञ्च्वः तञ्च्मः । **२. लिट्** – ततञ्च ततञ्चतुः ततञ्चुः । ततञ्चिथ ततञ्चथुः ततञ्च । ततञ्च ततञ्चिव ततञ्चिम । **३. लुट्** – (i) तञ्चिता तञ्चितारौ तञ्चितारः । तञ्चितासि तञ्चितास्थः तञ्चितास्थ । तञ्चितास्मि तञ्चितास्वः तञ्चितास्मः । (ii) तङ्क्ता[1] तङ्क्तारौ तङ्क्तारः । तङ्क्तासि तङ्क्तास्थः तङ्क्तास्थ । तङ्क्तास्मि तङ्क्तास्वः तङ्क्तास्मः । **४. लृट्** – (i) तञ्चिष्यति तञ्चिष्यतः तञ्चिष्यन्ति । तञ्चिष्यसि तञ्चिष्यथः तञ्चिष्यथ । तञ्चिष्यामि तञ्चिष्यावः तञ्चिष्यामः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(ii) तंक्ष्यति तंक्ष्यतः तंक्ष्यन्ति । तंक्ष्यसि तंक्ष्यथः तंक्ष्यथ । तंक्ष्यामि तंक्ष्यावः तंक्ष्यामः । **५. लोट्** - तनक्तु, तङ्क्तात् तङ्क्ताम् तञ्चन्तु । तङ्ग्धि, तङ्क्तात् तङ्क्तम् तङ्क्त । तनचानि तनचाव तनचाम । **६. लङ्** - अतनक् अतङ्क्ताम् अतचन् । अतनक् अतङ्क्तम् अतङ्क्त । अतनचम् अतञ्च्व अतञ्च्म । **७. विधिलिङ्** - तञ्च्यात् तञ्च्याताम् तञ्च्युः । तञ्च्याः तञ्च्यातम् तञ्च्यात । तञ्च्याम् तञ्च्याव तञ्च्याम । **८. आशीर्लिङ्** - तच्यात् तच्यास्ताम् तच्यासुः । तच्याः तच्यास्तम् तच्यास्त । तच्यासम् तच्यास्व तच्यास्म । **९. लुङ्** - अतञ्चीत् अतञ्चिष्टाम् अतञ्चिषुः । अतञ्चीः अतञ्चिष्टम् अतञ्चिष्ट । अतञ्चिषम् अतञ्चिष्व अतञ्चिष्म । **१०. लृङ्** - (i) अतञ्चिष्यत् अतञ्चिष्यताम् अतञ्चिष्यन् । अतञ्चिष्यः अतञ्चिष्यतम् अतञ्चिष्यत । अतञ्चिष्यम् अतञ्चिष्याव अतञ्चिष्याम । (ii) अतंक्ष्यत् अतंक्ष्यताम् अतंक्ष्यन् । अतंक्ष्यः अतंक्ष्यतम् अतंक्ष्यत । अतंक्ष्यम् अतंक्ष्याव अतंक्ष्याम ।

णिचि - तञ्चयति - ते, **सनि** - तितञ्चिषति-तितङ्क्षति, **यकि** - तच्यते ।

१. ऊदित्त्वात् 'स्वरतिसूति... ऊदितो वा' इति वलाद्यार्धधतुके इड्विकल्पः ।

१४६०. ओ विजी - भयचलनयोः । अकर्म, सेट्, परस्मै । 'वेवेक्तीति पृथग्भावे विवेक्ते च भये पुनः । विनक्ति विजते ...' (श्लो. ६१-६२) इति देवः ।

१. लट् - विनक्ति विङ्क्तः विञ्जन्ति । विनक्षि विङ्क्थः विङ्क्थ । विनज्मि विञ्ज्वः विञ्ज्मः । **२. लिट्** - विवेज विविजतुः विविजुः । विविजिथ विविजथुः विविज । विवेज विविजिव विविजिम । **३. लुट्** - विजिता विजितारौ विजितारः । विजितासि विजितास्थः विजितास्थ । विजितास्मि विजितास्वः विजितास्मः । **४. लृट्** - विजिष्यति विजिष्यतः विजिष्यन्ति । विजिष्यसि विजिष्यथः विजिष्यथ । विजिष्यामि विजिष्यावः विजिष्यामः । **५. लोट्** - विनक्तु, विङ्क्तात् विङ्क्ताम् विञ्जन्तु । विङ्ग्धि विङ्क्तात् विङ्क्तम् विङ्क्त । विनजानि विनजाव विनजाम । **६. लङ्** - अविनक्-ग् अविङ्क्ताम् अविञ्जन् । अविनक्-ग् अविङ्क्तम् अविङ्क्त । अविनजम् अविञ्ज्व अविञ्ज्म । **७. विधिलिङ्** - विञ्ज्यात् विञ्ज्याताम् विञ्ज्युः । विञ्ज्याः विञ्ज्यातम् विञ्ज्यात । विञ्ज्याम् विञ्ज्याव विञ्ज्याम । **८. आशीर्लिङ्** - विज्यात् विज्यास्ताम् विज्यासुः । विज्याः विज्यास्तम् विज्यास्त । विज्यासम् विज्यास्व विज्यास्म । **९. लुङ्** - अविजीत् अविजिष्टाम् अविजिषुः । अविजीः अविजिष्टम् अविजिष्ट । अविजिषम् अविजिष्व अविजिष्म । **१०. लृङ्** - अविजिष्यत् अविजिष्यताम् अविजिष्यन् । अविजिष्यः अविजिष्यतम् अविजिष्यत । अविजिष्यम् अविजिष्याव अविजिष्याम ।

णिचि - वेजयति-ते, **सनि** - विविजिषति, **यकि** - विज्यते ।

१४६१. वृजी - वर्जने । सकर्म, सेट्, परस्मै । 'वरणे' इति धनपालशाकटायनौ । 'त्यागे वृत्तौ च' इति वोपदेवः । 'त्यागे' इति काशकृत्स्नोऽपि । 'वृणक्ति वर्जने वृङ्क्ते यौ वर्जयति वर्जति' (श्लो. ५९) इति देवः ।

१. लट् - वृणक्ति वृङ्क्तः वृञ्जन्ति । वृणक्षि वृङ्क्थः वृङ्क्थ । वृणज्मि वृञ्ज्वः वृञ्ज्मः । **२. लिट्** - ववर्ज ववृजतुः ववृजुः । ववर्जिथ ववृजथुः ववृज । ववर्ज ववृजिव ववृजिम । **३. लुट्** - वर्जिता वर्जितारौ वर्जितारः । वर्जितासि वर्जितास्थः वर्जितास्थ । वर्जितास्मि वर्जितास्वः वर्जितास्मः । **४. लृट्** - वर्जिष्यति वर्जिष्यतः वर्जिष्यन्ति । वर्जिष्यसि वर्जिष्यथः वर्जिष्यथ । वर्जिष्यामि वर्जिष्यावः वर्जिष्यामः । **५. लोट्** - वृणक्तु वृङ्क्तात् वृङ्क्ताम् वृञ्जन्तु । वृङ्ग्धि वृङ्क्तात् वृङ्क्तम् वृङ्क्त । वृणजानि वृणजाव वृणजाम । **६. लङ्** - अवृणक्-ग् अवृङ्क्ताम् अवृञ्जन् । अवृणक्-ग् अवृङ्क्तम् अवृङ्क्त । अवृणजम् अवृञ्ज्व अवृञ्ज्म । **७. विधिलिङ्** - वृञ्ज्यात् वृञ्ज्याताम् वृञ्ज्युः । वृञ्ज्याः वृञ्ज्यातम् वृञ्ज्यात । वृञ्ज्याम् वृञ्ज्याव वृञ्ज्याम । **८. आशीर्लिङ्** - वृज्यात् वृज्यास्ताम् वृज्यासुः । वृज्याः वृज्यास्तम् वृज्यास्त । वृज्यासम् वृज्यास्व वृज्यास्म । **९. लुङ्** -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अवर्जीत् अवर्जिष्टाम् अवर्जिषुः । अवर्जीः अवर्जिष्टम् अवर्जिष्ट । अवर्जिम् अवर्जिष्व अवर्जिष्म । **१०. लृङ्** – अवर्जिष्यत् अवर्जिष्यताम् अवर्जिष्यन् । अवर्जिष्यः अवर्जिष्यतम् अवर्जिष्यत । अवर्जिष्यम् अवर्जिष्याव अवर्जिष्याम

णिचि – वर्जयति – ते, **सनि** – विवर्जिषति, **यकि** – वृज्यते

१४६२. पृची – सम्पर्के । सकर्म, सेट्, परस्मै । 'पृणङ्क्ति पृक्ते (पृङ्क्ते) सम्पर्के यौ पर्चयति पर्चति' (श्लो.५१) इति देवः ।

१. लट् – पृणक्ति पृङ्क्तः पृञ्चन्ति । पृणक्षि पृङ्क्थः पृङ्क्थ । पृणच्मि पृञ्च्वः पृञ्च्मः । **२. लिट्** – पपर्च पपृचतुः पपृचुः । पपर्चिथ पपृचथुः पपृच । पपर्च पपृचिव पपृचिम । **३. लुट्** – पर्चिता पर्चितारौ पर्चितारः । पर्चितासि पर्चितास्थः पर्चितास्थ । पर्चितास्मि पर्चितास्वः पर्चितास्मः । **४. लृट्** – पर्चिष्यति पर्चिष्यतः पर्चिष्यन्ति । पर्चिष्यसि पर्चिष्यथः पर्चिष्यथ । पर्चिष्यामि पर्चिष्यावः पर्चिष्यामः । **५. लोट्** – पृणक्तु पृङ्क्तात् पृङ्क्ताम् पृञ्चन्तु । पृङ्ग्धि पृङ्क्तात् पृङ्क्तम् पृङ्क्त । पृणचानि पृणचाव पृणचाम । **६. लङ्** – अपृणक्-ग् अपृङ्क्ताम् अपृञ्चन् । अपृणक्-ग् अपृङ्क्तम् अपृङ्क्त । अपृणचम् अपृञ्च्व अपृञ्च्म । **७. विधिलिङ्** – पृञ्च्यात् पृञ्च्याताम् पृञ्च्युः । पृञ्च्याः पृञ्च्यातम् पृञ्च्यात । पृञ्च्याम् पृञ्च्याव पृञ्च्याम । **८. आशीर्लिङ्** – पृच्यात् पृच्यास्ताम् पृच्यासुः । पृच्याः पृच्यास्तम् पृच्यास्त । पृच्यासम् पृच्यास्व पृच्यास्म । **९. लुङ्** – अपर्चीत् अपर्चिष्टाम् अपर्चिषुः । अपर्चीः अपर्चिष्टम् अपर्चिष्ट । अपर्चिम् अपर्चिष्व अपर्चिष्म । **१०. लृङ्** – अपर्चिष्यत् अपर्चिष्यताम् अपर्चिष्यन् । अपर्चिष्यः अपर्चिष्यतम् अपर्चिष्यत । अपर्चिष्यम् अपर्चिष्याव अपर्चिष्याम ।

णिचि – पर्चयति – ते, **सनि** – पिपिर्चिषति, **यकि** – पृच्यते

[गणान्ते मा.धा.वृत्तौ लिख्यते – ''वृत् । रुधादयो वृत्ताः इत्यर्थः । धातुपारायणे तु गणसमाप्तिः न इष्यते । तेन लुनति, पुनति इति सिध्यति'' इति ।]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ तनादिः (८)

१४६३. तनु - विस्तारे । सकर्म, सेट्, उभय । 'श्रद्धोपकरणार्थस्य तनेस्तनति तानयेत् । दैर्घ्यार्थस्योपसर्गात् तु, विस्तारे तनुतेऽतनोत्' (श्लो. १२७-१२८) इति देवः ।

१. लट् - (i) तनोति[1] तनुतः तन्वन्ति । तनोषि तनुथः तनुथ । तनोमि तनुवः-तन्वः तनुमः-तन्मः । (ii) तनुते तन्वाते तन्वते । तनुषे तन्वाथे तनुध्वे । तन्वे तनुवहे-तन्वहे तनुमहे-तन्महे । **२. लिट् -** (i) ततान तेनतुः तेनुः । तेनिथ तेनथुः तेन । ततान-ततन तेनिव तेनिम । (ii) तेने तेनाते तेनिरे । तेनिषे तेनाथे तेनिध्वे । तेने तेनिवहे तेनिमहे । **३. लुट् -** (i) तनिता तनितारौ तनितारः । तनितासि तनितास्थः तनितास्थ । तनितास्मि तनितास्वः तनितास्मः । (ii) तनिता तनितारौ तनितारः । तनितासे तनितासाथे तनिताध्वे । तनिताहे तनितास्वहे तनितास्महे । **४. लृट् -** (i) तनिष्यति तनिष्यतः तनिष्यन्ति । तनिष्यसि तनिष्यथः तनिष्यथ । तनिष्यामि तनिष्यावः तनिष्यामः । (ii) तनिष्यते तनिष्येते तनिष्यन्ते । तनिष्यसे तनिष्येथे तनिष्यध्वे । तनिष्ये तनिष्यावहे तनिष्यामहे । **५. लोट् -** (i) तनोतु, तनुतात् तनुताम् तन्वन्तु । तनु-तनुतात् तनुतम् तनुत । तनवानि तनवाव तनवाम । (ii) तनुताम् तन्वाताम् तन्वताम् । तनुष्व तन्वाथाम् तनुध्वम् । तनवै तनवावहै तनवामहै । **६. लङ् -** (i) अतनोत् अतनुताम् अतन्वन् । अतनोः अतनुतम् अतनुत । अतनवम् अतनुव-अतन्व, अतनुम-अतन्म । (ii) अतनुत अतन्वाताम् अतन्वत । अतनुथाः अतन्वाथाम् अतनुध्वम् । अतन्वि अतनुवहि-अतन्वहि अतनुमहि-अतन्महि । **७. विधिलिङ् -** (i) तनुयात् तनुयाताम् तनुयुः । तनुयाः तनुयातम् तनुयात । तनुयाम् तनुयाव तनुयाम । (ii) तन्वीत तन्वीयाताम् तन्वीरन् । तन्वीथाः तन्वीयाथाम् तन्वीध्वम् । तन्वीय तन्वीवहि तन्वीमहि । **८. आशीर्लिङ् -** (i) तन्यात् तन्यास्ताम् तन्यासुः । तन्याः तन्यास्तम् तन्यास्त । तन्यासम् तन्यास्व तन्यास्म । (ii) तनिषीष्ट तनिषीयास्ताम् तनिषीरन् । तनिषीष्ठाः तनिषीयास्थाम् तनिषीध्वम् । तनिषीय तनिषीवहि तनिषीमहि । **९. लुङ् -** (i) अतनीत्[2] अतनिष्टाम् अतनिषुः । अतनीः अतनिष्टम् अतनिष्ट । अतनिषम् अतनिष्व अतनिष्म । (ii) अतानीत् अतानिष्टाम् अतानिषुः । अतानीः अतानिष्टम् अतानिष्ट । अतानिषम् अतानिष्व अतानिष्म । (iii) अतत[3]-अतनिष्ट अतनिषाताम् अतनिषत । अतथाः-अतनिष्ठाः अतनिषाथाम् अतनिड्ढ्वम्/ढ्वम् । अतनिषि अतनिष्वहि अतनिष्महि । **१०. लृङ् -** (i) अतनिष्यत् अतनिष्यताम् अतनिष्यन् । अतनिष्यः अतनिष्यतम् अतनिष्यत । अतनिष्यम् अतनिष्याव अतनिष्याम । (ii) अतनिष्यत अतनिष्येताम् अतनिष्यन्त । अतनिष्यथाः अतनिष्येथाम् अतनिष्यध्वम् । अतनिष्ये अवेतनिष्यावहि अतनिष्यामहि ।

णिचि - तानयति-न्ते, **सनि -** तितनिषति[4]-ते/तितंसति-ते/तितासंति-न्ते, **कर्मणि -** तन्यते/तायते[5]

१. 'तनादिकृञ्भ्यः उः' - कर्त्रर्थे सार्वधातुके तनादिभ्यः कृञश्च 'उ'प्रत्ययः स्यात् ।
२. 'अतो हलादेर्लघोः' इति परस्मैपदपरे सिचि वा वृद्धिः ।
३. 'तनादिभ्यस्तथासोः' - तनादेः सिचो वा लुक् स्यात्तथासोः इति वा सिज्लोपः ।
४. 'तनिपतिदरिद्रातिभ्यः सन इड्वा वक्तव्यः ।' इडभावे 'तनोतेर्विभाषा' इति झलादौ सनि वा दीर्घः ।
५. 'तनोतेर्यकि' इति आत्वं वा ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१४६४. षणु – दाने । सकर्म, सेट्, उभय । णोपदेशोऽयम् । 'नान्तोऽयम् । षकारस्तु लाक्षणिकः । तेन यङ्लुकि संसन्ति संसन्तः इत्यादौ अनुस्वार-परसवर्णौ' इति तत्त्वबोधिनी । 'दाने सनोति सनुते सम्भक्तौ तु सनेदिति' (श्लो. १२८) इति देवः ।

१. लट् – (i) सनोति[१] सनुतः सन्वन्ति । सनोषि सनुथः सनुथ । सनोमि सनुवः-सन्वः सनुमः-सन्मः । (ii) सनुते सन्वाते सन्वते । सनुषे सन्वाथे सनुध्वे । सन्वे सनुवहे-सन्वहे सनुमहे-सन्महे । **२. लिट् –** (i) ससान सेनतुः सेनुः । सेनिथ सेनथुः सेन । ससान-ससन सेनिव सेनिम । (ii) सेने सेनाते सेनिरे । सेनिषे सेनाथे सेनिध्वे । सेने सेनिवहे सेनिमहे । **३. लुट् –** (i) सनिता सनितारौ सनितारः । सनितासि सनितास्थः सनितास्थ । सनितास्मि सनितास्वः सनितास्मः । (ii) सनिता सनितारौ सनितारः । सनितासे सनितासाथे सनिताध्वे । सनिताहे सनितास्वहे सनितास्महे । **४. लृट् –** (i) सनिष्यति सनिष्यतः सनिष्यन्ति । सनिष्यसि सनिष्यथः सनिष्यथ । सनिष्यामि सनिष्यावः सनिष्यामः । (ii) सनिष्यते सनिष्येते सनिष्यन्ते । सनिष्यसे सनिष्येथे सनिष्यध्वे । सनिष्ये सनिष्यावहे सनिष्यामहे । **५. लोट् –** (i) सनोतु, सनुतात् सनुताम् सन्वन्तु । सनु-सनुतात् सनुतम् सनुत । सनवानि सनवाव सनवाम । (ii) सनुताम् सन्वाताम् सन्वताम् । सनुष्व सन्वाथाम् सनुध्वम् । सनवै सनवावहै सनवामहै । **६. लङ् –** (i) असनोत् असनुताम् असन्वन् । असनोः असनुतम् असनुत । असनवम् असनुव-असन्व, असनुम-असन्म । (ii) असनुत असन्वाताम् असन्वत । असनुथाः असन्वाथाम् असनुध्वम् । असन्वि असनुवहि-असन्वहि असनुमहि-असन्महि । **७. विधिलिङ् –** (i) सनुयात् सनुयाताम् सनुयुः । सनुयाः सनुयातम् सनुयात । सनुयाम् सनुयाव सनुयाम । (ii) सन्वीत सन्वीयाताम् सन्वीरन् । सन्वीथाः सन्वीयाथाम् सन्वीध्वम् । सन्वीय सन्वीवहि सन्वीमहि । **८. आशीर्लिङ् –** (i) सायात्[२] सायास्ताम् सायासुः । सायाः सायास्तम् सायास्त । सायासम् सायास्व सायास्म । (ii) सन्यात् सन्यास्ताम् सन्यासुः । सन्याः सन्यास्तम् सन्यास्त । सन्यासम् सन्यास्व सन्यास्म । (iii) सनिषीष्ट सनिषीयास्ताम् सनिषीरन् । सनिषीष्ठाः सनिषीयास्थाम् सनिषीध्वम् । सनिषीय सनिषीवहि सनिषीमहि ।

९. लुङ् – (i) असनीत्[३] असनिष्टाम् असनिषुः । असनीः असनिष्टम् असनिष्ट । असनिषम् असनिष्व असनिष्म । (ii) असानीत् असानिष्टाम् असानिषुः । असानीः असानिष्टम् असानिष्ट । असानिषम् असानिष्व असानिष्म । (iii) असात[२]-असनिष्ट असनिषाताम् असनिषत । असाथाः-असनिष्ठाः असनिषाथाम् असनिड्ढ्वम्/ढ्ढम् । असनिषि असनिष्वहि असनिष्महि । **१०. लृङ् –** (i) असनिष्यत् असनिष्यताम् असनिष्यन् । असनिष्यः असनिष्यतम् असनिष्यत । असनिष्यम् असनिष्याव असनिष्याम । (ii) असनिष्यत असनिष्येताम् असनिष्यन्त । असनिष्यथाः असनिष्येथाम् असनिष्यध्वम् । असनिष्ये अवेसनिष्यावहि असनिष्यामहि ।

णिचि – सानयति-ते, **सनि –** सिसनिषति-ते/सिषासति[२]-ते, **यकि –** सन्यते[४]/सायते ।

१. 'तनादिकृञ्भ्यः उः' – कर्त्रर्थे सार्वधातुके तनादिभ्यः कृञश्च 'उ'प्रत्ययः स्यात् ।
२. 'जनसनखनाम्...' इति आकारोऽन्तादेशः झलादौ सनि झलादौ क्ङिति च ।
३. 'अतो हलादेर्लघोः' इति परस्मैपदपरे सिचि वा वृद्धिः ।
४. 'ये विभाषा' इति आत्वं वा ।

१४६५. क्षणु – हिंसायाम् । सकर्म, सेट्, उभय । अदुपधः । अयमपि लाक्षणिकणकारः ।

१. लट् – (i) क्षणोति क्षणुतः क्षण्वन्ति । क्षणोषि क्षणुथः क्षणुथ । क्षणोमि क्षण्वः-क्षणुवः क्षण्मः-क्षणुमः । (ii) क्षणुते क्षण्वाते क्षण्वते । क्षणुषे क्षण्वाथे क्षणुध्वे । क्षण्वे क्षण्वहे-क्षणुवहे क्षण्महे-क्षणुमहे । **२. लिट् –** (i) चक्षाण चक्षणतुः चक्षणुः । चक्षणिथ चक्षणथुः चक्षण । चक्षाण-चक्षण चक्षणिव चक्षणिम । (ii) चक्षणे चक्षणाते चक्षणिरे । चक्षणिषे चक्षणाथे चक्षणिध्वे । चक्षणे चक्षणिवहे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चक्षणिमहे । **३. लुट्** - (i) क्षणिता क्षणितारौ क्षणितारः । क्षणितासि क्षणितास्थः क्षणितास्थ । क्षणितास्मि क्षणितास्वः क्षणितास्मः । (ii) क्षणिता क्षणितारौ क्षणितारः । क्षणितासे क्षणितासाथे क्षणिताध्वे । क्षणिताहे क्षणितास्वहे क्षणितास्महे । **४. लृट्** - (i) क्षणिष्यति क्षणिष्यतः क्षणिष्यन्ति । क्षणिष्यसि क्षणिष्यथः क्षणिष्यथ । क्षणिष्यामि क्षणिष्यावः क्षणिष्यामः । (ii) क्षणिष्यते क्षणिष्येते क्षणिष्यन्ते । क्षणिष्यसे क्षणिष्येथे क्षणिष्यध्वे । क्षणिष्ये क्षणिष्यावहे क्षणिष्यामहे । **५. लोट्** - (i) क्षणोतु-क्षणुतात् क्षणुताम् क्षण्वन्तु । क्षणु-क्षणुतात् क्षणुतम् क्षणुत । क्षणवानि क्षणवाव क्षणवाम । (ii) क्षणुताम् क्षण्वाताम् क्षण्वताम् । क्षणुष्व क्षण्वाथाम् क्षणुध्वम् । क्षणवै क्षणवावहै क्षणवामहै ।

६. लङ् - (i) अक्षणोत् अक्षणुताम् अक्षण्वन् । अक्षणोः अक्षणुतम् अक्षणुत । अक्षणवम् अक्षणुव-अक्षण्व, अक्षणुम-अक्षण्म । (ii) अक्षणुत अक्षण्वाताम् अक्षण्वत । अक्षणुथाः अक्षण्वाथाम् अक्षणुध्वम् । अक्षण्वि अक्षणुवहि-अक्षण्वहि अक्षणुमहि-अक्षण्महि । **७. विधिलिङ्** - (i) क्षणुयात् क्षणुयाताम् क्षणुयुः । क्षणुयाः क्षणुयातम् क्षणुयात । क्षणुयाम् क्षणुयाव क्षणुयाम । (ii) क्षण्वीत क्षण्वीयाताम् क्षण्वीरन् । क्षण्वीथाः क्षण्वीयाथाम् क्षण्वीध्वम् । क्षण्वीय क्षण्वीवहि क्षण्वीमहि । **८. आशीर्लिङ्** - (i) क्षण्यात् क्षण्यास्ताम् क्षण्यासुः । क्षण्याः क्षण्यास्तम् क्षण्यास्त । क्षण्यासम् क्षण्यास्व क्षण्यास्म । (ii) क्षणिषीष्ट क्षणिषीयास्ताम् क्षणिषीरन् । क्षणिषीष्ठाः क्षणिषीयास्थाम् क्षणिषीध्वम् । क्षणिषीय क्षणिषीवहि क्षणिषीमहि । **९. लुङ्** - (i) अक्षणीत्[१] अक्षणिष्टाम् अक्षणिषुः । अक्षणीः अक्षणिष्टम् अक्षणिष्ट । अक्षणिषम् अक्षणिष्व अक्षणिष्म । (ii) अक्षत-अक्षणिष्ट अक्षणिषाताम् अक्षणिषत । अक्षथाः-अक्षणिष्ठाः अक्षणिषाथाम् अक्षणिड्ढ्वम्/ढ्वम् । अक्षणिषि अक्षणिष्वहि अक्षणिष्महि । **१०. लृङ्** - (i) अक्षणिष्यत् अक्षणिष्यताम् अक्षणिष्यन् । अक्षणिष्यः अक्षणिष्यतम् अक्षणिष्यत । अक्षणिष्यम् अक्षणिष्याव अक्षणिष्याम । (ii) अक्षणिष्यत अक्षणिष्येताम् अक्षणिष्यन्त । अक्षणिष्यथाः अक्षणिष्येथाम् अक्षणिष्यध्वम् । अक्षणिष्ये अवेक्षणिष्यावहि अक्षणिष्यामहि ।

णिचि - क्षाणयति-ते, **सनि** - चिक्षणिषति-ते, **यकि** - क्षण्यते ।

१. 'ह्मयन्तक्षण...' इति न वृद्धिः ।

१४६६. क्षिणु - हिंसायाम् । सकर्म, सेट्, उभय । इदुपधः । अयमपि लाक्षणिकणकारः ।

१. लट् - (i) क्षिणोति[१] क्षिणुतः क्षिण्वन्ति । क्षिणोषि क्षिणुथः क्षिणुथ । क्षिणोमि क्षिण्वः-क्षिणुवः क्षिण्मः-क्षिणुमः । (ii) क्षेणोति[१] क्षेणुतः क्षेण्वन्ति । क्षेणोषि क्षेणुथः क्षेणुथ । क्षेणोमि क्षेण्वः-क्षेणुवः क्षेण्मः-क्षेणुमः । (iii) क्षिणुते क्षिण्वाते क्षिण्वते । क्षिणुषे क्षिण्वाथे क्षिणुध्वे । क्षिण्वे क्षिण्वहे-क्षिणुवहे क्षिण्महे-क्षिणुमहे । (iv) क्षेणुते क्षेण्वाते क्षेण्वते । क्षेणुषे क्षेण्वाथे क्षेणुध्वे । क्षेण्वे क्षेण्वहे-क्षेणुवहे क्षेण्महे-क्षेणुमहे । **२. लिट्** - (i) चिक्षेण चिक्षिणतुः चिक्षिणुः । चिक्षेणिथ चिक्षिणथुः चिक्षिण । चिक्षेण चिक्षिणिव चिक्षिणिम । (ii) चिक्षिणे चिक्षिणाते चिक्षिणिरे । चिक्षिणिषे चिक्षिणाथे चिक्षिणिध्वे । चिक्षिणे चिक्षिणिवहे चिक्षिणिमहे । **३. लुट्** - (i) क्षेणिता क्षेणितारौ क्षेणितारः । क्षेणितासि क्षेणितास्थः क्षेणितास्थ । क्षेणितास्मि क्षेणितास्वः क्षेणितास्मः । (ii) क्षेणिता क्षेणितारौ क्षेणितारः । क्षेणितासे क्षेणितासाथे क्षेणिताध्वे । क्षेणिताहे क्षेणितास्वहे क्षेणितास्महे । **४. लृट्** - (i) क्षेणिष्यति क्षेणिष्यतः क्षेणिष्यन्ति । क्षेणिष्यसि क्षेणिष्यथः क्षेणिष्यथ । क्षेणिष्यामि क्षेणिष्यावः क्षेणिष्यामः । (ii) क्षेणिष्यते क्षेणिष्येते क्षेणिष्यन्ते । क्षेणिष्यसे क्षेणिष्येथे क्षेणिष्यध्वे । क्षेणिष्ये क्षेणिष्यावहे क्षेणिष्यामहे । **५. लोट्** - (i) क्षिणोतु-क्षिणुतात् क्षिणुताम् क्षिण्वन्तु । क्षिणु-क्षिणुतात् क्षिणुतम् क्षिणुत । क्षिणवानि क्षिणवाव क्षिणवाम । (ii) क्षेणोतु-क्षेणुतात् क्षेणुताम् क्षेण्वन्तु । क्षेणु-क्षेणुतात् क्षेणुतम् क्षेणुत ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१. लट् - (i) छदयति[1] छदयतः छदयन्ति । छदयसि छदयथः छदयथ । छदयामि छदयावः छदयामः । (ii) छदयते छदयेते छदयन्ते । छदयसे छदयेथे छदयध्वे । छदये छदयावहे छदयामहे । **२. लिट्** - (i) छदयाञ्चकार छदयाञ्चक्रतुः छदयाञ्चक्रुः । छदयाञ्चकर्थ छदयाञ्चक्रथुः छदयाञ्चक्र । छदयाञ्चकार, छदयाञ्चकर छदयाञ्चकृव छदयाञ्चकृम । (ii) छदयाञ्चक्रे छदयाञ्चक्राते छदयाञ्चक्रिरे । छदयाञ्चकृषे छदयाञ्चक्राथे छदयाञ्चकृढ्वे । छदयाञ्चक्रे छदयाञ्चकृवहे छदयाञ्चकृमहे । (iii) छदयाम्बभूव छदयाम्बभूवतुः छदयाम्बभूवुः । छदयाम्बभूविथ छदयाम्बभूवथुः छदयाम्बभूव । छदयाम्बभूव छदयाम्बभूविव छदयाम्बभूविम । (iv) छदयामास छदयामासतुः छदयामासुः । छदयामासिथ छदयामासथुः छदयामास । छदयामास छदयामासिव छदयामासिम । **३. लुट्** - (i) छदयिता छदयितारौ छदयितारः । छदयितासि छदयितास्थः छदयितास्थ । छदयितास्मि छदयितास्वः छदयितास्मः । (ii) छदयिता छदयितारौ छदयितारः । छदयितासे छदयितासाथे छदयिताध्वे । छदयिताहे छदयितास्वहे छदयितास्महे । **४. लृट्** - (i) छदयिष्यति छदयिष्यतः छदयिष्यन्ति । छदयिष्यसि छदयिष्यथः छदयिष्यथ । छदयिष्यामि छदयिष्यावः छदयिष्यामः । (ii) छदयिष्यते छदयिष्येते छदयिष्यन्ते । छदयिष्यसे छदयिष्येथे छदयिष्यध्वे । छदयिष्ये छदयिष्यावहे छदयिष्यामहे । **५. लोट्** - (i) छदयतु, छदयतात् छदयताम् छदयन्तु । छदय, छदयतात् छदयतम् छदयत । छदयानि छदयाव छदयाम । (ii) छदयताम् छदयेताम् छदयन्ताम् । छदयस्व छदयेथाम् छदयध्वम् । छदयै छदयावहै छदयामहै । **६. लङ्** - (i) अच्छदयत् अच्छदयताम् अच्छदयन् । अच्छदयः अच्छदयतम् अच्छदयत । अच्छदयम् अच्छदयाव अच्छदयाम । (ii) अच्छदयत अच्छदयेताम् अच्छदयन्त । अच्छदयथाः अच्छदयेथाम् अच्छदयध्वम् । अच्छदये अच्छदयावहि अच्छदयामहि । **७. विधिलिङ्** - (i) छदयेत् छदयेताम् छदयेयुः । छदयेः छदयेतम् छदयेत । छदयेयम् छदयेव छदयेम । (ii) छदयेत छदयेयाताम् छदयेरन् । छदयेथाः छदयेयाथाम् छदयेध्वम् । छदयेय छदयेवहि छदयेमहि । **८. आशीर्लिङ्** - (ii) छद्यात् छद्यास्ताम् छद्यासुः । छद्याः छद्यास्तम् छद्यास्त । छद्यासम् छद्यास्व छद्यास्म । (ii) छदयिषीष्ट छदयिषीयास्ताम् छदयिषीरन् । छदयिषीष्ठाः छदयिषीयास्थाम् छदयिषीध्वम् । छदयिषीय छदयिषीवहि छदयिषीमहि । **९. लुङ्** - (i) अचच्छदत्[2] अचच्छदताम् अचच्छदन् । अचच्छदः अचच्छदतम् अचच्छदत । अचच्छदम् अचच्छदाव अचच्छदाम । (ii) अचच्छदत अचच्छदेताम् अचच्छदन्त । अचच्छदथाः अचच्छदेथाम् अचच्छदध्वम् । अचच्छदे अचच्छदावहि अचच्छदामहि । **१०. लृङ्** - (i) अच्छदयिष्यत् अच्छदयिष्यताम् अच्छदयिष्यन् । अच्छदयिष्यः अच्छदयिष्यतम् अच्छदयिष्यत । अच्छदयिष्यम् अच्छदयिष्याव अच्छदयिष्याम । (ii) अच्छदयिष्यत अच्छदयिष्येताम् अच्छदयिष्यन्त । अच्छदयिष्यथाः अच्छदयिष्येथाम् अच्छदयिष्यध्वम् । अच्छदयिष्ये अच्छदयिष्यावहि अच्छदयिष्यामहि ।

णिचि - छदयति - ते, **सनि** - चिच्छदयिषति - ते, **यकि** - छद्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९३७. लाभ - प्रेरणे । सकर्म, सेट्, उभय, (अदन्तः) । 'प्रेरणे लाभयेल्लाभे प्राप्त्यर्थे लभते शपि' (श्लो. १४६) इति देवः ।

१. लट् - (i) लाभयति[1] लाभयतः लाभयन्ति । लाभयसि लाभयथः लाभयथ । लाभयामि लाभयावः लाभयामः । (ii) लाभयते लाभयेते लाभयन्ते । लाभयसे लाभयेथे लाभयध्वे । लाभये लाभयावहे लाभयामहे । **२. लिट्** - (i) लाभयाञ्चकार लाभयाञ्चक्रतुः लाभयाञ्चक्रुः । लाभयाञ्चकर्थ लाभयाञ्चक्रथुः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लाभयाञ्चक्र । लाभयाञ्चकार, लाभयाञ्चकर लाभयाञ्चकृव लाभयाञ्चकृम । (ii) लाभयाञ्चक्रे लाभयाञ्चक्राते लाभयाञ्चक्रिरे । लाभयाञ्चकृषे लाभयाञ्चक्राथे लाभयाञ्चकृढ्वे । लाभयाञ्चक्रे लाभयाञ्चकृवहे लाभयाञ्चकृमहे । (iii) लाभयाम्बभूव लाभयाम्बभूवतुः लाभयाम्बभूवुः । लाभयाम्बभूविथ लाभयाम्बभूवथुः लाभयाम्बभूव । लाभयाम्बभूव लाभयाम्बभूविव लाभयाम्बभूविम । (iv) लाभयामास लाभयामासतुः लाभयामासुः । लाभयामासिथ लाभयामासथुः लाभयामास । लाभयामास लाभयामासिव लाभयामासिम । **३. लुट्** - (i) लाभयिता लाभयितारौ लाभयितारः । लाभयितासि लाभयितास्थः लाभयितास्थ । लाभयितास्मि लाभयितास्वः लाभयितास्मः । (ii) लाभयिता लाभयितारौ लाभयितारः । लाभयितासे लाभयितासाथे लाभयिताध्वे । लाभयिताहे लाभयितास्वहे लाभयितास्महे । **४. लृट्** - (i) लाभयिष्यति लाभयिष्यतः लाभयिष्यन्ति । लाभयिष्यसि लाभयिष्यथः लाभयिष्यथ । लाभयिष्यामि लाभयिष्यावः लाभयिष्यामः । (ii) लाभयिष्यते लाभयिष्येते लाभयिष्यन्ते । लाभयिष्यसे लाभयिष्येथे लाभयिष्यध्वे । लाभयिष्ये लाभयिष्यावहे लाभयिष्यामहे । **५. लोट्** - (i) लाभयतु, लाभयतात् लाभयताम् लाभयन्तु । लाभय, लाभयतात् लाभयतम् लाभयत । लाभयानि लाभयाव लाभयाम । (ii) लाभयताम् लाभयेताम् लाभयन्ताम् । लाभयस्व लाभयेथाम् लाभयध्वम् । लाभयै लाभयावहै लाभयामहै । **६. लङ्** - (i) अलाभयत् अलाभयताम् अलाभयन् । अलाभयः अलाभयतम् अलाभयत । अलाभयम् अलाभयाव अलाभयाम । (ii) अलाभयत अलाभयेताम् अलाभयन्त । अलाभयथाः अलाभयेथाम् अलाभयध्वम् । अलाभये अलाभयावहि अलाभयामहि । **७. विधिलिङ्** - (i) लाभयेत् लाभयेताम् लाभयेयुः । लाभयेः लाभयेतम् लाभयेत । लाभयेयम् लाभयेव लाभयेम । (ii) लाभयेत लाभयेयाताम् लाभयेरन् । लाभयेथाः लाभयेयाथाम् लाभयेध्वम् । लाभयेय लाभयेवहि लाभयेमहि । **८. आशीर्लिङ्** - (i) लाभ्यात् लाभ्यास्ताम् लाभ्यासुः । लाभ्याः लाभ्यास्तम् लाभ्यास्त । लाभ्यासम् लाभ्यास्व लाभ्यास्म । (ii) लाभयिषीष्ट लाभयिषीयास्ताम् लाभयिषीरन् । लाभयिषीष्ठाः लाभयिषीयास्थाम् लाभयिषीध्वम् । लाभयिषीय लाभयिषीवहि लाभयिषीमहि । **९. लुङ्** - (i) अललाभत्[2] अललाभताम् अललाभन् । अललाभः अललाभतम् अललाभत । अललाभम् अललाभाव अललाभाम । (ii) अललाभत अललाभेताम् अललाभन्त । अललाभथाः अललाभेथाम् अललाभध्वम् । अललाभे अललाभावहि अललाभामहि । **१०. लृङ्** - (i) अलाभयिष्यत् अलाभयिष्यताम् अलाभयिष्यन् । अलाभयिष्यः अलाभयिष्यतम् अलाभयिष्यत । अलाभयिष्यम् अलाभयिष्याव अलाभयिष्याम । (ii) अलाभयिष्यत अलाभयिष्येताम् अलाभयिष्यन्त । अलाभयिष्यथाः अलाभयिष्येथाम् अलाभयिष्यध्वम् । अलाभयिष्ये अलाभयिष्यावहि अलाभयिष्यामहि ।

णिचि - लाभयति - ते, **सनि** - लिलाभयिषति - ते, **यकि** - लाभ्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।
२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९३८. व्रण - गात्रविचूर्णने । सकर्म, सेट्, उभय, (अदन्तः) । 'व्रणेच्छब्दार्थविषये व्रणयेद् गात्रचूर्णने' (श्लो. ९३) इति देवः ।

१. लट् - (i) व्रणयति[1] व्रणयतः व्रणयन्ति । व्रणयसि व्रणयथः व्रणयथ । व्रणयामि व्रणयावः व्रणयामः । (ii) व्रणयते व्रणयेते व्रणयन्ते । व्रणयसे व्रणयेथे व्रणयध्वे । व्रणये व्रणयावहे व्रणयामहे । **२. लिट्** - (i) व्रणयाञ्चकार व्रणयाञ्चक्रतुः व्रणयाञ्चक्रुः । व्रणयाञ्चकर्थ व्रणयाञ्चक्रथुः व्रणयाञ्चक्र । व्रणयाञ्चकार, व्रणयाञ्चकर व्रणयाञ्चकृव व्रणयाञ्चकृम । (ii) व्रणयाञ्चक्रे व्रणयाञ्चक्राते व्रणयाञ्चक्रिरे । व्रणयाञ्चकृषे व्रणयाञ्चक्राथे व्रणयाञ्चकृढ्वे । व्रणयाञ्चक्रे व्रणयाञ्चकृवहे व्रणयाञ्चकृमहे । (iii) व्रणयाम्बभूव व्रणया-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

म्बभूवतुः व्रणयाम्बभूवुः । व्रणयाम्बभूविथ व्रणयाम्बभूवथुः व्रणयाम्बभूव । व्रणयाम्बभूव व्रणयाम्बभूविव व्रणयाम्बभूविम । (iv) व्रणयामास व्रणयामासतुः व्रणयामासुः । व्रणयामासिथ व्रणयामासथुः व्रणयामास । व्रणयामास व्रणयामासिव व्रणयामासिम । **३. लुट्** - (i) व्रणयिता व्रणयितारौ व्रणयितारः । व्रणयितासि व्रणयितास्थः व्रणयितास्थ । व्रणयितास्मि व्रणयितास्वः व्रणयितास्मः । (ii) व्रणयिता व्रणयितारौ व्रणयितारः । व्रणयितासे व्रणयितासाथे व्रणयिताध्वे । व्रणयिताहे व्रणयितास्वहे व्रणयितास्महे । **४. लृट्** - (i) व्रणयिष्यति व्रणयिष्यतः व्रणयिष्यन्ति । व्रणयिष्यसि व्रणयिष्यथः व्रणयिष्यथ । व्रणयिष्यामि व्रणयिष्यावः व्रणयिष्यामः । (ii) व्रणयिष्यते व्रणयिष्येते व्रणयिष्यन्ते । व्रणयिष्यसे व्रणयिष्येथे व्रणयिष्यध्वे । व्रणयिष्ये व्रणयिष्यावहे व्रणयिष्यामहे । **५. लोट्** - (i) व्रणयतु, व्रणयतात् व्रणयताम् व्रणयन्तु । व्रणय, व्रणयतात् व्रणयतम् व्रणयत । व्रणयानि व्रणयाव व्रणयाम । (ii) व्रणयताम् व्रणयेताम् व्रणयन्ताम् । व्रणयस्व व्रणयेथाम् व्रणयध्वम् । व्रणयै व्रणयावहै व्रणयामहै । **६. लङ्** - (i) अव्रणयत् अव्रणयताम् अव्रणयन् । अव्रणयः अव्रणयतम् अव्रणयत । अव्रणयम् अव्रणयाव अव्रणयाम । (ii) अव्रणयत अव्रणयेताम् अव्रणयन्त । अव्रणयथाः अव्रणयेथाम् अव्रणयध्वम् । अव्रणये अव्रणयावहि अव्रणयामहि । **७. विधिलिङ्** - (i) व्रणयेत् व्रणयेताम् व्रणयेयुः । व्रणयेः व्रणयेतम् व्रणयेत । व्रणयेयम् व्रणयेव व्रणयेम । (ii) व्रणयेत व्रणयेयाताम् व्रणयेरन् । व्रणयेथाः व्रणयेयाथाम् व्रणयेध्वम् । व्रणयेय व्रणयेवहि व्रणयेमहि । **८. आशीर्लिङ्** - (ii) व्रण्यात् व्रण्यास्ताम् व्रण्यासुः । व्रण्याः व्रण्यास्तम् व्रण्यास्त । व्रण्यासम् व्रण्यास्व व्रण्यास्म । (ii) व्रणयिषीष्ट व्रणयिषीयास्ताम् व्रणयिषीरन् । व्रणयिषीष्ठाः व्रणयिषीयास्थाम् व्रणयिषीध्वम् । व्रणयिषीय व्रणयिषीवहि व्रणयिषीमहि । **९. लुङ्** - (i) अवव्रणत्[२] अवव्रणताम् अवव्रणन् । अवव्रणः अवव्रणतम् अवव्रणत । अवव्रणम् अवव्रणाव अवव्रणाम । (ii) अवव्रणत अवव्रणेताम् अवव्रणन्त । अवव्रणथाः अवव्रणेथाम् अवव्रणध्वम् । अवव्रणे अवव्रणावहि अवव्रणामहि । **१०. लृङ्** - (i) अव्रणयिष्यत् अव्रणयिष्यताम् अव्रणयिष्यन् । अव्रणयिष्यः अव्रणयिष्यतम् अव्रणयिष्यत । अव्रणयिष्यम् अव्रणयिष्याव अव्रणयिष्याम । (ii) अव्रणयिष्यत अव्रणयिष्येताम् अव्रणयिष्यन्त । अव्रणयिष्यथाः अव्रणयिष्येथाम् अव्रणयिष्यध्वम् । अव्रणयिष्ये अव्रणयिष्यावहि अव्रणयिष्यामहि ।

णिचि - व्रणयति - ते, **सनि** - विव्रणयिषति - ते, **यकि** - व्रण्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९३९. वर्ण - वर्णक्रियाविस्तारगुणवचनेषु । सकर्म, सेट्, उभय, (अदन्तः) । वर्णक्रिया वर्णकरणम् । सुवर्णं वर्णयति । कथां वर्णयति । विस्तृणाति इत्यर्थः । हरिं वर्णयति । स्तौतीत्यर्थः । 'रागे विस्तारे प्रशंसायां च' इति काशकृत्स्नः ।

१. लट् - (i) वर्णयति[१] वर्णयतः वर्णयन्ति । वर्णयसि वर्णयथः वर्णयथ । वर्णयामि वर्णयावः वर्णयामः । (ii) वर्णयते वर्णयेते वर्णयन्ते । वर्णयसे वर्णयेथे वर्णयध्वे । वर्णये वर्णयावहे वर्णयामहे । **२. लिट्** - (i) वर्णयाञ्चकार वर्णयाञ्चक्रतुः वर्णयाञ्चक्रुः । वर्णयाञ्चकर्थ वर्णयाञ्चक्रथुः वर्णयाञ्चक्र । वर्णयाञ्चकार, वर्णयाञ्चकर वर्णयाञ्चकृव वर्णयाञ्चकृम । (ii) वर्णयाञ्चक्रे वर्णयाञ्चक्राते वर्णयाञ्चक्रिरे । वर्णयाञ्चकृषे वर्णयाञ्चक्राथे वर्णयाञ्चकृढ्वे । वर्णयाञ्चक्रे वर्णयाञ्चकृवहे वर्णयाञ्चकृमहे । (iii) वर्णयाम्बभूव वर्णयाम्बभूवतुः वर्णयाम्बभूवुः । वर्णयाम्बभूविथ वर्णयाम्बभूवथुः वर्णयाम्बभूव । वर्णयाम्बभूव वर्णयाम्बभूविव वर्णयाम्बभूविम । (iv) वर्णयामास वर्णयामासतुः वर्णयामासुः । वर्णयामासिथ वर्णयामासथुः वर्णयामास । वर्णयामास वर्णयामासिव वर्णयामासिम । **३. लुट्** - (i) वर्णयिता वर्णयितारौ वर्णयितारः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वर्णयितासि वर्णयितास्थः वर्णयितास्थ । वर्णयितास्मि वर्णयितास्वः वर्णयितास्मः । (ii) वर्णयिता वर्णयितारौ वर्णयितारः । वर्णयितासे वर्णयितासाथे वर्णयिताध्वे । वर्णयिताहे वर्णयितास्वहे वर्णयितास्महे । **४. लृट्** - (i) वर्णयिष्यति वर्णयिष्यतः वर्णयिष्यन्ति । वर्णयिष्यसि वर्णयिष्यथः वर्णयिष्यथ । वर्णयिष्यामि वर्णयिष्यावः वर्णयिष्यामः । (ii) वर्णयिष्यते वर्णयिष्येते वर्णयिष्यन्ते । वर्णयिष्यसे वर्णयिष्येथे वर्णयिष्यध्वे । वर्णयिष्ये वर्णयिष्यावहे वर्णयिष्यामहे । **५. लोट्** - (i) वर्णयतु, वर्णयतात् वर्णयताम् वर्णयन्तु । वर्णय, वर्णयतात् वर्णयतम् वर्णयत । वर्णयानि वर्णयाव वर्णयाम । (ii) वर्णयताम् वर्णयेताम् वर्णयन्ताम् । वर्णयस्व वर्णयेथाम् वर्णयध्वम् । वर्णयै वर्णयावहै वर्णयामहै । **६. लङ्** - (i) अवर्णयत् अवर्णयताम् अवर्णयन् । अवर्णयः अवर्णयतम् अवर्णयत । अवर्णयम् अवर्णयाव अवर्णयाम । (ii) अवर्णयत अवर्णयेताम् अवर्णयन्त । अवर्णयथाः अवर्णयेथाम् अवर्णयध्वम् । अवर्णये अवर्णयावहि अवर्णयामहि । **७. विधिलिङ्** - (i) वर्णयेत् वर्णयेताम् वर्णयेयुः । वर्णयेः वर्णयेतम् वर्णयेत । वर्णयेयम् वर्णयेव वर्णयेम । (ii) वर्णयेत वर्णयेयाताम् वर्णयेरन् । वर्णयेथाः वर्णयेयाथाम् वर्णयेध्वम् । वर्णयेय वर्णयेवहि वर्णयेमहि । **८. आशीर्लिङ्** - (i) वर्ण्यात् वर्ण्यास्ताम् वर्ण्यासुः । वर्ण्याः वर्ण्यास्तम् वर्ण्यास्त । वर्ण्यासम् वर्ण्यास्व वर्ण्यास्म । (ii) वर्णयिषीष्ट वर्णयिषीयास्ताम् वर्णयिषीरन् । वर्णयिषीष्ठाः वर्णयिषीयास्थाम् वर्णयिषीध्वम् । वर्णयिषीय वर्णयिषीवहि वर्णयिषीमहि । **९. लुङ्** - (i) अववर्णत्[२] अववर्णताम् अववर्णन् । अववर्णः अववर्णतम् अववर्णत । अववर्णम् अववर्णाव अववर्णाम । (ii) अववर्णत अववर्णेताम् अववर्णन्त । अववर्णथाः अववर्णेथाम् अववर्णध्वम् । अववर्णे अववर्णावहि अववर्णामहि । **१०. लृङ्** - (i) अवर्णयिष्यत् अवर्णयिष्यताम् अवर्णयिष्यन् । अवर्णयिष्यः अवर्णयिष्यतम् अवर्णयिष्यत । अवर्णयिष्यम् अवर्णयिष्याव अवर्णयिष्याम । (ii) अवर्णयिष्यत अवर्णयिष्येताम् अवर्णयिष्यन्त । अवर्णयिष्यथाः अवर्णयिष्येथाम् अवर्णयिष्यध्वम् । अवर्णयिष्ये अवर्णयिष्यावहि अवर्णयिष्यामहि ।

णिचि - वर्णयति - ते, **सनि** - विवर्णयिषति - ते, **यकि** वर्ण्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।
२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९४०. पर्ण - हरितभावे । अकर्म, सेट्, उभय, (अदन्तः) ।

१. लट् - पर्णयति[१] पर्णयतः पर्णयन्ति । पर्णयसि पर्णयथः पर्णयथ । पर्णयामि पर्णयावः पर्णयामः । (ii) पर्णयते पर्णयेते पर्णयन्ते । पर्णयसे पर्णयेथे पर्णयध्वे । पर्णये पर्णयावहे पर्णयामहे । **२. लिट्** - (i) पर्णयाञ्चकार पर्णयाञ्चक्रतुः पर्णयाञ्चक्रुः । पर्णयाञ्चकर्थ पर्णयाञ्चक्रथुः पर्णयाञ्चक्र । पर्णयाञ्चकार, पर्णयाञ्चकर पर्णयाञ्चकृव पर्णयाञ्चकृम । (ii) पर्णयाञ्चक्रे पर्णयाञ्चक्राते पर्णयाञ्चक्रिरे । पर्णयाञ्चकृषे पर्णयाञ्चक्राथे पर्णयाञ्चकृढ्वे । पर्णयाञ्चक्रे पर्णयाञ्चकृवहे पर्णयाञ्चकृमहे । (iii) पर्णयाम्बभूव पर्णयाम्बभूवतुः पर्णयाम्बभूवुः । पर्णयाम्बभूविथ पर्णयाम्बभूवथुः पर्णयाम्बभूव । पर्णयाम्बभूव पर्णयाम्बभूविव पर्णयाम्बभूविम । (iv) पर्णयामास पर्णयामासतुः पर्णयामासुः । पर्णयामासिथ पर्णयामासथुः पर्णयामास । पर्णयामास पर्णयामासिव पर्णयामासिम । **३. लुट्** - (i) पर्णयिता पर्णयितारौ पर्णयितारः । पर्णयितासि पर्णयितास्थः पर्णयितास्थ । पर्णयितास्मि पर्णयितास्वः पर्णयितास्मः । (ii) पर्णयिता पर्णयितारौ पर्णयितारः । पर्णयितासे पर्णयितासाथे पर्णयिताध्वे । पर्णयिताहे पर्णयितास्वहे पर्णयितास्महे । **४. लृट्** - (i) पर्णयिष्यति पर्णयिष्यतः पर्णयिष्यन्ति । पर्णयिष्यसि पर्णयिष्यथः पर्णयिष्यथ । पर्णयिष्यामि पर्णयिष्यावः पर्णयिष्यामः । (ii) पर्णयिष्यते पर्णयिष्येते पर्णयिष्यन्ते । पर्णयिष्यसे पर्णयिष्येथे पर्णयिष्यध्वे । पर्णयिष्ये पर्णयिष्यावहे पर्णयिष्यामहे । **५. लोट्** - (i) पर्णयतु, पर्णयतात् पर्णयताम् पर्णयन्तु । पर्णय, पर्णयतात् पर्णयतम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पर्णयत । पर्णयानि पर्णयाव पर्णयाम । (ii) पर्णयताम् पर्णयेताम् पर्णयन्ताम् । पर्णयस्व पर्णयेथाम् पर्णयध्वम् । पर्णयै पर्णयावहै पर्णयामहै । **६. लङ्** - (i) अपर्णयत् अपर्णयताम् अपर्णयन् । अपर्णयः अपर्णयतम् अपर्णयत । अपर्णयम् अपर्णयाव अपर्णयाम । (ii) अपर्णयत् अपर्णयेताम् अपर्णयन्त । अपर्णयथाः अपर्णयेथाम् अपर्णयध्वम् । अपर्णये अपर्णयावहि अपर्णयामहि । **७. विधिलिङ्** - (i) पर्णयेत् पर्णयेताम् पर्णयेयुः । पर्णयेः पर्णयेतम् पर्णयेत । पर्णयेयम् पर्णयेव पर्णयेम । (ii) पर्णयेत पर्णयेयाताम् पर्णयेरन् । पर्णयेथाः पर्णयेयाथाम् पर्णयेध्वम् । पर्णयेय पर्णयेवहि पर्णयेमहि । **८. आशीर्लिङ्** - (i) पर्ण्यात् पर्ण्यास्ताम् पर्ण्यासुः । पर्ण्याः पर्ण्यास्तम् पर्ण्यास्त । पर्ण्यासम् पर्ण्यास्व पर्ण्यास्म । (ii) पर्णयिषीष्ट पर्णयिषीयास्ताम् पर्णयिषीरन् । पर्णयिषीष्ठाः पर्णयिषीयास्थाम् पर्णयिषीध्वम् । पर्णयिषीय पर्णयिषीवहि पर्णयिषीमहि । **९. लुङ्** - (i) अपपर्णत्[2] अपपर्णताम् अपपर्णन् । अपपर्णः अपपर्णतम् अपपर्णत । अपपर्णम् अपपर्णाव अपपर्णाम । (ii) अपपर्णत अपपर्णेताम् अपपर्णन्त । अपपर्णथाः अपपर्णेथाम् अपपर्णध्वम् । अपपर्णे अपपर्णावहि अपपर्णामहि । **१०. लृङ्** - (i) अपर्णयिष्यत् अपर्णयिष्यताम् अपर्णयिष्यन् । अपर्णयिष्यः अपर्णयिष्यतम् अपर्णयिष्यत । अपर्णयिष्यम् अपर्णयिष्याव अपर्णयिष्याम । (ii) अपर्णयिष्यत अपर्णयिष्येताम् अपर्णयिष्यन्त । अपर्णयिष्यथाः अपर्णयिष्येथाम् अपर्णयिष्यध्वम् । अपर्णयिष्ये अपर्णयिष्यावहि अपर्णयिष्यामहि ।

णिचि - पर्णयति - ते, **सनि** - पिपर्णयिषति - ते, **यङि** - पर्ण्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९४१. विष्क - दर्शने । सकर्म, सेट्, उभय, (अदन्तः) ।

१. लट् - (i) विष्कयति[1] विष्कयतः विष्कयन्ति । विष्कयसि विष्कयथः विष्कयथ । विष्कयामि विष्कयावः विष्कयामः । (ii) विष्कयते विष्कयेते विष्कयन्ते । विष्कयसे विष्कयेथे विष्कयध्वे । विष्कये विष्कयावहे विष्कयामहे । **२. लिट्** - (i) विष्कयाञ्चकार विष्कयाञ्चक्रतुः विष्कयाञ्चक्रुः । विष्कयाञ्चकर्थ विष्कयाञ्चक्रथुः विष्कयाञ्चक्र । विष्कयाञ्चकार, विष्कयाञ्चकर विष्कयाञ्चकृव विष्कयाञ्चकृम । (ii) विष्कयाञ्चक्रे विष्कयाञ्चक्राते विष्कयाञ्चक्रिरे । विष्कयाञ्चकृषे विष्कयाञ्चक्राथे विष्कयाञ्चकृढ्वे । विष्कयाञ्चक्रे विष्कया-ञ्चकृवहे विष्कयाञ्चकृमहे । (iii) विष्कयाम्बभूव विष्कयाम्बभूवतुः विष्कयाम्बभूवुः । विष्कयाम्बभूविथ विष्कयाम्बभूवथुः विष्कयाम्बभूव । विष्कयाम्बभूव विष्कयाम्बभूविव विष्कयाम्बभूविम । (iv) विष्कयामास विष्कयामासतुः विष्कयामासुः । विष्कयामासिथ विष्कयामासथुः विष्कयामास । विष्कयामास विष्कयामासिव विष्कयामासिम । **३. लुट्** - (i) विष्कयिता विष्कयितारौ विष्कयितारः । विष्कयितासि विष्कयितास्थः विष्कयितास्थ । विष्कयितास्मि विष्कयितास्वः विष्कयितास्मः । (ii) विष्कयिता विष्कयितारौ विष्कयितारः । विष्कयितासे विष्कयितासाथे विष्कयिताध्वे । विष्कयिताहे विष्कयितास्वहे विष्कयितास्महे । **४. लृट्** - (i) विष्कयिष्यति विष्कयिष्यतः विष्कयिष्यन्ति । विष्कयिष्यसि विष्कयिष्यथः विष्कयिष्यथ । विष्कयिष्यामि विष्कयिष्यावः विष्कयिष्यामः । (ii) विष्कयिष्यते विष्कयिष्येते विष्कयिष्यन्ते । विष्कयिष्यसे विष्कयिष्येथे विष्कयिष्यध्वे । विष्कयिष्ये विष्कयिष्यावहे विष्कयिष्यामहे । **५. लोट्** - (ii) विष्कयतु, विष्कयतात् विष्कयताम् विष्कयन्तु । विष्कय, विष्कयतात् विष्कयतम् विष्कयत । विष्कयाणि विष्कयाव विष्कयाम । (ii) विष्कयताम् विष्कयेताम् विष्कयन्ताम् । विष्कयस्व विष्कयेथाम् विष्कयध्वम् । विष्कयै विष्कयावहै विष्कयामहै । **६. लङ्** - (i) अविष्कयत् अविष्कयताम् अविष्कयन् । अविष्कयः अविष्कयतम् अविष्कयत । अविष्कयम् अविष्कयाव अविष्कयाम । (ii) अविष्कयत अविष्कयेताम् अविष्कयन्त । अविष्कयथाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अविष्कयेथाम् अविष्कयध्वम् । अविष्कये अविष्कयावहि अविष्कयामहि । **७. विधिलिङ्** - (i) विष्कयेत् विष्कयेताम् विष्कयेयुः । विष्कयेः विष्कयेतम् विष्कयेत । विष्कयेयम् विष्कयेव विष्कयेम । (ii) विष्कयेत विष्कयेयाताम् विष्कयेरन् । विष्कयेथाः विष्कयेयाथाम् विष्कयेध्वम् । विष्कयेय विष्कयेवहि विष्कयेमहि । **८. आशीर्लिङ्** - (i) विष्क्यात् विष्क्यास्ताम् विष्क्यासुः । विष्क्याः विष्क्यास्तम् विष्क्यास्त । विष्क्यासम् विष्क्यास्व विष्क्यास्म । (ii) विष्कयिषीष्ट विष्कयिषीयास्ताम् विष्कयिषीरन् । विष्कयिषीष्ठाः विष्कयिषीयास्थाम् विष्कयिषीध्वम् । विष्कयिषीय विष्कयिषीवहि विष्कयिषीमहि । **९. लुङ्** - (i) अविविष्कत्[२] अविविष्कताम् अविविष्कन् । अविविष्कः अविविष्कतम् अविविष्कत । अविविष्कम् अविविष्काव अविविष्काम । (ii) अविविष्कत अविविष्केताम् अविविष्कन्त । अविविष्कथाः अविविष्केथाम् अविविष्कध्वम् । अविविष्के अविविष्कावहि अविविष्कामहि । **१०. लृङ्** - (i) अविष्कयिष्यत् अविष्कयिष्यताम् अविष्कयिष्यन् । अविष्कयिष्यः अविष्कयिष्यतम् अविष्कयिष्यत । अविष्कयिष्यम् अविष्कयिष्याव अविष्कयिष्याम । (ii) अविष्कयिष्यत अविष्कयिष्येताम् अविष्कयिष्यन्त । अविष्कयिष्यथाः अविष्कयिष्येथाम् अविष्कयिष्यध्वम् । अविष्कयिष्ये अविष्कयिष्यावहि अविष्कयिष्यामहि ।

णिचि - विष्कयति - ते, **सनि** - विविष्कयिषति - ते, **यकि** - विष्क्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९४२. क्षिप - प्रेरणे[१] । अकर्म, सेट्, उभय, (अदन्तः) ।

१. लट् - (i) क्षिपयति[२] क्षिपयतः क्षिपयन्ति । क्षिपयसि क्षिपयथः क्षिपयथ । क्षिपयामि क्षिपयावः क्षिपयामः । (ii) क्षिपयते क्षिपयेते क्षिपयन्ते । क्षिपयसे क्षिपयेथे क्षिपयध्वे । क्षिपये क्षिपयावहे क्षिपयामहे ।

२. लिट् - (i) क्षिपयाञ्चकार क्षिपयाञ्चक्रतुः क्षिपयाञ्चक्रुः । क्षिपयाञ्चकर्थ क्षिपयाञ्चक्रथुः क्षिपयाञ्चक्र । क्षिपयाञ्चकार, क्षिपयाञ्चकर क्षिपयाञ्चकृव क्षिपयाञ्चकृम । (ii) क्षिपयाञ्चक्रे क्षिपयाञ्चक्राते क्षिपयाञ्चक्रिरे । क्षिपयाञ्चकृषे क्षिपयाञ्चक्राथे क्षिपयाञ्चकृढ्वे । क्षिपयाञ्चक्रे क्षिपयाञ्चकृवहे क्षिपयाञ्चकृमहे । (iii) क्षिपयाम्बभूव क्षिपयाम्बभूवतुः क्षिपयाम्बभूवुः । क्षिपयाम्बभूविथ क्षिपयाम्बभूवथुः क्षिपयाम्बभूव । क्षिपयाम्बभूव क्षिपयाम्बभूविव क्षिपयाम्बभूविम । (iv) क्षिपयामास क्षिपयामासतुः क्षिपयामासुः । क्षिपयामासिथ क्षिपयामासथुः क्षिपयामास । क्षिपयामास क्षिपयामासिव क्षिपयामासिम । **३. लुट्** - (i) क्षिपयिता क्षिपयितारौ क्षिपयितारः । क्षिपयितासि क्षिपयितास्थः क्षिपयितास्थ । क्षिपयितास्मि क्षिपयितास्वः क्षिपयितास्मः । (ii) क्षिपयिता क्षिपयितारौ क्षिपयितारः । क्षिपयितासे क्षिपयितासाथे क्षिपयिताध्वे । क्षिपयिताहे क्षिपयितास्वहे क्षिपयितास्महे । **४. लृट्** - (i) क्षिपयिष्यति क्षिपयिष्यतः क्षिपयिष्यन्ति । क्षिपयिष्यसि क्षिपयिष्यथः क्षिपयिष्यथ । क्षिपयिष्यामि क्षिपयिष्यावः क्षिपयिष्यामः । (ii) क्षिपयिष्यते क्षिपयिष्येते क्षिपयिष्यन्ते । क्षिपयिष्यसे क्षिपयिष्येथे क्षिपयिष्यध्वे । क्षिपयिष्ये क्षिपयिष्यावहे क्षिपयिष्यामहे । **५. लोट्** - (i) क्षिपयतु, क्षिपयतात् क्षिपयताम् क्षिपयन्तु । क्षिपय, क्षिपयतात् क्षिपयतम् क्षिपयत । क्षिपयाणि क्षिपयाव क्षिपयाम । (ii) क्षिपयताम् क्षिपयेताम् क्षिपयन्ताम् । क्षिपयस्व क्षिपयेथाम् क्षिपयध्वम् । क्षिपयै क्षिपयावहै क्षिपयामहै । **६. लङ्** - (i) अक्षिपयत् अक्षिपयताम् अक्षिपयन् । अक्षिपयः अक्षिपयतम् अक्षिपयत । अक्षिपयम् अक्षिपयाव अक्षिपयाम । (ii) अक्षिपयत अक्षिपयेताम् अक्षिपयन्त । अक्षिपयथाः अक्षिपयेथाम् अक्षिपयध्वम् । अक्षिपये अक्षिपयावहि अक्षिपयामहि । **७. विधिलिङ्** - (i) क्षिपयेत् क्षिपयेताम् क्षिपयेयुः । क्षिपयेः क्षिपयेतम् क्षिपयेत । क्षिपयेयम् क्षिपयेव क्षिपयेम । (ii) क्षिपयेत क्षिपयेयाताम् क्षिपयेरन् । क्षिपयेथाः क्षिपयेयाथाम् क्षिपयेध्वम् । क्षिपयेय क्षिपयेवहि क्षिपयेमहि । **८. आशीर्लिङ्** - (i) क्षिप्यात्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षिप्यास्ताम् क्षिप्यासुः । क्षिप्याः क्षिप्यास्तम् क्षिप्यास्त । क्षिप्यासम् क्षिप्यास्व क्षिप्यास्म । (ii) क्षिपयिषीष्ट क्षिपयिषीयास्ताम् क्षिपयिषीरन् । क्षिपयिषीष्ठाः क्षिपयिषीयास्थाम् क्षिपयिषीध्वम् । क्षिपयिषीय क्षिपयिषीवहि क्षिपयिषीमहि । **९. लुङ्** - (i) अचिक्षिपत्[३] अचिक्षिपताम् अचिक्षिपन् । अचिक्षिपः अचिक्षिपतम् अचिक्षिपत । अचिक्षिपम् अचिक्षिपाव अचिक्षिपाम । (ii) अचिक्षिपत अचिक्षिपेताम् अचिक्षिपन्त । अचिक्षिपथाः अचिक्षिपेथाम् अचिक्षिपध्वम् । अचिक्षिपे अचिक्षिपावहि अचिक्षिपामहि । **१०. लृङ्** - (i) अक्षिपयिष्यत् अक्षिपयिष्यताम् अक्षिपयिष्यन् । अक्षिपयिष्यः अक्षिपयिष्यतम् अक्षिपयिष्यत । अक्षिपयिष्यम् अक्षिपयिष्याव अक्षिपयिष्याम । (ii) अक्षिपयिष्यत अक्षिपयिष्येताम् अक्षिपयिष्यन्त । अक्षिपयिष्यथाः अक्षिपयिष्येथाम् अक्षिपयिष्यध्वम् । अक्षिपयिष्ये अक्षिपयिष्यावहि अक्षिपयिष्यामहि ।

णिचि - क्षिपयति - ते, **सनि** - चिक्षिपयिषति - ते, **यकि** - क्षिप्यते

१. अयं धातुः क्षीरस्वामिनः धातुवृत्तिकारस्य च न सम्मतः इति भाति, उभयोः ग्रन्थयोः अपाठात् । कौमुद्यां तु पाठः दृश्यते । 'क्षप' इति मा.धा.वृत्तौ ।

२. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

३. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९४३. वस - निवासे । सकर्म, सेट्, उभय । 'वस्यति स्तम्भने, वस्ते छादने वसयेत् वसेत् । निवासे वासयेत्, स्नेहे वासयत्युपसेवने' (श्लो. १८७-८) इति देवः ।

१. लट् - (i) वसयति[१] वसयतः वसयन्ति । वसयसि वसयथः वसयथ । वसयामि वसयावः वसयामः । (ii) वसयते वसयेते वसयन्ते । वसयसे वसयेथे वसयध्वे । वसये वसयावहे वसयामहे । **२. लिट्** - (i) वसयाञ्चकार वसयाञ्चक्रतुः वसयाञ्चक्रुः । वसयाञ्चकर्थ वसयाञ्चक्रथुः वसयाञ्चक्र । वसयाञ्चकार, वसयाञ्चकर वसयाञ्चकृव वसयाञ्चकृम । (ii) वसयाञ्चक्रे वसयाञ्चक्राते वसयाञ्चक्रिरे । वसयाञ्चकृषे वसयाञ्चक्राथे वसयाञ्चकृढ्वे । वसयाञ्चक्रे वसयाञ्चकृवहे वसयाञ्चकृमहे । (iii) वसयाम्बभूव वसयाम्बभूवतुः वसयाम्बभूवुः । वसयाम्बभूविथ वसयाम्बभूवथुः वसयाम्बभूव । वसयाम्बभूव वसयाम्बभूविव वसयाम्बभूविम । (iv) वसयामास वसयामासतुः वसयामासुः । वसयामासिथ वसयामासथुः वसयामास । वसयामास वसयामासिव वसयामासिम । **३. लुट्** - (i) वसयिता वसयितारौ वसयितारः । वसयितासि वसयितास्थः वसयितास्थ । वसयितास्मि वसयितास्वः वसयितास्मः । (ii) वसयिता वसयितारौ वसयितारः । वसयितासे वसयितासाथे वसयिताध्वे । वसयिताहे वसयितास्वहे वसयितास्महे । **४. लृट्** - (i) वसयिष्यति वसयिष्यतः वसयिष्यन्ति । वसयिष्यसि वसयिष्यथः वसयिष्यथ । वसयिष्यामि वसयिष्यावः वसयिष्यामः । (ii) वसयिष्यते वसयिष्येते वसयिष्यन्ते । वसयिष्यसे वसयिष्येथे वसयिष्यध्वे । वसयिष्ये वसयिष्यावहे वसयिष्यामहे । **५. लोट्** - (i) वसयतु, वसयतात् वसयताम् वसयन्तु । वसय, वसयतात् वसयतम् वसयत । वसयानि वसयाव वसयाम । (ii) वसयताम् वसयेताम् वसयन्ताम् । वसयस्व वसयेथाम् वसयध्वम् । वसयै वसयावहै वसयामहै । **६. लङ्** - (i) अवसयत् अवसयताम् अवसयन् । अवसयः अवसयतम् अवसयत । अवसयम् अवसयाव अवसयाम । (ii) अवसयत अवसयेताम् अवसयन्त । अवसयथाः अवसयेथाम् अवसयध्वम् । अवसये अवसयावहि अवसयामहि । **७. विधिलिङ्** - (i) वसयेत् वसयेताम् वसयेयुः । वसयेः वसयेतम् वसयेत । वसयेयम् वसयेव वसयेम । (ii) वसयेत वसयेयाताम् वसयेरन् । वसयेथाः वसयेयाथाम् वसयेध्वम् । वसयेय वसयेवहि वसयेमहि । **८. आशीर्लिङ्** - (i) वस्यात् वस्यास्ताम् वस्यासुः । वस्याः वस्यास्तम् वस्यास्त । वस्यासम् वस्यास्व वस्यास्म । (ii) वसयिषीष्ट वसयिषीयास्ताम् वसयिषीरन् । वसयिषीष्ठाः वसयिषीयास्थाम् वसयिषीध्वम् । वसयिषीय वसयिषीवहि वसयिषीमहि । **९. लुङ्** - (i) अववसत्[२] अववसताम् अववसन् । अववसः अववसतम् अववसत । अववसम् अववसाव अववसाम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(ii) अववसत अववसेताम् अववसन्त । अववसथाः अववसेथाम् अववसध्वम् । अववसे अववसावहि अववसामहि । **१०. लृङ्** - (i) अवसयिष्यत् अवसयिष्यताम् अवसयिष्यन् । अवसयिष्यः अवसयिष्यतम् अवसयिष्यत । अवसयिष्यम् अवसयिष्याव अवसयिष्याम । (ii) अवसयिष्यत अवसयिष्येताम् अवसयिष्यन्त । अवसयिष्यथाः अवसयिष्येथाम् अवसयिष्यध्वम् । अवसयिष्ये अवसयिष्यावहि अवसयिष्यामहि ।

णिचि - वसयति - ते, **सनि** - विवसयिषति - ते, **यकि** - वस्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

१९४४. तुत्थ - आवरणे । सकर्म, सेट्, उभय, (अदन्तः) । धातुकाव्ये 'अतूत्थिताङ्गा...' इति उदाहरणदर्शनात् 'तूत्थ' इति तत्सम्मतः पाठः इति ज्ञायते ।

१. लट् - (i) तुत्थयति[1] तुत्थयतः तुत्थयन्ति । तुत्थयसि तुत्थयथः तुत्थयथ । तुत्थयामि तुत्थयावः तुत्थयामः । (ii) तुत्थयते तुत्थयेते तुत्थयन्ते । तुत्थयसे तुत्थयेथे तुत्थयध्वे । तुत्थये तुत्थयावहे तुत्थयामहे । **२. लिट्** - (i) तुत्थयाञ्चकार तुत्थयाञ्चक्रतुः तुत्थयाञ्चक्रुः । तुत्थयाञ्चकर्थ तुत्थयाञ्चक्रथुः तुत्थयाञ्चक्र । तुत्थयाञ्चकार, तुत्थयाञ्चकर तुत्थयाञ्चकृव तुत्थयाञ्चकृम । (ii) तुत्थयाञ्चक्रे तुत्थयाञ्चक्राते तुत्थयाञ्चक्रिरे । तुत्थयाञ्चकृषे तुत्थयाञ्चक्राथे तुत्थयाञ्चकृढ्वे । तुत्थयाञ्चक्रे तुत्थयाञ्चकृवहे तुत्थयाञ्चकृमहे । (iii) तुत्थयाम्बभूव तुत्थयाम्बभूवतुः तुत्थयाम्बभूवुः । तुत्थयाम्बभूविथ तुत्थयाम्बभूवथुः तुत्थयाम्बभूव । तुत्थयाम्बभूव तुत्थयाम्बभूविव तुत्थयाम्बभूविम । (iv) तुत्थयामास तुत्थयामासतुः तुत्थयामासुः । तुत्थयामासिथ तुत्थयामासथुः तुत्थयामास । तुत्थयामास तुत्थयामासिव तुत्थयामासिम । **३. लुट्** - (i) तुत्थयिता तुत्थयितारौ तुत्थयितारः । तुत्थयितासि तुत्थयितास्थः तुत्थयितास्थ । तुत्थयितास्मि तुत्थयितास्वः तुत्थयितास्मः । (ii) तुत्थयिता तुत्थयितारौ तुत्थयितारः । तुत्थयितासे तुत्थयितासाथे तुत्थयिताध्वे । तुत्थयिताहे तुत्थयितास्वहे तुत्थयितास्महे । **४. लृट्** - (i) तुत्थयिष्यति तुत्थयिष्यतः तुत्थयिष्यन्ति । तुत्थयिष्यसि तुत्थयिष्यथः तुत्थयिष्यथ । तुत्थयिष्यामि तुत्थयिष्यावः तुत्थयिष्यामः । (ii) तुत्थयिष्यते तुत्थयिष्येते तुत्थयिष्यन्ते । तुत्थयिष्यसे तुत्थयिष्येथे तुत्थयिष्यध्वे । तुत्थयिष्ये तुत्थयिष्यावहे तुत्थयिष्यामहे । **५. लोट्** - (i) तुत्थयतु, तुत्थयतात् तुत्थयताम् तुत्थयन्तु । तुत्थय, तुत्थयतात् तुत्थयतम् तुत्थयत । तुत्थयानि तुत्थयाव तुत्थयाम । (ii) तुत्थयताम् तुत्थयेताम् तुत्थयन्ताम् । तुत्थयस्व तुत्थयेथाम् तुत्थयध्वम् । तुत्थयै तुत्थयावहै तुत्थयामहै । **६. लङ्** - (i) अतुत्थयत् अतुत्थयताम् अतुत्थयन् । अतुत्थयः अतुत्थयतम् अतुत्थयत । अतुत्थयम् अतुत्थयाव अतुत्थयाम । (ii) अतुत्थयत अतुत्थयेताम् अतुत्थयन्त । अतुत्थयथाः अतुत्थयेथाम् अतुत्थयध्वम् । अतुत्थये अतुत्थयावहि अतुत्थयामहि । **७. विधिलिङ्** - (i) तुत्थयेत् तुत्थयेताम् तुत्थयेयुः । तुत्थयेः तुत्थयेतम् तुत्थयेत । तुत्थयेयम् तुत्थयेव तुत्थयेम । (ii) तुत्थयेत तुत्थयेयाताम् तुत्थयेरन् । तुत्थयेथाः तुत्थयेयाथाम् तुत्थयेध्वम् । तुत्थयेय तुत्थयेवहि तुत्थयेमहि । **८. आशीर्लिङ्** - (i) तुत्थ्यात् तुत्थ्यास्ताम् तुत्थ्यासुः । तुत्थ्याः तुत्थ्यास्तम् तुत्थ्यास्त । तुत्थ्यासम् तुत्थ्यास्व तुत्थ्यास्म । (ii) तुत्थयिषीष्ट तुत्थयिषीयास्ताम् तुत्थयिषीरन् । तुत्थयिषीष्ठाः तुत्थयिषीयास्थाम् तुत्थयिषीध्वम् । तुत्थयिषीय तुत्थयिषीवहि तुत्थयिषीमहि । **९. लुङ्** - (i) अतुतुत्थत्[2] अतुतुत्थताम् अतुतुत्थन् । अतुतुत्थः अतुतुत्थतम् अतुतुत्थत । अतुतुत्थम् अतुतुत्थाव अतुतुत्थाम । (ii) अतुतुत्थत अतुतुत्थेताम् अतुतुत्थन्त । अतुतुत्थथाः अतुतुत्थेथाम् अतुतुत्थध्वम् । अतुतुत्थे अतुतुत्थावहि अतुतुत्थामहि । **१०. लृङ्** - (i) अतुत्थयिष्यत् अतुत्थयिष्यताम् अतुत्थयिष्यन् । अतुत्थयिष्यः अतुत्थयिष्यतम् अतुत्थयिष्यत । अतुत्थयिष्यम् अतुत्थयिष्याव अतुत्थयिष्याम । (ii). अतुत्थयिष्यत अतुत्थयिष्येताम् अतुत्थयिष्यन्त ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतुत्थयिष्यथाः अतुत्थयिष्येथाम् अतुत्थयिष्यध्वम् । अतुत्थयिष्ये अतुत्थयिष्यावहि अतुत्थयिष्यामहि ।
णिचि - तुत्थयति - ते, **सनि** - तुतुत्थयिषति - ते, **यकि** - तुत्थ्यते

१. अन्तिमव्यञ्जनोत्तरः अकारः न इत्संज्ञकः, नापि उच्चारणार्थः । अतः अल्लोपस्य स्थानिवद्भावात् न वृद्धिः ।

२. अग्लोपित्वात् 'नाग्लोपि...' इति दीर्घसन्वद्भावौ न ।

[कौमुद्यां चुरादेः अन्ते एषा टिप्पणी दृश्यते - एवमान्दोलयति । प्रेङ्खोलयति । विडम्बयति । अवधीरयति इत्यादि । अन्ये तु दशगणीपाठो 'बहुलम्' इत्याहुः । तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः । अपरे तु नवगणीपाठो 'बहुलम्' इत्याहुः । तेनापठितेभ्योऽपि क्वचित्स्वार्थे णिच् । 'रामो राज्यमचीकरत्' इति यथेत्याहुः । चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये । सर्वे पक्षाः प्राचां ग्रन्थे स्थिताः । 'णिङङ्गान्निरसने' (ग. सू. २०९) । अङ्गवाचिनः प्रातिपदिकान्निरसनेऽर्थे णिङ् स्यात् । हस्तौ निरस्यति । हस्तयते । पादयते । 'श्वेताश्वाश्वतर-गालोडिताह्वरकाणामश्वतरेतकलोपश्च' (ग. सू. २१०) । श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते, णिङ् च धात्वर्थे । श्वेताश्वमाचष्टे, तेनातिक्रामति, वा श्वेतयते । अश्वतरमाचष्टे अश्वयते । गालोडितं वाचां विमर्शः । तत्करोति गालोडयते । आह्वरयते । केचित्तु णिचमेवानुवर्तयन्ति तन्मते परस्मैपदमपि । 'पुच्छादिषु धात्वर्थे इत्येव सिद्धम्' (ग. सू. २११) । णिजन्तादेव बहुलवचनात् आत्मनेपदमस्तु । मास्तु 'पुच्छभाण्ड...' (सू. २६७६) इति णिङ्विधिः ।]

।। सिद्धम् ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - १

कण्ड्वादयः

कण्ड्वादयः यकं प्राप्नुवन्ति स्वार्थे - *'कण्ड्वादिभ्यो यक्'* (३.१.२७) इति सूत्रेण । एते कण्ड्वादयः अत्र सङ्गृह्यन्ते । तेषां लड्रूपमात्रं दीयते अत्र । अन्यानि लकाररूपाणि स्वयम् ऊह्यानि ।

१. **कण्डूञ् - गात्रविघर्षणे** । कण्डूयति[१] - ते ।

२. **मन्तु - अपराधे** । मन्तूयति । 'रोषे' इत्येके । चन्द्रस्तु ञितमाह । तन्मते एषः उभयपदी ।

३. **वल्गु - पूजामाधुर्ययोः** । वल्गूयति ।

४. **असु - उपतापे** । असूयति ।
अत्र वर्धमान-हरदत्त-गणरत्नमहोदधिकारादयः असुशब्दस्य असिति सान्तं पठित्वा 'असूञिति दीर्घान्तमेके पठन्ति' इत्याहुः । तन्मते तु अस्यति, असूयति-ते इत्यपि रूपम् ।

५. **मनस् - उपतापे** । मनस्यति ।

६. **लेट् - धौर्त्ये पूर्वभावे स्वप्ने च** । दीप्तौ इत्येके । लेट्यति । लेटिता

७. **लोट् - धौर्त्ये पूर्वभावे स्वप्ने च** । लोट्यति । लोटिता

८. **लेला - दीप्तौ** । लेलायति ।

९. **इरज् - ईर्ष्यायाम्** । इरज्यति ।

१०. **इयस् - ईर्ष्यायाम्** । इयस्यति । 'अमुं दुर्गो न पठति' इति गणरत्नमहोदधौ ।

११. **इरञ् - ईर्ष्यायाम्** । इर्यति-ते । 'इरज्यन्ता वसव्यस्य भूरेः' इत्यत्र ऐश्वर्यार्थः ईर्यतिः मार्गोपस्थापनार्थः अपि । उक्तं च - 'चर्या त्वीर्या पथि स्थितिः' इति ।

१२. **उषस् - प्रभातीभावे** । उषस्यति ।

१३. **वेद - धौर्त्ये स्वप्ने प्रभाते च** । वेद्यति ।

१४. **मेधा - आशुग्रहणे** । मेधायति ।

१५. **कुषुभ - क्षेपे** । कुषुभ्यति । गणरत्नमहोदधौ तु 'आत्मनोऽन्यकर्तृकनिरसनम् अर्थः' इति उक्तम् ।

१६. **मगध - परिवेष्टने** । 'नीच दास्ये' इत्यन्ये । मगध्यति ।

१७. **तन्तस् - दुःखे** । तन्तस्यति ।

१८. **पम्पस् - दुःखे** । पम्पस्यति ।

१९. **सुख - तत्क्रियायाम्** । सुख्यति । सुखम् अनुभवति इत्यर्थः ।

२०. **दुःख - तत्क्रियायाम्** । दुःख्यति । दुःखम् अनुभवति इत्यर्थः ।

२१. **सपर - पूजायाम्** । सपर्यति । अकारान्तोऽयं महोदधौ ।

२२. **अरर - क्रूरकर्मणि** । अरर्यति ।

---

१. 'कण्ड्वादिभ्यो विधीयमानस्य यकः कित्त्वात् गुणनिषेधः । केचन अस्य ह्रस्वान्तं मन्यन्ते । तथा सति 'अकृत्सार्वधातुकयोः दीर्घः' इत्यनेन दीर्घः । कण्डूञः ञित्त्वात् उभयपदिता ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२३. **भिषज् – चिकित्सायाम्** । भिषज्यति ।

२४. **भिष्णज् – उपसेवायाम्** । 'तिषज्' इति माधवीयधातुवृत्तिः । भिष्णज्यति ।

२५. **इषुध – शरधारणे** । इषुध्यति ।

२६. **चरण – गतौ** । चरण्यति ।

२७. **वरण – गतौ** । वरण्यति ।

२८. **चुरण – चौर्ये** । चुरण्यति ।

२९. **तुरण – त्वरायाम्** । तुरण्यति ।

३०. **भुरण – धारणपोषणयोः** । भुरण्यति । 'प्रहरणधारणयोः' इत्यन्ये ।

३१. **गद्गद – वाक्स्खलने** । गद्गद्यति ।

३२. **एला – विलासे** । एलायति । 'इला' इत्यन्ये । इलायति ।

३३. **केला – विलासे** । केलायति ।

३४. **खेला – विलासे** । खेलायति ।

३५. **लेखा – स्खलने च** । 'अदन्तः अयम्' इत्यन्ये । लेख्यति । लेखायति ।

३६. **लिट – अल्पार्थे कुत्सायां च** । लिट्यति ।

३७. **लाट – जीवने** । लाट्यति ।

३८. **हृणीङ् – रोषणे लज्जायां च** । हृणीयते ।

३९. **महीङ् – पूजायाम्** । महीयते । अत्र पूजा पूज्यमानकर्तृका । तेन अयम् अकर्मकः । महीयते – पूजाम् अधिगच्छाति इत्यर्थः ।

४०. **रेखा – श्लाघासादनयोः** । रेखायति । आसादनं प्राप्तिः प्रापणा वा । श्लाघाम् अनुभवति अनुभावयति वा इत्यर्थः ।

४१. **द्रवस् – परितापपरिचरणयोः** । द्रवस्यति ।

४२. **तिरस् – अन्तर्धौ** । तिरस्यति ।

४३. **अगद – नीरोगत्वे** । अगद्यति । 'अमुं भोजः नेच्छति' इति गणरत्नमहोदधौ ।

४४. **उरस् – बलार्थः** । उरस्यति । बलवान् भवति इत्यर्थः ।

४५. **तरण – गतौ** । तरण्यति ।

४६. **पयस् – प्रसृतौ** । पयस्यति ।

४७. **सम्भूयस् – प्रभूतभावे** । सम्भूयस्यति ।

४८. **अम्बर – संवरणे** । अम्बरयति ।

४९. **संवर – संवरणे** । संवरयति ।

'अस्य आकृतिगणत्वात् रैधवलादिभ्यः रायति धवल्यति च उक्तम्' इति माधवीयधातुवृत्तिः । कण्ड्वादौ पाठभेदाः बहुधा दृश्यन्ते । अत्र कौमुद्युक्तः पाठः अनुसृतः ।

❑ ❑

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - २
अन्तर्गणाः

भ्वाद्यादयः दश गणाः विकरणप्रत्ययकारणतः भिद्यन्ते इति वयं जानीमः एव। ते च उपोद्घाते सङ्क्षेपेण निरूपिताः। तदन्तर्गताः धातवः गणशः दत्ताः च अपि अग्रे।

तेषु अन्तर्गणाः अपि भवन्ति क्वचित्। यथा - सम्प्रसारणं मनसि निधाय 'यजादि'गणः रचितः। नुम्विधानाय 'मुचादयः' सङ्गृहीताः। एतादृशाः तिङन्तसम्बद्धाः (क्वचित् कृत्सम्बद्धाः अपि। साकल्यदृष्ट्या तेऽपि अत्र योजिताः) अन्तर्गणाः अत्र सङ्गृहीताः अकारादिक्रमेण।

- **आकुस्मीयाः** - (चुरादौ विद्यमानाः) 'आकुस्मादात्मनेपदिनः' इति आत्मनेपदम् एव। यथा - चित सञ्चेतने - चेतयते। त्रुट छेदने - त्रोटयते।
- **आगर्वीयाः** - (चुरादौ विद्यमानाः) 'आगर्वादात्मनेपदिनः' इति आत्मने-पदित्वम्। उदा - पद गतौ - पदयते। मृग अन्वेषणे - मृगयते।
- **आधृषीयाः** - (चुरादौ विद्यमानाः) 'आधृषाद्वा' इति णिज्विकल्पः। यथा - युज संयमने। योजयति/योजति। अयं धातुः धृषान्तः। (अन्तिमः धातुः धृष प्रहसने इति) अतः आधृषीयत्वम् अस्य। 'युजादिः' इति अस्य नामान्तरम्। विवरणं 'युजादिः' इत्यत्र द्रष्टव्यम्।
- **काण्यादिः** - (चुरादौ विद्यमानः) 'काण्यादीनां वेति वक्तव्यम्' इति चङ्परे णौ उपधाह्रस्वविकल्पः। ण्यन्ताः कणरणभणश्रणलुपहेठाः षड् भाष्ये उक्ताः। ह्वयिवाणिलोटिलोपयः चत्वारः अधिकाः न्यासे। वाणिलोठी अप्यन्यत्र। (नित्यः उपधाह्रस्वः तु 'णौ चङ्युपधायाः ह्रस्व' इत्यनेन प्राप्तः) यथा - अरीरणत् - अरराणत्।

  काणे राणेस्तथा श्राणेर्भाणेर्हेठेर्लुपेरपि।
  ण्यन्तस्य भाष्यकारेण काण्यादित्वं प्रदर्शितम्॥
  बोधिन्यासकृता लोठिर्लोपिर्वाणिश्च ह्वायिना।
  सहिताः पूर्वमुक्ताश्च काण्यादौ परिकीर्तिताः॥
  दुर्गश्चाणिं च काण्यादिं मन्यते शाकटायनः।
  लोठिं तदेवमेतेऽत्र धातवो द्वादश स्मृताः॥

- **किरादिः** - (तुदादौ विद्यमानः) कॄ, गॄ, दृङ्, धृङ्, प्रच्छ् एतेभ्यः सनः इट् स्यात् - 'किरश्च पञ्चभ्यः' इति सूत्रेण। उदा - पिपृच्छिषति, जिगरिषति।
- **कुटादिः** - (तुदादौ विद्यमानः) 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति अञ्णितां प्रत्ययानां ङित्वम्। यथा - चुकुचिथ, चुकोट, कुचिता।
- **घटादिः** - (भ्वादिस्थः) 'घटादयो मितः' इति मित्त्वम्। 'मितां ह्रस्वः' इति णिचि ह्रस्वः। यथा - घटयति।
- **णिजादिः** - (जुहोत्यादौ विद्यमानः) 'णिजां त्रयाणां गुणः श्लौ' - णिज्विज्विषाम् अभ्यासस्य गुणः स्यात्। णिजिर्, विजिर्, विष्लृ इति णिजादयः। उदा - नेनेक्ति, वेवेक्ति, वेवेष्टि।
- **जक्षित्यादिः** - (अदादौ विद्यमानः) 'जक्षित्यादयः षट्' - जागृ इत्यादयः षट् धातवः, जक्षितिः च अभ्याससंज्ञाः स्युः। जाग्रत्, दरिद्रत्, शासत्, चकासत्, दीध्यत्, वेव्यत् जक्षत्।

  जक्षिजागृदरिद्राणां चकासेः शासेरेव च। दीधीवेव्योश्च सप्तानां जक्षित्यादावुपग्रहः॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- **ज्ञपादिः** – (चुरादौ विद्यमानः) 'मुख्यमते पञ्च ज्ञपादयः । अन्यमते सप्त' इति तत्त्वबोधिनी । ज्ञा, यम, चह, बल, चिञ् इति पञ्च । चप, रह इत्येतौ मतान्तरेण गृहीतौ । चुरादौ पञ्च एव मितः, न अन्ये 'नान्ये मितोऽहेतौ' (ग.सू.) इत्युक्तत्वात् । यथा – ज्ञपयति, यमयति, चहयति, बलयति, चययति (चपयति, रहयति)
- **ज्वलादिः** – (भ्वादिषु विद्यमानः) 'ज्वलितिकसन्तेभ्यो णः' – इति णः स्यात् वा । पक्षे अच् । ज्वलः, ज्वालः ।
- **तनोत्यादिः** – 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इति अनुनासिकलोपः । तनु-क्षणु-क्षिणु-ऋणु-तृणु-घृणु-वनु-मनवः अष्ट तनोत्यादयः । यथा – तनु विस्तारे । अतत ।
- **तुजादिः** – 'तुजादीनां दीर्घोऽभ्यासस्य' छन्दस्येव । तुजादिराकृतिगणः । तूतोज । मामहानः ।
- **तुम्फादिः** (तुदादौ विद्यमानः) – 'शे तुम्फादीनां नुम् वाच्यः' इति नुम् । 'अनिदिताम्...' इति सूत्रेण नलोपे प्राप्ते एतत् सूत्रं प्रवर्तते । (तृम्फादयः नकारानुषक्ताः ।) उदा – तृम्फति ।
- **द्युतादिः** – (भ्वादौ विद्यमानः) 'पुषादिद्युतादि... ' इति च्लेरङ् । 'द्युद्भ्यो लुङि' इति लुङि परस्मैपदं च । यथा – स्रंसु अवस्रंसने । अस्रसत् – अस्रंसिष्ट । द्युतादयः द्वाविंशतिः धातवः ।
- **पुषादिः** – (दिवादौ विद्यमानः) 'पुषादिद्युतादि... ' इति च्लेरङ् । यथा – तुष प्रीतौ । अतुषत् ।
- **फणादिः** – (भ्वादौ विद्यमानः) 'फणां च सप्तानाम्' इति एत्वाभ्यासलोपौ वा । यथा – राजृ दीप्तौ । रराज रेजतुः-रराजतुः ।

  फणती राजति भ्राजभ्राशभ्लाशास्तथा स्यमः ।
  स्वनतिश्चेति विज्ञेयो फणादिः सप्तको गणः ।।

- **प्वादिः** – (क्र्यादौ विद्यमानः) 'प्वादीनां ह्रस्वः' इति शिति परे ह्रस्वः । यथा – लूञ् – छेदने । लुनाति – लुनीते । जृणाति – जृणन् ।
- **भिदादिः** – 'षिद्भिदादिभ्योऽङ्' इति भावे अकर्तरि कारके स्त्रियाम् अङ् । यथा – छिदिर् द्वैधीकरणे । छिदा ।
- **भृञादिः** – (जुहोत्यादौ विद्यमानः) *'भृञामित्'* – एषां त्रयाणाम् अभ्यासस्य इत् स्यात् श्लौ । बिभर्ति, मिमीते, जिहीते । भृञ् माङ् ओ हाङिति भृञादयः ।
- **मुचादिः** – (तुदादौ विद्यमानः) *'शे मुचादीनाम्'* इति नुम् । यथा – लुप्लृ छेदने । लुम्पति ।

  मुञ्चतिर्लुम्पतिश्चैव विन्दतिर्लिम्पतिस्तथा ।
  सिञ्चतिः कृन्ततिश्चैव खिदिः पिशिर्मुचादयः ।।

- **यजादिः** – (भ्वादौ विद्यमानः) *'वचिस्वपियजादीनां किति'* – इति किति प्रत्यये परे सम्प्रसारणम् । यथा – इयाज, उवाप । इज्यते, उह्यते ।

  "यजो वपो वहश्चैव वेञ्व्येञौ ह्वयतिस्तथा ।
  वद्वसौ श्वयतिश्चैव स्मृताः नव यजादयः ।।

  यजादिज्ञापकः प्रसिद्धः अपरः श्लोको यथा –

  यजिर्वपिर्वहिश्चैव वसिर्वेञ् व्येञ इत्यपि ।
  ह्वेञ्वदी श्वयतिश्चेति यजाद्याः स्युरिमे नव ।। इति ।

- **युजादिः** – (चुरादौ विद्यमानः) आधृषीयस्य एव 'युजादिः' इति नामान्तरम् । तत्र आद्यः धातुः 'युज – संयमने' इति । तस्मात् 'युजादिः' अयम् । अन्तिमः धातुः धृषिः । अतः आधृषीयः अपि ।
- **रधादिः** – (दिवादौ विद्यमानः) *'रधादिभ्यश्च'* इति वलाद्यार्धधातुकस्य वेट् । रध्, नश्, तृप्, दृप्, द्रुह, मुह,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष्णुह्, ष्णिह् इत्येते रधादयः । यथा – णश अदर्शने । नेशिम – नेश्म । रध – हिंसासंराध्योः – रधिता – रद्धा ।

रधिर्नशिस्तृपिश्चैव द्रुपिद्रुहिर्मुहिः स्निहिः ।
स्नुहिश्चेति भवन्त्येते दैवादिका रधादयः ।।

- **रुदादिः** – (अदादौ विद्यमानः) रुद्, स्वप्, श्वस्, अन्, जक्ष् इत्येते पञ्च रुदादयः । (i) 'रुदादिभ्यः सार्वधातुके' इति वलादेः सार्वधातुकस्य इट् । यथा – श्वस प्राणने । श्वसिति । (ii) 'रुदश्च पञ्चभ्यः' इति हलादेः पितः सार्वधातुकापृक्तस्य ईट् च । यथा – अश्वसीत् । (iii) 'अड् गार्ग्यगालवयोः' इति विकल्पेन अड् च । यथा – अरोदीत्, अरोदत् ।
- **ल्वादिः** – (क्र्यादौ विद्यमानः) 'ल्वादिभ्यः' इति निष्ठातस्य नत्वम् । ल्वादयः एकविंशतिः । यथा – लूञ् छेदने – लूनः ।
- **वृतादिः** – (भ्वादौ विद्यमानः) 'वृद्भ्यः स्यसनोः' इति स्ये सनि च वैकल्पिकं परस्मैपदम् । 'न वृद्भ्यश्चतुर्भ्यः' इति स्ये सनि च परस्मैपदपक्षे इडभावश्च । यथा – 'वृतु वर्तने' – वर्तिष्यते – वर्त्स्यति । विवृत्सति – विवर्तिषते ।
- **शमादिः** – (दिवादौ विद्यमानः) 'शमामष्टानां दीर्घः श्यनि' इति दीर्घः । यथा – 'दमु उपशमे' – दाम्यति । 'शमित्यष्टाभ्यो घिनुण्' इति घिनुण् च । यथा – दमी ।

शमिस्तमिर्दमिश्चैव श्रमिर्भ्रमिक्षमी क्लमिः ।
इत्येते मदिना सार्द्धमष्टौ शम्यादयः स्मृताः ।।

- **सिवादिः** – (भ्वादौ विद्यमानः) 'सिवादीनां वाड्व्यवायेऽपि' – परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यात् अड्व्यवायेऽपि । पर्यषहत – पर्यसहत । सिवु, सह, सुट, स्तु, स्वञ्ज – एते सिवादयः ।
- **स्वादिः** – (दिवादौ विद्यमानः) – *'स्वादय ओदितः'* – धातुपाठपठितं गणसूत्रमिदम् । 'षूङ् प्राणिप्रसवे' इत्यारभ्य व्रीञन्ताः (व्रीङ् वृणोत्यर्थे) ओदित्कार्यभाजः इत्यर्थः । तत्फलं तु निष्ठानत्वम् ।

[अत्रत्यः श्लोकरूपः सङ्ग्रहः माधवीयधातुवृत्तितः (सं० – स्वामी द्वारिकादासशास्त्री) कृतज्ञतापूर्वकम् उद्धृतः ।]

❑ ❑

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - ३

अनुबन्धलोपप्रयोजनम्

अनुबन्धवर्णैः सह धातून् उच्चार्य पाणिनिः इत्संज्ञया तान् अनुबन्धवर्णान् लोपयन् कार्यविशेषं साधयति । कस्य वर्णस्य इत्संज्ञातः किं प्रयोजनम् इति अधः निर्दिष्टम् अस्ति सङ्क्षेपेण । कानिचन प्रयोजनानि कृत्सु भवन्ति, न तु तिङि । यथा - आदितादयः । कृत्सम्बन्धिनी व्यवस्था पुस्तकेऽस्मिन् न निरूपिता इत्यतः तत्प्रयोजकानाम् अंशानाम् अत्र निरूपणेन न किमपि विशेषप्रयोजनम् । तथापि समग्रतादृष्ट्या तादृशाः अपि अंशाः अत्र सङ्गृहीताः ।

- **आदिताम् -** 'आदितश्च' (७.२.१६) इति निष्ठायाम् इडभावः । ञि ष्विदा - स्विन्नः - स्विन्नवान् ञि मिदा - मिन्नः - मिन्नवान् । 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इड्विकल्पः । यथा - हुर्च्छा कौटिल्ये । हूर्णः । हूर्णवान् । हूर्च्छितमनेन - हूर्णमनेन ।

- **इदिताम् -** 'इदितो नुम् धातोः' (७.१.१८) इति धातोर्नुमागमः । यथा - वदि अभिवादनस्तुत्योः वन्दते । स्पदि स्पन्दते । स्कुदि - स्कुन्दते ।

- **इरिताम् -** 'इरितो वा' (३.१.५७) इति च्लेः अङ्वा । यथा - च्युतिर् आसेचने । अच्युतत् - अच्योतीत् । भिदिर् - अभिदत् - अभैत्सीत् । छिदिर् - अच्छिदत् - अच्छैत्सीत् ।

- **ईदिताम् -** 'श्वीदितो निष्ठायाम्' (७.२.१४) इति निष्ठायाम् इडभावः । यथा - चिती संज्ञायाम् - चित्तः । ओ लजी - लग्नः, लग्नवान्, ओ विजी - विग्नः विग्नवान् ।

- **उदिताम् -** 'उदितो वा' (७.२.५६) इति क्त्वायाम् इड्विकल्पः । यथा - 'वृषु सेचने' वर्षित्वा - वृष्ट्वा । शमु - शमित्वा - शान्त्वा, क्रमु - क्रमित्वा - क्रान्त्वा । 'यस्य विभाषा' इति निष्ठायाम् इडभावश्च । यथा - वृष्टः ।

- **ऊदिताम् -** 'स्वरतिसूतिसूयतिधूञूदितो वा' (७.२.४४) इति वलाद्यार्धधातुकस्य इड्विकल्पः । यथा - षिधू शास्त्रे माङ्गल्ये च । असैत्सीत् - असेधीत्, सेधिता - सेद्धा । गाहू - गाढा - गाहिता, गाहिष्यते - घाक्ष्यते । गाढुम् - गाहितुम् ।

- **ऋदिताम् -** 'नाग्लोपिशास्वृदिताम्' (७.४.२) इति णौ चङि उपधायाः ह्रस्वाभावः । यथा - लोकृ - अलुलोकत् । काशृ दीप्तौ - अचकाशत्-त ।

- **लृदिताम् -** 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (३.१.५५) इति च्लेरङ् । यथा - मुच्लृ मोक्षणे - अमुचत् । घस्लृ - अघसत्, गम्लृ - अगमत् ।

- **एदिताम् -** 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' (७.२.५) इति इडादौ सिचि वृद्ध्यभावः । यथा - कटे वर्षावरणयोः - अकटीत् । रगे - अरगीत्, हसे - अहसीत् ।

- **ओदिताम् -** 'ओदितश्च' (८.३.४५) इति निष्ठातस्य नत्वम् । यथा - 'भुजो कौटिल्ये - भुग्नः । ओ हाक् - हीनः, ओ लस्जी - लग्नः । स्वादयश्च ओदितः । यथा - षूङ् प्राणिप्रसवे । सूनः ।

- **ङिताम् -** 'अनुदात्तङित आत्मनेपदम्' (१.३.१२) इति आत्मनेपदम् । यथा - कुङ् शब्दे - कवते । षूङ् - सूते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- **ञिताम्** – 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (१.३.७२) इति उभयपदित्वम् । यथा – चिञ् चयने – चिनोति – चिनुते । डु कृञ् – करोति – कुरुते ।
- **ञीताम्** – 'ञीतः क्तः' (३.२.१८७) इति वर्तमाने क्तः । यथा – ञि इन्धी दीप्तौ – इद्धः । भिदा – भिन्नः ।
- **टिताम्** – 'टिड्ढाणञ्द्वयसच्..' इति ङीप् । यथा – धेट् पाने । स्तनन्धयी ।
- **ट्विताम्** – 'ट्वितोऽथुच्' (३.३.८९) इति अथुच् । यथा – टु वेपृ कम्पने । वेपथुः । नदि – नन्दथुः ।
- **ड्विताम्** – 'ड्वितः क्त्रिः' । (३.३.८८) क्त्रेर्मम् नित्यम्' (४.४.२०) इति क्त्रिः मम् च । यथा – 'डु कृञ् करणे' । कृत्रिमम् ।
- **मिताम्** – 'मितां ह्रस्वः' (६.४.९२) इति णौ उपधाया ह्रस्वः । यथा – ज्ञपयति, घटयति । एवं 'चिण्णमुलोदीर्घोऽन्यतरस्याम्' इति चिण्परे णमुल्परे च णौ उपधादीर्घविकल्पः । 'शमु उपशमे' अशमि – अशामि । शमं शमम् – शामं शामम् ।
- **षिताम्** – 'षिद्भिदादिभ्योऽङ्' (३.३.१०४) इत्यङ् । यथा – त्रपूष् लज्जायाम् । त्रपा । क्षमूष् – क्षमा ।

अनुबन्धकवर्णानाम् इत्त्वप्रयोजनं यदत्र लिखितं तदेव सङ्ग्रहश्लोकरूपेण विवृणोति प्रक्रियासर्वस्वकारः । तद्यथा –

देवनारायणक्ष्मापशासनस्थायिना मया ।
धातवोऽद्य विलिख्यन्ते माधवेनोक्तवर्त्मना ।।

उदात्तेत्त्वानुदात्तेत्त्वस्वरितेत्त्वविभागकृत् ।
एधादीनामकारोऽन्त्यः कथादीनां त्ववृद्धिकृत् ।।

आदिदीदिच्व निष्ठायामनिट्त्वार्थं कृतावुभौ ।
भावादिकर्मणोर्वेट् स्यादादितामिति भिद्यते ।।

इदित्त्वं तु नुमर्थं स्यादुदित्त्वं क्त्वेड्विकल्पकृत् ।
ऊदित्त्वं हीड्विकल्पार्थमृदिच्वाङ्ह्रस्वबाधकः ।।

ऌदित्त्वं लुङ्यङर्थं स्यादेदित्त्वं सिच्यवृद्धिकृत् ।
निष्ठानत्वार्थमोदित्त्वं ङित् लङर्थो द्वयाय ञित् ।।

इरित्त्वमङ्विकल्पार्थं षित्त्वं भावेऽङ्विधायकम् ।
ञिर्वर्तमाने क्त्वर्थोऽयं ड्डुटुशब्दौ कत्र्ययुच्फलौ ।।

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्च षाट्टवर्गस्तवर्गजः ।।

अनुदात्तात्मना धातोरिण्निषेधार्थमुच्यते ।
उदात्तेत्वं च सेट्त्वार्थमिति सर्वत्र दृश्यताम् ।।

– प्रक्रियासर्वस्वम्

❑ ❑

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - ४

कर्मणि भावे वा यक्

कर्मार्थे भावार्थे च यक् विधीयते 'सार्वधातुके यक्' (३.१.६७) (धातोः यक् स्यात् भावकर्मवाचिनि सार्वधातुके परे) इति सूत्रेण । यकि परे धातोः ये विकाराः भवेयुः ते सङ्ग्रहेण निरूप्यन्ते अत्र । तत्र व्यञ्जनान्तधातूनां स्वरान्तधातूनां चेति द्विधा व्यवस्था । तद्यथा -

व्यञ्जनान्ताः धातवः

(i) व्यञ्जनान्तेषु धातुषु यजादिभ्यः ग्रहादिभ्यः च यकि परे सम्प्रसारणं भवति । सूत्रं तु -

(१) *'वचिस्वपियजादीनां किति'* (६.१.१५) (वचिस्वप्योः यजादीनां च सम्प्रसारणं स्यात् किति) इति सूत्रेण । यजादयः एकादश । ते च श्लोकरूपेण यथा -

यजिर्वपिर्वहिश्चैव वसिर्वेञ् व्येञ इत्यपि ।
ह्वेञ्वदी श्वयतिश्चेति यजाद्याः स्युरिमे नव ।। इति ।

(अ) वचिस्वपी - (i) वच - परिभाषणे (वक्ति - उच्यते)
(ii) ञि ष्वप् - शये (स्वपिति - सुप्यते)

(आ) यजादयः - (i) यज - देवपूजादिषु (यजति - इज्यते)
(ii) डु वप् - बीजसन्ताने (वपति - उप्यते)
(iii) वह - प्रापणे (वहति - उह्यते)
(iv) वस - निवासे (वसति - उष्यते)
(v) वेञ् - तन्तुसन्ताने (वयति - ऊयते)
(vi) व्येञ् - संवरणे (व्ययति - वीयते)
(vii) ह्वेञ् - स्पर्धायां शब्दे च (ह्वयति - हूयते)
(viii) वद - व्यक्तायां वाचि (वदति - उद्यते)
(ix) टु ओ श्वि - गतिवृद्ध्योः(श्वयति - शूयते)

(२) 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' *(६.१.१६)* (एषां किति ङिति च सम्प्रसारणं स्यात्)

ग्रह - उपादाने (गृह्णाति - गृह्यते)
ज्या - वयोहानौ (जिनाति - जीयते)
वेञ् - तन्तुसन्ताने (पूर्वसूत्रेणैव सम्प्रसारणम्)
व्यध - ताडने (विध्यति - विध्यते)
वश - कान्तौ (वष्टि - उष्यते)
व्यच - वाजीकरणे (विचति - विच्यते)
ओ व्रश्चू - छेदने (वृश्चति - वृश्च्यते)
प्रच्छ - ज्ञीप्सायाम् (पृच्छति - पृच्छ्यते)
भ्रस्ज - पाके (भृज्जति - भृज्ज्यते)

(ii) वचिस्वप्योः यजादिभ्यः च इतरस्य व्यञ्जनान्तस्य धातोः अन्यस्य न कोऽपि विकारः । यथा - पठ् - पठति - पठ्यते । लिख् - लिखति - लिख्यते ।

स्वरान्ताः धातवः

(१) स्वरान्तेषु धातुषु ये आकारान्ताः स्युः तेषु घुमास्थादीनां यकि ईकारः भवति । 'घुमास्थागापाजहातिसां हलि

CC-0. In Public Domain. Cuddalore Collection. TN.

 Digitization by eGangotri South Center

(६.४.६६) (एषाम् आतः ईत् स्यात् हलादौ किति आर्धधातुके) 'दाधा घ्वदाप्' (१.१.२०) (दारूपाः धारूपाश्च धातवः घुसंज्ञाः स्युः दाप्दैपौ विना) क्रमेण उदाहरणानि यथा -

१. डु - दाञ् - दाने (ददाति - दीयते)
२. दाण् - दाने (यच्छति - दीयते)
३. दो - अवखण्डने (द्यति - दीयते)
४. देङ् - रक्षणे (दयते - दीयते)
५. डु धाञ् - धारणपोषणयोः (दधाति - धीयते)

(घुसंज्ञकाः एते)

६. धेट् पाने (धयति - धीयते)
७. माङ् - माने (माति - मीयते)
८. मेङ् - प्रणिदाने (मयते - मीयते)
९. ष्ठा - गतिनिवृत्तौ (तिष्ठति - स्थीयते)
१०. गाङ् - गतौ (गाते - गीयते)
११. गै - शब्दे (गायति - गीयते)
१२. गा - स्तुतौ छन्दसि (जगाति - गीयते)
१३. इण् - गतौ (एति - ईयते)
१४. इङ् - अध्ययने (अधीते - अधीयते)
१५. इक् - स्मरणे (अध्येति - अधीयते)
१६. पा - पाने (पिबति - पीयते)
१७. ओ हाक् - त्यागे (जहाति - हीयते)

ये घुमास्थादिभ्यः अन्ये स्युः तेषां न कोऽपि विकारः सम्भवति । यथा -
या - प्रापणे । याति - यायते । ष्णा - शौचे । स्नाति - स्नायते

(२) इकारान्तेभ्यः उकारान्तेभ्यः च यकि परे दीर्घः भवति - 'अकृत्सार्वधातुकयोः दीर्घः' (७.४.२५) (अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे, न तु कृत्सार्वधातुकयोः) इति सूत्रेण ।

तद्यथा - क्षि - क्षये - क्षयति - क्षीयते जि - जये - जयति - जीयते
ष्टु - स्तुतौ - स्तौति - स्तूयते णु - स्तुतौ - नौति - नूयते

(३) ऋकारान्तेभ्यः यकि परे रिङादेशः भवति - 'रिङ् शयग्लिङ्क्षु' (७.४.२८) (शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात्) इति सूत्रेण । उदा - डु कृञ् - करणे । करोति - क्रियते ।
धृञ् - धरणे - धरति - ध्रियते

(४) ॠकारान्तेभ्यः यकि परे इत् दीर्घश्च भवति - 'ॠत इद्धातोः' (१.१.१००) (ॠदन्तस्य धातोरङ्गस्य इत्स्यात्) 'हलि च' (८.२.७७) (रेफवान्तस्य धातोः उपधायाः इकः दीर्घः स्यात् हलि) इति सूत्राभ्याम् । उदा -
तॄ - प्लवनतरणयोः । तरति - तीर्यते । जॄ - वयोहानौ । जृणाति - जीर्यते ।
कॄ - विक्षेपे - कृणाति - कीर्यते ।

(५) एजन्तेभ्यः धातुभ्यः यकि परे आकारः भवति - *'आदेच उपदेशेऽशिति'* (६.१.४५) (उपदेशे एजन्तस्य धातोः आत्वं स्यात्, न तु शिति) इति सूत्रेण । उदा - ग्लै - हर्षक्षये । ग्लायति - ग्लायते ।
ध्यै - चिन्तायाम् । ध्यायति - ध्यायते । स्त्यै - शब्दसङ्घातयोः । स्त्यायति - स्त्यायते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अपवादाः केचन

पूर्वोक्तानाम् अपवादाः केचन सन्ति । ते च यथा -

(i) शीङः अयङादेशः भवति - 'अयङ् यि क्ङिति' (७.४.२१) (शीङः अयङादेशः स्यात् यादौ किति परे) इति सूत्रेण ।

उदा - शीङ् स्वप्ने । शेते - शय्यते ।

(ii) संयोगादेर्ऋदन्तस्य अर्तेः च गुणः स्यात् यकि यादावार्धधातुके लिङि च - 'गुणोऽर्तिसंयोगाद्योः' इति सूत्रेण । उदा -

स्मृ - चिन्तायाम् । स्मरति - स्मर्यते । ह्वृ - कौटिल्ये । ह्वरति - ह्वर्यते ।
स्वृ - शब्दोपतापनयोः । स्वरति - स्वर्यते । ऋ - गतिप्रापणयोः । ऋच्छति - अर्यते ।
ऋ - गतौ । इयर्ति - अर्यते ।

(iii) 'जागृ'धातोः गुणः स्यात् यकि - 'जाग्रोऽविचिण्णलोः' (७.३.८५) (जागर्तेर्गुणः स्यात् णल्चिण्विभ्यः अन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च) इति सूत्रेण । उदा - जागृ - निद्राक्षये । जागर्ति - जागर्यते ।

(iv) हलन्तानाम् अनिदितामङ्गानामुपधायाः नस्य लोपः स्यात् किति ङिति च - 'अनिदितां हल उपधायाः क्ङिति' (६.४.२४) इति । उदा - स्रंसु - अवस्रंसने । स्रंसते - स्रस्यते ।
शंसु - स्तुतौ । शंसति - शस्यते । रञ्ज - रागे । रज्यति - रज्यते ।

(v) अङ्गावयवः ओष्ठ्यपूर्वः यः ॠदन्तः तदन्तस्य अङ्गस्य उत् स्यात् - 'उदोष्ठ्यपूर्वस्य' (७.१.१०२) इति सूत्रेण । दीर्घः च ।

उदा - पॄ - पालनपूरणयोः । पृणाति - पूर्यते । वॄ - वरणे । वृणाति - वूर्यते ।

(vi) तनोतेः यकि आकारः वा स्यात् - 'तनोतेर्यकि' (६.४.४४) - इति सूत्रेण ।

उदा - तनु विस्तारे । तनोति - तन्यते/तायते

(vii) जनसनखनाम् आत्वं वा स्यात् यादौ क्ङिति - *'ये विभाषा'* (६.४.४३) इति सूत्रेण । उदा - जनी प्रादुर्भावे । जायते - जन्यते/जायते खनु - अवदारणे । खनति - खन्यते/खायते

(viii) अजधातोः यकि वीभावः - *'अजेर्व्यघञपोः'* इति सूत्रेण ।

उदा - अजति - वीयते

(ix) 'शास्ति' इत्यस्य कर्मणि 'शिष्यते' इति रूपम् । - 'शास इदङ्हलोः' (शास उपधायाः इत् स्यात् अङि हलादौ क्ङिति च' इति इत् ।

उदा - शास्ति - शिष्यते

❑ ❑

अयमत्र विवेकः

'कुञ्चति' इत्यत्र चवर्गपञ्चमः दृश्यते । 'श्रन्थते' इत्यत्र तवर्गपञ्चमः । यकि कुच्यते श्रन्थ्यते इति क्रमेण रूपम् । प्रथमः नोपधः । अतः 'अनिदिताम्...' इति नलोपः । द्वितीयस्तु इदित् । तस्मात् नुम् । इदित्त्वात् द्वितीये न नलोपः यकि । एवं **नोपधत्वे सति यकि नलोपः । इदित्त्वकारणात् नुमि तु नलोपः न** इति सर्वत्र ज्ञेयम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्मणि / भावे यक्

- सामान्यविधिः
  - व्यञ्जनान्तः धातुः
    - यजादिः → सम्प्रसारणम् — इज्यते, उच्यते
    - ग्रहादिः → सम्प्रसारणम् — गृह्यते, पृच्छ्यते
    - इतरः — न विकारः — पठ्यते, लिख्यते
  - स्वरान्तः धातुः
    - आकारान्तः
      - घुमास्थादीनाम् - ईकारः - दीयते, स्थीयते
      - अन्येषाम् - न विकारः - यायते
    - इकारान्तः, उकारान्तः - दीर्घः - क्षीयते, जीयते, स्तूयते
    - ऋकारान्तः - रिङादेशः - क्रियते, ध्रियते
    - ॠकारान्तः - इर् दीर्घश्च - तीर्यते, जीर्यते
    - एजन्तः - आकारः - ग्लायते, ध्यायते
- विशेषविधिः
  - शीङ् - शय्यते
  - संयोगादिः ऋकारः - स्मर्यते, ध्वर्यते, अर्यते
  - उदोष्ठ्यपूर्वत्वे - ऊकारः दीर्घश्च - पूर्यते, वूर्यते
  - जागृ - जागर्यते
  - अनिदिताम् - उपधानकारलोपः - स्रस्यते, शस्यते, रज्यते, बध्यते
  - तनु - आकारः वा - तायते/तन्यते
  - जनी, खनु - आकारः वा - जायते/जन्यते, खायते/खन्यते
  - अज - वीभावः - वीयते
  - शास इत् - शिष्यते

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - ५

ग्रन्थाः ग्रन्थकाराः च

ग्रन्थेऽस्मिन् येषां ग्रन्थानां ग्रन्थकर्तॄणां वा नामानि उल्लिखितानि तेषां विषये सामान्यं विवरणम् अत्र दीयते ।

अमरकोषः – अमरसिंहेन विरचितः 'नामलिङ्गानुशासनम्' इति ख्यातः कोषः । श्लोकरूपः अयं कोषः स्वगुणेन अस्ति अद्वितीयः । त्रिकाण्डात्मकः अयं पर्याय-नानार्थ-लिङ्गादिज्ञानाय नितराम् उपकारकः । अमरकोषस्य विषये एवं हि श्रूयते - 'अमरसिंहो हि पापीयान् सर्वं भाष्यम् अचूचुरत्' इति । वस्तुतः एतत् वाक्यं न प्रशंसापरम्, अपि तु वस्तुस्थितिद्योतकम् । अमरसिंहः षष्ठे शतके ततः पूर्वं वा आसीत् इति मन्यन्ते विद्वांसः ।

आख्यातचन्द्रिका – भट्टमल्लविरचितः ग्रन्थः अयम् । भट्टमल्लः मल्लिनाथात् पूर्वं, तन्नाम चतुर्दशात् सामान्यशतकात् पूर्वम् आसीत् इति तर्क्यते । आख्यातचन्द्रिकायाः 'निघण्टुकोषः' 'क्रियाकोषः' इत्यादीनि अपि नामानि सन्ति । 'अयं मल्लिनाथादिभिः प्रामाणिकैः व्याख्यातृशिरोमणिभिः प्रमाणीकृतः, यतः सर्वेष्वपि क्रियाकोषेषु अयं प्रशस्तः' इति वदति अस्यैव भूमिकायां वेङ्कटरङ्गनाथस्वामी । त्रयः काण्डाः, पञ्चदश वर्गाः च सन्ति अस्मिन् । सदृशानां धातूनां सङ्ग्रहः देवेन यथा कृतः तथा नानार्थकधातूनां सङ्ग्रहं करोति भट्टमल्लः नानार्थवर्गे ।

आत्रेयः – आत्रेयः कश्चन धातुवृत्तिकारः । अथर्वभाष्ये (२.२५.५) सायणः तद्विषये उल्लेखं करोति - 'प्रियम् । यद्यपि वृत्तौ 'इगुपधज्ञा...' इत्यत्र प्रीणातेरेव ग्रहणं कृतं तथापि आत्रेयधातुवृत्त्यनुसारेण अस्माभिरपि को द्रष्टव्यः' इति । मा.धा.वृत्तौ अपि द्वित्रेषु स्थलेषु आत्रेयस्य उल्लेखः कृतः दृश्यते । अतः एव ज्ञायते यत् अयं सायणात् (सा श.१३४३ तः) पूर्वम् आसीत् । मा.धा.वृत्तौ एव - अत्र केचित् असंयोगादिं तीभ इति दीर्घान्तं चतुर्थमपि पठन्ति इत्यात्रेयः' इति वचनं दृश्यते । तिम तीम ष्टिम इति क्षीरस्वामिसूत्रम् । एतस्मात् ज्ञायते – आत्रेयः 'केचित्' इति पदेन क्षीरस्वामिनं निर्दिशति इति । क्षीरस्वामी एकादशशतकस्य अन्ते आसीत् । तदनन्तरं स्थितः स्यात् आत्रेयः इति तु स्पष्टम् । आत्रेयस्य धातुपाठः तु न उपलभ्यते ।

आभरणकारः – अयम् अपि कश्चन धातुवृत्तिकारः । मा.धा.वृत्तौ अस्य उल्लेखः दृश्यते । तदतिरिच्य किमपि अधिकं विवरणं न प्राप्यते ।

आर्याः – आर्यवंशीयाः इत्यर्थकः स्यात् अयं शब्दः । महाभाष्ये, क्षीरतरङ्गिण्यां, पुरुषकारे, धनपालव्याख्यायां च अस्य प्रयोगः दृश्यते ।

आप्टेकोषः – वामनशिवराम-आप्टे इत्यनेन (१८५८-१८९२) संस्कृत-इङ्ग्लीष्-कोषः, इङ्ग्लीष्संस्कृतकोषः, संस्कृतहिन्दीकोषः इत्यादयः कोषग्रन्थाः लिखिताः । आप्टेवर्यः पुणेनगरे फर्ग्युसन्महाविद्यालये प्राध्यापकः आसीत् । महता श्रमेण रचितानाम् एतेषां कोषाणां विषये जनादरः अस्ति विशेषतः ।

उद्योतः – महाभाष्यस्य व्याख्यायाः प्रदीपस्य 'उद्योत'टीका लिखिता नागेशेन । नागेशः नव्यव्याकरणस्य प्रतिपादकेषु प्रमुखत्वेन परिगण्यते । महाराष्ट्रे लब्धजन्मा अयम् अष्टादशवारं भाष्यं गुरुमुखात् अधीत्य 'उद्योत'व्याख्यां लिखितवान् इति आख्यायिका श्रूयते । नागेशस्य असाधारणीं प्रतिभां प्रमाणीकरोति उद्योतव्याख्या । नागेशस्य कालः सा.श. १६७३ - १७५३ इति विद्वद्भिः ऊह्यते ।

ऋग्वेदः – चतुर्षु वेदेषु अन्यतमः प्राचीनः वेदग्रन्थः ।

कविकल्पद्रुमः – अयं बोपदेवविवरचितः धातुपाठग्रन्थः । वोपदेवः त्रयोदशशताब्द्याः उत्तरार्धे आसीत् । अयं धातुपाठः पद्यात्मकः, अनुष्टुप्छन्दसा विरचितः च । सर्वाधिकसङ्ख्याकाः धातवः काशकृत्स्नधातुपाठे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सन्ति । तदनन्तरस्थानं तु कविकल्पद्रुमस्य एव । अस्मिन् धातुपाठे ४३ अनुबन्धाः सन्ति । तेषु सप्त-दश अनुबन्धाः पाणिनेः एव । अनिट्धातुबोधनाय यः औकारानुबन्धः उप-युज्यते सः जैनेन्द्रधातुपाठात् गृहीतः । अन्ये स्वोपज्ञाः एव वर्तन्ते । प्रक्रिया-सर्वस्वकारः एतं धातुपाठम् एव अनुसरति ।

काशकृत्स्नः – अष्टसु आदिशाब्दिकेषु अन्यतमः । आदिशाब्दिकाश्च –

इन्द्रश्चन्द्रः काशकृत्स्नापिशलिः शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।।

पाणिनेः पूर्वं स्थितस्य अस्य 'धातुपाठः' चेन्नवीरकविकृतया कन्नडावृत्त्या सहिततया १९५२ तमे वर्षे पुणेस्थया डेक्कन्कालेज्नामिकया संस्थया प्रकाशितः । युधिष्ठिरमीमांसकः एतां वृत्तिं संस्कृतेन अनूद्य एतं धातुपाठं प्रकाशितवान् अस्ति । पाणिनेः पूर्वं स्थितेषु उपलभ्यमानः धातुपाठः अयम् एकः एव । उपलभ्य-मानेषु धातुपाठेषु अतिविस्तृतः धातुपाठः अयम् ।

कातन्त्रः – काशकृत्स्नविरचितस्य व्याकरणस्य अनुसर्ता ।

काशिका – जयादित्यवामनाभ्यां विरचिता अष्टाध्याय्याः वृत्तिः । जयादित्येन आरब्धा वृत्तिः वामनेन पूर्तिं गमिता । षष्ठात् शतकात् पूर्वम् एतयोः स्थितिः स्यात् इति तर्क्यते । 'काशयति प्रकाशयति सूत्रार्थमिति काशिका' इति काशिकापदस्य अर्थः । अग्रिमे काले पाणिनीयपरम्परायाः अनुसर्तारः तद्भिन्नाः वैयाकरणाः च काशिकायाः उपयोगं बहुधा कृतवन्तः दृश्यन्ते ।

काश्यपः – अयम् अपि धातुपाठव्याख्याता कश्चित् । अष्टाध्याय्यां स्थलद्वये (तृषिमृषिकृशेः काश्यपस्य - १.२.२५, नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवम्' - ८.४.६७) अयं स्मर्यते । अतः पाणिनेः पूर्वता तु अस्य स्पष्टा । अलङ्कारशास्त्रे, छन्दश्शास्त्रे, वैद्यशास्त्रे चापि अस्य उल्लेखः प्राप्यते । अस्य धातुपाठव्याख्या, अन्यग्रन्थः वा न उपलभ्यते ।

कृदन्तरूपमाला – द्विसहस्रस्य धातूनां कृद्रूपाणि प्रदत्तानि अत्र । पञ्चभागात्मिका अस्ति एषा । एतस्याः प्रथमः भागः १९६५ तमे वर्षे प्रकाशितः । श्रीमता एस्. रामसुब्रह्मण्यशास्त्रिवर्येण एतस्याः रचनाकार्यम् आरब्धम् । तस्य दिवङ्गतेः अनन्तरं तच्छिष्याभ्यां वि.श्रीवत्साङ्काचार्यः, श्री टि.के. प्रणतार्तिहरः इत्येताभ्यां समाप्तिं गमिता । विस्तृता टिप्पणी, भट्टिकाव्यधातुकाव्यादिभ्यः उदाहरणसङ्ग्रहः इत्यादिनि अनेकानि वैशिष्ट्यानि सन्ति एतस्याः कृदन्तरूपमालायाः । एतस्याः प्रकाशिका अस्ति चेन्नैनगरीया 'संस्कृत एजुकेषन् सोसैटी' इत्याख्या ।

कृष्णलीलाशुकमुनिः – पुरुषकाराख्यटीकाकर्ता । विस्तरस्तु 'पुरुषकारः' इत्यत्र द्रष्टव्यः ।

केशवस्वामी – अष्टाध्यायीवृत्तिकारः । एतस्य विषये अधिकं विवरणं न प्राप्यते ।

कैयटः – महाभाष्यस्य प्रदीपाख्यस्य व्याख्यायाः कर्ता । महाभाष्यस्य रहस्योद्घाटनं, मतान्तराणां विवेचनं, भाष्याशयस्य विशदीकरणम् इत्यादिभिः अंशैः प्रदीपव्याख्यानं वैशिष्ट्यं भजते । प्रदीपं विना भाष्यस्य स्वारस्यम् अनुभवगोचरतां न याति । कैयटः जय्यटस्य पुत्रः । भाष्यस्य अभिप्रायः सुविशदया निरूपितः अस्ति अनेन । भाष्यप्रदीपस्य प्रत्यध्यायान्ते – 'इत्युपाध्यायजय्यटपुत्रकृतकय्यटकृते महाभाष्यप्रदीपे...' इति आनुपूर्वी दृश्यते । एषः दशमशतकस्य अन्तिमे भागे आसीत् इति विदुषाम् अभिप्रायः ।

कौशिकः – कश्चित् वैयाकरणः अज्ञातविवरणः । क्षीरस्वामी बहुत्र एतस्य मतम् उद्धरति । तदीयानि वचनानि एव अन्ये धातुवृत्तिकाराः पौनःपुन्येन उद्धरन्ति ।

क्षीरतरङ्गिणी – प्रसिद्धः, पाणिनिपरम्परीयः, उपलभ्यमानेषु प्राचीनः महत्त्वपूर्णः च धातुपाठः अयम् । सायणादयः बहवः वृत्तिकाराः पदे पदे एतस्य उल्लेखं कुर्वन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्षीरस्वामी – क्षीरतरङ्गिणीकारः । शाब्दिकमूर्धन्यस्य एतस्य धातुपाठव्याख्यानकर्तुः मतस्य विशेषमहत्त्वम् अस्ति धातुपाठक्षेत्रे । क्षीरतरङ्गिण्याम् उपोद्घातश्लोके अयं वदति – 'न्याय्ये वर्त्मनि वर्तनाय भवतां षड् वृत्तयः कल्पिताः' इति । एतदाधारेण तर्क्यते यत् एतेन अमरकोषोद्घाटनादयः अन्याः पञ्च वृत्तयः अपि लिखिताः इति । अस्य कालः – सा.श. १०४३-१०९३ ।

गणरत्नमहोदधिः – वर्धमाननामकेन आचार्येण विरचितः ग्रन्थः अयम् । वर्धमानः सा श. ११४० तमे वर्षे एतं ग्रन्थम् अरचयत् इति ज्ञायते ग्रन्थान्ते विद्य-मानात् श्लोकात् । चादिः अर्धर्चादिः इत्यादिषु गणेषु पठिताः शब्दाः व्याख्यायन्ते अत्र । अष्टौ अध्यायाः, ८०० श्लोकाश्च सन्ति अत्र । गणपाठेषु स्थितानां शब्दानाम् अर्थविवरणं तु व्याकरणग्रन्थेषु न उपलभ्यते । गणरत्नमहोदधिसदृशाः ग्रन्थाः एव एतद्विषये विशेषतः उपकारकाः ।

चरकः – धातुविवृत्तिकर्ता आयुर्वेदीयचरकात् अन्यः कश्चन । अधिकं विवरणम् अस्य विषये न ज्ञायते ।

चन्द्रः – आचार्यचन्द्रगोमिः । एषः चान्द्रव्याकरणस्य प्रणेता । संस्कृतक्षेत्रे स्थितेषु उपदशेषु व्याकरणेषु चान्द्रव्याकरणम् अपि अन्यतमम् । लाघवं स्पष्टता सम्पूर्णता च एतस्य वैशिष्ट्यम् इति ग्रन्थादौ एव तेन उच्यते – 'लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्' इति । चान्द्रमतत्वेन अस्यैव मतम् उल्लिख्यते तत्र तत्र ।

जिनेन्द्रः (जिनेन्द्रबुद्धिः) – न्यासाख्यायाः काशिकावृत्तेः व्याख्यायाः प्रणेता । उपलभ्यमानासु अष्टसु काशिका-वृत्तिव्याख्यासु एषा एव प्राचीनतमा । अधिकं विवरणं 'न्यासः' इत्यत्र द्रष्टव्यम् ।

तत्त्वबोधिनी – सिद्धान्तकौमुद्याः (भट्टोजिदीक्षितविरचितायाः) व्याख्या अस्ति तत्त्वबोधिनी । एषा ज्ञानेन्द्रसरस्वतीवर्येण लिखिता । भट्टोजिदीक्षितः ज्ञानेन्द्रसरस्वती च समकालिकौ । अतः अस्य कालः सा.श.१४९३-१५४३ स्यात् इति तर्क्यते । सिद्धान्तकौमुद्याः अध्ययनाय नितराम् उपकरोति इयं व्याख्या ।

तरङ्गिणी – क्षीरस्वामिविरचिता क्षीरतरङ्गिणी । अधिकं विवरणं क्षीरतरङ्गिण्यां द्रष्टव्यम् ।

तैत्तिरीयसंहिता – तित्तिरिमुनिप्रोक्तायाः यजुश्शाखायाः मन्त्रभागः । मन्त्राणां सङ्ग्रहः 'संहिता' इति निर्दिश्यते ।

द.उ.वृत्तिः – दशपद्युणादिवृत्तिः एषा पञ्चपादीम् अवलम्बते । एतस्याः प्रवक्ता कः इति न ज्ञायते । सिद्धान्तकौमुद्यां तावत् पञ्चपादी एव उपलभ्यते । यावन्तः व्याकरणभेदाः उपलभ्यन्ते तावन्तः उणादिपाठाः अपि भवन्ति प्रायः । प्रत्युणादिपाठं वृत्तिरपि भवति एव ।

दुर्गः – कातन्त्रव्याकरणस्य वृत्तेः प्रणेता अयम् । उपलब्धासु कातन्त्रवृत्तिषु प्राचीना प्रौढा च दुर्गकृता एव । कातन्त्ररूपे दुर्गे सिंहः इव विचरन् दुर्गः 'दुर्गसिंहः' इति अभिधानं प्राप्नोत् इति श्रूयते । नवमे दशमे वा शतके अस्य स्थितिः स्यात् इति केचित् अभिप्रयन्ति । युधिष्ठिरमीमांसकः वदति – 'अयं षष्ठशतकस्य अन्तिमे भागे आसीत्' इति । एतस्य दुर्गात्मा दुर्गपः इत्यादीनि नामानि अपि सन्ति । तथा हि – 'दुर्गसिंहोऽथ दुर्गात्मा दुर्गो दुर्गप इत्यपि । यस्य नामानि ...' – कातन्त्रव्याकरकणस्य लिङ्गानुशासनस्य अन्ते

दुर्गादासः – दुर्गः एव दुर्गादासः, उत दुर्गादासनामा अन्यः कश्चन अस्ति इति स्पष्टतया न ज्ञायते ।

देवः – धातुपाठव्याख्याता अयम् । एतस्य ग्रन्थः 'दैवम्' इति ख्यातः । अयं स्वग्रन्थे लिखति – 'सरूपधातुव्याख्यानम् इदम्' इति । तस्मात् एव ग्रन्थस्यास्य स्वरूपं स्पष्टम् । श्लोकरूपे एतस्मिन् ग्रन्थे २०० श्लोकाः सन्ति । 'लीलाशुक'नामकेन एतस्य 'पुरुषकारा'ख्या व्याख्या अपि विरचिता । सायणादयः अपि एतस्य मतं पुरस्कुर्वन्ति, उल्लिखन्ति च बहुत्र । द्वादशे शतके अयम् आसीत् इति तर्क्यते ।

दैवम् – देवेन प्रणीतः धातुपाठव्याख्यारूपः ग्रन्थः । विस्तरस्तु 'देवः' इत्यत्र द्रष्टव्यः ।

द्रमिडाः – कस्यचित् आचार्यस्य शिष्याः एतेन पदेन निर्दिश्यन्ते इति भाति । तदीयः ग्रन्थः कः इत्यादिकं विवरणं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न उपलभ्यते ।

धनपालः – शाकटायनव्याकरणस्य धातुपाठस्य व्याख्याकारः अयम् । शाकटायनधातुपाठः प्रायः पाणिनीय-धातुपाठसदृशः एव अस्ति । माधवीयधातुवृत्त्यादिषु एतस्य धातुपाठस्य मतानि बहुत्र उल्लिखितानि दृश्यन्ते ।

धातुकाव्यम् – नारायणभट्टविरचितं सर्गत्रयात्मकं काव्यम् एतत् । कंसवधः अस्य वस्तु । माधवीयधातुवृत्तौ येन क्रमेण धातवः निर्दिष्टाः स्युः तेनैव क्रमेण सर्वेषां धातूनां रूपाणि प्रयुक्तानि कविना । द्वितीयः श्लोको यथा –

स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधीगाधितकार्यबाधिनम् ।
द्रक्ष्यन् हरिं नाधितलोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम् ।।

अत्र भू, एध, स्पर्ध, गाधृ, बाधृ नाधृ, नाथृ, दध, स्कुदि इत्येतेषां नवानां धातूनां रूपाणि दर्शितानि । एवमेव अग्रे अपि क्रमः । अज्ञातनामभिः भट्टपाद-शिष्यैः कैश्चित् विरचिता 'कृष्णार्पण'टीका उपलभ्यते अस्य । प्रायः टीकां विना अस्य ग्रन्थस्य अर्थावगतिः क्लेशाय एव भवेत् । (वासुदेवाख्येन विरचिते 'वासुदेवविजये' अन्यसूत्रसम्बद्धानि उदाहरणानि समावेशितानि सन्ति ।)

धातुपाठसमीक्षा – भागीरथप्रसादत्रिपाठिवर्येण रचितः अयं ग्रन्थः वाराणसीस्थेन सम्पूर्णानन्दविश्वविद्यालयेन प्रकाशितः । क्षीरतरङ्गिणी-धातुप्रदीप-धातुवृत्तिगताः सर्वे धातवः, चान्द्र-जैनेन्द्र-काशकृत्स्न-कातन्त्रादिधातुपाठ-गताः धातवः च अत्र सङ्कलिताः । कः धातुः केन केन धातुपाठकारेण कस्मिन् अर्थे उक्तः इत्यादिकम् इतः ज्ञातुं शक्यम् । महता श्रमेण रचितः अयं ग्रन्थः सर्वेषां धातुपाठानां समीक्षणे नितराम् उपकारकः ।

धातुपारायणम् – हेमचन्द्राचार्यविरचितस्य धातुपाठस्य नाम एतत् । विवरणं 'हेमचन्द्रः' इत्यत्र द्रष्टव्यम् ।

धातुप्रदीपः – बौद्धविदुषा मैत्रेयरक्षिताख्येन पाणिनीयधातुपाठस्य सङ्क्षिप्ता वृत्तिः रचिता । मैत्रेयरक्षितः पाणिनीयतन्त्रस्य असामान्यः पण्डितः आसीत् । सायणप्रभृतिभिः आचार्यैः एतेन व्याख्यातः धातुपाठः एव प्रमाणत्वेन स्वीकृतः । एषः क्षीरस्वामिनः अनन्तरं, तन्नाम द्वादशशतकस्य पूर्वार्धे स्थितः स्यात् इति तर्क्यते । एतदीयं धातुपाठमेव परिष्करोति सायणः माधवीयधातुवृत्तौ ।

धातुरूपप्रकाशिका – चामराजनगरीयेण श्रीकण्ठशास्त्रिणा (१८९३-१९१७) विरचितः अस्ति अयं ग्रन्थः । सर्वेषां धातूनां तिङ्रूपाणां कृद्रूपाणां च सङ्ग्रहाय अत्र प्रयासः कृतः । णिजन्तसन्नन्तयङन्तादीनि रूपाणि अपि अत्र दत्तानि । सर्वे धातवः कारिकारूपेण अपि अत्र विवृताः सन्ति । अद्यत्वे अवधूताश्रमेण कोष्ठकसहिततया चतुर्भागत्वेन अयं पुनः प्रकाशितः ।

नन्दी – जैनेन्द्रव्याकरणस्य प्रवर्तकः देवनन्दी । सः एव 'नन्दी' इत्यपि निर्दिश्यते । तेन धातुपाठः प्रोक्तः अपि । सम्प्रति सः न उपलभ्यते । तस्य दाक्षिणात्यपाठत्वेन परिगण्यमानः गुणनन्दिना संशोधितः शब्दार्णवनामकः धातुपाठः उपलभ्यते । ततः देवनन्दिनः मतम् अवगन्तुं शक्यम् ।

नागेशः – उद्योतस्य (भाष्यव्याख्यायाः प्रदीपस्य व्याख्या) रचयिता । विवरणम् 'उद्योतः' इत्यत्र द्रष्टव्यम् ।

निरुक्तम् – वेदाङ्गेषु अन्यतमम् अस्ति निरुक्तम् । अस्य प्रणेता यास्कः । शब्दार्थनिरूपणादिकं क्रियते अत्र । शब्दार्थनिरूपणावसरे धातुसम्बद्धचर्चा अपि भवति सहजतया ।

न्यासः – काशिकावृत्तेः याः टीकाः उपलभ्यन्ते तासु प्राचीना टीका अस्ति न्यासः । एषा 'जिनेन्द्रबुद्धि'ना रचिता । 'काशिकाविवरणपञ्जिका' इत्यपि नाम न्यासस्य । 'न्यस्यते स्थाप्यते दृढीक्रियते मूलोक्तोऽर्थोऽनेनेति न्यासः' इति न्यासपदस्य अर्थः । न्यासस्यापि तन्त्रप्रदीपः (मैत्रेयरक्षितकृतः), न्यासोद्योतः (मल्लिनाथकृतः), न्यासप्रकाशः (नरपतिमहामिश्रकृतः) इत्यादयः व्याख्याः उपलभ्यन्ते । न्यासकारः अष्टमे शतके आसीत् इति भाव्यते ।

न्यासकारः – काशिकावृत्तेः 'न्यास'नामिकायाः व्याख्याता जिनेन्द्रबुद्धिः । वृत्तिनिरूपितः भावः विशदतया प्रकाशितः अस्ति अनेन । काशिकावृत्तेः आशयस्य विरोधं क्वापि प्रायः न करोति एषः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पदमञ्जरी – काशिकायाः व्याख्याम् एतां हरदत्तमिश्रः रचितवान् । द्रमिडदेशवासी अयं ग्रन्थारम्भे एव मातापित्रादीनां नाम उल्लिखति । गृह्यधर्मसूत्रादिषु अपि एतस्य पाण्डित्यम् आसीत् । एकादशशतकम् एतस्य जीवितकालः स्यात् इति विद्वद्भिः तर्क्यते ।

पुरुषकारः – आचार्येण श्रीकृष्णलीलाशुकमुनिना दैवग्रन्थस्य 'पुरुषकार'नामिका व्याख्या लिखिता । पाणिनीयेतर-व्याकरणसम्प्रदायान् अपि प्रतिपदम् उद्धरति अयम् इत्यतः स्पष्टं यत् एतस्य अनेकतन्त्रनिष्ठं ज्ञानम् आसीत् इति । माधवीयधातुवृत्तौ अस्य उल्लेखः बहुधा कृतः दृश्यते । अयं द्वादश-शतकस्य आदिभागे आसीत् इति तर्क्यते ।

प्रक्रियासर्वस्वम् – प्रक्रियाक्रमम् अनुसृत्य नारायणभट्टवर्येण रचितः ग्रन्थः अयम् । अष्टाध्यायीगतानि सर्वाणि सूत्राणि व्याख्यातानि अत्र । सिद्धान्तकौमुद्यां यः क्रमः आश्रितः सः एव क्रमः अस्ति प्रायः प्रक्रियासर्वस्वे अपि । अर्थसङ्ग्रहाय, विवरणाय, उदाहरणत्वेन च रमणीयाः श्लोकाः रचिताः सन्ति ग्रन्थेऽस्मिन् । सुदीर्घा चर्चा क्वचित् श्लोकैः सङ्क्षिप्यते ग्रन्थकर्त्रा । प्रक्रियाक्रमेण व्याकरणसूत्राणि अध्येतुम् इच्छतां कृते नितराम् उपकारकः अस्ति अयं ग्रन्थः ।

प्रदीपकारः – महाभाष्यस्य व्याख्यायाः प्रदीपस्य रचयिता कैयटः । अधिकं विवरणं 'कैयटः' इत्यत्र द्रष्टव्यम् ।

प्रौढमनोरमा – सिद्धान्तकौमुद्याः व्याख्यानम् इदम् । एतत् भट्टोजिदीक्षतेन एव रचितम् । विषयगतप्रौढताकारणतः एषः व्याख्याग्रन्थः स्वतन्त्रग्रन्थायते इत्यत्र नातिशयोक्तिः । भट्टोजिदीक्षितविषये 'भट्टोजिदीक्षितः' इत्यत्र द्रष्टव्यम् ।

बालमनोरमा – वासुदेवदीक्षितविरचिता सिद्धान्तकौमुद्याः प्रसिद्धा टीका एषा । अध्येतॄणाम् उपकाराय रचिता एषा टीका सुप्रसन्ना अतिसरला च । दाक्षिणात्यः वासुदेवदीक्षितः तञ्जावूरुराजानां मन्त्रिपदकार्यम् अपि निरवहत् इति श्रूयते । धर्मशास्त्रादिषु अपि अयं कृतपरिश्रमः । अष्टादशशतकस्य चरमपादे जातः स्यात् अयम् इति तर्क्यते ।

भगवद्गीता – महाभारतस्य भीष्मपर्वणि स्थिता 'भगवद्गीता' सर्वैः ज्ञायते एव । अष्टादशाध्यायात्मिकायाम् अस्यां श्रीकृष्णः अर्जुनम् उपदिशति । प्रस्थानत्रये अन्यतमत्वं भजते एषा गीता ।

भट्टभास्करः – अयं तैत्तिरीयसंहितायाः भाष्यं लिखितवान् अस्ति ।

भट्टमल्लः – आख्यातचन्द्रिकाख्यस्य ग्रन्थस्य कर्ता । अस्य विषये विवरणम् 'आख्यातचन्द्रिका' इत्यत्र द्रष्टव्यम् ।

भट्टिकाव्यम् – रावणवधाख्यं काव्यमेतत् महाकविना भट्टिना रचितम् । एतत् 'भट्टिकाव्यम्' इत्येव प्रसिद्धम् । व्याकरणनियमानुगतानां रूपाणां प्रदर्शनाय एव एतत् काव्यं रचितम् । लक्ष्यप्रधानेषु ग्रन्थेषु भट्टिकाव्यस्यैव प्राथम्येन उल्लेखः । श्रीरामपट्टाभिषेकान्तः भागः वर्णितः अस्ति अत्र । व्याकरणोदाहरणप्रधानम् अपि एतत् प्रसादगुणोपेतम् । १६२४ श्लोकाः सन्ति अत्र । षष्ठ-शतकस्य मध्यभागः एतस्य जीवितकालः स्यात् ।

भट्टोजिदीक्षितः – सुप्रसिद्धस्य सिद्धान्तकौमुदीग्रन्थस्य प्रणेता अयं शब्दकौस्तुभाख्यं ग्रन्थम् अपि रचितवान् । महाभाष्यस्य आशयः समग्रतया निरूपितः अस्ति कौमुद्याम् । पूर्वार्धोत्तरार्धयुतायां कौमुद्यां ७३ प्रकरणानि सन्ति । प्रक्रियानुसारिग्रन्थेषु अद्वितीयत्वेन ख्याता अस्ति कौमुदी । भट्टोजिदीक्षितः व्याकरणे इव धर्मशास्त्रादिषु अपि निपुणः आसीत् । षोडशे शतके जातः स्यात् अयम् ।

भागवृत्तिः – अष्टाध्याय्याः वृत्तिः एषा । विमलमतिः एतस्याः रचयिता । सप्तमशतकस्य उत्तरार्धे अयम् आसीत् इति विदुषाम् अभिप्रायः । काशिकावृत्तेः खण्डनं तत्र तत्र दृश्यते एतस्यां वृत्तौ । कैयटः, भट्टोजिदीक्षितः इत्यादयः एतस्य मतम् आधिक्येन उद्धरन्ति ।

भाष्यम् – व्याकरणमहाभाष्यम् एव अत्र 'भाष्य'शब्देन अभिप्रेतम् । महाभाष्यं पतञ्जलिना रचितम् । पाणिनीयं

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

व्याकरणं त्रिमुनिव्याकरणम् इति ख्यातम् । तेषु त्रिषु मुनिषु भाष्यकारः पतञ्जलिः अपि अन्यतमः । भाष्यं विचारगाम्भीर्येण सरलशैल्या च अनितरसाधारणतां भजते । सूत्रकारस्य आशयस्य स्पष्टतया अवगमने भाष्यम् उपकरोति विशेषतः । भाष्यकारः सामान्यशकस्य १०० वर्षेभ्यः पूर्वम् आसीत् इति पाश्चात्त्यविद्वांसः अभिप्रयन्ति । ततोऽपि द्विसहस्रात् वर्षेभ्यः पूर्वं सः आसीत् इति अभिप्रैति युधिष्ठिरमीमांसकः ।

भीमसेनः – पाणिनीयधातुपाठस्य अर्थनिर्देशः कर्ता । धात्वर्थनिर्देशः भीमसेनाचार्येण न कृतः इति मन्वानाः केचन एतं धातुवृत्तिकर्तारम् अपि मन्यन्ते । बहूनां ग्रन्थेषु भीमसेनस्य धातुविषयकस्य मतस्य उल्लेखः दृश्यते बहुधा । क्षीरस्वामितः बहोः कालात् पूर्वम् एव आसीत् अयम् । एतस्य जीवनकालः षष्ठं शतकं स्यात् इति वदन्ति केचन ।

भोजः – सरस्वतीकण्ठाभरणनामकयोः ग्रन्थयोः निर्माता । सरस्वतीकण्ठाभरणनाम्ना ग्रन्थद्वयम् उपलभ्यते - अलङ्कारशास्त्रीयं व्याकरणशास्त्रीयं चेति । व्याकरणशास्त्रीये सरस्वतीकण्ठाभरणे अष्टौ अध्यायाः, ६४११ सूत्राणि च सन्ति । गणपाठादिकमपि भोजः सूत्रेषु एव अन्तर्भावयति । धातुपाठः पार्थक्येन प्रोक्तः । भोजः बहूनां विदुषाम् आश्रयदाता, स्वयं विद्वान् च आसीत् । अयं १०१८-१०४३ वर्षयोः मध्ये आसीत् इति तर्क्यते । एतदीयः ग्रन्थः पाणिनीयं चान्द्रं च व्याकरणम् अवलम्बते ।

माधवः – मायणस्य पुत्रः सायणस्य सहोदरश्च अयम् । सायणः धातुवृत्तिं रचयन् 'माधवीया धातुवृत्तिः' इति नाम अकरोत् । सायणाचार्येण सर्वदर्शनसङ्ग्रहसामवेदभाष्यादिकं लिखितम् ।

माधवीया धातुवृत्तिः – अनेकासु धातुवृत्तिषु सतीषु अपि माधवीया धातुवृत्तिः अनन्यसाधारणी एव । अग्रजस्य माधवस्य स्मृत्यर्थम् आचार्येण सायणेन रचितः ग्रन्थः अयम् । ग्रन्थस्यास्य विस्तरः गाम्भीर्यं च सुविख्यातम् । पाण्डित्यपूर्णं व्याख्यानमेतत् । अनेकेषां ग्रन्थकाराणां मतम् उल्लिख्यते अत्र । एतस्य रचनाकालः १४१२-१४२० इति भाव्यते । सायणस्य पिता मायणः, माता च श्रीमती । भ्रातरौ माधवभोगनाथौ । व्याकरणे मीमांसायां वेदेषु च निष्णातः आसीत् एषः इति एतदीयग्रन्थपरिशीलनात् ज्ञायते । विजयनगरसाम्राज्यस्य सङ्गमहीपतेः महामन्त्री कुलगुरुः च आसीत् अयम् । 'यज्ञनारायणार्यः' इति एतस्य नाक्षत्रं नाम । 'माधव'-पदेनापि एतदीया वृत्तिः निर्दिश्यते क्वचित् ।

मधुसूदनः - (?)

मैत्रेयः, मैत्रेयरक्षितः – एतेन धातुप्रदीपाख्यः ग्रन्थः रचितः । धातूनाम् अर्थविषये सङ्क्षेपेण विश्लेषणं कृतम् अस्ति एतेन । क्षीरतरङ्गिण्याः अनन्तरम् एतस्य जन्म । अतः एकादशशतकस्य मध्यभागे स्थितः स्यात् अयम् इति तर्क्यते । एतस्य कृतौ चान्द्रकालापव्याकरणयोः प्रभावः परिलक्ष्यते ।

यादवः – यादप्रकाशापरनामा अयं वैजयन्तीकोषस्य रचयिता । वैजयन्ती पर्यायपदविषये अमरकोषात् अपि सुपरिष्कृता । पर्यायपदानि पञ्चभिः काण्डैः, नानार्थपदानि त्रिभिः काण्डैः च विवृतानि अत्र । प्रतिकाण्डम् अनेके अध्यायाः सन्ति । नानार्थपदानि अकारादिक्रमेण निरूपितानि । एकादशे शतके एतस्य स्थितिः स्यात् इति तर्क्यते ।

युधिष्ठिरमीमांसकः – (१९०९-१९९५) विंशतितमस्य शतकस्य पूर्वार्धे लब्ध-जन्मा एषः ब्रह्मदत्तजिज्ञासुतः व्याकरणशास्त्रस्य तत्त्वानि अधिगृहीतवान् । काश्यां पट्टाभिशास्त्रिप्रभृतीनाम् अपि शिष्यत्वम् अङ्गीकुर्वता अनेन बहुविधं पाण्डित्यम् आसादितम् । 'व्याकरणशास्त्र का इतिहास' इत्यादयः अनेके ग्रन्थाः अनेन लिखिताः, बहवः ग्रन्थाः महता श्रमेण सम्पादिताः च । एतस्य निशिता बुद्धिः व्याकरणशास्त्रस्य अनेकेषु अंशेषु प्रसृता अस्ति । अनेकैः पुरस्कारैः अयं पुरस्कृतः अस्ति अपि ।

रक्षितः – मैत्रेयरक्षितः इत्यपि ख्यातः पाणिनीयधातुपाठव्याख्याता बौद्धविद्वान् । विवरणं 'मैत्रेयरक्षितः' इत्यत्र

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्रष्टव्यम् ।

लीलाशुकः – पुरुषकाराख्यटीकाकर्ता कृष्णलीलाशुकमुनिः । एतद्विषये विस्तरः 'पुरुषकारः' इत्यत्र द्रष्टव्यः ।

वर्धमानः – गणरत्नमहोदधेः रचयिता । विवरणं गणरत्नमहोदधौ द्रष्टव्यम् ।

वाक्यपदीयम् – भर्तृहरिणा विरचितः ग्रन्थः एषः । पतञ्जलेः अनन्तरं व्याकरणशास्त्रीयं दार्शनिकचिन्तनम् अनेनैव कृतम् । वाक्यपदीये ब्रह्मकाण्डः वाक्यकाण्डः पदकाण्डः चेति त्रयः भागाः । ब्रह्मकाण्डे महाभाष्यस्थाः पश्पशाह्निक-द्वितीयाह्निकस्थाः विषयाः प्रतिपादिताः । वाक्यकाण्डे वाक्यस्य अखण्डता, वाक्यस्फोटः इत्यादयः अंशाः सन्ति । पदकाण्डे (प्रकीर्णकाण्डः इति अपरं नाम) जातिव्यक्तिद्रव्यपदार्थगुणसङ्ख्यावचनादयः अनेके विषयाः चर्चिताः । अत्र चतुर्दश समुद्देशाः सन्ति । वृषभदेव-पुण्यराज-हेलाराजादयः वाक्यपदीयस्य व्याख्यां लिखितवन्तः सन्ति । भर्तृहरिः प्रायः पञ्चमशतकस्य पूर्वार्धे स्थितः स्यात् इति विद्वद्भिः तर्क्यते ।

वाचस्पत्यम् – तारानाथभट्टाचार्येण (१८१२-१८८५) विरचितः विस्तृतकायः कोषः अयम् । वङ्गदेशीयेन अनेन कोषकारेण एतस्य निर्माणाय अष्टादश वर्षाणि यावत् प्रयासः कृतः । अत्र पदानि प्रातिपदिकरूपेण दत्तानि । राजा राधाकान्तबहाद्दूरः इत्यनेन रचितः शब्दकल्पद्रुमः इव अयमपि कोषः विश्वकोषायते ।

वागीशः – (?)

वामनालङ्कारसूत्रवृत्तिः – वामनेन विरचिता अस्ति काव्यालङ्कारसूत्रवृत्तिः । अलङ्कारशास्त्रक्षेत्रे वामनः रीतिसम्प्रदायस्य प्रवर्तकत्वेन ख्यातः । अलङ्कारशास्त्रसम्बद्धाः बहवो विषयाः अनेन चर्चिताः । व्याकरणसम्बद्धाः केचन वाक्यविशेषाः अपि अनेन चर्चिताः । आयम् अष्टमे शतके आसीत् इति भाव्यते ।

वृत्तिकारः – काशिकावृत्तिः एव 'वृत्ति'शब्देन उच्यते । तस्याः रचयिता वृत्तिकारः । विवरणं 'काशिका'पदे द्रष्टव्यम् ।

वोपदेवः – एषः 'मुग्धबोध'व्याकरणस्य कर्ता । मुग्धबोधव्याकरणे ११८४ सूत्राणि सन्ति । सन्धिः, सुबन्ताः, तिङन्ताः, कृदन्ताः च अत्र विवृताः । एतस्मिन् ग्रन्थे एकाक्षरयुक्ताः संज्ञाः सन्ति – यथा व्रिः (वृद्धिः) णु (गुणः) र्णः (सवर्णः) इत्येवम् । वङ्गादिषु एतस्य व्याकरणस्य अध्ययनं प्रचलति स्म । वोपदेवः चतुर्दशशतकस्य मध्यभागे स्थितः स्यात् इति तर्क्यते । कविकल्पद्रुमाख्यः धातुपाठः अस्य एव । अस्य ग्रन्थस्य विषये विवरणं 'कविकल्पद्रुमः' इत्यत्र द्रष्टव्यम् ।

व्याघ्रभूतिकारिका – काशिकाकारादिभिः उदाहृताः अनिट्कारिकाः 'व्याघ्रभूतिना' रचिता इति श्रूयते । एतासु कारिकासु अनिट्धातवः सर्वे सङ्गृहीताः । एताः कारिकाः कौमुद्यादिषु उपलभ्यन्ते ।

शब्देन्दुशेखरः – बृहच्छब्देन्दुशेखरः इत्ययं ग्रन्थः एव शब्देन्दुशेखरनाम्ना निर्दिश्यते । नागेशभट्टेन (सा.श. १६७३-१७५३) विरचितः अयं ग्रन्थः । लघुशब्देन्दुशेखरः अपि नागेशेन एव रचितः । उभौ अपि ग्रन्थौ सिद्धान्त-कौमुद्याः व्याख्याभूतौ । परिभाषेन्दुशेखरः, लघुमञ्जूषा, महाभाष्यप्रदीपोद्योतः, परमलघुमञ्जूषा इत्यादयः ग्रन्थाः अपि नागेशेन रचिताः । व्याकरणे इव अन्येष्वपि शास्त्रेषु अनितरसाधारणं पाण्डित्यम् आसीत् नागेशस्य ।

शाकटायनः – पाणिनियास्कादिभिः विशेषतया पुरस्कृतः अस्ति शाकटायनः । 'लङः शाकटायनस्य' इत्यादिषु त्रिषु सूत्रेषु शाकटायनस्य नाम्नः उल्लेखः दृश्यते । काशिकाकारः अपि वदति – 'अनुशाकटायनं वैयाकरणाः' इति । शाकटायननाम्ना किञ्चन व्याकरणमपि प्रसिद्धम् अस्ति । शाकटायनधातुपाठस्य उल्लेखः माधवीय-धातुवृत्त्यादिषु अपि उपलभ्यते । तस्य रचयिता अस्ति 'पाल्यकीर्तिः' । अयं पाणिनेः पूर्वस्थितात् अन्यः ।

शिवस्वामी – अयं कश्चन महावैयाकरणः । दशमशताब्द्याः पूर्वार्धे आसीत् अयम् । शिवस्वामिना धातुपाठवृत्तिग्रन्थः अपि कोऽपि लिखितः आसीत् इति तर्क्यते । एतदीयानि मतानि क्षीरतरङ्गिणीमाधवीयधातुवृत्त्यादिषु बहुधा उल्लिख्यते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्मताकारः – अज्ञातनामा । एतेन 'सम्मता'नाम्नी धातुपाठव्याख्या विरचिता ।

सायणः – माधवीयधातुवृत्तेः रचयिता । विस्तरस्तु 'माधवीयधातुवृत्तिः' इत्यत्र द्रष्टव्यः ।

सायणभाष्यम् – सायणेन वेदभाभाष्यम् अपि लिखितम् । सायणविषये 'माधवीया धातुवृत्तिः' इत्यत्र द्रष्टव्यम् ।

सिद्धान्तकौमुदी – भट्टोजिदीक्षितेन विरचितः प्रक्रियानुसारी ग्रन्थः एषः । सिद्धान्त-कौमुद्याम् अष्टाध्यायीस्थानि सर्वाणि अपि सूत्राणि व्याख्यातानि सन्ति । कौमुद्यां भागद्वयं – पूर्वार्धम् उत्तरार्धं चेति । पूर्वार्धे सुबन्तसिद्धेः उपयोगाय अपेक्षिताः अंशाः निरूपिताः । संज्ञापरिभाषादयः सन्धि-समास-तद्धितादयः च अत्रैव अन्तर्भवन्ति । उत्तरार्धे दशगणी कृत्प्रकरणं च अन्तर्भवति । वैदिकप्रकरणं स्वरप्रकरणम् उणादिप्रकरणं चापि कौमुद्यां व्याख्यातानि सन्ति । गणपाठ-धातुपाठ-लिङ्गानुशासनशिक्षाः चापि अन्ते प्रदत्ताः । सिद्धान्तकौमुद्याः पञ्चविंशत्यधिकानि व्याख्यानानि यत् उपलभ्यन्ते तदेव एतस्याः बहूपयोगितां प्रमाणयति ।

सुधा – अमरकोषस्य व्याख्या एषा भानुजिदीक्षितेन रचिता । 'रामाश्रमीटीका' इत्यपि एषा ख्याता । सुधाव्याख्याने अमरकोषस्थानां सर्वेषाम् अपि शब्दानां निरुक्तिव्युत्पत्त्यादयः दर्शिताः । सुधाकारेण या व्युत्पत्तिः दर्शिता सा प्रमाणसिद्धत्वेन परिभाव्यते । भानुजिदीक्षितः भट्टोजिदीक्षितस्य पुत्रः । संन्यासग्रहणानन्तरम् अस्य नाम 'रामाश्रमः' इति जातम् ।

सुनागः – सुनागः अपि कश्चित् धातुवृत्तिं रचितवान् इति तर्क्यते । शक्लधात्वादिषु माधवीयधातुवृत्तौ सौनागमतनिर्देशेन, काशिकावृत्तौ 'सौनागाः कर्मणि शकेरिटमिच्छन्ति विकल्पेन अस्यतेर्भावे' इति उद्धरणेन च एवं तर्क्यते । क्षीरस्वामी अपि क्वचित् सौनागमतम् उद्धरति ।

स्वामी – क्षीरस्वामी एव प्रायः स्वामित्वेन निर्दिश्यते इति भाति । अन्यः कश्चित् अपि भवितुम् अर्हति अयम् ।

हरदत्तः – 'हरदत्तमिश्रः' इत्यपि नाम श्रूयते । विवरणं 'पदमञ्जरी' इत्यत्र द्रष्टव्यम् ।

हरियोगी – हरियोगिना पाणिनीयधातुपाठम् आश्रित्य 'शाब्दिकाभरण'नामिका वृत्तिः लिखिता । दैवव्याख्याभूते पुरुषकारे हरियोगिनः नामोल्लेखः दृश्यते । अतः अयं द्वादशशतकस्य उत्तरार्धे आसीत् इति अभिप्रयन्ति विद्वांसः । शाब्दिकाभरणनामिका एषा धातुवृत्तिः न अतिविस्तृता । अत्र ११७० धातवः व्याख्याताः ।

हेमः – सिद्धहैमशब्दानुशासनाख्यस्य व्याकरणस्य कर्ता हेमचन्द्रः एव स्यात् अयम् ।

हेमचन्द्रः – एतेन सिद्धहैमशब्दानुशासनाख्यं व्याकरणं रचितम् । द्वादशस्य शतकस्य अन्तिमे भागे स्थितः स्यात् अयम् इति तर्क्यते । श्वेताम्बरपरम्परानुयायी जैनाचार्यः अयम् । जैनेन्द्रनाम्ना अपि क्वचित् अयम् उल्लिख्यते । सिद्धहैमशब्दानुशासनं संस्कृतप्राकृतसम्बद्धं व्याकरणम् । सप्तसु अध्यायेषु २८ पादेषु च संस्कृतव्याकरणं निरूपितम् । अत्र ३७६६ सूत्राणि सन्ति । लौकिकसंस्कृतमात्रम् अत्र प्रतिपादितम् । अष्टमाध्यायात् शौरसेनीमागध्यादिप्राकृतभाषाव्याकरणं निरूपितं ११११९ सूत्रैः । धातुपाठ-गणपाठ-उणादिसूत्र-पाठ-लिङ्गानुशासनान्यपि एतस्मिन् व्याकरणे सन्ति एव । 'धातुपारायणम्' इति एतस्य धातुपाठस्य नाम ।

❑ ❑

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिशिष्टम् - ६

अकाराद्यनुक्रमणिका

अक	भ्वा. सेट्, परस्मै	७९२
अकि	भ्वा. सेट्, आत्मने	८७
अक्षू	भ्वा. वेट्, परस्मै	६५४
अग	भ्वा. सेट्, परस्मै	७९३
अगि	भ्वा. सेट्, परस्मै	१४६
अघि	भ्वा. सेट्, आत्मने	१०९
अङ्क	चु. सेट्, उभय	१९२८
अङ्ग	चु. सेट्, उभय	१९२९
अज	भ्वा. सेट्, परस्मै	२३०
अजि	चु. सेट्, उभय	१७८६
अञ्चु	चु. सेट्, उभय	१७३९
अञ्चु	भ्वा. सेट्, उभय	८६२
अञ्चु	भ्वा. सेट्, परस्मै	१८८
अञ्जू	रु. वेट्, परस्मै	१४५८
अट	भ्वा. सेट्, परस्मै	२९५
अट्ट	चु. सेट्, उभय	१५६१
अट्ट	भ्वा. सेट्, आत्मने	२५४
अठि	भ्वा. सेट्, आत्मने	२६१
अड	भ्वा. सेट्, परस्मै	३५८
अड्ड	भ्वा. सेट्, परस्मै	३४८
अण	दि. सेट्, आत्मने	११७५
अण	भ्वा. सेट्, परस्मै	४४४
अत	भ्वा. सेट्, परस्मै	३८
अति	भ्वा. सेट्, परस्मै	६१
अद	अद. अनिट्, परस्मै	१०११
अदि	भ्वा. सेट्, परस्मै	६२
अन	अद. सेट्, परस्मै	१०७०
अन्ध	चु. सेट्, उभय	१९२६
अबि	भ्वा. सेट्, आत्मने	३७८
अभ्र	भ्वा. सेट्, परस्मै	५५६
अम	चु. सेट्, उभय	१७२१
अम	भ्वा. सेट्, परस्मै	४६५
अय	भ्वा. सेट्, आत्मने	४७४
अर्क	चु. सेट्, उभय	१६४३
अर्च	चु. सेट्, उभय	१८०९
अर्च	भ्वा. सेट्, परस्मै	२०४
अर्ज	चु. सेट्, उभय	१७२६
अर्ज	भ्वा. सेट्, परस्मै	२२४
अर्थ	चु. सेट्, आत्मने	१९०६
अर्द	चु. सेट्, उभय	१८२९
अर्द	भ्वा. सेट्, परस्मै	५५
अर्ब	भ्वा. सेट्, परस्मै	४१५
अर्व	भ्वा. सेट्, परस्मै	५८४
अर्ह	चु. सेट्, उभय	१७३२
अर्ह	चु. सेट्, उभय	१८३१
अर्ह	भ्वा. सेट्, परस्मै	७४०
अल	भ्वा. सेट्, परस्मै	५१५
अव	भ्वा. सेट्, परस्मै	६००
अश	क्र्या. सेट्, परस्मै	१५२३
अशू	स्वा. वेट्, आत्मने	१२६४
अस	अद. सेट्, परस्मै	१०६५
अस	भ्वा. सेट्, उभय	८८६
असु	दि. सेट्, परस्मै	१२०९
अह	स्वा. सेट्, परस्मै	१२७२
अहि	चु. सेट्, उभय	१७९८
अहि	भ्वा. सेट्, आत्मने	६३५
अंस	चु. सेट्, उभय	१९१९
आछि	भ्वा. सेट्, परस्मै	२०९
आप्लृ	चु. सेट्, उभय	१८४०
आप्लृ	स्वा. अनिट्, परस्मै	१२६०

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आस	अद. सेट्, आत्मने	१०२१
इ (केचित्)	भ्वा. सेट्, परस्मै	३२०
इक्	अद. अनिट्, परस्मै	१०४७
इख	भ्वा. सेट्, परस्मै	१४०
इखि	भ्वा. सेट्, परस्मै	१४१
इगि	भ्वा. सेट्, परस्मै	१५३
इङ्	अद. अनिट्, आत्मने	१०४६
इट	भ्वा. सेट्, परस्मै	३१८
इण्	अद. अनिट्, परस्मै	१०४५
इदि	भ्वा. सेट्, परस्मै	६३
ञि इन्धी	रु. सेट्, आत्मने	१४४८
इल	चु. सेट्, उभय	१६६०
इल	तु. सेट्, परस्मै	१३५७
इवि	भ्वा. सेट्, परस्मै	५८७
इष	क्र्या. सेट्, परस्मै	१५२५
इष	दि. सेट्, परस्मै	११२७
इषु	तु. सेट्, परस्मै	१३५१
ई (केचित्)	भ्वा. सेट्, परस्मै	३२०
ई (केचित्)	अद. अनिट्, परस्मै	१०४८
ईक्ष	भ्वा. सेट्, आत्मने	६१०
ईखि	भ्वा. सेट्, परस्मै	१४२
ईङ्	दि. अनिट्, आत्मने	११४३
ईज	भ्वा. सेट्, आत्मने	१८२
ईड	अद. सेट्, आत्मने	१०१९
ईड	चु. सेट्, उभय	१६६७
ईर	चु. सेट्, उभय	१८११
ईर	अद. सेट्, आत्मने	१०१८
ईर्क्ष्य	भ्वा. सेट्, परस्मै	५१०
ईर्ष्य	भ्वा. सेट्, आत्मने	५११
ईश	अद. सेट्, आत्मने	१०२०
ईष	भ्वा. सेट्, आत्मने	६११
ईष	भ्वा. सेट्, परस्मै	६८४
ईह	भ्वा. सेट्, आत्मने	६३२
उक्ष	भ्वा. सेट्, परस्मै	६५७
उख	भ्वा. सेट्, परस्मै	१२८
उखि	भ्वा. सेट्, परस्मै	१२९
उङ्	भ्वा. अनिट्, आत्मने	९५३
उच	दि. सेट्, परस्मै	१२२३
उच्छी	भ्वा. सेट्, परस्मै	२१६
उछि	तु. सेट्, परस्मै	१२९४
उछि	भ्वा. सेट्, परस्मै	२१५
उछी	भ्वा. सेट्, परस्मै	२१६
उछी	तु. सेट्, परस्मै	१२९५
उज्झ	तु. सेट्, परस्मै	१३०४
उठ	भ्वा. सेट्, परस्मै	३३८
उन्दी	रु. सेट्, परस्मै	१४५७
उब्ज	तु. सेट्, परस्मै	१३०३
उभ	तु. सेट्, परस्मै	१३१९
उम्भ	तु. सेट्, परस्मै	१३२०
उर्द	भ्वा. सेट्, आत्मने	२०
उर्वी	भ्वा. सेट्, परस्मै	५६९
उष	भ्वा. सेट्, परस्मै	६९६
उहिर्	भ्वा. सेट्, परस्मै	७३९
ऊन	चु. सेट्, उभय	१८८९
ऊयी	भ्वा. सेट्, आत्मने	४८३
ऊर्ज	चु. सेट्, उभय	१५४९
ऊर्णुञ्	अद. सेट्, उभय	१०३९
ऊष	भ्वा. सेट्, परस्मै	६८३
ऊह	भ्वा. सेट्, आत्मने	६४८
ऋ	जु. अनिट्, परस्मै	१०९८
ऋ	भ्वा. अनिट्, परस्मै	९३६
ऋच	तु. सेट्, परस्मै	१३०२
ऋच्छ	तु. सेट्, परस्मै	१२९६
ऋज	भ्वा. सेट्, आत्मने	१७६
ऋजि	भ्वा. सेट्, आत्मने	१७७
ऋणु	तना. सेट्, उभय	१४६७
ऋत्	भ्वा. सेट्, आत्मने	१०१०
ऋधु	दि. सेट्, परस्मै	१२४५
ऋधु	स्वा. सेट्, परस्मै	१२७१
ऋफ	तु. सेट्, परस्मै	१३१५
ऋम्फ	तु. सेट्, परस्मै	१३१६
ऋषी	तु. सेट्, परस्मै	१२८७

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॠ	क्र्या. सेट्, परस्मै	१४९७	कबृ	भ्वा. सेट्, आत्मने	३८०
एजृ	भ्वा. सेट्, आत्मने	१७९	कमु	भ्वा. सेट्, आत्मने	४४३
एजृ	भ्वा. सेट्, परस्मै	२३४	कर्ज	भ्वा. सेट्, परस्मै	२२८
एठ	भ्वा. सेट्, आत्मने	२६७	कर्द	भ्वा. सेट्, परस्मै	५९
एध	भ्वा. सेट्, आत्मने	२	कर्ब	भ्वा. सेट्, परस्मै	४२०
एषृ	भ्वा. सेट्, आत्मने	६१८	कर्व	भ्वा. सेट्, परस्मै	५८१
ओखृ	भ्वा. सेट्, परस्मै	१२१	कल	चु. सेट्, उभय	१६०४
ओणृ	भ्वा. सेट्, परस्मै	४५४	कल	चु. सेट्, उभय	१८६६
कक	भ्वा. सेट्, आत्मने	९०	कल	भ्वा. सेट्, आत्मने	४९७
ककि	भ्वा. सेट्, आत्मने	९४	कल्ल	भ्वा. सेट्, आत्मने	४९८
कख	भ्वा. सेट्, परस्मै	१२०	कष	भ्वा. सेट्, परस्मै	६८५
कखे	भ्वा. सेट्, परस्मै	७८४	कस	भ्वा. सेट्, परस्मै	८६०
कगे	भ्वा. सेट्, परस्मै	७९१	कसि	अद. सेट्, आत्मने	१०२४
कच	भ्वा. सेट्, आत्मने	१६८	काक्षि	भ्वा. सेट्, परस्मै	६६७
कचि	भ्वा. सेट्, आत्मने	१६९	काचि	भ्वा. सेट्, आत्मने	१७०
कटि (पा.)	भ्वा, सेट्, परस्मै	३२०	काशृ	दि. सेट्, आत्मने	११६२
कटी	भ्वा. सेट्, परस्मै	३२०	काशृ	भ्वा. सेट्, आत्मने	६४७
कटे	भ्वा. सेट्, परस्मै	२९४	कासृ	भ्वा. सेट्, आत्मने	६२३
कठ	भ्वा. सेट्, परस्मै	३३३	कि	जु. अनिट्, परस्मै	११०१
कठि	चु. सेट्, उभय	१८४८	किट	भ्वा. सेट्, परस्मै	३०१
कठि	भ्वा. सेट्, आत्मने	२६४	किट	भ्वा. सेट्, परस्मै	३१९
कड	तु. सेट्, परस्मै,	१३८०	कित	भ्वा. सेट्, परस्मै	९९३
कड	भ्वा. सेट्, परस्मै	३६०	किल	तु. सेट्, परस्मै	१३५३
कडि	चु. सेट्, उभय	१५८२	कीट	चु. सेट्, उभय	१६४०
कडि	भ्वा. सेट्, आत्मने	२८२	कील	भ्वा. सेट्, परस्मै	५२४
कड्ड	भ्वा. सेट्, परस्मै	३४९	कु	अद. अनिट्, परस्मै	१०४२
कण	चु. सेट्, उभय	१७१५	कुक	भ्वा. सेट्, आत्मने	९१
कण	भ्वा. सेट्, परस्मै	४४९	कुङ्	तु. अनिट्, आत्मने	१४०१
कण	भ्वा. सेट्, परस्मै	७९४	कुङ्	भ्वा. अनिट्, आत्मने	९५१
कत्थ	भ्वा. सेट्, आत्मने	३७	कुच	तु. सेट्, परस्मै	१३६८
कत्र	चु. सेट्, उभय	१९१६	कुच	भ्वा. सेट्, परस्मै	१८४
कथ	चु. सेट्, उभय	१८५२	कुच	भ्वा. सेट्, परस्मै,	८५७
कदि	भ्वा. सेट्, आत्मने	७७२	कुजु	भ्वा. सेट्, परस्मै	१९९
कदि	भ्वा. सेट्, परस्मै	७०	कुञ्च	भ्वा. सेट्, परस्मै	१८५
कनी	भ्वा. सेट्, परस्मै	४६०	कुट	तु. सेट्, परस्मै	१३६६
कपि	भ्वा. सेट्, आत्मने	३७५	कुट्ट	चु. सेट्, आत्मने	१७०२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कुट्ट	चु. सेट्, उभय	१५५८
कुठि	भ्वा. सेट्, परस्मै	३४२
कुड	तु. सेट्, परस्मै	१३८३
कुडि	चु. सेट्, उभय	१५८३
कुडि	भ्वा. सेट्, आत्मने	२७०
कुडि	भ्वा. सेट्, परस्मै	३२२
कुण	चु. सेट्, उभय	१८९४
कुण	तु. सेट्, परस्मै	१३३५
कुत्स	चु. सेट्. आत्मने	१६९७
कुथ	दि. सेट्, परस्मै	११९८
कुथि	भ्वा. सेट्, परस्मै	४३
कुद्रि	चु. सेट्, उभय	१५३९
कुन्थ	क्र्या. सेट्, परस्मै	१५१४
कुप	चु. सेट्, उभय	१७८०
कुप	दि. सेट्, परस्मै	१२३३
कुबि	चु. सेट्, उभय	१६५५
कुबि	भ्वा. सेट्, परस्मै	४२६
कुमार	चु. सेट्, उभय	१८७८
कुर	तु. सेट्, परस्मै	१३४१
कुर्द	भ्वा. सेट्, आत्मने	२१
कुल	भ्वा. सेट्, परस्मै	८४२
कुशि	चु. सेट्, उभय	१७६६
कुष	क्र्या. सेट्, परस्मै	१५१८
कुस	दि. सेट्, परस्मै	१२१८
कुसि	चु. सेट्, उभय	१७६४
कुस्म	चु. सेट्, आत्मने	१७११
कुह	चु. सेट्, आत्मने	१९०२
कूज	भ्वा. सेट्, परस्मै	२२३
कूट	चु. सेट्, आत्मने	१७०१
कूट	चु. सेट्, उभय	१८९१
कूण	चु. सेट्, आत्मने	१६८८
कूण	चु. सेट्, उभय	१८९७
कूल	भ्वा. सेट्, परस्मै	५२५
कृञ्	स्वा. अनिट्, उभय	१२५३
डु कृञ्	त. अनिट्, उभय	१४७२
कृड	तु. सेट्, परस्मै	१३८२
कृती	तु. सेट्, परस्मै	१४३५
कृती	रु. सेट्, परस्मै	१४४७
कृप	चु. सेट्, उभय	१७४९
कृप	चु. सेट्, उभय	१८७०
कृपू	भ्वा. सेट्, आत्मने	७६२
कृवि	भ्वा. सेट्, परस्मै	५९८
कृश	दि. सेट्. परस्मै	१२२७
कृष	तु. अनिट्, उभय	१२८६
कृष	भ्वा. अनिट्, परस्मै	९९०
कॄ	क्र्या. सेट्, परस्मै	१४९६
कॄ	तु. सेट्, परस्मै	१४०९
कॄञ्	क्र्या. सेट्, उभय	१४८५
कॄत	चु. सेट्, उभय	१६५३
केत	चु. सेट्, उभय	१८९६
केपृ	भ्वा. सेट्, आत्मने	३६८
केलृ	भ्वा. सेट्, परस्मै	५३७
कै	भ्वा. अनिट्, परस्मै	९१६
क्नथ	भ्वा. सेट्, परस्मै	८००
क्नसु	दि. सेट्, परस्मै	१११३
क्नूञ्	क्र्या. सेट्, उभय	१४८०
क्नूयी	भ्वा. सेट्, आत्मने	४८५
क्मर	भ्वा. सेट्, परस्मै	५५५
क्रथ	भ्वा. सेट्, परस्मै	८०१
क्रदि	भ्वा. सेट्, आत्मने	७७३
क्रदि	भ्वा. सेट्, परस्मै	७१
आङः	क्रन्द चु. सेट्, उभय	१७२८
क्रप	भ्वा. सेट्, आत्मने	७७१
क्रमु	भ्वा. सेट्, परस्मै	४७३
डु क्रीञ्	क्र्या. अनिट्, उभय	१४७३
क्रीड़	भ्वा. सेट्, परस्मै	३५०
क्रुञ्च	भ्वा. सेट्, परस्मै	१८६
क्रुड	तु. सेट्, परस्मै	१३९४
क्रुध	दि. अनिट्, परस्मै	११८९
क्रुश	भ्वा. अनिट्, परस्मै	८५६
क्लथ	भ्वा. सेट्, परस्मै	८०२
क्लदि	भ्वा. सेट्, आत्मने	७७४

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्लदि	भ्वा. सेट्, परस्मै	७२	क्षेवु	भ्वा. सेट्, परस्मै	५६८
क्लमु	दि. सेट्, परस्मै	१२०७	क्षै	भ्वा. अनिट्, परस्मै	९१३
क्लिदि	भ्वा. सेट्, आत्मने	१५	क्षोट	चु. सेट्. उभय	१८७६
क्लिदि	भ्वा. सेट्, परस्मै	७३	क्ष्णु	अद. सेट्, परस्मै	१०३७
क्लिदू	दि. वेट्, परस्मै	१२४२	क्ष्मायी	भ्वा. सेट्, आत्मने	४८६
क्लिश	दि. सेट्, आत्मने	११६१	क्ष्मील	भ्वा. सेट्, परस्मै	५२०
क्लिशू	क्र्या. वेट्, परस्मै	१५२२	ञि क्ष्विदा	दि. सेट्, परस्मै	१२४४
क्लीबृ	भ्वा. सेट्. आत्मने	३८१	क्ष्वे	भ्वा. सेट्, परस्मै	५३९
क्लेश	भ्वा. सेट्, आत्मने	६०७	खच	क्र्या. सेट्, परस्मै	१५३१
क्वण	भ्वा. सेट्, परस्मै	४५०	खज	भ्वा. सेट्, परस्मै	२३२
क्वथे	भ्वा. सेट्, परस्मै	८४६	खजि	भ्वा. सेट्, परस्मै	२३३
क्षजि	भ्वा. सेट्, आत्मने	७६९	खट	भ्वा. सेट्, परस्मै	३०९
क्षणु	तना. सेट्, उभय	१४६५	खट्ट	चु. सेट्, उभय	१६३२
क्षपि	चु. सेट्, उभय	१६२०	खड	चु. सेट्, उभय	१५८०
क्षमू	दि. वेट्, परस्मै	१२०६	खडि	चु. सेट्, उभय	१५८१
क्षमूष्	भ्वा. वेट्, आत्मने	४४२	खडि	भ्वा. सेट्, आत्मने	२८३
क्षर	भ्वा. सेट्, परस्मै	८५१	खद	भ्वा. सेट्, परस्मै	५०
क्षल	चु. सेट्, उभय	१५९७	खनु	भ्वा. सेट्, उभय	८७८
क्षि	तु. सेट्, परस्मै	१४०७	खर्ज	भ्वा. सेट्, परस्मै	२२९
क्षि	भ्वा. अनिट्, परस्मै	२३६	खर्द	भ्वा. सेट्, परस्मै	६०
क्षि	स्वा. अनिट्, परस्मै	१२७६	खर्ब	भ्वा. सेट्, परस्मै	४२१
क्षिणु	तना. सेट्, उभय	१४६६	खर्व	भ्वा. सेट्, परस्मै	५८२
क्षिप	चु. सेट्, उभय	१९४२	खल	भ्वा. सेट्, परस्मै	५४५
क्षिप	जु. अनिट्, परस्मै	११२१	खष	भ्वा. सेट्, परस्मै	६८६
क्षिप	तु. अनिट्, उभय	१२८५	खाद्ट	भ्वा. सेट्, परस्मै	४९
क्षीज	भ्वा. सेट्, परस्मै	२३७	खिट	भ्वा. सेट्, परस्मै	३०२
क्षीवु	भ्वा. सेट्, परस्मै	५६७	खिद	दि. अनिट्, आत्मने	११७०
क्षीवृ	भ्वा. सेट्. आत्मने	३८२	खिद	तु. सेट्, परस्मै	१४३६
क्षीष्	क्र्या. अनिट्, परस्मै	१५०६	खिद	रु. अनिट्, आत्मने	१४४९
टु क्षु	अद. सेट्, परस्मै	१०३६	खुजु	भ्वा. सेट्, परस्मै	२००
क्षुदिर्	रु. अनिट्, उभय	१४४३	खुडि	चु. सेट्, उभय	१५८५
क्षुध	दि. अनिट्. परस्मै	११९०	खुर	तु. सेट्, परस्मै	१३४२
क्षुभ	क्र्या. सेट्, परस्मै	१५१९	खुर्द	भ्वा. सेट्, आत्मने	२२
क्षुभ	दि. सेट्, परस्मै	१२३९	खेट	चु. सेट्, उभय	१८७५
क्षुभ	भ्वा. सेट्, आत्मने	७५१	खेलृ	भ्वा. सेट्, परस्मै	५३८
क्षुर	तु. सेट्, परस्मै	१३४४	खै	भ्वा. अनिट्, परस्मै	९१२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

खोर्ऋ	भ्वा. सेट्, परस्मै	५५२	गुण	चु. सेट्, उभय	१८९५
खोलृ	भ्वा. सेट्, परस्मै	५५१	गुद	भ्वा. सेट्, आत्मने	२४
ख्या	अद. अनिट्, परस्मै	१०६०	गुध	क्र्या. सेट्, परस्मै	१५१७
गज	चु. सेट्, उभय	१६४७	गुध	दि. सेट्, परस्मै	११२०
गज	भ्वा. सेट्, परस्मै	२४६	गुप	चु. सेट्, उभय	१७७२
गजि	भ्वा. सेट्, परस्मै	२४७	गुप	दि. सेट्, परस्मै	१२३४
गड	भ्वा. सेट्, परस्मै	७७७	गुप	भ्वा. सेट्, आत्मने	९७०
गडि	भ्वा. सेट्, परस्मै	६५	गुपू	भ्वा. सेट्, परस्मै	३९५
गडि	भ्वा. सेट्. परस्मै	३६१	गुफ	तु. सेट्, परस्मै	१३१७
गण	चु. सेट्, उभय	१८५४	गुम्फ	तु. सेट्, परस्मै	१३१८
गद	चु. सेट्, उभय	१८६१	गुरी	तु. सेट्, आत्मने	१३९६
गद	भ्वा. सेट्, परस्मै	५२	गुर्द	चु. सेट्, उभय	१६६५
गन्ध	चु. सेट्, आत्मने	१६८४	गुर्द	भ्वा. सेट्, आत्मने	२३
गम्लृ	भ्वा. अनिट्, परस्मै	९८२	गुर्वी	भ्वा. सेट्, परस्मै	५७४
गर्ज	भ्वा. सेट्, परस्मै	२२६	गुहू	भ्वा. वेट्, उभय	८९६
गर्द	भ्वा. सेट्, परस्मै	५७	गूर	चु. सेट्, आत्मने	१६९४
गर्ब	भ्वा. सेट्, परस्मै	४२२	गूरी	दि. सेट्, आत्मने	११५४
गर्व	चु. सेट्, आत्मने	१९०८	गृ	चु. सेट्, आत्मने	१७०७
गर्व	भ्वा. सेट्, परस्मै	५८३	गृ	भ्वा. अनिट्, परस्मै	९३७
गर्ह	चु. सेट्, उभय	१८४६	गृज	भ्वा. सेट्, परस्मै	२४८
गर्ह	भ्वा. सेट्, आत्मने	६३६	गृजि	भ्वा. सेट्, परस्मै	२४९
गल	चु. सेट्. आत्मने	१६९९	गृधु	दि. सेट्, परस्मै	१२४६
गल	भ्वा. सेट्, परस्मै	५४६	गृह	चु. सेट्, आत्मने	१९००
गल्भ	भ्वा. सेट्, आत्मने	३९२	गृहू	भ्वा. वेट्, आत्मने	६५०
गल्ह	भ्वा. सेट्, आत्मने	६३७	गॄ	क्र्या. सेट्, परस्मै	१४९८
गवेष	चु. सेट्, उभय	१८८४	गॄ	तु. सेट्, परस्मै	१४१०
गा	जु. अनिट्, परस्मै	११०६	गेपृ	भ्वा. सेट्, आत्मने	३६९
गाङ्	भ्वा. अनिट्, आत्मने	९५०	गेवृ	भ्वा. सेट्, आत्मने	५०२
गाधृ	भ्वा. सेट्, आत्मने	४	गेषृ	भ्वा. सेट्, आत्मने	६१४
गाहू	भ्वा. वेट्, आत्मने	६४९	गै	भ्वा. अनिट्, परस्मै	९१७
गु	तु. अनिट्, परस्मै	१३९९	गोम	चु. सेट्, उभय	१८७७
गुङ्	भ्वा. अनिट्, आत्मने	९४९	गोष्ट	भ्वा. सेट्, आत्मने	२५७
गुज	तु. सेट्, परस्मै	१३६९	ग्रथि	भ्वा. सेट्, आत्मने	३६
गुजि	भ्वा. सेट्, परस्मै	२०३	ग्रन्थ	क्र्या. सेट्, परस्मै	१५१३
गुड	तु. सेट्, परस्मै	१३७०	ग्रन्थ	चु. सेट्, उभय	१८२६
गुडि	चु. सेट्, उभय	१५८४	ग्रन्थ	चु. सेट्, उभय	१८३९

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रस	चु. सेट्, उभय	१७५०
ग्रसु	भ्वा. सेट्, आत्मने	६३०
ग्रह	क्र्या. सेट्, उभय	१५३३
ग्राम	चु. सेट्, उभय	१८९३
ग्रुचु	भ्वा. सेट्, परस्मै	१९७
ग्लसु	भ्वा. सेट्, आत्मने	६३१
ग्लह	भ्वा. सेट्, आत्मने	६५१
ग्लुचु	भ्वा. सेट्, परस्मै	१९८
ग्लुञ्चु	भ्वा. सेट्, परस्मै	२०१
ग्लेपृ	भ्वा. सेट्, आत्मने	३६६
ग्लेपृ	भ्वा. सेट्, आत्मने	३७०
ग्लेवृ	भ्वा. सेट्, आत्मने	५०३
ग्लै	भ्वा. अनिट्, परस्मै	९०३
घघ	भ्वा. सेट्, परस्मै	१५९
घट	चु. सेट्, उभय	१७२४
घट	चु. सेट्, उभय	१७६७
घट	भ्वा. सेट्, आत्मने	७६३
घटि	चु. सेट्, उभय	१७६८
घट्ट	चु. सेट्, उभय	१६३०
घट्ट	भ्वा. सेट्, आत्मने	२५९
घस्लृ	भ्वा. अनिट्, परस्मै	७१५
घिणि	भ्वा. सेट्, आत्मने	४३४
घुङ्	भ्वा. अनिट्, आत्मने	९५२
घुट	तु. सेट्, परस्मै	१३८५
घुट	भ्वा. सेट्, आत्मने	७४६
घुण	तु. सेट्, परस्मै	१३३८
घुण	भ्वा. सेट्, आत्मने	४३७
घुणि	भ्वा. सेट्, आत्मने	४३५
घुर	तु. सेट्, परस्मै	१३४५
घुषि	भ्वा. सेट्, आत्मने	६५२
घुषिर्	चु. सेट्, उभय	१७२७
घुषिर्	भ्वा. सेट्, परस्मै	६५३
घूरी	दि. सेट्, आत्मने	११५५
घूर्ण	तु. सेट्, परस्मै	१३३९
घूर्ण	भ्वा. सेट्, आत्मने	४३८
घृ	चु. सेट्, उभय	१६५०
घृ	जु. अनिट्, परस्मै	१०९६
घृ	भ्वा. अनिट्, परस्मै	९३८
घृणि	भ्वा. सेट्, आत्मने	४३६
घृणु	त. सेट्, उभय	१४६९
घृषु	भ्वा. सेट्, परस्मै	७०८
घ्रा	भ्वा. अनिट्, परस्मै	९२६
ङुङ्	भ्वा. अनिट्, आत्मने	९५४
चक	भ्वा. सेट्, परस्मै	७८३
चक	भ्वा. सेट्, आत्मने	९३
चकासृ	अद. सेट्, परस्मै	१०७४
चक्क	चु. सेट्, उभय	१५९५
चक्षिङ्	अद. सेट्, आत्मने	१०१७
चञ्चु	भ्वा. सेट्, परस्मै	१९०
चट	चु. सेट्, उभय	१७२२
चडि	भ्वा. सेट्, आत्मने	२७८
चण	भ्वा. सेट्, परस्मै	७९६
चते	भ्वा. सेट्, उभय	८६५
चदि	भ्वा. सेट्, परस्मै	६८
चदे	भ्वा. सेट्, उभय	८६६
चप	भ्वा. सेट्, परस्मै	३९९
चपि	चु. सेट्, उभय	१६१९
चमु	भ्वा. सेट्, परस्मै	४६९
चमू	स्वा. सेट्, परस्मै	१२७४
चय	भ्वा. सेट्, आत्मने	४७८
चर	चु. सेट्, उभय	१७४६
चर	भ्वा. सेट्, परस्मै	५५९
चर्करीतं च	अद.	१०८१
चर्च	चु. सेट्, उभय	१७१२
चर्च	तु. सेट्, परस्मै	१२९९
चर्च	भ्वा. सेट्, परस्मै	७१७
चर्ब	भ्वा. सेट्, परस्मै	४२५
चर्व	भ्वा. सेट्, परस्मै	५७९
चल	चु. सेट्, उभय	१६०८
चल	तु. सेट्, परस्मै	१३५६
चल	भ्वा. सेट्, परस्मै	८१२
चल	भ्वा. सेट्, परस्मै	८३२

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चष	भ्वा. सेट्, उभय	८८९
चह	चु. सेट्, उभय	१६२६
चह	चु. सेट्, उभय	१८६७
चह	भ्वा. सेट्, परस्मै	७२९
चायृ	भ्वा. सेट्. उभय	८८०
चि	चु. सेट्, उभय	१७९५
चिञ्	चु. सेट्, उभय	१६२९
चिञ्	स्वा. अनिट्, उभय	१२५१
चिट	भ्वा. सेट्, परस्मै	३१५
चित	चु. सेट्, आत्मने	१६७३
चिति	चु. सेट्, उभय	१५३५
चिती	भ्वा. सेट्, परस्मै	३९
चित्र	चु. सेट्, उभय	१९१८
चिरि	स्वा. सेट्, परस्मै	१२७७
चिल	तु. सेट्, परस्मै	१३५५
चिल्ल	भ्वा. सेट्, परस्मै	५३३
चीक	चु. सेट्, उभय	१८२८
चीभृ	भ्वा. सेट्, आत्मने	३८४
चीव	चु. सेट्, उभय	१७७५
चीवृ	भ्वा. सेट्, उभय	८७९
चुक्क	चु. सेट्, उभय	१५९६
चुट	चु. सेट्, उभय	१६१३
चुट	तु. सेट्, परस्मै	१३७७
चुटि	चु. सेट्, उभय	१६५९
चुट्ट	चु. सेट्, उभय	१५६०
चुड	तु. सेट्, परस्मै	१३९२
चुडि	भ्वा. सेट्, परस्मै	३२५
चुड्ड	भ्वा. सेट्, परस्मै	३४७
चुद	चु. सेट्, उभय	१५९२
चुप	भ्वा. सेट्, परस्मै	४०३
चुबि	चु. सेट्, उभय	१६३५
चुबि	भ्वा. सेट्, परस्मै	४२९
चुर	चु. सेट्, उभय	१५३४
चुल	चु. सेट्, उभय	१६०२
चुल्ल	भ्वा. सेट्, परस्मै	५३१
चूरी	दि. सेट्, आत्मने	११५८

चूर्ण	चु. सेट्, उभय	१६४१
चूर्ण	चु. सेट्, उभय	१५५२
चूष	भ्वा. सेट्, परस्मै	६७३
चृती	तु. सेट्, परस्मै	१३२४
चेल	भ्वा. सेट्, परस्मै	५३६
चेष्ट	भ्वा. सेट्, आत्मने	२५६
च्यु	चु. सेट्, उभय	१७४७
च्युङ्	भ्वा. अनिट्, आत्मने	९५५
च्युतिर्	भ्वा. सेट्, परस्मै	४०
छजि	चु. सेट्, उभय	१६२१
छद	चु. सेट्, उभय	१८३४
छद	चु. सेट्, उभय	१९३६
छदि	चु. सेट्, उभय	१५७७
छदिः	भ्वा. सेट्, परस्मै	८१३
छमु	भ्वा. सेट्, परस्मै	४७०
